१. श्री कुमारसेनस्य शिष्यः प्रभाचन्द्र आसीत् येन चन्द्रोदय नाम शास्त्रं रचितम् । आदिपुराणे श्रीजिनसेनाचार्येणापि प्रभाचन्द्रस्य स्मरणं कृतम्—"चन्द्रांशुशुभ्रयशसं प्रभाचन्द्रकविं स्तुवे । कृत्वा चन्द्रोदयं येन शश्वदाह्लादितं जगत् ॥" । २. न केनापि विजितम् । ३. यामिताभ्युदयपार्श्वं -ख० । यामिताभ्युदये पार्श्वं -म०, पार्श्वे = पार्श्वनाथतीर्थङ्करदेवे । ४. पण्डितानां मनःस्फाटिकभित्तिषु । ५. गुणान् बिभर्ति इति सम्बन्धः । ६. पण्डितपरिषदः । ७. कल्लोलाः । ८. सभाभिः । ९. मुखे म० । १०. दुर्जननागान् । ११. उत्तमनृपाः । पक्षे उत्तमविषवैद्याः ।

* यहाँ भी वर्धमान पुराणके रचयिताका नाम प्रकट नहीं किया गया है ।

† गिरां वाणीनाम् ईशा गिरीशाः विद्वांसः, पक्षे गिरीणां पर्वतानामीशा गिरीशाः ।

रजोबहुलमारूक्षं खलं कालं विदाहिनम्[2] । सन्तः काले कलध्वानाः शमयन्ति यथा घनाः ॥४७॥
साध्वसाधुसमाकारप्रवृत्तमबुधं बुधाः । वारयन्ति तमोराशिं रवीन्द्वोरिव रश्मयः ॥४८॥
इत्थं साधुसहायोऽहमनातङ्कमनुद्धतम् । देहं काव्यमयं लोके करोमि स्थिरमात्मनः ॥४९॥
बद्धमूलं भुवि ख्यातं बहुशाखाविभूषितम् । पृथुपुण्यफलं पूतं कल्पवृक्षसमं परम् ॥५०॥
अरिष्टनेमिनाथस्य चरितेनोज्ज्वलीकृतम् । पुराणं हरिवंशाख्यं ख्यापयामि मनोहरम् ॥५१॥ [युग्मम्]
द्युमणिद्योतितं[3] द्योत्यं द्योतयन्ति यथाणवः[4] । मणिप्रदीपखद्योतविद्युतोऽपि यथायथम् ॥५२॥
द्योतितस्य तथा तस्य पुराणस्य महात्मभिः । द्योतने वर्ततेऽस्यल्पो मादृशोऽप्यनुरूपतः ॥५३॥
विप्रकृष्टमपि ह्यर्थं सौकुमार्ययुतं मनः । [5]सूरिसूर्यकृतालोकं लोकचक्षुरिवेक्षते ॥५४॥
पञ्चधाप्रविभक्तार्थं[6] क्षेत्रादिप्रविभागतः । प्रमाणमागमाख्यं तत्प्रमाणपुरुषोदितम् ॥५५॥
तथाहि मूलतन्त्रस्य कर्ता तीर्थंकरः स्वयम् । ततोऽप्युत्तरतन्त्रस्य गौतमाख्यो गणाग्रणीः ॥५६॥
उत्तरोत्तरतन्त्रस्य कर्त्तारो बहवः क्रमात् । प्रमाणं तेऽपि नः सर्वे सर्वज्ञोक्त्यनुवादिनः[7] ॥५७॥
त्रयः केवलिनः पञ्च ते चतुर्दशपूर्विणः । क्रमेणैकादश प्राज्ञा विज्ञेया दशपूर्विणः ॥५८॥
पञ्चैवैकादशाङ्गानां धारकाः परिकीर्तिताः । आचाराङ्गस्य चत्वारः[8] पञ्चधेति युगस्थितिः ॥५९॥

जिस प्रकार मधुर गर्जना करनेवाले मेघ, अत्यधिक धूलिसे युक्त, रूक्ष और तीव्र दाह उत्पन्न करनेवाले ग्रीष्मकालको समय आनेपर शान्त कर देते हैं उसी प्रकार मधुर भाषण करनेवाले सत्पुरुष, अत्यधिक अपराध करनेवाले, कठोर प्रकृति एवं सन्ताप उत्पन्न करनेवाले दुष्ट पुरुषको समय आने पर शान्त कर लेते हैं ॥४७॥ जिस प्रकार सूर्य और चन्द्रमाकी किरणें, अच्छे और बुरे पदार्थोंको एकाकार करनेमें प्रवृत्त अन्धकारकी राशिको दूर कर देती हैं उसी प्रकार विद्वान् मनुष्य, सज्जन और दुर्जनके साथ समान प्रवृत्ति करनेमें तत्पर मूर्ख मनुष्यको दूर कर देती हैं ॥४८॥ इस प्रकार साधुओंकी सहायता पाकर मैं रोग और अभिमानसे रहित अपने इस काव्यरूपी शरीरको संसारमें स्थायी करता हूँ ॥४९॥ अब मैं उस हरिवंश पुराणको कहता हूँ जो बद्धमूल है— प्रारम्भिक इतिहाससे सहित (पक्षमें जड़से युक्त है), पृथिवीमें अत्यन्त प्रसिद्ध है, अनेक शाखाओं—कथाओं-उपकथाओंसे विभूषित है, विशाल पुण्यरूपी फलसे युक्त है, पवित्र है, कल्पवृक्षके समान है, उत्कृष्ट है, श्री नेमिनाथ भगवान्के चरित्रसे उज्ज्वल है, और मनको हरण करनेवाला है ॥५०-५१॥ जिस प्रकार सूर्यके द्वारा प्रकाशित पदार्थको, अत्यन्त तुच्छ तेजके धारक मणि, दीपक, जुगनू तथा बिजली आदि भी यथायोग्य—अपनी-अपनी शक्तिके अनुसार प्रकाशित करते हैं उसी प्रकार बड़े-बड़े विद्वान् महात्माओंके द्वारा प्रकाशित इस पुराणके प्रकाशित करनेमें मेरे जैसा अल्प शक्तिका धारक पुरुष भी अपनी सामर्थ्यके अनुसार प्रवृत्त हो रहा है ॥५२-५३॥ जिस प्रकार सूर्यका आलोक पाकर मनुष्यका नेत्र दूरवर्ती पदार्थको भी देख लेता है उसी प्रकार पूर्वाचार्य रूपी सूर्यका आलोक पाकर मेरा सुकुमार मन अत्यन्त दूरवर्ती—कालान्तरित पदार्थको भी देखनेमें समर्थ है ॥५४॥ जिसके प्रतिपादनीय पदार्थ-क्षेत्र, द्रव्य, काल, भव और भावके भेदसे पाँच भेदोंमें विभक्त हैं तथा प्रामाणिक पुरुषों—आप्तजनोंने जिसका निरूपण किया है ऐसा आगम नामका प्रमाण, प्रसिद्ध प्रमाण है ॥५५॥ इस तन्त्रके मूलकर्ता स्वयं श्री वर्धमान तीर्थंकर हैं, उनके बाद उत्तर तन्त्रके कर्ता श्री गौतम गणधर हैं, और उनके अनन्तर उत्तरोत्तर तन्त्रके कर्ता क्रमसे अनेक आचार्य हुए हैं सो वे सभी सर्वज्ञके कथनका अनुवाद करनेवाले होनेसे हमारे लिए प्रमाणभूत हैं ॥५६-५७॥ इस पञ्चमकालमें तीन केवली, पाँच चौदह पूर्वके ज्ञाता,

१. पापप्रचुरं पक्षे धूलिबहुलम् । २. दाहोत्पादकम् उष्णकालम् । ३. द्योतनं म० । ४. लघवः । ५. आचार्यैरविप्रकटीकृतम् । ६. द्रव्यक्षेत्रकालादिभिरन्तरितार्थं मूर्तामूर्तम् । ७. सर्वज्ञवाणीप्रकाशकाः । ८. केवलिनः चतुर्दशपूर्वधारिणः, दशपूर्वधारिणः, एकादशाङ्गधारिणः, एकाङ्गधारिणः एते पञ्चधा मुनयः ।

वर्धमानजिनेन्द्राऽऽस्यादिन्द्रभूतिः श्रुतं दधे । ततः सुधर्मस्तस्मात्तु जम्बूनामान्त्यकेवली ॥६०॥
तस्माद्विष्णुः क्रमात् तस्मान्नन्दिमित्रोऽपराजितः । ततो गोवर्धनो दध्रे भद्रबाहुः श्रुतं ततः ॥६१॥
दशपूर्वी विशाखाख्यः प्रोष्ठिलः क्षत्रियो जयः । नागसिद्धार्थनामानौ धृतिषेणगुरुस्ततः ॥६२॥
विजयो बुद्धिलाभाख्यो गङ्गदेवाभिधस्ततः । दशपूर्वधरोऽन्त्यस्तु धर्मसेनमुनीश्वरः ॥६३॥
नक्षत्राख्यो यशःपालः[1] पाण्डुरेकादशाङ्गधृक्[2] । ध्रुवसेनमुनिस्तस्मात् कंसाचार्यस्तु पञ्चमः ॥६४॥
सुभद्रोऽतो यशोभद्रो यशोबाहुरनन्तरः । लोहाचार्यस्तुरीयोऽभूदाचाराङ्गधृतां[3] ततः ॥६५॥
पूर्वाचार्येभ्य एतेभ्यः परेभ्यश्च वितन्वतः । एकदेशागमस्यायमेकदेशोऽपदिश्यते ॥६६॥
अर्थतः पूर्व एवायमपूर्वो ग्रन्थतोऽल्पतः । शास्त्रविस्तरभीरुभ्यः क्रियते सारसंग्रहः ॥६७॥
मनोवाक्कायशुद्धस्य भव्यस्याभ्यस्यतः सदा । श्रेयस्करपुराणार्थो वक्तुः श्रोतुश्च जायते ॥६८॥
बाह्याभ्यन्तरभेदेन द्विविधेऽपि तपोविधौ । अज्ञानप्रतिपक्षत्वात् स्वाध्यायः परमं तपः ॥६९॥
यतस्ततः पुराणार्थः पुरुषार्थकरः परः । वक्तव्यो देशकालज्ञैः श्रोतव्यस्त्यक्तमत्सरैः ॥७०॥
लोकसंस्थानमत्रादौ राजवंशोद्भवस्ततः । हरिवंशावतारोऽतो वसुदेवविचेष्टितम् ॥७१॥
चरितं नेमिनाथस्य द्वारवत्या[4] निवेशनम् । युद्धवर्णननिर्वाणे पुराणेऽष्टौ शुभा इमे ॥७२॥
सङ्ग्रहादधिकारैः स्वैः सङ्गृहीतैरलङ्कृताः । अधिकाराः सूत्रिताः प्राक्सूरिसूत्रानुसारिभिः[5] ॥७३॥

पाँच ग्यारह अंगोंके धारक, ग्यारह दशपूर्वके जानकार और चार आचारांगके ज्ञाता इस तरह पाँच प्रकारके मुनि हुए हैं ॥५८-५९॥

श्री वर्धमान जिनेन्द्रके मुखसे श्री इन्द्रभूति (गौतम) गणधरने श्रुतको धारण किया उनसे सुधर्माचार्यने और उनसे जम्बू नामक अन्तिम केवलीने ॥६०॥ उनके बाद क्रमसे १ विष्णु, २ नन्दिमित्र, ३ अपराजित, ४ गोवर्धन, और ५ भद्रबाहु ये पाँच श्रुतकेवली हुए ॥६१॥ इनके बाद ग्यारह अङ्ग और दशपूर्वके जाननेवाले निम्नलिखित ग्यारह मुनि हुए—१ विशाख, २ प्रोष्ठिल, ३ क्षत्रिय, ४ जय, ५ नाग, ६ सिद्धार्थ, ७ धृतिषेण, ८ विजय, ९ बुद्धिल, १० गङ्गदेव, और ११ धर्मसेन ॥६२-६३॥ इनके अनन्तर १ नक्षत्र, २ यशःपाल, ३ पाण्डु, ४ ध्रुवसेन और ५ कंसाचार्य ये पाँच मुनि ग्यारह अङ्गके ज्ञाता हुए ॥६४॥ तदनन्तर १ सुभद्र, २ यशोभद्र, ३ यशोबाहु और लोहार्य ये चार मुनि आचाराङ्गके धारक हुए ॥ ६५॥ इस प्रकार इन तथा अन्य आचार्योंसे जो आगमका एकदेश विस्तारको प्राप्त हुआ था उसीका यह एकदेश यहाँ कहा जाता है ॥६६॥ यह ग्रन्थ अर्थकी अपेक्षा पूर्व ही है अर्थात् इस ग्रन्थमें जो वर्णन किया गया है वह पूर्वाचार्योंसे प्रसिद्ध ही है परन्तु शास्त्रके विस्तारसे डरनेवाले लोगोंके लिए इसमें संक्षेपसे सारभूत पदार्थोंका संग्रह किया गया है इसलिए इस रचनाकी अपेक्षा यह अपूर्व अर्थात् नवीन है ॥६७॥ जो भव्यजीव मन वचन कायकी शुद्धिपूर्वक सदा इसका अभ्यास करते हुए कथन अथवा श्रवण करेंगे उनके लिए यह पुराण कल्याण करनेवाला होगा ॥६८॥ बाह्य और आभ्यन्तरके भेदसे तप दो प्रकारका कहा गया है सो उन दोनों प्रकारके तपोंमें अज्ञानका विरोधी होनेसे स्वाध्याय परम तप कहा गया है ॥६९॥ यतश्च इस पुराणका अर्थ उत्तम पुरुषार्थोंका करनेवाला है इसलिए देश कालके ज्ञाता मनुष्योंके लिए मात्सर्यभाव छोड़कर इसका कथन तथा श्रवण करना चाहिए ॥७०॥

इस पुराणमें सर्व प्रथम लोकके आकारका वर्णन, फिर राजवंशोंकी उत्पत्ति, तदनन्तर हरिवंशका अवतार, फिर वसुदेवकी चेष्टाओंका कथन, तदनन्तर नेमिनाथका चरित, द्वारिकाका निर्माण, युद्धका वर्णन और निर्वाण—ये आठ शुभ अधिकार कहे गये हैं ॥७१-७२॥ ये सभी

---

१. यशःपालपाण्डु -ख०,म० । २. धृग् म० । ३. धृतस्ततः म० । ४. द्वारावत्या म० । ५. पूर्वाचार्यकृतशास्त्रानुगामिभिः ।

सङ्ग्रहेण विभागेन विस्तारेण च वस्तुनः । शासने देशना यस्माद् विभागः कथ्यते ततः ॥७४॥
वर्धमानजिनेन्द्रस्य धर्मतीर्थप्रवर्तनम् । गणभृद्गणसंख्यानं भूयो राजगृहागमम् ॥७५॥
[1]गौतमश्रेणिकप्रश्ने क्षेत्रकालनिरूपणम् । ततः कुलकरोत्पत्तिमुत्पत्तिं वृषभस्य च ॥७६॥
कीर्तनं क्षत्रियादीनां हरिवंशप्रवर्तनम् । मुनिसुव्रतनाथस्य तत्र वंशे समुद्भवम् ॥७७॥
दक्षप्रजापतेर्वृत्तं वसुवृत्तान्तमेव च । जननं वृष्णिपुत्राणां सुप्रतिष्ठस्य केवलम् ॥७८॥
वृष्णिदीक्षां तथा राज्यं समुद्रविजयस्य तु । वसुदेवस्य सौभाग्यमुपायेन च निर्गमम् ॥७९॥
लाभं कन्यकयोस्तस्य सोमाविजयसेनयोः । वन्यहस्तिवशीकारं श्यामया सह सङ्गमम् ॥८०॥
अङ्गारकेण हरणं चम्पायां च विमोचनम् । लाभं गन्धर्वसेनाया मुनेर्विष्णोर्विचेष्टितम् ॥८१॥
चरितं चारुदत्तस्य तस्यैव मुनिदर्शनम् । चारुनीलयशोलाभं सोमश्रीलाभमेव च ॥८२॥
वेदोत्पत्तिमुपाख्यानं सौदासस्य नृपस्य तु । कपिलाकन्यकालाभं पद्मावत्युपलम्भनम् ॥८३॥
सम्प्राप्तिं चारुहासिन्या रत्नवत्यास्ततोऽपि च । सोमदत्तसुतालाभं वेगवत्याश्च सङ्गमम् ॥८४॥
लाभं मदनवेगाया बालचन्द्रावलोकनम् । प्रियङ्गुसुन्दरीलाभं बन्धुमत्या समन्वितम् ॥८५॥
प्रभावत्याः परिप्राप्तिं रोहिण्याश्च स्वयंवरम् । संग्रामे विजयं तस्य भ्रातृभिः सह सङ्गमम् ॥८६॥
बलदेवसमुत्पत्तिं कंसोपाख्यानमेव च । जरासन्धस्य वचनात् [2]सिंहस्यन्दनबन्धनम् ॥८७॥
तथा जीवद्यशोलाभं कंसस्य पितृबन्धनम् । देवक्या सह संयोगं ततोऽप्यानकदुन्दुभेः ॥८८॥

अधिकार संग्रहकी भावनासे संगृहीत अपने अवान्तर अधिकारोंसे अलंकृत हैं तथा पूर्वाचार्यों द्वारा निर्मित शास्त्रोंका अनुसरण करनेवाले मुनियोंके द्वारा गुम्फित हैं ॥७३॥ वस्तुका निरूपण करनेके लिए दो प्रकारकी देशना पाई जाती है एक विभाग रूपसे और दूसरी विस्तार रूपसे । इनमेंसे यहाँ विभागरूपीय देशनाका निरूपण किया जाता है ॥७४॥ प्रथम ही इस ग्रन्थमें श्री वर्धमान जिनेन्द्रकी धर्मतीर्थकी प्रवृत्तिका वर्णन है फिर गणधरोंकी संख्या और भगवान्के राजगृहमें आगमनका निरूपण है ॥७५॥ तदनन्तर श्रेणिक राजाका गौतम स्वामीसे प्रश्न करना, तदनन्तर क्षेत्र, कालका निरूपण, फिर कुलकरोंकी उत्पत्ति और भगवान् ऋषभदेवकी उत्पत्तिका वर्णन है ॥७६॥ तत्पश्चात् क्षत्रिय आदि वर्णोंका निरूपण, हरिवंशकी उत्पत्तिका कथन और उसी हरिवंशमें भगवान् मुनिसुव्रतके जन्म लेनेका निरूपण है ॥७७॥ तदनन्तर दक्ष प्रजापतिका उल्लेख, वसुका वृत्तान्त, अन्धक वृष्णिके दशकुमारोंका जन्म, सुप्रतिष्ठ मुनिके केवलज्ञानकी उत्पत्ति, राजा अन्धक वृष्णिकी दीक्षा, समुद्रविजयका राज्य, वसुदेवका सौभाग्य, उपायपूर्वक वसुदेवका बाहर निकलना, वहाँ उन्हें सोमा और विजयसेना कन्याओंका लाभ होना, जङ्गली हाथीका वश करना, श्यामाके साथ वसुदेवका सङ्गम, अङ्गारक विद्याधरके द्वारा वसुदेवका हरण, चम्पा नगरीमें वसुदेवका छोड़ना, वहाँ गन्धर्वसेनाका लाभ, विष्णुकुमार मुनिका चरित, सेठ चारुदत्तका चरित, उसीको मुनिका दर्शन होना, तथा वसुदेवको सुन्दरी नीलयशा और सोमश्रीका लाभ होनेका वर्णन है ॥७८-८२॥ तदनन्तर वेदोंकी उत्पत्ति, राजा सौदासकी कथा, वसुदेवको कपिला कन्या और पद्मावतीका लाभ, चारुहासिनी और रत्नवतीकी प्राप्ति, सोमदत्तकी पुत्रीका लाभ, वेगवतीका समागम, मदनवेगाका लाभ, बालचन्द्राका अवलोकन, प्रियङ्गुसुन्दरीका लाभ, बन्धुमतीका समागम, प्रभावतीकी प्राप्ति, रोहिणीका स्वयंवर, संग्राममें वसुदेवकी जीत और उनका भाइयोंके साथ समागम होनेका कथन है ॥८३-८६॥ तत्पश्चात् बलदेवकी उत्पत्ति, कंसका व्याख्यान, जरासन्धके कहनेसे राजा सिंहरथका बाँधना, कंसको जीवद्यशाकी प्राप्ति होना, पिता उग्रसेनको बन्धनमें डालना, देवकीके साथ वसुदेवका समागम होना, 'देवकीके पुत्रके हाथसे मेरा मरण है'

१. गौतमश्रेणिकप्रश्नं म०, ख० । २. सिंहरथबन्धनम् ।

सत्यातिमुक्तकादेशं कंससंक्षोभकारणम् । प्रार्थनं वसुदेवस्य देवकीप्रसवं प्रति ॥८९॥
[1]आनकेन मुनेः प्रश्नमष्टपुत्रभवान्तरम् । चरितं नेमिनाथस्य पापप्रमथनं तथा ॥९०॥
उत्पत्तिं [2]वासुदेवस्य गोकुले बालचेष्टितम् । ग्रहणं सर्वशास्त्राणां बलदेवोपदेशतः ॥९१॥
चापरत्नसमारोपं कालिन्द्यां नागनाथनम् । वाजिवारणचाणूरमल्लकंसवधं ततः ॥ ९२॥
उग्रसेनस्य राज्यं च सत्यभामाकरग्रहम् । [3]सर्वज्ञातिसमेतस्य प्रीतिं च परमां हरेः ॥९३॥
जीवद्यशोविलापं च जरासन्धरुषं ततः । प्रेषितस्य रणे कालयवनस्य पराभवम् ॥९४॥
तथाऽपराजितस्यापि मारणं हरिणा रणे । शौरीणां परमं तोषमकुतोभयतः स्थितिम् ॥९५॥
शिवादेव्याः सुतोत्पत्तौ षोडशस्वप्नदर्शनम् । फलानां कथनं पत्या नेमिनाथसमुद्भवम् ॥९६॥
मेरौ जन्माभिषेकं च बालक्रीडामहोदयम् । जरासन्धातिसन्धानं [4]शौरिसागरसंश्रयम् ॥९७॥
देवताकृतमायातो जरासन्धनिवर्तनम् । विष्णोः [5]साष्टमभक्तस्य दर्भशय्याविरोहणम् ॥९८॥
गौतमेनेन्द्रवचनात् सागरस्यापसारणम् । कुबेरेण क्षणात्तत्र द्वारावत्या निवेशनम् ॥९९॥
रुक्मिणीहरणं [6]भास्वद्भानुप्रद्युम्नसम्भवम् । [7]रौक्मिणेयहृतिं पूर्ववैरिणा धूमकेतुना ॥१००॥
विजयार्द्धस्थितिं पित्रोर्नारदेनेष्टसूचनम् । प्राप्तिं षोडशलाभानां प्रज्ञप्तेरुपलम्भनम् ॥१११॥
कालसंवरसङ्ग्रामं पितृमातृसमागमम् । शम्बोत्पत्तिं शिशुक्रीडां प्रश्नं चापि पितुःपितुः ॥१०२॥
तेन [8]स्वहिण्डनाख्यानं कुमाराणां च कीर्त्तनम् । वार्तोपलम्भाद् दूतस्य प्रेषणं प्रतिशत्रुणा ॥१०३॥

ऐसा श्री सत्यवादी अतिमुक्तक मुनिका आदेश सुन कंसका व्याकुल होना, 'देवकीका प्रसव हमारे घर ही हो' इस प्रकार कंसकी वसुदेवसे प्रार्थना करना, वसुदेवका अतिमुक्तक मुनिसे प्रश्न, देवकीके आठ पुत्रोंके भवान्तर पूछना और भगवान् नेमिनाथके पापापहारी चरितका निरूपण है ॥८७-९०॥ तदनन्तर श्रीकृष्णकी उत्पत्ति, गोकुलमें उनकी बालचेष्टाएँ, बलदेवके उपदेशसे समस्त शास्त्रोंका ग्रहण, धनुष रत्नका चढ़ाना, यमुनामें नागको नाथना, घोड़ा, हाथी, चाणूरमल्ल और कंसका वध, उग्रसेनका राज्य, सत्यभामाका पाणिग्रहण, सर्वकुटुम्बियों सहित श्रीकृष्णका परम प्रीतिका अनुभव करना, कंसकी स्त्री जीवद्यशाका विलाप, जरासन्धका क्रोध, रणमें भेजे हुए कालयवनका पराजय, श्रीकृष्णके द्वारा युद्धमें अपराजितका मारा जाना, यादवोंका परमहर्ष और निर्भयताके साथ रहना, पुत्रोत्पत्तिके निमित्त शिवादेवीके सोलह स्वप्न देखना, पतिके द्वारा स्वप्नोंका फल कहा जाना, नेमिनाथ भगवान्का जन्म, सुमेरु पर्वतपर उनका जन्माभिषेक होना, भगवान्की बालक्रीड़ा और महान् अभ्युदयका विस्तार, जरासंधका पीछा करना, यादवोंका सागरका आश्रय करना, देवीके द्वारा की हुई मायासे जरासन्धका लौटना, तीन दिनके उपवासका नियम लेकर कृष्णका डाभकी शय्यापर आरूढ़ होना, इन्द्रकी आज्ञासे गौतम नामक देवके द्वारा समुद्रका संकोच करना और कुबेरके द्वारा वहाँ क्षणभरमें द्वारावती (द्वारिका) नगरीकी रचना होना इन सबका वर्णन है ॥९१-९९॥ तदनन्तर रुक्मिणीका हरा जाना, देदीप्यमान भानुकुमार और प्रद्युम्नकुमारका जन्म होना, रुक्मिणीके पुत्र प्रद्युम्नका पूर्वभवके वैरी धूमकेतु असुरके द्वारा हरण होना, विजयार्धमें प्रद्युम्नकी स्थिति, नारदके द्वारा प्रद्युम्नके माता-पिताको इष्ट समाचारकी सूचना देना, प्रद्युम्नको सोलह लाभों तथा प्रज्ञप्ति विद्याकी प्राप्ति होना, राजा कालसंवरके साथ प्रद्युम्नका युद्ध, मातापिताका मिलाप, शम्बकुमारकी उत्पत्ति, प्रद्युम्नकी बालक्रीड़ा, वसुदेवका प्रद्युम्नसे प्रश्न, प्रद्युम्न द्वारा अपने भ्रमणका वृत्तान्त, सकल यादव कुमारोंका कीर्तन, समाचार पाकर प्रति शत्रु जरासन्धका कृष्णके प्रति दूत भेजना, यादवोंकी

१. वसुदेवेन । २. कृष्णस्य । ३. सर्वकुटुम्बयुक्तस्य । ४. यादवानां समुद्राश्रयम् । ५. उपवासत्रययुक्तस्य । ६. शोभमानभानुकुमारप्रद्युम्नोत्पत्तिम् । ७. प्रद्युम्नस्य हरणम् । ८. स्वकीयपरिभ्रमणाख्यानम् ।

यादवानां सभाक्षोभं सेनयोरुपसर्पणम् । विजयार्धे [1]खगक्षोभं वसुदेवपराक्रमम् ॥१०४॥
अक्षौहिणीप्रमाणं च रथिनोऽतिरथांस्तथा । महासमरथान् सर्वान् नृपानर्धरथानपि ॥१०५॥
चक्रव्यूहव्यपोहार्थं गरुडव्यूहकल्पनम् । सिंहगारुडविद्यासु रथाप्तिं बलकृष्णयोः ॥१०६॥
नेमेः सारथिरूपेण मातुलेरुपसर्पणम् । नेम्यनावृष्णिपार्थैश्च चक्रव्यूहस्य भेदनम् ॥१०७॥
कदनं पाण्डुपुत्राणां धृतराष्ट्रसुतैः सह । सेनापत्योर्महायुद्धं कृष्णमागधयोरतः ॥१०८॥
चक्रोत्पत्तिं तदा विष्णोर्जरासन्धवधस्ततः । विजयं वसुदेवस्य खेचरीभिर्निवेदितम् ॥१०९॥
कृष्णकोटिशिलोत्क्षेपं वसुदेवागमं ततः । ततो दिग्विजयं दिव्यं रत्नानां च समुद्भवम् ॥११०॥
भ्रात्रोः राज्याभिषेकं च द्रौपदीहरणं सह । पाण्डवैर्धातकीखण्डाद् विष्णुनानयनं पुनः ॥१११॥
नेमिसामर्थ्यविज्ञानं मज्जनं तदनन्तरम् । पूरणं [2]पाञ्चजन्यस्य विवाहारम्भसम्भ्रमम् ॥११२॥
मृगमोक्षविधानं च दीक्षणं केवलोदयम् । देवागमविभूतिं च समवस्थानकीर्तनम् ॥११३॥
राजीमत्यास्तपःप्राप्तिं द्विधा धर्मोपदेशनम् । धर्मतीर्थविहारं च [3]षट्सहोदरसंयमम् ॥११४॥
ऊर्जयन्तनगारोहं देवकीप्रश्नसङ्कथाम् । रुक्मिणीसत्यभामादिमहादेवीभवान्तरम् ॥११५॥
कुमारस्य गजाख्यस्य सम्भवं तस्य दीक्षणम् । [4]वसुदेवेतरोद्विग्नवभ्रातृतपस्यनम् ॥११६॥
त्रिषष्टिपुरुषोद्भूतिं सजिनान्तरविस्तरम् । बलदेवपरिप्रश्नं ततः प्रद्युम्नदीक्षणम् ॥११७॥
रुक्मिण्यादिहरिस्त्रीणां दुहितॄणां च संयमम् । द्वीपायनमुनेः क्रोधाद् द्वारवत्या विनाशनम् ॥११८॥

सभामें क्षोभ उत्पन्न होना, दोनों सेनाओंका पास-पास आना, विजयार्ध पर्वतके विद्याधरोंमें क्षोभ उत्पन्न होना, श्री वसुदेवका पराक्रम, अक्षौहिणी दलका प्रमाण, रथी, अतिरथ, समरथ, और अर्धरथ राजाओंका निरूपण, जरासन्धके चक्रव्यूहको नष्ट करनेके लिए श्रीकृष्णकी सेनामें गरुड़व्यूहकी रचना होना, बलदेवको सिंहवाहिनी और कृष्णको गरुड़वाहिनी विद्याकी प्राप्ति होना, नेमिके सारथिके रूपमें उनके मामाके पुत्रका आगमन, नेमि, अनावृष्णि तथा अर्जुनके द्वारा चक्रव्यूहका भेदा जाना, पाण्डवोंका कौरवोंके साथ युद्ध, दोनों सेनाओंके अधिपति कृष्ण तथा जरासन्धके महायुद्धका वर्णन है ॥१००–१०८॥

तदनन्तर श्रीकृष्णके चक्ररत्नकी उत्पत्ति होना, जरासन्धका मारा जाना, विद्याधरियोंके द्वारा वसुदेवके लिए श्रीकृष्णकी विजयका समाचार सुनाना, कृष्णका कोटिशिलाका उठाना, वसुदेवका आगमन, श्रीकृष्णका दिग्विजय, दिव्यरत्नोंकी उत्पत्ति, दोनों भाइयोंका राज्याभिषेक, द्रौपदीका हरण, श्रीकृष्ण द्वारा पाण्डवोंके साथ जाकर धातकीखण्डसे द्रौपदीका पुनः वापिस लाना, श्रीकृष्णको नेमिनाथकी सामर्थ्यका ज्ञान होना, नेमिनाथकी जलक्रीड़ा, पाञ्चजन्य शङ्खका बजाना, नेमिनाथके विवाहका आरम्भ, पशुओंका छुड़ाना, दीक्षा लेना, केवलज्ञान उत्पन्न होना, ज्ञानकल्याणकके लिए देवोंका आगमन, समवसरणका निर्माण, राजीमतीका तप धारण करना, सागार और अनगारके भेदसे दो प्रकारके धर्मका उपदेश देना, धर्म-तीर्थोंमें विहार, श्रीकृष्णके छह भाइयोंका संयम धारण करना, नेमिनाथका गिरिनार पर्वतपर आरूढ़ होना, देवकीके प्रश्नका उत्तर देना, रुक्मिणी तथा सत्यभामा आदि आठ महादेवियोंके भवान्तरोंका निरूपण, गजकुमारका जन्म, उनकी दीक्षा और वसुदेवसे भिन्न नौ भाइयोंका संसारसे उद्विग्न हो तपश्चरण करनेका निरूपण है ॥१०९–११६॥

तदनन्तर भगवान् नेमिनाथके द्वारा त्रेसठ शलाकापुरुषोंकी उत्पत्तिका वर्णन, तीर्थंकरोंके अन्तरका विस्तार, बलदेवका प्रश्न, प्रद्युम्नकी दीक्षा, रुक्मिणी आदि कृष्णकी स्त्रियों और

१. खगक्षोभो क०, ख०, ग०, घ०, ङ०, म० । २. एतन्नामधेयस्य शङ्खविशेषस्य । ३. विष्णोः युगलत्रयरूपषट्सहोदरसंयमम् । ४. वसुदेवं विहाय समुद्रविजयादीनां नवानां भ्रातणां तपस्यनं वैराग्यम् ।

[1]रामकेशवयोः प्लुष्टबन्धुपुत्रकलत्रयोः । निर्गमं दुर्गमं शोकं कौशाम्बवनसेवनम् ॥११९॥
[2]शीरिरक्षणमुक्तस्य प्रमादाद्दैवयोगतः । जरत्कुमारमुक्तेन शरेण हननं हरेः ॥१२०॥
ततो घातकशोकं च शोकं रामस्य दुस्तरम् । सिद्धार्थबोधितस्यास्य निर्विण्णस्य तपस्यनम् ॥१२१॥
ब्रह्मलोकोपपादं च [3]कौन्तेयानां तपोवनम् । ऊर्जयन्तगिरावन्ते नेमिनाथस्य निर्वृतिम् ॥१२२॥
उपसर्गजयं पञ्चपाण्डवानां महात्मनाम् । दीक्षां जरत्कुमारस्य सन्तानं तस्य चायतम् ॥१२३॥
हरिवंशप्रदीपस्य जितशत्रोश्च केवलम् । पुरप्रवेशमन्ते च श्रेणिकस्य पृथुश्रियः ॥१२४॥
वर्धमानजिनेशस्य निर्वाणं गणिनां तथा । देवलोककृतं वक्ष्ये प्रदीपमहिमोदयम् ॥१२५॥
हरिवंशपुराणस्य विभागोऽयं ससङ्ग्रहः । श्रूयतां विस्तरः सिद्ध्यै भव्यैः सभ्यैरतः परम् ॥१२६॥

शार्दूलविक्रीडितम्

एकस्यापि महानरस्य चरितं पापस्य विध्वंसनं सर्वेषां जिनचक्रवर्त्तिहलिनामेतद्बुधाः किं पुनः ।
वार्येकस्य महाघनस्य महतस्तापस्य विच्छेदकं लोकव्यापिघनाघनौघनिपतद्धारासहस्रं न किम् ॥१२७॥
मुक्त्वा लोकपुराणतिर्यगपथभ्रान्तिं विवेकी जनो गृह्णातु प्रगुणां पुराणपदवीमेतां हितप्रापिणीम् ॥
दिग्मूढं विरहय्य मोहबहुलं संशुद्धदृष्टिः परो विस्तीर्णे जिनभास्करप्रकटिते मार्गे भृगोः कः पतेत् ॥१२८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ संग्रहविभागवर्णनो नाम प्रथमः सर्गः ॥१॥

पुत्रियोंका संयम ग्रहण करना, द्वीपायन मुनिके क्रोधसे द्वारिका पुरीका विनाश, जिनके भाई, पुत्र तथा स्त्रियाँ जल गई थीं ऐसे बलराम और कृष्णका द्वारिकासे निकलना, असह्य शोक, कौशाम्बीके वनमें दोनों भाइयोंका जाना, बलभद्रकी रक्षासे रहित श्रीकृष्णका भाग्यवश जरत्कुमारके द्वारा छोड़े हुए बाणसे प्रमाद पूर्वक मारा जाना, तदनन्तर मारनेवाले जरत्कुमारका शोक करना, बलरामका दुस्तर शोक, सिद्धार्थ देवके द्वारा प्रतिबोधित होनेपर बलदेवका विरक्त हो दीक्षा धारण करना, ब्रह्मलोकमें जन्म होना, पाण्डवोंका तपके लिए वनको जाना, गिरिनार पर्वतपर नेमिनाथका निर्वाण होना, महान् आत्माके धारक पाँच पाण्डवोंका उपसर्ग जीतना, जरत्कुमारकी दीक्षा, उसकी विस्तृत सन्तान, हरिवंशके दीपक राजा जितशत्रुको केवलज्ञान, विशाल लक्ष्मीके धारक राजा श्रेणिकका अन्तमें नगरप्रवेश, श्री वर्धमान जिनेन्द्र और उनके गणधरोंका निर्वाण और देवोंके द्वारा किया हुआ दीपमालिका महोत्सवका वर्णन है। श्री जिनसेन स्वामी कहते हैं कि इस पुराणमें इन सबका मैं वर्णन करूँगा ॥११७-१२५॥

गौतम स्वामी कहते हैं कि इस प्रकार हरिवंशपुराणका यह संग्रह सहित अवान्तर विभाग दिखा दिया। अब इसके आगे भव्य सभासद् आत्म-सिद्धिके लिए इसके विस्तारका वर्णन श्रवण करें ॥१२६॥ हे विद्वज्जनो! जब एक ही महापुरुषका चरित पापका नाश करनेवाला है तब समस्त तीर्थंकरों, चक्रवर्तियों और बलभद्रोंके चरितका निरूपण करनेवाले इस ग्रन्थकी महिमाका क्या कहना है? सो ठीक ही है क्योंकि जब एक ही महामेघका जल अत्यधिक सन्तापको नष्ट करनेवाला है तब लोकमें सर्वत्र व्याप्त मेघ समूहसे पड़नेवाली हजारों जलधाराओंकी महिमाका क्या कहना है? ॥१२७॥ विवेकीजन, लौकिक पुराणरूपी टेढ़े-मेढ़े कुपथके भ्रमणको छोड़, सीधे तथा हित प्राप्त करनेवाले इस पुराणरूपी मार्गको ग्रहण करें। मोहसे भरे हुए दिङ्मूढ मनुष्यको छोड़ अत्यन्त शुद्ध दृष्टिको धारण करनेवाला ऐसा कौन मनुष्य है जो जिनेन्द्र-देवरूपी सूर्यके द्वारा लम्बे-चौड़े मार्गके प्रकाशित होनेपर भी भृगुपात करेगा—किसी पहाड़की चट्टानसे नीचे गिरेगा? अर्थात् कोई नहीं ॥१२८॥

इसप्रकार जिसमें भगवान् अरिष्टनेमिके पुराणका संग्रह किया गया है ऐसे श्री जिनसेनाचार्य विरचित हरिवंशपुराणमें 'संग्रह विभाग वर्णन' नामका प्रथम सर्ग समाप्त हुआ ॥१॥

---

१. दग्धबन्धुपुत्रस्त्रीकयोः । २. बलभद्ररक्षारहितस्य । ३. पाण्डवानाम् ।

द्वितीयः सर्गः

अथ देशोऽस्ति विस्तारी जम्बूद्वीपस्य भारते । विदेह इति विख्यातः स्वर्गखण्डसमः श्रिया ॥१॥
प्रतिवर्षविनिष्पन्नधान्यगोधनसञ्चितः । सर्वोपसर्गनिर्मुक्तः प्रजासौस्थित्यसुन्दरः ॥२॥
सखेटखर्वटाटोपिमटम्बपुटभेदनैः । द्रोणामुखाकरक्षेत्रग्रामघोषैर्विभू[1]षितः ॥३॥
किं तत्र वर्ण्यते यत्र स्वयं क्षत्रियनायकाः । [2]इक्ष्वाकवः सुखक्षेत्रे सम्भवन्ति दिवश्च्युताः ॥४॥
तत्राखण्डलनेत्रालीपद्मिनीखण्डमण्डनम् । सुखाम्भःकुण्डमाभाति नाम्ना कुण्डपुरं पुरम् ॥५॥
यत्र प्रासादसङ्घातैः शङ्खशुभ्रैर्नभस्तलम् । धवलीकृतमाभाति शरन्मेघैरिवोन्नतैः ॥६॥
चन्द्रकान्तकरस्पर्शाच्चन्द्रकान्तशिलाः निशि । द्रवन्ति यद्गृहाग्रेषु प्रस्वेदिन्य इव स्त्रियः ॥७॥
सूर्यकान्तकरासङ्गात् सूर्यकान्ताग्रकोटयः । [3]स्फुरन्ति यत्र गेहेषु विरक्ता इव योषितः ॥८॥
[4]पद्मरागमणिस्फीतिर्यत्र प्रासादमूर्धनि । [5]इनपादपरिष्वङ्गादङ्गनेवातिरज्यते ॥९॥
मुक्तामरकतालोकैर्वज्रवैडूर्यविभ्रमैः । एकमेवं सदा धत्ते यत्समस्ताकरश्रियम् ॥१०॥

अथानन्तर इस जम्बूद्वीपको भरत क्षेत्रमें लक्ष्मीसे स्वर्गखण्डकी तुलना करनेवाला, विदेह इस नामसे प्रसिद्ध एक बड़ा विस्तृत देश है ॥१॥ यह देश प्रतिवर्ष उत्पन्न होनेवाले धान्य तथा गोधनसे संचित है, सब प्रकारके उपसर्गोंमें रहित है, प्रजाकी सुखपूर्ण स्थितिसे सुंदर है और खेट, खर्वट, मटम्ब, पुटभेदन, द्रोणामुख, सुवर्ण, चाँदी आदिकी खानों, खेत, ग्राम और घोषोंसे विभूषित है। भावार्थ—जो नगर नदी और पर्वतसे घिरा हुआ हो उसे बुद्धिमान् पुरुष खेट कहते हैं, जो केवल पर्वतसे घिरा हुआ हो उसे खर्वट कहते हैं। जो पाँच सौ गाँवोंसे घिरा हो उसे पण्डितजन मटम्ब मानते हैं । जो समुद्रके किनारे हो तथा जहाँपर लोग नावोंसे उतरते हैं उसे पत्तन या पुटभेदन कहते हैं। जो किसी नदीके किनारे बसा हो उसे द्रोणमुख कहते हैं। जहाँ सोना-चाँदी आदि निकलता है उसे खान कहते हैं। अन्न उत्पन्न होनेकी भूमिको क्षेत्र या खेत कहते हैं। जिनमें बाड़से घिरे हुए घर हों, जिनमें अधिकतर शूद्र और किसान लोग रहते हैं तथा जो बाग-बगीचा और मकानोंसे सहित हों उन्हें ग्राम कहते हैं, और जहाँ अहीर लोग रहते हैं उन्हें घोष कहते हैं। वह विदेह देश इन सबसे विभूषित था ॥२-३॥ उस देशका क्या वर्णन किया जाय जहाँके सुखदायी क्षेत्रमें क्षत्रियोंके नायक स्वयं इक्ष्वाकुवंशी राजा स्वर्गसे च्युत हो उत्पन्न होते हैं ॥४॥ उस विदेह देशमें कुण्डपुर नामका एक ऐसा सुन्दर नगर है जो इन्द्रके नेत्रोंकी पंक्तिरूपी कमलिनियोंके समूहसे सुशोभित है तथा सुखरूपी जलका मानो कुण्ड ही है ॥५॥ जहाँ शङ्खके समान सफेद एवं शरद् ऋतुके मेघके समान उन्नत महलोंके समूहसे सफेद हुआ आकाश अत्यन्त सुशोभित होता है ॥६॥ जिसके महलोंके अग्र भागमें लगी हुई चन्द्रकान्तमणिकी शिलाएँ रात्रिके समय चन्द्रमारूपी पतिके कर अर्थात् किरण (पक्षमें हाथके) स्पर्शसे स्वेदयुक्त स्त्रियोंके समान द्रवीभूत हो जाती हैं ॥७॥ जहाँके मकानोंपर लगे हुए सूर्यकान्तमणिके अग्रभागकी कोटियाँ, सूर्यरूपी पतिके कर अर्थात् किरण (पक्षमें हाथ) के स्पर्शसे विरक्त स्त्रियोंके समान देदीप्यमान हो उठती हैं ॥८॥ जहाँके महलोंके शिखरपर लगे हुए पद्मराग मणियोंकी पंक्ति, सूर्यकी किरणोंके संसर्गसे स्त्रीके समान अत्यन्त अनुरक्त हो जाती है ॥९॥ उस नगरमें कहीं मोतियोंकी मालाएँ लटक रही हैं, कहीं मरकत मणियोंका

---

१. -भूषैर्विभूषितः म० । २. इक्ष्वाकुवंशोद्भवा राजानः । ३. ज्वलन्ति । ४. 'पद्मरागमणिस्फातिः' इत्ययं पाठः शुद्धः प्रतिभाति । ५. सूर्यकिरणाश्लेषात् ।

शालशैलमहावप्रपरिखापरिवेषिणः । यस्योपरि परं [1]गच्छत्यमित्रेतरमण्डलम् ॥११॥
एतावतैव पर्याप्तं पुरस्य गुणवर्णनम् । स्वर्गावतरणे तद्धद्वीरस्याधारतां गतम् ॥१२॥
[2]सर्वार्थश्रीमतीजन्मा तस्मिन् सर्वार्थदर्शनः । सिद्धार्थोऽभवदर्काभो भूपः सिद्धार्थपौरुषः ॥१३॥
यत्र पाति धरित्रीयमभूदेकत्र दोषिणी । धर्मार्थिन्योऽपि [3]यत्त्यक्तपरलोकभयाः प्रजाः ॥१४॥
कस्तस्य तान् [4]गुणानुद्वाञ्चरस्तुलयितुं क्षमः । वर्धमानगुरुत्वं यः प्रापितः स नराधिपः ॥१५॥
उच्चैःकुलाद्रिसम्भूता सहजस्नेहवाहिनी । महिषी श्रीसमुद्रस्य तस्यासीत् [5]प्रियकारिणी ॥१६॥
चेतश्चेटकराजस्य यास्ताः [6]सप्तशरीरजाः । अतिस्नेहाकुलं चक्रुस्तास्वाद्या प्रियकारिणी ॥१७॥
कस्तां योजयितुं शक्तस्त्रिशलां गुणवर्णनैः । या स्वपुण्यैर्महावीरप्रसवाय नियोजिता ॥१८॥
सर्वतोऽथ नमन्तीषु सर्वासु सुरकोटिषु । प्रभावान्निपतन्तीषु नभसो [7]वसुवृष्टिषु ॥१९॥
वीरेऽवतरति त्रातुं धरित्रीमसुधारिणः[8] । तीर्थेनाच्युतकल्पोच्चैःपुष्पोत्तरविमानतः ॥२०॥

प्रकाश फैल रहा है, कहीं हीराकी प्रभा फैल रही है और कहीं वैडूर्यमणियोंकी नीली-नीली आभा छिटक रही है। उन सबसे वह एक होनेपर भी सदा सब रत्नोंकी खानकी शोभा धारण करता है ॥१०॥ कोट रूपी पर्वत, बड़े-बड़े धूलि कुट्टिम, और परिवारसे घिरे हुए उस नगरके ऊपर यदि कोई जा सकता था तो मित्र अर्थात् सूर्यका मण्डल ही जा सकता है, अमित्र अर्थात् शत्रुओंका मण्डल नहीं जा सकता था ॥११॥ इस नगरके गुणोंका वर्णन तो इतनेसे ही पर्याप्त हो जाता है कि वह नगर स्वर्गसे अवतार लेते समय भगवान् महावीरका आधार हुआ—भगवान् महावीर वहाँ स्वर्गसे आकर अवतीर्ण हुए ॥१२॥

राजा सर्वार्थ और रानी श्रीमतीसे उत्पन्न, समस्त पदार्थोंको देखनेवाले, सूर्यके समान देदीप्यमान और समस्त अर्थ-पुरुषार्थ सिद्ध करनेवाले सिद्धार्थ वहाँके राजा थे ॥१३॥ जिन सिद्धार्थके रक्षा करनेपर पृथिवी इसी एक दोषसे युक्त थी कि वहाँकी प्रजाने धर्मकी इच्छुक होनेपर भी परलोकका भय छोड़ दिया था। भावार्थ—जो प्रजा धर्मकी इच्छुक होती है उसे स्वर्ग, नरक आदि परलोकका भय अवश्य रहता है परन्तु वहाँकी प्रजा परलोकका भय छोड़ चुकी थी यह विरोध है परन्तु परलोकका अर्थ शत्रु लेनेसे विरोध दूर हो जाता है अर्थात् वहाँकी प्रजा धर्मकी इच्छुक थी और शत्रुओंके भयसे रहित थी ॥१४॥ जो राजा सिद्धार्थ, साक्षात् भगवान् वर्धमान स्वामीके पितृपदको प्राप्त हुए उनके उत्कृष्ट गुणोंका वर्णन करनेके लिए कौन मनुष्य समर्थ हो सकता है ? ॥१५॥

जो उच्च कुलरूपी पर्वतसे उत्पन्न स्वाभाविक स्नेहकी मानो नदी थी ऐसी रानी प्रियकारिणी लक्ष्मीके समुद्र स्वरूप राजा सिद्धार्थकी प्रिय पत्नी थी ॥१६॥ जिन सात पुत्रियोंने राजा चेटकके चित्तको अत्यधिक स्नेहसे व्याप्त कर रक्खा था उन पुत्रियोंमें प्रियकारिणी सबसे बड़ी पुत्री थी ॥१७॥ जो अपने पुण्यसे भगवान् महावीरको जन्म देनेके लिए प्रवृत्त हुई उस त्रिशला (प्रियकारिणी)के गुण वर्णन करनेके लिए कौन समर्थ है ? ॥१८॥

अथानन्तर जब सब ओरसे समस्त देवोंकी पंक्तियाँ नमस्कार कर रही थीं, प्रभावके कारण जब आकाशसे रत्नोंकी वर्षा हो रही थी और भगवान् महावीर जब अपने तीर्थसे प्राणियोंकी रक्षा करनेके लिए अच्युत स्वर्गके उन्नतम पुष्पोत्तर विमानसे पृथिवीपर अवतीर्ण

---

१. सूर्यमण्डलं गच्छति न तु शत्रुमण्डलम् । २. सर्वार्थ नाम पिता, श्रीमती माता ताभ्यां जन्म यस्य सः । ३. प्रेत्य प्राप्यो लोकः परलोकः पक्षे शत्रुलोकः । ४. -नुद्यान् म० । ५. त्रिशला इति प्रियकारिण्या द्वितीयं नाम । ६. पुत्र्यः । ७. रत्नवृष्टिषु । ८. प्राणिगणान् ।

सा तं षोडशसुस्वप्नदर्शनोत्सवपूर्वकम् । दध्रे [1]गर्भेश्वरं गर्भे श्रीवीरं प्रियकारिणी ॥२१॥
पञ्चसप्ततिवर्षाष्टमासमासार्धशेषकः । चतुर्थस्तु सदा कालो दुःषमः सुषमोत्तरः ॥२२॥
आषाढशुक्लषष्ठ्यां तु गर्भावतरणेऽर्हतः । [2]उत्तराफाल्गुनीनीडमुडुराजद्विजः श्रितः ॥२३॥
[3]दिक्कुमारीकृताभिख्यां द्योतिमूर्तिं घनस्तनीम् । प्रच्छन्नोऽभासयद्गर्भस्तां रविः प्रावृषं यथा ॥२४॥
नवमासेष्वतीतेषु स जिनोऽष्टदिनेषु च । उत्तराफाल्गुनीष्विन्दौ वर्तमानेऽजनि प्रभुः ॥२५॥
ततोऽन्त्यजिनमाहात्म्याल्लुठत्पीठकिरीटकाः । प्रणेमुरवधिज्ञाततद्वृत्तान्ताः सुरेश्वराः ॥२६॥
शङ्खभेरीहरिध्वानघण्टानिर्घोषघोषणम् । समाकर्ण्य सुरास्तूर्णं घूर्णितार्णवराविणः ॥२७॥
सप्तानीकमहाभेदाः सस्त्रीकाः कृतभूषणाः । सेन्द्राश्चतुर्णिकायास्ते प्रापुः कुण्डपुरं पुरम् ॥२८॥ (युग्मम्)
त्रिःपरीत्य पुरं देवाः पुरन्दरपुरस्सराः । जिनमिन्दुमुखं देवं [4]तद्गुरू च ववन्दिरे ॥२९॥
मातुः शिशुं विकृत्यान्यं सुप्तायाः सुरमायया । इन्द्राणी प्रणता नीत्वा जिनेन्द्रं हरये ददौ ॥३०॥
गृहीत्वा करपद्माभ्यां तमभ्यर्च्य चिरं हरिः । चक्रे नेत्रसहस्रोरुपुण्डरीकवनाचितम् ॥३१॥
ततश्चन्द्रावदाताङ्गमिन्द्रस्तुङ्गमतङ्गजम् । शृङ्गौघमिव हेमाद्रेर्मुक्ताधोमदनिर्झरम् ॥३२॥

होनेके लिए उद्यत हुए तब रानी प्रियकारिणीने उत्तमोत्तम सोलह स्वप्न देखकर गर्भमें गर्भ-कल्याणके स्वामी श्री महावीर भगवान्‌को धारण किया ॥१६–२१॥ जब भगवान् गर्भमें आये तब दुःषम-सुषम नामक चतुर्थ कालके पचहत्तर वर्ष साढ़े आठ माह बाकी थे ॥२२॥ आषाढ़ शुक्ला षष्ठीके दिन जब भगवान् महावीर जिनेन्द्रका गर्भावतरण हुआ तब चन्द्रमा उत्तरा फाल्गुनी नक्षत्र पर स्थित था ॥२३॥ जिस प्रकार मेघमालाके भीतर छिपा हुआ सूर्य वर्षाऋतु-को सुशोभित करता है उसी प्रकार दिक्कुमारियोंके द्वारा कृतशोभ, देदीप्यमान शरीरकी धारक एवं स्थूल स्तनोंको धारण करनेवाली माता प्रियकारिणीको वह प्रच्छन्नगर्भ सुशोभित करता था ॥२४॥

तदनन्तर नौ माह आठ दिनके व्यतीत होनेपर जब चन्द्रमा उत्तराफाल्गुनी नक्षत्रपर आया तब भगवान्‌का जन्म हुआ ॥२५॥ तत्पश्चात् अन्तिम जिनेन्द्रके माहात्म्यसे जिनके सिंहासन तथा मुकुट हिल उठे थे एवं अवधिज्ञानसे जिन्होंने उनके जन्मका वृत्तान्त जान लिया था ऐसे इन्द्रोंने उन्हें नमस्कार किया ॥२६॥ भवनवासियोंके यहाँ शङ्ख, व्यन्तरोंके यहाँ भेरी, ज्योतिषियोंके यहाँ सिंह और कल्पवासियोंके यहाँ घण्टाका शब्द सुनकर जो शीघ्र ही क्षुभित समुद्रके समान शब्द करने लगे थे जो सात प्रकारकी सेनाओंके महाभेदोंसे सहित थे, स्त्रियों सहित थे तथा जिन्होंने नाना प्रकारके आभूषण धारण कर रक्खे थे ऐसे चारों निकायके देव कुण्ड-पुर नगरमें आ पहुँचे ॥२७–२८॥ इन्द्र जिनके आगे-आगे चल रहा था ऐसे देवोंने नगरकी तीन प्रदक्षिणाएँ देकर चन्द्रमाके समान सुन्दर मुखको धारण करनेवाले जिनेन्द्र देव तथा उनके माता-पिताको नमस्कार किया ॥२९॥ विनयावनत इन्द्राणीने देवकृत मायासे सोई हुई माताके समीप विक्रियासे एक दूसरा बालक रख, जिनेन्द्रदेवको उठा इन्द्रके लिए सौंप दिया ॥३०॥ इन्द्रने उन्हें दोनों हाथोंसे ले चिर काल तक उनकी पूजा की और विक्रिया निर्मित हजार नेत्र रूपी कमल वनमें उन्हें अर्चित किया ॥३१॥

तदनन्तर इन्द्रने भगवान्‌को उस अत्यन्त ऊँचे ऐरावत हाथीपर विराजमान किया जिसका कि शरीर चन्द्रमाके समान उज्ज्वल था, जो सुमेरुके शिखरोंके समूहके समान जान पड़ता था और जो नीचेकी ओर मदके निर्झर छोड़ रहा था ॥३२॥ जिसके गण्डस्थलोंपर मदकी सुगन्धिके कारण भ्रमरोंके समूह मँडरा रहे थे और उनसे जो सुमेरुके उस शिखर-समूहके समान जान

---

१. गर्भकल्याणनायकम् । २. -द्विज -क० ग० । ३. दिक्कुमारीकृतशोभां । ४. मातापितरौ ।

गण्डस्थलमदामोदभ्रमद्भ्रमरमण्डलम् । तमिवाधित्यकावस्थतमालवनमण्डितम् ॥३३॥
कर्णान्तरततासक्तरक्तचामरसंहतिम् । तं यथाधित्यकाधीनरक्ताशोकमहावनम् ॥३४॥
[1]सुवर्णश्रिया चार्व्या परिवेष्टितविग्रहम् । तमेव च यथोपात्तकनत्कनकमेखलम् ॥३५॥
[2]अनेकरदसंवृत्तनृत्यसङ्गीतयोषितम्[3] । तमिवोत्तुङ्गशृङ्गाग्रनृत्यद्गायत्सुराङ्गनम् ॥३६॥
सुवृत्तदीर्घसञ्चारिकररुद्धदिगन्तरम् । [4]तमिवात्यायतस्थूलस्फुरद्भोगभुजङ्गमम् ॥३७॥
ऐशानधारितस्फीतधवलातपवारणम् । तमिवोर्ध्वस्थिताभ्यर्णसम्पूर्णशशिमण्डलम् ॥३८॥
चामरेन्द्रभुजोत्क्षिप्तचलच्चामरहारिणम् । तं यथा चमरीक्षिप्तबालव्यजनवीजितम् ॥३९॥
ऐरावतं समारोप्य जिनेन्द्रं तस्य मण्डनम् । देवैः सह गतः प्राप मन्दरं स पुरन्दरः ॥४०॥ (नवभिः कुलकम्)
तं पाण्डुकवने रम्ये मन्दरस्य जिनं हरिः । पाण्डुकायां प्रसिद्धायां शिलायां सिंहविष्टरे ॥४१॥
संस्थाप्य विबुधानीतक्षीरसागरवारिभिः । शातकुम्भमयैः कुम्भैरभिषिच्य समं सुरैः ॥४२॥
वस्त्रालङ्कारमालाद्यैरलङ्कृत्य कृतस्तुतिः । आनीय मातुरुत्सङ्गे जिनं कृत्वा कृतोचितः ॥४३॥
सिद्धार्थप्रियकारिण्योः सममानन्ददायकम् । वर्धमानाख्यया स्तुत्वा सदेवो वासवोऽगमत् ॥४४॥
मासान् पञ्चदशाऽऽजन्म द्युम्नधारा दिने दिने । याः पूर्वमापतंस्ताभिस्तर्पितोऽर्थी जनोऽखिलः ॥४५॥

पड़ता था जो कि ऊपरी भागपर स्थित तमाल वनसे मण्डित था ॥३३॥ जिसके कानोंके समीप लाल-लाल चमरोंके समूह लटक रहे थे और उनसे जो सुमेरुके उस शिखर-समूहके समान जान पड़ता था जिसके कि ऊपरी भागपर लाल-लाल अशोकोंका महावन फूल रहा था ॥३४॥ जिसका शरीर सुवर्णकी सुन्दर साँकलसे वेष्टित था और उससे जो सुमेरुके उस शिखर-समूहके समान जान पड़ता था जिसके कि समीप स्वर्णकी मेखला देदीप्यमान हो रही थी ॥३५॥ जो अनेक दाँतोंपर होनेवाले नृत्य और संगीतसे परिपुष्ट था और उससे जो उस सुमेरुके समान जान पड़ता था जिसकी कि अत्यन्त ऊँचे शिखरोंके अग्र भागपर देवाङ्गनाएँ नृत्य गायन कर रही थीं ॥३६॥ जिसने अपनी गोल लम्बी तथा चारों ओर घूमने वाली सूँड़ोंसे दिशाओंके अन्तरालको व्याप्त कर रक्खा था और उनसे जो उस सुमेरुके समान जान पड़ता था जिसके कि समीप अत्यन्त लम्बे-मोटे और फणाओंसे युक्त साँप घूम रहे थे ॥३७॥ जिसके ऊपर ऐशानेन्द्रने बड़ा भारी सफेद छत्र धारण कर रक्खा था और उससे जो उस सुमेरुके समान जान पड़ता था जिसके कि ऊपर समीप ही पूर्णचन्द्रमाका मण्डल विद्यमान था ॥३८॥ और जो चमरेन्द्रकी भुजाओंके द्वारा ढोरे हुए चञ्चल चमरोंसे सुन्दर था तथा उनसे उस सुमेरुके समूहके समान जान पड़ता था जो कि चमरी मृगोंके द्वारा उत्क्षिप्त पूँछोंसे सुशोभित था ॥३९॥ इस प्रकार वह इन्द्र आभरण स्वरूप श्री जिनेन्द्र देवको उस ऐरावत हाथीपर विराजमान कर देवोंके साथ सुमेरु पर्वतपर गया ॥४०॥

वहाँ जाकर इन्द्रने सुमेरु पर्वतके अत्यन्त रमणीय पाण्डुकवनमें पाण्डुक नामकी प्रसिद्ध शिलापर जो सिंहासन था उसपर श्री जिन बालकको विराजमान किया, स्वर्णमय कुम्भोंमें भरकर देवों द्वारा लाये हुए क्षीरसागरके जलसे देवोंके साथ उनका अभिषेक किया, वस्त्र, अलंकार तथा माला आदिसे उन्हें अलंकृत कर उनकी स्तुति की, तदनन्तर वापिस लाकर माताकी गोदमें विराजमान किया, अन्य यथोचित कार्य किये और उनके माता-पिता राजा सिद्धार्थ तथा रानी प्रियकारिणीको समान आनन्द देने वाले उन जिन बालककी वर्धमान इस नामसे स्तुति की तदनन्तर वह देवोंके साथ यथास्थान चला गया ॥४१-४४॥ भगवानके जन्मसे पन्द्रह मास पूर्व प्रतिदिन जो रत्नोंकी धाराएँ वर्षी थीं उनसे समस्त याचक संतुष्ट हो

१. सुवर्णक्षुद्रघण्टामालया । २. त्यायति म० । ३. अनेकरत्नसंछन्न ख० । ४. पोषितं म० ।

वर्धमानः सुरैः सेव्यो ववृधे स यथा यथा। पितृबन्धुत्रिलोकानामनुरागस्तथा तथा ॥४६॥
सुरासुरनराधीशमौलिमालार्चितक्रमः। त्रिंशद्वर्षप्रमाणोऽभूद् वीरो भोगैः परिष्कृतः ॥४७॥
शुद्धवृत्तं न भोगेषु चित्तं तस्य चिरं स्थितम्। कुटिलेषु यथा सिंहनखरन्ध्रेषु मौक्तिकम् ॥४८॥
शान्तचित्तं कदाचित् तं स्वयंबुद्धमबोधयन्। नत्वा सारस्वतादित्यमुख्याः लौकान्तिकाः सुराः ॥४९॥
सौधर्माद्यैः सुरैरेत्य [1]कृताऽभिषवपूजनः। आरुह्य शिविकां दिव्यामुह्यमानां सुरेश्वरैः ॥५०॥
उत्तराफाल्गुनीष्वेव वर्तमाने निशाकरे। कृष्णस्य मार्गशीर्षस्य दशम्यामगमद्वनम् ॥५१॥
अपनीय तनोः सर्वं वस्त्रमाल्यविभूषणम्। पञ्चमुष्टिभिरुद्धृत्य मूर्धजानभवन्मुनिः ॥५२॥
केशकुण्डलसङ्घातं जिनस्य भ्रमरासितम्। प्रतिगृह्य सुराधीशो [2]निदधौ दुग्धवारिधौ ॥५३॥
इन्द्रनीलचयेनेव क्षिप्तेनेन्द्रेण चाप्यभात्। जिनेन्द्रकेशपुञ्जेन रञ्जितः क्षीरसागरः ॥५४॥
जिननिष्क्रमणं दृष्ट्वा तुष्टाः सर्वे नरामराः। कृत्वा तृतीयकल्याणपूजां जग्मुर्यथायथम् ॥५५॥
मनःपर्ययपर्यन्तचतुर्ज्ञानमहेक्षणः। तपो द्वादशवर्षाणि चकार द्वादशात्मकम् ॥५६॥
विहरन्नथ नाथोऽसौ गुणग्रामपरिग्रहः। ऋजुकूलापगाकूले जृम्भिकग्रामसमीयिवान् ॥५७॥
तत्रातापनयोगस्थः [3]सालाभ्याशशिलातले। वैशाखशुक्लपक्षस्य दशम्यां [4]षष्ठमाश्रितः ॥५८॥

गये थे ॥४५॥ देवोंके द्वारा सेवनीय वर्धमान भगवान् जिस-जिस प्रकार वृद्धिको प्राप्त हो रहे थे उसी-उसी प्रकार पिता, बन्धुजन तथा तीन लोकके जीवोंका अनुराग वृद्धिको प्राप्त हो रहा था—बढ़ता जाता था ॥४६॥

अथानन्तर सुर, असुर और राजाओंके मुकुटोंकी मालाओंसे जिनके चरण पूजित थे तथा जो देवोपनीत नाना प्रकारके भोगोंसे युक्त थे ऐसे भगवान् महावीर तीस वर्षके हो गये ॥४७॥ फिर भी जिस प्रकार सिंहके कुटिल नखोंके छिद्रोंमें मोती चिर काल तक नहीं ठहर पाते हैं उसी प्रकार उनका निर्मल चारित्रको धारण करनेवाला चित्त भोगोंमें चिरकाल तक नहीं ठहर सका ॥४८॥ किसी समय शान्त चित्तके धारक उन स्वयम्बुद्ध भगवान्‌को सारस्वत-आदित्य आदि प्रमुख लौकान्तिक देवोंने आकर तथा नमस्कार कर प्रतिबुद्ध किया ॥४९॥ प्रतिबुद्ध—विरक्त होते ही सौधर्मेन्द्र आदि देवोंने आकर उनका अभिषेक और पूजन किया। तदनन्तर देवोंके द्वारा उठाई जानेवाली दिव्य पालकीपर सवार होकर वे जबकि चन्द्रमा उत्तराफाल्गुनी नक्षत्रपर ही विद्यमान था तब मगसिर बदी दशमीके दिन वनको चले गये ॥५०-५१॥ वहाँ जाकर उन्होंने शरीरसे समस्त वस्त्रमाला तथा आभूषण उतारकर अलग कर दिये और पञ्च-मुष्टियोंसे केश उखाड़कर वे मुनि हो गये ॥५२॥ भ्रमरोंके समूहके समान काले-काले भगवान्‌के घुँघराले बालोंके समूहको इन्द्रने उठाकर क्षीरसागरमें क्षेप दिया ॥५३॥ उस समय इन्द्रके द्वारा क्षेपे हुए जिनेन्द्र भगवान्‌के बालोंके समूहसे रँगा हुआ क्षीरसागर ऐसा सुशोभित हो रहा था मानो इन्द्रनील मणियोंके समूहसे ही रङ्ग गया हो ॥५४॥ जिनेन्द्र भगवान्‌का दीक्षा-कल्याणक देख संतोषको प्राप्त हुए समस्त मनुष्य और देव तृतीय कल्याणककी पूजा कर यथा-स्थान चले गये ॥५५॥

तदनन्तर मति, श्रुत, अवधि और मनःपर्यय इन चार ज्ञानरूपी महानेत्रोंको धारण करने-वाले भगवान्‌ने बारह वर्ष तक अनशन आदिक बारह प्रकारका तप किया ॥५६॥ तत्पश्चात् गुण समूहरूपी परिग्रहको धारण करनेवाले श्री वर्धमान स्वामी विहार करते हुए ऋजुकूला नदीके तटपर स्थित जृम्भिक गाँवके समीप पहुँचे ॥५७॥ वहाँ वैशाख सुदी दशमीके दिन दो

१. कृतोऽभिषवपूजनः म० । २. निदध्यौ म० । ३. शालवृक्षनिकटस्थशिलोपरि । ४. दिनद्वयोपवासम् आश्रितः ।

उत्तराफाल्गुनीप्राप्ते[1] शुक्लध्यानी निशाकरे । निहत्य घातिसङ्घातं केवलज्ञानमाप्तवान् ॥५९॥
केवलस्य प्रभावेण सहसा चलितासनाः । आगत्य महिमां चक्रुस्तस्य सर्वे सुरासुराः ॥६०॥
षट्षष्टिदिवसान् भूयो मौनेन विहरन् विभुः । आजगाम जगत्ख्यातं जिनो राजगृहं पुरम् ॥६१॥
आरुरोह गिरिं तत्र [2]विपुलं विपुलश्रियम् । प्रबोधार्थं स लोकानां भानुमानुदयं यथा ॥६२॥
ततः प्रबुद्धवृत्तान्तैरापतद्भिरितस्ततः । जगत्सुरासुरैर्व्याप्तं जिनेन्द्रस्य गुणैरिव ॥६३॥
सौधर्माद्यैस्तदा देवैः [3]परीतोऽभात् स भूधरः । नाभेयाधिष्ठितः पूर्वं यथाष्टापदपर्वतः[4] ॥६४॥
चतुराशामुखद्वारस्थितद्वादशगोपुरम् । कृतं रत्नमयं देवैः प्राकारवलयत्रयम् ॥६५॥
जाते योजनविस्तीर्णे सरणे समवादिके । विभागा द्वादशाभासन्नभःस्फाटिकभित्तयः ॥६६॥
प्रातिहार्यैर्युतोऽष्टाभिश्चतुस्त्रिंशन्महाद्भुतैः[5] । तत्र देवैर्वृतोऽभासीज्जिनश्चन्द्र इव ग्रहैः ॥६७॥
इन्द्राग्निवायुभूत्याख्याः कौण्डिन्याख्याश्च पण्डिताः । इन्द्रनोदनयाऽऽयाताः समवस्थानमर्हतः ॥६८॥
प्रत्येकं सहिताः सर्वे शिष्याणां पञ्चभिः शतैः । त्यक्ताम्बरादिसम्बन्धाः संयमं प्रतिपेदिरे ॥६९॥
सुता चेटकराजस्य कुमारी चन्दना तदा । धौतैकाम्बरसंवीता जातार्याणां पुरःसरी ॥७०॥
श्रेणिकोऽपि च सम्प्राप्तः सेनया चतुरङ्गया । सिंहासनोपविष्टं तं प्रणनाम जिनेश्वरम् ॥७१॥
छत्रचामरभृङ्गारैः कलशध्वजदर्पणैः । व्यजनैः सुप्रतीकैश्च प्रसिद्धैरष्टमङ्गलैः ॥७२॥

दिनके उपवासका नियम कर वे साल वृक्षके समीप स्थित शिलातलपर आतापन योगमें आरूढ़ हुए ॥५८॥ उसी समय जबकि चन्द्रमा उत्तराफाल्गुनी नक्षत्रमें स्थित था तब शुक्लध्यानको धारण करनेवाले वर्धमान जिनेन्द्र घातिया कर्मोंके समूहको नष्टकर केवलज्ञानको प्राप्त हुए ॥५९॥ केवलज्ञानके प्रभावसे सहसा जिनके आसन डोल उठे थे ऐसे समस्त सुर और असुरोंने आकर उनके केवलज्ञानकी महिमा की—ज्ञानकल्याणकका उत्सव किया ॥६०॥ तदनन्तर छयासठ दिनतक मौनसे विहार करते हुए श्री वर्धमान जिनेन्द्र जगत्प्रसिद्ध राजगृह नगर आये ॥६१॥ वहाँ जिसप्रकार सूर्य उदयाचल पर आरूढ़ होता है उसीप्रकार वे लोगोंको प्रतिबुद्ध करनेके लिए विपुल लक्ष्मीके धारक विपुलाचलपर आरूढ़ हुए ॥६२॥ तदनन्तर जिनेन्द्र भगवान्के आगमनका वृत्तान्त जान चारों ओरसे आनेवाले सुर और असुरोंसे जगत् इस प्रकार भर गया जिस प्रकार कि मानो जिनेन्द्रदेवके गुणोंसे ही भर गया हो ॥६३॥ उस समय सौधर्म आदि देवोंसे घिरा हुआ वह विपुलाचल ऐसा सुशोभित हो रहा था जैसा कि पहले श्री ऋषभ जिनेन्द्रसे अधिष्ठित कैलाश पर्वत सुशोभित होता था ॥६४॥

अथानन्तर देवोंने रत्नमयी ऐसे तीन कोट बनाये जिनकी चारों दिशाओंमें एक-एक प्रमुख द्वार होनेसे बारह गोपुर थे ॥६५॥ एक योजन विस्तार वाला समवसरण बनाया जिसमें आकाशस्फटिककी दीवालोंवाले बारह विभाग सुशोभित थे ॥६६॥ आठ प्रातिहार्यों और चौंतीस अतिशयोंसे सहित भगवान् उस समवसरणमें विराजमान हुए। वहाँ देवोंसे घिरे श्री वर्धमान ग्रहोंसे घिरे चन्द्रमाके समान सुशोभित हो रहे थे ॥६७॥ इन्द्रभूति, अग्निभूति, वायुभूति तथा कौण्डिन्य आदि पण्डित इन्द्रकी प्रेरणासे श्री अरहन्तदेवके समवसरणमें आये ॥६८॥ वे सभी पण्डित अपने पाँच-पाँच सौ शिष्योंसे सहित थे तथा सभीने वस्त्रादिका सम्बन्ध त्यागकर संयम धारण कर लिया ॥६९॥ उसी समय राजा चेतककी पुत्री चन्दना कुमारी, एक स्वच्छ वस्त्र धारणकर आर्यिकाओंमें प्रमुख हो गई ॥७०॥

राजा श्रेणिक भी अपनी चतुरङ्गिणी सेनाके साथ समवसरणमें पहुँचा और वहाँ सिंहासनपर विराजमान श्रीवर्धमान जिनेन्द्रको उसने नमस्कार किया ॥७१॥ जिनेन्द्र भगवान्की

---

१. उत्तराफाल्गुनीं प्राप्ते म० । २. विपुलगिरिनामानम् । ३. परितो म० । ४. कैलासपर्वतः । ५. महातिशयैः ।

स्रजचक्रदुकूलाब्जगजसिंहवृषध्वजैः । गरुडध्वजसंयुक्तैरष्टभेदैर्महाध्वजैः ॥७३॥
मानस्तम्भैस्तथा स्तूपैश्चतुर्भिश्च महावनैः । वाप्यम्भोरुहखण्डैश्च वल्लीवनलतागृहैः ॥७४॥
तैस्तैर्देवैः कृतैः सर्वैरन्यैश्चातिशयैस्तथा । यथास्थानस्थितैर्जैनी समवस्थानभूरभात् ॥७५॥
अथेन्दोरिव शुक्राद्या निषण्णा गुर्वधिष्ठिताः[2] । साधवोऽभाज्जिनस्यान्ते जातरूपाच्छविग्रहाः[3] ॥७६॥
ततः कल्पनिवासिन्यो देव्यः कल्पलताभुजाः । मेरोरिव जिनस्यान्ते ता बभुर्भोगभूमयः ॥७७॥
ततोऽलङ्कृतनारीभिरार्यिकाततिराबभौ । स्फुरद्विद्युद्भिराश्लिष्टा[4] शारदीव घनावली ॥७८॥
ज्योतिर्देवस्त्रियोऽतश्च रेजुरुज्ज्वलमूर्तयः । तास्तारा इव सङ्क्रान्ताः समवस्थानसागरे ॥७९॥
कान्ता व्यन्तरदेवानां ततस्तत्र विरेजिरे । करकुड्मलहारिण्यः साक्षादिव वनश्रियः ॥८०॥
ततो नागकुमारादिदेव्यो नागफणोज्ज्वलाः । नागलोकसमायाता नागवल्ल्य इवाबभुः ॥८१॥
ततोऽप्यग्निकुमाराद्या देवाः पातालवासिनः । ज्वलितोज्ज्वलवेषास्ते दशभेदा बभासिरे ॥८२॥
ततः किन्नरगन्धर्वयक्षकिम्पुरुषादयः । षोडशार्द्धविकल्पास्ते व्यन्तराश्च चकासिरे ॥८३॥
सप्रकीर्णकनक्षत्रसूर्याचन्द्रमसो ग्रहाः । पञ्चभेदास्तदाऽनल्पवपुषो ज्योतिषो बभुः ॥८४॥

वह समवसरण भूमि, यथायोग्य स्थानोंपर रक्खे हुए छत्र, चमर, भृङ्गार, कलश, ध्वजा, दर्पण, पङ्खा और ठौना इन आठ प्रसिद्ध मङ्गल द्रव्योंसे, माला, चक्र, दुकूल, कमल, हाथी, सिंह, वृषभ और गरुड़के चिह्नोंसे युक्त आठ प्रकारकी महाध्वजाओंसे, मानस्तम्भों-स्तूपोंसे, चार महावनोंसे, वापिकाओंमें प्रफुल्लित कमल-समूहोंसे, लताओंके वनोंमें बने हुए लतागृहों—निकुञ्जोंसे तथा देवोंके द्वारा निर्मित अन्य सभी प्रकारके उन-उन प्रसिद्ध अतिशयोंसे सुशोभित हो रही थी ॥७२-७५॥

अथानन्तर जिस प्रकार चन्द्रमाके समीप गुरु अर्थात् बृहस्पतिसे अधिष्ठित शुक्रादि ग्रह सुशोभित होते हैं उसी प्रकार श्रीवर्धमान जिनेन्द्रके समीप प्रथम कोणमें गुरु अर्थात् अपने-अपने दीक्षागुरुओंसे अधिष्ठित, निर्दोष दिगम्बर मुद्राको धारण करनेवाले अनेक मुनि सुशोभित हो रहे थे ॥७६॥ तदनन्तर द्वितीय कोठामें कल्पलताओंके समान भुजाओंको धारण करनेवाली कल्पवासिनी देवियाँ स्थित थीं और वे जिनेन्द्रके समीप इस प्रकार सुशोभित हो रही थीं जिस प्रकार कि सुमेरुके समीप भोगभूमियाँ सुशोभित होती हैं ॥७७॥ तदनन्तर तृतीय कोठामें नाना प्रकारके अलङ्कारोंसे अलंकृत स्त्रियोंके साथ आर्यिकाओंकी पंक्ति इस प्रकार सुशोभित हो रही थी जिस प्रकार कि चमकती हुई बिजलियोंसे आलिङ्गित शरदृऋतुकी मेघपंक्ति सुशोभित होती है ॥७८॥ इनके बाद चतुर्थ कोठामें उज्ज्वल शरीरकी धारक ज्योतिष्क देवोंकी स्त्रियाँ सुशोभित हो रही थीं वे ऐसी जान पड़ती थीं मानो समवसरण रूपी सागरमें प्रतिबिम्बित तारा ही हों ॥७९॥ उनके बाद पञ्चम कोठामें हस्तरूपी कुण्डलोंको धारण करनेवाली व्यन्तर देवोंकी स्त्रियाँ साक्षात् वनकी लक्ष्मीके समान सुशोभित हो रही थीं ॥८०॥ तत्पश्चात् षष्ठ कोठामें नागलोकसे आयी हुई नागवेलके समान उज्ज्वल फणाओंको धारण करनेवाली नागकुमार आदि भवनवासी देवोंकी देवियाँ सुशोभित हो रही थीं ॥८१॥ तदनन्तर सप्तम कोठामें पाताललोकमें रहनेवाले एवं उज्ज्वलवेषके धारक अग्निकुमार आदि दस प्रकारके भवनवासी देव सुशोभित हो रहे थे ॥८२॥ तत्पश्चात् अष्टम कोठामें किन्नर, गन्धर्व, यक्ष तथा किम्पुरुष आदि आठ प्रकारके व्यन्तर देव सुशोभित हो रहे थे ॥८३॥ उनके बाद नवम कोठामें प्रकीर्णक, नक्षत्र, सूर्य, चन्द्रमा और ग्रह ये पाँच प्रकारके विशाल शरीरके धारक ज्योतिषी देव सुशोभित हो रहे थे ॥८४॥

---

१. स्रजाचक्र ख० । २. गुरुभिराचार्यैरन्यत्र बृहस्पतिना । ३. जातरूपं यथा जातं अन्यत्र जातरूपं स्वर्णं तद्वदच्छा निर्मला विग्रहा येषां ते । ४. -राश्लिष्टशारदीव म० ।

मौलिकुण्डलकेयूरप्रालम्बकटिसूत्रिणः । हारिणः कल्पवृक्षाभास्ततोऽभान्[1] कल्पवासिनः ॥८५॥
[2]सपुत्रानमितानेकविद्याधरपुरस्सराः । न्यषीदन् मानुषा नानाभाषावेषरुचस्ततः ॥८६॥
ततोऽहिनकुलेभेन्द्रहर्यश्वमहिषादयः । जिनानुभावसम्भूतविश्वासाः शमिनो बभुः ॥८७॥
इति द्वादशभेदेषु परीतिं विनुतिं नतिम् । गणेषु प्रथमं कृत्वा स्थितेषु परितो जिनम् ॥८८॥
प्रत्यक्षीकृतविश्वार्थं कृतदोषत्रयक्षयम् । जिनेन्द्रं गौतमोऽपृच्छत् तीर्थार्थं पापनाशनम् ॥८९॥
स दिव्यध्वनिना विश्वसंशयच्छेदिना जिनः । दुन्दुभिध्वनिधीरेण योजनान्तरयायिना ॥९०॥
श्रावणस्यासिते पक्षे नक्षत्रेऽभिजिति प्रभुः । प्रतिपद्यह्नि पूर्वाह्णे शासनार्थमुदाहरत् ॥९१॥
आचाराङ्गस्य तत्त्वार्थं तथा सूत्रकृतस्य च । जगाद भगवान् वीरः संस्थानसमवाययोः ॥९२॥
व्याख्याप्रज्ञप्तिहृदयं ज्ञातृधर्मकथास्थितम् । श्रावकाध्ययनस्यार्थमन्तकृद्दशगोचरम् ॥९३॥
अनुत्तरदशस्यार्थं प्रश्नव्याकरणस्य च । तथा विपाकसूत्रस्य पवित्रार्थं ततः परम् ॥९४॥
त्रिषष्टिः त्रिशती यत्र दृष्टीनामभिधीयते । दृष्टिवादस्य यस्यार्थं पञ्चभेदस्य सर्वदृक् ॥९५॥
जगाद जगतां नाथः प्रथमं परिकर्मणः । सूत्रस्याद्यानुयोगस्य तथा पूर्वगतस्य च ॥९६॥
उत्पादपूर्वपूर्वस्य परमार्थं ततः परम् । अग्रायणीयपूर्वार्थमग्रणीरभणद्विदाम् ॥९७॥
वीर्यप्रवादपूर्वार्थमस्तिनास्तिप्रवादजम् । ज्ञानसत्यप्रवादार्थमात्मकर्मप्रवादयोः ॥९८॥
प्रत्याख्यानस्य विद्यानुवादकल्याणपूर्वयोः । प्राणावायस्य पूर्वस्य तत्त्वार्थं तदनन्तरम् ॥९९॥
क्रियाविशालपूर्वस्य विशालार्थमशेषवित् । सल्लोकविन्दुसारार्थं चूलिकार्थं सवस्तुकम् ॥१००॥

तदनन्तर दशम कोठामें मुकुट कुण्डल केयूर हार और कटिसूत्रको धारण करनेवाले कल्पवृक्षके समान कल्पवासी देव सुशोभित हो रहे थे। तत्पश्चात् एकादश कोठामें पुत्र स्त्री आदिसे सहित अनेक विद्याधरोंसे युक्त नाना प्रकारकी भाषा वेष और कान्तिको धारण करनेवाले मनुष्य बैठे थे ॥८५-८६॥ और उनके बाद द्वादश कोठामें जिनेन्द्र भगवान्के प्रभावसे जिन्हें विश्वास उत्पन्न हुआ था तथा जो अत्यन्त शान्तचित्तके धारक थे ऐसे सर्प नेवला गजेन्द्र सिंह घोड़ा और भैंस आदि नाना प्रकारके तिर्यञ्च बैठे थे ॥८७॥ इस प्रकार जब बारह कोठोंमें बारह गण, जिनेन्द्र भगवान्के चारों ओर प्रदक्षिणा रूपसे परिक्रमा, स्तुति और नमस्कार कर विद्यमान थे तब समस्त पदार्थोंको प्रत्यक्ष देखनेवाले एवं रागद्वेष और मोह इन तीनों दोषोंका क्षय करनेवाले पापनाशक श्रीजिनेन्द्र देवसे गौतम गणधरने तीर्थकी प्रवृत्ति करनेके लिए पूछा—प्रश्न किया ॥८८-८९॥

तदनन्तर श्रीवर्धमान प्रभुने श्रावण मासके कृष्णपक्षकी प्रतिपदाके प्रातःकालके समय अभिजित् नक्षत्रमें समस्त संशयोंको छेदनेवाले, दुन्दुभिके शब्दके समान गम्भीर तथा एक योजन तक फैलनेवाली दिव्यध्वनिके द्वारा शासनकी परम्परा चलानेके लिए उपदेश दिया ॥९०-९१॥ प्रथम ही भगवान् महावीरने आचाराङ्गका उपदेश दिया फिर सूत्रकृताङ्ग, स्थानाङ्ग, समवायाङ्ग, व्याख्याप्रज्ञप्ति अङ्ग, ज्ञातृधर्मकथाङ्ग, श्रावकाध्ययनाङ्ग, अन्तकृद्दशाङ्ग, अनुत्तरोपपादिक दशाङ्ग, प्रश्नव्याकरणाङ्ग और पवित्र अर्थसे युक्त विपाकसूत्राङ्ग इन ग्यारह अङ्गोंका उपदेश दिया ॥९२-९४॥ इसके बाद जिसमें तीन सौ त्रेषठ दृष्टियोंका कथन है तथा जिसके पाँच भेद हैं ऐसे बारहवें दृष्टिवाद अङ्गका सर्वदर्शी भगवान्ने निरूपण किया ॥९५॥ जगत्के स्वामी तथा ज्ञानियोंमें अग्रसर श्रीवर्धमान जिनेन्द्रने प्रथम ही परिकर्म, सूत्रगत, प्रथमानुयोग और पूर्वगत भेदोंका वर्णन किया—फिर पूर्वगत भेदके उत्पाद पूर्व, अग्रायणीय पूर्व, वीर्यप्रवाद पूर्व, अस्ति-नास्तिप्रवादपूर्व, ज्ञानप्रवादपूर्व, सत्यप्रवादपूर्व, आत्मप्रवादपूर्व, कर्मप्रवादपूर्व, प्रत्याख्यानपूर्व, विद्यानुवादपूर्व, कल्याणपूर्व, प्राणावायपूर्व, क्रियाविशालपूर्व और लोकबिन्दु सारपूर्व इन चौदह

१. अभुः, अभान् इति बहुवचने रूपद्वयम् । २. सपुत्रा आगतानेक ख०, सपुत्रवनिता- म०, घ० ।

अङ्गप्रविष्टतत्त्वार्थं प्रतिपाद्य जिनेश्वरः । अङ्गबाह्यमवोचत्तत्प्रतिपाद्यार्थरूपतः ॥१०१॥
सामायिकं यथार्थाख्यं सचतुर्विंशतिस्तवम् । वन्दनां च ततः पूतां प्रतिक्रमणमेव च ॥१०२॥
वैनयिकं विनेयेभ्यः[1] कृतिकर्म ततोऽवदत् । दशवैकालिकां पृथ्वीमुत्तराध्ययनं तथा ॥१०३॥
तं कल्पव्यवहारं च कल्पाकल्पं तथा महा—कल्पं च पुण्डरीकं च सुमहापुण्डरीककम् ॥१०४॥
तथा निषद्यकां प्रायः प्रायश्चित्तोपवर्णनम् । जगत्त्रयगुरुः प्राह प्रतिपाद्यं हितोद्यतः ॥१०५॥
मत्यादेः केवलान्तस्य स्वरूपं विषयं फलम् । अपरोक्षपरोक्षस्य ज्ञानस्योवाच सङ्ख्यया ॥१०६॥
मार्गणास्थानभेदैश्च गुणस्थानविकल्पनैः । जीवस्थानप्रभेदैश्च जीवद्रव्यमुपादिशत् ॥१०७॥
सत्सङ्ख्याद्यनुयोगैश्च सन्नामादिकमादिभिः । द्रव्यं स्वलक्षणैर्भिन्नं पुद्गलादि त्रिलक्षणम्[2] ॥१०८॥
द्विविधं कर्मबन्धं च सहेतुं सुखदुःखदम् । मोक्षं मोक्षस्य हेतुं च फलं चाष्टगुणात्मकम् ॥१०९॥
बन्धमोक्षफलं यत्र भुज्यते तत् त्रिधाकृतम् । अन्तःस्थितं जगौ लोकमलोकं च बहिःस्थितम् ॥११०॥
अथ सप्तर्द्धिसम्पन्नः श्रुत्वार्थं जिनभाषितम् । द्वादशाङ्गश्रुतस्कन्धं सोपाङ्गं गौतमो व्यधात् ॥१११॥
त्रैलोक्यं संसदि स्पृष्टं जिनार्कवचनांशुभिः । मुक्तमोहमहानिद्रं सुप्तोत्थितमिवाबभौ ॥११२॥
जिनभाषाऽधरस्पन्दमन्तरेण विजृम्भिता । तिर्यग्देवमनुष्याणां दृष्टिमोहमनीनशत्[3] ॥११३॥

पूर्वोंका तथा वस्तुओंसे सहित चूलिकाओंका वर्णन किया ॥९६-१००॥ इस प्रकार श्रीजिनेन्द्रदेवने अङ्गप्रविष्ट तत्त्वका वर्णन कर अङ्गबाह्यके चौदह भेदोंका वास्तविक वर्णन किया। प्रथम ही उन्होंने सार्थक नामको धारण करनेवाले सामयिक प्रकीर्णकका वर्णन किया तदनन्तर चतुर्विंशति स्तवन, पवित्र वन्दना, प्रतिक्रमण, वैनयिक, कृतिकर्म, दशवैकालिक, उत्तराध्ययन, कल्पव्यवहार, कल्पाकल्प, महाकल्प, पुण्डरीक, महापुण्डरीक तथा जिसमें प्रायः प्रायश्चित्तका वर्णन है ऐसी निषद्यका इन चौदह प्रकीर्णकोंका वर्णन हित करनेमें उद्यत तथा जगत् त्रयके गुरु श्रीवर्धमान जिनेन्द्रने किया ॥१०१-१०५॥ इसके बाद भगवान्‌ने मति, श्रुत, अवधि, मनःपर्यय और केवल इन पाँच ज्ञानोंका स्वरूप, विषय, फल तथा संख्या बतलायी और साथ ही यह भी बतलाया कि उक्त पाँच ज्ञानोंमें प्रारम्भके दो ज्ञान परोक्ष और अन्य तीन ज्ञान प्रत्यक्ष हैं ॥१०६॥ तदनन्तर चौदह मार्गणा स्थान, चौदह गुणस्थान और चौदह जीव समासके द्वारा जीव द्रव्यका उपदेश दिया ॥१०७॥ तत्पश्चात् सत्, संख्या, क्षेत्र, स्पर्शन, काल, अन्तर, भाव और अल्प बहुत्व इन आठ अनुयोग द्वारोंसे तथा नाम, स्थापना, द्रव्य और भाव इन चार निक्षेपोंसे द्रव्यका निरूपण किया। उन्होंने यह भी बताया कि पुद्गल आदिक द्रव्य अपने-अपने लक्षणोंसे भिन्न-भिन्न हैं और सामान्य रूपसे सभी उत्पाद व्यय तथा ध्रौव्य रूप त्रिलक्षणसे युक्त हैं ॥१०८॥ शुभ-अशुभके भेदसे कर्मबन्धके दो भेद बतलाये, उनके पृथक्-पृथक् कारण समझाये, शुभबन्ध सुख देनेवाला है और अशुभबन्ध दुःख देनेवाला है यह बताया। मोक्षका स्वरूप, मोक्षका कारण और अनन्त ज्ञान आदि आठ गुणोंका प्रकट हो जाना मोक्षका फल है यह सब समझाया ॥१०९॥ जो अनन्त अलोकाकाशके मध्यमें स्थित है तथा जहाँ बन्ध और मोक्षका फल भोगा जाता है उसे लोक कहते हैं। इस लोकके ऊर्ध्व-मध्य और पातालके भेदसे तीन भेद हैं। लोकके बाहरका जो आकाश है उसे अलोक कहते हैं ॥११०॥

अथानन्तर सप्तऋद्धियोंसे सम्पन्न गौतम गणधरने जिनभाषित पदार्थका श्रवणकर उपाङ्ग-सहित द्वादशाङ्ग रूप श्रुतस्कन्धकी रचना की ॥१११॥ उस समय समवसरणमें जो तीनों लोकोंके जीव बैठे हुए थे वे जिनेन्द्र रूपी सूर्यके वचन रूपी किरणोंका स्पर्श पाकर सोयेसे उठे हुएके समान सुशोभित होने लगे और उनकी मोह रूपी महानिद्रा दूर भाग गयी ॥११२॥ ओठोंके

---

१. शिष्येभ्यः । २. उत्पादव्ययध्रौव्यरूपम् । ३. नाशयामास ।

ततो जिनोक्ततत्त्वार्थमार्गश्रद्धानलक्षणम् । शङ्काकाङ्क्षानिदानादिकलङ्कविगमोज्ज्वलम् ॥११४॥
सम्यग्दर्शनसद्रत्नं ज्ञानालङ्कारनायकम् । स्वकर्णहृदयेष्वेकं पिनद्धमखिलाङ्गिभिः[1] ॥११५॥
कायेन्द्रियगुणस्थानजीवस्थानकुलायुषाम् । भेदान् योनिविकल्पांश्च निरूप्यागमचक्षुषा ॥११६॥
क्रियासु स्थानपूर्वासु वधादिपरिवर्जनम् । षण्णां जीवनिकायानामहिंसाद्यं महाव्रतम् ॥११७॥
यद्रागद्वेषमोहेभ्यः परतापकरं वचः । निवृत्तिस्तु ततः सत्यं तद् द्वितीयं महाव्रतम् ॥११८॥
अल्पस्य महतो वापि परद्रव्यस्य साधुना । अनादानमदत्तस्य तृतीयं तु महाव्रतम् ॥११९॥
स्त्रीपुंसङ्गपरित्यागः कृतानुमतकारितैः । ब्रह्मचर्यमिति प्रोक्तं चतुर्थं तु महाव्रतम् ॥१२०॥
बाह्यान्तरवर्तिभ्यः सर्वेभ्यो विरतिर्यतः । स्वपरिग्रहदोषेभ्यः पञ्चमं तु महाव्रतम् ॥१२१॥
चक्षुर्गोचरजीवौघान् परिहृत्य यतेर्यतः[2] । ईर्यासमितिराद्या सा व्रतशुद्धिकरी मता ॥१२२॥
त्यक्त्वा कार्कश्यपारुष्यं यतेर्यत्नवतः सदा । भाषणं धर्मकार्येषु भाषासमितिरिष्यते ॥१२३॥
पिण्डशुद्धिविधानेन शरीरस्थितये तु यत् । आहारग्रहणं सा स्यादेषणासमितिर्यतेः ॥१२४॥
निक्षेपणं यदादानमीक्षित्वा योग्यवस्तुनः । समितिः सा तु विज्ञेया निक्षेपादाननामिका ॥१२५॥
शरीरान्तर्मलत्यागः प्रगतासु सुभूमिषु । यत्तत्समितिरेषा तु प्रतिष्ठापनिका मता ॥१२६॥
एवं समितयः पञ्च गोप्यास्तिस्रस्तु गुप्तयः । वाङ्मनःकाययोगानां शुद्धरूपाः प्रवृत्तयः ॥१२७॥
चित्तेन्द्रियनिरोधश्च षडावश्यकसत्क्रियाः । लोचास्नानैकभक्तं च स्थितिभुक्तिरचेलता ॥१२८॥

एकं सङ्ख्येयविस्तारं सप्तम्यां नरकं मतम् । ततोऽसंख्येयविस्तारं नरकाणां चतुष्टयम् ॥१६८॥
तत्र संख्येयविस्तारा इन्द्रकाः सर्व एव ते । श्रेणीबद्धास्त्वसंख्येयविस्तारा नरकालयाः ॥१६९॥
केचित् संख्येयविस्ताराः सर्वभूमिप्रकीर्णकाः । केऽप्यसंख्येयविस्तारा इत्थं ते तूभयात्मकाः ॥१७०॥

पूर्व दिशामें निरुद्ध, पश्चिम दिशामें अतिनिरुद्ध, दक्षिणमें विमर्दन और उत्तरमें महाविमर्दन नामके चार प्रसिद्ध महानरक स्थित हैं ॥१५६॥ छठवीं पृथिवीके प्रथम प्रस्तारमें जो हिम नामका इन्द्रक बिल है उसकी पूर्व दिशामें नील, पश्चिम दिशामें महानील, दक्षिणमें पङ्क और उत्तरमें महापङ्क नामके चार प्रसिद्ध महानरक स्थित हैं ॥१५७॥ और सातवीं पृथिवीमें जो अप्रतिष्ठान नामका इन्द्रक है उसकी पूर्व दिशामें काल, पश्चिम दिशामें महाकाल, दक्षिण दिशामें रौरव और उत्तर दिशामें महारौरव नामके चार प्रसिद्ध महानरक हैं ॥१५८॥ इस प्रकार सातों पृथिवियोंमें तेरासी लाख, नब्बे हजार, तीन सौ सैंतालिस प्रकीर्णक, नौ हजार छह सौ श्रेणिबद्ध, उनंचास इन्द्रक और सब मिलाकर चौरासी लाख बिल हैं ॥१५९-१६०॥

प्रथम पृथिवीके तीस लाख बिलोंमें छह लाख बिल संख्यात योजन विस्तार वाले हैं और चौबीस लाख बिल असंख्यात योजन विस्तार वाले हैं ॥१६१॥ उसके नीचे दूसरी पृथिवीमें पाँच लाख संख्यात योजन विस्तार वाले और बीस लाख असंख्यात योजन विस्तार वाले बिल हैं ॥१६२॥ तीसरी पृथिवीमें तीन लाख संख्यात योजन विस्तार वाले और बारह लाख असंख्यात योजन विस्तार वाले बिल हैं ॥१६३॥ चौथी पृथिवीमें दो लाख बिल संख्यात योजन विस्तार वाले हैं और आठ लाख असंख्यात योजन विस्तार वाले हैं ॥१६४॥ पाँचवीं पृथ्वीमें साठ हजार बिल संख्यात योजन विस्तार वाले हैं और दो लाख चालीस हजार बिल असंख्यात योजन विस्तार वाले हैं ॥१६५॥ छठवीं पृथिवीमें उन्नीस हजार नौ सौ निन्यानबे बिल संख्यात-योजन विस्तार वाले हैं और उन्यासी हजार नौ सौ छियानबे बिल असंख्यात योजन विस्तार वाले हैं ॥१६६-१६७॥ सातवीं पृथिवीमें एक अर्थात् बीचका इन्द्रक बिल संख्यात योजन विस्तार वाला है और चारों दिशाओंके चार बिल असंख्यात योजन विस्तार वाले हैं ॥१६८॥ सातों पृथिवियोंमें जो इन्द्रक बिल हैं वे सब संख्यात योजन विस्तार वाले हैं, तथा श्रेणिबद्ध बिल असंख्यात योजन विस्तार वाले हैं और प्रकीर्णक बिलोंमें कितने ही संख्यात योजन विस्तार वाले तथा कितने ही असंख्यात योजन विस्तार वाले हैं इस तरह उभय विस्तार वाले हैं ॥१६९-१७०॥

---

१. साकमित्यर्थः ।

सीमन्तकस्य विस्तारो योजनानां मतं ततः । विद्भिः प्रमितो लक्षाश्चत्वारिंशच्च पञ्च च ॥१७१॥
चत्वारिंशत्ततस्त्रश्च लक्षाः साष्टसहस्रिकाः । त्रिशती च त्रयस्त्रिंशत् सत्र्यंशो नारकस्य सः ॥१७२॥
त्रिचत्वारिंशदिष्टास्ताः सहस्राणि च षोडश । षट्शतानि च षट्षष्टिर्द्वौ त्र्यंशौ रौरवस्य च ॥१७३॥
द्विचत्वारिंशदुक्तास्ताः सहस्राणि च विंशति । पञ्चोत्तराणि विस्तारो भ्रान्तस्यापि समन्ततः ॥१७४॥
चत्वारिंशच्च लक्षा सैकोद्भ्रान्तस्य शतत्रयम् । त्रयस्त्रिंशत् सहस्राणि त्रयस्त्रिंशत्तु भागवान् ॥१७५॥
चत्वारिंशत्स सम्भ्रान्ते ततः षट्षष्टि षट्शती । चत्वारिंशत् सहस्राणि सैकानि द्वौ त्रिभागकौ ॥१७६॥
ताश्चत्वारिंशदेकोना असम्भ्रान्तस्य विस्तृतिः । पञ्चाशच्च सहस्राणि योजनानां समन्ततः ॥१७७॥
अष्टात्रिंशत् स विभ्रान्ते ताः पञ्चाशत् सहस्रकैः । सह त्र्यंशस्त्रयस्त्रिंशत् त्रिशताष्टसहस्रकैः ॥१७८॥
सप्तत्रिंशदतो लक्षा सषट्षष्टिसहस्रिकाः । शतानि षट् त्रिभागो द्वौ षट्षष्टिस्त्रस्तनामनि ॥१७९॥
षट्त्रिंशच्च तथा लक्षाः सहस्राणि च सप्ततिः । पञ्चोत्तराणि विस्तारस्त्रसितस्य परिस्फुटः ॥१८०॥
पञ्चत्रिंशदतो लक्षा वक्रान्तस्य त्रिभागवान् । त्र्यशीतिश्च सहस्राणि त्रयस्त्रिंशच्छतत्रयम् ॥१८१॥
चतुस्त्रिंशदतो लक्षा नवत्येकसहस्रिकाः । षट्षष्टिः षट्शती त्र्यंशाववक्रान्तस्य सर्वतः ॥१८२॥
चतुस्त्रिंशत्ततो लक्षा योजनानामवस्थिताः । विक्रान्तस्यापि विस्तारः समस्तो विस्तरेरितः ॥१८३॥
स्तरकस्य त्रयस्त्रिंशत् लक्षाः साष्टसहस्रिकाः । शतानि त्रीणि सत्र्यंशः त्रिंशच्च त्रीणि विस्तृतिः ॥१८४॥
स्तनकस्य तु विस्तारो लक्षा द्वात्रिंशदंशकौ । षोडशापि सहस्राणि षट्षष्टिः षट्शती मता ॥१८५॥
मनकस्यापि विस्तारो त्रिंशल्लक्षा सहैककाः । योजनानां सहस्राणि पञ्चविंशतिरेव च ॥१८६॥

अब सातों पृथिवियोंके उनंचास इन्द्रक बिलोंका विस्तार कहते हैं—उनमेंसे प्रथम पृथिवीके सीमन्तक इन्द्रकका विस्तार पैंतालीस लाख योजन है ॥१७१॥ दूसरे नारक इन्द्रकका विस्तार चवालीस लाख आठ हजार तीन सौ तैंतीस योजन तथा एक योजनके तीन भागोंमेंसे एक भाग प्रमाण है ॥१७२॥ तीसरे रौरव इन्द्रकका विस्तार तैंतालीस लाख सोलह हजार छह सौ सड़सठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥१७३॥ चौथे भ्रान्त नामक इन्द्रकका विस्तार सब ओरसे बयालीस लाख पच्चीस हजार योजन है ॥१७४॥ पाँचवें उद्भ्रान्त नामक इन्द्रकका विस्तार इकतालीस लाख तैंतीस हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमेंसे एक भाग प्रमाण है ॥१७५॥ छठवें सम्भ्रान्त नामक इन्द्रकका विस्तार चालीस लाख इकतालीस हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥१७६॥ सातवें असंभ्रान्त इन्द्रकका विस्तार सब ओरसे उनतालीस लाख पचास हजार योजन है ॥१७७॥ आठवें विभ्रान्त नामक इन्द्रकका विस्तार अड़तीस लाख अंठावन हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमेंसे एक भाग प्रमाण है ॥१७८॥ नौवें त्रस्त नामक इन्द्रकका विस्तार सैंतीस लाख छियासठ हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥१७९॥ दशवें त्रसित नामक इन्द्रकका विस्तार छत्तीस लाख पचहत्तर हजार योजन है ॥१८०॥ ग्यारहवें वक्रान्त नामक इन्द्रकका विस्तार पैंतीस लाख तेरासी हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमेंसे एक भाग प्रमाण है ॥१८१॥ बारहवें अवक्रान्त नामक इन्द्रकका विस्तार सब ओरसे चौंतीस लाख एकानवे हजार छह सौ छयासठ योजन और एक योजनके तीन भागोंमेंसे दो भाग प्रमाण है ॥१८२॥ और तेरहवें विक्रान्त नामक इन्द्रकका विस्तार चौंतीस लाख योजन है ॥१८३॥

द्वितीय पृथिवीके पहले स्तरक नामक इन्द्रकका विस्तार तैंतीस लाख आठ हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमेंसे एक भाग प्रमाण है ॥१८४॥ दूसरे स्तनक नामक इन्द्रकका विस्तार बत्तीस लाख सोलह हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग है॥१८५॥ तीसरे मनक इन्द्रकका विस्तार इकतीस लाख पच्चीस हजार योजन है

वनकस्यापि विस्तारः त्रिंशल्लक्षाः शतत्रयम् । त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशत्त्रिभागवान् ॥१८७॥
घाटस्य विंशतिर्लक्षा नव षट्षष्टिश्च षट्शतम् । चत्वारिंशत्सहस्राणि सैकानि त्र्यंशकौ हि सः ॥१८८॥
अष्टाविंशतिलक्षास्तु विस्तारः परिकीर्तितः । स पञ्चाशत् सहस्राणि संघाटस्य निरन्तरः ॥१८९॥
सप्तविंशतिलक्षाः स त्रयस्त्रिंशं शतत्रयम् । पञ्चाशच्च सहस्राणि साष्टौ जिह्वस्त्रिभागवान् ॥१९०॥
लक्षाः षड्विंशतिः प्रोक्ताः सषट्षष्टिसहस्रिकाः । षट्षष्टिःषट्शती त्र्यंशौ विस्तारो जिह्विकाश्रयः॥१९१॥
पञ्चविंशतिलक्षास्तु लोलस्य परिकीर्तितः । सहस्राणि च विस्तारः समस्तः पञ्चसप्ततिः ॥१९२॥
चतुर्विंशतिलक्षाश्च लोलुपस्य त्रिभागवान् । त्र्यशीतिश्च सहस्राणि त्रिशती त्रिंशता त्रयम् ॥१९३॥
त्रयोविंशतिलक्षास्तु विस्तारः स्तनलोलुपे । सहस्राण्येकनवतिस्त्र्यंशौ षट्षष्टि षट्शतम् ॥१९४॥
त्रयोविंशतिलक्षास्तु तप्ते द्वाविंशतिः परे । त्रिभागोऽष्टौ सहस्राणि त्रयस्त्रिंशच्छतत्रयम् ॥१९५॥
एकविंशतिलक्षा वै सहस्राणि च षोडश । तपनस्य त्रिभागौ च षट्षष्टिः षट्शती च सः ॥१९६॥
लक्षाः विंशतिरुद्दिष्टा मुनिभिः पञ्चविंशतिः । सहस्राणि च विस्तारस्तापनस्यापि सर्वतः ॥१९७॥
एकोनविंशतिर्लक्षा निदाघस्य शतत्रयम् । त्रयस्त्रिंशत्सहस्राणि त्रिभागस्त्रिंशता त्रयम् ॥१९८॥
स चाष्टादश लक्षास्ताः षट्षष्टिः षोडशात्मकम् । शतं प्रज्वलितस्यासौ चत्वारिंशत्सहस्रकैः ॥१९९॥
लक्षाः सप्तदश प्रोक्ता विस्तारस्तत्त्वदर्शिभिः । सहैवोज्ज्वलितस्यासौ चत्वारिंशत्सहस्रकैः ॥२००॥
लक्षाः षोडश विस्तारो ह्यष्टापञ्चाशदप्यतः । सहस्राणि त्रिंशत्यंशस्त्रिशत्संज्वलिते त्रिभिः ॥२०१॥
लक्षाः पञ्चदश त्र्यंशो षट्षष्टिः षट्शती च सः । सहस्राणि च षट्षष्टिः सम्प्रज्वलितनामनि ॥२०२॥

॥१८६॥ चौथे वनक इन्द्रकका विस्तार तीस लाख तैंतीस हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥१८७॥ पाँचवें घाट नामक इन्द्रकका विस्तार उनतीस लाख इकतालीस हजार छः सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है॥१८८॥ छठवें संघाट नामक इन्द्रकका विस्तार अट्ठाईस लाख पचास हजार योजन है ॥१८९॥ सातवें जिह्व नामक इन्द्रकका विस्तार सत्ताईस लाख अंठावन हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥१९०॥ आठवें जिह्वक इन्द्रकका विस्तार छब्बीस लाख छियासठ हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥१९१॥ नौवें लोल इन्द्रकका विस्तार पच्चीस लाख पचहत्तर हजार योजन है ॥१९२॥ दसवें लोलुप नामक इन्द्रकका विस्तार चौबीस लाख तेरासी हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥१९३॥ और ग्यारहवें स्तनलोलुप इन्द्रकका विस्तार तेईस लाख एकानबे हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥१९४॥

तीसरी पृथिवीके पहले तप्त नामक इन्द्रकका विस्तार तेईस लाख योजन है । दूसरे तपित इन्द्रकका विस्तार बाईस लाख आठ हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥१९५॥ तीसरे तपन इन्द्रकका विस्तार इक्कीस लाख सोलह हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥१९६॥ चौथे तापन नामक इन्द्रकका विस्तार मुनियोंने सब ओर बीस लाख पच्चीस हजार योजन कहा है ॥१९७॥ पाँचवें निदाघ नामक इन्द्रकका विस्तार उन्नीस लाख तैंतीस हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥१९८॥ छठवें प्रज्वलित इन्द्रकका विस्तार अठारह लाख इकतालीस हजार छह सौ छियासठ योजन है ॥१९९॥ सातवें उज्ज्वलित इन्द्रकका विस्तार तत्त्वदर्शी आचार्योंने सत्रह लाख चालीस हजार योजन बतलाया है ॥२००॥ आठवें संज्वलित इन्द्रकका विस्तार सोलह लाख अंठावन हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥२०१॥ और नौवें संप्रज्वलित इन्द्रकका विस्तार

लक्षाश्चतुर्दशैवोक्ताः पञ्चसप्ततिरप्यतः । सहस्राणि स विस्तारस्तस्यारस्यापि सर्वतः ॥२०३॥
लक्षास्त्रयोदश त्र्यंशस्त्रयस्त्रिंशच्छतत्रयम् । त्र्यशीतिश्च सहस्राणि विस्तारस्तारगोचरः ॥२०४॥
लक्षा द्वादश त्र्यंशौ च षट्षष्टिः षट्शती तथा । सहस्राण्येकनवतिर्विस्तारो मारगोचरः ॥२०५॥
लक्षा द्वादश वर्चस्के लक्षोनास्तनके तु ताः । त्र्यंशश्चाष्टसहस्राणि त्रयस्त्रिंशच्छतत्रयम् ॥२०६॥
लक्षा दश षडस्योक्ताः सहस्रं षोडशात्मकम् । षट्शती च त्रिभागौ च षट्षष्टिः स प्रकीर्तितः ॥२०७॥
लक्षा नव सहस्राणि पञ्चविंशतिरेव च । विस्तारो विस्तरेणोक्तस्तज्ज्ञैः षडषडस्य सः ॥२०८॥
लक्षास्तमःश्रुतेरष्टौ योजनानां शतत्रयम् । त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशत्त्रयं च सः ॥२०९॥
लक्षाः सप्त भ्रमस्यासौ चत्वारिंशत्सहस्रकैः । शतानि षोडशांशौ च षट्षष्टिरपि भाषितः ॥२१०॥
लक्षाः षडेव विस्तारः सपञ्चाशत्सहस्रिकाः । योजनानां समन्तात्तु झषस्य परिभाषितः ॥२११॥
लक्षाः पञ्चैव चान्धस्य त्रयस्त्रिंशच्छतत्रयम् । त्र्यंशश्चाप्यष्टपञ्चाशत् सहस्राणि स वर्णितः ॥२१२॥
लक्षाश्चतस्र उद्दिष्टास्तमिस्रे त्र्यंशकद्वयम् । षट्षष्टिश्च सहस्राणि षट्षष्टिः षट्शती च सः ॥२१३॥
लक्षास्तिस्रो हिमस्यापि विस्तारः पञ्चसप्ततिः । सहस्राणि समादिष्टः शुद्धकेवलदृष्टिभिः ॥२१४॥
लक्षद्वयं विभागश्च विस्तारो वर्दलस्य तु । त्र्यशीतिश्च सहस्राणि त्रयस्त्रिंशच्छतत्रयम् ॥२१५॥
लल्लकस्य तु लक्षैका षट्षष्टिः षट्शती तथा । सहस्राण्येकनवतिर्विस्तारः त्र्यंशकद्वयम् ॥२१६॥

पन्द्रह लाख छियासठ हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥२०२॥

चौथी पृथिवीके आर नामक पहले इन्द्रकका विस्तार सब ओर चौदह लाख पचहत्तर हजार योजन कहा है ॥२०३॥ दूसरे तार इन्द्रकका विस्तार तेरह लाख तेरासी हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥२०४॥ तीसरे मार नामक इन्द्रकका विस्तार बारह लाख एकानबे हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥२०५॥ चौथे वर्चस्क इन्द्रकका विस्तार बारह लाख योजन है । पाँचवें तनक इन्द्रकका विस्तार ग्यारह लाख आठ हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥२०६॥ छठवें खड इन्द्रकका विस्तार दश लाख सोलह हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग है ॥२०७॥ और सातवें खडखड नामक इन्द्रकका विस्तार जानकार आचार्योंने नौ लाख पचीस हजार योजन कहा है ॥२०८॥

पाँचवीं पृथिवीके पहले तम नामक इन्द्रकका विस्तार आठ लाख तैंतीस हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥२०९॥ दूसरे भ्रम इन्द्रकका विस्तार सात लाख इकतालीस हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग है ॥२१०॥ तीसरे झष इन्द्रकका विस्तार छह लाख पचास हजार योजन कहा गया है ॥२११॥ चौथे अन्ध नामक इन्द्रकका विस्तार पाँच लाख अंठावन हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण वर्णित है ॥२१२॥ और पाँचवें तमिस्र नामक इन्द्रकका विस्तार चार लाख छियासठ हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥२१३॥

छठवीं पृथिवीके पहले हिम नामक इन्द्रकका विस्तार निर्मल केवलज्ञानके धारी अरहन्त भगवान्‌ने तीन लाख पचहत्तर हजार योजन बतलाया है ॥२१४॥ दूसरे वर्दल इन्द्रकका विस्तार दो लाख तेरासी हजार तीन सौ तैंतीस योजन और एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥२१५॥ और तीसरे लल्लक इन्द्रकका विस्तार एक लाख एकानबे हजार छह सौ छियासठ योजन और एक योजनके तीन भागोंमें दो भाग प्रमाण है ॥२१६॥

केवलैव तु लक्षैका योजनानां प्रकीर्तितः । अप्रतिष्ठानविस्तारो वस्तुविस्तरवेदिभिः ॥२१७॥
इन्द्रकेषु च बाहुल्यं घर्मायां क्रोश एव च । श्रेणिष्वेषु स त्र्यंशो द्वौ त्र्यंशौ प्रकीर्णके ॥२१८॥
क्रोशः सार्धस्तु वंशायामिन्द्रकेषु तदीरितम् । श्रेणीगतेषु तु क्रोशौ त्रयः सार्धाः प्रकीर्णके ॥२१९॥
मेघायामिन्द्रकेषूक्तं बाहुल्यं क्रोशयोर्द्वयम् । स द्वित्र्यंशं तु तच्छ्रेण्यां संयुक्तं तत्प्रकीर्णके ॥२२०॥
सार्धौ द्वाविन्द्रकेष्वेतौ चतुर्थ्यां त्र्यंशकस्त्रयः । श्रेण्यां प्रकीर्णकेष्वेते षट्भागैः पञ्च पञ्चभिः ॥२२१॥
इन्द्रकेषु त्रयः क्रोशाश्चत्वारः श्रेण्युपाश्रयः । सप्त प्रकीर्णकेष्वेते पञ्चम्यामुपवर्णिताः ॥२२२॥
सार्धाः षष्ठ्यां त्रयः क्रोशा इन्द्रके श्रेण्युपाश्रिताः । चत्वारस्त्र्यंशकावष्टौ ते षड्भागाः प्रकीर्णके ॥२२३॥
सप्तम्यामप्रतिष्ठाने चत्वारस्ते समुच्छ्रयाः । श्रेणिबद्धेषु पञ्चैव सत्रिभागाः प्रकीर्तिताः ॥२२४॥
योजनानां चतुःषष्टिः शतानि प्रथमक्षितौ । नवतिर्नवसंयुक्ता क्रोशयोश्च द्वयं तथा ॥२२५॥
क्रोशद्वादशभागाश्च तथैवैकादशापरे । इन्द्रकाणामिदं ज्ञेयमेकैकस्यान्तरं बुधैः ॥२२६॥
चतुःषष्टिशतान्येव नवतिश्च नवोत्तरा । श्रेणीगतान्तरं क्रोशौ तथा पञ्चनवांशकाः ॥२२७॥
नवतिर्नव चैतानि चतुःषष्टिशतानि तत् । क्रोशाः सप्तदशान्येषां क्रोशषट्त्रिंशदंशकाः ॥२२८॥
इन्द्रकाणां द्वितीयायां पृथिव्यां तु पृथुश्रुताः । तद्योजनशतान्याहुरेकान्नत्रिंशदन्तरम् ॥२२९॥
नवभिश्च नवत्या च योजनैः सहितानि तु । चत्वारिंशच्छतैर्युक्ता तथा सप्तधनुःशती ॥२३०॥
तावन्त्येव च जायन्ते योजनान्यन्ययाऽनया । श्रेणिबद्धस्थितानां च या षट्त्रिंशद्धनुःशती ॥२३१॥

सातवीं पृथिवीमें केवल अप्रतिष्ठान नामका एक ही इन्द्रक है तथा वस्तुके विस्तारको जाननेवाले सर्वज्ञ देवने उसका विस्तार एक लाख योजन बतलाया है ॥२१७॥

घर्मा नामक पहली पृथिवीके इन्द्रक बिलोंकी मुटाई एक कोश, श्रेणिबद्ध बिलोंकी एक कोश तथा एक कोशके तीन भागोंमें एक भाग और प्रकीर्णक बिलोंकी दो कोश तथा एक कोशके तीन भागोंमें एक भाग प्रमाण है ॥२१८॥ दूसरी वंशा पृथिवीके इन्द्रक बिलोंकी मुटाई डेढ़ कोश, श्रेणिबद्धोंकी दो कोश और प्रकीर्णकोंकी साढ़े तीन कोश है ॥२१९॥ तीसरी मेघा पृथिवीके इन्द्रकोंकी मुटाई दो कोश, श्रेणिबद्धोंकी दो कोश और एक कोशके तीन भागोंमें दो भाग, तथा प्रकीर्णकोंकी चार कोश और एक कोशके तीन भागोंमें दो भाग है ॥२२०॥ चौथी अञ्जना पृथिवीके इन्द्रकोंकी मुटाई अढ़ाई कोश, श्रेणिबद्धोंकी तीन कोश और एक कोशके तीन भागोंमें एक भाग तथा प्रकीर्णकोंकी पाँच कोश और एक कोशके छह भागोंमें पाँच भाग है ॥२२१॥ पाँचवीं अरिष्टा पृथिवीके इन्द्रकोंकी मुटाई तीन कोश, श्रेणिबद्धोंकी चार और प्रकीर्णकोंकी सात कोश है ॥२२२॥ छठवीं मघवी पृथिवीके इन्द्रकोंकी मुटाई साढ़े तीन कोश, श्रेणिबद्धोंकी चार कोश और एक कोशके तीन भागोंमें दो भाग तथा प्रकीर्णकोंकी आठ कोश और एक कोशके आठ भागोंमें छह भाग प्रमाण है ॥२२३॥ एवं माघवी नामक सातवीं पृथिवीके अप्रतिष्ठान इन्द्रककी मुटाई चार कोश, श्रेणिबद्धोंकी पाँच कोश और एक कोशके तीन भागोंमें एक भाग है। सातवीं पृथिवीमें प्रकीर्णक बिल नहीं है ॥२२४॥

अब बिलोंका परस्पर अन्तर कहते हैं—प्रथम पृथिवीके इन्द्रक बिलोंका अन्तर बुद्धिमान् पुरुषोंको चौंसठ सौ निन्यानबे योजन (छह हजार चार सौ निन्यानबे योजन) दो कोश और एक कोशके बारह भागोंमेंसे ग्यारह भाग जानना चाहिए ॥२२५–२२६॥ श्रेणिबद्ध बिलोंका चौंसठ सौ निन्यानबे योजन दो कोश और एक कोशके नौ भागोंमें पाँच भाग है ॥२२७॥ तथा प्रकीर्णक बिलोंका अन्तर चौसठ सौ निन्यानबे योजन दो कोश और एक कोशके छत्तीस भागोंमें सत्रह भाग प्रमाण है ॥२२८॥ द्वितीय पृथिवीके इन्द्रक बिलोंका अन्तर बहुश्रुत-विद्वानोंने दो हजार नौ सौ निन्यानबे योजन और चार हजार सात सौ धनुष कहा है ॥२२९–२३०॥ श्रेणिबद्ध बिलोंका अन्तर दो हजार नौ सौ निन्यानबे योजन और तीन हजार छह सौ धनुष

तावन्त्येव पुनस्तानि योजनानि परस्परम् । प्रकीर्णकान्तरं तस्यां तृतीयं तु धनुःशतम् ॥२३२॥
विनैकेन तु पञ्चाशदिन्द्रकाणां शतान्यपि । द्वात्रिंशच्च तृतीयायां पञ्चत्रिंशद्धनुःशतैः ॥२३३॥
योजनानि हि यावन्ति द्विसहस्रधनूंषि च । श्रेणीगतान्तरं तस्यां लब्धवर्णैः प्रवर्णितम् ॥२३४॥
चत्वारिंशत्सहाष्टाभिर्द्वात्रिंशच्च शतानि वै । धनूंषि पञ्चपञ्चाशच्छतान्येतत्प्रकीर्णके ॥२३५॥
पञ्चषष्टिश्च षट्त्रिंशच्छतानीन्द्रकगोचरम् । धनुःशतानि तद्वेद्यं चतुर्थ्यां पञ्चसप्ततिः ॥२३६॥
योजनानि हि तावन्ति श्रेण्यां पञ्चनवांशकैः । धनूंषि पञ्चपञ्चाशत्तावन्त्येव शतानि तत् ॥२३७॥
चतुःषष्टिश्च षट्त्रिंशद् योजनानां शतानि तु । सप्तसप्ततिसंख्यानैस्तथा चापशतैरपि ॥२३८॥
द्वाविंशतिधनुर्भिश्च नवभागद्वयेन च । प्रकीर्णकान्तरं बोध्यं तस्यामेव प्रकीर्तितम् ॥२३९॥
सहस्राणि तु चत्वारि तच्चत्वारि शतानि च । योजनानि समस्तानि नवतिश्च नवोत्तरा ॥२४०॥
धनुःशतानि पञ्चैव पञ्चम्यामिन्द्रकेष्विदम् । भेदान्तरप्रपञ्चज्ञैरन्तरं प्रतिपादितम् ॥२४१॥
सहस्राणि च चत्वारि श्रेण्यां तावच्छतानि च । अष्टानवति नन्वेतत् षट्सहस्रधनूंषि च ॥२४२॥
तच्चत्वारि सहस्राणि शतान्यपि च सप्तभिः । नवतिः शेषके चापपञ्चषष्टिशतानि च ॥२४३॥
सहस्राणि च षट्षष्ठ्यां शतानि नव चाष्टभिः । नवतिः पञ्चपञ्चाशद्धनुःशतवतीन्द्रके ॥२४४॥
तावन्त्येव भवन्त्यस्यां योजनानि तदन्तरम् । श्रेणीबद्धेषु वक्तव्यं द्विसहस्रधनुर्युतम् ॥२४५॥
सहस्राणि षडेवास्यां नवतिश्च षडुत्तरा । शतानि नव सप्तत्या शेषे पञ्चधनुःशती ॥२४६॥
ऊर्ध्वाधस्त्रिसहस्राणि नवतिश्च नवोत्तरा । शतानि नव गव्यूतिः सप्तम्यामिन्द्रकान्तरम् ॥२४७॥
श्रेणीबद्धान्तरं चास्यां योजनानि भवन्ति हि । गव्यूतेश्च त्रिभागेन तावन्त्येवेति निश्चयः ॥२४८॥
दशवर्षसहस्राणि नारकाणां लघुस्थितिः । सीमन्तके विनिर्दिष्टा नवतिस्तु परा स्थितिः ॥२४९॥

है ॥२३१॥ एवं प्रकीर्णक बिलोंका भी पारस्परिक अन्तर उतना ही अर्थात् दो हजार नौ सौ निन्यानबे योजन और तीन सौ धनुष है ॥२३२॥ तीसरी पृथिवीमें इन्द्रक बिलोंका विस्तार बत्तीस सौ योजन और पैंतीस सौ धनुष प्रमाण है ॥२३३॥ श्रेणीगत बिलोंका अन्तर विद्वानोंने बत्तीस सौ योजन और दो हजार धनुष बतलाया है ॥२३४॥ तथा प्रकीर्णकोंका अन्तर बत्तीस सौ अड़तालीस योजन और पचपन सौ धनुष कहा है ॥२३५॥ चौथी पृथिवीमें इन्द्रकबिलोंका विस्तार छत्तीस सौ पैंसठ योजन और पचहत्तर सौ धनुष प्रमाण है ॥२३६॥ श्रेणिबद्ध बिलोंका अन्तर छत्तीस सौ पैंसठ योजन, पचहत्तर सौ धनुष और एक धनुषके नौ भागोंमेंसे पाँच भाग प्रमाण है ॥२३७॥ तथा प्रकीर्णक बिलोंका विस्तार छत्तीस सौ चौंसठ योजन, सतहत्तर सौ बाईस धनुष और एक धनुषके नौ भागोंमें दो भाग प्रमाण है ॥२३८-२३९॥ पाँचवीं पृथिवीके इन्द्रक बिलोंका अन्तर भेद तथा अन्तरोंका विस्तार जाननेवाले आचार्योंने चार हजार चार-सौ निन्यानबे योजन और पाँच सौ धनुष बतलाया है ॥२४०-२४१॥ श्रेणिबद्ध बिलोंका अन्तर चार हजार चार सौ अंठानबे योजन और छह हजार धनुष है ॥२४२॥ तथा प्रकीर्णक बिलोंका अन्तर चार हजार चार सौ संतानबे योजन और छह हजार पाँच सौ धनुष है ॥२४३॥ छठवीं पृथिवीके इन्द्रक बिलोंका अन्तर छह हजार नौ सौ अंठानबे योजन और पचपन सौ धनुष प्रमाण है ॥२४४॥ श्रेणिबद्ध बिलोंका अन्तर छह हजार नौ सौ अंठानबे योजन और दो हजार धनुष है ॥२४५॥ तथा प्रकीर्णक बिलोंका अन्तर छह हजार नौ सौ छियानबे योजन और सात हजार पाँच सौ धनुष है ॥२४६॥ सातवीं पृथिवीमें इन्द्रक बिलका अन्तर ऊपर-नीचे तीन हजार नौ सौ निन्यानबे योजन और एक गव्यूति अर्थात् दो कोश प्रमाण है ॥२४७॥ तथा इसी सातवीं पृथिवीमें श्रेणिबद्ध बिलोंका अन्तर तीन हजार नौ सौ निन्यानबे योजन और एक कोशके तीन भागोंमें एक भाग प्रमाण है ऐसा निश्चय है ॥२४८॥

अब सातों पृथिवियोंमें जघन्य तथा उत्कृष्ट आयुका वर्णन करते हैं—पहली पृथिवीके

साधिका तु परे चासाववरा स्थितिरिष्यते । इन्द्रके नारकाभिख्ये लक्षास्तु नवतिः परा ॥२५०॥
इयमेव जघन्या स्यात् रौरवे[1] समयाधिका । पूर्वकोटयस्त्वसंख्येया परमा परिकीर्तिता ॥२५१॥
एषा चैवापरा भ्रान्ते स्थितिः स्यात् समयोत्तरा । सागरस्य परो भागो दशमोऽत्र परा स्थितिः ॥२५२॥
इयमेव जघन्या स्यादुद्भ्रान्ते परमा पुनः । द्वावेव दशमौ भागाविति तत्त्वविदां मतम् ॥२५३॥
सम्भ्रान्ते तु जघन्येयं दशभागास्त्रयः परा । अवराऽसावसम्भ्रान्ते परा भागचतुष्टया ॥२५४॥
अवराऽसौ च विभ्रान्ते परा सैकांशवर्द्धिता । त्रस्ते त्ववरा सा स्यात् षट् परा तु दशांशका ॥२५५॥
त्रसिते त्वपरा प्रोक्ता परा सप्त तदंशका । वक्रान्ते साऽपरा प्रोक्ता परा चाष्टौ दशांशकाः ॥२५६॥
एषैवोक्ता विपश्चिद्भिरवक्रान्तेऽवरा स्थितिः । नवैते दशमा भागास्तत्रैव परमा स्थितिः ॥२५७॥
इयमेव तु विक्रान्ते जघन्या परमा दश । दश भागा स्थितिः सैषा घर्मायां सागरोपमा ॥२५८॥
सातिरेकाऽवरा सैव स्तरके सागरोपमा । सागरैकादशांशौ च सागरस्य परा स्थितिः ॥२५९॥

प्रथम सीमन्तक नामक प्रस्तारमें नारकियोंकी जघन्य स्थिति दश हजार वर्षकी और उत्कृष्ट नब्बे हजार वर्षकी कही गई है ॥२४९॥ दूसरे नारक नामक इन्द्रकमें कुछ अधिक नब्बे हजार वर्षकी जघन्य स्थिति और नब्बे लाख वर्षकी उत्कृष्ट स्थिति है ॥२५०॥ रौरव नामक तीसरे प्रस्तारमें एक समय अधिक नब्बे लाखकी जघन्य स्थिति और असंख्यात करोड़ वर्षकी उत्कृष्ट स्थिति है ॥२५१॥ भ्रान्त नामक चौथे प्रस्तारमें एक समय अधिक असंख्यात करोड़ वर्षकी जघन्य स्थिति और सागरके दसवें भाग प्रमाण उत्कृष्ट स्थिति है ॥२५२॥ उद्भ्रान्त नामक पाँचवें प्रस्तारमें एक समय अधिक सागरका दसवाँ भाग जघन्य स्थिति है और एक सागरके दश भागोंमें दो भाग प्रमाण उत्कृष्ट स्थिति तत्त्वज्ञ पुरुषोंने मानी है ॥२५३॥ संभ्रान्त नामक छठवें प्रस्तारमें एक सागरके दश भागोंमें दो भाग तथा एक समय जघन्य स्थिति है और उत्कृष्ट स्थिति सागरके दश भागोंमें तीन भाग प्रमाण है । असम्भ्रान्त नामक सातवें प्रस्तारमें जघन्य स्थिति सागरके दश भागोंमें समयाधिक तीन भाग है और उत्कृष्ट स्थिति सागरके दश भागों-में चार भाग प्रमाण है ॥२५४॥ विभ्रान्त नामक आठवें प्रस्तारमें जघन्य स्थिति एक समय अधिक सागरके दश भागोंमें चार भाग प्रमाण है और उत्कृष्ट स्थिति सागरके दश भागोंमें पाँच भाग प्रमाण है । त्रस्त नामक नौवें प्रस्तारमें एक समय अधिक सागरके दश भागोंमें पाँच भाग प्रमाण जघन्य स्थिति है और सागरके दश भागोंमें छह भाग प्रमाण उत्कृष्ट स्थिति है ॥२५५॥ त्रसित नामक दसवें प्रस्तारमें जघन्य स्थिति एक समय अधिक सागरके दश भागोंमें छह भाग प्रमाण है और उत्कृष्ट स्थिति सागरके दश भागोंमें सात भाग प्रमाण है । वक्रान्त नामक ग्यारहवें प्रस्तारमें जघन्य स्थिति एक समय अधिक सागरके दश भागोंमें सात भाग प्रमाण है और उत्कृष्ट स्थिति सागरके दश भागोंमें आठ भाग प्रमाण है ॥२५६॥ अवक्रान्त नामक बारहवें प्रस्तारमें एक समय अधिक सागरके दश भागोंमें आठ भाग प्रमाण जघन्य स्थिति है और एक सागरके दश भागोंमें नौ भाग प्रमाण उत्कृष्ट स्थिति विद्वानोंने कही है । विक्रान्त नामक तेरहवें प्रस्तारमें जघन्य स्थिति एक सागरके दश भागोंमें समयाधिक नौ भाग प्रमाण है और उत्कृष्ट स्थिति सागरके दश भागोंमें दशों भाग अर्थात् एक सागर प्रमाण है । इस प्रकार घर्मा नामक पहली पृथिवीके तेरह प्रस्तारोंमें जघन्य तथा उत्कृष्ट स्थितिका कथन किया अब दूसरी पृथिवीके ग्यारह प्रस्तारोंमें स्थितिका वर्णन करते हैं ॥२५७–२५८॥

दूसरी पृथिवीके स्तरक नामक प्रथम प्रस्तारमें नारकियोंकी जघन्य आयु एक समय अधिक एक सागर और उत्कृष्ट स्थिति एक सागर तथा एक सागरके ग्यारह अंशोंमें दो अंश प्रमाण

---

१. रौरुके म० ।

स्थितिरेषैव विज्ञेया स्तनकेऽनन्तरावरा । चतुरेकादशांशाश्च सागरश्च परा तथा ॥२६०॥
अनन्तरा विनिर्दिष्टा मुनिभिर्मनकेऽवरा । षडेकादशभागाश्च सागरश्च तथा परा ॥२६१॥
एषैवावादि विद्वद्भिर्वनके चावरा स्थितिः । अष्टैकादशभागाश्च सागरश्च परा तथा ॥२६२॥
सैषैवाद्या विघाटेऽपि पटुभिः प्रकटाऽवरा । दशैकादशभागाश्च सागरश्च परा तथा ॥२६३॥
इन्द्रके त्वियमेव स्यात् सङ्घाटेऽनन्तराऽवरा । तत्रैकादशभागश्च सागरौ च परा स्थितिः ॥२६४॥
स्थितिरेषैव बोधव्या जिह्वाख्येऽपीन्द्रकेऽवरा । त्रयस्त्वेकादशांशास्ते सागरौ च तथा परा ॥२६५॥
असावेव समादिष्टा जिह्विकाख्येन्द्रकेऽवरा । पञ्चैकादशभागाश्च सागरौ च परा स्थितिः ॥२६६॥
एषैवानन्तरा वेद्या लोलनाम्नेन्द्रकेऽवरा । सप्तैकादशभागाश्च सागरौ च परा तथा ॥२६७॥
भवत्यनन्तरैवैषा लोलुपेऽपीन्द्रकेऽवरा । नवैकादशभागाश्च सागरौ च परा तथा ॥२६८॥
अवरैषा परापीष्टा स्तनलोलुपनामनि । सागरत्रयमेतेषु वंशाया सागरास्त्रयः ॥२६९॥
सागरत्रयमेवासाववरा तप्तनामनि । चत्वारो नवभागाश्च परमा सागरास्त्रयः ॥२७०॥
इयमेवाऽवरा वर्ण्या तपितेऽपीन्द्रके स्थितिः । तथाऽष्टौ नवभागाश्च परमा सागरास्त्रयः ॥२७१॥
तपनेऽप्यवरैषैव नव भागास्त्रयोऽपि तु । चत्वारश्च समादिष्टा परमा सागराः स्थितिः ॥२७२॥
इयमेवोपगीता सा तापनेऽप्यवरा स्थितिः । सा सप्त नवभागास्तु चत्वारः सागराः परा ॥२७३॥

है ॥२५९॥ स्तनक नामक दूसरे प्रस्तारमें यही जघन्य स्थिति है तथा एक सागर पूर्ण और एक सागरके ग्यारह भागोंमें चार भाग प्रमाण उत्कृष्ट स्थिति है ॥२६०॥ मनक नामक तीसरे प्रस्तारमें यही जघन्य स्थिति है और एक सागर पूर्ण तथा एक सागरके ग्यारह भागोंमें छह भाग प्रमाण उत्कृष्ट स्थिति है ॥२६१॥ वनक नामक चौथे प्रस्तारमें विद्वानोंने यही जघन्य स्थिति तथा एक सागर पूर्ण और एक सागरके ग्यारह भागोंमें आठ भाग प्रमाण उत्कृष्ट स्थिति कही है ॥२६२॥ विघाट नामक पाँचवें प्रस्तारमें यही जघन्य स्थिति तथा एक सागर पूर्ण और एक सागरके ग्यारह भागोंमें दश भाग प्रमाण उत्कृष्ट स्थिति विज्ञ पुरुषोंने प्रकट की है—बतलाई है ॥२६३॥ संघाट नामक छठवें इन्द्रक अथवा प्रस्तारमें यही जघन्य स्थिति है और दो सागर पूर्ण तथा एक सागरके ग्यारह भागोंमें एक भाग प्रमाण उत्कृष्ट स्थिति है ॥२६४॥ जिह्व नामक सातवें प्रस्तारमें यही जघन्य स्थिति है और दो सागर पूर्ण तथा एक सागरके ग्यारह भागोंमें तीन भाग प्रमाण उत्कृष्ट स्थिति है ॥२६५॥ जिह्विक नामक आठवें प्रस्तारमें यही जघन्य स्थिति है और दो सागर पूर्ण तथा एक सागरके ग्यारह भागोंमें पाँच भाग प्रमाण उत्कृष्ट स्थिति है ॥२६६॥ लोल नामक नौवें प्रस्तारमें यही जघन्य स्थिति तथा दो सागर पूर्ण और एक सागरके ग्यारह भागोंमें सात सागर प्रमाण उत्कृष्ट स्थिति जानना चाहिए ॥२६७॥ लोलुप नामक दसवें प्रस्तारमें यही जघन्य स्थिति और दो सागर पूर्ण तथा एक सागरके ग्यारह भागोंमें नौ भाग प्रमाण उत्कृष्ट स्थिति है ॥२६८॥ एवं स्तनलोलुप नामक ग्यारहवें प्रस्तारमें यही जघन्य स्थिति और तीन सागर प्रमाण उत्कृष्ट स्थिति है। इस तरह वंशा नामक दूसरी पृथिवीमें सामान्य रूपसे तीन सागर प्रमाण स्थिति प्रसिद्ध है ॥२६९॥

तीसरी पृथिवीके तप्त नामक प्रथम इन्द्रकमें तीन सागर जघन्य और तीन सागर पूर्ण तथा एक सागरके नौ भागोंमें चार भाग प्रमाण जघन्य स्थिति है ॥२७०॥ तपित नामक दूसरे इन्द्रकमें यही जघन्य तथा तीन सागर पूर्ण और एक सागरके नौ भागोंमें आठ भाग प्रमाण उत्कृष्ट स्थिति वर्णन करने योग्य है ॥२७१॥ तपन नामक तीसरे इन्द्रकमें यही जघन्य और चार सागर पूर्ण तथा एक सागरके नौ भागोंमें तीन भाग पूर्ण उत्कृष्ट स्थिति कही गई है ॥२७२॥ तापन नामक चौथे इन्द्रकमें यही जघन्य स्थिति और चार सागर पूर्ण तथा एक

निदाघेऽप्यवरैषैव स्थितिः समुपवर्णिता । परा तु नवभागाभ्यां सागराः पञ्च सञ्चिताः ॥२७४॥
अजघन्या निदाघे या सैव प्रज्वलितेऽन्यथा । षड्नवांशकसन्मिश्रा परा पञ्च पयोधयः ॥२७५॥
परा प्रज्वलिते येयं सैव चोज्ज्वलितेऽपरा । तथा सनवभागास्ते षट्समुद्राः परा स्थितिः ॥२७६॥
उत्कृष्टोज्ज्वलिते येयं सैव सञ्ज्वलितेऽवरा । सपञ्चनवभागास्ते परमा षट् पयोधयः ॥२७७॥
सा सम्प्रज्वलिते हीना परा सागरसप्तकम् । तृतीयनरके तेऽमी प्रसिद्धाः सप्त सागराः ॥२७८॥
या सम्प्रज्वलिते दीर्घा ह्स्वाऽऽरे सा प्रकीर्त्तिता । दीर्घा सप्त समुद्रास्ते सप्तभागास्तथा त्रयः ॥२७९॥
आरे या परमा प्रोक्ता तारे सैवापरा स्थितिः । परा सप्त समुद्रास्ते षड्भिः सप्तभागकैः ॥२८०॥
तारे या परमा प्रोक्ता सैव मारेऽवरा स्थितिः । सह सप्तमभागाभ्यां पराऽप्यष्टौ पयोधयः ॥२८१॥
मारे तु या परा सैव वर्चस्के वर्णिताऽवरा । पञ्चसप्तमभागैस्तु पराष्ट जलराशयः ॥२८२॥
वर्चस्के परमा याऽसौ तमकेऽप्यवरा स्थितिः । परा सप्तमभागेन संयुक्ता नव सागराः ॥२८३॥
परा तु तमके याऽसौ जघन्या सा षडे मता । चतुर्भिः सप्तमैर्भागैः पराऽपि नव सागराः ॥२८४॥
षडे तु परमा याऽसौ हीना षडषडेऽप्यसौ । चतुर्थ्यां सुप्रसिद्धास्ते परा तु दश सागराः ॥२८५॥

सागरके नौ भागोंमें सात भाग प्रमाण उत्कृष्ट स्थिति बतलाई गई है ॥२७३॥ निदाघ नामक पाँचवें इन्द्रकमें यही जघन्य और पाँच सागर पूर्ण तथा एक सागरके नौ भागोंमें दो भाग प्रमाण उत्कृष्ट स्थिति वर्णन की गई है ॥२७४॥ प्रज्वलित नामक छठवें इन्द्रकमें यही जघन्य स्थिति तथा पाँच सागर पूर्ण और एक सागरके नौ भागोंमें छह भाग प्रमाण उत्कृष्ट स्थिति है ॥२७५॥ प्रज्वलित इन्द्रककी जो उत्कृष्ट स्थिति है वही उज्ज्वलित नामक सातवें इन्द्रककी जघन्य स्थिति है तथा छह सागर पूर्ण और एक सागरके नौ भागोंमें एक भाग प्रमाण उत्कृष्ट स्थिति है ॥२७६॥ उज्ज्वलित इन्द्रकमें जो उत्कृष्ट स्थिति है वही संज्वलित नामक आठवें इन्द्रककी जघन्य स्थिति है तथा छह सागर पूर्ण और एक सागरके नौ भागोंमें पाँच भाग प्रमाण उत्कृष्ट स्थिति है ॥२७७॥ संप्रज्वलित नामक नौवें इन्द्रकमें यही जघन्य स्थिति और सात सागर प्रमाण उत्कृष्ट स्थिति है । इस तरह तीसरे नरकमें सामान्य रूपसे सात सागरकी स्थिति प्रसिद्ध है ॥२७८॥

ऊपर संप्रज्वलित नामक इन्द्रकमें जो सात सागरकी उत्कृष्ट स्थिति बतलाई है वह चौथी पृथिवीके आर नामक प्रथम इन्द्रकमें जघन्य स्थिति कही गई है तथा सात सागर पूर्ण और एक सागरके सात भागोंमेंसे तीन भाग प्रमाण उत्कृष्ट स्थिति बतलाई गई है ॥२७९॥ आर इन्द्रकमें जो उत्कृष्ट स्थिति कही गई है वही तार नामक दूसरे इन्द्रकमें जघन्य स्थिति बतलाई गई है, तथा सात सागर पूर्ण और एक सागरके सात भागोंमेंसे छः भाग प्रमाण उत्कृष्ट स्थिति कही गई है ॥२८०॥ तार इन्द्रकमें जो उत्कृष्ट स्थिति कही गई है वही मार नामक तीसरे इन्द्रकमें जघन्य स्थिति बतलाई गई है और आठ सागर पूर्ण तथा एक सागरके सात भागोंमें दो भाग प्रमाण उत्कृष्ट स्थिति कही गई है ॥२८१॥ मार इन्द्रकमें जो उत्कृष्ट स्थिति कही गई है वही वर्चस्क नामक चौथे इन्द्रकमें जघन्य स्थिति बतलाई गई है और आठ सागर पूर्ण तथा एक सागरके सात भागोंमें पाँच भाग प्रमाण उत्कृष्ट स्थिति कही गई है ॥२८२॥ वर्चस्क इन्द्रकमें जो उत्कृष्ट स्थिति कही गई है वही तमक नामक पाँचवें इन्द्रकमें जघन्य स्थिति बतलाई गई है और नौ सागर पूर्ण तथा एक सागरके सात भागोंमें एक सागर प्रमाण उत्कृष्ट स्थिति कही गई है ॥२८३॥ तमक इन्द्रकमें जो उत्कृष्ट स्थिति कही गई है वही षड नामक छठवें इन्द्रकमें जघन्य स्थिति बतलाई गई है और नौ सागर पूर्ण तथा एक सागरके सात भागोंमें चार भाग प्रमाण उत्कृष्ट स्थिति प्रदर्शित की गई है ॥२८४॥ षड इन्द्रकमें जो उत्कृष्ट स्थिति कही गई है वही षडषड नामक सातवें इन्द्रकमें जघन्य स्थिति बतलाई गई है

दशार्णवास्तमोनाम्नि जघन्या सा षडे मता । सह पञ्चमभागाभ्यामुत्कृष्टैकादशार्णवाः ॥२८६॥
इयमेव भ्रमे ह्रस्वा स्थितिः सम्प्रतिपादिता । चतुर्भिः पञ्चमैर्भागैः परा द्वादशसागराः ॥२८७॥
एषैव हि झषे हीना स्थितिरुत्कर्षिणी पुनः । साकं पञ्चमभागेन चतुर्दशपयोधयः ॥२८८॥
इयमेवावराऽन्ध्रे सा सत्यसन्धैरुदीरिता । सत्रिपञ्चमभागास्तु परा पञ्चदशाब्धयः ॥२८९॥
एषैव च तमिस्रेऽपि जघन्या स्थितिरिष्यते । पञ्चम्यां सुप्रतीतास्ते परा सप्तदशार्णवाः ॥२९०॥
अवरा तु स्थितिः प्रोक्ता हिमे सप्तदशार्णवाः । पराऽपि द्वित्रिभागाभ्यामष्टादश पयोधयः ॥२९१॥
वर्दले स्थितिरेषैव जघन्या समुदीरिता । परा त्रिभागसंमिश्राः विंशतिस्तु पयोधयः ॥२९२॥
लल्लके तु जघन्येयमजघन्या स्थितिः पुनः । षष्ठ्यां प्रोक्ता मुनिश्रेष्ठैर्द्वाविंशतिपयोधयः ॥२९३॥
इयमेवाप्रतिष्ठाने जघन्या स्थितिरुच्यते । योत्कृष्टा सा हि सप्तम्यां त्रयस्त्रिंशत्पयोधयः ॥२९४॥
नारकाणां तनूत्सेधो हस्ताः सीमन्तके त्रयः । तरके तु धनुर्हस्तः सार्धान्यष्टांगुलान्यसौ ॥२९५॥
रौरुके धनुरुत्सेधस्त्रयो हस्ताः शरीरिणाम् । अङ्गुलान्यपि तत्रैव भवेत् सप्तदशैव सः ॥२९६॥

और दश सागर प्रमाण उत्कृष्ट स्थिति कही गई है । इस प्रकार चौथी पृथिवीमें सामान्य रूपसे दश सागर स्थिति प्रसिद्ध है ॥२८५॥

ऊपर जो स्थिति कही गई है वही पाँचवीं पृथिवीके तम नामक प्रथम इन्द्रकमें जघन्य स्थिति बतलाई गई है । और ग्यारह सागर पूर्ण एक सागरके पाँच भागोंमें दो भाग प्रमाण उत्कृष्ट स्थिति कही गई है ॥२८६॥ भ्रम नामक दूसरे इन्द्रकमें यही जघन्य स्थिति कही गई है और बारह सागर पूर्ण तथा एक सागरके पाँच भागोंमें चार भाग प्रमाण उत्कृष्ट स्थिति बतलाई गई है ॥२८७॥

झष नामक तीसरे इन्द्रकमें यही जघन्य स्थिति कही गई है और चौदह सागर पूर्ण तथा एक सागरके पाँच भागोंमें एक भाग प्रमाण उत्कृष्ट स्थिति बतलाई गई है ॥२८८॥ अन्ध्र नामक चौथे इन्द्रकमें सत्यवादी जिनेन्द्र भगवान्ने यही जघन्य स्थिति कही है और पन्द्रह सागर पूर्ण तथा एक सागरके पाँच भागोंमें तीन भाग प्रमाण उत्कृष्ट स्थिति बतलाई है ॥२८९॥ तमिस्र नामक पाँचवें इन्द्रकमें यही जघन्य स्थिति मानी जाती है और सत्रह सागर प्रमाण उत्कृष्ट स्थिति बतलाई जाती है । इस प्रकार पाँचवीं पृथिवीमें सामान्य रूपसे सत्रह सागरकी आयु प्रसिद्ध है ॥२९०॥

छठवीं पृथिवीके हिम नामक प्रथम इन्द्रकमें सत्रह सागर प्रमाण जघन्य स्थिति कही गई है और अठारह सागर पूर्ण तथा एक सागरके तीन भागोंमें दो भाग प्रमाण उत्कृष्ट स्थिति बतलाई गई है ॥२९१॥ वर्दल नामक दूसरे इन्द्रक बिलमें यही जघन्य स्थिति कही गई है और बीस सागर पूर्ण तथा एक सागरके तीन भागोंमें एक भाग प्रमाण उत्कृष्ट स्थिति बतलाई गई है ॥२९२॥ मुनियोंमें श्रेष्ठ गणधरादि देवोंने लल्लक नामक तीसरे इन्द्रकमें यही जघन्य स्थिति कही है तथा बाईस सागर प्रमाण उत्कृष्ट स्थिति बतलाई है । इस प्रकार छठवीं पृथिवीमें सामान्य रूपसे बाईस सागर प्रमाण आयु कही गई है ॥२९३॥

सातवीं पृथिवीमें केवल एक अप्रतिष्ठान नामका इन्द्रक है सो उसमें यही जघन्य स्थिति बतलाई गई है और जो उत्कृष्ट स्थिति है वह तैंतीस सागर प्रमाण है । इस प्रकार सातवीं पृथिवीमें सामान्य रूपसे तैंतीस सागर प्रमाण आयु प्रसिद्ध है ॥२९४॥ अब नारकियोंके शरीरकी ऊँचाईका वर्णन किया जाता है—

पहली पृथिवीके सीमन्तक नामक प्रथम प्रस्तारमें नारकियोंके शरीरकी ऊँचाई तीन हाथ है । तरक नामक दूसरे प्रस्तारमें एक धनुष एक हाथ तथा साढ़े आठ अङ्गुल है ॥२९५॥ रौरुक नामक तीसरे प्रस्तारमें एक धनुष तीन हाथ तथा सत्रह अङ्गुल है ॥२९६॥

भ्रान्ते द्वे धनुषी हस्तावङ्गुलं सार्द्धमप्यसौ । उद्भ्रान्ते तु त्रयो दण्डाः सोऽङ्गुलानि दशोदितः ॥२९७॥
धनूंषि त्रीणि सम्भ्रान्ते द्वौ हस्तावङ्गुलान्यपि । अष्टादशैव सार्द्धानि नारकोत्सेध ईरितः ॥२९८॥
कार्मुकाणि तु चत्वारि हस्तस्त्रीण्यङ्गुलानि च । असम्भ्रान्तेऽप्यसम्भ्रान्तैरुत्सेधः साधु वर्णितः ॥२९९॥
चत्वारः खलु कोदण्डास्त्रयो हस्तास्तथोदिताः । विभ्रान्तेऽपि ह्यविभ्रान्तैः सार्द्धैरेकादशाङ्गुलैः ॥३००॥
चापपञ्चकमुत्सेधः तथा हस्तश्च विंशतिः । अङ्गुलानि समुद्दिष्टस्त्रस्तनामनि चेन्द्रके ॥३०१॥
धनूंषि च षडुत्सेधस्त्रसिते त्रासिताङ्गिनि । सार्द्धाङ्गुलचतुष्कं च चतुरैः प्रतिपादितः ॥३०२॥
वक्रान्ते धनुषां षट्कं सहस्तद्वितयं तथा । कथितं कथकैरुद्धैरङ्गुलानि त्रयोदश ॥३०३॥
धनुःसप्तकमुत्सेधः[1] सार्थमर्धाङ्गुलेन च । अवक्रान्ते बुधैरुक्तः सोऽङ्गुलान्येकविंशतिः ॥३०४॥
विक्रान्ते सप्त चापानि त्रयो हस्ताः षडङ्गुली । स एष विहितः प्राज्ञैरुत्सेधः प्रथमावनौ ॥३०५॥
स्तरकेऽष्टौ धनूंषि द्वौ हस्तावङ्गुलयोर्द्वयोः । द्वावेकादशभागौ च नारकोत्सेध इष्यते ॥३०६॥
स्तनके नवदण्डास्तु द्वाविंशत्यङ्गुलानि च । उत्सेधो वर्णितो युक्तश्चतुरेकादशांशकैः ॥३०७॥
मनके नवदण्डाश्च त्रयो हस्ताः सहाङ्गुलैः । अष्टादशभिरुत्सेधः षड्भिरेकादशांशकैः ॥३०८॥
वनके दश दण्डा द्वौ हस्तावुत्सेध इष्यते । साष्टैकादशभागानि सोऽङ्गुलानि चतुर्दश ॥३०९॥
घाटे त्वेकादशप्राज्ञैर्दण्डा हस्तो दशाङ्गुलैः । दशैकादशभागाश्च देहोत्सेधः प्रकीर्तितः ॥३१०॥
संघाटे द्वादशोत्सेधो दण्डाः सप्ताङ्गुलान्यपि । तथैकादशभागाश्च नारकाणामुदाहृतः ॥३११॥

भ्रान्त नामक चौथे प्रस्तारमें दो धनुष दो हाथ और डेढ़ अङ्गुल है। उद्भ्रान्त नामक पाँचवें प्रस्तारमें तीन धनुष और दश अङ्गुल है ॥२९७॥ संभ्रान्त नामक छठवें प्रस्तारमें तीन धनुष दो हाथ और साढ़े अठारह अंगुल है ॥२९८॥ असंभ्रान्त नामक सातवें प्रस्तारमें विशद ज्ञानके धारी आचार्योंने नारकियोंके शरीरकी ऊँचाई चार धनुष, एक हाथ और तीन अङ्गुल बतलाई है ॥२९९॥ भ्रान्ति रहित आचार्योंने विभ्रान्त नामक आठवें प्रस्तारमें नारकियोंके शरीरका उत्सेध चार धनुष तीन हाथ और साढ़े ग्यारह अङ्गुल प्रमाण कहा है ॥३००॥ त्रस्त नामक नौवें प्रस्तारमें पाँच धनुष एक हाथ और बीस अङ्गुल ऊँचाई कही गई है ॥३०१॥ जहाँ प्राणी भयभीत हो रहे हैं ऐसे त्रसित नामक दसवें प्रस्तारमें नारकियोंके शरीरकी ऊँचाई चतुर आचार्योंने छह धनुष और साढ़े चार अङ्गुल प्रमाण बतलाई है ॥३०२॥ वक्रान्त नामक ग्यारहवें प्रस्तारमें श्रेष्ठ वक्ताओंने नारकियोंका शरीर छः धनुष दो हाथ और तेरह अङ्गुल प्रमाण कहा है ॥३०३॥ अवक्रान्त नामक बारहवें प्रस्तारमें विद्वान् आचार्योंने नारकियोंकी ऊँचाई सात धनुष और साढ़े इकीस अङ्गुल कही है ॥३०४॥ और विक्रान्त नामक तेरहवें प्रस्तारमें सात धनुष तीन हाथ तथा छः अङ्गुल प्रमाण ऊँचाई है। इस प्रकार बुद्धिमान् आचार्योंने प्रथम पृथिवीमें ऊँचाईका वर्णन किया है ॥३०५॥

दूसरी पृथिवीके स्तरक नामक पहले प्रस्तारमें नारकियोंकी ऊँचाई आठ धनुष, दो हाथ, दो अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें दो भाग प्रमाण मानी जाती है ॥३०६॥ स्तनक नामक दूसरे प्रस्तारमें नारकियोंका उत्सेध नौ धनुष बाईस अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें चार भाग प्रमाण कहा गया है ॥३०७॥ मनक नामक तीसरे प्रस्तारमें नौ धनुष तीन हाथ अठारह अङ्गुल तथा एक अङ्गुलके ग्यारह भागोंमें छह भाग प्रमाण ऊँचाई बतलाई है ॥३०८॥ वनक नामक चौथे प्रस्तारमें नारकियोंके शरीरकी ऊँचाई दश धनुष दो हाथ चौदह अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें आठ भाग प्रमाण मानी जाती है ॥३०९॥ घाट नामक पाँचवें प्रस्तारमें ग्यारह धनुष, एक हाथ, दश अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें दश भाग शरीरकी ऊँचाई कही गई है ॥३१०॥ संघाट नामक छठवें प्रस्तारमें नार-

१. सुद्देशः म० ।

जिह्वाख्ये द्वादशैवोक्ता दण्डा हस्तास्त्रयस्तथा । अङ्गुलानि च सर्वाणि त्रयश्चैकादशांशकाः ॥३१२॥
दण्डा हस्तोऽङ्गुलान्येषु जिह्विकाख्ये त्रयोदश । एक पञ्चोक्तभागैश्च त्रयोविंशतिरिष्यते ॥३१३॥
लोले चतुर्दशैवासौ दण्डास्त्वेकोनविंशतिः । अङ्गुलानि विनिर्दिष्टा सप्तैकादशभागकैः ॥३१४॥
त्रयो हस्ता धनूंष्येष लोलुपे च चतुर्दश । नवैकादशभागश्च तथा पञ्चदशाङ्गुली ॥३१५॥
दण्डाः पञ्चदशैवासौ हस्तौ च स्तनलोलुपे । द्वादशाङ्गुलमानं च द्वितीयायां च इष्यते ॥३१६॥
तप्ते सप्तदशोत्सेधो दण्डा हस्तो दशाङ्गुली । द्वित्रिभागसमेतोऽसौ नारकाणां समीरितः ॥३१७॥
एकोनविंशतिर्दण्डास्तपितेऽसौ नवाङ्गुली । त्रिभागश्च समादिष्टः स्पष्टज्ञानेष्टदृष्टिभिः ॥३१८॥
तपने विंशतिर्दण्डास्त्रयो हस्तास्तथैव सः । अङ्गुलानि समुद्दिष्टः शिष्टैरष्टौ प्रकृष्टतः ॥३१९॥
द्वाविंशतिधनूंषि द्वौ हस्तावुक्तः षडङ्गुलैः । उत्सेधस्तापने द्व्यंशौ नारकाङ्गसमुद्भवः ॥३२०॥
चतुर्विंशतिचापानि हस्तः पञ्चाङ्गुलानि च । त्रिभागश्च निदाघेऽसावुत्सेधो बोधितो बुधैः ॥३२१॥
षड्विंशतिधनूंष्येष प्रोक्तः प्रोज्ज्वलितेन्द्रके । अङ्गुलानि च चत्वारि ज्ञानप्रज्वलितात्मभिः ॥३२२॥
सप्तविंशतिचापानि त्रयो हस्ता स वर्णितः । आगमोज्ज्वलितप्राज्ञैर्द्व्यंशावुज्ज्वलितेऽङ्गुली ॥३२३॥
एकान्नत्रिंशदुत्सेधः कोदण्डा हस्तयोर्द्वयम् । अगुलं च त्रिभागश्च बोध्यः सञ्ज्वलिते बुधैः ॥३२४॥
एकत्रिंशत्तु कोदण्डा हस्तश्चोत्सेध इष्यते । सम्प्रज्वलितसंज्ञे च तृतीये यः स भाष्यते ॥३२५॥

कियोंकी ऊँचाई बारह धनुष सात अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें एक भाग प्रमाण कही गई है ॥३११॥

जिह्व नामक सातवें प्रस्तारमें बारह धनुष, तीन हाथ, तीन अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें तीन भाग प्रमाण ऊँचाई है ॥३१२॥ जिह्वक नामक आठवें प्रस्तारमें तेरह धनुष, एक हाथ, तेईस अङ्गुल और एक अङ्गुलके पाँच भागोंमें एक भाग प्रमाण ऊँचाई इष्ट है ॥३१३॥ लोल नामक नौवें प्रस्तारमें चौदह धनुष, उन्नीस अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें सात भाग प्रमाण ऊँचाई है ॥३१४॥ लोलुप नामक दसवें प्रस्तारमें चौदह धनुष तीन हाथ पन्द्रह अङ्गुल और एक अङ्गुलके ग्यारह भागोंमें नौ भाग प्रमाण ऊँचाई है ॥३१५॥ और स्तनलोलुप नामक ग्यारहवें प्रस्तारमें पन्द्रह धनुष, दो हाथ और बारह अङ्गुल ऊँचाई इष्ट है। इस प्रकार दूसरी पृथिवीमें नारकियोंके शरीरकी ऊँचाईका वर्णन किया ॥३१६॥

तीसरी पृथिवीके तप्त नामक प्रथम प्रस्तारमें नारकियोंके शरीरकी ऊँचाई सत्रह धनुष, एक हाथ, दश अङ्गुल और एक अङ्गुलके तीन भागोंमें दो भाग प्रमाण कही गई है ॥३१७॥ स्पष्ट ज्ञान रूपी इष्ट दृष्टिको धारण करनेवाले तपित नामक दूसरे प्रस्तारमें नारकियोंकी ऊँचाई उन्नीस धनुष नौ अङ्गुल और एक अङ्गुलके तीन भागोंमें एक भाग प्रमाण बतलाई है ॥३१८॥ शिष्टजनोंने तपन नामक तीसरे प्रस्तारमें नारकियोंके शरीरका उत्सेध बीस धनुष तीन हाथ और आठ अङ्गुल प्रमाण बतलाया है ॥३१९॥ तापन नामक चौथे प्रस्तारमें नारकियोंके शरीरकी ऊँचाई बाईस धनुष दो हाथ छः अङ्गुल और एक अङ्गुलके तीन भागोंमें दो भाग प्रमाण कही गयी है ॥३२०॥ निदाघ नामक पाँचवें प्रस्तारमें चौबीस धनुष, एक हाथ, पाँच अंगुल और एक अंगुलके तीन भागोंमें एक भाग प्रमाण ऊँचाई विद्वानोंने बतलाई है ॥३२१॥ जिनकी आत्मा ज्ञानके द्वारा देदीप्यमान है ऐसे आचार्योंने प्रोज्ज्वलित नामक छठवें प्रस्तारमें नारकियोंकी ऊँचाई छब्बीस धनुष और चार अंगुल प्रमाण बतलाई है ॥३२२॥ आगमज्ञानसे सुशोभित विद्वज्जनोंने उज्ज्वलित नामक सातवें प्रस्तारमें नारकियोंका शरीर सत्ताईस धनुष, तीन हाथ, दो अंगुल और एक अंगुलके तीन भागोंमें दो भाग प्रमाण ऊँचा कहा है ॥३२३॥ विद्वानोंको संज्वलित नामक आठवें प्रस्तारमें नारकियोंकी ऊँचाई उन्तीस धनुष, दो हाथ एक अंगुलके तीन भागोंमें एक भाग प्रमाण जानना चाहिए ॥३२४॥ और संप्रज्वलित

पञ्चत्रिंशद्धनूंष्यारे द्वौ हस्तावङ्गुलान्यपि । विंशतिः सप्तभागाश्च चत्वारः सम्प्रकीर्तिताः ॥३२६॥
चत्वारिंशत्तथा तारे दण्डा सप्तदशाङ्गुली । एकः सप्तमभागः स्यादुत्सेधो नारकाश्रयः ॥३२७॥
चत्वारिंशच्चतुर्भिश्च दण्डा हस्तौ त्रयोदश । अङ्गुलानि मतो मारे सप्तभागैः स पञ्चभिः ॥३२८॥
धनूंष्येकोनपञ्चाशदुत्सेधः स दशाङ्गुली । द्वौ च सप्तमभागौ तौ वर्चस्के वर्णितो बुधैः ॥३२९॥
धनूंषि सत्रिपञ्चाशद्धस्तौ चापि षडङ्गुली । षट् च सप्तमभागास्ते तमके परिकीर्तितः ॥३३०॥
अष्टापञ्चाशदुत्सेधो धनूंषि त्र्यङ्गुलानि च । त्रयः सप्तमभागाश्च षडेऽपि प्रकटस्थितः ॥३३१॥
द्विषष्टिस्तु धनूंषि द्वौ हस्तौ षडषडे मतः । उत्सेधः सुप्रसिद्धो यश्चतुर्थे नरके सताम्[1] ॥३३२॥
तमोनामनि चोत्सेधः कोदण्डाः पञ्चसप्ततिः । सप्ताशीतिरसौ दण्डा द्वौ हस्तौ भवति भ्रमे ॥३३३॥
वपुषो नारकीयस्य ऋषे शतधनूंषि सः । अन्धे द्वादशमिश्राणि तानि हस्तद्वयं मतम् ॥३३४॥
तमिस्रेऽपि च तान्येव पञ्चविंशतिदण्डकैः । उत्सेधो वर्णितो योऽसौ पञ्चमे नरके बुधैः ॥३३५॥
षट्षष्ट्या शतकोदण्डा द्वौ हस्तौ षोडशाङ्गुली । उत्सेधो वर्णितः पूर्णो हिमनामनि चेन्द्रके ॥३३६॥
द्विशत्यष्टौ च कोदण्डा हस्तोऽष्टावङ्गुलान्यपि । उत्सेधः शास्त्रनेत्राढ्यैर्वर्दलेऽपि विलोकितः ॥३३७॥
शतद्वयं च पञ्चाशद्धनूंष्येव स भाषितः । लल्लके नरके षष्ठे निष्ठितार्थैर्य इष्यते ॥३३८॥

नामक नौवें प्रस्तारमें ऊँचाईका प्रमाण इकतीस धनुष तथा एक हाथ प्रमाण कहा जाता है। इस प्रकार तीसरी पृथिवीमें नारकियोंकी ऊँचाईका वर्णन किया ॥३२५॥

चौथी पृथिवीके आर नामक प्रथम प्रस्तारमें पैंतीस धनुष, दो हाथ, बीस अंगुल और एक अंगुलके सात भागोंमें चार भाग प्रमाण ऊँचाई कही गई है ॥३२६॥ तार नामक दूसरे प्रस्तारमें चालीस धनुष, सत्रह अंगुल और एक अंगुलके सात भागोंमें एक भाग प्रमाण नारकियों-की ऊँचाई है ॥३२७॥ मार नामक तीसरे प्रस्तारमें चवालीस धनुष, दो हाथ, तेरह अंगुल और एक अंगुलके सात भागोंमें पाँच भाग प्रमाण ऊँचाई मानी गई है ॥३२८॥ वर्चस्क नामक चौथे प्रस्तारमें विद्वानोंने शरीरकी ऊँचाई उनचास धनुष, दश अंगुल और एक अंगुलके सात भागोंमें दो भाग प्रमाण बतलाई है ॥३२९॥ तमक नामक पाँचवें प्रस्तारमें त्रेपन धनुष, दो हाथ, छः अंगुल और एक अंगुलके सात भागोंमें छः भाग प्रमाण ऊँचाई कही गई है ॥३३०॥ षड नामक छठवें प्रस्तारमें अठावन धनुष, तीन अंगुल और एक अंगुलके सात भागोंमें तीन प्रमाण ऊँचाई प्रकट की गई है ॥३३१॥ और षडषड नामक सातवें प्रस्तारमें बासठ धनुष, दो हाथ ऊँचाई प्रसिद्ध है। इस प्रकार चौथी पृथिवीमें विद्यमान नारकियोंकी ऊँचाईका वर्णन किया है ॥३३२॥

पाँचवीं पृथिवीके तम नामक प्रथम प्रस्तारमें नारकियोंके शरीरकी ऊँचाई पचहत्तर धनुष बतलाई है। भ्रम नामक दूसरे प्रस्तारमें सत्तासी धनुष और दो हाथ है ॥३३३॥ ऋष नामक तीसरे प्रस्तारमें नारकियोंके शरीरकी ऊँचाई सौ धनुष कही गई है। अन्ध नामक चौथे प्रस्तारमें एक सौ बारह धनुष तथा दो हाथ है ॥३३४॥ और तमिस्र नामक पाँचवें प्रस्तारमें एक सौ पच्चीस धनुष है। इस प्रकार पाँचवीं पृथिवीमें विद्वानोंने ऊँचाईका वर्णन किया है ॥३३५॥

छठवीं पृथिवीके हिम नामक प्रथम प्रस्तारमें नारकियोंके शरीरकी ऊँचाई एक सौ छयासठ धनुष, दो हाथ तथा सोलह अंगुल बतलाई है ॥३३६॥ वर्दल नामक दूसरे प्रस्तारमें शास्त्ररूपी नेत्रोंके धारक विद्वानोंने नारकियोंकी ऊँचाई दो सौ आठ धनुष, एक हाथ और छः अंगुल प्रमाण देखी है ॥३३७॥ और लल्लक नामक तीसरे प्रस्तारमें नारकियोंकी ऊँचाई दो सौ पचास धनुष बतलाई है। इस प्रकार कृतकृत्य सर्वज्ञ देवने छठवीं पृथिवीमें ऊँचाईका वर्णन किया ॥३३८॥

---

१. शती म० ।

उत्सेधश्चाप्रतिष्ठाने पञ्चचापशतानि सः । निश्चितो निश्चितज्ञानैः सप्तमे नरके च यः ॥३३९॥
सप्तसु प्रतिबोद्धव्यः प्रथितः प्रथमादिषु । अवधेर्विषयस्तासु पृथिवीषु यथाक्रमम् ॥३४०॥
योजनं तु त्रयः क्रोशाः सार्धा क्रोशत्रयं तथा । सार्धौ तौ तद्द्वयं सार्धः क्रोशः क्रोशश्च निश्चितः ॥३४१॥
क्रोशार्द्धं मृत्तिकागन्धः प्रथमे पटले व्रजेत् । तदधोऽधः क्रोशस्यार्द्धं वर्द्धते पटलं प्रति ॥३४२॥
पृथिव्योराद्ययोर्युक्ता जीवाः कापोतलेश्यया । तृतीयायां तयैवोर्ध्वमधस्तान्नीललेश्यया ॥३४३॥
अधश्चोर्ध्वं च सम्बद्धाश्चतुर्थ्यां नीललेश्यया । तयैवोपरि पञ्चम्यामधस्ते कृष्णलेश्यया ॥३४४॥
षष्ठ्यां च कृष्णयैवोर्ध्वमधः परमकृष्णया । सप्तम्यामुभयत्रामी क्लिष्टाः परमकृष्णया ॥३४५॥
स्पर्शेनोष्णेन बाध्यन्ते नारका भूचतुष्टये । पञ्चम्यामुष्णशीताभ्यां शीतेनैवान्त्ययोर्भुवोः ॥३४६॥
आकारेणोष्ट्रिकाकुम्भीकुस्थलीमुद्गरोपमाः । मृदङ्गनाडिकाकारा निगोदा[1] पृथिवीत्रये ॥३४७॥
गोगजाश्वादिभस्त्राभाद्रोण्यब्जपुटसन्निभाः । ते चतुर्थ्यां च पञ्चम्यां नारकोत्पत्तिभूमयः ॥३४८॥
केदाराकृतयः केचित्झल्लरीमल्लकोपमाः । केचिन्मयूरकाकारा निगोदास्तेऽन्त्ययोर्भुवोः ॥३४९॥
एकद्वित्रिकगव्यूतियोजनव्याससङ्गताः । शतयोजनविस्तीर्णास्तेषूत्कृष्टास्तु वर्णिताः ॥३५०॥
उच्छ्रायो वस्तुतस्तेषां विस्तारः पञ्चताडितः । निगोदानां समस्तानामिति वस्तुविदो विदुः ॥३५१॥

सातवीं पृथिवीमें एक ही अप्रतिष्ठान नामका प्रस्तार है सो उसमें सन्देहरहित ज्ञानके धारक आचार्योंने नारकियोंकी ऊँचाई पाँच सौ धनुष प्रमाण निश्चित की है ॥३३९॥

प्रथम पृथिवीको आदि लेकर उन सातों पृथिवियोंमें यथाक्रमसे अवधिज्ञानका विषय इस प्रकार जानना चाहिए ॥३४०॥ पहली पृथिवीमें अवधिज्ञानका विषय एक योजन अर्थात् चार कोश, दूसरीमें साढ़े तीन कोश, तीसरीमें तीन कोश, चौथीमें अढ़ाई कोश, पाँचवींमें दो कोश, छठवींमें डेढ़ कोश और सातवींमें एक कोश प्रमाण है ॥३४१॥ प्रथम पृथिवी सम्बन्धी पहले पटलकी मिट्टीकी दुर्गन्ध आध कोश तक जाती है और उसके नीचे प्रत्येक पटलके प्रति आधा-आधा कोश अधिक बढ़ती जाती है ॥३४२॥ पहली और दूसरी पृथिवीमें रहनेवाले नारकी कापोत लेश्यासे युक्त हैं। तीसरी पृथिवीके ऊर्ध्व भागमें रहनेवाले कापोत लेश्यासे और अधोभागमें रहनेवाले नील लेश्यासे सहित हैं ॥३४३॥ चौथी पृथिवीके ऊपर-नीचे दोनों स्थानोंपर तथा पाँचवीं पृथिवीके ऊपरी भागमें नील लेश्यासे युक्त हैं और अधोभागमें कृष्ण लेश्यासे सहित हैं ॥३४४॥ छठवीं पृथिवीके ऊर्ध्वभागमें कृष्ण लेश्यासे, अधोभागमें परमकृष्ण लेश्यासे और सातवीं पृथिवीके ऊपर नीचे दोनों ही जगह रहनेवाले परमकृष्ण लेश्यासे संक्लिष्ट हैं अर्थात् संक्लेशको प्राप्त होते रहते हैं ॥३४५॥ प्रारम्भकी चार भूमियोंमें रहनेवाले नारकी उष्ण स्पर्शसे, पाँचवीं भूमिमें रहनेवाले उष्ण और शीत दोनों स्पर्शोंसे तथा अन्तकी दो भूमियोंमें रहनेवाले केवल शीत स्पर्शसे ही पीड़ित रहते हैं ॥३४६॥ प्रारम्भकी तीन पृथिवियोंमें नारकियोंके उत्पत्ति-स्थान कुछ तो ऊँटके आकार हैं कुछ कुम्भी (घड़िया), कुछ कुस्थली, मुद्गर, मृदङ्ग और नाड़ीके आकार हैं ॥३४७॥ चौथी और पाँचवीं पृथिवीमें नारकियोंके जन्मस्थान अनेक तो गौके आकार हैं, अनेक हाथी घोड़े आदि जन्तुओं तथा धौंकनी, नाव और कमलपुटके समान हैं ॥३४८॥ अन्तिम दो भूमियोंमें कितने ही खेतके समान, कितने ही झालर और कटोरोंके समान, और कितने ही मयूरोंके आकारवाले हैं ॥३४९॥ वे जन्मस्थान एक कोश, दो कोश, तीन कोश और एक योजन विस्तारसे सहित हैं। उनमें जो उत्कृष्ट स्थान हैं वे सौ योजन तक चौड़े कहे गये हैं ॥३५०॥ उन समस्त उत्पत्ति स्थानोंकी ऊँचाई अपने विस्तारसे पँचगुनी है ऐसा वस्तु स्वरूपको जाननेवाले आचार्य जानते हैं ॥३५१॥ समस्त इन्द्रक बिल तीन द्वारोंसे युक्त तथा तीन कोणों-वाले हैं। इनके सिवाय जो श्रेणीबद्ध और प्रकीर्णक निगोद हैं उनमें कितने ही दो द्वारवाले

---

१. नारकोत्पत्तिस्थानानि ।

सर्वेन्द्रकनिगोदास्ते त्रिद्वाराश्च त्रिकोणकाः । द्वित्र्येकपञ्चसप्तात्मद्वारकोणास्ततः परे ॥३५२॥
संख्येयव्यासयुक्तानां निगोदानां निजान्तरम् । गव्यूतयः षडल्पं स्यादनल्पं द्वादशैव ताः ॥३५३॥
असंख्येयप्रमाणानामसंख्यं महदन्तरम् । योजनानां सहस्राणि सप्तैवात्यल्पमन्तरम्[1] ॥३५४॥
[2]त्रिगव्यूतिश्चतुर्भागसप्तयोजनमात्रकम् । घर्मानिगोदजा जीवा खमुत्पत्य पतन्त्यधः ॥३५५॥
[3]गव्यूतिद्वितयं सार्धं सपञ्चदशयोजनम् । वंशानिगोदजन्मानः खमुत्पत्य पतन्त्यधः ॥३५६॥
एकत्रिंशत्तु गव्यूत्या योजनानि नभस्तले । मेघानिगोदजा जीवाः खमुल्लंघ्य पतन्त्यधः ॥३५७॥
द्विषष्टियोजनान्यूर्ध्वं गव्यूतिद्वयमुद्गताः । निपतन्त्युग्रदुःखार्त्तास्तेऽञ्जनाजनिगोदजाः ॥३५८॥
पञ्चविंशतिसन्मिश्रशतयोजनमातुराः । खमुत्पत्य पतन्त्येव पञ्चमीस्था निगोदजाः ॥३५९॥
पञ्चाशता विमिश्रं तु योजनानां शतद्वयम् । वियदुत्पत्य षष्ठीस्थनिगोदोत्थाः पतन्त्यधः ॥३६०॥
सप्तमीस्थनिगोदोत्थाः सपञ्चशतयोजनम् । अध्वानमूर्ध्वमुत्पत्य पतन्ति वसुधातले ॥३६१॥
असुरा आतृतीयान्तं योधयन्ति परस्परम् । प्रयुध्यते स्वयं तेऽपि ज्ञात्वा वैरं पुरातनम् ॥३६२॥
कुन्तक्रकचशूलाद्यैर्नानाशस्त्रैस्तनूद्भवैः । खण्डं खण्डं विधीयन्ते पीडयन्ति परस्परम् ॥३६३॥
[4]सूतकस्येव सङ्घातः शरीरस्य प्रजायते । यावदायुःस्थितिस्तेषां न तावन्मरणं भवेत् ॥३६४॥
शारीरं मानसं दुःखमन्योऽन्योर्दीरितं खलु । सहन्ते नारका नित्यं पूर्वपापविपाकतः ॥३६५॥

दुकोने, कितने ही तीन द्वारवाले तिकोने, कितने ही पाँच द्वारवाले पँचकोने और कितने ही सात द्वारवाले सतकोने हैं ॥३५२॥ इनमें संख्यात योजन विस्तारवाले बिलोंका अपना जघन्य अन्तर छः कोश और उत्कृष्ट अन्तर बारह कोश है ॥३५३॥ एवं असंख्यात योजन विस्तारवाले बिलोंका उत्कृष्ट अन्तर असंख्यात योजन तथा जघन्य अन्तर सात हजार योजन है ॥३५४॥

घर्मा नामक पहली पृथिवीके उत्पत्ति-स्थानोंमें उत्पन्न होनेवाले नारकी जीव जन्मकालमें जब नीचे गिरते हैं तब सात योजन सवा तीन कोश ऊपर आकाशमें उछलकर पुनः नीचे गिरते हैं ॥३५५॥ दूसरी वंशा पृथिवीके निगोदोंमें जन्म लेनेवाले नारकी पन्द्रह योजन अढ़ाई कोश आकाशमें उछलकर नीचे गिरते हैं ॥३५६॥ तीसरी मेघा पृथिवीमें जन्म लेनेवाले जीव इकतीस योजन एक कोश आकाशमें उछलकर नीचे गिरते हैं ॥३५७॥ चौथी अञ्जना पृथिवीके निगोदोंमें जन्म लेनेवाले जीव बासठ योजन दो कोश उछलकर नीचे गिरते हैं और तीव्र दुःखसे दुःखी होते हैं ॥३५८॥ पाँचवीं पृथिवीके निगोदोंमें जन्म लेनेवाले नारकी अत्यन्त दुःखी हो एकसौ पच्चीस योजन आकाशमें उछलकर नीचे गिरते हैं ॥३५९॥ छठवीं पृथिवीमें स्थित निगोदोंमें जन्म लेनेवाले जीव दो सौ योजन आकाशमें उछलकर नीचे गिरते हैं ॥३६०॥ और सप्तमी पृथिवीमें स्थित निगोदोंमें उत्पन्न हुए जीव पाँच सौ धनुष ऊँचे उछलकर पृथिवी तलपर नीचे गिरते हैं ॥३६१॥ तीसरी पृथिवी तक असुरकुमार देव नारकियोंको परस्पर लड़ाते हैं। इसके सिवाय वे नारकी पुराने वैर भावको जानकर स्वयं भी लड़ते रहते हैं ॥३६२॥ विक्रिया शक्तिके द्वारा अपने शरीरसे ही उत्पन्न होनेवाले भाले, करोंत तथा शूल आदि नाना शस्त्रोंसे उन नारकियोंके खण्ड-खण्ड कर दिये जाते हैं और परस्पर एक दूसरेको पीड़ा पहुँचाते हैं ॥३६३॥ खण्ड-खण्ड होनेपर भी पारेके समान उनके शरीरके टुकड़ोंका पुनः समूह बन जाता है और जब तक उनकी आयुकी स्थिति रहती है तब तक उनका मरण नहीं होता ॥३६४॥ ये नारकी पूर्व कृत

---

१. अतः परं म० ख० पुस्तकयोः अयं श्लोकोऽधिकोऽस्ति—"क्रोशत्रयं सतुर्यांशं योजनानां च सप्तकम् । समुत्पतन्ति घर्मायां शेषास्तु द्विगुणोत्तरम् ।" २. एष श्लोकः ङ० पुस्तके नास्ति । ३. नपुस्तके एतस्य श्लोकस्य स्थाने निम्नाङ्कितः श्लोकोऽस्ति—'यजिनं पञ्चदशकं सार्धक्रोशद्वयं तथा । समुच्छलन्ति वंशायां पतन्ति च निगोदजाः । ४. पारदस्येव ।

क्षारोष्णतीव्रसद्भावनदीवैतरणीजलात् । [1]दुर्गन्धान्मृन्मयाहारा[2]द्दुःखं भुञ्जन्ति दुःसहम् ॥३६६॥
अक्ष्णोर्निमीलनं यावन्नास्ति सौख्यं च जातुचिद् । नरके पच्यमानानां नारकाणामहर्निशम् ॥३६७॥
स्युस्तेषामशुभतराः परिणामाः शरीरिणाम् । लिङ्गं नपुंसकाख्यं स्यात् संस्थानं हुण्डसंज्ञकम् ॥३६८॥
आगामितीर्थंकर्तॄणां तथैवोपशमैनसाम् । उपसर्गाहतिं भक्त्या कुर्वन्त्यत्यायने[3] सुराः ॥३६९॥
चत्वारिंशत्सहाष्टाभिर्घटिकाः प्रथमक्षितौ । अन्तरं नारकोत्पत्तेरन्तरज्ञैः स्फुटीकृतम् ॥३७०॥
सप्ताहश्चैव पक्षः स्यान्मासो मासौ यथाक्रमम् । चत्वारोऽपि च षण्मासा विरहः षट्सु भूमिषु ॥३७१॥
तीव्रमिथ्यात्वसम्बद्धा बह्वारम्भपरिग्रहाः । पृथिवीस्ताः प्रपद्यन्ते तिर्यञ्चो मानुषास्तथा ॥३७२॥
आद्यामसंज्ञिनो यान्ति द्वितीयां च प्रसर्पिणः । पक्षिणश्च तृतीयायां चतुर्थ्यां च भुजङ्गमाः ॥३७३॥
पञ्चमीमपि सिंहास्तु षष्ठीमपि च योषितः । प्रयान्ति प्राणिनः पापाः सप्तमीं मत्स्यमानुषाः ॥३७४॥
सप्तम्युद्वर्तितो यायात्तामेवानन्तरं सकृत् । षष्ठीतो निर्गतो द्विस्तां पञ्चमीं त्रिष्वथ व्रजेत् ॥३७५॥
चतुर्थीं च चतुर्वारान् प्रपद्येत ततश्च्युतः । तृतीयां पञ्चकृत्वोऽपि तस्या एव समागतः ॥३७६॥
द्वितीयायां च षट्कृत्वः सप्तकृत्वस्तथाऽसुमान् । प्रथमाया विनिर्यातः प्रथमायां प्रजायते ॥३७७॥
सप्तमीतो विनिर्यातः संज्ञितिर्यक्त्वभाक् पुनः । संख्येयायुर्वृतो याति नरकं तनुमद्गणः[4] ॥३७८॥
षष्ठीतस्तु विनिर्यातो लभते नैव संयमम् । तं लभेतापि पञ्चम्या निर्वाणं न तु तद्भवे ॥३७९॥
लभेतापि च निर्वाणं चतुर्थीनिःसृतः पुनः । निश्चयेनैव नैवाङ्गी तीर्थंकृत्त्वं प्रपद्यते ॥३८०॥

पाप कर्मके उदयसे निरन्तर एक दूसरेके द्वारा दिये हुए शारीरिक एवं मानसिक दुःखको सहते रहते हैं ॥३६५॥ वे खारा गरम तथा अत्यन्त तीक्ष्ण वैतरणी नदीका जल पीते हैं और दुर्गन्धि युक्त मिट्टीका आहार करते हैं इसलिए निरन्तर असह्य दुःख भोगते रहते हैं ॥३६६॥ रात-दिन नरकमें पचनेवाले नारकियोंको निमेष मात्र भी कभी सुख नहीं होता ॥३६७॥ उन नारकियोंके निरन्तर अत्यन्त अशुभ परिणाम रहते हैं । तथा नपुंसक लिङ्ग और हुण्डक संस्थान होता है ॥३६८॥ जो आगामी कालमें तीर्थङ्कर होनेवाले हैं तथा जिनके पापकर्मोंका उपशम हो चुका है । देव लोग भक्तिवश छः माह पहलेसे उनके उपसर्ग दूर कर देते हैं ॥३६९॥ अन्तरके जाननेवाले आचार्योंने प्रथम पृथिवीमें नारकियोंकी उत्पत्तिका अन्तर अड़तालीस घड़ी बतलाया है ॥३७०॥ और नीचेकी छह भूमियोंमें क्रमसे एक सप्ताह, एक पक्ष, एक मास, दो मास, चार मास और छह मासका विरह—अन्तरकाल कहा है ॥३७१॥ जो तीव्र मिथ्यात्वसे युक्त हैं तथा बहुत आरम्भ और बहुत परिग्रहके धारक हैं ऐसे तिर्यञ्च और मनुष्य उन पृथिवियोंको प्राप्त होते हैं अर्थात् उनमें उत्पन्न होते हैं ॥३७२॥ असंज्ञी पञ्चेन्द्रिय पहली पृथिवी तक जाते हैं, सरकनेवाले दूसरी पृथिवी तक, पक्षी तीसरी तक, सर्प चौथी तक, सिंह पाँचवीं तक, स्त्रियाँ छठवीं तक और तीव्र पाप करनेवाले मत्स्य तथा मनुष्य सातवीं पृथिवी तक जाते हैं ॥३७३-३७४॥ सातवीं पृथिवीसे निकला हुआ जीव यदि पुनः अव्यवहित रूपसे सातवींमें जावे तो एक बार, छठवींसे निकला हुआ छठवींमें दो बार, पाँचवींसे निकला हुआ पाँचवींमें तीन बार, चौथीसे निकला हुआ चौथीमें चार बार, तीसरीसे निकला हुआ तीसरीमें पाँच बार, दूसरीसे निकला हुआ दूसरीमें छः बार और पहलीसे निकला हुआ पहलीमें सात बार तक उत्पन्न हो सकता है ॥३७५-३७७॥ सातवीं पृथिवीसे निकला हुआ प्राणी नियमसे संज्ञी तिर्यञ्च होता है तथा संख्यात वर्षकी आयुका धारक हो फिरसे नरक जाता है ॥३७८॥ छठवीं पृथिवीसे निकला हुआ जीव संयमको प्राप्त तो हो सकता है पर मोक्ष प्राप्त नहीं कर सकता ॥३७९॥ चौथी पृथिवीसे निकला हुआ मोक्ष प्राप्त कर सकता है परन्तु निश्चयसे तीर्थङ्कर नहीं हो सकता ॥३८०॥

---

१. दुर्गन्धा म०, २. मृन्मयाहाराः म० । ३. अन्तिमषण्मासेषु । ४. प्राणिसमूह ।

तृतीयायाः द्वितीयाया प्रथमायाश्च निःसृतः । तीर्थकृत्त्वं लभेतापि देही दर्शनशुद्धितः ॥३८१॥
बलकेशवचक्रित्वं परिहृत्यैव जन्तवः । नरत्वं प्रतिपद्येरन् नरकेभ्यो विनिर्गताः ॥३८२॥
अधोलोकविभागस्ते संक्षेपेण मयोदितः । तिर्यग्लोकविभागस्य शृणु श्रेणिक ! संग्रहम् ॥३८३॥

शार्दूलविक्रीडितम्

मेरुकी पूर्व-पश्चिम दिशामें लम्बा तथा नाना प्रकारके वृक्षों और लताओंसे व्याप्त एक सुन्दर भद्रशाल वन है। यहाँ क्रमसे उसका वर्णन किया जाता है ॥२३६॥ उसकी पूर्व-पश्चिम भागकी लम्बाई बाईस हजार योजन और दक्षिण-उत्तर चौड़ाई ढाई सौ योजन है ॥२३७॥

१. सुवत्सान्या म० । २. बलाचिता म० । ३. व्यन्तराः क्रीडनालयाः म०, क० ।

वनात् पूर्वापरान्तस्था वेदिका योजनोच्छ्रितिः । क्रोशावगाहिनी ज्ञेया विस्तृता क्रोशयोर्द्वयम् ॥२३८॥
नीलात् ग्राहवती सीतां वाहिनी ह्रदवत्यपि । पङ्कवत्यपि यान्तीमा वक्षाराभ्यन्तरे स्थिताः ॥२३९॥
नदी तप्तजला पूर्वा सीतामेवैति नैषधी । ततो मत्तजला नाम्ना तथोन्मत्तजलाऽपरा ॥२४०॥
क्षीरोदाऽन्या च सीतोदा स्रोतोऽन्तर्वाहिनी नदी । विशन्ति नैषधोत्पन्नाः सीतोदां सुमहानदीम् ॥२४१॥
तामुत्तरविदेहेषु पश्चिमा गन्धमादिनी । सा फेनमालिनी नीलात् सम्प्राप्ता चोर्मिमालिनी ॥२४२॥
नाम्ना विभङ्गनद्यस्ताः प्रमाणे रोह्यया समाः । तोरणेषु वसन्त्यासां सङ्गमे दिक्कुमारिकाः २४३॥
वक्षाराणां च तासां च मध्ये नद्योस्तटद्वये । स्युः पूर्वापरयोर्मेरोर्विदेहाश्चतुरष्टकाः ॥२४४॥
कच्छा सुकच्छा महाकच्छा चतुर्थी कच्छकावती । आवर्त्ता लाङ्गलावर्ता पुष्कला पुष्कलावती ॥२४५॥
अपराद्यास्त्वमी वेद्याः षट्खण्डा विषयाः स्थिताः । सीतानीलान्तराले स्युः प्रादक्षिण्येन वर्णिताः ॥२४६॥
वत्सा सुवत्सा महावत्सा चतुर्थी वत्सकावती । रम्या रम्यका रमणीयाष्टमी मङ्गलावती ॥२४७॥
पूर्वादयस्त्वमी वेद्या विषयाश्चक्रवर्तिनाम् । सीतानिषधयोर्मध्ये व्यायता दक्षिणोत्तराः ॥२४८॥
पद्मा सुपद्मा महापद्मा चतुर्थी पद्मकावती । शङ्खा च नलिनी चैव कुमुदा सरिता तथा ॥२४९॥
पूर्वतः प्रभृति प्रोक्ताः दक्षिणोत्तरमायताः । अष्टाविमे निविष्टास्तु सीतोदानिषधान्तरे ॥२५०॥
वप्रा सुवप्रा महावप्रा चतुर्थी वप्रकावती । गन्धा चापि सुगन्धा च गन्धिला गन्धमालिनी ॥२५१॥
अपराद्यास्त्विमे प्रोक्ताः विषयाश्चक्रपाणिनाम्[1] । नीलसीतोदयोर्मध्ये निविष्टास्तावदायताः ॥२५२॥

वनके पूर्व-पश्चिम भागमें एक वेदिका है। यह वेदिका एक योजन ऊँची, एक कोश गहरी और दो कोश चौड़ी जानना चाहिए ॥२३८॥ १ ग्राहवती, २ ह्रदवती और ३ पङ्कवती ये तीन नदियाँ नील पर्वतसे निकलकर सीता नदीकी ओर जाती हैं तथा वक्षार पर्वतोंके मध्यमें स्थित हैं ॥२३९॥ १ तप्तजला, २ मत्तजला, ३ उन्मत्तजला ये तीन नदियाँ निषध पर्वतसे निकलकर सीता नदीकी ओर जाती हैं ॥२४०॥ १ क्षीरोदा, २ सीतोदा और ३ स्रोतोऽन्तर्वाहिनी ये तीन नदियाँ निषध पर्वतसे निकलकर सीतोदा नामक महानदीमें प्रवेश करती हैं ॥२४१॥ उत्तर विदेह क्षेत्रमें १ गन्धमादिनी, २ फेनमालिनी और ३ ऊर्मिमालिनी ये तीन नदियाँ नीलाचलसे निकलकर सीतोदा नदीमें मिली हैं ॥२४२॥ ऊपर कही हुई बारह नदियाँ विभंगा नदी कहलाती हैं। ये प्रमाणमें रोह्या नदीके समान हैं तथा इनके संगम स्थानोंमें जो तोरण द्वार हैं उनमें दिक्कुमारी देवियाँ निवास करती हैं ॥२४३॥

वक्षारगिरि और विभङ्गा नदियोंके मध्यमें सीता-सीतोदा नदियोंके दोनों तटोंपर मेरुकी पूर्व और पश्चिम दिशामें बत्तीस विदेह हैं ॥२४४॥ उनमें १ कच्छा, २ सुकच्छा, ३ महाकच्छा, ४ कच्छकावती, ५ आवर्ता, ६ लाङ्गलावर्ता, ७ पुष्कला और ८ पुष्पकलावती ये आठ देश पश्चिम विदेह क्षेत्रमें सीता नदी और नील कुलाचलके मध्य प्रदक्षिणा रूपसे स्थित हैं तथा प्रत्येक देशके छह खण्ड हैं ॥२४५-२४६॥ १ वत्सा, २ सुवत्सा, ३ महावत्सा, ४ वत्सकावती, ५ रम्या, ६ रम्यका, ७ रमणीया और ८ मङ्गलावती ये आठ देश पूर्व विदेह क्षेत्रमें सीता नदी और निषध पर्वतके मध्य स्थित हैं। ये चक्रवर्तियोंके देश हैं और दक्षिणोत्तर लम्बे हैं ॥२४७-२४८॥ १ पद्मा, २ सुपद्मा, ३ महापद्मा, ४ पद्मकावती, ५ शङ्खा, ६ नलिनी, ७ कुमुदा और ८ सरिता ये आठ देश पूर्व विदेह क्षेत्रमें सीतोदा नदी और निषध पर्वतके मध्य स्थित हैं तथा दक्षिणोत्तर लम्बे हैं ॥२४९-२५०॥ १ वप्रा, २ सुवप्रा, ३ महावप्रा, ४ वप्रकावती, ५ गन्धा, ६ सुगन्धा, ७ गन्धिका और ८ गन्धमालिनी ये आठ देश पश्चिम विदेह क्षेत्रमें नील पर्वत और सीतोदा नदीके मध्य स्थित हैं तथा दक्षिणोत्तर लम्बे हैं। ये चक्रवर्तियोंके क्षेत्र कहे गये हैं अर्थात् इनमें

---

१. चक्रपाणिनामिति प्रयोगश्चिन्त्यः 'चक्रपाणीना' मिति भवितव्यम्, तत्र च कृते छन्दोभङ्गः स्यात्।

सहस्रद्वितयं तेषां द्विशती च त्रयोदश । योजनाष्टमभागोना सा पूर्वापरविस्तृतिः ॥२५३॥
नदीविस्तारहीनस्य विदेहस्यार्धविस्तृतिः । आयामो देशवक्षारविभङ्गसरितामसौ ॥२५४॥
तद्देशविस्तरायामास्तन्मध्ये रजताद्रयः । द्वात्रिंशद्वारतेनामो समाना नवकूटकाः ॥२५५॥
श्रेण्योः स्युर्नगराण्येषां पञ्चपञ्चाशदेकशः । विद्याधराः वसन्त्येषु परे द्वीपद्वये यथा ॥२५६॥
क्षेमा क्षेमपुरी ख्याता रिष्टा रिष्टपुरी परा । खड्गा मञ्जूषया सार्द्धमौषधी पुण्डरीकिणी ॥२५७॥
कच्छादिषु यथासंख्यमष्टास्वष्टाविमाः पुरः । राजधान्यः समादिष्टाः शलाकापुरुषोद्भवाः ॥२५८॥
सुसीमा कुण्डलाभिख्या पुरी चान्या पराजिता । प्रभङ्करा चतुर्थी तु [1]पञ्चम्यङ्कावतीरिता ॥२५९॥
पद्मावती शुभाभिख्या साष्टमी रत्नसञ्चया । राजधान्यस्त्विमा मान्या वत्सादिषु यथाक्रमम् ॥२६०॥
तथैवाश्वपुरी ज्ञेया परा सिंहपुरीति च । महापुरी तथैवान्या विजया च पुरी पुनः ॥२६१॥
अरजा विरजा चासावशोका वीतशोकया । राजधान्यः प्रसिद्धास्ताः पद्मादिषु यथाक्रमम् ॥२६२॥
विजया वैजयन्ती च जयन्ती चाऽपराजिता । [2]चक्रा खड्गा च वप्रादिष्वयोध्यावध्यया समम् ॥२६३॥
दक्षिणोत्तरतो दैर्ध्यात् पुर्यो द्वादशयोजनाः । नवयोजनविस्तारा हेमप्राकारतोरणाः ॥२६४॥
अल्पैः पञ्चशतैर्द्वारैर्बृहद्भिस्ताः सहस्रकैः । रत्नचित्रकपाटाढ्यैर्दंश्रैः[3] सप्तशतैर्युताः ॥२६५॥
द्वादश स्युः सहस्राणि रथ्यानां तु यथायथम् । सहस्रं तु चतुष्काणां नगरीष्वक्षयात्मसु ॥२६६॥

चक्रवर्तियोंका निवास रहता है ॥२५१-२५२॥ इन सबका पूर्वापर विस्तार योजनके आठ भागोंमें-से एक भाग कम दो हजार दो सौ तेरह योजन है ॥२५३॥ समस्त विदेह क्षेत्रके विस्तारमेंसे नदीका विस्तार घटा देनेपर जो शेष रहे उसका आधा भाग किया जाय। यही देश, वक्षारगिरि और विभंगा नदियोंकी लम्बाई है। भावार्थ—समस्त विदेह क्षेत्रका विस्तार तैंतीस हजार छह सौ चौरासी योजन चार कला है उसमें सीता नदीका पाँच सौ योजनका विस्तार घटा देनेपर तैंतीस हजार एक सौ चौरासी योजन चार कलाका विस्तार शेष रहता है। इसका आधा करनेपर सोलह हजार पाँच सौ बानबे योजन दो कला क्षेत्र बचता है। यही कच्छा आदि देश वक्षार गिरि और विभंगा नदियोंकी लम्बाईका है ॥२५४॥ इन बत्तीस विदेहोंमें बत्तीस विजयार्ध पर्वत हैं। इनकी लम्बाई कच्छादि देशोंकी चौड़ाईके समान है अर्थात् ये कुलाचलसे लेकर नदीतक लम्बे हैं। प्रत्येक विजयार्धपर नौ-नौ कूट हैं और इन सबका वर्णन भरत क्षेत्रके विजयार्धके समान है ॥२५५॥ इन विजयार्धोंकी दो-दो श्रेणियाँ हैं प्रत्येक श्रेणीमें पचपन-पचपन नगर हैं और उन नगरोंमें भरत तथा ऐरावत क्षेत्रके समान विद्याधर निवास करते हैं ॥२५६॥ १ क्षेमा, २ क्षेमपुरी, ३ रिष्टा, ४ रिष्टपुरी, ५ खड्गा, ६ मञ्जूषा, ७ औषधी और ८ पुण्डरीकिणी ये आठ नगरियाँ क्रमसे कच्छा आदि देशोंकी राजधानियाँ कही गई हैं। इनमें शलाका पुरुषोंकी उत्पत्ति होती है ॥२५७-२५८॥ १ सुसीमा, २ कुण्डला, ३ अपराजिता, ४ प्रभंकरा, ५ अङ्कावती, ६ पद्मावती, ७ शुभा और ८ रत्नसञ्चया ये आठ क्रमसे वत्सा आदि देशोंकी राजधानियाँ जानना चाहिए ॥२५९-२६०॥ १ अश्वपुरी, २ सिंहपुरी, ३ महापुरी, ४ विजयापुरी, ५ अरजा, ६ विरजा, ७ अशोका और ८ वीतशोका ये आठ नगरियाँ क्रमसे पद्मा आदि देशोंकी राजधानियाँ प्रसिद्ध हैं ॥२६१-२६२॥ १ विजया, २ वैजयन्ती, ३ जयन्ती, ४ अपराजिता, ५ चक्रा, ६ खड्गा, ७ अयोध्या और ८ अवध्या ये आठ वप्रा आदि देशोंकी राजधानियाँ हैं। ये सभी नगरियाँ दक्षिणोत्तर दिशामें बारह योजन लम्बी हैं, पूर्व-पश्चिममें नौ योजन चौड़ी हैं, सुवर्णमयी कोट और तोरणोंसे युक्त हैं। रत्नमयी चित्र विचित्र किवाड़ोंसे युक्त पाँच सौ छोटे और एक हजार बड़े दरवाजों तथा सात सौ झरोखोंसे सहित हैं ॥२६३-२६५॥ इन अविनाशी नगरियोंमें बारह हजार गलियाँ और एक हजार चौक हैं ॥२६६॥

१. पञ्चम्यङ्कवती म० । २. वक्रा म० । ३. गवाक्षैः ।

गङ्गासिन्धू प्रतिक्षेत्रं कच्छादौ नीलतः स्रुते[1]। सीतां प्रविशतोऽतीत्य विजयार्द्धगुहाद्वयम् ॥२६७॥
गिरिव्याससमायामे योजनाष्टकमुच्छ्रिते। गुहे द्वादशविस्तारे द्वे द्वे स्यातां गिरौ गिरौ ॥२६८॥
नद्यः षोडश गङ्गाद्याः समा भरतगङ्गया। ता रक्तारक्तवत्योस्तु तावन्त्यो निषधस्रुताः ॥२६९॥
निषधान्नीलतस्तावत्संख्यास्तन्नामिकाः श्रुताः। नद्योऽपरविदेहेषु सीतोदां तु व्रजन्ति ताः ॥२७०॥
नाम्ना साधारणेनोक्तास्ता एता[2] रतिनिम्नगाः। चतुर्दशसहस्रैस्तु प्रत्येकं सरितां युताः ॥२७१॥
अशीतिश्चापि चत्वारि सहस्राणि कुरुद्वये। प्रत्येकं निम्नगा नद्योरर्धमर्धतटद्वये ॥२७२॥
पञ्चलक्षाः सहस्राणि द्वात्रिंशत्त्रिंशदष्टभिः। प्रत्येकमुभयोर्नद्यः सीतासीतोदयोर्युताः ॥२७३॥
दशलक्षाः चतुःषष्टिसहस्राण्यष्टसप्ततिः। सर्वा एवापगाः प्रोक्ता पूर्वापरविदेहयोः ॥२७४॥
चतुर्दशसहस्राणि प्रत्येकं सरितो मताः। गङ्गासिन्ध्वोः पतन्त्यस्ताः रक्तारक्तोदयोश्च ताः ॥२७५॥
रोह्यायां रोहितास्यायां सहस्राणि पतन्ति ताः। सुवर्णरूप्यकूलयोरष्टाविंशतिरेकशः ॥२७६॥
षट्पञ्चाशत्सहस्राणि ता हरिद्धरिकान्तयोः। पतन्ति सिन्धवो यद्वत् सनारीनरकान्तयोः ॥२७७॥
सङ्गताश्च समस्तास्ता गङ्गासिन्ध्वादिसिन्धवः। तिस्रो लक्षा नवत्या द्वे सहस्रे द्वादशापि च ॥२७८॥
स्युश्चतुर्दशलक्षास्तु वैदेह्यस्ताश्च संख्यया। षट्पञ्चाशत्सहस्राणि नवतिश्च समुद्रगाः ॥२७९॥
द्वीपेऽस्मिन् काञ्चनैस्तुल्या वैडूर्यमयमूर्तयः। चतुस्त्रिंशत्सुरैः सेव्या वृषैर्वृषभपर्वताः[3] ॥२८०॥
पूर्वापरविदेहान्ताः समुद्रतटसङ्गताः। देवारण्यवनाभोगाश्चत्वारः सरितोस्तटे ॥२८१॥

कच्छा आदि प्रत्येक क्षेत्रमें गङ्गा सिन्धु नामकी दो नदियाँ हैं जो नील पर्वतसे निकलकर विजयार्ध पर्वतकी दोनों गुफाओंको उल्लंघन करती हुई सीता नदीमें प्रवेश करती हैं ॥२६७॥ प्रत्येक विजयार्ध पर्वतमें उसकी चौड़ाईके समान लम्बी, आठ योजन ऊँची और बारह योजन चौड़ी दो-दो गुफाएँ हैं ॥२६८॥ ये गङ्गा आदि सोलह नदियाँ, भरत क्षेत्रकी गङ्गा नदीके समान हैं। इसी प्रकार निषधाचलसे निकली हुई सोलह रक्ता, रक्तोदा नदियाँ भी ऐरावतकी रक्ता-रक्तोदाके समान हैं ॥२६९॥ पश्चिम विदेह क्षेत्रमें भी इसी प्रकार गङ्गा, सिन्धु और रक्ता-रक्तोदा नामकी सोलह-सोलह नदियाँ निषधाचल और नीलाचलसे निकलकर सीतोदा नदीकी ओर जाती हैं ॥२७०॥ समान नामसे जिनका कथन किया गया है ऐसी ये समस्त नदियाँ अत्यन्त प्रीतिको बढ़ानेवाली हैं तथा प्रत्येक नदियाँ चौदह हजार नदियोंसे युक्त हैं ॥२७१॥ सीता और सीतोदा नदियोंका परिवार देवकुरु और उत्तरकुरुमें चौरासी हजार नदियोंका है। दोनों नदियोंमें प्रत्येक नदीके तटसे ब्यालीस हजार नदियोंका प्रवेश होता है ॥२७२॥ सीता, सीतोदा नामक उक्त नदियोंमेंसे प्रत्येक नदीमें पाँच लाख बत्तीस हजार अड़तीस नदियाँ मिली हैं ॥२७३॥ पूर्व और पश्चिम विदेहमें इन समस्त नदियोंका प्रमाण दश लाख चौंसठ हजार अठहत्तर कहा गया है ॥२७४॥ गङ्गा, सिन्धु एवं रक्ता-रक्तोदा नदियोंमें प्रत्येकका परिवार चौदह-चौदह हजार नदियोंका है ॥२७५॥ रोह्या, रोहितास्या और सुवर्णकूला, रूप्यकूलामें प्रत्येकका अट्ठाईस-अट्ठाईस हजार नदियोंका परिवार है ॥२७६॥ हरित्, हरिकान्ता और नारी, नरकान्तामें प्रत्येक नदीका परिवार छप्पन हजार नदियोंका है ॥२७७॥ विदेह क्षेत्रको छोड़ अन्य क्षेत्रोंकी गङ्गा, सिन्धु आदि नदियोंकी समस्त परिवार-नदियाँ मिलकर तीन लाख बानबे हजार बारह हैं ॥२७८॥ विदेह क्षेत्रकी समुद्रतक जानेवाली समस्त नदियोंकी संख्या चौदह लाख छप्पन हजार नब्बे है ॥२७९॥

जम्बू द्वीपमें काञ्चन कूटोंके समान वैडूर्य मणिमय तथा श्रेष्ठ देवोंके द्वारा सेवनीय चौंतीस वृषभाचल हैं ॥२८०॥ सीता और सीतोदा दोनों नदियोंके तटपर पूर्व-पश्चिम विदेह

---

१. निर्गते। श्रुते म०। २. एवारातिं-म०, क०। ३. प्रधानदेवः।

द्वाविंशति सहस्रे द्वे शतानि नव विस्तृताः । योजनानि पुनस्तेषां वेदिका भद्रशालवत् ॥२८२॥
विदेहक्षेत्रमध्यस्थः कुरुक्षेत्रद्वयावधिः । योजनानां सहस्राणि नवतिर्नव चोद्धृतः[1] ॥२८३॥
मेखलात्रयसंयुक्तः ख्यातो मेरुमहीधरः । ऊर्ध्वं चूलिकयोद्भासी सचत्वारिंशदुच्छ्रयः ॥२८४॥
सहस्रमवगाहोऽस्य सहस्राणि दशाऽत्र च । विष्कम्भो नवतिश्च स्याद् दशैकादशभागकाः ॥२८५॥
सैकात्रिंशत्सहस्राणि शतानि नव वै दश । योजनानि तथा भागौ साधिकौ परिधिर्गिरेः ॥२८६॥
तलात् सहस्रमुद्गत्य सहस्राणि दशोपरि । योजनानि स विष्कम्भो भूमौ भवति भूभृतः ॥२८७॥
सैकत्रिंशत्सहस्राणि षट्शती विंशतिद्वयम् । योजनानि त्रयः क्रोशाः शते द्वादश दण्डकाः ॥२८८॥
हस्तास्त्रयस्तथैव स्यादङ्गुलानि त्रयोदश । साधिकानि परिक्षेपो भद्रशालेऽद्रिगोचरः ॥२८९॥
गत्वा पञ्चशतीमूर्ध्वं मेखलायां तु नन्दनः । स्यात्पञ्चशतविष्कम्भं मन्दरं परितो वनम् ॥२९०॥
नव तत्र सहस्राणि शतानि नव षट्कलाः । चतुःपञ्चाशदप्यस्य विष्कम्भः पुष्कलो गिरेः ॥२९१॥
एकत्रिंशत्सहस्राणि तथा तत्र चतुःशती । गिरेर्बाह्यपरिक्षेपः साधिका नवसप्ततिः ॥२९२॥
स एव च सहस्रोनो विष्कम्भोऽभ्यन्तरः स्फुटः । नन्दने मन्दरस्य स्यात् परिक्षेपोऽपि वक्ष्यते ॥२९३॥
अष्टाविंशतिरेष स्यात् सहस्राणि शतत्रयम् । षोडशाग्राः कलाश्चाष्टौ परिधिः साधिका गिरेः ॥२९४॥
सहस्राणि द्विषष्टिं च गत्वा पञ्चशतीं ततः । नन्दनेन समानं तद् वनं सौमनसं भवेत् ॥२९५॥
चत्वारि च सहस्राणि शते द्वे च द्विसप्ततिः । अष्टौ भागाश्च विष्कम्भो बाह्यस्तत्र भवेद्गिरेः ॥२९६॥
परिक्षेपः पुनस्तस्य सहस्राणि त्रयोदश । शतं पञ्चतयं ज्ञेयमेकादश च षट् कलाः ॥२९७॥
बाह्यो यो गिरिविष्कम्भः सहस्रेण स वर्जितः । स्यादभ्यन्तरविष्कम्भस्तस्येति मुनयो विदुः ॥२९८॥

पर्यन्त लम्बे तथा समुद्र तटसे मिले हुए चार देवारण्य [दो देवारण्य, दो भूतारण्य] वनके प्रदेश हैं ॥२८१॥ इन वनोंकी वेदिकाएँ भद्रशाल वनके समान बाईस हजार दो सौ नौ योजन विस्तृत हैं ॥२८२॥ विदेह क्षेत्रके मध्यमें प्रसिद्ध मेरु पर्वत स्थित है, उसकी सीमा देवकुरु और उत्तर-कुरु तक फैली हुई है, वह निन्यानबे हजार योजन ऊँचा है, तीन मेखलाओंसे युक्त है, चालीस योजन ऊँची चूलिकासे सुशोभित है, उसकी गहराई एक हजार योजन है और पृथिवी तल-पर चौड़ाई दश हजार नब्बे योजन तथा एक योजनके ग्यारह भागोंमें दश भाग प्रमाण है ॥२८३-२८५॥ उसकी परिधि इकतीस हजार नौ सौ दश योजन तथा कुछ अधिक दो भाग प्रमाण है ॥२८६॥ तल भागसे एक हजार योजन ऊपर चलकर पृथिवीपर इस पर्वतकी चौड़ाई दश हजार योजन है ॥२८७॥ भद्रशाल वनके समीप इसकी परिधि इकतीस हजार छह सौ बाईस योजन तीन कोश बारह धनुष तीन हाथ और कुछ अधिक तेरह अङ्गुल है ॥२८८-२८९॥ भद्रशाल वनसे पाँच सौ योजन ऊपर चलकर मेरु पर्वतकी चारों ओर मेखलापर पाँच सौ योजन चौड़ा दूसरा नन्दन वन है ॥२९०॥ वहाँ इस पर्वतकी चौड़ाई नौ हजार नौ सौ चौवन योजन छह कला है ॥२९१॥ नन्दन वनके समीप इस पर्वतकी बाह्य परिधि इकतीस हजार चार सौ उन्यासी योजनसे कुछ अधिक है ॥२९२॥ भीतरी चौड़ाई आठ हजार नौ सौ चौवन योजन छह कला है। अब इसकी अभ्यन्तर परिधि कहते हैं ॥२९३॥ नन्दन वनके समीप मेरु-की अभ्यन्तर परिधि अट्ठाईस हजार तीन सौ सोलह योजन तथा कुछ अधिक आठ कला है ॥२९४॥ नन्दन वनसे साढ़े बासठ हजार योजन ऊपर चलकर तीसरा सौमनस वन है। यह वन नन्दन वनके ही समान है ॥२९५॥ सौमनस वनमें पर्वतकी बाह्य चौड़ाई चार हजार दो सौ बहत्तर योजन आठ कला है ॥२९६॥ और बाह्य परिधि तेरह हजार पाँच सौ ग्यारह योजन छह कला है ॥२९७॥ पर्वतकी जो बाह्य चौड़ाई बतलाई है उसमें एक हजार योजन कम करने-

1. चोच्छ्रिता म० ।

ईषदूनपरिक्षेपः सहस्राणि दश स्मृतः । त्रिशत्येकोनपञ्चाशत्त्रयश्चैकादशांशकाः ॥२९९॥
स्याद् षट्त्रिंशत्सहस्राणि गत्वादौ पाण्डुकं वनम् । चतुर्नवतिसंयुक्ता तद्विस्तारश्चतुःशती ॥३००॥
द्विषष्टियोजनान्यत्र सहस्रत्रितयं शतम् । गव्यूतं साधिकं मेरोः परिधिः परिकीर्तितः ॥३०१॥
चत्वारिंशत्समुद्विद्धा मूर्ध्नि वैडूर्यचूलिका । मूलमध्यान्तविस्तारैर्द्वादशाष्टचतुर्विधा ॥३०२॥
सप्तत्रिंशद् भवेन्मूले मध्ये स्यात् पञ्चविंशतिः । चूलिकायाः परिक्षेपो द्वादशाग्रे च साधिकाः ॥३०३॥
पार्थिवाः षट्परिक्षेपाश्चूलिकायाः प्रभृत्यधः । एकादशप्रकारोऽन्यः सप्तमोऽपि वनैः कृतः ॥३०४॥
लोहिताक्षमयः पूर्वः पद्मरागमयः परः । तथा वज्रमयः सर्वरत्नो वैडूर्यविग्रहः ॥३०५॥
हरितालमयः षष्ठस्तेषां प्रत्येकमिष्यते । पञ्चशत्यपि विस्तारः सहस्राण्यपि षोडश ॥३०६॥
भद्रशालवनं भूमौ मानुषोत्तरमेव च । सदेवनागभूतानां रमणानि वनानि च ॥३०७॥
परिक्षेपो वनं चान्यन्नन्दनं चोपनन्दनम् । वनं सौमनसं चान्यदुपसौमनसं तथा ॥३०८॥
पाण्डुकं दशमं प्रोक्तमुपपाण्डुकमन्त्यजम् । मेरोरेकादश ज्ञेयाः परिक्षेपाः परीक्षकैः ॥३०९॥
देशेष्वेकादशानां तु पूरणेषु हि मन्दरः । मौलविष्कम्भभागानामेकैकेन प्रहीयते ॥३१०॥
सर्वत्राङ्गुलमानादौ यावद् योजनमानकम् । हानिवृद्धी इति ग्राह्ये मेरुविस्तारगोचरे ॥३११॥

पर भीतरी चौड़ाई निकलती है ऐसा मुनिगण कहते हैं ॥२९८॥ पर्वतकी भीतरी परिधि दश हजार तीन सौ उनचास योजन तथा एक योजनके ग्यारह भागोंमें तीन भाग प्रमाण है ॥२९९॥ यहाँसे छत्तीस हजार योजन ऊपर चलकर पर्वतके ऊपर चौथा पाण्डुक वन है, यहाँ पर्वत चार सौ चौरानबे योजन चौड़ा है ॥३००॥ यहाँ पर्वतकी परिधि तीन हजार एक सौ बासठ योजन कुछ अधिक एक कोश है ॥३०१॥ मेरु पर्वतके मस्तकपर चालीस योजन ऊँची वैडूर्य मणिमयी चूलिका है। यह चूलिका मूलमें बारह योजन, मध्यमें आठ योजन और अन्तमें चार योजन चौड़ी है ॥३०२॥ चूलिकाकी परिधि मूलमें सैंतीस योजन, मध्यमें पचीस योजन और अग्र भागमें कुछ अधिक बारह योजन है ॥३०३॥ मेरु पर्वतकी चूलिकासे लेकर नीचे तक १ लोहिताक्षमय, २ पद्मरागमय, ३ वज्रमय, ४ सर्वरत्नमय, ५ वैडूर्यमय और ६ हरितालमय ये छह पृथिवीकाय रूप परिधियाँ हैं। इन परिधियोंमें प्रत्येकका विस्तार सोलह हजार पाँच सौ योजन है। *इनके सिवाय वनोंके द्वारा की हुई एक सातवीं परिधि और भी है। तथा उसके नीचे लिखे अनुसार ग्यारह भाग परीक्षकोंके द्वारा जानने योग्य हैं—१ भद्रशाल वन, २ मानुषोत्तर, ३ देवरमण, ४ नागरमण, ५ भूतरमण, ६ नन्दन, ७ उपनन्दन, ८ सौमनस, ९ उपसौमनस, १० पाण्डुक और ११ उपपाण्डुक। इनमेंसे पृथिवीपर जो भद्रशाल वन है उसमें भद्रशाल, मानुषोत्तर, देवरमण, नागरमण और भूतरमण ये पाँच वन हैं। उससे ऊपर चलकर नन्दन वनमें नन्दन और उपनन्दन, सौमनस वनमें सौमनस और उपसौमनस तथा पाण्डुक वनमें पाण्डुक और उपपाण्डुक वन हैं ॥३०४-३०९॥ इन भागोंमें यदि ग्यारह भाग मेरुपर चढ़ा जाय तो वहाँ मूल भागकी चौड़ाईसे एक भाग कम चौड़ाई हो जाती है। इसी प्रकार सब जगह योजन पर्यन्त अङ्गुल हाथ आदि प्रमाणोंमें भी मेरुके विस्तारमें हानि तथा वृद्धि समझना चाहिए। भावार्थ—ऊपर जो ग्यारह भाग बतलाये हैं उनमें प्रथम भागसे यदि ग्यारह योजन ऊँचा चढ़ा जाय तो मेरुकी चौड़ाई मूलभागकी चौड़ाईसे एक योजन कम हो जाती है और यदि ग्यारह हाथ या ग्यारह अङ्गुल चढ़ा जाय तो वहाँकी चौड़ाई मूलभागकी चौड़ाईसे एक हाथ या एक

*मेरु पर्वत निन्यानबे हजार योजन ऊँचा है। उसके सोलह हजार पाँच सौ योजन २ विस्तारवाले ६ खण्ड चूलिकासे लेकर नीचे तक हैं। उनकी रचना लोहिताक्ष आदि मणियोंकी है इसलिए उनके नाम भी उन्हींके अनुसार प्रतिपादन किये गये हैं।

एकादश सहस्राणि योजनानि तु मन्दरः । समरुन्द्रो नन्दनादूर्ध्वं वनात्सौमनसात्तथा ॥३१२॥
पञ्चमेषु प्रदेशेषु चूलिकैकेन हीयते । तथाऽङ्गुलादिमानेषु योजनान्तेष्वयं क्रमः ॥३१३॥
साधिकैकादशांशाभ्यां लक्षस्यास्युत्तरं शतम् । दैर्घ्यं योजनलक्षस्य मेरोः पार्श्वभुजाद्वयम् ॥३१४॥
पण्याख्यं दिशि पूर्वस्यां दक्षिणस्यां च चारणम्[1] । गन्धर्वमपरस्यां स्यादुत्तरस्यां च चित्रकम् ॥३१५॥
भवनं नन्दने तेषां त्रिंशत्स्यान्मुखविस्तृतिः । पञ्चाशद्योजनोच्छ्रायः परिधिर्नवतिः स्मृता ॥३१६॥
पण्याख्ये रमते सोमश्चारणाख्ये यमस्तथा । गान्धर्वे वरुणश्चित्रे कुबेरः सपरिच्छदः ॥३१७॥
चत्वारोऽपि ते दिक्षु लोकपालाः पृथक् पृथक् । सार्द्धाभिस्तु त्रिकोटीभिः स्त्रीणां क्रीडन्ति सन्ततम् ॥३१८॥
वज्रं वज्रप्रभं नाम्ना सुवर्णभवनं भवेत् । सुवर्णप्रभमप्येकं दिक्षु सौमनसे वने ॥३१९॥
भवनानां परिक्षेपमुखव्यासोच्छ्रया इह । त एवार्धीकृता बोध्या नन्दनस्थितसद्मनाम् ॥३२०॥
लोकपालास्त एवात्र देवाः सोमयमादयः । क्रीडन्ति स्वेच्छया स्त्रीभिस्तावतीभिर्यथायथम् ॥३२१॥
लोहिताञ्जनहारिद्रपाण्डुराख्यानि पाण्डुके । वेश्मान्यूर्ध्वस्वनामानि तावत्कन्यानि तान्यपि ॥३२२॥
स्वयम्प्रभविमानेशः सोमोऽसौ पूर्वदिक्प्रभुः । रक्तवाहननेपथ्यः सार्द्धपल्यद्वयस्थितिः ॥३२३॥
स षट्षष्टिसहस्राणां विमानानां प्रभावताम् । षट्षष्टिषट्शतानां च षट्लक्षाणां च भोजकः ॥३२४॥

अङ्गुल कम हो जाती है । इसी प्रकार यदि ऊपरसे नीचेकी ओर आया जाय तो वहाँ उसकी चौड़ाई वृद्धिंगत हो जाती है ॥३१०-३११॥ परन्तु विशेषता यह है कि यदि नन्दन वन और सौमनस वनसे ग्यारह योजन ऊँचा चढ़ा जाय तो वहाँकी चौड़ाई मूलभागकी चौड़ाईसे कम नहीं होती किन्तु बराबर रही आती है ॥३१२॥ चूलिकासे पाँच योजन ऊपर चढ़नेपर एक योजन चौड़ाई कम हो जाती है और पाँच अङ्गुल अथवा पाँच हाथ चढ़नेपर एक अङ्गुल वा एक हाथ चौड़ाई घट जाती है ॥३१३॥ एक लाख योजन विस्तारवाले मेरु पर्वतकी दोनों पार्श्व भुजाओंकी लम्बाई एक लाख सौ योजन तथा ग्यारह भागोंमें दो भाग प्रमाण है ॥३१४॥ नन्दन वनकी पूर्व दिशामें पण्य नामका, दक्षिण दिशामें चारण नामका, पश्चिम दिशामें गन्धर्व नामका और उत्तर दिशामें चित्रक नामका भवन है। इन भवनोंकी चौड़ाई तीस योजन, ऊँचाई पचास योजन और परिधि नब्बे योजन है ॥३१५-३१६॥ इनमें पण्य नामक भवनमें सोम, चारण नामक भवनमें यम, गान्धर्व नामक भवनमें वरुण और चित्रक नामक भवनमें कुबेर सपरिवार क्रीड़ा करता है ॥३१७॥ ये चारों लोकपाल पृथक्-पृथक् दिशाओंमें साढ़े तीन करोड़ साढ़े तीन करोड़ स्त्रियोंके साथ निरन्तर क्रीड़ा करते हैं ॥३१८॥

सौमनस वनकी चारों दिशाओंमें क्रमसे वज्र, वज्रप्रभ, सुवर्णभवन और सुवर्णप्रभ नामके चार भवन हैं ॥३१९॥ इन भवनोंकी परिधि तथा अग्रभागकी चौड़ाई और ऊँचाई नन्दनवनके भवनोंसे आधी समझनी चाहिए ॥३२०॥ इन भवनोंमें भी वे ही सोम, यम आदि लोकपाल अपनी इच्छानुसार उतनी ही स्त्रियोंके साथ यथायोग्य क्रीड़ा करते हैं ॥३२१॥ पाण्डुक वनकी चारों दिशाओंमें लोहित, अञ्जन, हारिद्र और पाण्डु नामके चार भवन हैं। इन भवनोंकी ऊँचाई आदि सौमनस वनके भवनोंके समान है तथा इनमें वे ही लोकपाल उतनी ही स्त्रियोंके साथ क्रीड़ा करते हैं ॥३२२॥ इन लोकपालोंमें सोम नामका लोकपाल पूर्व दिशाका स्वामी तथा स्वयंप्रभ विमानका अधिपति है। इसके वाहन तथा वस्त्राभूषण आदि सब लाल रंगके हैं और इसकी आयु अढ़ाई पल्य प्रमाण है। यह छह लाख छयासठ हजार छह सौ छयासठ देदीप्यमान भवनोंका भोग करनेवाला है अर्थात् इतने भवनोंका यह स्वामी है ॥३२३-३२४॥

---

१. वारणं म० ।

तथाऽरिष्टविमानेशो यमो दक्षिणदिक्प्रभुः । सार्द्धपल्यद्वयायुष्कः कृष्णनेपथ्यवाहनः ॥३२५॥
जलप्रभविमानेशो वरुणो वारुणीप्रभुः । तथैव पीतनेपथ्यः त्रिभागोनत्रिपल्यकः ॥३२६॥
वल्गुप्रभविमानेशः कौबेरीप्रभुरिष्यते । कुबेरः शुक्लनेपथ्यः सत्रिपल्योपमस्थितिः ॥३२७॥
मेरोरुत्तरपूर्वस्यां नन्दने बलभद्रके । कूटे काञ्चनकैस्तुल्ये कूटनाम्नामरो भवेत् ॥३२८॥
नन्दनं मन्दरं कूटं निषधं हिमवच्च तत् । रजतं रजकं नाम्ना तथा सागरचित्रकम् ॥३२९॥
वज्रकूटं विनिर्दिष्टमष्टमं तु मनीषिभिः । दिशं दिशं प्रति द्वे द्वे स्यातां कूटे यथाक्रमम् ॥३३०॥
उच्छ्रायो मूलविस्तारस्तेषां पञ्चशतानि तु । तदर्धं मस्तके मध्ये त्रिशती पञ्चसप्ततिः ॥३३१॥
दिक्कुमार्यस्तु कूटेषु तेष्विमाः प्रतिपादिताः । मेघङ्करा तु पूर्वा स्यात् तथा मेघवती परा ॥३३२॥
ततः परं प्रसिद्धान्या सुमेघा मेघमालिनी । तोयधारा विचित्रा स्यात् पुष्पमाला त्वनिन्दिता ॥३३३॥
पूर्वदक्षिणदिग्भागे वाप्यो मेरुमहीभृतः । पूर्वा तूत्पलगुल्माख्या नलिना चोत्पला परा ॥३३४॥
उत्पलोज्ज्वलसंज्ञा स्यात् तासां पञ्चाशदायतिः । अवगाहो दश ज्ञेयो विस्तारः पञ्चविंशतिः ॥३३५॥
आसां मध्ये च शक्रस्य प्रासादः समवस्थितः । योजनान्यस्य गव्यूत्या सैकत्रिंशत्तु विस्तृतिः ॥३३६॥
उच्छ्रायः पुनरुद्दिष्टो द्वाषष्टिश्चार्द्धयोजनः । अवगाहः प्रमाणेन प्रासादस्यार्द्धयोजनः ॥३३७॥
सिंहासनं सुरेन्द्रस्य तस्य मध्येऽवतिष्ठते । स्वदिक्षु लोकपालानामासनानि भवन्ति च ॥३३८॥
तस्यैवोत्तरपूर्वस्यामपरोत्तरतोऽपि च । तत्र सामानिकानां तु भान्ति भद्रासनानि तु ॥३३९॥
पुरोऽप्यष्टाग्रदेवीनां तत्र भद्रासनानि हि । सासनाः परिषण्मुख्याः पूर्वदक्षिणतस्तथा ॥३४०॥
मध्यमा दक्षिणस्यां स्याद् बाह्याश्चापरदक्षिणा । त्रायस्त्रिंशाश्च तत्र स्युः पश्चात्सैन्यमहत्तराः ॥३४१॥
चतसृष्वात्मरक्षाणां दिक्षु भद्रासनान्यपि । आसेऽव्यतेऽत्र तैरिन्द्रः पूर्वाभिमुखमास्थितः ॥३४२॥

यम दक्षिण दिशाका राजा तथा अरिष्ट विमानका स्वामी है। इसके वाहन तथा वस्त्राभूषण आदि काले रङ्गके हैं और इसकी आयु ढाई पल्य प्रमाण है ॥३२५॥ वरुण पश्चिम दिशाका राजा है तथा जलप्रभ विमानका स्वामी है। उसकी वेषभूषा पीले रङ्गकी है और वह तीन भाग कम तीन पल्यकी आयुवाला है ॥३२६॥ कुबेर उत्तर दिशाका राज्य तथा वल्गुप्रभ विमानका स्वामी है। इसकी वेषभूषा शुक्ल रङ्गकी है तथा आयु तीन पल्य प्रमाण है ॥३२७॥ मेरुकी पूर्वोत्तर दिशामें नन्दनवनके बीच काञ्चन कूटके समान एक बलभद्रक नामका कूट है और उसमें कूट नामधारी बलभद्रक देवका निवास है ॥३२८॥ वहींपर १ नन्दन, २ मन्दर, ३ निषध, ४ हिमवत्, ५ रजत, ६ रजक, ७ सागर और ८ चित्रक नामके आठ कूट और हैं। ये प्रत्येक दिशामें क्रमसे दो-दो हैं ॥३२९-३३०॥ इन कूटोंकी ऊँचाई पाँच सौ योजन है तथा मूल भागकी चौड़ाई पाँच सौ योजन, मध्यभागकी तीन सौ पचहत्तर योजन और ऊर्ध्वभागकी ढाई सौ योजन है ॥३३१॥ इन कूटोंमें क्रमसे १ मेघंकरा, २ मेघवती, ३ सुमेघा, ४ मेघमालिनी, ५ तोयधारा, ६ विचित्रा, ७ पुष्पमाला और ८ अनिन्दिता ये आठ प्रसिद्ध दिक्कुमारी देवियाँ निवास करती हैं ॥३३२-३३३॥ मेरु पर्वतकी पूर्व-दक्षिण (आग्नेय) दिशामें १ उत्पलगुल्मा, २ नलिना, ३ उत्पला और ४ उत्पलोज्ज्वला ये चार वापिकाएँ हैं। इनकी लम्बाई पचास योजन, गहराई दश योजन और चौड़ाई पच्चीस योजन है ॥ ३३४-३३५॥ इन वापिकाओंके मध्यमें इन्द्रका भवन स्थित है। इस भवनकी चौड़ाई इकतीस योजन एक कोश, ऊँचाई साढ़े बासठ योजन और गहराई अर्धयोजन प्रमाण है ॥३३६-३३७॥ उस भवनके मध्यमें इन्द्रका सिंहासन है तथा चारों दिशाओंमें चार लोकपालोंके आसन हैं ॥३३८॥ इन्द्रासनसे उत्तर-पूर्व तथा पश्चिमोत्तर दिशामें सामानिक देवोंके भद्रासन हैं ॥३३९॥ आगे आठ पट्टरानियोंके भद्रासन हैं, पूर्व-दक्षिण दिशामें सभाके मुख्य-मुख्य अधिकारी देव बैठते हैं, दक्षिणमें मध्यम अधिकारी, दक्षिण-पश्चिममें सामान्य अधिकारी एवं त्रायस्त्रिंश देव तथा उनके पीछे सैन्यके महत्तर देव आसन ग्रहण करते हैं ॥३४०-३४१॥ चार

भृङ्गाभृङ्गनिभाप्यन्या कज्जला कज्जलप्रभा । पुष्करिण्यश्च वापीनां समास्त्वपरदक्षिणाः ॥३४३॥
श्रीकान्ता प्रथमा वापी श्रीचन्द्रा चापरोत्तरा । तथा श्रीमहितैशानभोग्या श्रीनिलया ततः ॥३४४॥
तथा चोत्तरपूर्वस्यां वापी तु नलिनाभिधा । ततो नलिनगुल्मापि कुमुदा कुमुदप्रभा ॥३४५॥
प्रासादादिकमत्राऽपि पूर्ववत्सर्वमिष्यते । यथैतन्नन्दने वेद्यं तथा सौमनसे वने ॥३४६॥
दिशि चोत्तरपूर्वस्यां पाण्डुके पाण्डुका शिला । पाण्डुकम्बलया सार्द्धं रक्तया रक्तकम्बला ॥३४७॥
विदिक्षु सक्रमा हैमी राजती तापनीयिका । लोहिताक्षमयी चार्द्धचन्द्राकाराश्च ताः शिलाः ॥३४८॥
अष्टोच्छ्र्याः शतायामाः पञ्चाशद्विस्तृताश्च ताः । यत्रार्हन्तोऽभिषिच्यन्ते जम्बूद्वीपसमुद्भवाः ॥३४९॥
रक्तापाण्डुकयोर्दैर्घ्यं दक्षिणोत्तरतः स्थितम् । तत्पूर्वापरतः शेषशिलयोस्तु विशालयोः ॥३५०॥
चापं पञ्चशतोच्छ्रायं मूलव्यासोऽपि यस्य सः । प्रत्येकं तन्महारत्नं तत्र सिंहासनत्रयम् ॥३५१॥
ऐन्द्रं दक्षिणमेतेषामैशानं तूत्तरं मतम् । मध्यस्थितं तु जैनेन्द्रं प्राङ्मुखानि च तान्यपि ॥३५२॥
भारतापरवैदेहा ऐरावतविदेहजाः । जिना बाल्ये सुरस्नाप्यास्तासु तेषु यथाक्रमम्[1] ॥३५३॥

दिशाओंमें आत्मरक्ष देवोंके भद्रासन हैं। इन्द्र अपने आसनपर पूर्वाभिमुख बैठता है और आत्मरक्ष उसकी सेवा करते हैं ॥३४२॥ पश्चिम-दक्षिण (नैऋत्य) दिशामें उक्त वापिकाओंके समान १ भृंगा, २ भृंगनिभा, ३ कज्जला और ४ कज्जलप्रभा ये चार वापिकाएँ हैं ॥३४३॥ पश्चिमोत्तर (वायव्य) दिशामें १ श्रीकान्ता, २ श्रीचन्द्रा, ३ श्रीमहिता और ४ श्रीनिलया ये चार वापिकाएँ हैं।* इनमें ऐशानेन्द्र क्रीड़ा करता है ॥३४४॥ उत्तर-पूर्व (ऐशान) दिशामें १ नलिना, २ नलिनगुल्मा, ३ कुमुदा और ४ कुमुदप्रभा ये चार वापिकाएँ हैं। इनमें भवन आदिकी समस्त रचना पूर्ववत् जाननी चाहिए। जिस प्रकार नन्दन वनमें इन सबकी रचना है उसी प्रकार सौमनस वनमें भी जानना चाहिए ॥३४५-३४६॥

पाण्डुक वनकी उत्तर-पूर्वादि दिशाओंमें क्रमसे १ पाण्डुक, २ पाण्डुकम्बला, ३ रक्ता और ४ रक्तकम्बला ये चार शिलाएँ हैं। ये शिलाएँ विदिशाओंमें हैं तथा क्रमसे सुवर्णमयी, रजतमयी, संतप्त स्वर्णमयी और लोहिताक्ष मणिमयी हैं। एवं इनका अर्ध चन्द्रके समान आकार है ॥३४७-३४८॥ ये शिलाएँ आठ योजन ऊँची, सौ योजन लम्बी और पचास योजन चौड़ी हैं तथा इनपर जम्बू द्वीपमें उत्पन्न हुए तीर्थंकरोंका अभिषेक होता है ॥३४९॥ इनमें रक्ता और पाण्डुक शिलाकी लम्बाई दक्षिणोत्तर दिशामें है तथा रक्ता और रक्तकम्बलाकी लम्बाई पूर्व-पश्चिम दिशामें है ॥३५०॥ उन शिलाओंपर रत्नमयी तीन-तीन सिंहासन हैं जो पाँच सौ धनुष ऊँचे तथा उतने ही चौड़े हैं ॥३५१॥ तीन सिंहासनोंमें दक्षिण सिंहासन सौधर्मेन्द्रका, उत्तर सिंहासन ऐशानेन्द्रका तथा मध्य स्थित सिंहासन जिनेन्द्र देवका है। इन सब सिंहासनोंका मुख पूर्व दिशाकी ओर होता है। भावार्थ—मध्यके सिंहासनपर श्री जिनेन्द्र देव विराजमान होते हैं और दक्षिण तथा उत्तरके सिंहासनोंपर क्रमसे सौधर्मेन्द्र और ऐशानेन्द्र खड़े होकर उनका अभिषेक करते हैं ॥३५२॥ उन पाण्डुक आदि शिलाओंके सिंहासनोंपर क्रमसे

१. ईसाण दिसाभागे भरह जिणिंदाण दिव्वदेहाणं ।
पंडुक सिलातले तह जम्मण महिमा समुद्दिट्ठा ॥१४८॥
अवर विदेहाण तहा वरपंडुयकंबलम्मि धूमदिसे ।
वरत्तकंबलम्मि दु णेरदि एरावदाणं तु ॥१४९॥
वाऊदिसे रत्तसिला पुव्वविदेहाण जिणवरिंदाणं ।
जम्मण महिमा मेरुप्पदाहिणेणं तु गंतूणं ॥१५०॥ ज० प्र० ४ उद्देश ।

* नैऋत्य और आग्नेय दिशाकी आठ वापिकाओंमें सौधर्म तथा वायव्य और ऐशान दिशाकी वापिकाओंमें ऐशानेन्द्रके भवन हैं।

पाण्डुके सन्ति चत्वारो महादिक्षु जिनालयाः । सर्वरत्नमया[1] दिव्या नित्या ह्यकृतकत्वतः ॥३५४॥
पञ्चविंशतिरायामः सार्द्धाः द्वादश विस्तृतिः । अर्द्धक्रोशोऽवगाहः स्यादुच्छ्रायोऽष्टादश त्रिपाद् ॥३५५॥
द्वारस्य चोच्छ्रयस्तेषां चतुर्योजनसम्मितः । द्वे तु विस्तृतिरस्यार्द्धमणुद्वारद्वयस्य हि ॥३५६॥
वने सौमनसे तेषां तदेव द्विगुणं भवेत् । कुलवक्षारशैलेषु मानं सौमनसोदितम् ॥३५७॥
नन्दने भद्रशाले च जिनायतनगोचरम् । प्रत्येकं द्विगुणं मानं तद् यत्सौमनसे वने ॥३५८॥
विजयार्द्धेषु सर्वेषु सिद्धायतनगोचरम् । मानं तदेव बोद्धव्यं विजयार्द्धे भरते तु यत् ॥३५९॥
अष्टायामो द्विविस्तारः सर्वेषु [2]चतुरुच्छ्रितः । [3]देवच्छन्दोऽवगाढश्च गव्यूतिस्तेषु वेश्मसु ॥३६०॥
शुम्भद्रत्नमहास्तम्भशातकुम्भात्मभित्तिभिः । चन्द्रादित्योत्पतत्पक्षिमृगयुग्माद्यलङ्कृतः ॥३६१॥
रत्नकाञ्चननिर्माणाः पञ्चचापशतोच्छ्रिताः । अष्टोत्तरशतं तत्र जिनानां प्रतिमा मताः ॥३६२॥
नागयक्षयुगे तासां प्रत्येकं सप्रकीर्णके[4] । सनत्कुमारसर्वाह्ल[5] निर्वृत्तिश्रुतमूर्तिभिः ॥३६३॥

भरत, पश्चिम विदेह, ऐरावत और पूर्व विदेह क्षेत्रमें उत्पन्न हुए तीर्थंकर बाल्यकालमें देवोंके द्वारा अभिषेकको प्राप्त होते हैं। भावार्थ—भरत क्षेत्रके तीर्थंकरोंका पाण्डुक शिलापर, पश्चिम विदेह क्षेत्रके तीर्थंकरोंका रक्तापर और पूर्व विदेहके तीर्थंकरोंका रक्तकम्बला शिलापर जन्माभिषेक होता है ॥३५३॥

पाण्डुक वनकी चारों महा दिशाओंमें चार जिनालय हैं जो सर्वरत्नमय हैं, दिव्य हैं तथा अकृत्रिम होनेसे नित्य हैं ॥३५४॥ इनकी पचीस योजन लम्बाई, साढ़े बारह योजन चौड़ाई, आधा कोश गहराई और पौने उन्नीस योजन ऊँचाई है ॥३५५॥ प्रत्येक मन्दिरमें एक बड़ा तथा आजू-बाजूमें दो लघु द्वार हैं। इनमें बड़े द्वारकी ऊँचाई चार योजन और चौड़ाई दो योजन है। तथा लघु द्वारोंकी ऊँचाई और चौड़ाई इससे आधी है ॥३५६॥ पाण्डुक वनके समान सौमनस वनकी चारों दिशाओंमें भी चार जिनालय हैं और उनके द्वारोंकी लम्बाई-चौड़ाई आदि पाण्डुक वनके चैत्यालयोंसे दूनी है। कुलाचल तथा वक्षार गिरियोंपर जो जिनालय हैं उनकी लम्बाई-चौड़ाई आदि भी सौमनस वनके चैत्यालयोंके समान कही गई है ॥३५७॥ इसी प्रकार नन्दन वन और भद्रशाल वनमें भी चार-चार जिनालय हैं उनकी ऊँचाई तथा चौड़ाई आदिका प्रमाण सौमनस वनके जिनालयोंसे दूना है ॥३५८॥ समस्त विजयार्ध पर्वतोंपर जो सिद्धायतन-जिनमन्दिर हैं उनका प्रमाण वही जानना चाहिए जो कि भरत क्षेत्र सम्बन्धी विजयार्धके जिन-मन्दिरोंका है ॥३५९॥ उन समस्त जिनालयोंमें आठ योजन लम्बा, दो योजन चौड़ा, चार योजन ऊँचा और एक कोश गहरा देवच्छन्द नामका एक गर्भगृह है ॥३६०॥ वह गर्भगृह, देदीप्यमान रत्नोंसे बने हुए विशाल स्तम्भों, सुवर्णमयी दीवालों तथा उनमें खिंचे हुए चन्द्र, सूर्य, उड़ते हुए पक्षी एवं हरिण-हरिणियोंके जोड़ोंसे अलंकृत है ॥३६१॥ उस गर्भगृहमें सुवर्ण तथा रत्नोंसे निर्मित पाँच सौ धनुष ऊँची एक सौ आठ जिन-प्रतिमाएँ विद्यमान हैं ॥३६२॥ उन प्रतिमाओंके समीप

---

१. सर्वरत्नमहादिव्या म० । २. तनुरुच्छ्रितः म० । ३. त्रिलोकप्रज्ञप्तौ देवच्छन्दस्य प्रमाणं भिन्नप्रकारं वर्तते—वसहीए गब्भगिहे देवच्छन्दो दुजोयणच्छेहो। इगिजोयणवित्थारो चउजोयण दीह संजुत्तो ॥१८५५॥

सोलस कोसुच्छेहं समचउरस्सं तदद्धवित्थारं ।
लोयविणिच्छायकत्ता देवच्छन्दं परूवेई ॥१८६६॥ (पाठान्तरम्)

४. सचामरे । ५. सदृशे म० । सर्वाणि ग०, ङ०, ख० सर्वाण क० ।

सिरि सुददेवीण तहा सव्वाह्ल सणक्कुमार जक्खाणं ।
रूवाणिं पत्तेकं पडि वररयणाइ रइदाणिं ॥१८८१॥ —त्रै० प्र०

सिरिदेवी सुददेवी सव्वाण सणक्कुमार जक्खाणं ।
रूवाणि य जिणपासे मंगलमट्ठविहमवि होदि ॥९८८॥ —त्रिलोकसार

भृङ्गारकलशादर्शपात्रीशङ्खाः समुद्गकाः। पालिकाधूपनीदीपकूर्चाः पाटलिकादयः ॥३६४॥
अष्टोत्तरशतं ते पि कंसतालनकादयः। परिवारोऽत्र विज्ञेयः प्रतिमानां यथायथम् ॥३६५॥
गवाक्षगेहजालानि मुक्ताजालानि भान्ति वै। मणिविद्रुमरूपाब्जकिंकिणीजालकानि च ॥३६६॥
षट् च चत्वारि च द्वे च मूले मध्ये च मस्तके। विस्तृतश्चतुरुच्छ्रायः सौवर्णः क्रोशगाहकः ॥३६७॥
अष्टोच्छ्रायश्चतुर्व्यासश्चतुस्तोरणदिङ्मुखः। प्राकारः प्रतिवेश्म स्यात् पञ्चाशत्तुङ्गगोपुरः ॥३६८॥
सिंहहंसगजाम्भोजदुकूलवृषभध्वजैः। मयूरगरुडाकीर्णश्चक्रमालामहाध्वजैः ॥३६९॥
दशार्द्धवर्णभासद्भिर्दशभेदैर्दिशो दश। साशीतिकसहस्रान्तैर्भान्ति पल्लविता इव ॥३७०॥
उदग्रो मण्डपोऽप्यग्रे ततः प्रेक्षागृहं बृहत्। स्तूपाश्चैत्यद्रुमाश्चान्ये पर्यङ्कप्रतिमोज्ज्वलाः ॥३७१॥
मत्स्यकूर्मविमुक्तश्च प्रसन्नसलिलः शुभः। दिशि नन्दो ह्रदः प्राच्यां सिद्धायतनतो भवेत् ॥३७२॥
[1]वज्रमूलः सवैडूर्यचूलिको मणिभिश्चितः। विचित्राश्चर्यसङ्कीर्णः स्वर्णमध्यः सुरालयः ॥३७३॥
मेरुश्चैव सुमेरुश्च महामेरुः सुदर्शनः। मन्दरः शैलराजश्च वसन्तः प्रियदर्शनः ॥३७४॥
रत्नोच्चयो दिशामादिर्लोकनाभिर्मनोरमः। लोकमध्यो दिशामन्त्यो दिशामुत्तर एव च ॥३७५॥
सूर्याचरणविख्यातिः सूर्यावर्तः स्वयम्प्रभः। इत्थं सुरगिरिश्चेति लब्धवर्णैः स वर्णितः ॥३७६॥
इति व्यावर्णितं द्वीपं परिक्षिपति सर्वतः। पर्यन्तावयवत्वेन सास्यैव जगती स्थिता ॥३७७॥

चमर लिये हुए नागकुमार और यक्षोंके युगल खड़े हुए हैं तथा समस्त प्रतिमाएँ सनत्कुमार और सर्वाह्ण यक्ष तथा निर्वृत्ति और श्रुत देवी की मूर्तियोंसे युक्त हैं ॥३६३॥ झारी कलश दर्पण, पात्री, शङ्ख, सुप्रतिष्ठक, ध्वजा, धूपनी, दीप, कूर्च, पाटलिका आदि तथा झाँझ मंजीरा आदि एक सौ आठ एक सौ आठ उपकरण उन प्रतिमाओंके परिवार स्वरूप जानना चाहिए अर्थात् ये सब उनके समीप यथायोग्य विद्यमान रहते हैं ॥३६४-३६५॥ उन जिनालयोंमें झरोखे, गृह-जाली, मोतियोंकी झालर, रतन तथा मूँगा रूप कमल और छोटी-छोटी घण्टियोंके समूह सुशोभित रहते हैं ॥३६६॥ प्रत्येक जिनमन्दिरमें एक-एक प्राकार—कोट है जो मूलमें छह योजन, मध्यमें चार योजन और मस्तकपर दो योजन चौड़ा है। चार योजन ऊँचा है, एक कोश गहरा है तथा सुवर्ण निर्मित है ॥३६७॥ इसकी चारों दिशाओंमें आठ योजन ऊँचे, तथा चार योजन चौड़े चार तोरण द्वार हैं और पचास योजन ऊँचा इसका गोपुर है ॥३६८॥ सिंह, हंस, गज, कमल, वस्त्र, वृषभ, मयूर, गरुड़, चक्र और मालाके चिह्नोंसे सुशोभित दश प्रकारकी पञ्चवर्णी महाध्वजाओंसे उन चैत्यालयोंकी दशों दिशाएँ ऐसी जान पड़ती हैं मानो लहलहाते हुए नूतन पत्तोंसे ही युक्त हों। वे ध्वजाएँ एक-एक जातिकी एक सौ आठ एक सौ आठ तथा दशों दिशाओं-की मिलाकर एक हजार अस्सी होती हैं ॥३६९-३७०॥ चैत्यालयोंके आगे विशाल सभामण्डप, उसके आगे लम्बा-चौड़ा प्रेक्षा-गृह, उसके आगे स्तूप और स्तूपोंके आगे पद्मासनसे विराजमान प्रतिमाओंसे सुशोभित चैत्यवृक्ष हैं ॥३७१॥ जिनालयोंसे पूर्व दिशामें मच्छ तथा कछुआ आदि जल-जन्तुओंसे रहित, एवं स्वच्छ जलसे भरा हुआ नन्द नामका सरोवर है ॥३७२॥ वज्रमूल, सवैडूर्यचूलिक, मणिचित, विचित्राश्चर्यकीर्ण, स्वर्णमध्य, सुरालय, मेरु, सुमेरु, महामेरु, सुदर्शन, मन्दर, शैलराज, वसन्त, प्रियदर्शन, रत्नोच्चय, दिशामादि, लोकनाभि, मनोरम, लोकमध्य, दिशामन्त्य, दिशामुत्तर, सूर्याचरण, सूर्यावर्त, स्वयंप्रभ और सुरगिरि⋯इस प्रकार विद्वानोंने अनेक नामोंके द्वारा सुमेरु पर्वतका वर्णन किया है ॥३७३-३७६॥

इस प्रकारसे वर्णित जम्बू द्वीपको चारों ओरसे जगती घेरे हुए है। यह जगती इसी

---

१. मेरुपर्वतस्य पर्यायनामानि।

मूले द्वादश मध्येऽष्टौ चत्वार्यग्रे च विस्तृता । अष्टोच्छ्रयाऽवगाढा तु योजनार्द्धमधो भुवः ॥३७८॥
सर्वरत्नात्ममध्या सा वैडूर्यमयमस्तका । मूले वज्रमयी भासा भासयन्ती दिशः स्थिता ॥३७९॥
पञ्च चापशतव्यासमूलाग्रे चापि वेदिका । गव्यूतिद्वितयोच्छ्राया जगत्या मध्यमाश्रिता ॥३८०॥
वेदिकाभ्यन्तरे कान्तं देवारण्यं वनं बहिः । सत्सौवर्णशिलापट्टं वापी प्रासादशोभितम् ॥३८१॥
धनुःशतं शतं सार्द्धं विस्तृताश्च शतद्वयम् । न्यूनमध्योत्तमा वाप्यो गाधाः स्वं स्वं दशांशकम् ॥३८२॥
पञ्चाशच्चापविस्ताराः शतचापसमायताः । पञ्चसप्ततिमुच्चैस्तु प्रासादास्तत्र चाल्पकाः ॥३८३॥
षट् चापविस्तृतान्येषां द्वादशोच्छ्रायवन्ति च । चत्वारि चापगाढानि द्वाराणि लघुवेश्मनाम् ॥३८४॥
द्विगुणास्त्रिगुणाश्च स्युर्व्यासायामोच्छ्रयैरतः । मध्यमाश्चोत्तमास्तेषां द्विर्द्विर्द्वारावगाहनम् ॥३८५॥
मालावलीकदल्याद्याः प्रेक्षासनसभागृहाः । वीणागर्भलताचित्रप्रसाधनमहागृहाः ॥३८६॥
मोहनास्थानसंज्ञाश्च रम्या रत्नमया गृहाः । सर्वतस्तत्र शोभन्ते व्यन्तरामरसेविताः ॥३८७॥
[1]हंसक्रौञ्चासनैर्मुण्डैर्मृगेन्द्रमकरासनैः । स्फाटिकैरुन्नतैर्नम्रैः प्रबालगरुडासनैः ॥३८८॥
दीर्घस्वस्तिकवृत्तैस्तैर्विपुलेन्द्रासनैरपि । गन्धासनैश्च रत्नाढ्यैर्युक्ताः सुरमनोरमैः ॥३८९॥
विजयं [2]वैजयन्तं च जयन्तमपराजितम् । द्वाराण्यस्यां जगत्यां स्युः प्राच्यादौ दिक्चतुष्टये ॥३९०॥
अष्टोच्छ्रायं चतुर्व्यासं नानारत्नांशुरञ्जितम् । द्वारमेकैकमत्र स्याद् भास्वद्वज्रकवाटकम् ॥३९१॥
दश सप्तशती चान्या सहस्राणि च सप्ततिः । त्रयः क्रोशाश्चतुर्विंशाश्चतुर्दशशती युगैः ॥३९२॥

जम्बू द्वीपका अन्तिम अवयव—भाग है ॥३७७॥ वह मूलमें बारह योजन, मध्यमें आठ योजन, और अग्रभागमें चार योजन चौड़ी है, आठ योजन ऊँची है तथा पृथिवीके नीचे आधा योजन गहरी है ॥३७८॥ उसका मूल भाग वज्रमय है, मध्य भाग सब प्रकारके रत्नोंसे निर्मित है और मस्तक—अग्रभाग वैडूर्य मणियोंका बना है। वह जगती अपनी कान्तिसे दशों दिशाओंको देदीप्यमान करती हुई स्थित है ॥३७९॥ जगतीके मध्यमें एक वेदिका है जो मूल और अग्र भागमें पाँच सौ धनुष चौड़ी है तथा दो कोश ऊँची है ॥३८०॥ वेदिकाके आभ्यन्तर तथा बाह्य—दोनों भागोंमें सुवर्णमय उत्तम शिलापट्टोंसे युक्त, एवं वापिकाओं और भवनोंसे सुशोभित देवारण्य नामका सुन्दर वन है ॥३८१॥ इनमें निम्न श्रेणीकी वापियाँ सौ धनुष, मध्यम श्रेणीकी डेढ़ सौ धनुष और उत्तम श्रेणीकी दो सौ धनुष चौड़ी हैं। इन सबकी गहराई अपनी-अपनी चौड़ाईके दशवें भाग हैं ॥३८२॥ देवारण्य वनमें जो लघु प्रासाद हैं वे पचास धनुष चौड़े, सौ धनुष लम्बे और पचहत्तर धनुष ऊँचे हैं ॥३८३॥ इन प्रासादोंके द्वार छह धनुष चौड़े, बारह धनुष ऊँचे और चार धनुष गहरे हैं ॥३८४॥ मध्यम और उत्तम प्रासादों तथा उनके द्वारोंकी लम्बाई-चौड़ाई एवं ऊँचाई लघु प्रासादोंसे क्रमशः दूनी और तिगुनी है। किन्तु द्वारोंकी गहराई दूनी-दूनी है ॥३८५॥ उस वनमें मालाओंकी पङ्क्ति कदली आदि वृक्ष, प्रेक्षागृह, सभागृह, वीणागृह, गर्भगृह, लतागृह, चित्रगृह, प्रसाधनगृह तथा मोहना स्थान नामके अनेक रत्नमयी सुन्दर-सुन्दर गृह सब ओर सुशोभित हैं। ये सब स्थान व्यन्तर देवोंके द्वारा सेवित हैं ॥३८६-३८७॥ ये भवन देवोंके मनको हर्षित करनेवाले रत्न खचित हंसासन, क्रौञ्चासन, मुण्डासन, मृगेन्द्रासन, मकरासन, प्रबालासन, गरुडासन, विशाल इन्द्रासन और गन्धासन आदि अनेक आसनोंसे युक्त हैं। ये आसन स्फटिक मणिके बने हैं, इनमें कितने ही आसन ऊँचे हैं, कितने ही नीचे हैं, कितने ही लम्बे हैं, कितने ही स्वस्तिकके समान हैं और कितने ही गोल हैं ॥३८८-३८९॥ जगतीकी पूर्व आदि दिशाओंमें क्रमसे विजय, वैजयन्त, जयन्त और अपराजित नामके चार द्वार हैं ॥३९०॥ इनमें प्रत्येक द्वार आठ योजन ऊँचा, चार योजन चौड़ा, नाना रत्नोंकी किरणोंसे अनुरञ्जित और वज्रमयी देदीप्यमान किवाड़ोंसे युक्त है ॥३९१॥ जगतीके अभ्यन्तर भागमें

---

१. आसनानां नामानि । २. विजयन्तं म० ।

हस्तास्त्रयोऽङ्गुलानि स्यादेकविंशतिरेकशः । तेषां दिशान्तरज्यासौ द्वाराणां तु प्रमाणतः ॥३९३॥
अस्या ज्यायाः सहस्राणि सप्ततिर्नव चोदितम् । सह षड्भिश्च पञ्चाशद् गव्यूतित्रितयं तथा ॥३९४॥
धनुःसहस्रमेकं च पुनः पञ्चशतानि तु । द्वात्रिंशच्च धनुःपृष्ठमङ्गुलानां च सप्तकम् ॥३९५॥
चतुर्योजनहीनं तु तदेव परिनिश्चितम् । द्वाराणामन्तरं तेषामन्तरज्ञैः परस्परम् ॥३९६॥
संख्येयद्वीपपर्यन्तो जम्बूद्वीपसमोऽपरः । विजयस्य पुरं तत्र पूर्वस्यां दिशि शोभते ॥३९७॥
तद् द्वादशसहस्राणि विस्तृतं वेदिकायुतम् । चतुस्तोरणसंयुक्तं रुचिरं सर्वतोऽद्भुतम् ॥३९८॥
साष्टभागं त्रिकं चाग्रे मूले तत्तु चतुर्गुणम् । तत्प्राकारस्य विस्तारस्तस्य गाहोऽर्द्धयोजनम् ॥३९९॥
प्राकारस्योच्छ्रयस्तस्य सप्तत्रिंशत्तथार्द्धकम् । गोपुराणि चतुर्दिक्षु प्रत्येकं पञ्चविंशतिः ॥४००॥
एकत्रिंशत्सगव्यूतिविस्तारो गोपुरस्य च । उच्छ्रायो द्विगुणस्तस्माद् गाहः स्यादर्धयोजनम् ॥४०१॥
भूमिभिः सप्तदशभिः प्रासादा गोपुरेषु तु । सर्वरत्नसमाकीर्णा जाम्बूनदमयाश्च ते ॥४०२॥
गोपुराणां तु मध्ये स्यादौपपादि[1]कलेणकम् । गव्यूतिबहलं व्यासः शतानि द्वादशास्य च ॥४०३॥
पञ्चचापशतव्यासा गव्यूतिद्वयमुच्छ्रिता । चतुस्तोरणसंयुक्ता वेदिका तस्य सर्वतः ॥४०४॥
गोपुरेण समो मानैः प्रासादः पुरमध्यगः । अष्टोच्छ्रायश्चतुर्व्यासो द्वारो [2]विजयसेवितः ॥४०५॥
सवज्रद्वारवंशश्च हेमरत्नकपाटकः । चतुर्दिक्षु पुनस्तस्य प्रासादास्तत्समानकाः ॥४०६॥
तेषामन्ये महादिक्षु चत्वारस्तत्समानकाः । द्वितीयमण्डले ज्ञेयाः प्रासादा रत्नभास्वराः ॥४०७॥

उन द्वारोंकी अन्तरज्याका प्रमाण सत्तर हजार सात सौ दश योजन, तीन कोश, चौदह सौ चौबीस धनुष, तीन हाथ और इक्कीस अंगुल है ॥३९२–३९३॥ इस ज्याके धनुष पृष्ठका परिमाण, उन्यासी हजार छप्पन योजन, तीन कोश, एक हजार पाँच सौ बत्तीस धनुष तथा सात अंगुल है ॥३९४–३९५॥ अन्तरके जाननेवाले आचार्योंने उन द्वारोंका पारस्परिक अन्तर धनुःपृष्ठके प्रमाणसे चार योजन कम निश्चित किया है ॥३९६॥

संख्यात द्वीपोंके अनन्तर जम्बू द्वीपके समान एक दूसरा जम्बू द्वीप है उसकी पूर्व दिशामें विजय द्वारके रक्षक विजय देवका नगर सुशोभित है ॥३९७॥ वेदिकासे युक्त वह नगर बारह योजन चौड़ा है, चारों दिशाओंके चार तोरणोंसे विभूषित, सब ओरसे सुन्दर और आश्चर्य उत्पन्न करने वाला है ॥३९८॥ उस नगरके चारों ओर एक प्राकार है, उसका विस्तार अग्र भागमें एक धनुषके आठ भागोंमें तीन भाग तथा मूलमें उससे चौगुना है। इस प्राकारकी गहराई आधा योजन है ॥३९९॥ ऊँचाई साढ़े सैंतीस योजन है और इसकी प्रत्येक दिशामें पचीस-पचीस गोपुर हैं ॥४००॥ प्रत्येक गोपुरकी ऊँचाई इकतीस योजन एक कोश है, चौड़ाई उससे दूनी है और गहराई आधा योजन प्रमाण है ॥४०१॥ उन गोपुरोंपर सत्रह-सत्रह खण्डके भवन बने हुए हैं। ये भवन सब प्रकारके रत्नोंसे व्याप्त तथा स्वर्णमय हैं ॥४०२॥ गोपुरोंके मध्यमें देवोंके उत्पन्न होनेका स्थान है जो एक कोश मोटा और बारह योजन चौड़ा है ॥४०३॥ उस उत्पत्ति स्थानके चारों ओर एक वेदिका है जो पाँच सौ धनुष चौड़ी, दो कोश ऊँची और चार तोरणोंसे युक्त है ॥४०४॥

उस नगरके मध्यमें एक विशाल भवन है जो प्रमाणमें गोपुरके समान है। और उसका दरवाजा आठ योजन ऊँचा, चार योजन चौड़ा तथा विजय नामक देवके द्वारा सेवित है ॥४०५॥ उस भवनके द्वारका तोरण हीरेका बना है तथा स्वर्ण और रत्नमय उसके किवाड़ हैं। उसकी चारों दिशाओंमें उसीके समान विस्तारवाले और भी अनेक भवन बने हुए हैं ॥४०६॥ दूसरे मण्डलमें उन भवनोंकी चारों दिशाओंमें उन्हींके समान विस्तारवाले, रत्नोंके देदीप्यमान भवन बने हुए हैं ॥४०७॥ तीसरे मण्डलमें भी इसी प्रकार भवनोंकी रचना है परन्तु उनका

१. देवीनामुत्पादस्थानम् । २. तत्स्वामी देवः ।

पूर्वमानार्द्धमानाश्च तृतीये मण्डले स्थिताः । तत्समानाश्चतुर्थे तु प्रत्येकं दिक्चतुष्टये ॥४०८॥
चतुर्थेभ्योऽर्द्धहीनाश्च पञ्चमे मण्डले स्थिताः । षष्ठे तु तत्समानैस्ते प्रत्येकं दिक्चतुष्टये ॥४०९॥
लेणवेदिकया तुल्या वेदिका मण्डलद्वये । अर्धार्धमाना सा वेद्या मण्डलस्य द्वये द्वये ॥४१०॥
प्रासादे विजयस्यात्र सिंहासनमनुत्तरम् । सचामरसितच्छत्रं तत्र पूर्वमुखोऽमरः ॥४११॥
उत्तरस्यां सहस्राणि षट् सामानिकसंज्ञिनः । [1]विदिशोश्च पुरः षट् स्युरग्रदेव्यश्च [2]सासनाः ॥४१२॥
आसन्नष्टौ सहस्राणि परिषत्पूर्वदक्षिणाः । मध्यमा दश[3] बोधव्या दक्षिणस्यां दिशि स्थिताः ॥४१३॥
द्वादशैव सहस्राणि बाह्या साऽपरदक्षिणाः । आसनेष्वपरस्यां च सप्तसैन्यमहत्तराः ॥४१४॥
अष्टादश सहस्राणि चतुर्दिक्ष्वात्मरक्षकाः । भद्रासनानि तेषां च दिक्षु तावन्ति तासु च ॥४१५॥
अष्टादश सहस्राणि देव्यश्च परिवारिकाः । विजयः सेव्यमानस्तैः[4] पल्यं जीवति[5] साधिकम् ॥४१६॥
विजयादुत्तराशायां सुधर्माख्या तु तत्सभा । दीर्घा षट् विस्तृता त्रीणि नवोच्चैः क्रोशगाहिनी ॥४१७॥
ततोऽप्युत्तरदिग्भागे तावन्मानो जिनालयः । अपरोत्तरतश्चास्मादुपपार्श्वा सभा भवेत् ॥४१८॥
अभिषेकसभा तत्प्रागलङ्कारसभाप्यतः । व्यवसायसभा तस्मात् संसमानाः सुधर्मया ॥४१९॥
पञ्चैव च सहस्राणि चत्वारोऽपि शतानि च । सप्तषष्टिश्च ते सर्वे प्रासादा विजयास्पदे ॥४२०॥
बहिर्विजयपुर्यास्तु पञ्चविंशतियोजनीम् । गत्वा वनानि चत्वारि स्युः प्राच्या दिक्चतुष्टये ॥४२१॥

प्रमाण पूर्व प्रमाणसे आधा है। चौथे मण्डलकी चारों दिशाओंमें जो भवन-रचना है वह तीसरे मण्डलकी भवन-रचनाके समान है ॥४०८॥ पाँचवें मण्डलमें जो भवन हैं वे चौथे मण्डलके भवनोंसे अर्ध प्रमाण हैं और छठवें मण्डलके भवन पाँचवें मण्डलके भवनोंके समान हैं ॥४०९॥ आदिके दो मण्डलोंमें उत्पत्ति स्थानकी वेदिकाके तुल्य वेदिका है और उसके आगे दो-दो मण्डलोंकी वेदिकाएँ पूर्व-पूर्व वेदिकाके प्रमाणसे आधी-आधी विस्तारवाली जानना चाहिए ॥४१०॥

बीचके भवनमें चमर और सफेद छत्रोंसे युक्त विजयदेवका उत्तम सिंहासन है। उसपर वह विजयदेव पूर्वाभिमुख होकर बैठता है ॥४११॥ उसकी उत्तर दिशामें छह हजार सामानिक देव बैठते हैं। तथा आगे और दो दिशाओंमें छह पट्टदेवियाँ आसन ग्रहण करती हैं ॥४१२॥ पूर्व-दक्षिण—आग्नेय दिशामें आठ हजार उत्तम पारिषद देव बैठते हैं। मध्यम परिषद्के दश हजार देव दक्षिण दिशामें स्थित होते हैं। बाह्य परिषद्के बारह हजार देव, पश्चिम दक्षिण—नैऋत्य दिशामें आसनारूढ़ होते हैं और सात सेनाओंके महत्तर देव पश्चिम दिशामें आसन ग्रहण करते है ॥४१३-४१४॥ चारों दिशाओंमें अठारह हजार अङ्ग-रक्षक रहते हैं और चारों दिशाओंमें उतने ही उनके भद्रासन हैं ॥४१५॥ विजयदेवकी अठारह हजार परिवार देवियाँ हैं। इन सबके द्वारा सेवित होता हुआ वह कुछ अधिक एक पल्य तक जीवित रहता है ॥४१६॥ विजयदेवके भवनसे उत्तर दिशामें एक सुधर्मा नामकी सभा है जो छह योजन लम्बी, तीन योजन चौड़ी, नौ योजन ऊँची और एक कोश गहरी है ॥४१७॥ सुधर्मा सभासे उत्तर दिशामें एक जिनालय है जिसकी लम्बाई-चौड़ाई आदिका विस्तार सुधर्मा सभाके समान है। पश्चिमोत्तर दिशामें उपपार्श्व सभा है ॥४१८॥ उसके आगे अभिषेक सभा, उसके आगे अलंकार सभा, और उसके आगे व्यवसाय सभा है। ये सब सभाएँ सुधर्मा सभाके समान हैं ॥४१९॥ विजयदेवके नगरमें सब मिलाकर पाँच हजार चार सौ सड़सठ भवन हैं ॥४२०॥

विजयदेवके नगरसे बाहर पच्चीस योजन चलकर पूर्वादि दिशाओंमें चार वन हैं ॥४२१॥

---

१. विदिशोऽस्य म० । २. आसनैः सह विद्यमाना सासनाः म० । विदिशि षट् महादेवीनामासनानि । ३. दशसहस्राणि । ४. सेव्यमानैस्तैः म० । ५. जीवन्ति म० ।

अशोकवनमादौ च सप्तपर्णवनं ततः । स्याच्चम्पकवनं नाम्ना तथा चूतवनं ततः ॥४२२॥
योजनानां सहस्राणि द्वादशायाम इष्यते । शतानि पञ्चविस्तारास्तेषां मध्ये तु पादपाः ॥४२३॥
अशोकः सप्तपर्णश्च चम्पकश्चूतपादपः । जम्बूपीठार्द्धमानाश्च पीठा जम्ब्वर्द्धमानकाः[1] ॥४२४॥
चतस्रः प्रतिमास्तेषु चतुर्दिक्षु यथायथम् । अशोकादिसुरैरर्च्या जिनानां रत्नमूर्तयः ॥४२५॥
वनस्योत्तरपूर्वस्यामशोकपुरमत्र च । मानेन विजयस्येव प्रासादोऽशोकनायकः ॥४२६॥
सप्तपर्णपुरं पूर्वदक्षिणस्यां वनस्य तु । सप्तपर्णपुरस्यात्र प्रासादः पूर्वमानकः ॥४२७॥
दक्षिणापरदिग्भागे चम्पकस्य पुरं वनात् । अपरोत्तरदिग्भागे पुरं च[2] तामरस्य च ॥४२८॥
वैजयन्तादयो देवा विजयस्य समाश्रयः । दक्षिणादिपुराधीशाः स्वालयायुःपरिच्छदैः ॥४२९॥
योजनानां तु लक्षे द्वे विस्तीर्णो लवणार्णवः । परिक्षिप्य स्थितो द्वीपं परिखेव सवेदिकः ॥४३०॥
लक्षाः पञ्चदशाशीत्या सहस्रं च शतं तथा । त्रिंशन्नव च देशोना परिधिर्लवणाम्बुधेः ॥४३१॥
अष्टादश सहस्राणि कोट्या नवशतान्यपि । त्रिसप्ततिश्च निश्चेया लक्षाः षट्षष्टिरेव च ॥४३२॥
सहस्राणि च पञ्चाशन्नव तानि च षट्शती । गणितस्य पदं वेद्यं प्रकीर्णं[3] लवणार्णवे ॥४३३॥
दशैवोपरि मूले च सहस्राणि दश स्मृतः । सहस्रमवगाढोऽधो ध्रुवाण्येकादशोच्छ्रितः ॥४३४॥
तटान्तात्पञ्चनवतिं देशान् गत्वाऽवगाहते । देशमेकमधश्चैवमङ्गुलादि सयोजनम् ॥४३५॥
स गत्वा पञ्चनवतिं देशान् देशांश्च षोडश । उच्छ्रितोऽङ्गुलहस्तादीन् योजनानि च सागरः ॥४३६॥

उनमें पहला अशोकवन, दूसरा सप्तपर्णवन, तीसरा चम्पकवन और चौथा आम्रवन है ॥४२२॥ ये वन बारह योजन लम्बे और पाँच सौ योजन चौड़े हैं। इन वनोंके मध्यमें क्रमसे अशोक, सप्तपर्ण, चम्पक, और आमके प्रधान वृक्ष हैं। इन वृक्षोंकी पीठिका जम्बू वृक्षकी पीठिकासे आधी है तथा इनका निजका विस्तार जम्बू वृक्षसे आधा है ॥४२३-४२४॥ उन चारों वनोंकी चारों दिशाओंमें यथायोग्य अशोकादि देवोंके द्वारा पूजित जिनेन्द्र देवकी रत्नमयी चार प्रतिमाएँ हैं ॥४२५॥ अशोक वनकी उत्तर-पूर्व दिशामें अशोकपुर नामका नगर है इसमें अशोक नामक देवका भवन है जिसका विस्तार विजयदेवके भवनके समान है ॥४२६॥ सप्तपर्ण वनकी पूर्व-दक्षिण दिशामें सप्तपर्णपुर है उसमें पूर्व प्रमाणको धारण करनेवाला सप्तपर्ण देवका भवन है ॥४२७॥ चम्पक वनकी दक्षिण-पश्चिम दिशामें चम्पक देवका चम्पकपुर और आम्रवनकी पश्चिमोत्तर दिशामें आम्रदेवका आम्र नगर है ॥४२८॥ वैजयन्त आदि तीन देव दक्षिणादि दिशाओंमें बने हुए नगरोंके स्वामी हैं तथा अपने भवन आयु और परिवार आदिकी अपेक्षा विजयदेवके समान हैं ॥४२९॥ इस प्रकार जम्बू द्वीपका वर्णन किया। अब लवणसमुद्रका वर्णन करते हैं—

वेदिकासे सहित लवण समुद्र, दो लाख योजन विस्तारवाला है और वह परिखाके समान जम्बू द्वीपको घेरकर स्थित है ॥४३०॥ इसकी परिधि पन्द्रह लाख इक्यासी हजार एक सौ उनतालीस योजनमें कुछ कम है ॥४३१॥ तथा इसके गणितका प्रकीर्णक पद (क्षेत्रफल) अठारह हजार नौ सौ तिहत्तर करोड़, छयासठ लाख, उनसठ हजार छह सौ योजन है ॥४३२-४३३॥ इसकी ऊपर नीचे चौड़ाई दश हजार योजन, गहराई एक हजार योजन और अवस्थित रूपसे ऊँचाई ग्यारह योजन प्रमाण है ॥४३४॥ वह लवणसमुद्र, तटान्तसे पंचानबे हाथ जानेपर एक हाथ, पंचानबे अंगुल जानेपर एक अंगुल और पंचानबे योजन जानेपर एक योजन गहरा है ॥४३५॥ और पंचानबे अङ्गुल, पंचानबे हाथ या पंचानबे योजन जानेपर यह समुद्र सोलह अङ्गुल, सोलह हाथ या सोलह योजन ऊँचा है अर्थात् तटान्तसे पंचानबे अङ्गुल जानेपर

१. जम्बूर्द्ध- म० । २. भूतामरस्य च म० । ३. १८९७३६६५९६०० ।

शुक्ले पञ्चसहस्राणि यावत्तावत् प्रवर्धते। पक्षे प्रहीयते कृष्णे यावदेकादशैव सः ॥४३७॥
त्रिशती च त्रयस्त्रिंशद् योजनानि दिने दिने। त्रिभागं वर्धते वार्धिः शुक्ले कृष्णे च हीयते ॥४३८॥
मक्षिकापक्षसूक्ष्मान्तो वेदिकान्ते पयोनिधि। स चोर्ध्वं मानतोयस्तु योजनार्द्धं प्रवर्द्धते ॥४३९॥
षट्षष्टि द्वे शते दण्डा द्वौ हस्तौ षोडशाङ्गुली। शुक्ले कृष्णे च ते स्यातां वृद्धिहानी दिने दिने ॥४४०॥
अधः संक्षेपणी द्रोणी विस्तीर्णोर्ध्वं क्षितौ दिवि। अन्यथा नौपुटाम्भोधिः समो वा यवराशिना ॥४४१॥
जगत्याः पञ्चनवतिं सहस्राणि प्रविश्य तु। मध्ये स्युर्दिक्षु चत्वारि पातालविवराण्यधः ॥४४२॥
प्राच्यां पातालमाशायां प्रतीच्यां बडवामुखम्। कदम्बुकमपाच्यां स्यादुदीच्यां यूपकेसरम् ॥४४३॥
तन्मूलमुखविस्तारः सहस्राणि दश स्मृतः। गाहस्वमध्यविस्तारावेका लक्षेति लक्षितौ ॥४४४॥
अलञ्जलसमानानि पातालानि समन्ततः। बाहुल्यं वज्रकुड्यानां तेषां पञ्च शतानि तु ॥४४५॥
त्रयस्त्रिंशत्सहस्राणि त्रयस्त्रिंशच्छतत्रयम्। एकैकोऽत्र विभागः स्याद् योजनानां तु भागवान् ॥४४६॥
ऊर्ध्वभागे जलं तेषां तृतीये केवलं सदा। मूले च बलवान् वायुर्मध्यभागे क्रमेण तौ ॥४४७॥
वायोरुच्छ्वासनिश्वासौ पातालेषु स्वभावजौ। तद्वशादुदकस्योर्ध्वमधश्च परिवर्त्तनम् ॥४४८॥
भागः पञ्चदशः शुक्ले वायुभिः पूर्यते शनैः। पातालानां जलैः कृष्णे स्थितिः[1] स्यात्पञ्चसन्धिषु ॥४४९॥

सोलह अङ्गुल ऊँचा है, पंचानबे हाथ जानेपर सोलह हाथ ऊँचा है और पंचानबे योजन जानेपर सोलह योजन ऊँचा है ॥४३६॥ शुक्ल पक्षमें समुद्रका जल पाँच हजार योजन तक ऊँचा बढ़ जाता है और कृष्ण पक्षमें स्वाभाविक ऊँचाई जो ग्यारह हजार योजन है वहाँ तक घट जाता है ॥४३७॥ शुक्ल पक्षमें समुद्र प्रतिदिन तीन सौ तैंतीस योजन और एक योजनके तीन भाग बढ़ता है तथा कृष्ण पक्षमें उतना ही घटता है ॥४३८॥ वेदिकाके अन्तमें समुद्र मक्षिकाके पङ्खके समान अत्यन्त सूक्ष्म है परन्तु जब उसकी जलमें वृद्धि होती है तब आधा योजन तक बढ़ जाता है ॥४३९॥ शुक्लपक्षमें वेदिकाके अन्तमें प्रतिदिन समुद्रकी वृद्धि दो सौ छयासठ धनुष, दो हाथ और सोलह अङ्गुल होती है और कृष्णपक्षमें प्रतिदिन उतनी ही हानि होती है ॥४४०॥ संकुचित होता हुआ समुद्र नीचे भागमें नावके समान रह जाता है और ऊपर पृथिवीपर विस्तीर्ण हो जाता है तथा आकाशमें इसके विपरीत जुड़ी हुई दो नौकाओंके पुटके समान अथवा जौकी राशिके समान नीचे चौड़ा और ऊपर संकीर्ण हो जाता है ॥४४१॥

वेदीसे पंचानबे हजार योजन भीतर प्रवेश करनेपर चारों दिशाओंमें नीचे चार पाताल-विवर हैं ॥४४२॥ उनमें पूर्व दिशामें पाताल, दक्षिणमें बडवामुख, पश्चिममें कदम्बुक और उत्तरमें यूपकेसर नामका पाताल है ॥४४३॥ इन चारों पातालोंके मूल और अग्रभागका विस्तार दश हजार योजन है तथा गहराई और अपने मध्य भागका विस्तार एक-एक लाख योजन प्रमाण माना गया है ॥४४४॥ ये पाताल-विवर गोलीके समान हैं अर्थात् इनका तल और ऊपरका विस्तार अल्प है तथा मध्यका अधिक है। इनकी वज्रमयी दीवालोंकी मोटाई सब ओरसे पाँच-पाँच सौ योजन है ॥४४५॥ इन विवरोंके तीन-तीन भाग हैं उनमें-से एक भाग ततीस हजार तीन सौ तैंतीस योजन और एक कला प्रमाण है ॥४४६॥ इनके तीसरे ऊर्ध्व भागमें केवल जल रहता है, नीचेके भागमें बलवान् वायु रहती है और बीचके भागमें क्रमसे जल तथा वायु दोनों रहते हैं ॥४४७॥ पातालोंमें जो वायु है उसका उच्छ्वास—ऊँचा उठना और निःश्वास—नीचे आना स्वाभाविक है उसीके कारण उनमें जलका ऊँचा-नीचा परिवर्तन होता रहता है अर्थात् जब वायु ऊपर उठती है तब जल ऊपर उठ जाता है और जब वायु नीचे बैठती है तब जल नीचे बैठ जाता है ॥४४८॥ पातालोंका पन्द्रहवाँ भाग शुक्लपक्षमें धीरे-धीरे वायुसे भरता रहता है और कृष्णपक्षमें जलसे। अमावस्या और पूर्णिमाके दिन उनकी

---

१. स्थितिं स्यात्पञ्चसन्धिषु म०।

लक्षद्वयं सहस्राणि सप्तविंशतिरन्तरम् । शतं सप्ततिरेषां[1] स्यात् पादोनं योजनं पृथक् ॥४५०॥
विदिक्षु क्षुद्रपातालचतुष्कं मुखमूलयोः । सहस्रं विस्तृतं दैर्घ्यमध्यविस्तारतो दश ॥४५१॥
चतुर्णामपि तेषां स्यात्पञ्चाशत्कुड्यविस्तृतिः । एकैकस्य त्रिभागेषु प्रागिवाम्भःप्रभञ्जनौ ॥४५२॥
त्रियोजनसहस्राणि त्रयस्त्रिंशं शतत्रयम् । सत्रिभागं त्रिभागानां प्रत्येकं योजनस्थितिः ॥४५३॥
एकलक्षा सहस्राणि त्रयोदश निजान्तरम् । पञ्चाशीति त्रयोऽष्टांशाः कुण्डानां दिग्विदिक्स्थितम् ॥४५४॥
मुक्तावलीवदेतेषामन्तरालेषु चाष्टसु । समुद्रे क्षुद्रपातालसहस्रमवतिष्ठते ॥४५५॥
सहस्रमवगाहश्च मध्यविष्कम्भ एव च । योजनानां शतं तेषां विस्तारो मुखमूलयोः ॥४५६॥
पञ्चविंशशतं तानि प्रत्येकं चान्तरेऽन्तरे । द्विहीनाष्टशती क्रोशः सविशेषस्तदन्तरम्[2] ॥४५७॥
यथायोगपरावृत्तसलिलाप्लवविप्लवाः । पातालौघाः समस्तास्ते क्षुद्राश्च परिकीर्तिताः ॥४५८॥
तटाद्गत्वा सहस्राणि द्वाचत्वारिंशतं समौ । चतुर्दिक्षु सहस्रोच्चैः द्वौ द्वौ स्यातां तु पर्वतौ ॥४५९॥
कौस्तुभः कौस्तुभासश्च पातालस्योभयान्तयोः । राजतावर्द्धकुम्भाभौ तत्सुरौ विजयश्रियौ ॥४६०॥
उदकश्चोदवासश्च कदम्बुकसमीपगौ । शिवश्च शिवदेवश्च तयोर्देवौ यथाक्रमम् ॥४६१॥
नगौ शङ्खमहाशङ्खौ वडवामुखपार्श्वगौ । शङ्खाभावुदकश्च स्यादुदवासश्च तत्सुरौ ॥४६२॥
उदकोऽप्युदवासोऽपि यूपकेसरपार्श्वगौ । रोहितो लोहिताङ्कश्च तत्सुरौ परिकीर्तितौ ॥४६३॥

स्वाभाविक स्थिति हो जाती है ॥४४६॥ इन पाताल-विवरोंका पृथक्-पृथक् अन्तर दो लाख सत्ताईस हजार एक सौ पौने इकहत्तर योजन है ॥४५०॥

चारों विदिशाओंमें चार क्षुद्र पाताल-विवर हैं इनका ऊपर और नीचे एक-एक हजार तथा मध्यमें दश हजार योजन विस्तार है एवं उनकी ऊँचाई भी दश हजार योजन है ॥४५१॥ इन चारोंकी दीवालोंकी चौड़ाई पचास योजन है तथा प्रत्येकके तीन-तीन भाग हैं और उनमें पूर्वकी भाँति जल तथा वायुका सद्भाव है ॥४५२॥ तीनों भागोंमें प्रत्येक भाग तीन हजार तीन सौ तीस योजन तथा एक योजनके तीन भागोंमें एक भाग प्रमाण है ॥४५३॥ दिशाओं और विदिशाओंके पाताल-विवरोंका परस्पर अन्तर एक लाख तेरह हजार पचासी योजन है ॥४५४॥ लवण समुद्रमें इन आठ पाताल-विवरोंके आठ अन्तरालोंमें एक हजार क्षुद्र पाताल और भी हैं जो मोतियोंकी मालाके समान सुन्दर जान पड़ते हैं ॥४५५॥ इन क्षुद्र पाताल-विवरोंकी गहराई एक हजार योजन है और विस्तार मध्यमें एक हजार योजन तथा ऊपर-नीचे सौ-सौ योजन है ॥४५६॥ ये क्षुद्र पाताल-विवर एक-एक अन्तरालके बीचमें एक सौ पच्चीस एक सौ पच्चीस हैं तथा इनका पारस्परिक अन्तर सात सौ अंठानवे योजन एवं कुछ अधिक एक कोश है ॥४५७॥ जिनमें यथायोग्य पानीका प्रवेश तथा निर्गम होता रहता है, ऐसे ये समस्त पाताल-विवरोंके समूह क्षुद्र पाताल कहे गये हैं ॥४५८॥

तटसे बयालीस हजार योजन चलकर चारों दिशाओंमें एक-एक हजार योजन ऊँचे दो-दो पर्वत हैं ॥४५९॥ पूर्व दिशाके पाताल-विवरकी दोनों ओर कौस्तुभ और कौस्तुभास नामके अर्धकुम्भाकार चाँदीके दो पर्वत हैं इनके अधिष्ठाता (उदंग और उदवास) देव विजयदेवके समान वैभवको धारण करनेवाले हैं ॥४६०॥ दक्षिण दिशाके कदम्बुक पातालविवरके समीप उदक और उदवास नामके दो पर्वत हैं । क्रमसे शिव तथा शिवदेव उनके अधिष्ठाता देव हैं ॥४६१॥ पश्चिम दिशाके बडवामुख पातालविवरके समीप शङ्ख और महाशङ्ख नामके दो पर्वत हैं तथा शङ्खके समान आभावाले शिव और शिवदेव नामक देव अधिष्ठाता हैं ॥४६२॥ उत्तर दिशाके भूपकेसर पाताल-विवरके समीप उदक और उदवास ये दो पर्वत हैं तथा रोहित और

---

१. -रेव ख० । २. तदनन्तरं म० ।

तस्यैवोपरि पूर्वस्यां कूटानामष्टकं दिशि । पूर्वोक्तकूटतुल्यं तु दिक्कुमारीभिराश्रितम् ॥७०४॥
वैडूर्ये विजया देवी वैजयन्ती च काञ्चने । जयन्ती कनके कूटे प्राच्यरिष्टेऽपराजिता ॥७०५॥
नन्दा नन्दोत्तरा चोभे ते दिक्स्वस्तिकनन्दने । आनन्दाप्यञ्जने नान्दीवर्धनाञ्जनमूलके ॥७०६॥
एतास्तीर्थकरोत्पत्तौ दिक्कुमार्यः सपर्यया । मातुरन्तेऽवतिष्ठन्ते भास्वद्भृङ्गारपाणयः ॥७०७॥
अमोघे स्वस्थिता[3]ऽपाच्यां सुप्रबुद्धे सुपूर्विका । प्रणिधिः सुप्रबुद्धाऽपि मन्दरे परिकीर्तिता ॥७०८॥
दिक्कुमारी तथा ज्ञेया विमलेऽपि यशोधरा । लक्ष्मीमतीति रुचके कीर्त्तिमत्यपि कीर्तिता ॥७०९॥
दिक्कुमारी प्रसिद्धाऽसौ रुचकोत्तरवासिनी । चन्द्रे वसुन्धरा चित्रा सुप्रतिष्ठे प्रतिष्ठिता ॥७१०॥
अष्टौ तीर्थंकरोत्पत्तावेतास्तुष्टाः समागताः । मणिदर्पणधारिण्यस्तन्मातरमुपासते ॥७११॥
अपरस्यामिलादेवी लोहिताख्ये सुरा पुनः । जगत्कुसुमकूटे स्यात् पृथिवी नलिने[4] तथा ॥७१२॥
पद्मे पद्मावती ज्ञेया कुमुदे काञ्चनापि च । कूटे सौमनसाभिख्ये देवी नवमिका श्रुतिः ॥७१३॥
शीतापि च यशःकूटे भद्रकूटे च भद्रिका । इमा शुभ्रातपत्राणि धारयन्त्यश्चकासते ॥७१४॥

पर्वत है ॥६९९॥ इसकी गहराई एक हजार योजन, ऊँचाई चौरासी हजार योजन और चौड़ाई बयालीस हजार योजन है ॥७००॥ उस पर्वतके शिखरपर चारों दिशाओंमें एक हजार योजन चौड़े और पाँच सौ योजन ऊँचे चार कूट सुशोभित हैं ॥७०१॥ उनमें पूर्व दिशाके नन्द्यावर्त कूटपर पद्मोत्तर देव रहता है, दक्षिण दिशाके स्वस्तिक कूटपर स्वहस्ती देव रहता है। पश्चिम दिशाके श्रीवृक्ष कूटपर नीलक देव रहता है और उत्तर दिशाके वर्धमानक कूटपर अञ्जनागिरि देव रहता है। ये चारों देव दिग्गजेन्द्रके नामसे प्रसिद्ध हैं तथा एक पल्यकी आयुवाले हैं ॥७०२-७०३॥ इसी पर्वतकी पूर्व दिशामें पहले कहे हुए अन्य कूटोंके समान आठ कूट हैं और वे दिक्कुमारी देवियोंके द्वारा सेवित हैं ॥७०४॥ उनमें पहले वैडूर्य कूटपर विजया, दूसरे काञ्चन कूटपर वैजयन्ती, तीसरे कनक कूटपर जयन्ती, चौथे अरिष्ट कूटपर अपराजिता, पाँचवें दिक्-नन्दन कूटपर नन्दा, छठवें स्वस्तिकनन्दन कूटपर नन्दोत्तरा, सातवें अंजनकूटपर आनन्दा और आठवें अञ्जनमूलक कूटपर नान्दीवर्धना देवी निवास करती हैं ॥७०५-७०६॥ ये दिक्कुमारियाँ तीर्थंकरके जन्मकालमें पूजाके निमित्त हाथमें देदीप्यमान झारियाँ लिये हुए तीर्थंकरकी माताके समीप रहती हैं ॥७०७॥ दक्षिण दिशामें भी आठ कूट हैं और उनमें पहले अमोघ कूटपर स्वस्थिता, दूसरे सुप्रबुद्ध कूटपर सुप्रणिधि, तीसरे मन्दर कूटपर सुप्रबुद्धा, चौथे विमल कूटपर यशोधरा, पाँचवें रुचक कूटपर लक्ष्मीमती, छठवें रुचकोत्तर कूटपर कीर्तिमती, सातवें चन्द्र कूटपर वसुन्धरा और आठवें सुप्रतिष्ठ कूटपर चित्रादेवी निवास करती हैं ॥७०८-७१०॥ ये देवियाँ तीर्थंकरकी उत्पत्तिके समय संतुष्ट होकर आती हैं और मणिमय दर्पण धारण कर तीर्थंकर-की माताकी सेवा करती हैं ॥७११॥ पश्चिम दिशामें भी आठ कूट हैं उनमें पहले लोहिताख्य कूटपर इलादेवी, दूसरे जगत्कुसुम कूटपर सुरा देवी, तीसरे नलिन कूटपर पृथिवी देवी, चौथे पद्मकूटपर पद्मावती देवी, पाँचवें कुमुद कूटपर काञ्चना देवी, छठवें सौमनस कूटपर नवमिका देवी, सातवें यशःकूटपर शीता देवी और आठवें भद्र कूटपर भद्रिका देवीका निवास है। ये देवियाँ तीर्थंकरकी उत्पत्तिके समय शुक्ल छत्र धारण करती हुई सुशोभित होती हैं ॥७१२-७१४॥

---

१. नन्द्यावर्त्तामरः म० । २. हस्तिकेऽ -म० । ३. सुस्थिता म० । ४. नलिनी म० ।

स्फटिके लम्बुसा त्वङ्के मिश्रकेशी व्यवस्थिता । तथैवाञ्जनके ज्ञेया कुमारी पुण्डरीकिणी ॥७१५॥
वारुणी काञ्चनाख्ये स्यादाशाख्या रजते तथा । कुण्डले ह्रीरिति ज्ञाता रुचके श्रीरितीरिता ॥७१६॥
धृतिः सुदर्शने देवी दिक्कुमार्य इमाः पुनः । गृहीतचमरा जैनीं मातरं पर्युपासते ॥७१७॥
दिक्षु चत्वारि कूटानि पुनरन्यानि दीप्तिभिः । दीपिताशान्तराणि स्युः पूर्वादिषु यथाक्रमम् ॥७१८॥
पूर्वस्यां विमले चित्रा दक्षिणस्यां तथा दिशि । देवी कनकचित्राख्या नित्यालोकेऽवतिष्ठते ॥७१९॥
त्रिशिरा इति देवी स्यादपरस्यां स्वयम्प्रभे । सूत्रामणिरुदीच्यां च नित्योद्योते वसत्यसौ ॥७२०॥
विद्युत्कुमार्य एतास्तु जिनमातृसमीपगाः । तिष्ठन्त्युद्योतकारिण्यो भानुदीधितयो तथा ॥७२१॥
पूर्वोत्तरस्यां वैडूर्ये रुचका विदिशीरिता । तथा दक्षिणपूर्वस्यां रुचके रुचकोज्ज्वला ॥७२२॥
दक्षिणापरदिश्यन्ते रुचकाभा मणिप्रभे । रुचकोत्तमकेऽन्यस्यां दिशि स्याद् रुचकप्रभा ॥७२३॥
एतास्तु दिक्कुमारीणां स्युर्महत्तरिका वराः । विदिक्षु पुनरन्यानि चतुःकूटान्यमूनि च ॥७२४॥
पूर्वोत्तरे तु विजया रत्ने रत्नप्रभे पुनः । दिशि दक्षिणपूर्वस्यां वैजयन्ती प्रभाषिता ॥७२५॥
जयन्ती सर्वरत्ने तु दक्षिणापरदिग्गते । रत्नोच्चयेऽपि शेषायां दिशि स्यादपराजिता ॥७२६॥
एता विद्युत्कुमारीणां स्युर्महत्तरिका इमाः । तीर्थकृज्जातकर्माणि कुर्वन्त्यष्टाविहागताः ॥७२७॥
चतुर्दिक्षु नगस्योर्द्ध्वं चत्वार्यायतनानि च । अञ्जनालयतुल्यानि प्राङ्मुखानि जिनेशिनाम् ॥७२८॥
सविदिक्दिक्कुमारीणां वासकूटैर्जिनालयैः । नित्यालङ्कृतमूर्धासौ राजते रुचकालयः ॥७२९॥

इसी प्रकार उत्तर दिशामें भी आठ कूट हैं और उनमें पहले स्फटिक कूटपर लम्बुसा, दूसरे अङ्क कूटपर मिश्रकेशी, तीसरे अञ्जनक कूटपर पुण्डरीकिणी, चौथे काञ्चन कूटपर वारुणी, पाँचवें रजत कूटपर आशा, छठवें कुण्डल कूटपर ह्री, सातवें रुचक कूटपर श्री और आठवें सुदर्शन कूटपर धृति नामकी देवी रहती है। देवियाँ हाथमें चमर लेकर जिनमाताकी सेवा करती हैं ॥७१५-७१७॥ इनके सिवाय पूर्वादि दिशाओंमें दीप्तिसे दिशाओंके अन्तरालको देदीप्यमान करनेवाले चार कूट और हैं जो यथाक्रमसे इस प्रकार हैं—पूर्व दिशामें विमल नामका कूट है और उसपर चित्रा देवी रहती है। दक्षिण दिशामें नित्यालोक नामका कूट है और उसपर कनकचित्रा देवीका निवास है। पश्चिम दिशामें स्वयंप्रभ नामका कूट है और उसपर त्रिशिरस् देवी निवास करती है तथा उत्तर दिशामें नित्योद्योत नामका कूट है और उसपर सूत्रामणि देवी रहती है। ये विद्युत्कुमारी देवियाँ सूर्यकी किरणोंके समान प्रकाश करती हुई जिनमाताके समीप स्थिर रहती हैं ॥७१८-७२१॥ पूर्वोत्तर—ऐशान विदिशामें वैडूर्य नामका कूट है उसपर रुचका देवी रहती है, दक्षिणपूर्वा—आग्नेय विदिशामें रुचक नामका कूट है उसपर रुचकोज्ज्वला देवी रहती है, दक्षिण-पश्चिम—नैऋत्य विदिशामें मणिप्रभ कूट है उसपर रुचकाभा देवी निवास करती है और पश्चिमोत्तर—वायव्य दिशामें रुचकोत्तम कूट है उसपर रुचकप्रभा देवीका निवास है ॥७२२-७२३॥ ये चारों दिक्कुमारी देवियोंकी उत्कृष्ट महत्तरिका (प्रधान) देवियाँ हैं। इनके सिवाय विदिशाओंमें निम्नलिखित चार कूट और हैं ॥७२४॥ उनमें ऐशान दिशामें रत्न कूटपर विजया देवीका निवास है, आग्नेय दिशामें रत्नप्रभ कूटपर वैजयन्ती देवी निवास करती है; नैऋत्य दिशामें सर्वरत्न कूटपर जयन्ती देवी रहती है और वायव्य दिशामें रत्नोच्चय कूटपर अपराजिता देवी निवास करती है। ये चार देवियाँ विद्युत्कुमारी देवियोंकी महत्तरिका हैं। ऊपर कही हुई चार विद्युत्कुमारियाँ तथा चार ये इस प्रकार आठों देवियाँ यहाँ आकर तीर्थंकरका जातकर्म करती हैं ॥७२५-७२७॥ रुचकगिरिके ऊपर चारों दिशाओंमें, चार जिन-मन्दिर हैं। ये अंजनगिरियोंके समान विस्तारवाले हैं तथा पूर्वकी ओर इनका मुख है ॥७२८॥ दिशाओं एवं विदिशाओंमें रहनेवाली देवियोंके निवास-कूटों तथा जिनमन्दिरोंसे जिसका मस्तक सदा अलंकृत रहता है ऐसा यह रुचकगिरि अतिशय सुशोभित है ॥७२९॥

स्वयम्भूरमणद्वीपमध्यदेशस्थितो गिरिः । स्वयम्प्रभ इति ख्यातो भ्राजते वलयाकृतः ॥७३०॥
मानुषोत्तरशैलस्य मध्ये तस्य च भूभृतः । भोगभूमिप्रतीभागास्तिरश्चां द्वीपवासिनाम् ॥७३१॥
परस्तात्तु गिरेस्तस्य तिर्यञ्चः कर्मभूमिवत् । असङ्ख्येया यतस्तत्र संयतासंयताश्च ते ॥७३२॥
उक्तद्वीपसमुद्रेषु पर्वतेष्वपि हारिषु । वसन्ति व्यन्तरा देवाः किन्नराद्या यथायथम् ॥७३३॥
प्रज्ञप्तिः श्रेणिक ज्ञाता द्वीपसागरगोचरा । प्रज्ञप्तिं शृणु संक्षेपाज्ज्योतिर्लोकोर्ध्वलोकयोः ॥७३४॥

शार्दूलविक्रीडितम्

जम्बूद्वीपतदम्बुधिप्रभृतिसद्द्वीपावलीसागर-
प्रज्ञप्तिस्फुटसङ्ग्रहं मुनिमतं भव्यस्य संशृण्वतः ।
संशीतिः प्रलयं प्रयाति सकला भूलोकसम्बन्धिनी
किं ध्वान्तस्य कृतोदये मुनिरवौ सन्तिष्ठते संहतिः ॥७३५॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ द्वीपसागरवर्णनो नाम पञ्चमः सर्गः समाप्तः ।

स्वयंभूरमण द्वीपके मध्यमें स्थित, चूड़ीके आकारवाला एक स्वयंप्रभ नामका पर्वत सुशोभित है ॥७३०॥ मानुषोत्तर और स्वयंप्रभ पर्वतके बीच असंख्यात द्वीपोंमें जो तिर्यञ्च रहते हैं उनकी जघन्य भोगभूमि तिर्यञ्चोंकी सदृशता है ॥७३१॥ स्वयंप्रभ पर्वतके आगे जो तिर्यञ्च हैं वे कर्मभूमिज तिर्यञ्चोंके समान हैं क्योंकि उनमें असंख्यात तिर्यञ्च संयतासंयत—देशव्रती भी होते हैं ॥७३२॥ ऊपर कहे हुए द्वीप समुद्रोंमें तथा मनोहारी पर्वतोंपर किन्नर आदि व्यन्तर देव यथायोग्य निवास करते हैं ॥७३३॥ गौतम स्वामी कहते हैं कि हे श्रेणिक ! इस प्रकार तूने द्वीप-सागर सम्बन्धी प्रज्ञप्ति जानी अब इसके आगे संक्षेपमें ज्योतिर्लोक तथा ऊर्ध्वलोक सम्बन्धी प्रज्ञप्तिका श्रवण कर ॥७३४॥ जम्बू द्वीप तथा लवणसमुद्रको आदि लेकर उत्तमोत्तम द्वीप तथा सागर सम्बन्धी प्रज्ञप्तिके इस मुनि सम्मत स्पष्ट संग्रहको जो भव्य सुनता है उसका पृथिवी लोक सम्बन्धी समस्त संशय नष्ट हो जाता है सो ठीक ही है क्योंकि मुनि रूपी सूर्यके उदित होनेपर क्या अन्धकारका समूह कहीं ठहर सकता है ? अर्थात् नहीं ॥७३५॥

इस प्रकार जिसमें अरिष्टनेमि पुराणका संग्रह किया गया है ऐसे जिनसेनाचार्यरचित हरिवंश पुराणमें द्वीप सागरोंका वर्णन करनेवाला पञ्चम सर्ग समाप्त हुआ ।

षष्ठः सर्गः

शतानि सप्त गत्वोर्ध्वं योजनानि भुवस्तलात् । नवतिं च स्थितास्ताराः सर्वाधस्तान्नभस्तले ॥१॥
शतानि नव गत्वोर्ध्वं योजनानि धरातलात् । स्थितं व्योमतले ज्योतिः सर्वेषामुपरि स्थितम् ॥२॥
ज्योतिःपटलमेतद्धि बहलं दशभिः सह । योजनानि शतं प्राप्तं सर्वतश्च घनोदधिम् ॥३॥
तारकापटलाद् गत्वा योजनानि दशोपरि । सूर्याणां पटलं तस्मादशीतिं शीतरोचिषाम् ॥४॥
चत्वारि च ततो गत्वा नक्षत्रपटलं स्थितम् । चत्वार्येव ततो गत्वा पटलं बुधगोचरम् ॥५॥
त्रीणि त्रीणि तु शुक्राणां गुर्वङ्गारकसंज्ञिनाम् । ग्रहाणां तद्यथासङ्ख्यं स्यात् शनैश्चरसज्ञिनाम्[1] ॥६॥
सूर्याश्चन्द्राश्च तत्रस्था नक्षत्रग्रहतारकाः । ज्योतिष्काः पञ्चधा देवाः स्वस्थानसमनामकाः ॥७॥
पल्यं जीवन्ति चन्द्राख्यास्तेऽधिकं वर्षलक्षया । सूर्या वर्षसहस्रेण शुक्रदेवाः शतेन तत् ॥८॥
पल्यमूनं तु जीवन्ति गुरवोऽर्द्धं ग्रहाः परे । पल्यं पादं तु ताराख्याः पादार्धं ते जघन्यतः ॥९॥
एकषष्टिकृता भागा बुद्ध्या ये योजनस्य ते । षट्पञ्चाशत्तु विष्कम्भश्चन्द्रमण्डलगोचरः[2] ॥१०॥
ते चत्वारिंशदष्टाभिः सूर्यमण्डलविस्तृतिः[3] । क्रोशः शुक्रस्य विस्तारो देशोनः स बृहस्पतेः ॥११॥
अर्द्धगव्यूतिविस्तारः सर्वतः परिभाषितः । ग्रहाणां परिशेषाणां सर्वेषामपि मण्डलम् ॥१२॥
[4]तारामण्डलमत्यल्पं पादं क्रोशस्य विस्तृतम् । मध्यमं साधिकं पादं क्रोशार्द्धं तु बृहत्तरम् ॥१३॥

पृथिवीतलसे सात सौ नब्बे योजन ऊपर चलकर आकाशमें सबसे नीचे तारा स्थित हैं ॥१॥ और पृथिवी तलसे नौ सौ योजन ऊपर चलकर आकाशमें सबसे ऊपर ज्योतिष्पटल स्थित है। भावार्थ—आकाशमें ज्योतिष्पटल सात सौ नब्बे योजनकी ऊँचाईमें शुरू होकर नौ सौ योजन तक है ॥२॥ यह ज्योतिष्पटल एक सौ दश योजन मोटा है तथा आकाशमें घनोदधि-वातवलय पर्यन्त सब ओर फैला है ॥३॥ ताराओंके पटलसे दश योजन ऊपर जाकर सूर्योंका पटल है और उससे अस्सी योजन ऊपर जाकर चन्द्रमाओंका पटल है ॥४॥ उससे चार योजन ऊपर जाकर नक्षत्रोंका पटल है और उससे चार योजन ऊपर चलकर बुधका पटल है ॥५॥ उससे तीन-तीन योजन ऊपर चलकर क्रमसे शुक्र, गुरु, मङ्गल और शनैश्चर ग्रहोंके पटल हैं ॥६॥ सूर्य, चन्द्रमा, नक्षत्र, ग्रह और तारा ये पाँच प्रकारके ज्योतिर्विमान हैं। इनमें रहनेवाले देव भी इन्हींके समान नामवाले हैं तथा इन्हींके समान पाँच प्रकारके हैं ॥७॥ इनमें चन्द्र एक लाख वर्ष अधिक एक पल्य तक, सूर्य एक हजार वर्ष अधिक एक पल्य तक, शुक्र सौ वर्ष अधिक एक पल्य तक, बृहस्पति पौन पल्य तक, मङ्गल, बुध और शनैश्चर आधा पल्य तक और तारा चौथाई पल्य तक जीवित रहते हैं। यह सबकी उत्कृष्ट आयु है। जघन्य आयु पल्यके आठवें भाग प्रमाण है ॥८-९॥ बुद्धि द्वारा योजनके जो इकसठ भाग किये जाते हैं उनमें छप्पन भाग प्रमाण चन्द्र मण्डलका विस्तार है ॥१०॥ और अड़तालीस भाग प्रमाण सूर्यका विस्तार है। शुक्रका विस्तार एक कोश, बृहस्पतिका कुछ कम एक कोश, और शेष समस्त ग्रहोंका विस्तार आधा कोश प्रमाण है। जघन्य तारा मण्डल पाव कोश, मध्यम तारा मण्डल कुछ अधिक पाव कोश और उत्कृष्ट तारामण्डल

१. णउदुत्तर सत्तसए दस सीदी चदुदुगे तियचउक्के ।
तारिण ससि रिक्ख बुहा सुक्क गुरुंगार मन्दगदी ॥३३२॥ —त्रिलोकसारस्य

२. ५६ ÷ ६१ योजनप्रमाणं चन्द्रविमानम् । ३. ४८ ÷ ६१ योजनप्रमाणं सूर्यविमानम् ।

४. तारंतरं जहण्णं णायव्वा सत्त भाग गाउदियं ।
पण्णासा मज्झिमया उक्कस्सं जोयणसहस्सा ॥१०॥ —त्रै. प्र. सौ.

क्रोशस्य सप्तमो भागस्ताराणामल्पमन्तरम् । पञ्चाशन्मध्यमं दूरं सहस्रं योजनानि तत् ॥१४॥
भान्ति सूर्यविमानानि लोहिताक्षमयानि तु । अर्द्धगोलकवृत्तानि प्रतप्ततपनीयवत् ॥१५॥
[1]तथार्कमणिमूर्त्तीनि मृणालधवलानि तु । भान्ति चन्द्रविमानानि कान्तिसन्तानवन्ति वै ॥१६॥
अरिष्टमणिमूर्त्तीनि समान्यञ्जनपुञ्जकैः । भान्ति राहुविमानानि चन्द्रार्काधःस्थितानि तु ॥१७॥
एकयोजनविष्कम्भव्यायामानि तु तान्यपि । शते स्वर्द्धतृतीये द्वे धनुषी बहलानि च ॥१८॥
त्विषा राजतमूर्तीनि जयन्ति नवमालिकाम् । तथा शुक्रविमानानि प्रकाशन्ते समन्ततः ॥१९॥
जात्यमुक्ताफलाभानि विभान्त्यर्कमणित्विषा । बृहस्पतिविमानानि बुधानां कनकानि तु ॥२०॥
शनैश्चरविमानानि तपनीयमयानि तु । अङ्गारकविमानानि लोहिताक्षमयानि हि ॥२१॥
ज्योतिर्लोकविमानानामियं वर्णविकल्पना । अरुणद्वीपवार्धेस्तु केवलं कृष्णवर्णता ॥२२॥
मानुषोत्तरतः पूर्वमुदयास्तव्यवस्थितिः । परतस्तु समस्तानां स्थितिरेव नभस्थले ॥२३॥
सूर्याचन्द्रमसस्तेषां ज्योतिषां तु यथायथम् । सङ्ख्येयानामसङ्ख्यानामिन्द्रास्तावत्प्रमाणकाः ॥२४॥
तत्रैकादशभिर्मेरुमेकविंशैः शतैश्चलाः । ज्योतिष्कास्त्वनवाप्यैव प्रभ्रमन्ति प्रदक्षिणम् ॥२५॥
द्वीपे तु द्वौ मतौ सूर्यौ द्वौ च चन्द्रमसाविह । चत्वारो लवणोदेऽमी द्वीपे द्वादश तत्परे ॥२६॥
द्वाचत्वारिंशदादित्याः कालोदे शशिनस्तथा । पुष्करार्द्धे तु विज्ञेया द्वासप्ततिरमी पुनः ॥२७॥
षट् च षष्टिसहस्राणि तथा नवशतानि च । कोटीकोटयस्तु ताः सर्वाः पञ्चसप्ततिरेव च ॥२८॥
एकैकस्यैव चन्द्रस्य परिवारस्तु तारकाः । अष्टाविंशतिनक्षत्रास्तेऽष्टाशीतिर्महाग्रहाः ॥२९॥
परस्तात्पुष्करार्द्धे तु द्वासप्ततिरिति स्थिताः । निश्चलाः सर्वदादित्यास्तावन्तः शशिनस्तथा ॥३०॥

आधा कोश विस्तृत है ॥११-१३॥ ताराओंका जघन्य अन्तर कोशका सातवाँ, मध्यम अन्तर पचास योजन और उत्कृष्ट अन्तर एक हजार योजन है ॥१४॥ सूर्यके विमान लोहिताक्षमणिके हैं, अर्ध गोलकके समान गोल तथा तपाये हुए सुवर्णके समान सुशोभित हैं ॥१५॥ चन्द्रमाके विमान स्फटिक मणिमय हैं, मृणालके समान सफेद हैं तथा कान्तिके समूहसे युक्त होनेके कारण अत्यन्त सुशोभित हैं ॥१६॥ राहुके विमान अरिष्टमणिमय हैं, अञ्जनकी राशिके समान श्याम हैं तथा चन्द्रमा और सूर्य विमानके नीचे स्थित हैं ॥१७॥ राहुके विमान एक योजन चौड़े, एक योजन लम्बे, तथा ढाई सौ धनुष मोटे हैं ॥१८॥ शुक्रके विमान रजतमय हैं, अपनी कान्तिसे नूतन मालतीकी मालाको जीतते हैं तथा सब ओरसे प्रकाशमान हैं ॥१९॥ जिनकी आभा उत्तम मुक्ताफलके समान है, ऐसे बृहस्पतिके विमान स्फटिक मणिसदृश कान्तिसे सुशोभित हैं। बुधके विमान सुवर्णमय हैं, शनैश्चरके विमान तप्त स्वर्णमय हैं, और अङ्गारक—मङ्गलके विमान लोहिताक्षमणिमय हैं ॥२०-२१॥ यह वर्णोंकी विविधरूपता ज्योतिर्लोक गत विमानोंकी है किन्तु अरुण समुद्रके ऊपर जो ज्योतिर्विमान हैं उनका केवल श्यामवर्ण ही है ॥२२॥ ज्योतिर्विमानोंके उदय और अस्तकी व्यवस्था मानुषोत्तर पर्वतके इसी ओर है उसके आगेके समस्त विमान आकाशमें स्थित ही हैं उनमें संचार नहीं होता ॥२३॥ मानुषोत्तर पर्वत तकके ज्योतिषी संख्यात हैं और उसके आगेके असंख्यात। उन दोनों प्रकारके ज्योतिषियोंके इन्द्र, सूर्य और चन्द्रमा हैं। संख्यात ज्योतिषियोंके इन्द्र संख्यात सूर्य चन्द्रमा हैं और असंख्यात ज्योतिषियोंके इन्द्र असंख्यात सूर्य चन्द्रमा हैं ॥२४॥ उनमें जो गतिशील ज्योतिषी हैं वे ग्यारह सौ इक्कीस योजन दूर हटकर मेरुकी प्रदक्षिणा देते हुए भ्रमण करते हैं ॥२५॥ जम्बू द्वीपमें दो सूर्य, दो चन्द्रमा, लवण समुद्रमें चार सूर्य, चार चन्द्रमा, धातकीखण्डमें बारह सूर्य, बारह चन्द्रमा, कालोदधिमें बयालीस सूर्य, बयालीस चन्द्रमा और पुष्करार्धमें बहत्तर सूर्य और बहत्तर चन्द्रमा हैं ॥२६-२७॥ एक-एक चन्द्रमाके छयासठ हजार नौ सौ पचहत्तर कोड़ा-कोड़ी तारा, अट्ठाईस नक्षत्र और अठासी महाग्रह हैं ॥२८-२९॥ मानुषोत्तरके आगे पुष्करार्धमें बहत्तर

१. तथाङ्क म०, क० ।

सहस्राणि तु पञ्चाशत् सर्वतो मानुषोत्तरात् । प्रगत्यादित्यचन्द्राद्याश्चक्रवालैर्व्यवस्थिताः ॥३१॥
नियुतं नियुतं गत्वा परितः परितः स्थिताः । चतुरभ्यधिकं शश्वदन्योन्योन्मिश्ररश्मयः ॥३२॥
धातक्यादिषु चन्द्रार्काः क्रमेण त्रिगुणाः पुनः । व्यतिक्रान्तैर्युतास्ते स्युर्द्वीपे च जलधौ परे ॥३३॥
ज्योतिर्लोकविभागस्य संक्षेपोऽयमुदीरितः । ऊर्ध्वलोकविभागस्य संक्षेपः प्रतिपाद्यते ॥३४॥
मेरुचूलिकया सार्द्धमूर्ध्वलोकः समीरितः । उपर्युपरि तस्याः स्युः कल्पा ग्रैवेयकादयः ॥३५॥
सौधर्मः प्रथमः कल्पः परश्चैशाननामकः । सनत्कुमारमाहेन्द्रौ ब्रह्मब्रह्मोत्तरौ ततः ॥३६॥
कल्पौ लान्तवकापिष्ठौ तथैव कथितौ ततः । पुनः शुक्रमहाशुक्रौ दक्षिणोत्तरदिग्गतौ ॥३७॥
शतारश्च सहस्रार आनतः प्राणतस्ततः । आरणश्चाच्युतश्चेति कल्पाः षोडश भाषिताः ॥३८॥
ग्रैवेयकास्त्रिधैव स्युरधोमध्योपरि स्थिताः । प्रत्येकं त्रिविधास्ते स्युरधोमध्योर्ध्वभेदतः ॥३९॥
नवानुदिशनामानि ततोऽनुत्तरपञ्चकम् । ईषत्प्राग्भारभूम्यन्त ऊर्ध्वलोकः प्रतिष्ठितः ॥४०॥

सूर्य और बहत्तर चन्द्रमा हैं, ये सदा निश्चल रहते हैं ॥३०॥ मानुषोत्तर पर्वतसे पचास हजार योजन आगे चलकर सूर्य, चन्द्रमा आदि ज्योतिषी-वलयके रूपमें स्थित हैं। भावार्थ—मानुषोत्तर-से पचास हजार योजन चलकर ज्योतिषियोंका पहला वलय है ॥३१॥ उसके आगे एक-एक लाख योजन चलकर ज्योतिषियोंके वलय हैं। प्रत्येक वलयमें चार-चार सूर्य और चार-चार चन्द्रमा अधिक हैं एवं एक दूसरेकी किरणें निरन्तर परस्परमें मिली हुई हैं ॥३२॥ धातकीखण्ड आदि द्वीप समुद्रोंमें सूर्य, चन्द्रमा क्रमसे तिगुने-तिगुने हैं। विशेषता यह है कि उनमें पिछले द्वीप समुद्रोंके सूर्य, चन्द्रमाओंकी संख्या भी मिलानी पड़ती है। जैसे, कालोदधि समुद्रके सूर्य, चन्द्रमाओंकी संख्या बयालीस है, वह इस प्रकार निकलती है—कालोदधिसे पिछला द्वीप धातकीखण्ड है इसके सूर्य, चन्द्रमाओंकी संख्या बारह है, इससे तिगुनी संख्या छत्तीस हुई, उसमें लवण समुद्र तथा जम्बूद्वीपके सूर्य चन्द्रमाओंकी छह संख्या जोड़ देनेसे कालोदधिके सूर्य चन्द्रमाओंकी संख्या बयालीस निकल आती है। पुष्करवर द्वीपके मानुषोत्तर तक बहत्तर और उसके आगे बहत्तर दोनों मिलाकर एक सौ चौवालीस सूर्य-चन्द्रमा हैं। उनके निकालनेकी विधि यह है कि पुष्कर द्वीपसे पूर्ववर्ती कालोदधिकी संख्या बयालीसको तिगुना किया तो एक सौ छब्बीस हुए, उनमें कालोदधिके बारह लवण समुद्रके चार और जम्बूद्वीपके दो इस प्रकार अठारह और मिलाये जिससे एक सौ चौवालीस सिद्ध हुए। इसी प्रकार आगे-आगेके द्वीप-समुद्रोंमें जानना चाहिए ॥३३॥ इस प्रकार यह ज्योतिर्लोकके विभागका संक्षेपसे वर्णन किया। अब ऊर्ध्वलोकके विभागका संक्षेपसे वर्णन किया जाता है ॥३४॥

मेरु पर्वतकी चूलिकाके साथ ऊर्ध्वलोक शुरू होता है अर्थात् चूलिकासे ऊपर ऊर्ध्वलोक है। चूलिकाके ऊपर-ऊपर स्वर्ग तथा ग्रैवेयक आदि हैं ॥३५॥ १ सौधर्म, २ ऐशान, ३ सनत्कुमार, ४ माहेन्द्र, ५ ब्रह्म, ६ ब्रह्मोत्तर, ७ लान्तव, ८ कापिष्ठ, ९ शुक्र, १० महाशुक्र, ११ शतार, १२ सहस्रार, १३ आनत, १४ प्राणत, १५ आरण और १६ अच्युत ये सोलह कल्प कहे गये हैं। इनकी रचना दक्षिण और उत्तरके भेदसे दो-दोके जोड़के रूपमें है ॥३६-३८॥ उनके ऊपर अधोग्रैवेयक, मध्यग्रैवेयक और उपरिम ग्रैवेयकके भेदसे तीन प्रकारके ग्रैवेयक हैं। इन तीनों ग्रैवेयकोंके भी आदि मध्य और ऊर्ध्वके भेदसे तीन-तीन भेद होते हैं। इन ग्रैवेयकोंके नौ पटल* हैं ॥३९॥ उसके

१. लक्षं लक्षम् ।

* नव-ग्रैवेयक—१ सुदर्शन, २ अमोघ, ३ सुप्रबुद्ध, ४ यशोधर, ५ सुभद्र, ६ विशाल, ७ सुमन, ८ सौमनस, ९ प्रीतिंकर ।

लक्षाः स्वर्गविमानानामशीतिश्चतुरुत्तरा । नवत्या च सहस्राणि सप्त[1] त्रिविंशदेव च ।।४१।।
त्रिषष्टिपटलानि स्युः त्रिषष्टीन्द्रकसंहतिः । पटलानां तु मध्येऽसावूर्ध्वावल्या व्यवस्थिता ।।४२।।
[2]ऋतुमादीन्द्रकं प्राहुस्त्रिषष्टिस्तस्य दिक्षु च । विमाना न्यूनता तेषामेकैकस्योत्तरेषु च ।।४३।।
तेषामृतुविमानं स्याद् विमलं चन्द्रनामकम् । वल्गुवीराभिधानं च तथैवारुणसंज्ञकम् ।।४४।।
नन्दनं नलिनं चैव काञ्चनं रोहितं ततः । चञ्चन्मारुतमृद्धीशं वैडूर्यं रुचकं तथा ।।४५।।
रुचिरं च तथार्कं च स्फटिकं तपनीयकम् । मेघं भद्रं च हारिद्रं पद्मसंज्ञं ततः परम् ।।४६।।
लोहिताक्षं च वज्रं च नन्द्यावर्तं प्रभङ्करम् । पृष्टकं च जगन्मित्रं प्रभाख्यं चाद्यकल्पयोः ।।४७।।
अञ्जनं वनमालं च नागं गरुडसंज्ञकम् । लांगलं बलभद्रं च चक्रं च परकल्पयोः ।।४८।।
अरिष्टदेवसम्मीतं ब्रह्मब्रह्मोत्तरद्वयम् । ब्रह्मलोकेऽपि चत्वारि लक्षयेदिन्द्रकाणि तु ।।४९।।
लान्तवे ब्रह्महृदयं लान्तवं च द्वयं विदुः । शुक्रमेकं महाशुक्रे सहस्रारे शतारकम् ।।५०।।
आनतं प्राणताख्यं च पुष्पकं चानते त्रयम् । अच्युते सानुकारं स्यादारणं चाच्युतं त्रयम् ।।५१।।
सुदर्शनममोघं च सुप्रबुद्धमधस्त्रयम् । यशोधरं सुभद्रं च सुविशालं च मध्यमे ।।५२।।
सुमनः सौमनस्यं च प्रीतिङ्करमितीरितम् । ऊर्ध्वग्रैवेयकेऽप्येवमिन्द्रकत्रितयं तथा ।।५३।।
मध्ये चानुदिशाख्यानामादित्यमिति चेन्द्रकम् । सर्वार्थसिद्धिसंज्ञं तु पञ्चानुत्तरमध्यमम् ।।५४।।
सौधर्मे च विमानानां लक्षा द्वात्रिंशदीरिताः । अष्टाविंशतिरैशाने तृतीये द्वादशैव ताः ।।५५।।

आगे नौ अनुदिश* और अनुदिशोंके आगे पाँच अनुत्तर† विमान हैं। अनुदिश और अनुत्तर विमानोंका एक-एक पटल है। अन्तमें ईषत्प्राग्भार भूमि है। उसीके अन्त तक ऊर्ध्वलोक कहलाता है ।।४०।। स्वर्गोंके समस्त विमान चौरासी लाख सत्तानबे हजार तेईस हैं ।।४१।। इनमें त्रेशठ पटल और त्रेसठ ही इन्द्रक विमान हैं। इन्द्रक विमानोंका समूह पटलोंके मध्यमें ऊर्ध्व रूपसे स्थित है ।।४२।। आदि इन्द्रकका नाम ऋतु है उसकी चारों दिशाओंमें त्रेशठ-त्रेशठ श्रेणीबद्ध विमान हैं और आगे प्रत्येक इन्द्रकमें एक-एक विमान कम होता जाता है ।।४३।। सौधर्म और ऐशान नामक प्रारम्भके दो स्वर्गोंमें १ ऋतु, २ विमल, ३ चन्द्र, ४ वल्गु, ५ वीर, ६ अरुण, ७ नन्दन, ८ नलिन, ९ काञ्चन, १० रोहित, ११ चञ्चल, १२ मारुत, १३ ऋद्धीश, १४ वैडूर्य, १५ रुचक, १६ रुचिर, १७ अर्क, १८ स्फटिक, १९ तपनीयक, २० मेघ, २१ भद्र, २२ हारिद्र, २३ पद्म, २४ लोहिताक्ष, २५ वज्र, २६ नन्द्यावर्त, २७ प्रभंकर, २८ पृष्टक, २९ गज, ३० मित्र और ३१ प्रभा ये इकतीस पटल हैं ।।४४-४७।। सानत्कुमार और माहेन्द्र कल्पमें १ अञ्जन, २ वनमाल, ३ नाग, ४ गरुड़, ५ लाङ्गल, ६ बलभद्र और ७ चक्र ये सात इन्द्रक विमान हैं ।।४८।। ब्रह्म लोकमें १ अरिष्ट, २ देवसंमीत, ३ ब्रह्म और ४ ब्रह्मोत्तर ये चार इन्द्रक विमान हैं ।।४९।। लान्तवमें १ ब्रह्महृदय और २ लान्तव ये दो इन्द्रक विमान हैं। महाशुक्रमें १ शुक्र, सहस्रारमें १ शताख्य, आनतमें १ आनत, २ प्राणत और ३ पुष्पक ये तीन, अच्युतमें १ सानुकार, २ आरण और ३ अच्युत ये तीन इन्द्रक विमान हैं ।।५०-५१।। अधोग्रैवेयकमें १ सुदर्शन, २ अमोघ और ३ सुप्रबुद्ध ये तीन, मध्य ग्रैवेयकमें १ यशोधर, २ सुभद्र और ३ सुविशाल ये तीन और ऊर्ध्व-ग्रैवेयकमें १ सुमन, २ सौमनस्य और ३ प्रीतिंकर ये तीन इन्द्रक विमान हैं ।।५२-५३।। नौ अनुदिशोंके मध्यमें आदित्य नामका एक इन्द्रक विमान है और पाँच अनुत्तरोंमें सर्वार्थ-सिद्धि नामका एक इन्द्रक विमान है ।।५४।। सौधर्म स्वर्गमें बत्तीस लाख, ऐशानमें अट्ठाईस लाख,

---

१. ८४९७०२३ विमानानि । २. ऋतुम् + आदि + इन्द्रकम् इतिच्छेदः ।

* नव-अनुदिश—१ आदित्य, २ अर्चि, ३ अर्चिमाली, ४ वैरोचन, ५ प्रभास, ६ अर्चि-प्रभ, ७ अर्चिमध्य, ८ अर्चिरावर्त, ९ अर्चि-विशिष्ट ।

† अनुत्तर विमान—१ विजय, २ वैजयन्त, ३ जयन्त, ४ अपराजित, ५ सर्वार्थ-सिद्धि ।

माहेन्द्रेऽष्टौ तु लक्षे द्वे षण्णवत्या च पञ्चमे । ब्रह्मोत्तरे च लक्षैका सहस्रं च चतुर्गुणम् ॥५६॥
पञ्चविंशतिसङ्ख्यानि सहस्राणि भवन्ति तु । द्विचत्वारिंशता साकं विमानानि हि लान्तवे ॥५७॥
चतुर्विंशतिसङ्ख्यानि सहस्राणि शतान्यपि । नवपञ्चाशदष्टौ च कल्पे कापिष्ठनामनि ॥५८॥
शुक्रे विंशतियुक्तानि सहस्राणि तु विंशतिः । परेऽशीतिर्नवशती तानि चैकान्नविंशतिः ॥५९॥
त्रिसहस्री शतारे स्यात्तथैवैकान्नविंशतिः । त्रिसहस्री सहस्रारे वर्जितैकान्नविंशतिः ॥६०॥
आनतप्राणतस्था च चत्वारिंशच्चतुःशती । द्विशती च विमानानां षष्टिः स्यादारणाच्युते ॥६१॥
एकादश त्रिके पूर्वे शतं सप्तोत्तरं परे । शुद्धैकनवतिश्चोर्ध्वे नवैवानुदिशेष्वपि ॥६२॥
अर्चिराद्यं परं ख्यातमर्चिमालिन्यभिख्यया । वज्रं वैरोचनं चैव सौम्यं स्यात्सौम्यरूप्यकम् ॥६३॥
अङ्कं च स्फुटिकं चेति दिशास्वनुदिशानि तु । आदित्याख्यस्य वर्तन्ते प्राच्याः प्रभृति सक्रमम् ॥६४॥
विजयं वैजयन्तं च जयन्तमपराजितम् । दिक्षु सर्वार्थसिद्धेस्तु विमानानि स्थितानि वै ॥६५॥
शतेनाष्टसहस्राणि सप्तविंशतिरेव च । श्रेणीगतानि सर्वाणि विमानानि भवन्ति वै ॥६६॥
चत्वारि स्युः सहस्राणि तावन्त्येव शतानि च । श्रेणीगतानि सौधर्मे नवतिः पञ्चभिस्तथा ॥६७॥
अष्टाशीत्या सहैशाने सहस्रं तु चतुःशती । सनत्कुमारकल्पे तु षट्शती षोडशाधिका ॥६८॥
आवलिस्थविमानानां माहेन्द्रे त्र्युत्तरे शते । ब्रह्मलोकस्थितानां तु षडशीत्या शतद्वयम् ॥६९॥
चतुर्णवतिरेव स्युस्तानि ब्रह्मोत्तरेऽपि च । शतं लान्तवकल्पे च पञ्चविंशतिमिश्रितम् ॥७०॥
चत्वारिंशत्तथैकं च कापिष्ठे शुक्रनामनि । अष्टापञ्चाशदेकोना महाशुक्रे तु विंशतिः ॥७१॥
शतारे पञ्चपञ्चाशत् सहस्रारे दशाष्टभिः । आनते शतमुद्दिष्टं चत्वारिंशच्च सप्तभिः ॥७२॥
प्राणते पुनरष्टाभिश्चत्वारिंशत्तथारणे । शतं विंशं ततस्त्रिंशन्नवभिः पुनरच्युते ॥७३॥
चत्वारिंशत्तु पञ्चाग्रा सैवैकाग्रा प्रकीर्णके । सप्तत्रिंशद् यथासङ्ख्यमधोग्रैवेयकत्रिके ॥७४॥
विमानानि त्रयस्त्रिंशदेकान्नत्रिंशदेव च । पञ्चविंशतिरावल्यां मध्यग्रैवेयकत्रिके ॥७५॥

सनत्कुमारमें बारह लाख, माहेन्द्रमें आठ लाख, ब्रह्म-स्वर्गमें दो लाख छियानबे हजार, ब्रह्मोत्तर स्वर्गमें एक लाख चार हजार, लान्तवमें पचीस हजार बयालीस, कापिष्ठमें चौबीस हजार नौ सौ अंठावन, शुक्रमें बीस हजार बीस, महाशुक्रमें उन्नीस हजार नौ सौ अस्सी, शतारमें तीन हजार उन्नीस, सहस्रारमें उन्नीस कम तीन हजार, आनत प्राणतमें चार सौ चालीस, तथा आरण अच्युतमें दो सौ साठ विमान हैं ॥५५-६१॥ ग्रैवेयकोंके पहले त्रिकमें एक सौ ग्यारह, दूसरे त्रिकमें एक सौ सात, तीसरे त्रिकमें एकानबे और अनुदिशोंमें नौ विमान हैं ॥६२॥ अनुदिशोंमें आदित्य नामका विमान बीचमें है और उसकी पूर्व आदि दिशाओं तथा विदिशाओंमें क्रमसे १ अर्चि, २ अर्चि-मालिनी, ३ वज्र, ४ वैरोचन, ५ सौम्य, ६ सौम्य-रूपक, ७ अङ्क और ८ स्फुटिक ये आठ विमान हैं ॥६३-६४॥ अनुत्तर विमानोंमें सर्वार्थ-सिद्धि विमान बीचमें है और उसकी पूर्वादि चार दिशाओंमें १ विजय, २ वैजयन्त, ३ जयन्त और ४ अपराजित ये चार विमान स्थित हैं ॥६५॥

सब श्रेणी-बद्ध विमान मिलकर आठ हजार एक सौ सत्ताईस हैं ॥६६॥ उनमें सौधर्म स्वर्गमें श्रेणीबद्ध विमान चार हजार चार सौ पंचानबे, ऐशानमें एक हजार चार सौ अट्ठासी, सनत्कुमारमें छह सौ सोलह, माहेन्द्रमें दो सौ तीन, ब्रह्मलोकमें दो सौ छियासी, ब्रह्मोत्तरमें चौरानबे, लान्तवमें एक सौ पचीस, कापिष्ठमें इकतालीस, शुक्रमें अंठावन, महाशुक्रमें उन्नीस, शतारमें पचपन, सहस्रारमें अठारह, आनतमें एक सौ सैंतालीस, प्राणतमें अड़तालीस, आरणमें एक सौ बीस और अच्युतमें उनतालीस कहे जाते हैं ॥६७-७३॥ अधोग्रैवेयकके तीन विमानोंमें क्रमसे पैंतालीस, इकतालीस और सैंतीस, मध्यमग्रैवेयकके तीन विमानोंमें क्रमसे तैंतीस, उनतीस और पचीस तथा ऊर्ध्व-ग्रैवेयकके तीन विमानोंमें क्रमसे इक्कीस, सत्तरह और तेरह, अनुत्तरोंमें

एकविंशतिरूर्ध्वे तु त्रिके सप्तदशत्रिभिः । दशश्रेणीगतान्येव नवपञ्चकतत्परम् ॥७६॥
एतेषु तु विशुद्धेषु यथास्वं मूलराशिषु । प्रकीर्णकविमानानि शेषाणीति बुधा विदुः ॥७७॥
तेषु संख्येयविस्तारा विमानव्यक्तयः पुनः । चत्वारिंशत्सहस्राणि [1]सौधर्मे नियुतानि षट् ॥७८॥
पञ्चैव नियुतानि स्युः कल्पे [2]चैशाननामनि । सह षष्टिसहस्रैस्तु संयुतानि तु तानि वै ॥७९॥
सनत्कुमारकल्पे[3] तु नियतं नियुतद्वयम् । चत्वारिंशत्सहस्रैस्तु सहितं तदिति स्मृतिः ॥८०॥
[4]माहेन्द्रे नियुतं प्रोक्तं सह षष्टिसहस्रकैः । ब्रह्मब्रह्मोत्तरेऽशीतिसहस्राणि[5] सहैव तु ॥८१॥
लान्तवेऽपि च [6]कापिष्ठे सहस्राणि दशैव तु । चत्वारि[7] तु सहस्राणि चतुर्भिः शुक्रनामनि ॥८२॥
षण्णवत्या नवशती त्रिसहस्री महत्यपि । शतारे[8] च सहस्रारे द्वादशैव शतानि तु ॥८३॥
अष्टाशीतिः सहैव स्यादानतप्राणताख्ययोः । द्विपञ्चाशत्सहैव स्यादारुणाच्युतकल्पयोः ॥८४॥
सर्वत्रैवात्र संख्येयविस्तारास्तु चतुर्गुणाः । असंख्येयात्मविस्तारा विमानव्यक्तयः स्मृताः ॥८५॥
यथास्वमिन्द्रकैर्हीना नवग्रैवेयकादिषु । स्युरसंख्येयविस्तारा श्रेणीष्वन्यास्तु[9] ता द्विधा ॥८६॥
लक्षाः षोडशसंख्येयविस्तृता नवतिर्नव । सहस्राणि सहाशीत्या त्रिशती पिण्डितास्तु ताः ॥८७॥
षट्शतैकान्न[10]पञ्चाशत् सप्तभिर्नवतिः[11] पुनः । सहस्राणीतरा लक्षाः सप्तषष्टिरुदीरिताः ॥८८॥
प्राग्भारभूर्नरक्षेत्रमृतुः सीमन्तकः समम् । विस्तारेण तु[12] सम्प्राप्तो बालमात्रेण चूलिकाम् ॥८९॥
जम्बूद्वीपाप्रतिष्ठानक्षेत्रसर्वार्थसिद्धयः । त्रयोऽपि समविस्ताराः प्रोक्ता विस्तारवेदिभिः ॥९०॥

पाँच श्रेणी-बद्ध विमान हैं। विमान संख्याकी मूल राशिमेंसे इन इन्द्रक और श्रेणी-बद्ध विमानोंकी संख्या घटा देनेपर जो शेष बचते हैं वे प्रकीर्णक विमान हैं ऐसा विद्वज्जन जानते हैं ॥७४–७७॥

उन विमानोंमें संख्यात योजन विस्तारवाले विमानोंकी संख्या सौधर्म स्वर्गमें छह लाख चालीस हजार है। ऐशान स्वर्गमें पाँच लाख साठ हजार, सनत्कुमार स्वर्गमें दो लाख चालीस हजार, माहेन्द्र स्वर्गमें एक लाख साठ हजार, ब्रह्म-ब्रह्मोत्तर स्वर्गमें अस्सी हजार, लान्तव और कापिष्ठ स्वर्गमें दश हजार, शुक्र-स्वर्गमें चार हजार चार, महाशुक्र स्वर्गमें तीन हजार नौ सौ छियानबे, शतार सहस्रार-स्वर्गमें बारह सौ, आनत प्राणत स्वर्गमें अठासी, और आरण अच्युत स्वर्गमें बावन है ॥७८–८४॥ इन सभी स्वर्गोंमें संख्यात योजन विस्तारवाले विमानोंकी जो संख्या है उससे चौगुने असंख्यात योजन विस्तारवाले विमान हैं ॥८५॥ नव-ग्रैवेयकादिकमें इन्द्रक विमानोंको छोड़कर श्रेणी-बद्ध विमानोंमें संख्यात योजन विस्तारवाले और असंख्यात योजन विस्तारवाले—दोनों प्रकारके विमान हैं। इन्द्रक विमान संख्यात योजन विस्तारवाले ही हैं ॥८६॥ संख्यात योजन विस्तारवाले सब विमान मिलाकर सोलह लाख निन्यानबे हजार तीन सौ अस्सी हैं और असंख्यात योजन विस्तारवाले विमान सड़सठ लाख सत्तानबे हजार, छह सौ उनचास कहे गये हैं ॥८७–८८॥ प्राग्भार-भूमि (सिद्धशिला) ढाई द्वीप, प्रथम स्वर्गका ऋतु विमान, प्रथम नरकका सीमन्तक इन्द्रक बिल और सिद्धालय ये पाँच विस्तारकी अपेक्षा समान हैं अर्थात् सब पैंतालीस लाख योजन विस्तारवाले हैं। इनमें ऋतु विमान बाल मात्रका अन्तर देकर मेरुकी चूलिकाको प्राप्त है अर्थात् चूलिका और ऋतु विमानमें बालमात्रका अन्तर है ॥८९॥ जम्बूद्वीप, सातवें नरकका अप्रतिष्ठान नामका इन्द्रक बिल और सर्वार्थसिद्धि ये तीनों विस्तारके जाननेवाले आचार्योंने समान विस्तारसे युक्त कहे हैं अर्थात् इन सबका एक-एक

---

१. ६४०००० । २. ५६०००० । ३. २४०००० । ४. १६०००० । ५. ८०००० । ६. १०००० । ७. ४००४ । ८. ३९९६ । ९. 'श्रेणीष्वन्याकृता द्विधा म० । १०. ६४९ । ११. ९७००० । १२. तु शब्दान् मुक्तालयोऽपि, इति क प्रतिटिप्पण्याम् ।

सर्वश्रेणीविमानानामर्द्धमूर्ध्वमितोऽपरम् । अन्येषां स्वविमानार्धं स्वयम्भूरमणोदधेः ॥९१॥
वेश्ममूलशिलापीठबाहुल्यं पूर्वकल्पयोः । योजनान्येकविंशत्या त्वेकादश शतानि च ॥९२॥
ऊर्ध्वं नवनवत्यास्तु युग्मे युग्मे[1] परिक्षयः । एकैकत्र त्रिके तुल्यश्चतुर्दशसु चोपरि ॥९३॥
आद्ये विंशं[2] शतं व्यासः कल्पयुग्मे तु वेश्मनाम् । परे[3] शतं दशोनोऽतश्चतुर्दशसु पञ्च[4] तु ॥९४॥
उच्छ्रायः षट् शतान्याद्ये पञ्च[5] कल्पयुगे परे । शतार्द्धेनोनमूनोऽस्मात्पञ्चविंशतिमात्रकाः[6] ॥९५॥
षष्टिराद्येऽवगाहोऽपि पञ्चाशद्युगले परे । पञ्चोनोऽस्मात्परेषु द्वे चतुर्दशसु सार्धके ॥९६॥
कृष्णा नीलाश्च रक्ताश्च पीताः श्वेताश्च वर्णिताः । प्रासादाः पञ्चवर्णास्ते सौधर्मैशानकल्पयोः ॥९७॥
नीलाद्याः परयोश्चोर्ध्वं रक्ताद्यास्तु चतुर्ष्वपि । सहस्रारावसानेषु पीताः श्वेताश्च नेतरे ॥९८॥
आनतप्राणतादौ च श्वेतवर्णाः प्रवर्णिताः । वैमानिकविमानेषु प्रासादाः प्रस्फुरत्प्रभाः ॥९९॥
द्वयोर्द्वयोर्विमानानि कल्पाष्टकपरेषु च । जले वाते द्वयोर्व्योम्नि संस्थितादि यथाक्रमम् ॥१००॥
षट्युगलेषु[7] शेषेसु कल्पेषु चरमेन्द्रकात्[8] । श्रेणीबद्धे निजावासे वसन्त्यष्टादशे तथा ॥१०१॥

लाख योजन विस्तार है ॥९०॥ समस्त श्रणी-बद्ध विमानोंकी जो संख्या है उसका आधा भाग तो स्वयं-भू-रमण समुद्रके ऊपर है और आधा अन्य समस्त द्वीप समुद्रोंके ऊपर फैला हुआ है ॥९१॥ सौधर्म और ऐशान स्वर्गमें भवनोंके मूल शिलापीठकी मोटाई ग्यारह सौ इक्कीस योजन है ॥९२॥ ऊपर प्रत्येक कल्प युगलमें निन्यानबे-निन्यानबे योजन मोटाई कम होती है। ग्रैवेयकोंके तीनों त्रिक तथा अनुदिश और अनुत्तर विमानोंके चौदह विमानोंमें समान मोटाई होती है ॥९३॥ प्रथम कल्प युगल—सौधर्म ऐशान स्वर्गमें भवनोंकी चौड़ाई एक सौ बीस योजन, दूसरे कल्प युगल—सानत्कुमार, माहेन्द्र स्वर्गमें सौ योजन और इसके आगे प्रत्येक कल्प युगल तथा ग्रैवेयकोंके प्रत्येक त्रिकोंमें दश-दश योजन कम होती जाती है। अनुदिशों और अनुत्तरोंके चौदह विमानोंमें केवल पाँच योजन चौड़ाई रह जाती है ॥९४॥ प्रथम कल्प युगलमें भवनोंकी ऊँचाई छह सौ योजन है, दूसरे कल्प युगलमें पाँच सौ योजन है और आगेके युगलोंमें पचास-पचास योजन ऊँचाई कम होती जाती है। इसके आगे अनुदिश और अनुत्तरोंके भवन मात्र पच्चीस योजन ऊँचे हैं ॥९५॥ प्रथम कल्प युगलमें भवनोंकी गहराई साठ योजन है, दूसरे कल्प युगलमें पचास योजन है और इसके आगेके कल्पोंमें पाँच-पाँच योजन कम होती जाती है। अनुदिश और अनुत्तर सम्बन्धी चौदह विमानोंमें मात्र ढाई योजन गहराई है ॥९६॥ सौधर्म और ऐशान स्वर्गके वे भवन काले, नीले, लाल, पीले और सफेदके भेदसे पाँच रङ्गके कहे गये हैं ॥९७॥ आगेके युगल—सानत्कुमार और माहेन्द्र स्वर्गमें नीलेको आदि लेकर चार रङ्गके हैं, उसके आगे चार स्वर्गोंमें लालको आदि लेकर तीन रङ्गके हैं, उसके आगे सहस्रार स्वर्ग तकके चार स्वर्गोंमें पीले और सफेद दो रङ्गके हैं अन्य रङ्गके नहीं हैं ॥९८॥ उसके आगे आनत प्राणतको आदि लेकर समस्त स्वर्ग, ग्रैवेयक, अनुदिश तथा अनुत्तरविमानोंके भवन मात्र सफेद वर्णके हैं। वैमानिक देवोंके ये भवन जगमगाती हुई प्रभासे युक्त हैं ॥९९॥ सौधर्म और ऐशान स्वर्गके विमान घनोदधिके आधार हैं, सानत्कुमार और माहेन्द्रके विमान घनवातवलयके आधार हैं, आगे आठ कल्प अर्थात् सहस्रार स्वर्ग तकके विमान घनोदधि और घनवात दोनोंके आधार हैं और शेष विमान आकाशके आधार हैं ॥१००॥ छह युगलों तथा शेष कल्पोंमें अपने-अपने

१. सौधर्मयुग्मे ११२१, सानत्कुमारयुग्मे १०२२, ब्रह्मयुग्मे ९२३ इत्यादि नवनवतिहीनक्रमम्। २. १२० । ३. १००, ९०, ८०, ७०, ६०, ५०, ४०, ३०, २०, १० । ४. अनुदिशानुत्तरेषु । ५. ५०० । ६. पञ्चाशदूनक्रमम् ।

७. छज्जुगल सेसकप्पे अट्ठारसमम्हि सेढि वद्धम्मि ।
दोहीण कमं दक्खिण उत्तर भागम्हि देविंदा ॥४८३॥ —त्रिलोकसारस्य

८. चमरेन्द्रकाः म० ।

द्विहानिक्रमतोऽतोऽग्रे दक्षिणोत्तरसम्भवाः । सुराधीशाः सुखाम्भोधिमध्यगा गतविद्विषः ॥१०२॥
आज्योतिर्लोकमुत्पादस्तापसानां तपस्विनाम् । ब्रह्मलोकावधिर्ज्ञेयः परिव्राजकयोगिनाम् ॥१०३॥
सद्दृगाजीवकानां च सहस्रारावधिर्भवः । न जिनेतरदृष्टेन लिङ्गेन तु ततः परम् ॥१०४॥
कल्पानच्युतपर्यन्तान् सौधर्मप्रभृतीन् पुनः । व्रजन्ति श्रावकास्तेभ्यः श्रमणाः परतोऽपि च ॥१०५॥
उपपादोऽस्त्यभव्यानामग्रग्रैवेयकेष्वपि । स च निर्ग्रन्थलिङ्गेन सङ्गतोग्रतपःश्रिया ॥१०६॥
रत्नत्रयसमृद्धस्य भव्यस्यैव ततः परम् । यावत्सर्वार्थसिद्धिं[1] स्यादुपपादस्तपस्विनः ॥१०७॥
कृष्णा नीला च कापोता लेश्याश्च द्रव्यभावतः । तेजोलेश्या जघन्या च ज्योतिषान्तेषु भाषिताः ॥१०८॥
सौधर्मैशानदेवानां तेजोलेश्या तु मध्यमा । सैवोत्कृष्टोत्तरद्वन्द्वे पद्मलेश्या जघन्यतः ॥१०९॥
मध्यमा पद्मलेश्या तु परस्मिन् युगलत्रये । उत्कृष्टा पद्मलेश्या च युग्मे शुक्रावरापरे ॥११०॥
अच्युतान्तचतुष्के च नवग्रैवेयकेषु च । सर्वेषामेव देवानां शुक्ललेश्या तु मध्यमा ॥१११॥
अहमिन्द्रविमानेषु चतुर्दशसु संस्थिताः । लेश्या परमशुक्लोर्ध्वं संक्लेशरहितात्मनाम् ॥११२॥

निवासके योग्य अन्तिम इन्द्रकके श्रेणी-बद्ध विमानोंमें इन्द्रोंका निवास है। पहले युगलके अन्तिम इन्द्रक सम्बन्धी अठारहवें श्रेणीबद्ध विमानमें इन्द्रका निवास है और आगे दो-दो श्रेणिबद्ध विमानोंकी क्रमिक हानि है। १ सौधर्म, २ सनत्कुमार, ३ ब्रह्म, ४ शुक्र, ५ आनत और ६ आरण कल्पोंमें रहनेवाले इन्द्र दक्षिण दिशामें रहते हैं और १ ऐशान, २ माहेन्द्र, ३ लान्तव, ४ शतार, ५ प्राणत और ६ अच्युत इन छह कल्पोंमें रहनेवाले उत्तर दिशामें रहते हैं। ये इन्द्र सुखरूपी सागरके मध्यमें स्थित हैं तथा प्रतिद्वन्द्वियोंसे रहित हैं—भावार्थ—सौधर्म स्वर्गके अन्तिम पटलके इन्द्रक विमानसे दक्षिण दिशामें जो अठारहवाँ श्रेणीबद्ध विमान है उसमें सौधर्मेन्द्र रहता है और उत्तर दिशामें जो अठारहवाँ श्रेणीबद्ध विमान है उसमें ऐशानेन्द्र रहता है। सनत्कुमार इन्द्र अपने स्वर्गके अन्तिम पटल सम्बन्धी इन्द्रकसे दक्षिण दिशा सम्बन्धी सोलहवें श्रेणीबद्ध विमानमें रहता है और माहेन्द्र उत्तर दिशा सम्बन्धी। इसी प्रकार आगे भी समझना चाहिए ॥१०१–१०२॥ पञ्चाग्नि आदि तप तपनेवाले तपस्वियोंकी उत्पत्ति भवनवासी, व्यन्तर और ज्योतिषी देवोंमें होती है, परिव्राजक—संन्यासियोंकी उत्पत्ति ब्रह्मलोक तक और सम्यग्दृष्टि आजीवकोंकी उत्पत्ति सहस्रार स्वर्ग तक हो सकती है। जिन-लिङ्गके सिवाय अन्य लिङ्गके द्वारा जीव सहस्रार स्वर्गके आगे नहीं जा सकते यह नियम है ॥१०३–१०४॥ श्रावक, सौधर्म स्वर्गसे लेकर अच्युत स्वर्ग तक जाते हैं और मुनि उसके आगे भी जा सकते हैं ॥१०५॥ अभव्य जीवोंका उपपाद अग्रिम ग्रैवेयक तक हो सकता है, परन्तु यह नियम है कि ग्रैवेयकोंमें उपपाद निर्ग्रन्थ लिङ्गके द्वारा उग्र तपश्चरण करनेसे ही हो सकता है ॥१०६॥ इसके सर्वार्थ-सिद्धि तक रत्नत्रय तपस्वी भव्य जीवकी ही उत्पत्ति होती है ॥१०७॥

भवनवासी, व्यन्तर और ज्योतिषी देवोंमें द्रव्य तथा भावकी अपेक्षा कृष्ण नील और आपोतलेश्या तथा जघन्य पीत लेश्या होती है ॥१०८॥ सौधर्म और स्वर्गके देवोंके मध्यम पीत-लेश्या होती है। माहेन्द्र स्वर्गके देवोंके उत्कृष्ट पीतलेश्या और जघन्य पद्मलेश्या होती है ॥१०९॥ इसके आगे तीन युगलोंमें मध्यम पद्मलेश्या होती है। उसके आगे दो युगलोंमें उत्कृष्ट पद्मलेश्या और जघन्य शुक्ललेश्या होती है। तदनन्तर अच्युत स्वर्ग तकके चार स्वर्गों और नौ ग्रैवेयकोंके समस्त देवोंके मध्यम शुक्ललेश्या होती है और उसके आगे अनुदिश और अनुत्तर सम्बन्धी अहमिन्द्रोंके चौदह विमानोंमें परम शुक्ललेश्या होती है। यहाँके निवासी अहमिन्द्र संक्लेशसे रहित होते हैं ॥११०–११२॥

---

१. सर्वार्थसिद्धिः क०, ख०, ग०, ङ०।

आधर्मायास्तु देवानामाद्ययोर्विषयोऽवधिः । कल्पयोः परयोश्चासावावंशाया व्यवस्थितः ॥११३॥
आऽसौ मेघावनेरुक्तश्चतुःकल्पे तु तत्परम् । आचतुर्थपृथिव्यास्तु परे कल्पचतुष्टये ॥११४॥
आनतादिचतुष्केऽसावापञ्चम्याः समीरितः । नवग्रैवेयकस्थानामाषष्ठ्या विषयोऽवधिः ॥११५॥
नवानुदिशदेवानामासप्तम्याः समाश्रितः । लोकनाडीसमस्तासु पञ्चानुत्तरवासिनाम् ॥११६॥
स्वविमानावधिस्तूर्ध्वं विषयोऽवधिचक्षुषः । विश्वेषामेव देवानामिति विश्वविदो विदुः ॥११७॥
स्थित्युत्सेधप्रवीचारा जिनेन्द्रप्रतिभाषिताः । चतुर्देवनिकायानां वेदितव्यं यथायथम् ॥११८॥
दक्षिणाशाऽऽरणान्तानां देव्यः सौधर्म एव तु । निजागारेषु जायन्ते नीयन्ते च निजास्पदम् ॥११९॥
उत्तराशाच्युतान्तानां देवानां दिव्यमूर्त्तयः । ऐशानकल्पसम्भूता देव्यो यान्ति निजाश्रयम् ॥१२०॥
शुद्धदेवीयुतान्याहुर्विमानानि मुनीश्वराः । षट् लक्षास्तु चतुर्लक्षाः सौधर्मैशानकल्पयोः ॥१२१॥
दिव्यवस्त्रविभूषाभिः शुभविक्रियमूर्तिभिः । [1]चित्तनेत्रहरोदाररूपविभ्रमवृत्तिभिः ॥१२२॥
हावभावविदग्धाभिर्निसर्गप्रेमभूमिभिः । नैकपल्योपमायुर्भिर्देवीभिर्बहुभिः सुखम् ॥१२३॥
इन्द्राः सामानिका देवास्त्रायस्त्रिंशादयोऽखिलाः । कल्पोपपन्नपर्यन्ताः श्रयन्ते दीर्घजीविनः ॥१२४॥
अहमिन्द्रास्ततोऽनन्तं भजन्ते भव[2]जं सुखम् । तत्सातावेदनीयोत्थमस्त्रीकं प्रशमात्मजम् ॥१२५॥
सिद्धानां तु परं स्थानं परं द्वादशयोजनम् । सर्वार्थसिद्धितो गत्वा स्थितं त्रैलोक्यमूर्धनि ॥१२६॥
ईषत्प्राग्भारसंज्ञाऽसावष्टमी पृथिवी श्रु[3]ता । अष्टयोजनबाहुल्या मध्ये हीना क्रमात्ततः ॥१२७॥

प्रथम दो स्वर्गके देवोंके अवधिज्ञानका विषय घर्मा पृथिवी तक है, उसके आगेके दो स्वर्गों सम्बन्धी देवोंका विषय वंशा पृथिवी तक है। उसके आगे चार स्वर्गों सम्बन्धी देवोंका विषय मेघा पृथिवी तक है, उसके आगे चार स्वर्गों सम्बन्धी देवोंका विषय अञ्जना नामक चौथी पृथिवी तक है। उसके आगे आनतादि चार स्वर्गोंके देवोंका विषय अरिष्टा नामकी पाँचवीं पृथिवी तक है। नव ग्रैवेयकवासियोंका छठवीं पृथिवी तक है। नवानुदिशवासियोंका सातवीं पृथिवीके अन्त तक है और पञ्चानुत्तरवासियोंका समस्त लोकनाडी तक है। समस्त देवोंके अवधिज्ञान रूपी नेत्रका ऊपरकी ओरका विषय अपने-अपने विमानके अन्त भाग तक है ऐसा सर्वज्ञ देव जानते हैं ॥११३-११७॥ चारों निकायके देवोंकी स्थिति, ऊँचाई तथा प्रवीचार—काम-सेवनका वर्णन जैसा जिनेन्द्र भगवान्‌ने किया है वैसा यथायोग्य जानना चाहिए ॥११८॥ आरण स्वर्ग पर्यन्त दक्षिण दिशाके देवोंकी देवियाँ सौधर्म स्वर्गमें ही अपने-अपने उपपाद स्थानोंमें उत्पन्न होती हैं और नियोगी देवोंके द्वारा यथास्थान ले जाई जाती हैं ॥११९॥ तथा अच्युत स्वर्ग पर्यन्त उत्तर दिशाके देवोंकी सुन्दर देवियाँ ऐशान स्वर्गमें उत्पन्न होती हैं एवं अपने-अपने नियोगी देवोंके स्थानपर जाती हैं ॥१२०॥ मुनियोंके ईश्वर गणधर देवने सौधर्म और ऐशान स्वर्गमें शुद्ध देवियोंसे युक्त विमानोंकी संख्या क्रमसे छह लाख और चार लाख बतलाई है अर्थात् सौधर्म-ऐशान स्वर्गमें केवल देवियोंके उत्पत्ति स्थान छह लाख और चार लाख प्रमाण हैं ॥१२१॥ सोलहवें स्वर्ग तक उत्पन्न एवं दीर्घ आयुको धारण करनेवाले इन्द्र, सामानिक, त्रायस्त्रिंश आदि देव, दिव्य वस्त्रालंकारोंसे विभूषित, शुभ विक्रिया करनेवाली हृदय तथा नेत्रोंको हरण करनेवाली उत्कृष्ट रूप और विभ्रमसे सहित, हाव-भाव दिखलानेमें चतुर स्वाभाविक प्रेमकी भूमि एवं अनेक पल्य-प्रमाण आयुवाली अनेक देवियोंके साथ सुखको प्राप्त होते हैं ॥१२२-१२४॥ सोलहवें स्वर्गके आगेके अहमिन्द्र, साता वेदनीयके उदयसे उत्पन्न, स्त्री रहित, शान्तिरूप आत्मासे उत्पन्न होनेवाले, देव पर्यायजन्य अपरिमित सुखका उपभोग करते हैं ॥१२५॥ सर्वार्थसिद्धिसे बारह योजन आगे जाकर तीन लोकके मस्तकपर सिद्ध भगवान्‌का उत्कृष्ट स्थान है ॥१२६॥ सिद्धोंका यह स्थान

१. चित्तस्ववृत्तिभिः म०, ख० । २. भवनं म० । ३. स्तुता म० ।

पर्यन्तेऽङ्गुलसङ्ख्येयभागमात्रतनुस्थितिः । सोत्तानितमहावृत्तश्वेतछत्रोपमाकृतिः ॥१२८॥
चत्वारिंशत्तु विस्तारो लक्षाः पञ्चभिरर्चिताः । योजनानि क्षितेस्तस्या विद्वद्भिरभिधीयते ॥१२९॥
कोटी तु परिधिर्लक्षा द्विचत्वारिंशदिष्यते । द्विशत्येकान्नपञ्चाशत् त्रिसहस्री दशाहता ॥१३०॥
ऊर्ध्वं तस्या पुरा प्रोक्तं यद्वातवलयत्रयम् । तत्र त्रिकोशबाहुल्यमतीत्य वलयद्वयम् ॥१३१॥
धनुषां पञ्चशत्यामा पञ्चसप्ततियुक्तया । धनुः सहस्रमेकं हि बहलं वलयं तु यत् ॥१३२॥
तनुवातस्य तस्यान्ते पञ्चविंशतिसंयुताम् । विगाह्योत्कर्षतः सिद्धाः स्थिताः पञ्चधनुःशतीम् ॥१३३॥
सार्द्धहस्तत्रयं पूर्वं कृत्वान्तेऽनन्तरोच्छ्रितिम् । सिद्धावगाहनाकाशदेशो देशोन इष्यते ॥१३४॥
एकोऽवतिष्ठते यत्र सिद्धः सिद्धप्रयोजनः । तत्रानन्ताश्च तिष्ठन्ति सिद्धास्ते स्वावगाहतः ॥१३५॥
अशरीराः सुखात्मानः सिद्धा जीवघनायुताः । साकारेणोपयोगेन निराकारेण चात्मनः ॥१३६॥
सर्वलोकमलोकं च सन्ततानन्तपर्ययम् । जानन्तः सह पश्यन्तस्तिष्ठन्ति सुखिनः सदा ॥१३७॥
सिद्धाः शुद्धाः प्रबुद्धार्था विजन्मानोऽजरामराः । शाश्वताः [1]शाश्वतं स्थानमधितिष्ठन्त्यबन्धनाः ॥१३८॥

मन्दाक्रान्ता

[2]ज्योतिर्लोकप्रकटपटलस्वर्गमोक्षोर्ध्वलोक-
प्रश्नप्रयुक्तं नरवर मया संग्रहा[3]त्क्षेत्रमेवम् ।
सम्प्रोक्तं ते श्रवणसुभगं श्रेणिक श्रेयसेऽतः
शृण्वायुष्मन्नवहितमतिर्वच्मि कालोपदेशम् ॥१३९॥

(सिद्धशिला) ईषत्प्राग्भार नामकी आठवीं पृथिवी कहलाती है यह पृथिवी मध्यमें आठ योजन मोटी है उसके आगे क्रमसे कम-कम होती हुई अन्त भागमें अङ्गुलके असंख्यातवें भाग प्रमाण अत्यन्त सूक्ष्म रह जाती है, वह ऊपरकी ओर उठे हुए विशाल गोल सफेद छत्रके आकार है ॥१२७-१२८॥ विद्वज्जन उस पृथिवीका विस्तार पैंतालीस लाख योजन बतलाते हैं ॥१२९॥ उसकी परिधि एक करोड़ बयालीस लाख तीस हजार दो सौ उनचास योजन है ॥१३०॥ उस पृथिवीके ऊपर पहले कहे हुए तीन वातवलय हैं, उनमें तीन कोश विस्तारवाले दो वलयोंका उलंघन कर एक हजार पाँच सौ पचहत्तर धनुष विस्तारवाला जो तीसरा तनुवातवलय है उसके पाँच सौ पच्चीस धनुष मोटे अन्तिम भागको अपनी उत्कृष्ट अवगाहनासे व्याप्तकर सिद्ध भगवान् विराजमान हैं। जिन सिद्ध भगवान्का अनन्तर पूर्व शरीर साढ़े तीन हाथ ऊँचा रहता है उनकी अवगाहना सम्बन्धी आकाशका प्रदेश साढ़े तीन हाथसे कुछ कम माना जाता है ॥१३१-१३४॥ जहाँ कृतकृत्य अवस्थाको प्राप्त हुए एक सिद्ध भगवान् विराजमान हैं वहाँ अपनी अवगाहनासे अनन्त सिद्ध परमेष्ठी स्थित है। भावार्थ—अवगाह दानकी सामर्थ्य होनेसे सिद्ध परमेष्ठी एक दूसरेको बाधा नहीं पहुँचाते इसलिए जहाँ एक सिद्ध है वहीं अनन्त सिद्ध विराजमान रहते हैं ॥१३५॥ ये सिद्ध परमेष्ठी शरीररहित हैं, सुख रूप हैं, जीवके घन प्रदेशोंसे युक्त हैं और अपने ज्ञानोपयोग तथा दर्शनोपयोगके द्वारा अनन्त पर्यायोंसे युक्त समस्त लोक और अलोकको एक साथ जानते हुए सदा सुखसे स्थिर रहते हैं ॥१३६-१३७॥ जो कर्म कलंकसे रहित होनेके कारण शुद्ध हैं, अनन्त ज्ञानसे सम्पन्न होनेके कारण जिन्होंने समस्त पदार्थोंको जान लिया है, जो आयु-कर्मसे रहित होनेके कारण नूतन जन्मसे रहित हैं, शरीर रहित होनेके कारण अजर-अमर हैं, मोहजन्य विकारसे रहित होनेके कारण जो कर्मबन्धनसे दूर हैं और स्वाश्रित होनेसे शाश्वत हैं ऐसे सिद्ध परमेष्ठी उस शाश्वत—अविनश्वर स्थानपर सदा विद्यमान रहते हैं ॥१३८॥

गौतम स्वामी कहते हैं कि हे बररत्न श्रेणिक ! इस प्रकार हमने तेरे कल्याणके लिए

१. निश्चलं ख० । २. ज्योतिर्लोकः प्रकटपटलस्वर्गमोक्षोर्ध्वलोकः म० । ३. संग्रहाक्षेपमेवं ख० ।

धर्मध्यानं धवलमुदितं मोक्षहेतुर्जिनेन्द्रै-
राज्ञापायप्रभृतिविचयैश्चित्तवृत्तेर्निरोधः ।
यत्तत्कार्या समितकरणैर्लोकसंस्थानचिन्ता
मन्दाक्रान्ता न हृदयमदेभेन्द्रियाश्वा[1] विधेयाः ॥१४०॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ ज्योतिर्लोकोर्ध्वलोकवर्णनो नाम षष्ठः सर्गः ॥६॥

ज्योतिर्लोक और अनेक पटलोंसे युक्त स्वर्ग एवं मोक्षसे सहित ऊर्ध्व लोकका कथन करनेवाले इस क्षेत्रका संक्षेपसे कर्णप्रिय वर्णन किया है। अब हे आयुष्मन्! हम कालद्रव्यका कथन करते हैं सो एकाग्रचित्तसे श्रवण कर ॥१३९॥ श्रीजिनेन्द्र भगवान्ने आज्ञाविचय, अपायविचय, विपाक विचय और संस्थान विचयके द्वारा चित्तवृत्तिके निरोध करनेको उज्ज्वल धर्मध्यान कहा है और चूँकि धर्मध्यान मोक्षका कारण है इसलिए इन्द्रियोंको वश करनेवाले पुरुषोंको लोकके संस्थान—आकारका चिन्तन करना चाहिए। आचार्योंने ठीक ही कहा है कि इन्द्रिय रूपी मदोन्मत्त हाथी और इन्द्रिय रूपी घोड़े मन्द आक्रमण होनेपर वशमें नहीं रहते। भावार्थ—मोक्षाभिलाषी पुरुषोंको मन और इन्द्रियोंको स्वतन्त्र नहीं छोड़ना चाहिए ॥१४०॥

इस प्रकार जिसमें श्रीअरिष्टनेमि जिनेन्द्रके पुराणका संग्रह किया गया है ऐसे जिनसेनाचार्यरचित हरिवंश पुराणमें ज्योतिर्लोक तथा ऊर्ध्वलोकका वर्णन करनेवाला छठवाँ सर्ग समाप्त हुआ ॥६॥

---

१. भेदेन्द्रियास्वाविधेयाः क०, ख०, ग०, घ० ।

सप्तमः सर्गः

वर्णगन्धरसस्पर्शमुक्तोऽगौरवलाघवः । वर्त्तनालक्षणः कालो मुख्यो गौणश्च स द्विधा ॥१॥
गतिस्थित्यवगाहानां धर्माधर्माम्बराणि च । निमित्तं सर्वभावानां वर्त्तनस्यात्र निश्चयः ॥२॥
धर्माधर्मनभोद्रव्यं यथैवागमदृष्टितः । तथा निश्चयकालोऽपि निश्चेतव्यो विपश्चिता ॥३॥
जीवानां पुद्गलानां च परिवृत्तिरनेकधा । गौणकालप्रवृत्तिश्च मुख्यकालनिबन्धना ॥४॥
सर्वेषामेव भावानां परिणामादिवृत्तयः । स्वान्तर्बहिर्निमित्तेभ्यः प्रवर्तन्ते समन्ततः ॥५॥
निमित्तमान्तरं तत्र योग्यता वस्तुनि स्थिता । बहिर्निश्चयकालस्तु निश्चितस्तत्त्वदर्शिभिः ॥६॥
अन्योन्यानुप्रवेशेन विना कालाणवः पृथक् । लोकाकाशमशेषं तु व्याप्य तिष्ठन्ति सञ्चिताः ॥७॥
द्रव्यार्थान्निर्विकारत्वादुदयव्ययवर्जिताः । नित्या एव कथञ्चित्ते स्वरूपसमवस्थिताः ॥८॥
अगुरुत्वलघुत्वात्मपरिणामसमन्विताः । परोपाधिविकारित्वादनित्यास्तु कथञ्चन ॥९॥
त्रिधा समयवृत्तीनां हेतुत्वात्ते त्रिधा स्मृताः । अनन्तसमयोत्पादादनन्तव्यपदेशिनः ॥१०॥
तेभ्यः कारणभूतेभ्यः समयस्य समुद्भवः । कारणेन विना कार्यं न कदाचित् प्रजायते ॥११॥
स्वत एवाऽसतो जन्म कार्यस्य यदि जायते । स्वत एव हि किं न स्याद् खरशृङ्गस्य सम्भवः ॥१२॥
न कालादन्यतो हेतोः कालकार्यसमुद्भवः । न हि सञ्जायते जातु शालिबीजाद् यवाङ्कुरः ॥१३॥

रूप, रस, गन्ध और स्पर्शसे रहित व हलका व भारी और वर्तना लक्षणसे युक्त कालद्रव्य है। वह मुख्य और गौणके भेदसे दो प्रकारका है ॥१॥ जिस प्रकार जीव और पुद्गलके गमन करनेमें धर्म द्रव्य, ठहरनेमें अधर्म द्रव्य और समस्त द्रव्योंको अवगाह देनेमें आकाश द्रव्य निमित्त है उसी प्रकार समस्त द्रव्योंकी वर्तना—षड् गुणी हानि वृद्धि रूप परिणमनमें निश्चय कालद्रव्य निमित्त है ॥२॥ जिस प्रकार धर्म-अधर्म और आकाशद्रव्यका आगमदृष्टिसे निश्चय काल द्रव्यका भी निश्चय करना चाहिए ॥३॥ जीव और पुद्गलोंका परिणमन नाना प्रकारका होता है और गौण कालकी प्रवृत्ति मुख्य कालके कारण है ॥४॥ समस्त पदार्थोंमें जो परिणाम क्रिया परत्व और अपरत्व रूप परिणमन होते हैं वे अपने-अपने अन्तरङ्ग तथा बहिरङ्ग निमित्तोंसे ही सब ओर प्रवृत्त होते हैं ॥५॥ उन अन्तरङ्ग, बहिरङ्ग निमित्तोंमें अन्तरङ्ग निमित्त तो वस्तुकी अपनी योग्यता है जो सदा उसमें स्थित रहती है और बाह्य निमित्त निश्चय कालद्रव्य है ऐसा तत्त्वदर्शी आचार्योंने निश्चित किया है ॥६॥ परस्परके प्रवेशसे रहित कालाणु पृथक्-पृथक् समस्त लोकको व्याप्तकर राशि रूपमें स्थित हैं ॥७॥ द्रव्यार्थिक नयकी अपेक्षा कालाणुओंमें विकार नहीं होता इसलिए उत्पाद व्ययसे रहित होनेके कारण वे कथञ्चित् नित्य हैं और अपने स्वरूपमें स्थित हैं ॥८॥ अगुरु लघु गुणके कारण उन कालाणुओंमें प्रत्येक समय परिणमन होता रहता है तथा परपदार्थके सम्बन्धसे वे विकारी हो जाते हैं इसलिए पर्यायार्थिक नयकी अपेक्षा कथञ्चित् अनित्य भी है ॥९॥ भूत, भविष्य और वर्तमान रूप तीन प्रकारके समयका कारण होनेसे वे कालाणु तीन प्रकारके माने गये हैं और अनन्त समयोंके उत्पादक होनेसे अनन्त भी कहे जाते हैं ॥१०॥ उन कारणभूत कालाणुओंसे समयकी उत्पत्ति होती है सो ठीक ही है क्योंकि कारणके विना कभी कार्य उत्पन्न नहीं होता ॥११॥ यदि असद्भूत कार्यकी उत्पत्ति कारणके विना स्वयं ही होती है तो फिर गधेके सींगकी उत्पत्ति स्वयं ही क्यों नहीं हो जाती ? ॥१२॥ कालके सिवाय अन्य कारणसे काल रूप कार्यकी उत्पत्ति नहीं होती क्योंकि धानके बीजसे कभी जौका अंकुर

जायते भिन्नजातीयो हेतुर्यत्राऽपि कार्यकृत् । तत्राऽसौ सहकारी स्यात् मुख्योपादानकारणः ॥१४॥
[1]युक्त्यागमबलादेवमनतीन्द्रियदर्शिनः । सद्भावं मुख्यकालस्य प्रतिपद्य व्यवस्थितः ॥१५॥
समयावलिकोच्छ्वास[2]प्राणस्तोकलवादिकः । व्यवहारस्तु विज्ञेयः कालः कालज्ञवर्णितः ॥१६॥
परिणामं प्रपन्नस्य गत्या सर्वजघन्यया । परमाणोर्निजागाढस्वप्रदेशव्यतिक्रमः ॥१७॥
कालेन यावतैव स्यादविभागः स भाषितः । समयः समयाभिज्ञैर्निरुद्ध[3]परमान्यतः ॥१८॥
तैरेवावलिकासङ्ख्यैः सङ्ख्याताभिस्तु भाषितौ । ताभिरुच्छ्वासनिश्वासौ तावुभौ प्राण इष्यते ॥१९॥
प्राणाः सप्त पुनः स्तोकः सप्तस्तोका भवेल्लवः । ते सप्त सप्ततिः सन्तो मुहूर्त्तास्त्रिंशदेव ते ॥२०॥
अहोरात्रं भवेत्पक्षस्तानि पञ्चदशैव तौ । मासो मासावृतुस्तेषां त्रितयं त्वयनं तथा ॥२१॥
अयनद्वयमब्दं स्यात् पञ्चाब्दानि युगं पुनः । युगद्वयं दशाब्दानि शतं तानि दशाहतौ ॥२२॥
भवेद्वर्षसहस्रं तु शतं चापि दशाहतम् । दशवर्षसहस्राणि तदेव दशताडितम् ॥२३॥
ज्ञेयं वर्षसहस्रं तु तच्चापि दशसङ्गुणम् । पूर्वाङ्गं तु तदभ्यस्तमशीत्या चतुरग्रया ॥२४॥
तत्तद्गुणं च पूर्वाङ्गं पूर्वं भवति निश्चितम् । पूर्वाङ्गं तद्गुणं तच्च पूर्वसंज्ञं तु तद्गुणम् ॥२५॥
नियुताङ्गं परं तस्मान्नियुतं च ततः परम् । कुमुदाङ्गं ततश्च स्याद् कुमुदं तु ततः परम् ॥२६॥
पद्माङ्गं पद्ममप्यस्मात् नलिनाङ्गं तथैव च । नलिनं कमलाङ्गं च कमलं चाप्यतः परम् ॥२७॥
तुट्याङ्गं तुटयमप्यस्मादटटाङ्गं ततोऽपि च । अटटं चाममाङ्गं स्यादममं चाप्यतः परम् ॥२८॥

उत्पन्न नहीं होता ॥१३॥ जहाँ कहीं भिन्न जातीय कारण कार्य उत्पादक होता है वहाँ वह सहकारी कारण ही होता है। कार्यकी उत्पत्तिमें मुख्य कारण उपादान है और सहकारी कारण उसका सहायक होता है ॥१४॥ इस प्रकार जो अतीन्द्रियदर्शी नहीं हैं अर्थात् स्थूल पदार्थको ही जानते हैं उनके लिए युक्ति और आगमके बलसे मुख्यकालका सद्भाव बताकर उसे व्यवस्थित किया है ॥१५॥ समय, आवलि, उच्छ्वास, प्राण, स्तोक और लव आदिको व्यवहार-काल जानना चाहिए ऐसा समयके ज्ञाता आचार्योंने वर्णन किया है ॥१६॥ सर्वजघन्य गतिसे परिणामको प्राप्त हुआ परमाणु जितने समयमें अपने द्वारा प्राप्त स्वर्गीय प्रदेशका उल्लंघन करता है उतने समयको समय-शास्त्रके ज्ञाता आचार्योंने समय कहा है। यह समय अविभागी होता है तथा परकी मान्यताको रोकनेवाला है ॥१७-१८॥

असंख्यात समयकी एक आवली होती है, संख्यात आवलियोंका एक उच्छ्वास निश्वास होता है, दो उच्छ्वास निश्वासोंका एक प्राण होता है। सात प्राणोंका एक स्तोक होता है, सात स्तोकोंका एक लव होता है, सत्तर लवोंका एक मुहूर्त्त होता है, तीस मुहूर्त्तोंका एक दिन-रात होता है, पन्द्रह दिन-रातका एक पक्ष होता है, दो पक्षका एक मास होता है, दो मासकी एक ऋतु होती है, तीन ऋतुओंका एक अयन होता है, दो अयनोंका एक वर्ष होता है, पाँच वर्षोंका एक युग होता है, दो युगोंके दश वर्ष होते हैं, इसमें दशका गुणा करनेपर सौ वर्ष होते हैं, इसमें दशका गुणा करनेपर हजार वर्ष होते हैं, इसमें दशका गुणा करनेपर दश हजार वर्ष होते हैं, इसमें दशका गुणा करनेपर एक लाख वर्ष होते हैं इसमें चौरासीका गुणा करनेपर एक पूर्वाङ्ग होता है, चौरासी लाख पूर्वाङ्गोंका एक पूर्व, चौरासी लाख पूर्वोंका एक नियुताङ्ग, चौरासी लाख नियुताङ्गोंका एक नियुत, चौरासी लाख नियुतोंका एक कुमुदाङ्ग, चौरासी लाख कुमुदाङ्गोंका एक कुमुद, चौरासी लाख कुमुदोंका एक पद्माङ्ग, चौरासी लाख पद्माङ्गोंका एक पद्म, चौरासी लाख पद्मोंका एक नलिनाङ्ग, चौरासी लाख नलिनाङ्गोंका एक नलिन, चौरासी लाख नलिनोंका एक कमलाङ्ग, चौरासी लाख कमलाङ्गोंका एक कमल, चौरासी लाख कमलोंका एक तुट्याङ्ग, चौरासी लाख तुट्याङ्गोंका एक तुट्य, चौरासी लाख तुट्योंका एक अटटाङ्ग, चौरासी लाख

---

१. युक्तागम- म०, क० । २. -कोच्छ्वासः प्राण म० । ३. निरुद्धः परमास्थितः म० ।

ऊहाङ्गमूहमप्यस्माल्लताङ्गं च लताह्वयम् । महालताङ्गसंज्ञं स्यात् कालवस्तुमहालता ॥२९॥
शिरःप्रकम्पितं प्रोक्तं ततो हस्तप्रहेलिका । चर्चिकेत्यादिकः कालः सङ्ख्येयः परिभाषितः ॥३०॥
वर्षसङ्ख्याव्यतिक्रान्तः कालोऽसंख्येय इष्यते । पल्यसागरसङ्ख्यानं कल्पानन्तादिभेदवान् ॥३१॥
[1]आदिमध्यान्तनिर्मुक्तं निर्विभागमतीन्द्रियम् । मूर्तमप्यप्रदेशं च परमाणुं प्रचक्षते ॥३२॥
एकदैकं रसं वर्णं गन्धं स्पर्शावबाधकौ । दधत् स वर्ततेऽभेद्यः शब्दहेतुरशब्दकः ॥३३॥
आशङ्क्या नार्थतत्त्वज्ञैर्नभोंऽशानां समन्ततः । षट्केन युगपद्योगात्परमाणोः षडंशता ॥३४॥
स्वल्पाकाशषडंशाश्च परमाणुश्च संहताः । सप्तांशाः स्युः कुतस्तु स्यात्परमाणोः षडंशता ॥३५॥
वर्णगन्धरसस्पर्शैः पूरणं गलनं च यत् । कुर्वन्ति स्कन्धवत्तस्मात् पुद्गलाः परमाणवः ॥३६॥
[2]अनन्तानन्तसङ्ख्यानपरमाणुसमुच्चयः । अवसंज्ञादिकासंज्ञा स्कन्धजातिस्तु जायते ॥३७॥
ताभिरष्टाभिरप्युक्ता संज्ञासंज्ञादिका तथा । ताभिरप्यष्ट संज्ञाभिस्तुटिरेणुः स्फुटीकृतः ॥३८॥

अटटाङ्गोंका एक अटट, चौरासी लाख अटटोंका एक अममाङ्ग, चौरासी लाख अममाङ्गोंका एक अमम, चौरासी लाख अममोंका एक ऊहाङ्ग, चौरासी लाख ऊहाङ्गोंका एक ऊह, चौरासी लाख ऊहोंका एक लताङ्ग, चौरासी लाख लताङ्गोंकी एक लता, चौरासी लाख लताङ्गोंका एक महा लताङ्ग, चौरासी लाख महालताङ्गोंकी एक महालता, चौरासी लाख महालताओंका एक शिरः-प्रकम्पित, चौरासी लाख शिरःप्रकम्पितोंकी एक हस्त प्रहेलिका और चौरासी लाख प्रहेलिकाओंकी एक चर्चिका होती है। इस प्रकार चर्चिका आदिको लेकर संख्यात काल कहा गया है ॥१९-३०॥ जो वर्षोंकी संख्यासे रहित है वह असंख्येय काल माना जाता है इसके पल्य, सागर, कल्प तथा अनन्त आदि अनेक भेद हैं ॥३१॥

जो आदि मध्य और अन्तसे रहित है, निर्विभाग है, अतीन्द्रिय है और मूर्त होनेपर भी अप्रदेश—द्वितीयादिक प्रदेशोंसे रहित है उसे परमाणु कहते हैं ॥३२॥ वह परमाणु एक कालमें एक रस, एक वर्ण, एक गन्ध और परस्परमें बाधा नहीं करनेवाले दो स्पर्शोंको धारण करता है, अभेद्य है, शब्दका कारण है और स्वयं शब्दसे रहित है ॥३३॥ पदार्थके स्वरूपको जाननेवाले लोगोंको ऐसी आशंका नहीं करनी चाहिए कि सब ओरसे एक समय आकाशके छह अंशोंके साथ सम्बन्ध होनेसे परमाणुमें षडंशता है ॥३४॥ क्योंकि ऐसा माननेपर आकाशके छोटे-छोटे छह अंश और एक परमाणु सब मिलकर सप्तमांश हो जाते हैं अब परमाणुमें षडंशता कैसे हो सकती है ? ॥३५॥ क्योंकि परमाणु रूप, गन्ध, रस और स्पर्शके द्वारा पूरण तथा गलन करते रहते हैं इसलिए स्कन्धके समान परमाणु पुद्गल द्रव्य हैं ॥३६॥ अनन्तानन्त परमाणुओंके समूह-को अवसंज्ञ कहते हैं। ये अवसंज्ञ आदि स्कन्धकी ही जातियाँ हैं ॥३७॥ आठ अवसंज्ञाओंकी

---

१. अंतादिमज्झहीणं अपदेशं इंदियेहिं णहु गज्भं ।
जं दव्वं अविभत्तं तं परमाणु वदंति जिणा ॥९८॥ —त्रै० प्र०

२. परमाणूहिं अणंताणंतेहिं वहुविहेहिं दव्वेहिं ।
अवसण्णासण्णोत्ति सो खंधो होइ णामेण ॥१०२॥
उवसण्णासण्णो वि य गुणिदो अट्ठेहि होदि णामेण ।
सण्णासण्णो त्ति तदो दु इदि खंधो पमाणट्ठं ॥१०३॥
अट्ठेहिं गुणिदेहिं सण्णासण्णेहिं होदि तुडिरेणु ।
तित्तियमेत्तहदेहिं तुडिरेणूहिं वि तसरेणु ॥१०४॥
तसरेणू रथरेणू उत्तमभोगावणीए वालग्गं ।
मज्झिमभोगखिदीए वोलं वि जहण्ण भोगखिदिवालं ॥१०५॥ इत्यादि —त्रै० प्र०

एतैरप्यष्टबालाग्रैरेकमेकाग्रमानसैः । कर्मभूमिमनुष्याणां बालाग्रमिति भासितम् ॥३९॥
तैरष्टाभिर्भवेल्लिक्षा ताभिर्यूका तथाष्टभिः । यूकाभिस्तु यवोऽष्टाभिर्यवैरष्टाभिरङ्गुलम् ॥४०॥
उत्सेधाङ्गुलमेतत्स्यादुत्सेधोऽनेन देहिनाम् । अल्पावस्थितवस्तूनां प्रमाणं च प्रगृह्यते ॥४१॥
प्रमाणाङ्गुलमेकं स्यात् तत्पञ्चशतसङ्गुणम् । प्रथमस्यावसर्पिण्यामङ्गुलं चक्रवर्त्तिनः ॥४२॥
जब भगवान् पूर्ण युवा हुए तब तीनों लोकोंकी अद्वितीय सुन्दरी प्रौढ़ यौवनवती नन्दा और सुनन्दाके साथ उनका विधिपूर्वक विवाह हुआ और उनके साथ वे क्रीड़ा करने लगे ॥१८॥ गुच्छोंके समान स्तनोंको धारण करनेवाली उन गौराङ्गी एवं नव यौवनवती नन्दा और सुनन्दाके बीचमें भगवान् ऐसे जान पड़ते थे मानो अङ्गमें लगी हुई दो लताओंके बीचमें संसारके कल्पवृक्ष ही हों ॥१९॥ संसारमें न वह कान्ति थी, न दीप्ति थी, न संपत्ति थी, और न वह कला ही थी जो भगवान् ऋषभदेव और नन्दा सुनन्दाको प्राप्त नहीं थी फिर उनके सुखका क्या वर्णन किया जाय ? ॥२०॥ नन्दाने भरतक्षेत्रको आनन्दित करनेवाले भरत नामक चक्रवर्ती पुत्रको और ब्राह्मी नामक पुत्रीको युगल रूपमें उत्पन्न किया ॥२१॥ और सुनन्दा नामक दूसरी रानीने महा बाहुबलसे युक्त बाहुबली नामक पुत्र तथा संसारमें अतिशय रूपवती सुन्दरी नामक पुत्रीको जन्म दिया ॥२२॥ भरत और ब्राह्मीके सिवाय भगवान्की सुनन्दा रानीके वृषभसेनको आदि लेकर अंठानबे पुत्र और हुए। उनके ये सभी पुत्र चरमशरीरी थे ॥२३॥ भगवान्ने अतिशय बुद्धिसे सम्पन्न अपने समस्त पुत्रोंके साथ-साथ ब्राह्मी और सुन्दरी नामक दोनों पुत्रियोंको भी अक्षर, चित्र, सङ्गीत और गणित आदि कलाओंके सागरमें प्रविष्ट कराया था। भावार्थ—अपने समस्त पुत्र-पुत्रियोंको उन्होंने विविध कलाओंमें पारङ्गत किया था ॥२४॥

अथानन्तर किसी समय बहुत भारी व्यथासे युक्त समस्त प्रजा, राजा नाभिराजसे प्रेरित

१. पात्रेण -म० । २. विधिवत्परिणीतया । ३. भरतक्षेत्रजनानन्दनम् । ४. सुष्टुवे (?) म० । ५. सुमेधावी म० । सुष्ठु बुद्धिसम्पन्नैः पुत्रैः सह (क० टि०) । ६. कुमाराभ्याम् म० ।

प्रभो कल्पद्रुमाः पूर्वं प्रजानां वृत्तिहेतवः। तेषां परिक्षयेऽभूवन् स्वयंच्युतरसेक्षवः ॥२६॥
दिव्येक्षुरसतृप्तानां रक्षितानां तवौजसा। प्रजानां नाथ ! दूरेण विस्मृताः कल्पपादपाः ॥२७॥
इदानीं छिन्नभिन्नाश्च न क्षरन्तीक्षवो रसम्। यान्ति कालानुभावेन मृदवोऽपि कठोरताम् ॥२८॥
फलभारवशान्नम्रा दृश्यन्ते तृणजातयः। न विद्मो वयमेताभिः कथमन्नविधिर्भवेत् ॥२९॥
सुरभीणां घटोध्नीनां महिषीणां च सन्ततम्। स्तनेभ्यो प्रक्षरत् भक्ष्यमभक्ष्यं वा तदुच्यताम् ॥३०॥
कण्ठाश्लेषोचिताः[1] पूर्वं सिंहव्याघ्रवृकादयः। अस्मानुद्वेजयन्तीशं[2] कुपुत्रा इव साम्प्रतम् ॥३१॥
अतः क्षुधामहाग्रस्ता जीवनोपायदर्शनात्। स्वामिन्ननुगृहाणैता रक्षणाच्च भयात् प्रजाः ॥३२॥
ततो वीक्ष्य क्षुधाक्षीणाः प्रजाः सर्वाः प्रजापतिः। कृत्वार्तिहरणं तासां दिव्याहारैः कृपान्वितः ॥३३॥
सर्वानुपदिदेशासौ प्रजानां वृत्तिसिद्धये। उपायान् धर्मकामार्थान् साधनान्यपि पार्थिवः ॥३४॥
असिर्मषी कृषिर्विद्या वाणिज्यं शिल्पमित्यपि। षट्कर्म शर्मसिद्ध्यर्थं सोपायमुपदिष्टवान् ॥३५॥
पशुपाल्यं ततः प्रोक्तं गोमहिष्यादिसङ्ग्रहम्[3]। वर्जनं क्रूरसत्त्वानां सिंहादीनां यथायथम् ॥३६॥
ततः पुत्रशतेनापि प्रजया च कलागमः। गृहीतः सुगृहीतं च कृतं शिल्पिशतं जनैः ॥३७॥
पुरग्रामनिवेशाश्च ततः शिल्पिजनैः कृताः। सखेटकर्वटाख्याश्च सर्वत्र भरतक्षितौ ॥३८॥
क्षत्रियाः क्षतितस्त्राणात्[4] वैश्या वाणिज्ययोगतः। शूद्राः शिल्पादिसम्बन्धाज्जाता वर्णास्त्रयोऽप्यतः ॥३९॥

हो एक साथ भगवान् वृषभदेवके पास पहुँची और स्तुति पूर्वक प्रणामकर कहने लगी ॥२५॥ हे प्रभो ! पहले, कल्पवृक्ष प्रजाकी आजीविकाके साधन थे, फिर उनके नष्ट होनेपर स्वयं ही जिनसे रस चू रहा था ऐसे इक्षु वृक्ष साधन हुए ॥२६॥ हे प्रजानाथ ! उन दिव्य इक्षु वृक्षोंके रससे प्रजा इतनी सन्तुष्ट हुई और आपके प्रतापने उसकी ऐसी रक्षा की कि उसने कल्पवृक्षोंको दूरसे ही भुला दिया ॥२७॥ परन्तु इस समय वे इक्षुवृक्ष छिन्न-भिन्न होनेपर भी रस नहीं देते हैं सो ठीक ही है क्योंकि समयके प्रभावसे कोमल भी कठोरताको प्राप्त हो जाते हैं ॥२८॥ यद्यपि फलोंके भारसे झुके हुए नाना प्रकारके तृण दिखाई देते हैं परन्तु हम लोग नहीं जानते कि इनसे अन्न कैसे प्राप्त किया जाता है ? ॥२९॥ घटके समान स्थूल स्तनोंको धारण करनेवाली गायों और भैंसोंके स्तनोंसे भी कुछ झर रहा है सो वह भक्ष्य है या अभक्ष्य यह कहिये ॥३०॥ जो सिंह, व्याघ्र तथा भेड़िया आदि पहले कण्ठालिङ्गन करनेके योग्य थे हे नाथ ! अब वे ही इस समय कुपुत्रोंके समान हम लोगोंको भयभीत कर रहे हैं ॥३१॥ इसलिए हे स्वामिन् ! क्षुधाकी तीव्र बाधासे ग्रस्त इस प्रजाको जीवन निर्वाहके उपाय दिखाकर तथा भयसे उसकी रक्षाकर अनुगृहीत कीजिए ॥३२॥

तदनन्तर दयालु भगवान्ने समस्त प्रजाको भूखसे व्याकुल देख पहले तो दिव्य आहारके द्वारा सबकी पीड़ा दूर की फिर आजीविकाके निर्वाहके लिए सब उपाय तथा धर्म अर्थ और काम रूप साधनोंका उपदेश दिया ॥३३-३४॥ उन्होंने सुखकी सिद्धिके लिए अनेक उपायोंके साथ असि, मषी, कृषि, विद्या, वाणिज्य और शिल्प इन छह कर्मोंका भी उपदेश दिया ॥३५॥ तदनन्तर उन्होंने यह भी बताया कि गाय, भैंस आदि पशुओंका संग्रह तथा उनकी रक्षा करनी चाहिए और सिंह आदिक दुष्ट जीवोंका परित्याग करना चाहिए ॥३६॥

तदनन्तर भगवान्के सौ पुत्रों और प्रजाने कला शास्त्र सीखा, एवं लोगोंने सैकड़ों शिल्पी बनाकर उन्हें अपनाया ॥३७॥ जिससे शिल्पिजनोंने भरतक्षेत्रकी भूमिपर सब जगह गाँव, नगर तथा खेट, कर्वट आदिकी रचना की ॥३८॥ उसी समय क्षत्रिय, वैश्य और शूद्र ये तीन वर्ण भी उत्पन्न हुए। विनाशसे जीवोंकी रक्षा करनेके कारण क्षत्रिय, वाणिज्य-व्यापारके योगसे वैश्य और

---

१. कण्ठाश्लेषोदिताः म० । २. -तीशः म० । ३. संग्रहः म० । ४. क्षततस्त्राणात् म० ।

षड्भिः कर्मभिरासाद्य सुखितामर्थवत्तया । प्रजाभिस्तत्सुतुष्टाभिः प्रोक्तं कृतयुगं युगम् ॥४०॥
सेन्द्राः सुरास्तदागत्य कृत्वा राज्याभिषेचनम् । नाभेयस्य प्रजानां ते सौस्थित्यं विदधुः परम् ॥४१॥
अयोध्येति विनीतेति विनीतजलसङ्कुला । साकेतेति च विख्याता पुरी रेजे तदाधिकम् ॥४२॥
इक्ष्वाकुक्षत्रियज्येष्ठज्ञातिज्ञा[1] लोकबन्धुना । भूमौ वृषभनाथेन स्थापितास्तेऽत्र रक्षणे ॥४३॥
कुरवः कुरुदेशेशा[2] उग्रास्ते चोग्रशासनाः । न्यायेन पालनाद् भोजाः प्रजानामपरे मताः ॥४४॥
राजानश्च तथैवान्ये जाताः प्रकृतिरञ्जनाः । श्रेयःसोमप्रभाद्यैस्तैः कुरुपुत्रैस्तु भूरभात्[3] ॥४५॥
दिव्यान् भोगान् सुरानीतान् भुञ्जानस्य जगद्गुरोः । पूर्वलक्षाण्यशीतिश्च जग्मुराजन्मनस्ततः ॥४६॥
सोऽथ नीलाञ्जसां[4] दृष्ट्वा नृत्यन्तीमिन्द्रनर्तकीम् । बोधस्याभि[5]निबोधस्य निर्विवेदोपयोगतः ॥४७॥
ये रागहेतवो बाह्या भावाः प्रागभवन् भुवि । ते स्युरन्तर्निमित्तस्य शमे प्रशमहेतवः ॥४८॥
य एव विषया रम्या मतिविभ्रमकारिणः । प्रशमानुगुणे काले त एव स्युः शमावहाः ॥४९॥
स दध्यौ च स्वयं बुद्धो व्यावृत्तविषयस्पृहः । चिरं भोगसमासक्त्या लज्जितात्मात्मनात्मनः ॥५०॥
अहो परमवैचित्र्यं संसारस्य शरीरिणाम् । यत्र कर्मविधेयानामन्ये यान्ति विधेयताम्[6] ॥५१॥
सद्भावं दर्शयन्तीयमतिनृत्यति नर्तकी । हावभावरसप्रायं विचित्राभिनयाङ्गिका ॥५२॥
तोषिते मयि नृत्येन[7] शक्रः स्यात् किल तोषितः । ततस्तु सुखितामेषा सम्मोहादतिमन्यते ॥५३॥

शिल्प आदिके सम्बन्धसे शूद्र कहलाये ॥३९॥ उस समय असि, मषी आदि छह कर्मोंके द्वारा प्रजाने वास्तविक सुख प्राप्त किया और अत्यन्त सन्तुष्ट होकर उसने उस युगको कृतयुग कहा ॥४०॥ उसी समय इन्द्र सहित समस्त देवोंने आकर तथा भगवान् वृषभदेवका राज्याभिषेककर प्रजाको परम सुखी किया ॥४१॥ उस समय विनयी मनुष्योंसे व्याप्त अयोध्या, विनीता और साकेता नामसे प्रसिद्ध, भगवान्‌की जन्मपुरी अधिक सुशोभित हो रही थी ॥४२॥ जो इक्ष्वाकु क्षत्रियोंमें वृद्ध तथा जाति व्यवहारके जाननेवाले थे उन्हें लोकबन्धु भगवान् वृषभदेवने यहाँ रक्षाके कार्य-में नियुक्त किया ॥४३॥ जो कुरु देशके स्वामी थे वे कुरु, जिनका शासन उग्र-कठोर था वे उग्र और जो न्यायपूर्वक प्रजाका पालन करते थे वे भोज कहलाये ॥४४॥ इनके सिवाय प्रजाको हर्षित करनेवाले अनेक राजा और भी बनाये गये। उस समय श्रेयान्स तथा सोमप्रभ आदि कुरुवंशी राजाओंसे यह भूमि अत्यधिक सुशोभित हो रही थी ॥४५॥ तदनन्तर देवोपनीत दिव्य भोगों-को भोगते हुए भगवान्‌के जन्मसे लेकर तेरासी लाख पूर्व व्यतीत हो गये ॥४६॥

अथानन्तर किसी समय नृत्य करती हुई इन्द्रकी नीलाञ्जसा नामक नर्तकीको देख, मति-ज्ञानका उस ओर उपयोग जानेसे भगवान् ऋषभदेव विरक्त हो गये ॥४७॥ इस संसारमें जो पदार्थ पहले रागके कारण थे वे ही पदार्थ अब अन्तरङ्ग निमित्तके शान्त हो जानेपर शान्ति-के कारण हो गये ॥४८॥ जो विषय पहले बुद्धिमें विभ्रम उत्पन्न करनेवाले थे वे ही विषय अब शान्तिके अनुकूल समयके आनेपर शान्तिके उत्पादक हो गये ॥४९॥ जिनकी भोगाभिलाषा दूर हो चुकी थी, तथा चिरकाल तक भोगोंमें आसक्त रहनेके कारण जिनकी आत्मा स्वयं अपने आपसे लज्जित हो रही थी ऐसे भगवान् वृषभदेव अपने मनमें विचार करने लगे कि अहो! संसारके जीवोंकी बड़ी विचित्रता देखो, इस संसारके जीव स्वयं कर्मोंके आधीन हैं और दूसरे जीव उनकी आधीनताको प्राप्त हो रहे हैं ॥५०-५१॥ अभिनयके विविध अङ्गोंसे युक्त यह नर्तकी समीचीन भावको दिखाती हुई हाव-भाव तथा रसपूर्वक इस अभिप्रायसे अधिक नृत्य कर रही है कि मेरे नृत्यसे भगवान् प्रसन्न होंगे, उनके प्रसन्न होनेपर इन्द्र प्रसन्न होगा और इन्द्रकी प्रसन्नतासे मैं

१. ज्येष्ठा ज्ञातिज्ञा म०, ज्येष्ठज्ञातिना क० । २. कुरुदेशीऽसावुग्रस्ते । ३. -रभूत् म० । ४. नीलजसां म० । ५. बोधस्यापि म० । ६. विधीयतां म० । ७. नृत्तेव म० ।

धिग् जन्तोः परतन्त्रस्य[1] सुखानुभवनस्पृहाम् । पराराधनसक्तस्य यन्मनः सततातुकुलम् ॥५४॥
यत्स्वतन्त्राभिमानस्य सुखं तदपि किं सुखम् । स्वकर्मपरतन्त्रस्य भोगतृष्णाकुलात्मनः ॥५५॥
आत्माधीनं यदत्यन्तमात्माधीनस्य यत्सुखम् । नेन्द्रियार्थ[2]पराधीनं पराधीनस्य कर्मभिः ॥५६॥
नानन्तेनापि कालेन नृसुरासुरभोगकैः । तृप्तिर्जीवस्य संसारे नद्योघैरिव वारिधेः ॥५७॥
महाबलस्य विद्येशो[3] ललिताङ्गस्य नाकिनः । वज्रजङ्घनरेन्द्रस्य तथोत्तरकुरुस्थितेः ॥५८॥
श्रीधरस्य सुरेशस्य सुविधेरच्युतस्थितेः । वज्रनाभेश्च सर्वार्थसिद्धिदेवस्य पश्यतः ॥५९॥
न तृप्तिस्तैरभूद् भोगैर्दिव्यैश्चिरनिषेवितैः । यस्य तस्याद्य किं सा स्यात् सुलभैर्विपुलैरपि ॥६०॥
तस्मात् [4]सांसारिकं सौख्यं त्यक्त्वान्ते दुःखदूषितम् । मोक्षसौख्यपरिप्राप्त्यै प्रविशामि तपोवनम् ॥६१॥
त्रिज्ञानोपचितो राज्ये स्थितोऽहमितरो यथा । कालोपेक्षणमेतद्धि कालो हि दुरतिक्रमः ॥६२॥
ज्ञातपूर्वभवे तस्मिन्निति ध्यानपरे जिने । ब्रह्मलोकालया ज्ञात्वा लौकान्तिकसुरास्तदा ॥६३॥
कुर्वाणश्चन्द्रसङ्काशाश्चन्द्राकीर्णमिवाम्बरम् । नत्वा सारस्वतादित्यप्रमुखाः प्रोचुरीश्वरम् ॥६४॥
साधु नाथ ! यथाख्यातं स्वपरार्थहितं तथा । क्रियतां वर्तते कालो धर्मतीर्थप्रवर्तने ॥६५॥
चतुर्गतिमहादुर्गे दिग्मूढस्य प्रभो इदम् । मार्गं दर्शय लोकस्य मोक्षस्थानप्रवेशकम् ॥६६॥
विच्छिन्नसम्प्रदायस्य[5] मन्त्रस्येव चिरं प्रभो । सिद्धिमार्गस्य विश्वेश ! कुरु द्योतनमुद्यतः ॥६७॥

अधिक सुखी हो सकूँगी । परन्तु यह भ्रान्ति वश ऐसा मान रही है ॥५२-५३॥ पराधीन प्राणीकी जो सुखोपभोगकी इच्छा है उसे धिक्कार है क्योंकि पराधीन मनुष्यका मन निरन्तर आकुल रहता है ॥५४॥ और अपने आपको स्वतन्त्र माननेवालेका जो सुख है वह भी क्या सुख है ? क्योंकि वह भी तो अपने कर्मोंके परतन्त्र है तथा भोगोंकी तृष्णासे उसकी आत्मा व्याकुल रहती है ॥५५॥ आत्माधीन मनुष्यका जो सुख है वह आत्माके ही आधीन होनेसे अन्तातीत है और कर्माधीन मनुष्यका सुख इन्द्रिय-विषयोंके आधीन होनेसे अन्तातीत नहीं है ॥५६॥ जिस प्रकार नदियोंके प्रवाहसे समुद्रकी तृप्ति नहीं होती उसी प्रकार इस संसारमें मनुष्य सुर तथा असुरोंके सुखोंसे अनन्तकालमें भी जीवकी तृप्ति नहीं हो सकती ॥५७॥ मैं पहले विद्याधरोंका राजा महाबल था, फिर ललिताङ्ग देव हुआ, फिर वज्रजङ्घ राजा हुआ, फिर उत्तरकुरुमें आर्य हुआ, फिर श्रीधर देव हुआ, फिर सुविधि राजा हुआ, फिर अच्युतेन्द्र हुआ, फिर वज्रनाभि हुआ और फिर सर्वार्थसिद्धिका देव हुआ । चिरकाल तक भोगे हुए उन दिव्य भोगोंसे जिसे उस समय तृप्ति नहीं हुई उसे आज भले ही जो सुलभ और अधिक हों इन भोगोंसे क्या तृप्ति हो सकती है ? ॥५८-६०॥ इसलिए जो अन्तमें दुःखसे दूषित है ऐसे सांसारिक सुखको छोड़कर मैं मोक्ष-सुखकी प्राप्तिके लिए तपोवनमें प्रवेश करता हूँ ॥६१॥ हाय, मैं मति श्रुत और अवधि इन तीन ज्ञानोंसे युक्त होकर भी साधारण मनुष्यके समान राज्यमें स्थित रहा; यह मेरी समयकी उपेक्षा ही है अर्थात् मैंने व्यर्थ बीतते हुए समयकी ओर दृष्टि नहीं दी । यथार्थमें समयका उल्लंघन करना कठिन है—जिस समय जो जैसा होनेवाला है वैसा ही होता है ॥६२॥ पूर्व भवोंको जाननेवाले जिनेन्द्र भगवान् जब इस प्रकारका ध्यान कर रहे थे तब ब्रह्मलोकके वासी सारस्वत, आदित्य आदि लौकान्तिक देव यह ज्ञातकर यहाँ आये । वे चन्द्रमाके समान थे अतः आकाशको चन्द्रमाओंसे व्याप्त जैसा करते हुए आये और नमस्कारकर भगवान्से बोले ॥६३-६४॥

हे नाथ ! ठीक है, जिससे स्वपर कल्याण हो वही कीजिए । धर्म-तीर्थके प्रवर्तनका यही समय है ॥६५॥ हे प्रभो ! यह संसार चतुर्गति रूप महावनमें दिशाभ्रान्त हो रहा है इसे आप मोक्ष-स्थानमें प्रवेश करानेवाला मार्ग दिखलाइए ॥६६॥ हे प्रभो ! हे जगदीश्वर ! मन्त्रकी तरह

---

१. सुखानुवनस्पृहं (?) म० । २. तदिन्द्रियार्थपराधीन -म० । ३. विद्यानाम् ईट् विद्येट् तस्य । ४. विज्ञानोपचिते म० । ५. पारम्पर्येणोपदेशः सम्प्रदायो गुरुक्रम इत्यभिधानात् (क० टि०) ।

दुःखत्रयमहावर्त्ते दोषत्रयमहोरगे। भ्रमतां भव भर्तस्त्वं कर्णधारो भवोदधौ ॥६८॥
त्वं संसारमहाचक्राक्रमतो वेगशालिनः। उपदेशकरेणाशु विश्वमुत्तारय[1] प्रभो ॥६९॥
[2]विश्रमन्त्वधुना गत्वा सन्तस्त्वद्दर्शिताध्वना। ध्वस्तजन्मश्रमा [3]नित्यसौख्ये त्रैलोक्यमूर्धनि ॥७०॥
कीर्त्या लौकान्तिकैर्वाचः स्वयम्बुद्धस्य तस्य ताः। [4]पूजार्थमेव सञ्जाताः पत्युरापो यथा ह्यपाम् ॥७१॥
सुत्रामाद्यैश्च सम्प्राप्तैश्चतुर्विधसुरैर्नतैः। प्रोक्तं लौकान्तिकैः प्राक्तं यत्तदेव मुहुर्मुहुः ॥७२॥
ऋषभोऽभात् स्वयम्बुद्धो बोधितो विबुधैः करैः[5]। भानोः प्रबुद्धपद्मौघो यथा पद्ममहाह्रदः ॥७३॥
धीरपुत्रशतस्यासौ प्रविभक्तवसुन्धरः। कृती दशशतस्येव कराणां रविराबभौ ॥७४॥
अभिषिक्तस्ततो देवैः क्षीरार्णवजलैर्जिनः। दिग्धो गन्धैर्वरैर्वस्त्रैर्भूषामाल्यैर्विभूषितः ॥७५॥
दत्तास्थानो नृपैर्देवैर्वृतोऽभान्मणिभूषणैः[6]। पूर्वापरायतैर्मेरुर्यथाऽसौ कुलभूधरैः ॥७६॥
अथ वैश्रवणो दिव्यां निर्ममे शिविकां नवाम्। नाम्ना सुदर्शनां भूरिशोभयाऽपि सुदर्शनाम् ॥७७॥
ताराभरत्नजातीनां प्रभाभिरतिभास्वरा। मण्डलाकृतिशुभ्राभ्रधवलातपवारणा ॥७८॥

चिरकालसे जिसकी परम्परा टूट चुकी है ऐसे मोक्षमार्गका आप फिरसे प्रकाश कीजिए ॥६७॥ हे स्वामिन् ! जो जन्म, जरा, मरण, इन तीन दुःखरूपी भँवरोंसे युक्त है, तथा राग द्वेष मोह ये तीन दोषरूपी बड़े-बड़े सर्प जिसमें निवास कर रहे हैं ऐसे इस संसाररूपी सागरमें भ्रमण करनेवाले—गोता खानेवाले जीवोंके लिए आप कर्णधार होइए ॥६८॥ हे प्रभो ! आप उपदेशरूपी हाथके द्वारा इस वेगशाली घूमते हुए संसाररूपी महाचक्रसे सबको उतारो—सबकी रक्षा करो ॥६९॥ इस समय सत्पुरुष आपके द्वारा दिखलाये हुए मार्गसे चलकर तथा जन्म सम्बन्धी थकावटको दूरकर नित्य सुखसे सम्पन्न तीन लोकके शिखरपर विश्राम करें ॥७०॥ जिस प्रकार समुद्रके लिए चढ़ाया हुआ जल केवल उसकी पूजाके लिए है उसी प्रकार स्वयं ही प्रतिबोधको प्राप्त हुए भगवान्‌के लिए लौकान्तिक देवोंके वचन केवल पूजाके ही लिए थे। भावार्थ—लौकान्तिक देवोंके उपदेशके पहले ही भगवान् विरक्त हो चुके थे इसलिए उनके वचन केवल नियोग पूर्तिके लिए ही थे ॥७१॥ उसी समय इन्द्रको आदि लेकर चारों निकायके देव आ पहुँचे। उन्होंने भी नमस्कारकर वही कहा जो कि लौकान्तिक देवोंने इनके पूर्व बार-बार कहा था ॥७२॥ देवोंके द्वारा सम्बोधित स्वयं बुद्ध भगवान् ऋषभदेव, उस समय, जिसका कमल-समूह सूर्यकी किरणोंसे खिल उठा है उस महासरोवरके समान सुशोभित हो रहे थे ॥७३॥ धीर-वीर सौ पुत्रोंके लिए जिन्होंने पृथिवीका विभाग कर दिया था ऐसे कृतकृत्य भगवान् उस समय, एक हजार किरणोंके लिए अपना तेज वितरण करनेवाले सूर्यके समान सुशोभित हो रहे थे ॥७४॥ तदनन्तर देवोंने क्षीर समुद्रके जलसे जिनेन्द्र भगवान्‌का अभिषेक किया, उत्तम गन्धसे लेपन किया और उत्तमोत्तम वस्त्र, आभूषण तथा मालाओंसे उन्हें विभूषित किया ॥७५॥ सभामें विराजमान तथा मणिमय आभूषणोंसे विभूषित देव और राजाओंसे घिरे हुए भगवान् उस समय पूर्व-पश्चिम लम्बे कुलाचलोंसे घिरे हुए सुमेरुके समान सुशोभित हो रहे थे ॥७६॥

अथानन्तर कुबेरने एक नूतन दिव्य पालकी बनायी जो नामकी अपेक्षा सुदर्शना थी और अत्यधिक शोभासे भी सुदर्शना—सुन्दर थी ॥७७॥ वह पालकी आकाश अथवा उत्तम स्त्रीके समान जान पड़ती थी क्योंकि जिस प्रकार आकाश (ताराभरत्नजातीनां प्रभाभिरतिभास्वरा) तारा और श्रेष्ठ नक्षत्रोंकी प्रभासे अतिशय देदीप्यमान होता है, तथा उत्तम स्त्री नेत्रोंकी पुतलियों और नक्षत्रोंके समान देदीप्यमान रत्नोंकी प्रभासे उज्ज्वल होती है उसी प्रकार वह पालकी भी ताराओंके समान आभावाले रत्नोंकी प्रभासे अतिशय देदीप्यमान थी। जिस प्रकार आकाश

१. मुत्तरय म० । २. विश्राम- म० । ३. नित्यं सौख्ये म० । ४. पूर्वार्थमेव म० । ५. सुरैः म० ।
६. -रभून्मणि-म० ।

चलच्चामरसङ्घातहंसमालांशुकोज्ज्वला । आदर्शमण्डलाखण्डदीप्ति[1]दिङ्मुखमण्डला ॥७९॥
बुद्बुदापाण्डुगण्डान्ता मूर्धचन्द्रालिकाकृतिः । सन्ध्याभ्रखण्डसंरक्तविस्फुरद्विद्रुमाधरा ॥८०॥
पतज्जललवस्वच्छमुक्तादशनशोभिता । शुभकेतुपताकालीलीलाभुजलतोज्ज्वला ॥८१॥
दिङ्नागनासिका[2]जङ्घारम्भास्तम्भोरुशोभिनी । चित्रस्त्रीतारकालोका जगतीजघनस्थला ॥८२॥

(मण्डलाकृतिशुभ्राभ्र-धवलातपवारणा) मण्डलाकार सफेद मेघोंसे उज्ज्वल तथा सन्तापको दूर करनेवाला होता है और उत्तम स्त्री मण्डलाकार सफेद मेघावलीके समान उज्ज्वल और सन्ताप-को हरनेवाली होती है; उसी प्रकार वह पालकी भी मण्डलाकार सफेद मेघके समान उज्ज्वल छत्रसे युक्त थी ॥७८॥ जिस प्रकार आकाश (चलच्चामरसंघात-हंसमालांशुकोज्ज्वला) चञ्चल चमरोंके समूहके समान उड़ती हुई हंसमालासे देदीप्यमान तथा उज्ज्वल होता है, और उत्तम स्त्री चञ्चल चमरोंके समूह तथा हंसपंक्तिके समान सफेद वस्त्रोंसे युक्त होती है, उसी प्रकार वह पालकी भी हंसमालाके समान चञ्चल चमर और वस्त्रोंसे उज्ज्वल थी। जिस प्रकार आकाश (आदर्श-मण्डलाखण्डदीप्तिदिङ्मुखमण्डला) दर्पण तलके समान अखण्ड दीप्तिसे युक्त दिशाओंसे सहित होता है, और उत्तम स्त्रीका मुखमण्डल दर्पण तलकी अखण्ड दीप्तिसे देदीप्यमान दिशाके समान भास्वर होता है उसी प्रकार वह पालकी भी दर्पणोंके समूहसे समस्त दिशाओंको अखण्ड प्रति-भासित करनेवाली थी ॥७९॥ जिस प्रकार आकाश (बुद्बुदापाण्डुगण्डान्ता) जलके बबूलोंके समान सफेद प्रदेशोंसे युक्त होता है, और उत्तम स्त्रीके कपोल चन्दनकी बिन्दुओंसे सफेद होते हैं उसी प्रकार उस पालकीके छज्जोंका चौगिर्द प्रदेश भी बुद्बुदाकार मणिमय गोलकोंसे सफेद था। जिस प्रकार आकाश (मूर्धचन्द्रालिकाकृतिः) ऊपर विद्यमान चन्द्रमासे युक्त होता है और उत्तम स्त्री मस्तक तथा चन्द्राकार ललाटसे युक्त होती है उसी प्रकार वह पालकी भी ऊपर तनी हुई चाँदनीसे सहित थी। जिस प्रकार आकाश (सन्ध्याभ्रखण्डसंरक्त-विस्फुरद्विद्रुमाधरा) लाल-लाल चमकते हुए मूँगोंके समान सन्ध्याके लाल-लाल मेघखण्डोंको धारण करता है और उत्तम स्त्रीका अधरोष्ठ सन्ध्याकालीन मेघखण्ड तथा चमकते हुए लाल मूँगेके समान होता है, उसी प्रकार वह पालकी भी सन्ध्याकालीन मेघखण्डके समान लाल चमकदार मूँगाको धारण कर रही थी ॥८०॥ जिस प्रकार आकाश (पतज्जललवस्वच्छमुक्तादशनशोभिता) स्वच्छ मोतियों तथा दाँतोंके समान उज्ज्वल पड़ती हुई जलकी बूँदोंसे शोभित होता है और उत्तम स्त्री पड़ते हुए जलकण तथा उज्ज्वल मोतियोंके समान दाँतोंसे सुशोभित होती है उसी प्रकार वह पालकी भी पड़ते हुए जलकणोंके समान स्वच्छ मोतियोंके जड़ावसे सुशोभित थी। जिस प्रकार आकाश (शुभ्रकेतुपताकालीलीलाभुजलतोज्ज्वला) सुन्दर भुजलताओंके समान केतुके शुभ विमानपर फहराती हुई पताकाओंकी पंक्तिसे सुशोभित होती है और उत्तम स्त्री शुभध्वजदण्डसे युक्त पताकाओंकी पंक्तिके समान चञ्चल भुजलताओंसे उज्ज्वल होती है, उसी प्रकार वह पालकी भी उत्तम ध्वजापताकाओं और सुन्दर भुजाओंकी तुलना करनेवाली लताओंसे सुशोभित थी ॥८१॥ जिस प्रकार आकाश (दिग्नागनासिकाजङ्घारम्भास्तम्भोरुशालिनी) दिग्गजोंकी सूँड़ों और केलाके स्तम्भोंके समान सुशोभित उनकी मोटी-मोटी जङ्घोंसे अत्यधिक शोभित होता है और उत्तम स्त्री दिग्गजोंकी सूँड़के समान जङ्घाओं और केलाके स्तम्भोंके समान सुन्दर ऊरुओंसे सुशोभित होती है उसी प्रकार वह पालकी भी दिग्गजोंकी सूँड़ों और स्त्रियोंकी जङ्घाओंकी समा-नता करनेवाले केलेके स्तम्भोंसे अत्यधिक सुशोभित थी। जिस प्रकार आकाश (चित्रस्त्रीतारका-लोका) चित्रा नक्षत्रके आलोकसे युक्त होता है, और उत्तम स्त्री चित्रा नक्षत्र तथा ताराके समान देदीप्यमान होती है उसी प्रकार वह पालकी भी चित्रा नक्षत्र और ताराके समान प्रकाशसे युक्त

१. दीप्त म० । २. वासिता म० ।

वारिधारास्फुरद्धाराशुम्भत्कुम्भपयोधरा । तारापुष्पवती रम्या सुनक्षत्रबृहत्फला ॥८३॥
सुनीलघनकेशाऽसौ कुबेरेण सुदर्शना । द्यौरिवोत्तमयोषेव कौशिकाय[1] प्रदर्शिता ॥८४॥
अथ विज्ञापितो नाथः सुरनाथेन हर्षिणा । आपृच्छ्य पितृपुत्रादीन् परिवर्गं च संश्रितम् ॥८५॥
गृहीतचामरच्छत्रैः सेव्यमानः सुरेश्वरैः । स द्वात्रिंशदपदानुर्व्यां पद्भ्यामेव प्रचक्रमे ॥८६॥
लोकाञ्जलिपुटालोकशब्दाशीर्वादवन्दितः । शिविकामारुरोहेशः सवितेवोदयश्रियम् ॥८७॥
क्षितेः क्षितीश्वरोत्क्षिप्तां खमुत्पत्य सुरेश्वराः । सन्नाहिनः समूहुस्तां[2] शिरसाज्ञामिवेशितुः ॥८८॥
ततः शङ्खाः सभेरीका मुखरीकृतदिङ्मुखाः । दध्वनुर्वंशवीणाश्च पटहा बहुनिस्वनाः ॥८९॥
नानानीकैः सुरैरूर्ध्वं चतुरङ्गबलैरधः । राजक्षत्रोग्रभोजाद्यैर्व्रजद्भिर्व्याप्तमीश्वरैः ॥९०॥
ऊर्ध्वं नवरसा जाता नृत्यदप्सरसां स्फुटाः । नाभेयेन [3]विमुक्तानामधः शोकरसोऽभवत् ॥९१॥

थी। जिस प्रकार आकाश (जगतीजघनस्थला) पृथिवीरूपी मध्यम स्थलसे सहित होती है और उत्तम स्त्री पृथिवीके समान स्थूल नितम्ब स्थलसे युक्त होती है, उसी प्रकार वह पालकी भी मध्य-लोकमें विराजमान थी ॥८२॥ जिस प्रकार आकाश (वारिधारास्फुरद्धाराशुम्भत्कुम्भपयोधरा) जलसे भरे एवं पड़ती हुई धारोंसे सुशोभित घड़ोंके समान मेघोंसे युक्त होता है और उत्तम स्त्रीके स्तनकलश जलधाराके समान शोभायमान हारसे सुशोभित रहते हैं उसी प्रकार वह पालकी भी जलधाराके समान सुशोभित हारों-मणिमालाओंसे अलंकृत घड़ोंमें जलको धारण करनेवाली थी—जलसे भरे घड़ोंसे युक्त थी। जिस प्रकार आकाश (तारापुष्पवती रम्या) फूलोंके समान ताराओंसे युक्त एवं मनोहर होता है और उत्तम स्त्री तारोंके समान फूलोंसे युक्त एवं मनोहर रहती है उसी प्रकार वह पालकी भी ताराओंके समान चमकीले फूलोंसे युक्त और मनोहर थी। जिस प्रकार आकाश (सुनक्षत्रबृहत्फला) बड़े-बड़े फलोंके समान उत्तम नक्षत्रोंसे युक्त होता है और उत्तम स्त्री अच्छे नक्षत्रोंके विशाल परिणामसे सहित होती है उसी प्रकार वह पालकी भी उत्तम नक्षत्रोंके समान बड़े-बड़े फलोंसे युक्त थी ॥८३॥ और जिस प्रकार आकाश (सुनीलघनकेशा) केशोंके समान अत्यन्त नीले मेघोंसे युक्त रहता है और उत्तम स्त्री अत्यन्त काले एवं सघन केशों-से युक्त होती है उसी प्रकार वह पालकी भी सघन केशोंके समान उत्तम नील मणियोंसे खचित थी। ऐसी वह सुदर्शना पालकी कुबेरने इन्द्रके लिए दिखलायी ॥८४॥

अथानन्तर हर्षसे भरे हुए इन्द्रने पालकीपर सवार होनेके लिए भगवान्‌से प्रार्थना की। तब भगवान् अपने माता-पिता पुत्र तथा आश्रित परिजनोंसे पूछकर बत्तीस कदम पृथिवीपर पैदल ही चले। उस समय चमर तथा छत्र लेकर इन्द्र उनकी सेवा कर रहे थे ॥८५-८६॥ तदनन्तर लोगोंने हाथ जोड़कर जय जयकार करते हुए जिन्हें नमस्कार किया था और माता पिता आदि गुरुजनोंने जिन्हें आशीर्वाद दिया था ऐसे भगवान् ऋषभदेव पालकीपर उस तरह आरूढ हुए जिस तरह कि सूर्य उदयकालीन लक्ष्मीपर आरूढ होता है ॥८७॥ उस पालकीको पृथिवीसे तो राजाओंने उठाया पर बादमें तैयार खड़े हुए इन्द्रोंने उसे आकाशमें उछलकर इस प्रकार धारण कर लिया जिस प्रकार कि प्रभुकी आज्ञाको शिरसे धारण करते हैं ॥८८॥ तदनन्तर दिशाओंको मुखरित करनेवाले शङ्ख, भेरी, बाँसुरी, वीणा तथा जोरदार शब्द करनेवाले नगाड़े शब्द करने लगे ॥८९॥ उस समय ऊपर आकाश तो देवोंकी नाना प्रकारकी चतुरङ्ग सेनाओंसे व्याप्त था और नीचे पृथिवी तल साथ-साथ चलनेवाले अनेक राज-क्षत्रियों तथा उग्रवंशी, भोज-वंशी आदि राजाओंसे व्याप्त था ॥९०॥ ऊपर आकाशमें नृत्य करनेवाली अप्सराओंके शृङ्गारादि नौ रस प्रकट हो रहे थे और नीचे पृथिवी तलपर भगवान्‌के द्वारा छोड़े हुए माता-पिता आदिके

१. इन्द्राय । २. समायुः म० । ३. किमुक्तानाम् म० ।

सेव्यमानः सुरैरीशः सिद्धार्थं वनमाप सः । अशोकचम्पकायुग्मच्छदचूतवटैश्रितम् ॥९२॥
अवतीर्णः स सिद्धयर्थी[1] शिविकायाः स्वयं यथा । देवलोकशिरस्थाया दिवः सर्वार्थसिद्धितः ॥९३॥
ततः प्राह प्रजास्तत्र शोकं त्यजत भोः प्रजाः । संयोगो[2] हि वियोगाय स्वदेहैरपि देहिनाम् ॥९४॥
राजा वो रक्षणे दक्षः स्थापितो भरतो मया । स्वधर्मवृत्तिभिर्नित्यं सेव्यतां सेव्यतां[3] श्रितः ॥९५॥
एवमुक्त्वा प्रजा यत्र प्रजापतिमपूजयन् । प्रदेशः स[4] प्रजागाख्यो यतः पूजार्थयोगतः ॥९६॥
आपृच्छ्य ज्ञातिवर्गं च राजकं च नतं विभुः । त्यक्त्वाऽन्तर्बहिः सङ्गं संयमं प्रतिपन्नवान् ॥९७॥
पञ्चमुष्टिभिरुत्खातान् विडौजा[5] मूर्धजान् विभोः । प्रतिगृह्य कृतान् मूर्ध्नि चिक्षेप क्षीरवारिधौ ॥९८॥
जाते निःक्रमणे जैने कृत्वा पूजां सुरासुराः । यथायथं ययुर्नत्वा चिन्ताक्रान्ताश्च मानवाः ॥९९॥
राजचत्रोग्रभोजाद्याः स्वामिभक्ता[6] महानृपाः । चतुःसहस्रसङ्ख्याता मुख्या नाग्न्यस्थितिं श्रिताः ॥१००॥
कायोत्सर्गेण षण्मासान् परीषहसहो जिनः । महातपाश्चतुर्ज्ञानी तस्थौ मौनी गिरिस्थिरः ॥१०१॥
नृपास्तेऽपि तथा तस्थुः कायोत्सर्गेण निश्चलाः । परमार्थमजानन्तः स्वामिच्छन्दानुवर्तिनः ॥१०२॥
भृत्यपुत्रकलत्राणि क्षुत्पिपासाकुलात्मनाम् । अद्य श्वो नोऽन्नमादाय[7] समेष्यन्तीत्यमी विदुः ॥१०३॥

शोक-रस प्रकट हो रहा था ॥९१॥ अनेक देवोंसे सेवित भगवान् अशोक, चम्पा, सप्तपर्ण, आम, और वट वृक्षोंसे व्याप्त सिद्धार्थ नामक वनमें पहुँचे ॥९२॥ सिद्धि अर्थात् मोक्षकी इच्छा करनेवाले भगवान् वहाँ पालकीसे उस प्रकार उतरे जिस प्रकार कि पहले स्वर्ग लोकके शिखरपर स्थित सर्वार्थसिद्धि विमानसे उतरे थे ॥९३॥

तदनन्तर भगवान्ने प्रजासे कहा कि हे प्रजाजनो! तुम लोग शोक छोड़ो क्योंकि प्राणियोंका अन्य वस्तुओंकी बात जाने दो, अपने शरीरके साथ भी जो संयोग है वह वियोगके ही लिए है। भावार्थ—जब शरीरका भी वियोग हो जाता है तब अन्य वस्तुओंकी तो बात ही क्या है? ॥९४॥ अतिशय चतुर भरतको मैंने आप लोगोंकी रक्षा करनेमें नियुक्त किया है। आप लोग निरन्तर अपने धर्ममें स्थिर रहते हुए उसकी सेवा करें, वह आपकी सेवाका पात्र है ॥९५॥ भगवान्के ऐसा कहनेके बाद प्रजाने उनकी पूजा की। प्रजाने जिस स्थानपर भगवान्की पूजा की वह स्थान आगे चलकर पूजाके कारण प्रयाग इस नामको प्राप्त हुआ ॥९६॥ प्रभुने कुटुम्बके लोगों तथा नम्रीभूत राजाओंसे पूछकर अन्तरङ्ग, बहिरङ्ग दोनों प्रकारके परिग्रहका त्याग कर संयम धारण कर लिया ॥९७॥ इन्द्रने पञ्चमुष्टियोंके द्वारा उखाड़े हुए भगवान्के शिरके बालोंको उठाकर पिटारेमें रख लिया और 'इन्हें भगवान्ने शिरपर धारण किया था।' यह विचारकर बड़े आदरसे उन्हें क्षीर-समुद्रमें क्षेप दिया ॥९८॥ इस प्रकार दीक्षाकल्याणक होनेपर समस्त सुर और असुर भगवान्की पूजाकर यथायोग्य अपने-अपने स्थानोंपर चले गये। साथ ही चिन्तासे भरे हुए मनुष्य भी नमस्कार कर यथायोग्य अपने-अपने स्थानोंपर गये ॥९९॥ उस समय इक्ष्वाकु, कुरु, उग्र तथा भोज आदि वंशोंके चार हजार बड़े-बड़े मुख्य स्वामिभक्त राजाओंने भी नग्नदीक्षा धारण की ॥१००॥

परीषहोंको सहनेवाले, महातपस्वी, चार ज्ञानके धारक और पर्वतके समान निश्चल भगवान् छह माहका कायोत्सर्ग लेकर मौनसे विराजमान हुए ॥१०१॥ साथ ही वे अन्य राजा भी जो परमार्थको नहीं जानते थे मात्र स्वामीकी इच्छानुसार काम करना चाहते थे, निश्चल हो कायोत्सर्गसे स्थित हो गये ॥१०२॥ जब उनकी आत्मा भूख और प्याससे व्याकुल हो उठी तब वे विचार करने लगे कि हमारे नौकर, पुत्र अथवा स्त्रियाँ हमारे लिए भोजन लेकर आज-कलमें

१. सिद्धार्थी म० । २. संयोगी म० । ३. सततं श्रियः म० । ४. प्रजागारो म० । ५. इन्द्रः । ६. स्वामिभक्तमहानृपाः म० । ७. नः अस्माकम् ।

ततः कच्छमहाकच्छमरीच्यग्रेसरास्तके । षड्मासाभ्यन्तरे भग्नाः क्षुधाद्युग्रपरीषहैः ॥१०४॥
तेषां क्षुत्क्षामगात्राणां भ्रमती दृष्टिरस्थिरा । भ्रान्तदृष्टेर्भविष्यन्त्याः पूर्वरङ्गमिवाकरोत् ॥१०५॥
दृष्टं तैमिरिकं कैश्चिदन्धकारेऽपि तादृशे । स्पर्धयेव[1] हि चन्द्राद्यैः शतचन्द्रं नभस्तलम् ॥१०६॥
श्रुतं शब्दात्मकं विश्वं भावयद्भिरिवापरैः । स्वशब्दलिङ्गमाकाशमिति वैशेषिकागमम् ॥१०७॥
पतद्भिरपि तत्रान्यैर्न मनागपि चेतितम्[2] । अचित्स्वभावमात्मानमनुकर्तुमिवोद्यतैः ॥१०८॥
चेतयन्तोऽपि तत्रान्ये स्वैरमासितुमप्यलम् । निरीहात्मतया जग्मुः स्वां साङ्ख्यपुरुषस्थितिम् ॥१०९॥
केचित् निरन्वयध्वस्तबुद्धयो नैव सस्मरुः । पूर्वापरस्य मूर्च्छार्ताः क्षणभङ्गानुवर्तिनः ॥११०॥
इति ते क्षुत्पिपासाद्यैरतिव्याकुलबुद्धयः । कायोत्सर्जनमुत्सृज्य दुद्रुवुश्च शनैः शनैः ॥१११॥
स्वामिनं कौलपुत्रांश्च मर्यादां चानुवर्तते । तावदेव जनो यावद् स्वशरीरस्य निर्वृतिः ॥११२॥
भक्षणं फलमूलादेरपां पानावगाहनम् । कुर्वतां नग्नरूपेण स्वयंग्राहेण भूभृताम् ॥११३॥
भो भो माऽनेन रूपेण स्वयंग्राहविरोधिना । प्रवर्त्तध्वमिति व्यक्ताः खेऽभवन्मरुतां[3] गिरः ॥११४॥
ततस्ते त्रपितास्त्रस्ता दिशो वीक्ष्य महीक्षितः । चक्रुर्वेषपरावर्तं कुशचीवरवल्कलैः ॥११५॥

आते ही होंगे ॥१०३॥ तदनन्तर कच्छ, महाकच्छ और मरीचि जिनमें अग्रेसर थे, ऐसे वे कृत्रिम मुनि छह माहके भीतर ही क्षुधा आदि कठिन परीषहोंसे भ्रष्ट हो गये ॥१०४॥ भूखके कारण जिनके शरीर अत्यन्त कृश हो गये थे ऐसे इन कृत्रिम मुनियोंकी अस्थिर दृष्टि घूमने लगी तथा ऐसी जान पड़ने लगी मानो आगे होनेवाली भ्रान्त दृष्टि (भ्रान्त श्रद्धान)का पूर्वाभ्यास ही कर रही हो ॥१०५॥ कितने ही लोगोंने अन्धकारका समूह देखा अर्थात् उनकी आँखोंके सामने अन्धकार ही अन्धकार छा गया, उनके नेत्र क्षुधाके कारण चन्द्रमाके समान पाण्डुवर्ण हो गये तथा उन्हें उस अन्धकारके बीच आकाशमें एकके बदले सौ चन्द्रमा दिखाई देने लगे ॥१०६॥ कितने ही लोगोंने समस्त संसारको शब्दमय सुना अर्थात् उनके कानोंके सामने शब्द ही शब्द सुनाई पड़ने लगा जिससे ऐसा जान पड़ता था मानो वे 'शब्द रूप लक्षणसे सहित आकाश है' इस वैशेषिक मतके शास्त्रका ही चिन्तन कर रहे थे ॥१०७॥ कितने ही लोग जमीनपर गिरने लगे तथा उन्हें कुछ भी चेत नहीं रहा जिससे ऐसा जान पड़ता था मानो वे आत्माको जड़-स्वभाव करनेके लिए ही उद्यत हुए हों अर्थात् जड़स्वभाव है यह चार्वाकका मत ही प्रचलित करना चाहते हों ॥१०८॥ कितने ही लोगोंको चेत (होश) तो था पर वे स्वच्छन्दता-पूर्वक रहनेके लिए निरीह वृत्तिके कारण अपने आपकी सांख्यमत संमत पुरुष जैसी स्थिति बतलाने लगे ॥१०९॥ जिनकी बुद्धि निरन्वय नष्ट हो गई थी तथा जो मूर्च्छासे दुःखी हो रहे थे, ऐसे कितने ही लोगोंको आगे-पीछेका कुछ भी स्मरण नहीं रहा, जिससे ऐसा जान पड़ता था मानो वे बौद्धोंके क्षणभङ्गवादका ही अनुकरण कर रहे हों ॥११०॥ इस प्रकार भूख-प्यास आदिसे जिनकी बुद्धि अत्यन्त व्याकुल हो गई थी ऐसे वे सब कायोत्सर्ग छोड़कर धीरे-धीरे भागने लगे ॥१११॥ सो ठीक ही है क्योंकि जब तक अपने शरीरकी सन्तोषपूर्ण स्थिति रहती है तभी तक मनुष्य स्वामी, कुल, पुत्र और मर्यादाका अनुसरण करता है ॥११२॥ वे राजा नग्नरूपमें रहकर ही फल-मूल आदिका भक्षण तथा जलका पीना और उसमें प्रवेश करना आदि कार्य स्वेच्छासे करनेके लिए उद्यत हुए तो उसी समय आकाशमें देवोंके यह शब्द प्रकट हुए कि स्वयं ग्राहके विरोधी इस नग्नवेषसे आपलोग ऐसी प्रवृत्ति न करें ॥११३-११४॥ तदनन्तर देवोंके उक्त शब्द सुनकर वे राजा बड़े लज्जित हुए और भयभीत हो दिशाओंकी ओर देख उन्होंने कुशा, चीवर तथा वल्कल आदिसे नग्नवेश बदल लिया अर्थात् कुशा, चीवर एवं

---

१. द्विचन्द्राद्यैः म०, ग०, ङ० । क्षुधावशाच्चन्द्रवन्नेत्रैः (क० टि०)। २. चेतिकं म० । ३. महतां म० ।

पुनः कृत्वा सुविश्रब्धास्ते दग्धोदरपूरणम् । स्वस्थाः कार्यं विचार्योचुः स्वस्थे चित्ते हि बुद्धयः ॥११६॥
कोऽभिप्रायः प्रभोरस्य त्यक्तभोगस्य लक्ष्यताम् । नवैहिकफलायेदं चेष्टितं सुष्ठुदुष्करम् ॥११७॥
तथा ह्यनेन भो दृष्टा सम्पदो विपदो यथा । रत्यरत्योर्विघातेन विषयाश्च विषोपमाः ॥११८॥
सालङ्कारं परित्यक्तं वसनं व्यसनं यथा । मूलोत्खाताः स्वहस्तेन मूर्धजा वैरिणो यथा ॥११९॥
शरीरमपि संन्यस्तं[1] संन्यस्ताहारवस्तुना । तदस्याभिमतं किञ्चिदामुत्रिकफलं भवेत् ॥१२०॥
नैष्ठिकव्रतमास्थाय स्वामिन्येवं व्यवस्थिते । किं नः कर्तव्यमित्येकं न विद्मः साम्प्रतं वयम् ॥१२१॥
निष्क्रान्तानामनेनामा स्वदेशात्[2] प्रतिनिवर्तनम् । नैव पुष्णाति नश्छायामपायबहुलं च तत् ॥१२२॥
न शक्ताश्चरितुं चर्यां यदि नाम वयं विभोः । वनवासित्वसाम्येन किं न कुर्मोऽनुवर्तनम्[3] ॥१२३॥
इति निश्चित्य तेऽन्योन्यं पाण्डुपत्रफलाशिनः । जटावल्कलिनो जातास्तापसा वनवासिनः ॥१२४॥
यो मरीचिकुमारस्तु नप्ता तप्ततनुर्विभोः । दृष्टवान् जलभावेन तृषामरुमरीचिकाम् ॥१२५॥
जलावगाहनान्यस्य गजस्येव विदाहिनः । मृदवश्च मृदश्चक्रुः शरीरपरिनिर्वृतिम् ॥१२६॥
यत्तन्मानकषायी स काषायं वेषमग्रहीत् । एकदण्डी शुचिर्मुण्डी परिव्राड्व्रतपोषणम् ॥१२७॥
नमिश्च विनमिश्चोभौ भोगयाचनयातुरौ । तावुद्विग्नौ विभोर्लग्नौ पादयोर्दुःस्थितौ स्थितौ ॥१२८॥

वृक्षोंकी छाल आदि धारणकर नग्न वेष छोड़ दिया ॥११५॥ इसके बाद निश्चिन्ततासे अधम-उदरकी पूर्तिकर जब वे स्वस्थ हुए तब कार्यका विचारकर परस्पर कहने लगे सो ठीक ही है क्योंकि चित्तके स्वस्थ होनेपर ही बुद्धि उत्पन्न होती है—विचारशक्ति आती है ॥११६॥

वे कहने लगे कि भगवान्‌ने समस्त भोगोंको छोड़ दिया है सो इसमें इनका क्या अभिप्राय है यह ज्ञात किया जाय। ऐहिक फलके लिए तो इनकी यह अतिशय कठिन चेष्टा नहीं हो सकती क्योंकि इन्होंने सम्पत्तियोंको विपत्तियोंके समान देखा है, रति और अरतिको नष्ट कर विषयोंको विषके समान समझा है, वस्त्राभूषणको दुःखके समान छोड़ दिया है, शिरके बालोंको शत्रुओंकी तरह अपने हाथसे जड़से उखाड़ दिया है और आहार-पानीका परित्याग कर दिया है इसलिए शरीरको भी छोड़ा हुआ समझना चाहिए। इससे जान पड़ता है कि इन्हें कोई पारलौकिक फल ही अभिप्रेत होगा ॥११७-१२०॥ जबकि भगवान् नैष्ठिक व्रत लेकर इस प्रकार विराजमान हैं—कुछ बोलते-चालते नहीं हैं, तब इस स्थितिमें हमें क्या करना चाहिए, इस एक बातको हम लोग इस समय बिलकुल नहीं जानते ॥१२१॥ हमलोग इनके साथ अपने देशसे निकल आये हैं इसलिए अब लौटकर जाना तो हमारी शोभाको नहीं बढ़ाता। साथ ही लौटकर जाना अनेक बाधाओं-कष्टोंसे भरा है ॥१२२॥ यदि हम भगवान्‌की चर्याका आचरण करनेके लिए समर्थ नहीं हैं तो क्या वनवासीपनेकी सदृशतासे हम इनका अनुसरण नहीं कर सकते? भावार्थ—यदि हमसे इनके समान कुछ तपश्चर्या नहीं बनती है तो इनके समान वनमें तो रह सकते हैं ॥१२३॥ आपसमें ऐसा निश्चयकर वे भ्रष्ट राजा, पके पत्र और फलोंको खाते हुए जटा और वृक्षोंकी छाल धारणकर वनवासी तापस बन गये ॥१२४॥ उनमें मरीचिकुमार नामका जो भगवान्‌का पोता था, प्याससे उसका शरीर संतप्त हो रहा था, उसने भ्रान्तिवश मरुस्थलकी मरीचिकाको ही जल समझ लिया तथा उसमें लोटने लगा सो जिस प्रकार जलमें प्रवेश करना संतप्त हाथीके शरीरको शान्ति पहुँचाता है उसी प्रकार कोमल मिट्टीने उसके शरीरको कुछ शान्ति पहुँचाई ॥१२५-१२६॥ मरीचि बड़ा मानकषायी था इसलिए उसने परिव्राजकोंके व्रतको पोषण करनेवाला गेरुआ वेष स्वीकार कर लिया। वह एक दण्ड अपने साथ रखता था, स्नानादिसे अपनेको पवित्र मानता था तथा शिर मुड़ाये रखता था ॥१२७॥

इधर जो भोगोंकी याचनासे अतिशय दुःखी थे, भोगोंके अभावके कारण उद्विग्न थे,

---

१. त्यक्तं । २. स्वदेशान् म० । ३. -ऽनुवर्ततं म० ।

धूतासनोऽवधिज्ञानात् तद्बुद्ध्वा धरणः फणी । आजगाम मुनेर्भक्त्या मौनं सर्वार्थसाधनम् ॥१२९॥
विश्वास्य दिव्यरूपोऽसौ भ्रातरौ [1]भ्रातरौ यथा । महाविद्यां ददौ ताभ्यां विद्यालाभो गुरोर्वशात् ॥१३०॥
योऽगो विद्याधराधारो विजयार्द्ध इतीरितः । सोऽपि ताभ्यां [2]ततो लब्धः किं न स्याद् गुरुसेवया ॥१३१॥
स नमिर्दक्षिणश्रेण्यां पञ्चाशन्नगरेश्वरः । विनमिश्चोत्तरश्रेण्यामभूत् षष्टिपुरेश्वरः ॥१३२॥
अध्यतिष्ठन्नमिः श्रेष्ठं नगरं रथनूपुरम् । नभस्तिलकम[3]न्वर्थं विनमिः सह बान्धवैः ॥१३३॥
विद्याधरजनो धीरौ[4] प्राप्य तौ परमेश्वरौ । उपरिस्थितमात्मानं भुवनस्याप्यमन्यत ॥१३४॥
अथाऽसौ प्रतिमास्थोऽपि प्रविश्य भगवान् स्थि[5]तः । परीषहाग्निविध्या[6]पिसद्ध्यानजलधौ स्थिरः ॥१३५॥
मत्वेतरमनुष्याणां भवतां च भविष्यताम् । मोक्षाय विजिगीषूणां भुक्त्यभावेऽल्पशक्तिताम् ॥१३६॥
धर्मार्थकाममोक्षेषु धर्मः क्षान्त्यादिलक्षणः । पुरु[7]षार्थः स्थितो मुख्यो मोक्षकामार्थसाधनः ॥१३७॥
प्राणाधिष्ठानतन्निष्ठं शरीरं धर्मसाधनम् । प्राणैरधिष्ठितः प्राणी [8]प्राणाश्चान्नैरधिष्ठिताः ॥१३८॥
पारम्पर्येण धर्मस्य ततोऽन्नमपि साधनम् । प्राणिनामल्पवीर्याणां प्रधानस्थितिकारणम् ॥१३९॥
अतस्तस्यानवद्यस्य ग्रहणे विधिमर्थिनाम् । शासनस्थितयेऽन्नस्य दर्शयामीह भारते ॥१४०॥
इति ध्यात्वा स्वयंशक्तः स क्षुधादिविनिर्ग्रहे । [9]परार्थं मतिमाधत्त गोचरान्नपरिग्रहे ॥१४१॥

तथा दुःखमय स्थितिमें स्थित थे, ऐसे नमि और विनमि दोनों राजपुत्र भगवान्‌के चरणोंमें आ लगे ॥१२८॥ उसी समय जिसका आसन कम्पायमान हुआ था ऐसा धरणेन्द्र अवधिज्ञानसे यह समाचार जान जिनेन्द्रकी भक्तिपूर्वक वहाँ आया, सो ठीक ही है क्योंकि मौन सब कार्योंको सिद्ध करनेवाला है ॥१२९॥ दिव्यरूपको धारण करनेवाले उस धरणेन्द्रने उन दोनों भाइयोंको अपने भाइयोंके समान विश्वास दिलाकर महाविद्या प्रदान की सो ठीक ही है क्योंकि विद्याकी प्राप्ति गुरुसे ही होती है ॥१३०॥ और जो विद्याधरोंका निवासभूत विजयार्ध नामका पर्वत है वह भी उन दोनोंने धरणेन्द्रसे प्राप्त किया सो ठीक ही है क्योंकि गुरुसेवासे क्या नहीं होता है ? ॥१३१॥ उनमें नमि दक्षिणश्रेणीके पचास नगरोंका स्वामी हुआ और विनमि उत्तर श्रेणीके साठ नगरोंका अधिपति हुआ ॥१३२॥ नमि अपने बन्धुजनोंके साथ रथनूपुर नामक श्रेष्ठ नगरमें निवास करने लगा और विनमि सार्थक नाम धारण करनेवाले नभस्तिलक नामक नगरमें रहने लगा ॥१३३॥ विद्याधर लोग उन धीर-वीर राजाओंको पाकर अपने-आपको संसारसे ऊपर मानने लगे ॥१३४॥

अथानन्तर—यद्यपि धीर-वीर भगवान् परीषहरूपी अग्निको बुझानेवाले प्रशस्त ध्यान-रूपी सागरमें प्रवेशकर प्रतिमायोगसे विराजमान थे—छह माहसे प्रतिमायोग धारण करनेपर भी आहारके विना उन्हें कुछ भी आकुलता नहीं थी तो भी 'मोक्ष प्राप्त करनेके लिए कर्मरूपी शत्रुओंको जीतनेकी इच्छा करनेवाले जो अन्य मनुष्य वर्तमानमें हैं तथा आगे होंगे आहारके अभावमें उनकी शक्ति क्षीण हो जायगी' ऐसा मानकर वे विचार करने लगे कि क्षमा आदि लक्षणोंसे युक्त धर्म-पुरुषार्थ, धर्म, अर्थ, काम और मोक्ष इन चारों पुरुषार्थोंमें मुख्य है, वही मोक्ष, काम और अर्थका साधन है। धर्मका साधन शरीर है और शरीर प्राणोंका आधार होनेसे प्राणोंपर निर्भर है। प्राणी प्राणोंसे अधिष्ठित है अर्थात् प्राणोंके द्वारा जीवित है और प्राण अन्नसे अधिष्ठित हैं अर्थात् अन्नसे ही प्राण सुरक्षित रहते हैं। इसलिए परम्परासे अन्न भी धर्मका साधन है। अल्पशक्तिके धारक मनुष्योंकी स्थिति प्रधान पुरुषार्थ—धर्ममें बनी रहे इसमें अन्न भी कारण है। अतः इस भरत क्षेत्रमें शासनकी स्थिरताके लिए मैं आहारके इच्छुक मनुष्योंको निर्दोष आहार ग्रहण करनेकी विधि दिखाता हूँ ॥१३५-१४०॥ ऐसा विचारकर, यद्यपि

---

१. चातुरौ म० । २. धरणेन्द्रात् । ३. -मत्यर्थं म० । ४. धीरः म० । ५. स्थिरः म० । ६. विध्यापी । ७. पुरुषार्थस्थितो मोक्षो मुख्यो म० । ८. प्राणस्त्वन्नै- म० । ९. परार्थमति म० ।

षण्मासानशनस्यान्ते संहृतप्रतिमास्थितिः । प्रतस्थे पदविन्यासैः क्षितिं पल्लवयन्निव ॥१४२॥
आकेवलोदयान्मौनी प्रलम्बितभुजः पथि । सावधानां गतिं बिभ्रन्नातिद्रुतविलम्बिताम् ॥१४३॥
मध्याह्नेषु पुरग्रामगृहपङ्क्तिषु दर्शनम् । प्रशस्तासु प्रजाभ्योऽदाच्चान्द्रीचर्यां चरन् क्षितौ ॥१४४॥
[1]भ्राम्यन्तं तं तथा नाथं सौम्यविग्रहमुन्मुखाः । [2]पश्यन्त्यो न प्रजास्तृप्ता यथा चन्द्रं नवोदितम् ॥१४५॥
[3]श्वेतभानुरयं किन्तु स्वर्भानुग्रासशङ्कया । भूमिगोचरमायातस्त्यक्तताराकगोचरः ॥१४६॥
पूषा किंवा भवेदेष भूभृत्प्रासादभूरुहाम् । छायातमस्तिरस्कर्तुं द्वितीयक्षितिमागतः ॥१४७॥
अहो कान्तेः परं स्थानमहो दीप्तेः परं पदम् । अहो सुशीलशैलोऽयं गुणराशिरहो महान् ॥१४८॥
सौरूप्यस्य परा कोटिः सौलावण्यस्य भूः पराः । माधुर्यस्य पराऽवस्था धैर्यस्यायं परा स्थितिः ॥१४९॥
एतैतेक्षणसाफल्यमन्ते[4] पश्यत पश्यत । जना दिग्वसनस्यापि[5] परमां रमणीयताम् ॥१५०॥
इत्यन्योन्यकृतालापा[6] घनसङ्घट्टसङ्कटाः । जिनं नराश्च नार्यश्च ददृशुर्विस्मयाकुलाः ॥ [षड्भिः कुलकम्]
केचित् वस्त्राणि चित्राणि भूषणान्यपरे परे । दिव्यानि गन्धमाल्यानि प्रकुर्वन्ति पुरः प्रभोः ॥१५२॥
तुरङ्गतुङ्गमातङ्गरथयानान्यथाऽपरे । सद्यःसज्जानि तस्याग्रे स्थापयन्ति विमोहिनः ॥१५३॥
अदृष्टश्रुतपूर्वत्वात् तत्प्रयोग्यमजानता[7] । भिक्षादानविधिस्तस्मै न लोकेन विकल्पितः[8] ॥१५४॥

भगवान् क्षुधादिके दूर करनेमें स्वयं समर्थ थे तो भी परोपकारके अर्थ उन्होंने गोचर-वृत्तिसे अन्न-ग्रहण करनेकी इच्छा की ॥१४१॥

तदनन्तर छह महीनेके अनशनके बाद जिन्होंने प्रतिमा योगका संकोच कर लिया था ऐसे भगवान् आदि जिनेन्द्र अपने चरणोंके निक्षेपसे पृथिवीको पल्लवित करते हुए आहारके लिए चले ॥१४२॥ केवलज्ञान प्राप्त होने तक उन्होंने मौन व्रत ले रक्खा था, मार्गमें चलते समय उनकी भुजाएँ नीचेकी ओर लम्बी थीं, वे न अधिक शीघ्र और न अधिक धीमी चालसे सावधानी पूर्वक चल रहे थे ॥१४३॥ पृथिवीपर चान्द्री चर्यासे विचरण करते हुए वे मध्याह्नके समय उत्तम नगर तथा ग्रामोंकी गृह-पंक्तियोंमें प्रजाके लिए दर्शन देते थे ॥१४४॥ जिस प्रकार नूतन उगे हुए चन्द्रमाको देखती हुई प्रजा सन्तुष्ट नहीं होती है उसी प्रकार उस तरह भ्रमण करते हुए सौम्य शरीरके धारक भगवान्को ऊपरकी ओर मुख उठा-उठाकर देखती हुई प्रजा सन्तुष्ट नहीं होती थी ॥१४५॥ भगवानको देख अनेक लोग ऐसा तर्क करते थे कि क्या यह राहुके द्वारा ग्रसे जानेके भयसे नक्षत्र और सूर्य मण्डलको छोड़कर चन्द्रमा ही पृथिवी तलपर आ गया है ? अथवा क्या पहाड़, महल और वृक्षोंकी छायारूपी अन्धकारको दूर करनेके लिए यह सूर्य ही पृथिवीपर अवतीर्ण हुआ है ? ॥१४६-१४७॥ अहो ! ये भगवान् कान्तिके परम स्थान हैं, दीप्तिके अद्वितीय धाम हैं, अहो ! ये उत्तम शीलके मानो पर्वत हैं, अहो ! ये गुणोंके महासागर हैं । ये सुन्दर रूपकी परम सीमा हैं, वे लावण्यकी उत्कृष्ट भूमि हैं, माधुर्यकी परम अवस्था हैं और धैर्यकी उत्कृष्ट रीति हैं ॥१४८-१४९॥ अरे भव्यजनो ! आओ, आओ नेत्रोंको सफल करो । देखो, नग्न-दिगम्बर होनेपर भी इनकी कैसी परम सुन्दरता है ? ॥१५०॥ इस प्रकार आपसमें वार्तालाप करते तथा बहुत-बहुत बड़ी भीड़के साथ इकट्ठे हुए नर-नारी आश्चर्यसे व्याकुल हो भगवानके दर्शन कर रहे थे ॥१५१॥ उस समय कोई चित्र-विचित्र वस्त्र, कोई तरह-तरहके आभूषण और कोई उत्तमोत्तम गन्ध तथा मालाएँ भगवानके आगे समर्पित करते थे ॥१५२॥ कितने ही अज्ञानी लोग तत्काल सजाये हुए घोड़े, ऊँचे-ऊँचे हाथी, रथ तथा अन्य वाहन उनके आगे रखते थे ॥१५३॥ लोगोंने कभी किसीको आहार देते हुए न देखा था और न सुना था और न वे भगवानके अभिप्रायको ही जानते थे इसलिए किसीको आहार देनेका विकल्प नहीं उठा ॥१५४॥ जिस प्रकार लोगोंको जागृत

१. भ्राम्यन्तं म० । २. पश्यन्तो क०, ख०, म० । ३. चन्द्रः । ४. साफल्यं एनं म० । ५. नग्नस्यापि । ६. कृतालापघनसङ्घट्टसङ्कटा म० । ७. जिनस्याभिप्रायं क० टि० । ८. विकल्पिता ।

लोकस्य प्रतिबोधार्थमुदितस्य दिने दिने । जिनार्कस्य न खेदाय जगद्भ्रमणमप्यभूत् ॥१५५॥
तथा यथागमं नाथः षण्मासानविषण्णधीः । प्रजाभिः पूज्यमानः सन् विजहार महीं क्रमात् ॥१५६॥
सम्प्राप्तोऽथ सदादानैरिभैरिभपुरं[1] विभुः । दानप्रवृत्तिरत्रेति सूचयद्भिरिवाचितम्[2] ॥१५७॥
तस्मिन् सोमप्रभः श्रेयानपि[3] भूपौ[4] सहोदरौ । तस्यामेव विभावर्यां स्वप्नानेतानपश्यताम् ॥१५८॥
चन्द्रमिन्द्रध्वजं मेरुं सतडित्कल्पपादपम् । रत्नद्वीपं विमानं च नाभेयं पुरुषोत्तमम् ॥१५९॥
प्रभाते तौ कुरुश्रेष्ठावास्थानस्थौ[5] च विस्मितौ । चक्राते बुधचक्रेण सुस्वप्नफलसंकथाम् ॥१६०॥
बन्धुः कौमुदखण्डानामिव कौमुदमावही । अद्यैवेष्यति बन्धुर्नः कोऽपि नूनमनूनभाः ॥१६१॥
उच्चैर्यशोध्वजो लोके सर्वकल्याणपर्वतः । जगत्कल्पद्रुमो विद्युत्क्षणदर्शितविग्रहः ॥१६२॥
धर्मरत्नमहाद्वीपो वैमानिकजगच्च्युतः । स्वप्नवत्किन्नु[6] नाभेयः स्वयमेवाद्य दृश्यते ॥१६३॥
पुरस्य राजगेहस्य लक्ष्मीरद्यैव लक्ष्यते । भद्रं निवेदयत्याशु ककुभां च प्रसन्नता ॥१६४॥
स्वप्नार्थमिति बुद्ध्वा तौ नियुज्यान्तर्बहिर्नरान् । कथया जिननाथस्य शक्तौ यावदवस्थितौ ॥१६५॥
तावदाध्मातमाध्याह्नशङ्खनादः समुच्छ्रितः । वर्धयन्निव दिष्ट्या तौ जिनागमनिवेदनात् ॥१६६॥
रचितः परिवर्गेण स्नातयोश्च तयोस्ततः । सुभोजनविधिस्तत्र दिव्याहारमनोहरः ॥१६७॥

करनेके लिए उगे हुए सूर्यका जगत्में भ्रमण करना उसके खेदका कारण नहीं है उसी प्रकार लोगों-को प्रतिबुद्ध करनेके लिए तत्पर जिनेन्द्र भगवान्का जगत्में जहाँ-तहाँ भ्रमण करना उनके खेदका कारण नहीं था ॥१५५॥ इस प्रकार जिनकी बुद्धिमें रञ्चमात्र भी विषाद नहीं था ऐसे भगवान् प्रजाके द्वारा पूजित होते हुए लगातार छह माह तक आगमके अनुसार क्रमसे पृथिवीपर विहार करते गये ॥१५६॥

तदनन्तर विहार करते-करते भगवान् हस्तिनागपुर नगर पहुँचे । वह नगर जिनसे सदा दान (मद) चूता रहता था और जो मानो इस बातकी सूचना ही दे रहे थे कि यहाँ दान (त्याग) की प्रवृत्ति होगी ऐसे हाथियोंसे सहित था ॥१५७॥ उस नगरके राजा सोमप्रभ और श्रेयान्स थे । उन दोनों भाइयोंने उसी रातमें चन्द्रमा, इन्द्रकी ध्वजा, मेरु पर्वत, बिजली, कल्पवृक्ष, रत्नद्वीप, विमान और पुरुषोत्तम भगवान् ऋषभदेव ये आठ स्वप्न देखे ॥१५८-१५९॥ प्रातःकाल दोनों भाई सभामें बैठे और आश्चर्यसे चकित हो विद्वत्समूहके साथ इन्हीं उत्तम स्वप्नोंके फलकी चर्चा करने लगे ॥१६०॥ विद्वानोंने उक्त स्वप्नोंका फल इस प्रकार बताया कि कुमुदबन्धु—चन्द्रमाके समान पृथिवीपर आनन्दको बहानेवाला तथा उत्कृष्ट कान्तिको धारण करनेवाला हमारा कोई बन्धु आज ही यहाँ आवेगा । वह उत्तम यश रूपी ध्वजाका धारक होगा, संसारमें समस्त कल्याणों-का पर्वत होगा, जगत्के मनोरथोंको पूर्ण करनेके लिए कल्पवृक्ष रूप होगा, बिजलीके समान क्षण-भर ही अपना शरीर दिखलानेवाला होगा, धर्मरूपी रत्नोंका महाद्वीप होगा और वैमानिक जगत्—स्वर्ग लोकसे च्युत हुआ होगा । भगवान् ऋषभदेवने जिस प्रकार स्वप्नमें दर्शन दिया है क्या आज वे स्वयं ही दर्शन देंगे—स्वयं यहाँ पधारेंगे । नगर तथा राजभवनकी जो शोभा है वह आज ही दिखाई दे रही है ऐसी शोभा पहले कभी नहीं दिखी । तथा दिशाओंकी निर्मलता भी शीघ्र ही कल्याणकी सूचना दे रही है ॥१६१-१६४॥ इस प्रकार स्वप्नोंका फल जानकर तथा भीतर और बाहर अनेक मनुष्योंको नियुक्तकर जिनेन्द्र भगवानकी चर्चा करते हुए दोनों समर्थ भाई जब तक बैठे तब तक मध्याह्न कालके फूँके हुए शङ्खका जोरदार शब्द हुआ । वह शंखका शब्द ऐसा जान पड़ता था मानो जिनेन्द्र भगवान्का आगमन होनेवाला है—इस शुभ समाचारसे उन दोनोंको बढ़ा ही रहा हो ॥१६५-१६६॥ तदनन्तर दोनों भाई स्नानकर तैयार हुए और परि-

१. हस्तिनागपुरम् । २. -रिवोच्चितम् म० । ३. श्रीमानपि म० । ४. भूमौ म० । ५. कुरुवंशश्रेष्ठौ । ६. किन्तु म० ।

मणिकुट्टिमभूमौ तावुपविष्टौ [1]भुजिं प्रति । सिद्धार्थस्तूर्णमागत्य दिष्ट्या वर्धयतीत्यसौ ॥१६८॥
[2]तितिक्षोः पृथिवीं यस्य मकरालयमेखलाम् । शिबिकोद्वाहिनोऽभू[3]वन् देवा वज्रधरादयः ॥१६९॥
भग्ने कच्छमहाकच्छपूर्वपुङ्गवमण्डले । बिभर्ति दुर्वहामेको वृषभो यस्तपोधुराम् ॥१७०॥
यत्कथामृततृप्तानां गोष्ठीषु विदुषां सदा । वर्तते युष्मदादीनां नाहारग्रहणे मतिः ॥१७१॥
प्राघूर्णिकोऽद्य सोऽस्माकमकस्माज्जगतांपतिः । क्षान्तिमैत्रीतपोलक्ष्मीसहायः समुपागतः ॥१७२॥
दिशा वैश्रवणस्यैव[4] प्रविश्य नगरीं विभुः । युगान्तदृष्टिरास्थाय चान्द्रीं चर्यां यथोचिताम् ॥१७३॥
सम्भ्रान्त्यान्वितलोकस्य पादयोरर्घ्यदायिनः । स्तुतिभिर्वन्दनाभिश्च समन्तादुपसेवितः ॥१७४॥
[5]धाम धाम निजं धाम[6] प्रकिरन्निव शीतगुः । अस्मदीयतया नाथो निशान्ताजिरमा[7]प्तवान् ॥१७५॥
इति सिद्धार्थवागर्थं ज्ञातोच्छ्रायससम्भ्रमौ । अभिजग्मतुरीशस्य ललाटे न्यस्तहस्तकौ ॥१७६॥
आगच्छ भर्तरादेशं प्रयच्छेति कृतध्वनी । चन्द्रार्काविव शैलेशमध्व[8]नीमं परीयतुः ॥१७७॥
पतित्वा पादयोस्तस्य सुखपृच्छापुरःसरौ । [9]आगतेमौ जिनो हेतुं ध्यायन्तावग्रतः स्थितौ ॥१७८॥
सोमप्रभस्य देवीभिर्लक्ष्मीमत्यकरोत् प्रिया । शशिरेखेव ताराभिर्गिरीशं तं प्रदक्षिणम् ॥१७९॥
स श्रेयानीक्षमाणस्तं निमेषरहितेक्षणः । रूपमीदृक्षमद्राक्षं क्वचित् प्रागित्यधान्मनः ॥१८०॥

जनोंने उनके लिए दिव्य आहारसे मनोहर उत्तम भोजनकी विधि की—भोजनसे थालियाँ सजायीं। मणिमय फर्शके ऊपर दोनों भाई भोजनके लिए बैठे ही थे कि उसी समय सिद्धार्थ नामका द्वारपाल शीघ्रतासे आकर इस हर्षवर्धक समाचारसे उन्हें वृद्धिंगत करने लगा ॥१६७–१६८॥ कि समुद्रान्त पृथिवीका त्याग करते समय इन्द्रादिक देव जिनकी पालकीके उठानेवाले थे। कच्छ, महाकच्छ आदि पूर्व पुरुषोंके भ्रष्ट हो जानेपर जो अकेले ही तपके दुर्धर भारको धारण कर रहे हैं, सभा-गोष्ठियोंमें आप जैसे विद्वान् जिनकी कथा रूपी अमृतसे सन्तुष्ट होकर आहार ग्रहण करनेकी इच्छा नहीं रखते और जो क्षमा, मैत्री तथा तप रूपी लक्ष्मीसे सहित हैं, वे त्रिलोकी नाथ भगवान् वृषभदेव आज अकस्मात् हमारे अतिथि बनकर आये हुए हैं ॥१६९–१७२॥ वे प्रभु उत्तर दिशासे ही नगरमें प्रवेशकर पधार रहे हैं, यथायोग्य * चान्द्रीचर्याका नियम लेकर जूडा प्रमाण दृष्टिसे विहार कर रहे हैं, हड़बड़ाहटसे युक्त मनुष्य उनके चरणोंमें अर्घ दे रहे हैं तथा स्तुति और वन्दनाके द्वारा उनकी सब ओरसे सेवा कर रहे हैं, वे चन्द्रमाके समान प्रत्येक घरमें अपना तेज बिखेरते हुए अपना समझ अन्तःपुरके आँगनमें आ पहुँचे हैं ॥१७३–१७५॥

इस प्रकार सिद्धार्थके वचनोंका तात्पर्य समझ हर्षसे भरे हुए दोनों भाई, हाथ जोड़ ललाटपर धारणकर भगवान्‌के सामने गये ॥१७६॥ हे स्वामिन्! आइए आज्ञा दीजिए, यह कहते हुए दोनों भाइयोंने जिस प्रकार चन्द्रमा और सूर्य सुमेरुकी प्रदक्षिणा देते हैं उसी प्रकार मार्गमें भगवान्‌की प्रदक्षिणा दी ॥१७७॥ तदनन्तर चरणोंमें पड़कर (नमस्कार कर) सुख-समाचार पूछते हुए दोनों भाई आगे खड़े हो गये। उस समय वे मौनके धारक भगवान्‌के आगमनका कारण विचार रहे थे ॥१७८॥ जिस प्रकार चन्द्रमाकी रेखा ताराओंके साथ सुमेरु पर्वतकी प्रदक्षिणा देती है, उसी प्रकार राजा सोमप्रभकी रानी लक्ष्मीमतीने अन्य अनेक रानियोंके साथ भगवान्‌की प्रदक्षिणा दी ॥१७९॥ उसी समय टिमकार रहित नेत्रोंसे भगवान्‌की ओर देखते हुए श्रेयान्सके

---

१. भुजं म० । २. त्यक्तुमिच्छोः । ३. वाहनो भूवन् म० । ४. वैश्रवणस्येव म० । ५. गृहं गृहं प्रति । ६. तेजः । ७. भवनाङ्गणं । ८. अध्वनि मार्गे; इमं भगवन्तं । ९. आगतो म० ।

* जिस प्रकार चन्द्रमा छोटे-बड़े सभीके घरपर अपना प्रकाश फैलाता है, उसी प्रकार जिसमें अतिथि छोटे-बड़े सभीके घरपर जाता है, उसे चान्द्रीचर्या कहते हैं।

दीप्रेणाप्युपशान्तेन स तद्रूपेण बोधितः । [1]दशात्मेशभवान् बुद्ध्वा पादावाश्रित्य मूर्च्छितः ॥१८१॥
मूर्च्छितेनापि तत्पादौ प्रमृज्य मृदुमूर्धजैः । अध्व[2]श्रमच्छिदा धौतौ सोष्णानन्दाश्रुधारया ॥१८२॥
श्रीमतीवज्रजङ्घाभ्यां दत्तं दानं पुरा यथा । चारणाभ्यां स्वपुत्राभ्यां संस्मृत्य जिनदर्शनात् ॥१८३॥
भगवन् ! तिष्ठ तिष्ठेति चोक्त्वा नीतो गृहान्तरे । उच्चैः स [3]चासने स्थाप्य धौततत्पादपङ्कजः ॥१८४॥
[4]तच्चरणपूजनं कृत्वा प्रणतिं च त्रिधा तथा । दानधर्मविधेर्बोद्धा विधाता स्वयमेव सः ॥१८५॥
श्रद्धादिगुणसम्पूर्णः पात्रे सम्पूर्णलक्षणे । दित्सुरिक्षुरसापूर्णं कुम्भमुद्धृत्य सोऽब्रवीत् ॥१८६॥
षोडशोद्गमदोषैश्च षोडशोत्पादनिश्रितैः । दशभिश्चैषणादोषैर्विशुद्धमपरैस्तथा ॥१८७॥
धूमाङ्गारप्रमाणाख्यैः संयोजनयुतैः प्रभो । मुक्तं दायकदोषैश्च गृहाण प्रासुकं रसम् ॥१८८॥
वृत्तवृद्ध्यै विशुद्धात्मा पाणिपात्रेण पारणम् । समपादस्थितश्चक्रे दर्शयन् क्रियया विधिम् ॥१८९॥
श्रेयसि श्रेयसा पात्रे प्रतिलब्धे जिनेश्वरे । पञ्चाश्चर्यविशुद्धिभ्यः पञ्चाश्चर्याणि जज्ञिरे ॥१९०॥
अहो दानमहो दानमहो पात्रमहो क्रमः । साधु साध्विति खे नादः प्रादुरासीद्दिवौकसाम् ॥१९१॥
नेदुरम्बुदनिर्घोषाः सुरदुन्दुभयोऽम्बरे । दानतीर्थंकरोत्पत्तिं घोषयन्तो जगत्त्रये ॥१९२॥
श्रेयोदानयशोराशिपूर्णदिग्वनिताननैः । प्रोद्गीर्ण इव निःश्वाससुरभिः पवनो ववौ ॥१९३॥
पपात सुमनोवृष्टिरमान्तीवाङ्गनिर्गता । श्रेयसः सुमनोवृत्तिरमान्तीव दिवः पुनः ॥१९४॥

मनमें यह विचार आया कि ऐसा रूप तो मैंने पहले कहीं देखा है ॥१८०॥ भगवानके देदीप्यमान होनेपर भी उपशान्त रूपसे प्रतिबोधको प्राप्त हुआ। श्रेयान्स अपने तथा भगवान्‌के दश पूर्व भवोंको जान गया और उनके चरणोंके समीप आकर मूर्च्छित हो गया ॥१८१॥ मूर्च्छित होनेपर भी श्रेयान्सने अपने शिरके कोमल-बालोंसे भगवान्‌के चरण पोंछे और मार्गका श्रम दूर करनेके लिए आनन्दजन्य गरम-गरम आँसुओंकी धारासे धोये ॥१८२॥ श्रीमती और वज्रजंघने पहले चारण ऋद्धिके धारक अपने दो पुत्रोंके लिए जिस विधिसे दान दिया था वह सब विधि भगवान्‌का दर्शन करते ही श्रेयान्सकी स्मृतिमें आ गई ॥१८३॥

तदनन्तर दान-धर्मकी विधिका ज्ञाता और उसकी स्वयं प्रवृत्ति करानेवाला राजा श्रेयान्स श्रद्धा आदि गुणोंसे युक्त हो हे भगवन् ! तिष्ठ-तिष्ठ—ठहरिए-ठहरिए यह कहकर भगवान्‌को घरके भीतर ले गया, वहाँ उच्चासनपर विराजमानकर उसने उनके चरण-कमल धोये, उनके चरणोंकी पूजा करके उन्हें मन, वचन, कायसे नमस्कार किया फिर संपूर्ण लक्षणोंसे युक्त पात्रके लिए देनेकी इच्छासे उसने इक्षुरससे भरा हुआ कलश उठाकर कहा कि प्रभो ! यह इक्षुरस सोलह उद्गम दोष, सोलह उत्पादन दोष, दश एषणा दोष तथा धूम-अङ्गार प्रमाण और संयोजना इन चार दाता सम्बन्धी दोषोंसे रहित एवं प्रासुक है, इसे ग्रहण कीजिए ॥१८४–१८८॥ तदनन्तर जिनकी आत्मा विशुद्ध थी और जो पैरोंको सीधाकर खड़े थे ऐसे भगवान् वृषभदेवने क्रियासे आहारकी विधि दिखाते हुए चारित्रकी वृद्धिके लिए पारणा की ॥१८९॥ राजा श्रेयान्सने कल्याणकारी श्रीजिनेन्द्ररूपी पात्र प्राप्त किये इसलिए पाँच प्रकारकी आश्चर्यजनक विशुद्धियोंसे पञ्चाश्चर्य प्रकट हुए ॥१९०॥ 'अहो दान, अहो दान, अहो पात्र, अहो दान देनेकी पद्धति, धन्य-धन्य,' इस प्रकार आकाशमें देवोंके शब्द हुए ॥१९१॥ आकाशमें मेघोंके समान शब्द करनेवाले देव-दुन्दुभि बजने लगे। वे दुन्दुभि तीनों जगत्‌में मानो इस नामकी घोषणा ही कर रहे थे कि दानरूपी तीर्थको चलानेवालेकी उत्पत्ति हो चुकी है ॥१९२॥ राजा श्रेयान्सके दानसे उत्पन्न यशकी राशिसे पूर्ण दिशारूपी स्त्रियोंके मुखसे प्रकट हुए श्वासोच्छ्वासके समान सुगन्धित वायु बहने लगी ॥१९३॥ उस समय आकाशमें न समा सकनेके कारण ही मानो सुमन (पुष्पों) की वर्षा होने लगी थी

---

१. आत्मनः ईशस्य च दश भवान् बुद्ध्वा । २. अध्वभ्रम म० । ३. सदासने म० । ४. सर्वपुस्तकेष्वित्थमेव पाठः किन्त्वत्र पादे नवाक्षरत्वात् छन्दोभङ्गो भवति 'तत्पादपूजनं कृत्वा' इति पाठः सुष्ठु प्रतिभाति ।

श्रेयसा पात्रनिक्षिप्तपुण्ड्रेक्षुरसधारया । स्पर्धयेव सुरैः सृष्टा वसुधाराऽपतद्दिवः ॥१६५॥
अभ्यर्चिते तपोवृद्ध्यै धर्मतीर्थकरे गते । दानतीर्थकरं देवाः साभिषेकमपूजयन् ॥१६६॥
श्रुत्वा देवनिकायेभ्यः सद्दानफलघोषणम् । समेत्य पूजयन्ति स्म श्रेयांसं भरतादयः ॥१६७॥
इतिहासमनुस्मृत्य दानधर्मविधिं ततः । शुश्रुवुः श्रद्धया युक्ताः प्रत्यक्षफलदर्शिनः ॥१६८॥
प्रतिग्रहोऽतिथेरुच्चैःस्थानस्थापनमन्यतः । पादप्रक्षालनं दात्रा पूजनं प्रणतिस्ततः॥१६९॥
मनोवचनकायानामेषणायाश्च शुद्धयः । प्रकारा नव विज्ञेया दानपुण्यस्य सङ्ग्रहे ॥२००॥
पुण्यमित्थमुपात्तं यत् तदभ्युदयलक्षणम् । [1]दत्वा दातुः फलं दत्ते प्राग् निश्रेयसलक्षणम् ॥२०१॥
इतिश्रुतयथातत्त्वा श्रेयांसमभिनन्द्य ते । दानधर्मोद्यतस्वान्ता नृपा याता यथागतम्[2] ॥२०२॥
सहस्रवर्षं वृषभो चतुर्ज्ञानचतुर्मुखः । चक्रे मोक्षार्थबोधार्थं तपो नानाविधं स्वयम् ॥२०३॥
सप्रलम्बजटाभारभ्राजिष्णुर्जिष्णुराबभौ । रूढप्ररोहशाखाग्रो यथा न्यग्रोधपादपः ॥२०४॥
अन्यदा विहरन् प्राप्तः पूर्वतालपुरं पुरम् । राजा वृषभसेनाख्यो यत्रास्ते भरतानुजः ॥२०५॥
तत्रोद्यानं महोद्योगः शकटास्यभिधानकम् । ध्यानयोगमथासाद्य स न्यग्रोधतरोरधः ॥२०६॥
उपविष्टः शिलापट्टे पर्यङ्कासनबन्धनः । वशस्थकरणग्रामः शुक्लध्यानासिधारया ॥२०७॥
आरूढः क्षपकश्रेणिं रणक्षोणीं क्षणेन सः । महोत्साहगजारूढो मोहराजमपातयत् ॥२०८॥

और वह ऐसी जान पड़ती थी मानो राजा श्रेयान्सकी सुमनोवृत्ति—पवित्र मनका व्यापार ही भीतर न समा सकनेके कारण शरीरसे बाहर निकल रहा हो ॥१६४॥ राजा श्रेयान्सने पात्रके लिए जो इक्षुरसकी धारा दी थी उसके साथ ईर्ष्या होनेके कारण ही मानो आकाशसे देवकृत रत्नोंकी धारा नीचे पड़ने लगी ॥१६५॥ पूजा होनेके बाद जब धर्म तीर्थङ्कर भगवान् ऋषभदेव तपकी वृद्धिके लिए वनको चले गये तब देवोंने अभिषेक पूर्वक दान तीर्थकर—राजा श्रेयान्सकी पूजा की ॥१६६॥ देवोंसे समीचीन दान और उसके फलकी घोषणा सुन भरतादि राजाओंने भी आकर राजा श्रेयान्सकी पूजा की ॥१६७॥ इतिहास—पूर्व घटनाका स्मरणकर राजा श्रेयान्सने जो दान-रूपी धर्मकी विधि चलाई थी उसे दानका प्रत्यक्ष फल देखनेवाले भरत आदि राजाओंने बड़ी श्रद्धाके साथ श्रवण किया ॥१६८॥ राजा श्रेयान्सने बताया कि दान सम्बन्धी पुण्यका संग्रह करनेके लिए १ अतिथिको पड़गाहना, २ उच्च स्थानपर बैठाना, ३ पाद-प्रक्षालन करना, ४ दाता द्वारा अतिथिकी पूजा होना, ५ नमस्कार करना, ६ मनः-शुद्धि, ७ वचन-शुद्धि, ८ काय-शुद्धि और ९ आहार-शुद्धि बोलना ये नौ प्रकार जाननेके योग्य हैं ॥१६९–२००॥ दानका फल बताते हुए राजा श्रेयान्सने कहा कि इस तरह दान देनेसे जो पुण्य संचित होता है वह दाताके लिए पहले स्वर्गादि रूप फल देकर अन्तमें मोक्षरूपी फल देता है ॥२०१॥ इस तरह यथार्थ बातको सुनकर जिनके चित्त दानरूपी धर्मके लिए उद्यत हो रहे थे ऐसे भरत आदि राजा जैसे आये थे वैसे चले गये ॥२०२॥ चार ज्ञानरूपी चार मुखोंको धारण करनेवाले भगवान् वृषभदेवने स्वयं मोक्ष तत्त्व-का यथार्थ ज्ञान प्राप्त करनेके लिए एक हजार वर्ष तक नाना प्रकारका तप किया ॥२०३॥ लम्बी-लम्बी जटाओंके भारसे सुशोभित आदि जिनेन्द्र उस समय जिसकी शाखाओंसे पाये लटक रहे थे ऐसे वट-वृक्षके समान सुशोभित हो रहे थे ॥२०४॥

अथानन्तर किसी समय विहार करते हुए भगवान्, पूर्वतालपुर नामक उस नगरमें पहुँचे जहाँ कि भरतका छोटा भाई राजा वृषभसेन रहता था ॥२०५॥ वहाँ वे शकटास्य नामक उद्यान-में बड़ी तत्परताके साथ ध्यान धारण कर वटवृक्षके नीचे एक शिलापर पर्यङ्कासनसे विराजमान हो गये। उस समय उन्होंने शुक्ल ध्यानरूपी तलवारकी धारसे इन्द्रियोंके समूहको अपने वश कर लिया था ॥२०६–२०७॥ उन्होंने क्षपक श्रेणिरूपी रणभूमिमें प्रवेशकर महोत्साह रूपी हाथी-

१. दत्वा तु यत्फलं भुक्तं म० । २. यथाक्रमम् म० ।

ज्ञानावरणशत्रुं च दर्शनावरणद्विषम् । अन्तरायरिपुं चैव जघान युगपत् प्रभुः ॥२०९॥
चतुर्घातिक्षयाच्चास्य केवलज्ञानमुद्गतम् । समस्तद्रव्यपर्यायलोकालोकावलोकनम् ॥२१०॥
चतुर्देवनिकायाश्च पूर्ववत् समुपागताः । सेन्द्राः नेमुर्जिनेन्द्रं तं गायन्तः कर्मणां जयम् ॥२११॥
प्रातिहार्यैस्ततोऽष्टाभिर्जिनेन्द्रस्तत्क्षणोद्भवैः । स चतुस्त्रिंशद्विशेषैरशेषैः सहितो बभौ ॥२१२॥
पुत्रचक्रसमुत्पत्त्या जिनकेवलजन्मना । दिष्ट्याभिवर्धितो यातो भरतो वन्दितुं विभुम् ॥२१३॥
सम्प्राप्तः[1] कुरुभोजाद्यैश्चतुरङ्गबलावृतः । आर्हन्त्यविभवोपेतमभ्यर्च्य प्रणनाम तम् ॥२१४॥
नृपैर्वृषभसेनस्तं बहुभिर्वृषभं श्रितः । संयमं प्रतिपद्याभूत् गणभृत् प्रथमः प्रभोः ॥२१५॥
लक्ष्मीमत्यात्मजं राज्ये जयमायोज्य सानुजम् । प्रव्रज्यां प्रतिपन्नौ तौ श्रेयःसोमप्रभौ नृपौ ॥२१६॥
ब्राह्मी च सुन्दरी चोभे कुमार्यौ धैर्यसङ्गते । प्रव्रज्य बहुनारीभिरार्याणां प्रभुतां गते ॥२१७॥
आर्हन्त्यैश्वर्यमालोक्य वृषभस्य जिनस्य यत् । सम्यक्त्वव्रतसंयुक्तं यथायोगमभूत्तदा ॥२१८॥
इन्द्रनीलनिभान् केशान् पद्मरागमयैः करैः । उद्धरन्तः स्वयं रेजुः स्त्रीपुंसोऽरागिणस्ततः ॥२१९॥
तदा प्रव्रजतां तेषां नापेक्षाभून्मनस्विनाम् । केशेष्विव शरीरेषु मृदुस्निग्धघनेष्वपि ॥२२०॥
ततश्चतुर्विधे सङ्घे निकाये च दिवौकसाम् । शरणे सम[2]वाद्ये च जाते द्वादश योजने ॥२२१॥
महाप्रभावसम्पन्नास्तत्र शासनदेवताः । नेमुश्चाप्रतिचक्राद्या वृषभं धर्मचक्रिणम् ॥२२२॥

पर सवार हो क्षणभरमें मोहरूपी राजाको नीचे गिरा दिया ॥२०८॥ और उसके बाद ही एक साथ ज्ञानावरण, दर्शनावरण और अन्तराय इन शत्रुओंको भी नष्ट कर दिया ॥२०९॥ इस तरह चार घातिया कर्मोंके क्षयसे उन्हें समस्त द्रव्य पर्याय तथा लोक अलोकको दिखानेवाला केवलज्ञान प्राप्त हुआ ॥२१०॥ पूर्वकी भाँति इन्द्रों सहित चारों निकायोंके देवोंने आकर जिनेन्द्र देवको नमस्कार किया। उस समय समस्त देव भगवान्‌ने कर्म शत्रुओंपर जो विजय प्राप्त की थी उसका गुणगान कर रहे थे ॥२११॥ तदनन्तर तत्क्षणमें उत्पन्न हुए आठ प्रातिहार्यों और चौंतीस अतिशयोंसे सहित भगवान् अत्यधिक सुशोभित होने लगे ॥२१२॥ उसी समय भरतको पुत्रकी उत्पत्ति, चक्ररत्नकी प्राप्ति और भगवान्‌को केवलज्ञानका लाभ ये तीन समाचार एक साथ मिले। इस भाग्यवृद्धिसे प्रसन्न होता हुआ भरत सर्वप्रथम भगवान्‌की वन्दना करनेके लिए चला ॥२१३॥ कुरुवंशी तथा भोजवंशी आदि राजाओंके साथ चतुरङ्ग सेनासे आवृत भरतने जाकर अरहन्त सम्बन्धी विभूतिसे युक्त भगवान्‌की पूजाकर उन्हें प्रणाम किया ॥२१४॥ उसी समय अनेक राजाओंके साथ राजा वृषभसेन भगवान्‌के पास गया और संयम धारणकर उनका प्रथम गणधर हो गया ॥२१५॥ लक्ष्मीमतीके पुत्र जयकुमार तथा उसके छोटे भाईको राज्यकार्यमें नियुक्तकर राजा श्रेयान्स और सोमप्रभने भी दीक्षा धारण कर ली ॥२१६॥ धैर्यसे युक्त ब्राह्मी और सुन्दरी नामक दोनों कुमारियाँ अनेक स्त्रियोंके साथ दीक्षा ले आर्यिकाओंकी स्वामिनी बन गईं ॥२१७॥ वृषभ जिनेन्द्रके अर्हन्त सम्बन्धी वैभवको देखकर अन्य लोग भी उस समय यथायोग्य सम्यग्दर्शन तथा श्रावकोंके व्रतसे युक्त हुए थे ॥२१८॥ उस समय रागरहित स्त्री-पुरुष, पद्मराग मणियोंके समान अपने लाल-लाल हाथोंसे इन्द्रनील मणिके समान काले-काले केशोंको स्वयं उखाड़ते हुए अत्यन्त सुशोभित हो रहे थे ॥२१९॥ उस समय दीक्षा लेनेवाले धैर्यशाली मनुष्योंका जिस प्रकार कोमल, चिकने और सघन बालोंमें स्नेह नहीं था उसी प्रकार अपने शरीरोंमें भी उनका स्नेह नहीं था ॥२२०॥ तदनन्तर बारह योजन विस्तारवाले समवशरणकी रचना हुई, उसमें चतुर्विधसंघ और चार निकायके देव यथास्थान आसीन हुए ॥२२१॥ उस समवसरणमें महाप्रभावसे सम्पन्न अप्रतिचक्र आदि शासन देवता, धर्मचक्रके धारक भगवान् वृषभदेवको निरन्तर नमस्कार करते

१. सम्प्राप्तकुरु म० । २. समवाये म० ।

शार्दूलविक्रीडितवृत्तम्

तस्थुर्दक्षिणतो जिनस्य मुनयः कल्पाङ्गनाश्चार्यिकाः
ज्योतिर्व्यन्तरभावनामरवधूवर्गाः क्रमेणैव हि।
भूयोभावनभौमदेव[1]निवहा ज्योतिष्ककल्पाः नृपाः
तिर्यञ्चश्च पृथक् पृथक् पृथुनिजस्थाने गणा द्वादश ॥२२३॥
त्रैलोक्ये जिनशासनोरुपदवीशुश्रूषयावस्थिते
सम्पृष्टः प्रथमेन तत्र गणिना विश्वार्थविद्योतनः।
भूयोभेदविवृत्तयाधरपरि[2]स्पन्दोज्झितस्वात्मना
मोहध्वान्तमपाकरोदथ जिनो भानुः स्वभाषाश्रिया ॥२२४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ ऋषभनाथकैवल्योत्पत्तिवर्णनो नाम नवमः सर्गः।

रहते थे ॥२२२॥ समवसरणमें बारह सभाएँ थीं उनमें भगवान्‌की दाहिनी ओरसे लेकर १ मुनि, २ कल्पवासिनी देवियाँ, ३ आर्यिकाएँ, ४ ज्योतिषीदेवोंकी देवियाँ, ५ व्यन्तर देवोंकी देवियाँ, ६ भवनवासी देवोंकी देवियाँ, ७ भवनवासी देव, ८ व्यन्तर देव, ९ ज्योतिषी देव, १० कल्पवासी देव, ११ मनुष्य और तिर्यञ्च ये बारह गण पृथक्-पृथक् अपने-अपने विस्तृत स्थानोंपर बैठे थे ॥२२३॥ अथानन्तर जब तीन लोकके जीव भगवान्‌का दिव्य उपदेश सुननेकी इच्छासे शान्तिपूर्वक बैठ गये तब प्रथम गणधरने समस्त पदार्थोंके प्रकाशित करनेवाले जिनेन्द्ररूपी सूर्यसे प्रश्न किया और उन्होंने नाना भेदोंमें परिवर्तित होनेवाली एवं ओठोंके परिस्पन्दसे रहित अपनी दिव्य ध्वनिरूपी लक्ष्मीके द्वारा मोहरूपी अन्धकारको नष्ट कर दिया ॥२२४॥

इस प्रकार अरिष्टनेमि पुराण के संग्रहसे सहित जिनसेनाचार्य रचित हरिवंशपुराणमें श्रीऋषभनाथ भगवान्‌की केवलज्ञानकी उत्पत्तिका वर्णन करनेवाला नवाँ पर्व समाप्त हुआ।

---

१. भौम म०। २. पतिस्यन्दोज्झितः स्वात्मना म०, परिष्पन्दोज्झितास्यात्मना क०, ङ०।

दशमः सर्गः

धर्मं प्रवदता तेन तदा त्रैलोक्यसन्निधौ । धृतं वर्षसहस्रान्तं मौनमुद्योदितं दृढम् ॥१॥
संसारतरणं तीर्थं नाथे दर्शयति स्वयम् । ददर्श जगदत्यर्थं गम्भीरार्थमपि स्फुटम् ॥२॥
वागाद्यतिशयोद्योते द्योतयत्यर्थसम्पदम्[1] । जिनेन्द्रद्युमणौ को वा मिथ्यान्धतमसं भजेत् ॥३॥
जिनेन्द्रोऽथ जगौ धर्मः कार्यः सर्वसुखाकरः । प्राणिभिः सर्वयत्नेन स्थितः प्राणिदयादिषु ॥४॥
सुखं देवनिकायेषु मानुषेषु च यत्सुखम् । इन्द्रियार्थसमुद्भूतं तत्सर्वं धर्मसम्भवम् ॥५॥
कर्मक्षयसमुद्भूतमपवर्गसुखं च यत् । आत्माधीनमनन्तं तद् धर्मादेवोपजायते ॥६॥
दया सत्यमथाऽस्तेयं ब्रह्मचर्यममूर्च्छता । सूक्ष्मतो यतिधर्मः स्यात्स्थूलतो गृहमेधिनाम् ॥७॥
दानपूजातपःशीललक्षणश्च चतुर्विधः । त्यागजश्चैव शारीरो धर्मो गृहनिषेविणाम् ॥८॥
सम्यग्दर्शनमूलोऽयं महर्द्धिकसुरश्रियम् । ददाति यतिधर्मस्तु पुष्टो मोक्षसुखप्रदः ॥९॥
स्वर्गापवर्गमूलस्य सद्धर्मस्येह लक्षणम् । श्रुतज्ञानाद्धिनिश्रेयमर्वाग्दर्शिभिरर्थिभिः ॥१०॥
द्वादशाङ्गं श्रुतज्ञानं द्रव्यभावभिदां श्रितम्[2] । भाषाभिव्यञ्जयमासश्च निर्दोषावरणो[3] मतः ॥११॥

उस समय त्रिलोकवर्ती जीवोंके सन्निधानमें धर्मका उपदेश देते हुए भगवान्‌ने एक हजार वर्ष तक दृढ़तापूर्वक धारण किया हुआ मौन खोला ॥१॥ श्री आदि जिनेन्द्र स्वयं ही संसार-सागरमें पार करनेवाला तीर्थ दिखला रहे थे, इसलिए संसारके समस्त जीव अतिशय गूढ़ अर्थ-को भी सरलतासे देख रहे थे। भावार्थ—यद्यपि दिव्यध्वनिमें प्रतिपादित पदार्थ अत्यन्त गम्भीर था फिर भी वक्ताके प्रभावसे लोग उसे सरलतासे समझ रहे थे ॥२॥ उस ससय जब कि वचन आदिके अतिशयोंसे प्रकाशमान जिनेन्द्ररूपी सूर्य स्वयं पदार्थोंको प्रकाशित कर रहे थे तब कौन मनुष्य मिथ्यात्वरूपी अन्धकारको प्राप्त हो सकता था ? अर्थात् कोई नहीं ॥३॥

अथानन्तर जिनेन्द्र भगवान्‌ने कहा कि समस्त प्राणियोंको जीव-दया आदि कार्योंमें स्थित धर्म पूर्ण प्रयत्नसे करना चाहिए क्योंकि धर्म ही समस्त सुखोंकी खान है ॥४॥ चार निकायके देवों और मनुष्योंमें इन्द्रिय विषयजन्य जो सुख दिखाई देता है वह सब धर्मसे ही उत्पन्न हुआ है ॥५॥ और कर्मोंके क्षयसे उत्पन्न, स्वाधीन तथा अन्तसे रहित जो मोक्षसम्बन्धी सुख है वह भी धर्मसे ही उत्पन्न होता है ॥६॥ अहिंसा, सत्य, अचौर्य, ब्रह्मचर्य और अपरिग्रह—ये सूक्ष्म रीतिसे धारण किये जावें तो मुनिका धर्म है और स्थूल रीतिसे धारण किये जावें तो गृहस्थका धर्म है ॥७॥ दान, पूजा, तप और शील यह गृहस्थका चार प्रकारका शारीरिक धर्म है—शरीरसे करने योग्य है। गृहस्थका यह चतुर्विध धर्म-त्यागसे ही उत्पन्न होता है ॥८॥ सम्यग्दर्शन जिसकी जड़ है ऐसा यह गृहस्थका धर्म महर्द्धिक देवोंकी लक्ष्मी प्रदान करता है और पूर्णतासे पालन किया हुआ मुनिधर्म मोक्ष सुखको देनेवाला है ॥९॥ जो मात्र अर्वाचीन बातको ही देख सकते हैं ऐसे हिताभिलाषी मनुष्योंको (छद्मस्थ जीवोंको) स्वर्ग और मोक्षके मूल भूत समीचीन धर्मका लक्षण श्रुतज्ञानके द्वारा जानना चाहिए भावार्थ—अल्पज्ञानी मनुष्य द्वादशाङ्गके सहारे ही धर्मका लक्षण समझ सकते हैं, इसलिए यहाँ द्वादशाङ्गका वर्णन करना उचित है ॥१०॥ द्रव्यश्रुत और भावश्रुतके भेदको प्राप्त हुआ द्वादशाङ्ग

१. सम्पदां म०, ख०, ङ० । २. सृतं म० । ३. निर्दोषाच्चरणो म० ।

श्रुतं च स्वसमासेन पर्यायोऽक्षरमेव च । पदं चैव हि सङ्घातः प्रतिपत्तिरतः परम् ॥१२॥
अनुयोगयुतं द्वारैः प्राभृतप्राभृतं ततः । प्राभृतं[1] वस्तु पूर्वं च भेदान् विंशतिमाश्रितम् ॥१३॥
श्रुतज्ञानविकल्पः स्यादेकह्रस्वाक्षरात्मकः । अनन्तानन्तभेदाणुपुद्गलस्कन्धसञ्चयः ॥१४॥
अनन्तानन्तभागैस्तु भिद्यमानस्य तस्य च । भागः पर्याय इत्युक्तः श्रुतभेदो ह्यनल्पशः ॥१५॥
सोऽपि सूक्ष्मनिगोदस्यालब्धपर्याप्तदेहिनः । सम्भवी सर्वथा तावान् श्रुतावरणवर्जितः ॥१६॥
सर्वस्यैव हि जीवस्य तावन्मात्रस्य नावृतिः । आवृतौ तु न जीवः स्यादुपयोगवियोगतः ॥१७॥
जीवोपयोगशक्तेश्च न विनाशः सयुक्तिकः । स्यादेवाल्पभ्ररोधेऽपि सूर्याचन्द्रमसोः प्रभा ॥१८॥
पर्यायानन्तभागेन पर्यायो युज्यते यदा । स पर्यायसमासः स्यात् श्रुतभेदो हि सावृतिः ॥१९॥
अनन्तासङ्ख्यसङ्ख्येयभागवृद्धिक्षयान्वितः । सङ्ख्येयासङ्ख्यकानन्तगुणवृद्धिक्रमेण च ॥२०॥
स्यात्पर्यायसमासोऽसौ यावदक्षरपूर्णता । एकैकाक्षरवृद्ध्या स्यात् तत्समासः पदावधिः ॥२१॥
पदमर्थपदं ज्ञेयं प्रमाणपदमित्यपि । मध्यमं पदमित्येवं त्रिविधं तु पदं स्थितम् ॥२२॥
[2]एकद्वित्रिचतुःपञ्चषट्सप्ताक्षरमर्थवत् । पदमाद्यं द्वितीयं तु पदमष्टाक्षरात्मकम् ॥२३॥

श्रुतज्ञान आप्तके द्वारा प्रकट होता है और आप्त वही माना गया है जो रागादिक दोष तथा ज्ञानावरण और दर्शनावरण इन आवरणोंसे रहित हो ॥११॥ श्रुतज्ञानके १ पर्याय, २ पर्याय-समास, ३ अक्षर, ४ अक्षर-समास, ५ पद, ६ पद-समास, ७ संघात, ८ संघात-समास, ९ प्रति-पत्ति, १० प्रतिपत्ति-समास, ११ अनुयोग, १२ अनुयोग-समास, १३ प्राभृत-प्राभृत, १४ प्राभृत-प्राभृत-समास, १५ प्राभृत, १६ प्राभृत-समास, १७ वस्तु, १८ वस्तु-समास, १९ पूर्व और २० पूर्व-समास—ये बीस भेद हैं ॥१२–१३॥ श्रुतज्ञानके अनेक विकल्पोंमें एक विकल्प एक ह्रस्व अक्षर रूप भी है। इस विकल्पमें द्रव्यकी अपेक्षा अनन्तानन्त पुद्गल परमाणुओंसे निष्पन्न स्कन्धका सञ्चय होता है ॥१४॥ इस एक ह्रस्वाक्षररूप विकल्पके अनेक बार अनन्तानन्त भाग किये जावें तो उनमें एक भाग पर्याय नामका श्रुतज्ञान होता है ॥१५॥ वह पर्याय ज्ञान सूक्ष्म-निगोदिया लब्धपर्याप्तक जीवके होता है और श्रुतज्ञानावरणके आवरणसे रहित होता है ॥१६॥ सभी जीवोंके उतने ज्ञानके ऊपर कभी आवरण नहीं पड़ता। यदि उसपर भी आवरण पड़ जावे तो ज्ञानोपयोगका सर्वथा अभाव हो जायगा और ज्ञानोपयोगका अभाव होनेसे जीवका भी अभाव हो जायगा ॥१७॥ यह युक्तिसे सिद्ध है कि जीवकी उपयोग शक्तिका कभी विनाश नहीं होता। जिस प्रकार कि मेघका आवरण होनेपर भी सूर्य और चन्द्रमाकी प्रभा कुछ अंशोंमें प्रकट रही आती है उसी प्रकार श्रुतज्ञानका आवरण होनेपर भी पर्याय नामका ज्ञान प्रकट रहा आता है ॥१८॥ जब यही पर्यायज्ञान पर्याय ज्ञानके अनन्तवें भागके साथ मिल जाता है तब वह पर्याय-समास नामका श्रुतज्ञान कहलाने लगता है। यह श्रुतज्ञान आव-रणसे सहित होता है अर्थात् जब तक पर्याय-समास नामक श्रुतज्ञानावरणका उदय रहता है तब तक प्रकट नहीं होता उसका क्षयोपशम होनेपर ही प्रकट होता है ॥१९॥ यह पर्याय-समास-ज्ञान अनन्तभागवृद्धि, असंख्यभागवृद्धि, संख्यातभागवृद्धि तथा अनन्तभागहानि, असंख्यात-भागहानि एवं संख्यातभागहानिसे सहित हैं। पर्यायज्ञानके ऊपर संख्यातगुणवृद्धि, असंख्यात-गुणवृद्धि और अनन्तगुणवृद्धिके क्रमसे वृद्धि होते-होते जब तक अक्षरज्ञानकी पूर्णता होती है तब तकका ज्ञान पर्याय-समासज्ञान कहलाता है। उसके बाद अक्षरज्ञान प्रारम्भ होता है उसके ऊपर पदज्ञान तक एक-एक अक्षरकी वृद्धि होती है। इस वृद्धि प्राप्त ज्ञानको अक्षर-समास ज्ञान कहते हैं। अक्षर-समासके बाद पदज्ञान होता है ॥२०–२१॥ अर्थपद, प्रमाणपद और मध्यम-पदके भेदसे पद तीन प्रकारका है ॥२२॥ इनमें एक, दो, तीन, चार, पाँच, छह और सात अक्षर-

१. मासृतं म० । २. एकं म०, क० ।

कोट्यश्चैव चतुस्त्रिंशत् तच्छतान्यपि षोडश । त्र्यशीतिश्च पुनर्लक्षाः शतान्यष्टौ च सप्ततिः ॥२४॥
अष्टाशीतिश्च वर्णाः स्युर्मध्यमे तु पदे स्थिताः । पूर्वाङ्गपदसङ्ख्या स्यान्मध्यमेन पदेन सा ॥२५॥
एकैकाक्षरवृद्ध्या तु तत्समासभिदस्ततः । इत्थं पूर्वसमासान्तं द्वादशाङ्गं श्रुतं स्थितम् ॥२६॥
अष्टादशसहस्राणां पदानां सङ्ख्यया युतम् । तत्राचाराङ्गमाचारं साधूनां वर्णयत्यलम् ॥२७॥
यत्षट्त्रिंशत्सहस्रैस्तु पदैः सूत्रकृतं युतम् । परस्वसमयार्थानां वर्णकं तद् विशेषतः ॥२८॥
चत्वारिंशत्सहस्रैश्च द्विसहस्रैः पदैर्युतम् । स्थानं स्थानान्तरं जन्तोर्वक्त्येकादिदशोत्तरम् ॥२९॥
चतुःषष्टिसहस्रैर्यत्पदैश्च पदलक्षया । लक्षितं समवायाङ्गं वक्ति द्रव्यादितुल्यताम् ॥३०॥
धर्माधर्मैकजीवानां लोकाकाशस्य वा यथा । प्रदेशा द्रव्यतस्तुल्याः समवायेन वर्णिताः ॥३१॥
सिद्धिसीमन्तकर्त्वाख्यं[1] विमानं नरलोकजम् । प्रमाणं सममित्युक्तं तत्रैव क्षेत्रतस्तथा ॥३२॥
उत्सर्पिण्यवसर्पिण्योः कालतः समतोदिता । भावतोऽनन्तयोस्तत्र ज्ञानदर्शनयोरपि ॥३३॥
पदानां तु सहस्राणि यत्राष्टाविंशतिस्तथा । लक्षयोर्द्वयमाख्यातं व्याख्याप्रज्ञप्तिसंज्ञके ॥३४॥
तत्रोत्पथव्युदासेन विनयेन सविस्तरः । प्रश्नव्याख्यानभेदानां क्रमः समुपवर्ण्यते ॥३५॥

तकका पद अर्थपद कहलाता है। आठ अक्षररूप प्रमाणपद होता है और मध्यमपदमें सोलह सौ चौंतीस करोड़ तिरासी लाख सात हजार आठ सौ अठासी अक्षर होते हैं, और अङ्ग तथा पूर्वोंके पदकी संख्या इसी मध्यम पदसे होती है ॥२३-२५॥ एक-एक अक्षरकी वृद्धिकर पद-समाससे लेकर पूर्व-समास पर्यन्त समस्त द्वादशाङ्ग श्रुत स्थित है ॥२६॥ उनमें पहला अङ्ग आचाराङ्ग है जो मुनियोंके आचारका अच्छी तरह वर्णन करता है और अठारह हजार पदोंसे सहित है ॥२७॥ दूसरा अङ्ग सूत्रकृताङ्ग है जो स्वसमय और परसमयका विशेष रूपसे वर्णन करता है तथा छत्तीस हजार पदोंसे सहित है ॥२८॥ तीसरा अङ्ग स्थानाङ्ग है जो जीवके एकसे लेकर दश तक स्थानोंका वर्णन करता है और बयालीस हजार पदोंसे सहित है। भावार्थ—स्थानाङ्गमें—जीवके एक केवलज्ञान, एक मोक्ष, एक आकाश, एक धर्म द्रव्य, एक अधर्म द्रव्य आदि। दो दर्शन, दो ज्ञान, दो राग-द्वेष आदि। तीन सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र, रूप रत्नत्रय, माया, मिथ्या, निदान—तीन शल्य, जन्म जरा मरण—तीन दोष आदि। चार गति, चार कषाय, चार अनन्त चतुष्टय आदि। पाँच महाव्रत, पाँच समिति, पाँच अस्तिकाय, पाँच कषाय आदि। छह द्रव्य, छह लेश्या, छह काय, छह आवश्यक आदि। सात तत्त्व, सात भय, सात व्यसन, सात नरक आदि। आठ कर्म, आठ गुण, आठ ऋद्धियाँ आदि, नौ पदार्थ, नौ नय, नौ शील आदि। तथा दश धर्म, दश परिग्रह, दशदिशा आदि। इस तरह सदृश संख्यावाले पदार्थोंका वर्णन है ॥२९॥ चौथा अङ्ग समवायाङ्ग है यह एक लाख चौंसठ हजार पदोंसे सहित है तथा द्रव्य आदिकी तुल्यताका वर्णन करता है ॥३०॥ जैसे धर्म द्रव्य, अधर्म द्रव्य, एक जीव द्रव्य और लोकाकाशके प्रदेश एक बराबर हैं—असंख्यात-प्रदेशी हैं—यह द्रव्यकी अपेक्षा तुल्यता समवाय अङ्ग द्वारा वर्णित है ॥३१॥ सिद्धशिला, प्रथम नरकका सीमन्तक नागका इन्द्रक बिल, प्रथम स्वर्गका ऋतु-विमान और अढ़ाई द्वीप ये क्षेत्रसे समान हैं—पैंतालीस लाख योजन विस्तारवाले हैं—यह क्षेत्रकी अपेक्षा समानता उसी समवायाङ्गमें कही गई है ॥३२॥ कालकी अपेक्षा उत्सर्पिणी और अवसर्पिणीकी समानता कही गई है अर्थात् दोनों दश-दश कोड़ाकोड़ी सागर प्रमाण हैं और भावकी अपेक्षा केवलज्ञान तथा केवलदर्शनकी तुल्यता बतलाई गई है अर्थात् जिस प्रकार केवलज्ञानके अविभाग प्रतिच्छेद हैं उसी प्रकार केवलदर्शनके भी अनन्त अविभाग प्रतिच्छेद हैं ॥३३॥ पाँचवाँ अङ्ग व्याख्या-प्रज्ञप्ति अङ्ग है उसमें पदोंकी संख्या दो लाख अट्ठाईस हजार है। इस अङ्गमें कुमार्गत्यागी

---

१. कर्त्वाख्यं म०।

षट्पञ्चाशत् सहस्राणि पञ्च लक्षाः पदानि तु । ज्ञातृधर्मकथाचष्टे जिनधर्मकथामृतम् ॥३६॥
यत्रैकादशलक्षाश्च सहस्राण्यपि सप्ततिः । पदान्युपासकास्तत्रोपासकाध्ययने स्मृताः ॥३७॥
त्रयोविंशतिलक्षाश्च सहस्राणि च विंशतिः । अष्टौ चैव सहस्राणि स्युः पदान्यन्तकृद्दशे ॥३८॥
दशोपसर्ग[1]जेतारः प्रतितीर्थं दशोदिताः । संसारान्तकृतस्तत्र मुनयो ह्यन्तकृद्दशे ॥३९॥
लक्षा द्वानवतिर्यत्र चत्वारिंशत्सहस्रकैः । चत्वारिंशत्सहस्राणि पदान्यभिहितानि तु ॥४०॥
तत्रौपपादिके देशे वर्ण्यन्तेऽनुत्तरादिके । दशोपसर्गजयिनो दशानुत्तरगामिनः ॥४१॥
स्त्रीपुंनपुंसकैस्तिर्यग्नृसुरैरष्ट ते कृताः । शारीराचेतनत्वाभ्यामुपसर्गा दशोदिताः ॥४२॥
आक्षेपण्यादयो यत्र प्रश्नव्याकरणे कथाः । पदलक्षास्त्रिनवतिः सहस्राण्यत्र षोडश ॥४३॥
अङ्गं विपाकसूत्रं यद् विपाकं कर्मणोऽवदत् । कोटी चतुरशीतिश्च पदलक्षा इहोदिताः ॥४४॥
शतं कोटीभिरष्टाभिः सहाष्टाः षष्टिलक्षकाः । षट्पञ्चाशत्सहस्राणि पदानां पञ्च यत्र हि ॥४५॥
दृष्टिवादप्रमाणं स्यादेतत्तत्र सविस्तरम् । शतानि त्रीणि वर्ण्यन्ते त्रिषष्ट्याधिकदृष्टयः ॥४६॥
क्रियातश्चाक्रियातोऽन्या अज्ञानाद्विनयात्पराः । वदन्त्यो दृष्टयः सिद्धिं ताश्चतुर्धा व्यवस्थिताः ॥४७॥
सक्रियाः शतधाऽशीत्या चतस्रोऽशीतिरक्रियाः । अज्ञानात्सप्तषष्टिस्ता द्वात्रिंशद्विनयश्रिताः ॥४८॥

गणधरादि शिष्योंके द्वारा विनय-पूर्वक केवलीसे किये गये अनेक प्रश्न तथा उनके उत्तरका विस्तारके साथ वर्णन है ॥३४-३५॥ छठवाँ अङ्ग ज्ञातृकथाङ्ग है यह जिनधर्मकी कथारूप अमृतका व्याख्यान करता है तथा इसमें पाँच लाख छप्पन हजार पद हैं ॥३६॥ सातवाँ अङ्ग उपासकाध्ययनाङ्ग है। श्रावकगण इसी अङ्गके आश्रित हैं अर्थात् श्रावकाचारका वर्णन इसी अङ्गमें है, इस अङ्गमें ग्यारह लाख सत्तरह हजार पद हैं ॥३७॥ आठवाँ अङ्ग अन्तकृद् दशाङ्ग है इसमें तेईस लाख अट्ठाईस हजार पद हैं ॥३८॥ इसमें प्रत्येक तीर्थंकरके तीर्थमें दश प्रकारके उपसर्गको जीतकर संसारका अन्त करनेवाले दश-दश मुनियोंका वर्णन है ॥३९॥ नौवाँ अङ्ग अनुत्तरोपपादिक दशाङ्ग है इसमें बानवे लाख चवालीस हजार पद कहे गये हैं। इस अङ्गमें प्रत्येक तीर्थंकरके तीर्थमें दश प्रकारके उपसर्ग जीतकर अनुत्तरादि विमानोंमें उत्पन्न होनेवाले दश-दश मुनियोंका वर्णन है ॥४०-४१॥ स्त्री, पुरुष और नपुंसकके भेदसे तीन प्रकारके तिर्यञ्च, तीन प्रकारके मनुष्य एवं स्त्री और पुरुषके भेदसे दो प्रकारके देव इन आठ चेतनोंके द्वारा किये हुए आठ प्रकारके चेतनकृत, एक शारीरिक, कुष्ठादिककी वेदनाकृत और एक अचेतनकृत—दीवाल आदिके गिरनेसे उत्पन्न सब मिलाकर दश प्रकारके उपसर्ग कहे गये हैं॥४२॥ दशवाँ अङ्ग प्रश्नव्याकरणाङ्ग है इसमें *आक्षेपिणी आदि कथाओंका वर्णन है तथा इसमें तिरानबे लाख सोलह हजार पद हैं ॥४३॥ ग्यारहवाँ अङ्ग विपाकसूत्राङ्ग है। यह अङ्ग ज्ञानावरणादि आठ कर्मोंके विपाक-फलका वर्णन करता है और इसमें एक करोड़ चौरासी लाख पद हैं ॥४४॥ और बारहवाँ अङ्ग दृष्टिप्रवाद अङ्ग है इसमें पदोंकी संख्या एक सौ आठ करोड़ अड़सठ लाख छप्पन हजार पाँच है ॥४५॥ इस अङ्गमें तीन सौ त्रेशठ दृष्टियोंका विस्तारके साथ वर्णन किया गया है ॥४६॥ मूलमें १ क्रियादृष्टि, २ अक्रियादृष्टि, ३ अज्ञानदृष्टि और विनयदृष्टिके भेदसे दृष्टियाँ चार प्रकारकी हैं। ये दृष्टियाँ क्रमसे, क्रिया, अक्रिया, अज्ञान और विनयसे सिद्धिकी प्राप्ति होती है, ऐसा निरूपण करती हैं।।४७॥ इनमें क्रियावादी एक सौ अस्सी, अक्रियावादी चौरासी, अज्ञानवादी अड़सठ और विनय-

१. के ते दशोपसर्गाः? तिर्यञ्चः स्त्रीपुंनपुंसकाः, नराः स्त्रीपुंनपुंसकाः, देवाः स्त्रीपुरुषाः इत्थं चेतनकृता अष्टौ शारीरिकं कुष्ठव्याध्यादि, अचेतनं भित्तिपतनादिकम्–सर्वे दशविधा उपसर्गाः।

* १ आक्षेपिणी, २ विक्षेपिणी, ३ संवेदिनी और ४ निर्वेदिनीके भेदसे कथाएँ चार प्रकारकी हैं; जिसमें स्वमतका स्थापन होता है उसे आक्षेपिणी, जिसमें पर मतका खण्डन है उसे विक्षेपिणी, जिसमें धर्मके फलका वर्णन है उसे संवेदिनी और जिसमें वैराग्यका वर्णन है उसे निर्वेदिनी कथा कहते हैं॥

नियतिश्च स्वभावश्च कालो दैवं च पौरुषम् । पदार्था नव जीवाद्या स्वपरौ नित्यतापरौ ।।४९।।
पञ्चभिर्नियतिपृष्ठैश्चतुर्भिः स्वपरादिभिः । एकैकस्यात्र जीवादेर्योगेऽशीत्युत्तरं शतम् ।।५०।।
नियत्याऽस्ति स्वतो जीवः परतो नित्यतोऽन्यतः । स्वभावात्कालतो दैवात् पौरुषाच्च तथेतरे[1] ।।५१।।
सप्तजीवादितत्त्वानि स्वतश्च परतोऽपि च । प्रत्येकं पौरुषान्तेभ्यो न सन्तीति हि सप्तति[2]ः ।।५२।।
नियतेः कालतः स्वन्तर्न तानीति चतुर्दश । सप्तत्या सत्समायोगेऽशीतिश्चतुरधिष्ठिताः ।।५३।।
पदार्थान्नव को वेत्ति सदाद्यैः सप्तभङ्गकैः । इत्या[3]ज्ञानिकसंदृष्टया त्रिषष्टिरुपचीयते ।।५४।।
सज्जीवभावविल्को वा को वाऽसज्जीवभाववित् । सदसज्जीवभावज्ञः कश्चावक्तव्यजीववित् ।।५५।।
सदवक्तव्यजीवज्ञोऽसदवक्तव्यविच्च कः । सदसत्तमवक्तव्यं को वा वेत्तीति यो जनः ।।५६।।
सद्भावोत्पत्तिविद् वा कोऽसद्भावोत्पत्तिविच्च कः । उभयोत्पत्तिवित्कश्चाऽवक्तव्योत्पत्तिविच्च कः ।।५७।।

वादी बत्तीस हैं ॥४८॥ नियति, स्वभाव, काल, दैव और पौरुष इन पाँचका स्वतः, परतः, नित्य और अनित्य इन चारके साथ गुणा करनेपर बीस भेद होते हैं और इन बीस भेदोंका जीवादि नौ पदार्थोंके साथ योग करनेपर क्रियावादियोंके एक सौ अस्सी भेद होते हैं। जैसे कोई मानता है कि जीव नियतिसे स्वतः है, कोई मानता है कि परतः है, कोई मानता है कि नित्य है, कोई मानता है कि अनित्य है। कोई मानता है कि जीव स्वभावसे स्वतः है; कोई मानता है कि परतः है, कोई मानता है कि नित्य है, कोई मानता है कि अनित्य है। कोई मानता है कि जीव कालसे स्वतः है, कोई मानता है कि परतः है, कोई मानता है कि नित्य है, कोई मानता है कि अनित्य है और कोई मानता है कि जीव दैवसे स्वतः है। कोई मानता है कि परतः है। कोई मानता है कि नित्य है और कोई मानता है कि अनित्य है। और कोई मानता है कि जीव पौरुषसे स्वतः है, कोई मानता है कि परतः है। कोई मानता है कि नित्य है और कोई मानता है कि अनित्य है। जिस प्रकार नियति आदिके कारण जीव पदार्थके बीस-बीस भङ्ग हैं उसी प्रकार अजीवादि पदार्थोंके भी बीस भङ्ग हैं। इस तरह क्रियावादियोंके सब मिल मिलाकर एक सौ अस्सी भेद होते हैं ॥४९–५१॥ जीवादि सात तत्त्व, नियति, स्वभाव, काल, दैव और पौरुषकी अपेक्षा न स्वतः हैं और न परतः हैं। इस तरह जीवादि सात तत्त्वोंमें नियति आदि पाँचका गुणा करनेपर पैंतीस और पैंतीसमें स्वतः, परतः इन दोका गुणा करनेपर सत्तर भेद हुए। पुनः जीवादि सात तत्त्व नियति और कालकी अपेक्षा नहीं हैं इसलिए सातमें दोका गुणा करनेपर चौदह भेद हुए। पूर्वोक्त सत्तर भेदोंके साथ इन चौदह भेदोंको मिला देनेपर अक्रियावादियोंके चौरासी भेद होते हैं ॥५२–५३॥ जीवादि नौ पदार्थोंको १ सत्, २ असत्, ३ उभय, ४ अवक्तव्य, ५ सद् अवक्तव्य, ६ असत् अवक्तव्य, और उभय अवक्तव्य इन नौ भङ्गोंसे कौन जानता है? इस प्रकार नौ पदार्थोंमें सात भङ्गोंका गुणा करनेपर आज्ञानिक मिथ्यादृष्टियोंके त्रेशठ भेद होते हैं ॥५४॥ जैसे १ कोई कहता है कि जीव सत् रूप है यह कौन जानता है? २ कोई कहता है कि जीव असद् रूप है यह कौन जानता है? ३ कोई कहता है कि जीव सत् असत्—उभय रूप है यह कौन जानता है? ४ कोई कहता है कि जी अवक्तव्य रूप है यह कौन जानता है? ५ कोई कहता है कि जीव सद् अवक्तव्य रूप है यह कौन जानता है? ६ कोई कहता है कि जीव असद् अवक्तव्य रूप है यह कौन जानता है? और कोई कहता है कि जीव सत्-असत् अवक्तव्य रूप है यह कौन जानता है? इसी प्रकार अजीवादि पदार्थोंके साथ सात-सात भङ्गोंकी योजना करनेपर त्रेशठ भेद होते हैं। इन त्रेशठ भेदोंमें १ जीवकी सत् उत्पत्तिको जाननेवाला कौन है? २ जीवकी असत्

---

१. तथोत्तरे म०, घ० । २. वसन्तीति हि सप्ततिः ख० । ३. इत्याद्यनेक-म० ।

भावमात्राभ्युपगमैर्विकल्पैरेभिराहतैः । त्रिषष्टिः सप्तषष्टिः स्यादाज्ञानिकमतात्मिका ।।५८।।
विनयः खलु कर्तव्यो मनोवाक्कायदानतः । [1]पितृदेवनृपज्ञानिबालवृद्धतपस्विषु ।।५९।।
मनोवाक्कायदानानां मात्राद्यष्टकयोगतः । द्वात्रिंशत्परिसंख्याता वैनयिक्यो हि दृष्टयः ।।६०।।
इत्येवं वदतो दृष्टिं दृष्टिवादस्य पञ्च ते । परिकर्मादयो भेदाश्चूलिकान्ता व्यवस्थिताः ।।६१।।
पञ्चप्रज्ञप्तयः प्रोक्ताः परिकर्मणि ताः पुनः । व्याख्याप्रज्ञप्तिपर्यन्ताश्चन्द्रसूर्यादिनामिकाः ।।६२।।
षट्त्रिंशत्पदलक्षाभिः सहस्रैः पञ्चभिः पदैः । चन्द्रप्रज्ञप्तिराचष्टे चन्द्रभोगादिसम्पदाम् ।।६३।।
पदानां पञ्चलक्षाभिः सहस्रैस्त्रिभिरेव च । सूर्यप्रज्ञप्तिराख्याति सूर्यश्रीविभवोदयम् ।।६४।।
सहस्रैः पञ्चविंशत्या लक्षाभिस्तिसृभिः पदैः । जम्बूद्वीपस्य सर्वस्वं तत्प्रज्ञप्तिः प्रभाषते ।।६५।।
पदलक्षा द्विपञ्चाशत् षट्त्रिंशत्सहस्रकाः । प्रज्ञप्तौ सन्ति यस्यां सा द्वीपसागरवर्णिनी ।।६६।।
लक्षाश्चतुरशीतिर्या सषट्त्रिंशत्सहस्रकाः । पदानां प्रवदत्येषा व्याख्याप्रज्ञप्तिरुच्यते ।।६७।।
रूपिद्रव्यमरूपं च भव्याभव्यात्मसञ्चयम् । व्याख्याप्रज्ञप्तिराख्याति समस्तं सा सविस्तरम् ।।६८।।
पदाष्टाशीति लक्षा हि सूत्रे चादावबन्धकाः । श्रुतिस्मृतिपुराणार्था द्वितीये सूत्रताः पुनः ।।६९।।
तृतीये नियतिः पक्षश्चतुर्थे समयाः परे । सूत्रिता ह्यधिकारेऽपि [2]नानाभेदव्यवस्थिताः ।।७०।।
पदैः पञ्चसहस्रैस्तु प्रयुक्ते प्रथमे पुनः । अनुयोगे पुराणार्थस्त्रिषष्टिरुपवर्ण्यते ।।७१।।
चतुर्दशविधं पूर्वं गतं श्रुतमुदीर्यते । प्रतिपूर्वं च वस्तूनि ज्ञातव्यानि यथाक्रमम् ।।७२।।

उत्पत्तिको जाननेवाला कौन है ? ३ जीवकी सत्-असत् उत्पत्तिको जाननेवाला कौन है ? और जीवकी अवक्तव्य उत्पत्तिको जाननेवाला कौन है ? केवल भावकी अपेक्षा स्वीकृत इन चार भेदोंके और मिला देनेपर आज्ञानिक मिथ्यादृष्टियोंके सब भेद सड़सठ हो जाते हैं ।।५५-५८।। १ माता, २ पिता, ३ देव, ४ राजा, ५ ज्ञानी, ६ बालक, ७ वृद्ध और ८ तपस्वी इन आठका मन वचन, काय और दानसे विनय करना चाहिए । इसलिए मन, वचन, काय और दान इन चारका माता आदि आठके साथ संयोग करनेपर वैनयिक मिथ्यादृष्टियोंके बत्तीस भेद हो जाते हैं ।।५९-६०।। इस प्रकार अनेक मिथ्यादृष्टियोंका कथन करनेवाले दृष्टिवाद अङ्गके १ परिकर्म, २ सूत्र, ३ अनुयोग, ४ पूर्वगत और ५ चूलिका ये पाँच भेद हैं ।।६१।। परिकर्ममें १ चन्द्रप्रज्ञप्ति, २ सूर्यप्रज्ञप्ति, ३ जम्बूद्वीपप्रज्ञप्ति, ४ द्वीपसमुद्रप्रज्ञप्ति और व्याख्याप्रज्ञप्ति ये पाँच प्रज्ञप्तियाँ कही गई हैं अर्थात् इन पाँच प्रज्ञप्तियोंकी अपेक्षा परिकर्मके पाँच भेद हैं ।।६२।। इनमें चन्द्रप्रज्ञप्ति छत्तीस लाख पाँच हजार पदोंके द्वारा चन्द्रमाकी भोग आदि सम्पदाका वर्णन करती है ।।६३।। सूर्यप्रज्ञप्ति पाँच लाख तीन हजार पदोंके द्वारा सूर्यके श्री आदि विभवका निरूपण करती है ।।६४।। जम्बूद्वीप प्रज्ञप्ति तीन लाख पच्चीस हजार पदोंके द्वारा जम्बूद्वीपके सर्वस्वका वर्णन करती है ।।६५।। जिसमें बावन लाख छत्तीस हजार पद हैं, ऐसी द्वीप और सागरोंका वर्णन करनेवाली चौथी द्वीपसमुद्रप्रज्ञप्ति है ।।६६।। जो चौरासी लाख छत्तीस हजार पदोंसे युक्त है वह पाँचवीं व्याख्याप्रज्ञप्ति कही जाती है ।।६७।। व्याख्याप्रज्ञप्ति, रूपीद्रव्य अरूपीद्रव्य तथा भव्य अभव्य जीवोंके समूह आदि सबका विस्तारके साथ वर्णन करती है ।।६८।। दृष्टिवादके दूसरे भेद सूत्रमें अठासी लाख पद हैं, इसके अनेक भेदोंमेंसे प्रथम भेदमें अबन्धक-बन्ध न करनेवाले भावोंका वर्णन है । दूसरे भेदमें श्रुति, स्मृति और पुराणके अर्थका निरूपण है । तीसरे भेदमें नियति पक्षका कथन है और चौथे भेदमें नाना प्रकारके परसमयों—अन्य दर्शनोंका निरूपण है ।।६९-७०।। दृष्टिवादके तीसरे भेद अनुयोगमें पाँच हजार पद हैं तथा इसके अवान्तर भेद प्रथमानुयोगमें त्रेशठ शलाकापुरुषोंके पुराणका वर्णन है ।।७१।। दृष्टिवादका

---

१. माता च पिता च इति पितरौ एकशेषात् मातृपदस्य लोपः । २. ते म० ।

दश चतुर्दशाष्टौ चाष्टादश द्वादश द्वयोः । दशषड्विंशतिस्त्रिंशत्तत्तत्पञ्चदशैव तु ॥७३॥
दशैवोत्तरपूर्वाणां चतुर्णां वर्णितानि वै । प्रत्येकं विंशतिस्तेषां वस्तूनां प्राभृतानि तु ॥७४॥
पूर्वमुत्पादपूर्वाख्यं पदकोटीप्रमाणकम् । द्रव्यध्रौव्यव्ययोत्पादत्रयव्यावर्णनात्मकम् ॥७५॥
लक्षाः षण्णवतिर्यत्र पदानां तेन दृष्टयः । वर्ण्यन्तेऽग्रायणीयेन स्वमताग्रपदानि तु ॥७६॥
अग्रायणीयपूर्वस्य यान्युक्तानि चतुर्दश । विज्ञातव्यानि वस्तूनि तानीमानि यथाक्रमम् ॥७७॥
पूर्वान्तमपरान्तं च ध्रुवमध्रुवमेव च । तथाच्यवनलब्धिश्च पञ्चमं वस्तु वर्णितम् ॥७८॥
अध्रुवं सम्प्रणध्यन्तं कल्पाश्चार्थश्च नामतः । भौमावयाद्यमित्यन्यत् तथा सर्वार्थकल्पकम् ॥७९॥
निर्वाणं च तथा ज्ञेयाऽतीतानागतकल्पता । सिद्धवाख्यं चाप्युपाध्याख्यं ख्यापितं वस्तु चान्तिमम् ॥८०॥
वस्तुनः पञ्चमस्यात्र चतुर्थे प्राभृते पुनः । कर्मप्रकृतिसंज्ञे तु योगद्वाराण्यमूनि तु ॥८१॥
कृतिश्च वेदनास्पर्शः कर्माख्यं च पुनः परम् । प्रकृतिश्च तथैवान्यद् बन्धनं च निबन्धनम् ॥८२॥
प्रक्रमोपक्रमौ प्रोक्तावुदयो मोक्ष एव च । संक्रमश्च तथा लेश्या लेश्याकर्म च वर्णितम् ॥८३॥
लेश्यायाः परिणामश्च सातासातं तथैव च । दीर्घह्रस्वमपि तथा भवधारणमेव च ॥८४॥
पुद्गलात्माभिधानं च तन्निधत्तानिधत्तकम् । सनिकाचितमित्यन्यदनिकाचितसंयुतम् ॥८५॥
कर्मस्थितिकमित्युक्तं पश्चिमं स्कन्ध एव च । समस्तविषयाधीना बोध्याल्पबहुता तथा ॥८६॥
अन्येषामपि पूर्वाणां वस्तुषु प्राभृतेषु च । अनुयोगेषु चान्येषु भेदो ग्राह्यो यथागमम् ॥८७॥
पदानां सप्ततिर्लक्षा यत्र वर्णयति स्फुटम् । तद्वीर्यानुप्रवादाख्यं वीर्यं वीर्यवतां सताम् ॥८८॥
अस्तिनास्तिप्रवादं च यत्षष्टिपदलक्षकम् । जीवाद्यस्तित्वनास्तित्वं स्वपरादिभिराह तत् ॥८९॥
एकोनपदकोटीकं यत्तद्वर्णयति श्रुतम् । पूर्वं ज्ञानप्रवादाख्यं ज्ञानं पञ्चविधं गुणैः ॥९०॥

चौथा भेद पूर्वगत कहा जाता है उसके उत्पाद आदि चौदह भेद हैं और प्रत्येक भेदमें निम्न प्रकार वस्तुओंकी संख्या जाननी चाहिए ॥७२॥ उन भेदोंमें क्रमसे दश, चौदह, आठ, अठारह, बारह, बारह, सोलह, बीस, तीस, पन्द्रह, दश, दश, दश और दश वस्तुएँ हैं तथा प्रत्येक वस्तुके बीस-बीस प्राभृत होते हैं ॥७३-७४॥ पहला उत्पादपूर्व है उसमें एक करोड़ पद हैं तथा द्रव्योंके उत्पाद-व्यय और ध्रौव्यका वर्णन है ॥७५॥ दूसरा आग्रायणीय पूर्व है उसमें छियानबे लाख पद हैं तथा स्वमत सम्मत सात तत्त्व नव पदार्थ आदिका वर्णन है ॥७६॥ पहले आग्रायणीय पूर्वकी जिन चौदह वस्तुओंका कथन किया गया है उनके नाम यथाक्रमसे इसप्रकार जानना चाहिए॥७७॥ १ पूर्वान्त, २ अपरान्त, ३ ध्रुव, ४ अध्रुव, ५ अच्यवन लब्धि, ६ अध्रुव सम्प्रणधि, ७ कल्प, ८ अर्थ, ९ भौमावय, १० सर्वार्थकल्पक, ११ निर्वाण, १२ अतीतानागत, १३ सिद्ध और १४ उपाध्याय ॥७८-८०॥ आग्रायणीय पूर्वकी पञ्चम वस्तुके बीस प्राभृत (पाहुड) हैं। उनमें कर्मप्रकृति नामक चौथे प्राभृतमें निम्नलिखित चौबीस योगद्वार हैं ॥८१॥ १ कृति, २ वेदना, ३ स्पर्श, ४ कर्म, ५ प्रकृति, ६ बन्धन, ७ निबन्धन, ८ प्रक्रम, ९ उपक्रम, १० उदय, ११ मोक्ष, १२ संक्रम, १३ लेश्या, १४ लेश्याकर्म, १५ लेश्यापरिणाम, १६ सातासात, १७ दीर्घह्रस्व, १८ भवधारण, १९ पुद्गलात्मा, २० निधत्ता-निधत्तक, २१ सनिकाचित, २२ अनिकाचित, २३ कर्मस्थिति और २४ स्कन्ध । इन योगद्वारोंमें समस्त विषयोंकी हीनाधिकता यथायोग्य जाननी चाहिए ॥८२-८६॥ अन्य पूर्वोंकी वस्तु, प्राभृत तथा अनुयोग आदिका भेद आगमके अनुसार जानना चाहिए ॥८७॥ जिसमें सत्तर लाख पद हैं ऐसा तीसरा वीर्यानुप्रवाद नामका पूर्व अतिशय पराक्रमी सत्पुरुषोंके पराक्रमका वर्णन करता है ॥८८॥ जिसमें साठ लाख पद हैं ऐसा चौथा अस्ति नास्ति प्रवाद पूर्व स्वचतुष्टयकी अपेक्षा जीवादि द्रव्योंके अस्तित्व और पर-चतुष्टयकी अपेक्षा उनके नास्तित्वका कथन करता है ॥८९॥ एक कम एक करोड़ पदोंसे सहित जो पाँचवाँ ज्ञानप्रवाद

पूर्वं सत्यप्रवादाख्यं पदकोटीकषट्पदम् । भाषा द्वादशधा[1] प्राह दशधा[2] सत्यभाषणम् ॥९१॥
हिंसाद्यकर्त्तुः कर्तुर्वा कर्त्तव्यमिति भाषणम् । अभ्याख्यानं प्रसिद्धो हि वागादिकलहः पुनः ॥९२॥
दोषाविष्करणं दुष्टैः पश्चात्पैशुन्यभाषणम् । भाषा बद्धप्रलापाख्या चतुर्वर्गविवर्जिता ॥९३॥
रत्यरत्यभिधे वोभे रत्यरत्युपपादिके । आसज्यते यथार्थेषु[3] श्रोता सोपाधिवाक् पुनः ॥९४॥
वञ्चनाप्रवणं जीवं कर्त्री निःकृतिवाक्यतः । न नमत्यधिकेष्वात्मा सा चाप्रणतिवाग्भूत् ॥९५॥
या प्रवर्त्तयति स्तेये मोघवाक् सा समीरिता । सम्यग्मार्गे नियोक्त्री या सम्यग्दर्शनवागसौ ॥९६॥
मिथ्यादर्शनवाक् सा या मिथ्यामार्गोपदेशिनी । वाचो द्वादशभेदाया वक्तारो द्वीन्द्रियादतः ॥९७॥
दशधा सत्यसद्भावे नामसत्यमुदाहृतम् । इन्द्रादिव्यवहारार्थं यत् संज्ञाकरणं हि तत् ॥९८॥
यदर्थासंनिधानेऽपि रूपमात्रेण भाष्यते । तद्रूपसत्यं चित्रादिपुरुषादावचेतने ॥९९॥
आकारेणाक्षपुस्तादौ सता वा यदि वाऽसता । स्थापितं व्यवहारार्थं स्थापनासत्यमुच्यते ॥१००॥
प्रतीत्य[4] वर्तते भावान् यदौपशमकादिकान् । प्रतीत्यसत्यमित्युक्तं वचनं तद्यथाऽऽगमम् ॥१०१॥

नामका पूर्व है वह पाँच प्रकारके ज्ञानका वर्णन करता है ॥९०॥ जिसमें छह अधिक एक करोड़ पद हैं ऐसा छठवाँ सत्यप्रवाद नामका पूर्व बारह प्रकारकी भाषा तथा दश प्रकारके सत्य वचनका कथन करता है ॥९१॥ बारह प्रकारकी भाषाओंके नाम और स्वरूप इस प्रकार हैं—हिंसादि पापोंके करनेवाले अथवा नहीं करनेवालेके लिए 'करना चाहिए' इस प्रकार कहना सो अभ्याख्यान भाषा है। कलह कारक वचन बोलना सो कलह भाषा है यह प्रसिद्ध ही है ॥९२॥ दुष्ट मनुष्योंके द्वारा पीठ पीछे दोषोंका प्रकट किया जाना सो पैशुन्य भाषा है। जो धर्म, अर्थ, काम और मोक्ष इन चार वर्गोंके वर्णनसे रहित है वह बद्धप्रलाप नामक भाषा है ॥९३॥ रति अर्थात् राग उत्पन्न करनेवाली भाषाको रति भाषा कहते हैं और अरति अर्थात् द्वेष उत्पन्न करनेवाली भाषाको अरति भाषा कहते हैं, जिसके द्वारा श्रोता अर्थार्जन आदि कार्योंमें लग जाता है वह उपाधि वाक् भाषा है। जो जीवको धोखादेहीमें निपुण करती है वह निकृति भाषा है। जो अपनेसे अधिक गुणवालोंको नमस्कार नहीं करती है वह अप्रणति भाषा है ॥९४–९५॥ जो जीवको चोरीमें प्रवृत्त करती है वह मोघ (मोष) भाषा है। जो समीचीन मार्गमें लगाती है वह सम्यग्दर्शन भाषा है और जो मिथ्या मार्गका उपदेश देती है वह मिथ्यादर्शन भाषा है। इन बारह प्रकारकी भाषाओंके बोलनेवाले द्वीन्द्रियादिक जीव हैं ॥९६–९७॥

सत्य वचन दश प्रकारके हैं उनमें पहला नाम सत्य कहा गया है, व्यवहार चलानेके लिए किसीका इन्द्र आदि नाम रख लेना नामसत्य है ॥९८॥ पदार्थके न होनेपर भी रूप-मात्रकी मुख्यतासे जो कथन होता है वह रूपसत्य है जैसे किसी मनुष्यके अचेतन चित्रको उस मनुष्यरूप कहना ॥९९॥ पाँसा तथा खिलौना आदिमें आकारकी समानता होने अथवा न होने-पर भी व्यवहारके लिए जो स्थापना की जाती है वह स्थापना सत्य है जैसे सतरंजकी गोटोंमें वैसा आकार न होनेपर भी बादशाह-वजीर आदिकी स्थापना करना और हाथी, घोड़ा आदिके खिलौनोंमें उन जैसा आकार होनेपर हाथी, घोड़ा आदिकी स्थापना करना ॥१००॥ आगमके अनुसार प्रतीतिकर औपशमिकादि भावोंका कथन करना प्रतीत्य सत्य है। जैसे मिथ्यादृष्टि गुण-स्थानमें आगममें औदयिक भाव बतलाया है। यद्यपि वहाँ ज्ञानावरण कर्मका क्षयोपशम भाव

---

१. अभ्याख्यानकलहपैशुन्यासंबद्धप्रलापरत्यरत्युपधिनिकृत्यप्रणतिमोषसम्यग्दर्शनमिथ्यादर्शनात्मिका भाषा द्वादशधा ।—राजवार्तिक प्रथमाध्याय सूत्र २० ।

२. नामरूपस्थापनाप्रतीत्यसंवृतिसंयोजनाजनपददेशभावसमयसत्यभेदेन दशविधः सत्यभावः ।
—राजवार्तिक प्र० अ० सू० २० ।

३. जयार्थेषु म०, जयार्थेषु स्रोतारो बाधिता पुनः क० । ४. प्रतीत्या म० ।

सामग्रीकृतकायस्य वाचकत्वैकदेशतः । वचः संवृतिसत्यं स्यात् भेरीशब्दादिकं यथा ॥१०२॥
चेतनाचेतनद्रव्यसन्निवेशाविभागकृत् । वचः संयोजनासत्यं क्रौञ्चव्यूहादिगोचरम् ॥१०३॥
यदार्याऽनार्यनानात्वनानाजनपदेष्विह । चतुर्वर्गकरं वाक्यं सत्यं जनपदाश्रितम् ॥१०४॥
यद्ग्रामनगराचारराजधर्मोपदेशकृत् । गणाश्रमपदोद्भासि देशसत्यं तु तन्मतम् ॥१०५॥
छद्मस्थे द्रव्ययाथात्म्यज्ञान[1]वैकल्यवत्यपि । प्रासुकाप्रासुकत्वेऽपि भावसत्यं वचः स्थितम् ॥१०६॥
द्रव्यपर्यायभेदानां याथात्म्यप्रतिपादकम् । यत्तत्समयसत्यं स्यादागमार्थपरं वचः ॥१०७॥
कोट्यः षड्विंशतिर्यत्र पदानां परिवर्णिताः । आत्मप्रवादपूर्वेऽपि भूयोयुक्तिपरिग्रहे ॥१०८॥
तत्र कर्तृत्वभोक्तृत्वनित्यताऽनित्यतादयः । आत्मधर्मा निरूप्यन्ते तद्भेदाश्च सयुक्तिकाः ॥१०९॥
साशीतिपदलक्षैकपदकोटीप्रमाणकम् । पूर्वं कर्मप्रवादाख्यं कर्मबन्धस्य वर्णकम् ॥११०॥
लक्षाश्चतुरशीतिस्तु पदानां यत्र वर्णिताः । पूर्वं नवममाख्यातं प्रत्याख्यानं तदाख्यया ॥१११॥
प्रमिताप्रमितं तत्र द्रव्यभावसमाश्रयम् । प्रत्याख्यानं समाख्यातं यत्र श्रा[2]मण्यवर्धनम् ॥११२॥
कोटी च दशलक्षाश्च यत्पदानां प्रवर्तिता । तद्विद्यानुप्रवादाख्यं पूर्वं दशममत्र च ॥११३॥
लघ्वोऽङ्गुष्ठप्रसेनाद्या विद्याः सप्तशतानि तु । रोहिण्याद्या महाविद्याः प्रोक्ताः पञ्चशतानि च ॥११४॥

होनेसे क्षयोपशमिक तथा जीवत्व और भव्यत्व अथवा जीवत्व और अभव्यत्वकी अपेक्षा पारिणामिक भाव भी है परन्तु आगमके कहे अनुसार वहाँ दर्शनमोहकी अपेक्षा औदयिक भाव ही कहना ॥१०१॥ समुदायको एक देशकी मुख्यतासे एक रूप कहना संवृति सत्य है, जैसे भेरी, तबला, बाँसुरी, वीणा आदि अनेक बाजोंका शब्द जहाँ एक समूहमें हो रहा है वहाँ भेरी आदिकी मुख्यतासे भेरी आदिका शब्द कहना ॥१०२॥ जो चेतन-अचेतन द्रव्योंके विभागको करनेवाला न हो उसे संयोजना सत्य कहते हैं। जैसे क्रौञ्चव्यूह आदि। भावार्थ—क्रौञ्चव्यूह, चक्रव्यूह आदि सेनाओंकी रचनाके प्रकार हैं और सेनाएँ चेतन-अचेतन पदार्थोंके समूहसे बनती हैं पर जहाँ अचेतन पदार्थोंकी विवक्षा न कर केवल क्रौञ्चाकार रची हुई सेनाको क्रौञ्च-व्यूह और चेतन पदार्थोंकी विवक्षा न कर केवल चक्रके आकार रची हुई सेनाको चक्रव्यूह कह देते हैं वहाँ संयोजनासत्य होता है ॥१०३॥ जो वचन आर्य-अनार्य आदि अनेक देशोंमें धर्म, अर्थ, काम और मोक्षका करनेवाला है उसे जनपदसत्य कहते हैं ॥१०४॥ जो वचन गाँवकी रीति, नगरकी रीति तथा राजाकी नीतिका उपदेश करनेवाला हो एवं गण और आश्रमों-का उपदेशक हो वह देशसत्य माना गया है ॥१०५॥ यद्यपि छद्मस्थके द्रव्योंके यथार्थ ज्ञानकी विकलता है तथापि केवलीके वचनकी प्रमाणता कर वे प्रासुक और अप्रासुक द्रव्यका निर्णय करते हैं यह भावसत्य है ॥१०६॥ और जो द्रव्य तथा पर्यायके भेदोंकी यथार्थताको बतलाने-वाला तथा आगमके अर्थको पोषण करनेवाला वचन है वह समयसत्य है ॥१०७॥ जिसमें छब्बीस करोड़ पद कहे गये हैं ऐसा सातवाँ आत्मप्रवाद नामका पूर्व है। इसमें अनेक युक्तियों-का संग्रह है तथा कर्तृत्व, भोक्तृत्व, नित्यत्व, अनित्यत्व आदि जीवके धर्मों और उनके भेदोंका सयुक्तिक निरूपण है ॥१०८-१०९॥ जिसमें एक करोड़ अस्सी लाख पद हैं ऐसा आठवाँ कर्म-प्रवाद नामका पूर्व है। यह पूर्व ज्ञानावरणादि कर्मोंके बन्धका निरूपण करनेवाला है ॥११०॥ जिसमें चौरासी लाख पद हैं ऐसा नौवाँ प्रत्याख्यान पूर्व कहा गया है ॥१११॥ इस पूर्वमें परिमित द्रव्य-प्रत्याख्यान और अपरिमित भाव-प्रत्याख्यानका निरूपण है तथा यह पूर्व मुनिधर्मको बढ़ानेवाला है ॥११२॥ जिसमें एक करोड़ दश लाख पद हैं ऐसा दशवाँ विद्यानुवाद नामका पूर्व है ॥११३॥ इसमें अङ्गुष्ठ प्रसेन आदि सात सौ लघु विद्याएँ और रोहिणी आदि पाँच सौ

१. याथात्म्यज्ञानं वैकल्य म० । २. प्रावण्य म० ।

कोट्यः षड्विंशतिर्यस्मिन् पदानां सुप्रतिष्ठिताः । कल्याणनामधेयं तत् पूर्वमन्वर्थनामकम् ॥११५॥
ज्योतिर्गणस्य सञ्चारं त्रिषष्टिपुरुषाश्रितम् । सुरासुरेन्द्रकल्याणं वर्णयत्यतिविस्तरम् ॥११६॥
स्वप्नान्तरिक्षभौमाङ्गस्वरव्यञ्जनलक्षणम् । छिन्नमित्यष्टधाभिन्नं निमित्तं शाकुनं तथा ॥११७॥
यत्त्रयोदशकोटीभिः पदानां समधिष्ठितम् । प्राणावायाख्यपूर्वं तत्प्रणीतं द्वादशं परम् ॥११८॥
यत्र कायचिकित्सादिरायुर्वेदोऽष्टधोदितः । प्राणापानविभागादिभूतकर्मविधिस्तथा ॥११९॥
क्रियाविशालपूर्वं तु नवकोटीपदात्मकम् । छन्दःशब्दादिशास्त्राणि तत्र शिल्पकला गुणाः ॥१२०॥
पञ्चाशत्पदलक्षाभिः कोट्यो द्वादश यत्र तु । पूर्वे चतुर्दशे लोकबिन्दुसारे हि तत्र च ॥१२१॥
अङ्कराशिविधिश्चाष्टव्यवहारविधिस्तथा । परिकर्मविधिः प्रोक्तः समस्तश्रुतसम्पदा ॥१२२॥
जलस्थलगताकाशरूपमायागता पुनः । चूलिका पञ्चधान्वर्थसंज्ञा भेदवती स्थिता ॥१२३॥
द्विकोट्यौ नवलक्षाश्च नवाशीतिसहस्रकैः । द्वे शते पदसङ्ख्यानां पञ्चानां च पृथक् पृथक् ॥१२४॥
चतुर्दशप्रकारं स्यादङ्गबाह्यं प्रकीर्णकम् । ग्राह्यं प्रमाणमेतस्य प्रमाणपदसङ्ख्यया ॥१२५॥
अष्टावक्षरकोट्यस्तु लक्षैकाष्टसहस्रकैः । शतं च पञ्चसप्तत्या तत्रैषोऽक्षरसङ्ग्रहम्[1] ॥१२६॥
त्रयोदशसहस्राणि पञ्चशत्येकविंशतिः । कोटी च पदसङ्ख्येयं वर्णाः सप्तैव वर्णिताः ॥१२७॥
पञ्चविंशतिलक्षाश्च त्रयस्त्रिंशत् शतानि च । अशीतिः श्लोकसङ्ख्येयं वर्णाः पञ्चदशात्र च ॥१२८॥
तत्र सामायिकं नाम शत्रुमित्रसुखादिषु । रागद्वेषपरित्यागात्समभावस्य वर्णकम् ॥१२९॥

महाविद्याएँ कही गई हैं ॥११४॥ जिसमें छब्बीस करोड़ पद प्रतिष्ठित हैं ऐसा ग्यारहवाँ कल्याणवाद नामका पूर्व है। यह सार्थक नामधारी है और सूर्य, चन्द्रमा आदि ज्योतिषी देवोंके संचार तथा सुरेन्द्र, असुरेन्द्रकृत त्रेशठ शलाकापुरुषोंके कल्याणका विस्तारके साथ वर्णन करता है। साथ ही इसमें १ स्वप्न, २ अन्तरिक्ष, ३ भौम, ४ अङ्ग, ५ स्वर, ६ व्यञ्जन, ७ लक्षण और ८ छिन्न इन अष्टाङ्ग निमित्तों और अनेक शकुनोंका भी वर्णन है ॥११५-११७॥ जो तेरह करोड़ पदोंसे सहित है वह प्राणावाय नामका बारहवाँ पूर्व है॥११८॥ इसमें काय-चिकित्सा आदि आठ प्रकारके आयुर्वेदका तथा प्राणापान आदिके विभाग और उनकी पार्थिवी आदि धारणाओंका वर्णन है ॥११९॥ तेरहवाँ नौ करोड़ पदोंसे सहित क्रियाविशाल नामका पूर्व है इसमें छन्दःशास्त्र, व्याकरण-शास्त्र तथा शिल्पकला आदि अनेक गुणोंका वर्णन है ॥१२०॥ और जिसमें बारह करोड़ पचास लाख पद हैं ऐसा चौदहवाँ लोकबिन्दुसार नामक पूर्व है। इसमें समस्त श्रुतरूपी सम्पदाके द्वारा अंकराशिकी विधि, आठ प्रकारके व्यवहारकी विधि तथा परिकर्मकी विधि कही गई है ॥१२१-१२२॥ पहले बारहवें दृष्टिवाद अङ्गके पाँच भेदोंमें एक चूलिका नामक भेद बता आये हैं वह जलगता, स्थलगता, आकाशगता, रूपगता और मायागताके भेदसे पाँच प्रकारकी है। चूलिकाके ये समस्त भेद सार्थक नामवाले हैं और इनमें प्रत्येकके दो करोड़ नौ लाख नवासी हजार दो सौ पाँच पद हैं ॥१२३-१२४॥ इस प्रकार अङ्गप्रविष्ट श्रुतज्ञानका वर्णन किया, अब अङ्गबाह्यश्रुतका वर्णन करते हैं—

अङ्गबाह्यश्रुत सामायिक आदिके भेदसे चौदह प्रकारका है, यह प्रकीर्णकश्रुत कहलाता है और इसका प्रमाण, प्रमाणपदकी संख्यासे ग्रहण करना चाहिए ॥१२५॥ अङ्गबाह्य श्रुतज्ञानके समस्त अक्षरोंका संग्रह आठ करोड़ एक लाख आठ हजार एक सौ पचहत्तर प्रमाण है ॥१२६॥ इसके समस्त पदोंका जोड़ एक करोड़ तेरह हजार पाँच सौ इक्कीस पद तथा शेष सात अक्षर प्रमाण है ॥१२७॥ और इसके समस्त श्लोकोंकी संख्या पचीस लाख तीन हजार तीन सौ अस्सी तथा शेष पन्द्रह अक्षर प्रमाण है ॥१२८॥ उन चौदह प्रकीर्णकोंमें पहला सामायिक नामका

१. तत्रैकोऽक्षर म० ।

जिनस्तवविधानाख्यः स चतुर्विंशतिस्तवः । वर्णको वन्दना वन्द्यवन्दनाविधिवादिनी[1] ॥१३०॥
द्रव्ये क्षेत्रे च कालादौ कृतावद्यस्य शोधनम् । प्रतिक्रमणमाख्याति प्रतिक्रमणनामकम् ॥१३१॥
दर्शनज्ञानचारित्रतपोवीर्योपचारिकम् । पञ्चधाः विनयं वक्ति तद् वैनयिकनामकम् ॥१३२॥
चतुःशिरस्त्रिद्विनतं द्वादशावर्तमेव च । कृतिकर्माख्यमाचष्टे कृतिकर्मविधिं परम् ॥१३३॥
दशवैकालिकं वक्ति गोचरग्रहणादिकम् । उत्तराध्ययनं वीरनिर्वाणगमनं तथा ॥१३४॥
तत्कल्पव्यवहाराख्यं प्राह कल्पं तपस्विनाम् । अकल्प्यसेवनायां च प्रायश्चित्तविधिं तथा ॥१३५॥
यत्कल्पाकल्पसंज्ञं स्यात् कल्पाकल्पद्वयं पुनः । महाकल्पं पुनर्द्रव्यक्षेत्रकालोचितं यतेः ॥१३६॥
देवोपपादमाचष्टे पुण्डरीकाख्यम्[2]प्यतः । देवीनामुपपादं तु पुण्डरीकं महादिकम् ॥१३७॥
निषद्यकाख्यमाख्याति प्रायश्चित्तविधिं परम् । अङ्गवाह्यश्रुतस्यायं व्यापारः प्रतिपादितः ॥१३८॥
एकमष्टौ च चत्वारि चतुः षट् स[3]प्तभिश्चतुः । चतुः शून्यं च सप्तत्रिसप्तशून्यं नवापि च ॥१३९॥
पञ्च पञ्चैककं षट् च तथैकं पञ्चतत्त्वतः । समस्तश्रुतवर्णानां प्र[4]माणं परिकीर्त्तितम् ॥१४०॥
लक्षाशीतिसहस्राणि चतुर्भिश्च चतुःशती । सप्तषष्टिश्च निर्दिष्टाः कोटीकोट्य इमाः स्फुटाः ॥१४१॥
चत्वारिंशच्चतुर्लक्षास्त्रिसप्ततिशतानि च । सप्ततिश्च तथा ज्ञेया इमाः कोटयः स्फुटीकृताः ॥१४२॥
सपञ्चनवतिर्लक्षाः सपञ्चाशत्सहस्रकम् । सहस्रं षट्शती वर्णा वर्णाः पञ्चदशापि ते ॥१४३॥

प्रकीर्णक है। यह प्रकीर्णक, शत्रु, मित्र तथा सुख-दुःख आदिमें राग-द्वेषका परित्याग कर समताभावका वर्णन करनेवाला है ॥१२९॥ दूसरा जिनस्तव नामका प्रकीर्णक है इसमें चौबीस तीर्थंकरोंका स्तवन किया गया है। तीसरा वन्दना नामका प्रकीर्णक है इसमें वन्दना करने योग्य पञ्चपरमेष्ठी आदिकी वन्दनाकी विधि बतलाई गई है ॥१३०॥ प्रतिक्रमण नामका चौथा प्रकीर्णक द्रव्य क्षेत्र काल आदिमें किये गये पापको शुद्ध करनेवाले प्रतिक्रमणका कथन करता है ॥१३१॥ वैनयिक नामका पाँचवाँ प्रकीर्णक दर्शन-विनय, ज्ञान-विनय, चारित्र-विनय, तपोविनय और उपचार-विनयके भेदसे पाँच प्रकारको विनयका कथन करता है ॥१३२॥ कृतिकर्म नामका छठवाँ प्रकीर्णक, सामायिकके समय चार शिरोनति, मन-वचन-कायसे आदि-अन्तमें दो दण्डवत् नमस्कार और बारह आवर्त करना चाहिए। इस प्रकार कृति-कर्मकी उत्तम विधिका वर्णन करता है ॥१३३॥ दशवैकालिक नामका सातवाँ प्रकीर्णक मुनियोंकी गोचरी आदि वृत्तियोंके ग्रहण करने आदिका वर्णन करता है। आठवाँ उत्तराध्ययन नामका प्रकीर्णक महावीर भगवान्के निर्वाणगमन सम्बन्धी कथन करता है ॥१३४॥ कल्पव्यवहार नामक नौवाँ प्रकीर्णक तपस्वियोंके करने योग्य विधिका तथा नहीं करने योग्य कार्योंके हो जानेपर उनकी प्रायश्चित्त-विधिका वर्णन करता है ॥१३५॥ कल्पाकल्प नामक दशवाँ प्रकीर्णक करने योग्य तथा न करने योग्य दोनों कार्योंका निरूपण करता है। महाकल्प नामका ग्यारहवाँ प्रकीर्णक मुनिके द्रव्य क्षेत्र तथा कालके योग्य कार्यका उल्लेख करता है ॥१३६॥ पुण्डरीक नामका बारहवाँ प्रकीर्णक देवोंके उपपादका वर्णन करता है। महापुण्डरीक नामका तेरहवाँ प्रकीर्णक देवियोंके उपपादका निरूपण करता है ॥१३७॥ और निषद्य नामका चौदहवाँ प्रकीर्णक प्रायश्चित्त-विधिका उत्तम वर्णन करता है। इस प्रकार यह अङ्गवाह्य श्रुतज्ञानका विस्तार कहा ॥१३८॥ समस्त श्रुतके अक्षरोंका प्रमाण एक, आठ, चार, चार, छह, सात, चार, चार, शून्य, सात, तीन, सात, शून्य, नौ, पाँच, पाँच, एक, छह, एक, और पाँच अर्थात् एक लाख चौरासी हजार चार सौ सड़सठ कोड़ाकोड़ी चवालीस लाख, सात हजार तीन सौ सत्तर करोड़ पंचानबे लाख इक्यावन हजार छह सौ पन्द्रह

---

१. वन्दना द्विविधादिना म० । २. पुण्डरीकाद्य म० । ३. सप्तति- क० ।
४. १८४४६७४४०७३७०९५५१६१५ ।

क्षयोपशमभावे च श्रुतावरणकर्मणः । मतिपूर्वं परोक्षं स्यादनन्तविषयं श्रुतम् ॥१४४॥
इन्द्रियानिन्द्रियोत्थं स्यान्मतिज्ञानमनेकधा । परोक्षमर्थसान्निध्ये प्रत्यक्षं व्यवहारिकम् ॥१४५॥
क्षयोपशमसापेक्षं निजावरणकर्मणः । अवग्रहेहावायाख्याधारणातश्चतुर्विधः ॥१४६॥
इन्द्रियानिन्द्रियैः षड्भिश्चत्वारोऽवग्रहादयः । भवन्ति गुणिता भेदाश्चतुर्विंशतिरेव ते ॥१४७॥
शब्दगन्धरसस्पर्शव्यञ्जनावग्रहैर्युताः । चाष्टाविंशतिरुक्तास्ते द्वात्रिंशन्मूलभङ्गकैः ॥१४८॥
बह्वाद्यैः षड्भिरभ्यस्तास्ते त्रयो राशयश्चतुः । चत्वारिंशं शतं[1] चाष्टाषष्टिः[2] द्वानवतं[3] शतम् ॥१४९॥
अभ्यस्ताः सेतरैस्तैस्तैरष्टाशीतं शतद्वयम् । षट्त्रिंशत् त्रिशती च स्यादशीत्याऽसौ चतुर्युता ॥१५०॥
मतिज्ञानविकल्पोऽयं तावत्स्वावृतिकर्मणः । क्षयोपशमभेदेन भिद्यमानः सुदृष्टिषु ॥१५१॥
देशप्रत्यक्षमुद्भूतो जीवशुद्धौ[5] त्रिधावधिः[6] । देशः सर्वश्च परमः पुद्गलावधिरिष्यते ॥१५२॥
देशप्रत्यक्षमेव स्यान्मनःपर्यय इत्यपि । विपुलर्जुमतिप्रख्यः सोऽवधेः सूक्ष्मगोचरः ॥१५३॥
सर्वप्रत्यक्षमन्त्यं स्यात्केवलावरणक्षयात् । अक्षयं केवलज्ञानं केवलं विश्वगोचरम् ॥१५४॥

है ॥१३६-१४३॥ यह श्रुत ज्ञान, श्रुतज्ञानावरण कर्मके क्षयोपशमसे होता है, मतिज्ञानपूर्वक होता है, परोक्ष है और अनन्त पदार्थोंको विषय करनेवाला है ॥१४४॥

पाँच इन्द्रियों तथा मनसे जो ज्ञान उत्पन्न होता है उसे मतिज्ञान कहते हैं। यह मतिज्ञान अनेक प्रकारका है एवं परोक्ष है। यदि पदार्थोंके सान्निध्यमें होता है तो सांव्यवहारिक प्रत्यक्ष भी कहलाता है ॥१४५॥ यह मतिज्ञानावरण कर्मके क्षयोपशमकी अपेक्षा रखता है तथा अवग्रह ईहा अवाय और धारणाके भेदसे चार प्रकारका है ॥१४६॥ अवग्रह आदि चारों भेद पाँच इन्द्रिय और मन इन छहके द्वारा होते हैं इसलिए चारमें छहका गुणा करनेसे मतिज्ञानके चौबीस भेद होते हैं ॥१४७॥ इन चौबीस भेदोंमें शब्द, गन्ध, रस और स्पर्शसे होनेवाले व्यञ्जनावग्रहके चार भेद मिलानेसे मतिज्ञानके अट्ठाईस भेद हो जाते हैं और इन अट्ठाईस भेदोंमें अवग्रह आदि चार मूलभेद मिला देनेसे बत्तीस भेद हो जाते हैं। इस प्रकार चौबीस, अट्ठाईस और बत्तीस भेद हो जाते हैं। इस प्रकार चौबीस, अट्ठाईस और बत्तीसके भेदमें मतिज्ञानके भेदोंकी प्रारम्भमें तीन राशियाँ होती हैं। उनमें क्रमसे बहु, बहुविध, क्षिप्र, अनिःसृत, अनुक्त और ध्रुव इन छह पदार्थोंका गुणा करनेपर एक सौ चवालीस, एक सौ अड़सठ तथा एक सौ बानवे भेद होते हैं। यदि बहु आदि छह तथा इनसे विपरीत एक आदि छह इन बारह भेदोंका उक्त तीन राशियोंमें क्रमसे गुणा किया जावे तो दो सौ अठासी, तीन सौ छत्तीस और तीनसौ चौरासी भेद होते हैं ॥१४८-१५०॥ मतिज्ञानके ये विकल्प मतिज्ञानावरणकर्मके क्षयोपशममें भेद होनेसे प्रकट होते हैं तथा सम्यग्दृष्टि जीवोंके होते हैं। मिथ्यादृष्टि जीवोंका मतिज्ञान कुमतिज्ञान कहलाता है ॥१५१॥ अवधिज्ञानावरण कर्मके क्षयोपशमसे जीवमें शुद्धि होनेपर देशावधि, सर्वावधि और परमावधि यह तीन प्रकारका अवधिज्ञान होता है। यह अवधिज्ञान देश-प्रत्यक्ष है तथा पुद्गल द्रव्यको विषय करता है ॥१५२॥ मनःपर्यय ज्ञान भी देश-प्रत्यक्ष ही है। इसके विपुलमति और ऋजुमतिके भेदसे दो भेद हैं तथा यह अवधिज्ञानकी अपेक्षा सूक्ष्म पदार्थको विषय करता है। अवधिज्ञान परमाणुको जानता है तो यह उसके अनन्तवें भागतकको जान लेता है ॥१५३॥ अन्तिम ज्ञान केवलज्ञान है यह केवलज्ञानावरणकर्मके क्षयसे होता है, सर्व प्रत्यक्ष है, अविनाशी है और समस्त पदार्थोंको जाननेवाला है ॥१५४॥

---

१. चतुश्चत्वारिंशं शतं १४४ । २. उभयदीपकमिदम् । ३. शतं चाष्टाषष्टिः १६८ । ४. १९२ ।
५. जीवसिद्धौ म० । ६. विधिः म० ।

परोक्षस्य प्रमाणस्य हानोपादानधीः फलम् । प्रत्यक्षस्य तथोपेक्षा[2] प्रागमोहः फलद्वयम् ॥१५५॥

पारम्पर्येण मोक्षस्य हेतुर्ज्ञानचतुष्टयम् । साक्षादेव भवत्येकं केवलज्ञानमव्ययम् ॥१५६॥

प्रमाणप्रमितार्थानां श्रद्धानं दर्शनं शुभम् । शुभक्रियासुवृत्तिश्च[3] चारित्रमिति वर्ण्यते ॥१५७॥

सम्यक्त्वज्ञानचारित्रत्रितयं मोक्षसाधनम् । श्रद्धेयं चाप्यनुष्ठेयं परसम्पदमिच्छता ॥१५८॥

इतोऽन्यदुत्तरं नास्ति नासीन्नापि भविष्यति । मुक्त्यङ्गमित्यवेतव्यमिति सारसमुच्चयः ॥१५९॥

इत्याद्यस्य जिनेन्द्रस्य प्रपीय वचनौषधम् । सन्देहान्तकनिर्मुक्ता मुक्तेवाभाज्जगत्त्रयी ॥१६०॥

वंशस्थवृत्तम्

गृहीतरत्नत्रयभूषणा पुरा जना बभूवुः स्थिरभावनास्तदा ।
परे यतिश्रावकधर्मदीक्षिताः कृते युगे युक्तगुणाश्चकासिरे ॥१६१॥

युतं च संघेन चतुर्विधेन तं जगद्विहाराभिमुखं जिनेश्वरम् ।
विशुद्धसम्यक्त्वधियश्चतुर्विधाः प्रणम्य जग्मुर्विबुधा निजास्पदम् ॥१६२॥

गृहाश्रमी श्रावकमुख्यतां श्रितो[4] जिनेश्वरं तं भरतेश्वरो नृपः ।
समर्च्य साकेतमितः प्रमोदवानुदारवंशस्थनृपैः परिष्कृतः ॥१६३॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ प्रथमतीर्थंकरधर्मतीर्थप्रवर्तनो नाम दशमः सर्गः ॥१०॥

परोक्ष प्रमाणका फल हेय पदार्थको छोड़ने और उपादेय पदार्थको ग्रहण करनेकी बुद्धि उत्पन्न होना है तथा प्रत्यक्ष प्रमाणका फल उपेक्षा—रागद्वेषका अभाव एवं उसके पूर्व मोहका क्षय होना है ॥१५५॥ मतिज्ञानादि चार ज्ञान परम्परासे मोक्षके कारण हैं और एक अविनाशी केवलज्ञान साक्षात् ही मोक्षका कारण है ॥१५६॥ प्रमाणके द्वारा जाने हुए पदार्थोंका श्रद्धान करना सम्यग्दर्शन है और शुभ क्रियाओंमें प्रवृत्ति होना सम्यक्-चारित्र कहलाता है ॥१५७॥ सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्र ये तीनों मोक्षप्राप्तिके उपाय हैं, इसलिए उत्तम सम्पदाकी इच्छा करनेवाले पुरुषको इनका श्रद्धान तथा तदनुरूप आचरण करना चाहिए ॥१५८॥ इन तीनोंसे बढ़कर दूसरा मोक्षका कारण न है, न था, और न होगा। यही सबका सार है ॥१५९॥ इस प्रकार आदि जिनेन्द्रके वचनरूपी औषधिका पानकर तीनों जगत् सन्देह रूपी रोगसे छूटकर ऐसे सुशोभित होने लगे मानो मुक्त ही हो गये हों—मोक्षको ही प्राप्त हो गये हों ॥१६०॥ उस कृतयुगमें जिन जीवोंने रत्नत्रयरूप आभूषणोंको पहलेसे ग्रहण कर रक्खा था उस समय भगवान्की दिव्यध्वनि सुननेसे उनकी भावना और भी दृढ़ हो गई तथा कितने ही नवीन लोग मुनिधर्म एवं श्रावक धर्मकी दीक्षा ले सम्यग्दर्शनादि गुणोंसे युक्त हो सुशोभित हुए ॥१६१॥ निर्मल सम्यग्दर्शन और सम्यग्ज्ञानसे युक्त चार प्रकारके देव, चतुर्विध संघसे युक्त तथा जगत्में विहार करनेके लिए उद्यत श्री जिनेन्द्र भगवान्को नमस्कार कर अपने-अपने स्थानपर चले गये ॥१६२॥ गृहस्थाश्रमसे युक्त तथा श्रावकोंमें मुख्यताको प्राप्त राजा भरतेश्वर, जिनेन्द्र भगवान्की पूजाकर उच्चकुलीन राजाओंके साथ हर्षित होता हुआ अयोध्याकी ओर वापिस गया ॥१६३॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें प्रथम तीर्थंकरके द्वारा धर्मतीर्थकी प्रवृत्ति होनेका वर्णन करनेवाला दशवाँ सर्ग समाप्त हुआ ॥

---

१. उपेक्षा फलमाद्यस्य शेषस्यादानहानधीः ।
पूर्वं वाज्ञाननाशो वा सर्वस्यास्य स्वगोचरे ॥१०२॥ आ० मी०

२. प्रागमोहफलं द्वयम् म० । ३. सुवृष्टिश्च म० (?) । ४. स्तुतो म० ।

एकादशः सर्गः

अथ कृत्वात्मजोत्पत्तौ भरतः सुमहोत्सवम् । कृतचक्रमहोऽयासीत् षट्खण्डविजिगीषया ॥१॥
चतुरङ्गमहासेनो नृपचक्रेण सङ्गतः । अग्रप्रस्थितचक्रेण युक्तो दिक्चक्रिणां नृणाम् ॥२॥
गङ्गानुकूलमागत्य गङ्गासागरसङ्गतः । गङ्गाद्वारेऽष्टमं[1] [2]सद्वागङ्गाद्यकृ[3]त भक्तकम् ॥३॥
द्वारेणोद्घाटितेनासौ प्रविश्याश्वयुगाश्रितम् । अजितञ्जितनामानं रथमारुह्य वेगिनम् ॥४॥
अवगाह्य महाबाहुर्जानुदघ्नं महोदधिम् । वज्रकाण्डधनुःपाणिर्वैशाखस्थानमास्थितः ॥५॥
सदृष्टिमुष्टिसन्धानविधानेषु विशारदः । स्वनामाङ्कममोघाख्यं मुमोचाशु[4]गमाशुगं[5] ॥६॥
शरः पपात वज्राभो गत्वा द्वादशयोजनीम् । प्रासादे मागधस्याशु प्रविशन्मुखरांबरः ॥७॥
हृदयेन समं तस्मिन् प्रासादे चलिते सुरः । सम्भ्रान्तः स तमालोक्य चक्रिनामाङ्कितं शरम् ॥८॥
चक्रवर्तिनमुत्पन्नं ज्ञात्वा स्वं पुण्यमल्पशः । निन्दित्वा भग्नमानोऽसौ रत्नपाणिरुपागतः ॥९॥
हारं स पृथिवीसारं मुकुटं रत्नकुण्डले । उपनीय सुरत्नानि वस्त्रतीर्थोदकानि तु ॥१०॥
[6]शाधि किं करवाणीश देह्यादेशं बुधोऽवदत् । मुक्तस्तेन गतः स्थानं निर्ययौ भरतोऽप्यतः ॥११॥
भूतव्यन्तरसङ्घातान् दाक्षिणात्यान् महाबलान् । साधयन् सागरद्वारं [7]वैजयन्तमवाप सः ॥१२॥

अथानन्तर समवसरणसे आकर भरतने पुत्र-जन्मका उत्सव किया, चक्ररत्नकी पूजा की और उसके बाद छह खण्डोंको जीतनेकी इच्छासे प्रस्थान किया ॥१॥ उस समय चतुरङ्ग सेना उसके साथ थी, वे राजाओंके समूहसे युक्त थे और नाना दिशाओंसे आये हुए अपार जन-समूहके आगे-आगे चलनेवाले चक्ररत्नसे सहित थे ॥२॥ वे गङ्गा नदीके किनारे-किनारे चलकर गङ्गासागरपर पहुँचे। वहाँ गङ्गाद्वारपर उन्होंने मन, वचन, कायकी क्रियाको प्रशस्त कर तीन दिनका उपवास किया ॥३॥ जिसमें दो घोड़े जुते हुए थे ऐसे वेगशाली रथपर सवार होकर उन्होंने द्वार खोला और समुद्रमें घुटने पर्यन्त प्रवेश किया। उस समय लम्बी भुजाओंके धारक भरत अपने हाथमें वज्रकाण्ड नामक धनुष लिये हुए थे, तथा वैशाख आसनसे खड़े थे। वे दृष्टिके स्थिर करने, कड़ी मुट्ठी बाँधने और डोरीपर बाण स्थापित करनेमें अत्यन्त निपुण थे। उसी समय उन्होंने अपने नामसे चिह्नित अमोघ नामका शीघ्रगामी बाण छोड़ा ॥४-६॥ वज्रके समान चमकता हुआ बाण शीघ्र ही बारह योजन जाकर मागध देवके भवनमें गिरा और उसने भवनमें प्रवेश करते ही समस्त आकाशको शब्दायमान कर दिया ॥७॥ बाणके गिरते ही मागधदेवका भवन और हृदय दोनों ही एक साथ हिल उठे। वह बहुत ही क्षोभको प्राप्त हुआ। परन्तु जब उसने चक्रवर्तीके नामसे चिह्नित बाणको देखा और चक्रवर्ती उत्पन्न हो चुका है यह जाना तब वह अपने पुण्यको अल्प जान अपनी निन्दा करने लगा। तदनन्तर जिसका मान खण्डित हो गया था ऐसा मागधदेव हाथोंमें रत्न लेकर भरतके पास आया ॥८-९॥ आकर उस बुद्धिमान् देवने पृथिवीका सारभूत हार, मुकुट, रत्ननिर्मित दो कुण्डल, अच्छे-अच्छे रत्न, वस्त्र तथा तीर्थोदककी भेंट दी और कहा कि हे स्वामिन्! बताइए मैं क्या करूँ? मुझे आज्ञा दीजिए। तदनन्तर भरतसे विदा हो वह अपने स्थानपर गया और भरत भी वहाँसे चलकर दक्षिण

१. उपवासत्रयम् 'तेला' कृत्वा। २. वाक् च अङ्गानि च इति वागङ्गं तदादौ यस्य तत् वागङ्गादि सत् शोभनं वागङ्गादि यस्मिन् तत्। ३. कृतवान्। ४. शीघ्रगामिनम्। ५. बाणम्। ६. कथय। ७. विजयं तम-म०।

सुरं व[1]रतनुं तत्र यथा मागधमाह्वयन् । चूडामणिमसौ दिव्यं ग्रैवेयकमुरश्छदम् ॥१३॥
वीराङ्गदे च कटके कटीवर्तं च सूत्रकम् । उपनीय प्रणम्येशं [2]विमुक्तः किङ्करो ययौ ॥१४॥
पाश्चात्यं साधयन् विश्वं दधद्भूपालमण्डलम् । अनुवेदिकमागच्छत् सिन्धुद्वारं स बन्धुरम् ॥१५॥
प्रभासममरं तत्र गङ्गाद्वारविधानतः । नमयित्वा वशं चक्रे चक्रेशः शक्रविक्रमः ॥१६॥
लेभे सान्तानकं तस्मान्माल्यदामकमुत्तमम् । मुक्ताजालं च मौलिं च रत्नचित्रं च हेमकम् ॥१७॥
चक्ररत्नानुमार्गं स विजयार्द्धस्य वेदिकाम् । प्राप्तश्चक्रधरो दध्यौ सोपवासो गिरेः सुरम् ॥१८॥
बुद्ध्वा स्वावधिकात्प्राप्तः सोऽभिषिच्य महर्द्धिभिः । विजयार्द्धकुमाराख्यो देवः प्रणतिपूर्वकम् ॥१९॥
भृङ्गारं [3]कुम्भतोयं च सिंहासनमनुत्तमम् । छत्रचामरयुग्मानि दत्त्वा तेऽहमिति न्यगात् ॥२०॥
तत्र चक्रमहं कृत्वा स तमिस्रगुहामुखम् । प्रापत्तु कृतमालस्तं सुरः प्राप ससम्भ्रमः ॥२१॥
तिलकाद्यानि दिव्यानि भूषणानि चतुर्दश । प्रदाय प्रणिपत्यासौ तवाहमिति यातवान् ॥२२॥
सेनापतिरयोध्यश्च[4] राजराजस्य शासनात् । अश्वरत्नं शुकच्छायं कुमुदामेलकाभिधम् ॥२३॥
आरुह्य दण्डरत्नेन प्रचण्डेन पराङ्मुखः । गुहाद्वारकवाटानि प्रताड्यानुपलायितः ॥२४॥
उद्घाटिते गुहाद्वारे षण्मासैः स निरूष्मणि । सेनयाऽविशदारुह्य गजं विजयपर्वतम् ॥२५॥
तत्रोन्मग्नजला नाम्ना सन्निमग्नजलापगा । महानद्योस्तयोस्तीरे गुहामध्येऽमुचच्चमूः ॥२६॥

दिशामें रहनेवाले महाबलवान् भूत और व्यन्तर देवोंके समूहको वश करते हुए समुद्रके वैजयन्त-द्वारपर जा पहुँचे ॥१०-१२॥ वहाँपर उन्होंने मागधदेवके समान उस प्रदेशके स्वामी वरतनु देवको बुलाया और वरतनु देवने आकर चूड़ामणि, सुन्दर कण्ठहार, कवच, वीरोंके बाजूबन्द, कड़े और करधनी भेंटकर भरतको प्रणाम किया। तदनन्तर सेवकवृत्तिको स्वीकार करनेवाला वरतनु भरतसे विदा ले अपने स्थानपर चला गया ॥१३-१४॥ वहाँसे चलकर भरत पश्चिम दिशाके समस्त राजाओंको वश करते हुए वेदिकाके किनारे-किनारे चलकर सिन्धु नदीके मनोहर द्वारपर पहुँचे ॥१५॥ वहाँ इन्द्रके समान पराक्रमको धारण करनेवाले चक्रवर्ती भरतने गङ्गाद्वारके समान वहाँके अधिपति प्रभास देवको नम्रीभूत कर अपने वश किया ॥१६॥ तथा उससे सन्तानक वृक्षोंके पुष्पोंकी उत्तम माला, मोतियोंकी जाली, मुकुट और रत्नोंसे चित्र-विचित्र कटीसूत्र प्राप्त किया ॥१७॥

तदनन्तर भरत, चक्ररत्नके पीछे-पीछे चलकर विजयार्ध पर्वतकी वेदिकाके समीप आये। वहाँ उन्होंने उपवास कर पर्वतके अधिष्ठाता (विजयार्ध कुमार) देवका स्मरण किया ॥१८॥ वह देव अपने अवधिज्ञानसे भरतको वहाँ आया जानकर आया। उसने भरतको प्रणाम कर बड़ी ऋद्धियोंसे उनका अभिषेक किया तथा झारी, कलशजल, उत्तम सिंहासन, छत्र और दो चमर भेंटकर कहा कि मैं आपका हूँ—आपका सेवक हूँ। इस प्रकार निवेदन कर वह चला गया ॥१९-२०॥ राजा भरत वहाँ चक्ररत्नकी पूजाकर तमिस्र गुहाके द्वारपर आये। वहीं घबड़ाया हुआ कृतमाल नामका देव उनके पास आया ॥२१॥ और तिलक आदि चौदह दिव्य आभूषण देकर तथा प्रणामकर 'मैं आपका हूँ' यह कहता हुआ चला गया ॥२२॥ राजराजेश्वर भरतकी आज्ञासे उनके अयोध्य नामक सेनापतिने सुआके समान कान्तिवाले कुमुदामेलक नामक अश्वरत्नपर सवार हो तथा पीछेकी ओर अपना मुखकर दण्डरत्नसे गुहाद्वारके किवाड़ोंको ताड़ित किया और ताड़ित कर वह एकदम पीछे भाग गया ॥२३-२४॥ खुला हुआ गुहाद्वार जब छह माहमें ऊष्मा रहित हो गया तब चक्रवर्तीने विजयपर्वत नामक हाथीपर सवार हो सेनाके साथ उसमें प्रवेश किया ॥२५॥ गुहाके बीचमें उन्मग्नजला और निमग्नजला

---

१. वरतनुस्तत्र म० । २. विमुक्तं म० । ३. कुततोयं च म० । ४. अयोध्यस्य म० ।

नित्यान्धकारमुद्रास्य काकणीमणिरोचिषा । स्कन्धावारं स्थितं तत्र नक्तन्दिवमतन्द्रितम् ॥२७॥
कामदृष्टिर्गृहपती रत्नभद्रमुखो द्रुतम् । स्थपतिश्च स्थिरस्ताभ्यां सङ्क्रमः सरितोः कृतः ॥२८॥
उत्तीर्य सङ्क्रमाक्रान्त्या सद्यो नद्योर्ययौ चमूः । द्वारमुत्तरमुद्घाट्य प्रागिवोत्तरभारतम् ॥२९॥
म्लेच्छराजसहस्राणि वीक्ष्यापूर्ववरूथिनीम् । क्षुभितान्यभिगम्याशु योधयामासुरश्रमात् ॥३०॥
ततः क्रुद्धो युधि म्लेच्छैरयोध्यो दण्डनायकः । युद्ध्वा निर्धूय तानाशु दध्रे नामार्थसङ्गतम् ॥३१॥
भयान्म्लेच्छास्ततो [1]याताः शरणं कुलदेवताः । घोरान्मेघमुखान्नागान् दर्भशय्याधिशायिनः ॥३२॥
ततो मेघमुखा देवा खमापूर्य युधि स्थिताः । युद्ध्वा जयकुमारस्तैर्लेभे मेघस्वराभिधाम् ॥३३॥
पुनर्मेघमुखा घोरैर्मेघैरापूर्य पुष्करम्[2] । ववृषुर्मुष्टि[3]मात्राभिर्धाराभिः सैन्यमस्तके ॥३४॥
दृष्ट्वा वृष्टिं ततश्चक्री सतडिद्गर्जिताशनिम् । चर्मरत्नमधश्चक्रे छत्ररत्नं तथोपरि ॥३५॥
द्विषट्योजनविस्तीर्णा तरन्ती साऽप्सु वाहिनी । अण्डायते स्म सप्ताहं कान्दिशीकत्वमागता ॥३६॥
ततो निधिपतिः क्रुद्धो गणबद्धाभिधानकान् । देवानाज्ञापयत् तैस्तैर्ध्वस्ता मेघमुखाः सुराः ॥३७॥
ततो मेघमुखैर्म्लेच्छाः प्रोक्ताः संहृतवृष्टिभिः । चक्रिणं शरणं जग्मुरादाय वरकन्यकाः ॥३८॥
भीतानामभयं दत्त्वा स तेषां शासनैषिणाम् । आयादायासनिर्मुक्तः सिन्धुनद्यनुवेदिकम् ॥३९॥
सिन्धुदेव्यभिषिच्यैनं सिन्धुकूटाग्रवासिनी । ददौ भद्रासने भद्रे पादपीठोपशोभिते ॥४०॥

नामकी दो नदियाँ थीं, उनके तटपर भरतने सेनाओंको छोड़ दिया—उन्हें विश्राम कराया ॥२६॥ उस गुफामें निरन्तर अन्धकार रहता था जिसे भरतने काकणी मणिकी किरणोंसे दूर कर दिया था। भरतकी सेनाने वहाँ आलस्य रहित होकर एक दिन-रात निवास किया ॥२७॥ कामदृष्टि नामक गृहपतिरत्न और रत्नभद्रमुख नामक स्थपतिरत्न इन दोनोंने उन नदियोंपर मजबूत पुल बनाये ॥२८॥ सेना उन पुलोंके द्वारा शीघ्र ही नदियोंको पारकर आगे बढ़ गई और पहलेकी तरह उत्तर द्वारको खोलकर उत्तर भारतमें जा पहुँची ॥२९॥ उत्तर भारतके हजारों म्लेच्छ राजा चक्रवर्तीकी अपूर्व सेनाको देखकर क्षुभित हो गये और शीघ्र ही सामने आकर अनायास युद्ध करने लगे ॥३०॥ तदनन्तर क्रोधसे भरे अयोध्य सेनापतिने युद्धमें म्लेच्छ राजाओंके साथ युद्धकर तथा उन्हें शीघ्र ही खदेड़कर अपना 'अयोध्य' नाम सार्थक किया ॥३१॥ सेनापतिसे भयभीत हुए म्लेच्छ, अपने कुलदेवता, दर्भशय्यापर शयन करनेवाले एवं भयंकर मेघमुख नागकुमारोंकी शरण गये ॥३२॥ जिससे मेघमुख देव आकाशको व्याप्तकर युद्धके लिए आ डटे परन्तु जयकुमारने उनके साथ युद्धकर उन्हें परास्त कर दिया और स्वयं 'मेघस्वर' यह नाम प्राप्त किया ॥३३॥ कुछ देर बाद मेघमुख देव भयंकर मेघोंसे आकाशको व्याप्तकर मुट्ठी बराबर मोटी-मोटी धाराओंसे सेनाके मस्तकपर जल-वर्षा करने लगे ॥३४॥ तदनन्तर जिसमें बिजलीके साथ वज्रकी भयंकर गर्जना हो रही थी ऐसी जलवृष्टि देखकर चक्रवर्तीने सेनाके नीचे चर्मरत्न और ऊपर छत्ररत्न फैला दिया ॥३५॥ बारह योजन पर्यन्त फैली एवं जलके भीतर तैरती हुई वह सेना अण्डाके समान जान पड़ती थी। वह सेना सात दिन तक इसी तरह भयभीत रही ॥३६॥ तदनन्तर निधियोंके स्वामी चक्रवर्तीने कुपित होकर गणबद्ध देवोंको आज्ञा दी और उन्होंने उन मेघमुख देवोंको परास्त कर खदेड़ दिया ॥३७॥ तत्पश्चात् जिन्होंने वृष्टिका संकोच कर लिया था ऐसे मेघमुख देवोंकी प्रेरणा पाकर वे म्लेच्छ राजा उत्तमोत्तम कन्याएँ लेकर चक्रवर्तीकी शरणमें आये ॥३८॥ चक्रवर्तीने उन भयभीत तथा आज्ञा पानेकी इच्छा करनेवाले म्लेच्छ राजाओंको अभयदान दिया और उसके बाद श्रमसे रहित हो सिन्धु नदीकी वेदिकाके किनारे-किनारे गमन किया ॥३९॥ बीचमें सिन्धुकूटपर निवास करनेवाली सिन्धु देवीने

१. जाताः म० । २. आकाशम् । ३. मेघमात्राभि-म० ।

चक्रवर्ती चमूं मूले संस्थाप्य हिमवद्गिरेः । कृताष्टमोपवासोऽसौ दर्भशय्यामधिष्ठितः ॥४१॥
कृततीर्थोदकस्नानः कृतकौतुकमण्डनः[1] । आरूढाश्वरथो धन्वी चक्रायुधपुरःसरः ॥४२॥
क्षुल्लकं हिमवत्कूटं यत्र तत्र गतः शरी । वैशाखस्थानमास्थाय[2] बभाण रणदक्षिणः ॥४३॥
भो भो नागसुपर्णाद्याः शासनं श्रृणुताशु मे । देशस्था इत्यतश्चापमाकृष्य शरमाक्षिपत् ॥४४॥
पपाताशनिनिर्घोषो योजने द्वादशे शरः । हिमवत्कूटवासी तं सुरो दृष्ट्वा समागमत् ॥४५॥
दिव्यामोषधिमालां स दिव्यं च हरिचन्दनम् । दत्त्वा सम्पूज्य तं यातः शासनैषी विसर्जितः ॥४६॥
आगत्य चक्रवर्ती च ततो वृषभपर्वतम् । तत्रालिखन्निजं नाम काकण्या स परिस्फुटम् ॥४७॥
वृषभस्य सुतो भोऽहं चक्री भरत इत्यसौ । प्रवाच्य विजयार्द्धस्य वेदिकामगमत् प्रभुः ॥४८॥
बुद्ध्वोपवासिनं तत्र श्रेणिद्वयनिवासिनौ । नमिश्च विनमिश्चोभौ गन्धाराद्यैः समागतौ ॥४९॥
स्त्रीरत्नं प्रतिगृह्याभ्यां सुभद्राख्यं खगैर्नतः । गङ्गानुवेदिकं गत्वा भक्तमष्टममास्थितः ॥५०॥
गङ्गादेवी विदित्वा तं गङ्गाकूटनिवासिनी । हेमकुम्भसहस्रेण कृत्वा तदभिषेचनम् ॥५१॥
रत्नसिंहासने तस्मै पादपीठयुते ददौ । विजयार्द्धकुमारोऽपि तस्थौ चक्रेशशासने ॥५२॥
अष्टादशसहस्राणि म्लेच्छक्षितिभृतां ततः । वशीकृत्यात्तसद्रत्नः खण्डकापातमाप सः ॥५३॥

भरतका अभिषेक कर उन्हें पादपीठसे सुशोभित दो उत्तम आसन भेंट किये ॥४०॥ चक्रवर्ती सेनाको हिमवान् पर्वतकी तराईमें ठहराकर तथा स्वयं तीन दिनके उपवासका नियम लेकर दर्भशय्यापर आरूढ़ हुए ॥४१॥ तदनन्तर जिन्होंने तीर्थजलसे स्नान किया था, उत्तम वेषभूषा धारण की थी, जो घोड़ोंके रथपर सवार थे, जिनके आगे-आगे चक्ररत्न चल रहा था और जो रणमें अत्यन्त कुशल थे ऐसे भरत, जहाँ हिमवान् पर्वतका हिमवत् नामक छोटा कूट था वहाँ आये और बाण हाथमें ले तथा वैशाख आसनसे खड़े होकर बोले कि 'हे इस देशमें रहनेवाले नागकुमार, सुपर्णकुमार आदि देवो! तुम लोग शीघ्र ही मेरी आज्ञा सुनो।' यह कह उन्होंने धनुष खींचकर बाण छोड़ा ॥४२-४४॥ वज्रके समान शब्द करता हुआ वह बाण बारह योजन दूर जाकर गिरा तथा हिमवत् कूटपर रहनेवाला देव उसे देखकर भरतके पास आया ॥४५॥ उसने दिव्य ओषधिओंकी माला तथा दिव्य हरिचन्दन देकर भरतकी पूजा की। तदनन्तर आज्ञाकी इच्छा करता हुआ वह भरतसे विदा ले अपने स्थानपर चला गया ॥४६॥ चक्रवर्ती वहाँसे चलकर वृषभाचल पर्वतपर आये और वहाँ उन्होंने काकणी रत्नसे साफ-साफ अपना यह नाम लिखा कि 'मैं भगवान् वृषभदेवका पुत्र भरत चक्रवर्ती हूँ'। नाम लिखकर तथा बाचकर वे विजयार्ध पर्वतकी वेदिकाके समीप आये ॥४७-४८॥ वहाँ जाकर उन्होंने उपवास धारण किया। दोनों श्रेणियोंके निवासी नमि और विनमिको जब यह ज्ञात हुआ कि भरत यहाँ विद्यमान हैं तब वे गन्धार आदि विद्याधरोंके साथ वहाँ आये ॥४९॥ समस्त विद्याधरोंने उन्हें नमस्कार किया और भरतने नमि, विनमिसे सुभद्रा नामक स्त्री-रत्न ग्रहण किया। तत्पश्चात् वे गङ्गा नदीकी वेदिकाके किनारे-किनारे चलकर गङ्गाकूटके समीप आये और तीन दिनके उपवासका नियम लेकर वहाँ ठहर गये। वहाँ गङ्गाकूटपर रहनेवाली गंगा देवीने उनके आनेका समाचार जानकर सुवर्णमय एक हजार कलशोंसे उनका अभिषेक किया ॥५०-५१॥ अभिषेकके बाद उसने पादपीठसे युक्त दो रत्नोंके सिंहासन भेंट किये। यहाँ विजयार्ध पर्वतका स्वामी विजयार्ध कुमारदेव चक्रवर्तीकी आज्ञामें खड़ा रहा ॥५२॥

तदनन्तर वहाँसे चलकर अठारह हजार म्लेच्छ राजाओंको वश करते और उनसे उत्तमोत्तम रत्नोंकी भेंट स्वीकार करते हुए भरत विजयार्धकी दूसरी गुफा खण्डकाप्रपातके समीप

१. मण्डलः म० । २. वैशाखं स्थान ग०, घ०, ङ०, म० ।

उपोषिताष्टमायास्मै नाट्यमालोऽत्र दत्तवान् । नानारूपं स नेपथ्यं विद्युदाभे च कुण्डले ॥५४॥
अयोध्योद्घाटितेनासौ गुहाद्वारेण पूर्ववत् । प्रविश्य निर्गतः सिन्धोरिव गाङ्गेन सेनया ॥५५॥
विजित्य भारतं वर्षं स षट्खण्डमखण्डितम् । षष्टिवर्षसहस्रैस्तु विनीतां प्रस्थितः कृती ॥५६॥
चक्रे सुदर्शनेऽयोध्यामविशत्यथ चक्रभृत् । बुद्धिसागरमप्राक्षीत् सन्दिहानः पुरोधसम् ॥५७॥
साधिते भारते वास्ये चक्ररत्नमिदं किमु । दिव्यं विशति नायोध्यां योध्याः सन्ति न के च नः ॥५८॥
पुरोधाः सोऽभ्यधाद्भर्तर्भ्रातरो भवतो ननु[1] । ये महाबलसम्पन्नास्ते न शृण्वन्ति शासनम् ॥५९॥
तदाकर्ण्य वचस्तूर्णं तेषां प्रेषयति स्म सः । सामोपप्रदानादिनीतिपूर्वं वचोहरान्[2] ॥६०॥
ततस्ते तन्निमित्तेन मानिनो लब्धबोधयः । स्वराज्यान्यत्यजँस्त्यागं मन्यमाना महोत्सवम् ॥६१॥
प्रपद्य शरणं सर्वे नाभेयं भवभीरवः । मानशल्यविनिर्मुक्ताः प्रव्रज्यां मोक्षिणो दधुः ॥६२॥
सुकुमारैः कुमारैस्तैर्भव्यसिंहैः सहैव हि । ज्ञेयानि त्यक्तदेशानां नामानीमानि पण्डितैः ॥६३॥
कुरुजाङ्गलपञ्चालसूरसेनपटच्चराः । तुलिङ्ग-काशि-कौशल्य-मद्रकारवृकार्थकाः ॥६४॥
सोल्वावृष्टत्रिगर्त्ताश्च कुशाग्रो मत्स्यनामकः । कुणीयान् कोशलो मोको देशास्ते मध्यदेशकाः ॥६५॥
बाह्लीकात्रेयकाम्बोजा यवनाभीरमद्रकाः । क्वाथतोयश्च शूरश्च वाटवानश्च कैकयः ॥६६॥
गान्धारः सिन्धुसौवीरभारद्वाजदशेरुकाः । प्रास्थालास्तीर्णकर्णाश्च देशा उत्तरतः स्थिताः ॥६७॥
खड्गाङ्गारकपौण्ड्राश्च मल्लप्रवकमस्तकाः । प्राग्ज्योतिषश्च वङ्गश्च मगधो मानवर्तिकः ॥६८॥

पहुँचे ॥५३॥ वहाँ वे तीन दिनके उपवासका नियम लेकर ठहर गये। यहाँ नाट्यमाल नामक देवने उन्हें नाना प्रकारके आभूषण और बिजलीके समान चमकते हुए दो कुण्डल भेंट किये ॥५४॥ जिस प्रकार पहले अयोध्य सेनापतिने दण्डरत्नके द्वारा सिन्धु नदीकी गुफाका द्वार खोला था उसी प्रकार यहाँ भी उसने दण्डरत्नसे गङ्गानदीकी गुफाका द्वार खोला और भरत उस द्वार-से प्रवेशकर सेनासहित बाहर निकल आये ॥५५॥ इस तरह अतिशय कुशल भरतने साठ हजार वर्षोंमें छह खण्डोंसे युक्त समस्त भरतक्षेत्रको जीतकर अयोध्या नगरीकी ओर प्रस्थान किया ॥५६॥

अथानन्तर—समीप आनेपर जब सुदर्शनचक्रने अयोध्यामें प्रवेश नहीं किया तब भरतने सन्देहयुक्त हो बुद्धिसागर पुरोहितसे पूछा कि समस्त भरत क्षेत्रको वश कर लेनेपर भी यह दिव्य चक्ररत्न अयोध्यामें प्रवेश क्यों नहीं कर रहा है ? अब तो हमारे युद्धके योग्य कोई नहीं है ? ॥५७-५८॥ पुरोहितने कहा कि आपके जो महाबलवान् भाई हैं वे आपकी आज्ञा नहीं सुनते हैं ॥५९॥ यह सुनकर भरतने शीघ्र ही उनके पास साम, दाम आदि नीतिके साथ दूत भेजे ॥६०॥ तदनन्तर इस निमित्तसे जिन्हें बोधिकी प्राप्ति हुई थी ऐसे भरतके अभिमानी भाइयोंने त्यागको ही महोत्सव मान अपने-अपने राज्य छोड़ दिये ॥६१॥ जो संसारसे भयभीत थे, जिसकी मानरूपी शल्य छूट चुकी थी, और जो अन्तरङ्गमें मोक्षकी इच्छा रखते थे ऐसे भरतके समस्त भाइयोंने भगवान् वृषभदेवके समीप जाकर दीक्षा धारण कर ली ॥६२॥ उन सुकुमार एवं भव्य-शिरोमणि कुमारोंने जो देश छोड़े थे विद्वानोंको उनके नाम इस प्रकार जानना चाहिए ॥६३॥ कुरुजाङ्गल, पञ्चाल, सूरसेन, पटच्चर, तुलिङ्ग, काशि, कौशल्य, मद्रकार, वृकार्थक, सोल्व, आवृष्ट, त्रिगर्त, कुशाग्र, मत्स्य, कुणीयान्, कोशल और मोक ये मध्यदेश थे ॥६४-६५॥ बाह्लीक, आत्रेय, काम्बोज, यवन, आभीर, मद्रक, क्वाथतोय, शूर, वाटवान, कैकय, गान्धार, सिन्धु, सौवीर, भारद्वाज, दशेरुक, प्रास्थाल और तीर्णकर्ण ये देश उत्तरकी ओर स्थित थे ॥६६-६७॥ खड्ग, अंगारक, पौण्ड्र, मल्ल, प्रवक, मस्तक, प्राग्ज्योतिष, वङ्ग, मगध, मानवर्तिक,

१. न तु म० । २. वचोहरात् म० ।

मलदो भार्गवश्चामी प्राच्यां जनपदाः स्थिताः । बाणमुक्तश्च वैदर्भाः माणवः सककापिराः ॥६९॥
मूलकाश्मकदाण्डीककलिङ्गासिकुन्तलाः । नवराष्ट्रो माहिषकः पुरुषो भोगवर्धनः ॥७०॥
दाक्षिणात्या जनपदा निरुच्यन्ते स्वनामभिः । माल्यकल्लीवनोपान्तदुर्गसूर्पारकर्बुकाः ॥७१॥
काक्षिनासारिकागर्ताः ससारस्वततापसाः । माहेभो भरुकच्छश्च सुराष्ट्रो नर्मदस्तथा ॥७२॥
एते जनपदाः सर्वे प्रतीच्यां नामभिः स्मृताः । दशार्णकेति किष्कन्धस्त्रिपुरावर्तनैषधाः ॥७३॥
नेपालोत्तमवर्णश्च वैदिशान्तपकौशलाः । पत्तनो विनिहात्रश्च विन्ध्यापृष्ठनिवासिनः ॥७४॥
भद्रवत्सविदेहाश्च कुशभङ्गाश्च सैतवाः । वज्रखण्डिक इत्येते मध्यदेशाश्रिता मताः ॥७५॥
देशानेताननुज्ञातान् गुरुणा[1] भरतानुजाः । दारानिव विधेयांश्च मुमुचुस्ते मुमुक्षवः ॥७६॥
अथ बाहुबली चक्रे चक्रेशं प्रत्यवस्थितिम् । सन्दधानो मनश्चक्रे चक्रेऽलातमये यथा[2] ॥७७॥
भवतो न भुजिष्यो[3]ऽहमिति प्रेष्य वचोहरान् । पोदनान्निर्ययौ योद्धुमक्षौहिण्या युतो द्रुतम् ॥७८॥
चक्रवर्त्यपि सम्प्राप्तः सैन्यसागररुद्धदिक् । वितता[4]परदिग्भागे चम्वोः स्पर्शस्तयोरभूत् ॥७९॥
उभये मन्त्रिणो मन्त्रं मन्त्रयित्वाहुरीशयोः । माभूज्जनपदक्षयो धर्मयुद्धमिहास्त्विति ॥८०॥
प्रतिपद्य वचस्तौ तत् दृष्टियुद्धं प्रचक्रतुः । चिरं निमेषमुक्ताक्षौ दृष्टौ खे खेचरामरैः ॥८१॥
कनिष्ठोऽत्राजयज्ज्येष्ठं पञ्चचापशतोच्छ्रितिम् । ऊर्ध्वदृष्टिमधोदृष्टिस्तदुच्चैः पञ्चविंशतिः ॥८२॥
ततोऽन्योन्यभुजक्षिप्ततरङ्गाघातदुःसहम् । जलयुद्धमभूद् रौद्रं सरस्यत्र जितोऽग्रजः ॥८३॥

मलद और भार्गव, ये देश पूर्व दिशामें स्थित थे। बाणमुक्त, वैदर्भ, माणव, सककापिर, मूलक, अश्मक, दाण्डीक, कलिङ्ग, आंसिक, कुन्तल, नवराष्ट्र, माहिषक, पुरुष और भोगवर्धन, ये दक्षिण दिशाके देश थे। माल्य, कल्लीवनोपान्त, दुर्ग, सूर्पार, कर्बुक, काक्षि, नासारिक, अगर्त, सारस्वत, तापस, माहिम, भरुकच्छ, सुराष्ट्र और नर्मद, ये सब देश पश्चिम दिशामें स्थित थे। दशार्णक, किष्कन्ध, त्रिपुर, आवर्त, नैषध, नैपाल, उत्तमवर्ण, वैदिश, अन्तप, कौशल, पत्तन और विनिहात्र, ये देश विन्ध्याचलके ऊपर स्थित थे ॥६८-७४॥ भद्र, वत्स, विदेह, कुश, भङ्ग, सैतव और वज्रखण्डिक, ये देश मध्यदेशके आश्रित थे ॥७५॥ पिता—भगवान् वृषभदेवके द्वारा दिये हुए इन सब देशोंको मोक्षकी अभिलाषा रखनेवाले भरतके छोटे भाइयोंने स्त्रियोंके समान छोड़ दिया साथ ही उन्होंने आज्ञाकारी सेवकोंका भी परित्याग कर दिया ॥७६॥

अथानन्तर कुमार बाहुबलीने भरतके प्रति अपनी प्रतिकूलता प्रकट की। उन्होंने उनके सुदर्शनचक्रको अलातचक्रके समान तुच्छ समझा और 'मैं आपके आधीन नहीं हूँ' यह कहकर दूत भेज दिये तथा वे शीघ्र ही अक्षौहिणी सेना साथ ले युद्धके लिए पोदनपुरसे निकल पड़े॥७७-७८॥ इधर सेनारूपी सागरसे दिशाओंको व्याप्त करते हुए चक्रवर्ती भरत भी आ पहुँचे जिससे वितता नदीके पश्चिम दिग्भागमें दोनों सेनाओंकी मुठभेड़ हुई ॥७९॥ तदनन्तर दोनों राजाओंके मन्त्रियोंने परस्पर सलाह कर कहा कि देशवासियोंका क्षय न हो इसलिए दोनों ही राजाओंमें धर्मयुद्ध हो ॥८०॥ भरत और बाहुबलीने मन्त्रियोंकी यह बात मानकर सर्वप्रथम दृष्टियुद्ध शुरू किया और आकाशमें खड़े हुए देव और विद्याधरोंने दोनोंको चिरकाल तक टिमकार रहित नेत्रोंसे युक्त देखा। अर्थात् दोनों भाई चिरकाल तक टिमकार रहित नेत्रोंसे खड़े रहे और कोई किसीसे हारा नहीं। परन्तु अन्तमें छोटे भाईने बड़े भाईको हरा दिया क्योंकि बड़े भाई पाँच सौ धनुष ऊँचे थे इसलिए उनकी दृष्टि ऊपरकी ओर थी और छोटे भाई उनसे पचीस धनुष ऊँचे थे इसलिए उनकी दृष्टि नीचेकी ओर थी ॥८१-८२॥ दृष्टियुद्धके बाद दोनों भाइयोंका

१. 'गुरुस्तु गीष्पतौ श्रेष्ठे गुरौ पितरि दुर्भरे' इति विश्वः ख०, घ० । २. तथा ख०, घ० । ३. दासः । ४. विनतापर -ङ० ।

वलितास्फोटिताटोपं नानाकरणकौशलम् । मल्लयुद्धमभूत्पश्चाद् रङ्गभूमौ चिरं तयोः ॥८४॥
पादावष्टम्भसम्भिन्नहृदया युध्यमानयोः । तयोर्भियेव [1]वरयो रराम वसुधावधूः ॥८५॥
भरतं भुजयन्त्रेण दयावान् भुजविक्रमी । निरुद्ध्योत्क्षिप्य सन्तस्थे रत्नशैलमिवामरः ॥८६॥
प्रेक्षकैः सुरसङ्घातैः खेचरैरपि भूचरैः । अहो वीर्यमहो धैर्यं साधु साध्विति वर्णितम् ॥८७॥
साधु संसाध्य मुक्तेन भरतेन रुषा ततः । अपमृत्यु स्मृतं चक्रं सहस्रारं स्थितं करे ॥८८॥
रक्ष्यं यक्षसहस्रेण सहस्रकिरणप्रभम् । प्रभ्राम्य चक्रमुन्मुक्तं वधार्थं भ्रातुरुन्मुखम् ॥८९॥
चरमोत्तमदेहस्य तस्याशक्तं विनाशने । देवताधिष्ठितं चक्रं त्रिःपरीत्यागतं पुनः ॥९०॥
ज्येष्ठभ्रातरमालोक्य निर्घृणं भुजविक्रमी । कर्णौ पिधाय हस्ताभ्यां निनिन्द श्रियमित्यसौ ॥९१॥
स्वच्छानामनुकूलानां संहतानां नृचेतसाम् । विपर्यासकरीं लक्ष्मीं धिक् पङ्कद्धिमिवाम्भसाम् ॥९२॥
मधुरस्निग्धशीलानां चिरस्थस्नेहहारिणीम् । चलाचलात्मिकां धिक् धिक् यन्त्रमूर्तिमिव श्रियम् ॥९३॥
सर्वतोऽपि सुदुःप्रेक्ष्यां नरेन्द्राणामपि स्वयम् । दृष्टिं दृष्टिविषस्येव धिक् धिक् लक्ष्मीं भयावहाम् ॥९४॥

तालाबमें भयंकर जलयुद्ध हुआ। उस समय दोनों ही भाई एक दूसरेपर अपनी भुजाओंसे लहरें उछाल-उछालकर दुःसह आघात कर रहे थे। परन्तु इस युद्धमें भी बड़े भाई भरत हार गये ॥८३॥ तदनन्तर दोनोंका रङ्गभूमिमें चिरकाल तक मल्लयुद्ध हुआ। उनका वह मल्लयुद्ध तालोंकी फटाटोपसे युक्त था तथा नाना प्रकारके पैंतरा बदलनेकी चतुराईसे पूर्ण था ॥८४॥ उस समय युद्ध करते हुए दोनों वरोंके पदाघातसे जिसका हृदय फट गया था ऐसी पृथिवीरूपी स्त्री भयसे ही मानो चिल्ला उठी थी ॥८५॥ अन्तमें दयावान् बाहुबली अपने भुजयन्त्रसे भरतको पकड़कर तथा ऊपरकी ओर उठाकर इस प्रकार खड़े हो गये मानो कोई देव रत्नोंके पर्वतको उठाकर खड़ा हो ॥८६॥ देखनेवाले देवोंके समूह, विद्याधरों तथा भूमिगोचरी मनुष्योंने उसी समय जोरसे यह शब्द किया कि अहो! वीर्यम्—आश्चर्यकारी शक्ति है, अहो! धैर्यम्—आश्चर्यकारी धैर्य है, साधु-साधु—ठीक है, ठीक है आदि ॥८७॥ तदनन्तर अच्छी तरह जीतकर जब बाहुबलीने भरतको छोड़ा तब उन्होंने क्रोधके कारण अपमृत्यु करनेवाले सुदर्शनचक्रका स्मरण किया और स्मरण करते ही हजार अरोंको धारण करनेवाला सुदर्शनचक्र उनके हाथमें आकर खड़ा हो गया ॥८८॥ एक हजार यक्ष जिसकी रक्षा कर रहे थे तथा जो सूर्यके समान देदीप्यमान प्रभाका धारक था ऐसे सुदर्शनचक्रको उन्होंने ऊपरकी ओर घुमाकर भाईको मारनेके लिए छोड़ा ॥८९॥ परन्तु वह देवाधिष्ठित चक्र चरमोत्तम शरीरके धारक बाहुबलीके मारनेमें असमर्थ रहा इसलिए उनकी तीन प्रदक्षिणाएँ देकर वापिस आ गया ॥९०॥

तदनन्तर बाहुबली बड़े भाईको निर्दय देख हाथोंसे कान ढँककर लक्ष्मीकी इस प्रकार निन्दा करने लगे ॥९१॥ जिस प्रकार कीचड़ स्वच्छ, अनुकूल, एवं मिले हुए जलको विपरीत—मलिन कर देती है उसी प्रकार यह लक्ष्मी स्वच्छ, अनुकूल और मिले हुए मनुष्योंके चित्तको विपरीत कर देती है अतः इसे धिक्कार हो ॥९२॥ जिस प्रकार यन्त्र-मूर्ति—(कोल्हू) मधुर एवं चिक्कण स्वभाववाले तिलहनोंके दीर्घकालिक स्नेह—तेलको हर लेती है तथा अत्यन्त अस्थिर होती है उसी प्रकार यह लक्ष्मी भी मधुर एवं स्नेहपूर्ण स्वभाववाले मनुष्योंके चिर-कालिक स्नेह-प्रियको नष्ट कर देती है एवं अत्यन्त अस्थिर है अतः इसे धिक्कार हो ॥९३॥ जिस प्रकार दृष्टिविष सर्पकी दृष्टि नरेन्द्र-विषवैद्योंके लिए भी सब ओरसे स्वयं अत्यन्त दुःखसे देखनेके योग्य तथा भय उत्पन्न करनेवाली है उसी प्रकार यह लक्ष्मी भी नरेन्द्र—राजाओंके लिए भी सब ओरसे अत्यन्त दुःप्रेक्ष्य—दुःखसे देखने योग्य तथा भय उत्पन्न

---

१. वरयो म० ।

मूलमध्यान्तदुःस्पर्शां सर्वदाग्निशिखामिव । भास्वरामपि धिग्लक्ष्मीं सर्वसन्तापकारिणीम् ॥९५॥
मर्त्यलोके सुखं तद् यच्चित्तसन्तोषलक्षणम् । सति बन्धुविरोधे हि न सुखं न धनं नृणाम् ॥९६॥
जनयन्ति नृणां भोगाः प्रतिकूलेषु बन्धुषु । [1]शीतज्वराभिभूतानां शीतस्पर्शा इवासुखम् ॥९७॥
इति सञ्चिन्त्य सन्त्यज्य स राज्यं तपसि स्थितः । कैलासे प्रतिमायोगं तस्थौ वर्षं सुनिश्चलः ॥९८॥
वल्मीकरन्ध्रनिर्यातैः फणिभिर्मणिभूषितैः । चरणौ रेजतुस्तस्य पुरेव नरपैर्भृतैः ॥९९॥
वल्लभेव पुरा वल्ली माधवी कोमलाङ्गिका । निःशेषाङ्गपरिष्वङ्गं चक्रे तस्य मुनेरपि ॥१००॥
लतां व्यपनयन्तीभ्यां खेचरीभ्यां बभौ मुनिः । श्याममूर्तिः स्थिरो योगी यथा मरकताचलः ॥१०१॥
कषायान्तमसौ कृत्वा भरतेन कृतानतिः । केवलज्ञानमुत्पाद्य पारिषद्यः प्रभोरभूत् ॥१०२॥
चतुर्दशमहारत्नैर्निधिभिर्नवभिर्युतः । निःसपत्नं ततश्चक्री बुभोज वसुधां कृती ॥१०३॥
अदाद्द्वादशवर्षाणि दानं चासौ यथेप्सितम् । लोकाय कृपया युक्तः परीक्षापरिवर्जितम् ॥१०४॥
जिनशासनवात्सल्यभक्तिभारवशीकृतः । परीक्ष्य श्रावकान् पश्चाद् यवव्रीह्यङ्कुरादिभिः ॥१०५॥
काकिण्या लक्षणं कृत्वा सुरत्नत्रयसूत्रकम् । सम्पूज्य स ददौ तेभ्यो भक्तिदानं कृते युगे ॥१०६॥

करनेवाली है इसलिए इसे धिक्कार हो ॥९४॥ जिस प्रकार अग्निकी शिखा सदा मूल, मध्य और अन्तमें दुःखकर स्पर्शसे सहित है तथा देदीप्यमान होकर भी सबको सन्ताप करनेवाली है उसी प्रकार यह लक्ष्मी भी आदि, मध्य और अन्तमें दुःखकर स्पर्शसे सहित है—सब दशाओंमें दुःख देनेवाली है तथा देदीप्यमान-तेज तर्राटेसे युक्त होनेपर भी सबको सन्ताप उत्पन्न करने-वाली है—आकुलताकी जननी है इसलिए इसे धिक्कार हो ॥९५॥ मनुष्य लोकमें सुख वही है जो चित्तको सन्तुष्ट करनेवाला हो परन्तु बन्धुजनोंमें विरोध होनेपर मनुष्योंको न सुख प्राप्त होता है और न धन ही उनके पास स्थिर रहता है ॥९६॥ जिस प्रकार शीत-ज्वरसे आक्रान्त मनुष्योंके लिए शीतल स्पर्श दुःख उत्पन्न करते हैं उसी प्रकार बन्धुजनोंके विरुद्ध होनेपर भोग भी मनुष्योंके लिए दुःख उत्पन्न करते हैं ॥९७॥ इस प्रकार विचार कर तथा राज्यका परित्याग कर बाहुबली तप करने लगे और कैलास पर्वतपर एक वर्षका प्रतिमा योग लेकर निश्चल खड़े हो गये ॥९८॥ उनके चरण, वामीके बिलोंसे निकले हुए मणिभूषित सर्पोंसे इस प्रकार सुशोभित हो रहे थे जिस प्रकार कि पहले मणिभूषित आश्रित राजाओंसे सुशोभित होते थे ॥९९॥ जिस प्रकार पहले कोमलाङ्गी वल्लभा उनके समस्त शरीरका आलिङ्गन करती थी उसी प्रकार कोमलाङ्गी माधवीलता उनके मुनि होनेपर भी उन बाहुबलीके समस्त शरीरका आलिङ्गन कर रही थी ॥१००॥ दो विद्याधर परियाँ उनके शरीरपर लिपटी हुई लताको दूर करती रहती थीं जिससे श्याममूर्तिके धारक एवं स्थिर खड़े हुए योगिराज बाहुबली मरकतमणिके पर्वतके समान सुशोभित हो रहे थे ॥१०१॥ तदनन्तर भरतने आकर जिन्हें नमस्कार किया था ऐसे बाहुबली मुनिराज कषायोंका अन्तकर तथा केवलज्ञान उत्पन्न कर भगवान् वृषभदेवके सभासद् हो गये—उनके समवसरणमें पहुँच गये ॥१०२॥

तदनन्तर चौदह महारत्नों और नौ निधियोंसे युक्त अतिशय बुद्धिमान् चक्रवर्ती भरत, पृथिवीका निष्कण्टक उपभोग करने लगे ॥१०३॥ भरत महाराज दयासे युक्त हो बिना किसी परीक्षाके बारह वर्ष तक लोगोंके लिए मनचाहा दान देते रहे ॥१०४॥ तदनन्तर जिन-शासन सम्बन्धी वात्सल्य और भक्तिके भारसे वशीभूत होकर उन्होंने जौ तथा धान्य आदिके अङ्कुरोंसे श्रावकोंकी परीक्षा की, काकिणी रत्नसे निर्मित रत्नत्रयसूत्र—यज्ञोपवीतको उनका चिह्न बनाया

---

१. शीतद्वाराभिभूतानां ख० ।

ततस्ते ब्राह्मणाः प्रोक्ताः व्रतिनो भरतादृताः । वर्णत्रयेण पूर्वेण जाता वर्णचतुष्टयी ।।१०७।।
चक्रच्छत्रासिदण्डास्ते काकिणीमणिचर्मणी । सेनागृहपतीभाश्वाः पुरोधःस्थपतिस्त्रियः ।।१०८।।
चतुर्दशमहारत्ननिचयाश्चक्रवर्तिनः । प्रत्येकं रक्षिता देवैः सहस्रगणनैर्बभुः ।।१०९।।
कालश्चापि महाकालः पाण्डुको माणवस्तथा । नैःसर्पः सर्वरत्नाश्च शङ्खः पद्मश्च पिङ्गलः ।।११०।।
अमी पुण्यवतस्तस्य निधयोऽनिधना[1] नव । पालिता निधिपालाख्यैः सुरैर्लोकोपयोगिनः ।।१११।।
शकटाकृतयः सर्वे चतुरक्षाष्टचक्रकाः । नवयोजनविस्तीर्णा द्वादशायामसम्मिताः ।।११२।।
ते चाष्टयोजनागाधा बहुवक्षारकुक्षयः । नित्यं यक्षसहस्रेण प्रत्येकं रक्षितेक्षिताः ।।११३।।
ज्योतिर्निमित्तशास्त्राणि हेतुवादकलागुणाः । शब्दशास्त्रपुराणाद्याः[2] सर्वे कालनिधौ मताः ।।११४।।
पञ्चलोहादयो लोहा नानाभेदाः प्रवर्तिताः । लब्धवर्णैर्विनिर्णेया महाकालनिधौ पुनः ।।११५।।
धान्यानां सकला भेदाः शालिव्रीहियवादयः । कटुतिक्तादिभिर्द्रव्यैः प्रणीताः पाण्डुके निधौ ।।११६।।
कवचैः खेटकैः खड्गैः शरैः शक्तिशरासनैः । चक्राद्यैरायुधैर्दिव्यैः पूर्णो माणवको निधिः ।।११७।।
शयनासनवस्तूनां विविधानां महानिधिः । सर्वो गृहोपयोग्यानां[3] भाजनानां च भाजनम् ।।११८।।
इन्द्रनीलमहानीलवज्रवैडूर्यपूर्वकैः । सर्वरत्ननिधिः पूर्णः सुरत्नैः सुमहाशिखैः ।।११९।।
भेरीशङ्खानकैर्वीणाझल्लरीमुरजादिभिः । आतोद्यैश्चोद्यसम्पूर्णैः पूर्णः शङ्खनिधिर्महान् ।।१२०।।

और आदर-सत्कार कर कृतयुगमें उन्हें भक्तिपूर्वक दान दिया ॥१०५-१०६॥ आगे चलकर भरतके द्वारा आदरको प्राप्त हुए वे व्रती ब्राह्मण कहे जाने लगे। इस तरह पहले कहे हुए तीन वर्णोंके साथ मिलकर अब ब्राह्मण, क्षत्रिय, वैश्य और शूद्र ये चार वर्ण हो गये ॥१०७॥ १ चक्र, २ छत्र, ३ खड्ग, ४ दण्ड, ५ काकिणी, ६ मणि, ७ चर्म, ८ सेनापति, ९ गृहपति, १० हस्ती, ११ अश्व, १२ पुरोहित, १३ स्थपति और १४ स्त्री चक्रवर्तीके ये चौदह रत्न थे, इनमें प्रत्येककी एक-एक हजार देव रक्षा करते थे तथा ये अत्यधिक सुशोभित थे ।।१०८-१०९॥ १ काल, २ महाकाल, ३ पाण्डुक, ४ माणव, ५ नैसर्प, ६ सर्वरत्न, ७ शङ्ख, ८ पद्म और ९ पिङ्गल ··· ये पुण्यशाली चक्रवर्तीकी नौ निधियाँ थीं। ये सभी निधियाँ अविनाशी थीं, निधिपाल नामक देवोंके द्वारा सुरक्षित थीं और निरन्तर लोगोंके उपकारमें आती थीं ॥११०-१११॥ ये गाड़ीके आकारकी थीं, चार-चार भौंरों और आठ-आठ पहियोंसे सहित थीं। नौ योजन चौड़ी, बारह योजन लम्बी, आठ योजन गहरी और वक्षार गिरिके समान विशाल कुक्षिसे सहित थीं। प्रत्येककी एक-एक हजार यक्ष निरन्तर देख-रेख रखते थे ॥११२-११३॥

इनमेंसे पहली कालनिधिमें ज्योतिषशास्त्र, निमित्तशास्त्र, न्यायशास्त्र, कलाशास्त्र, व्याकरणशास्त्र, एवं पुराण आदिका सद्भाव था अर्थात् कालनिधिसे इन सबकी प्राप्ति होती थी ।।११४॥ दूसरी महाकाल निधिमें विद्वानोंके द्वारा निर्णय करने योग्य पञ्चलोह आदि नाना प्रकारके लोहोंका सद्भाव था अर्थात् उससे इन सबकी प्राप्ति होती थी ।।११५॥ तीसरी पाण्डुक निधिमें शालि, व्रीहि, जौ आदि समस्त प्रकारकी धान्य तथा कडुए चिरपरे आदि पदार्थोंका सद्भाव था ।।११६।। चौथी माणवक निधि, कवच, ढाल, तलवार, बाण, शक्ति, धनुष तथा चक्र आदि नाना प्रकारके दिव्य शस्त्रोंसे परिपूर्ण थी ॥११७॥ पाँचवीं सर्प-निधि, शय्या, आसन आदि नाना प्रकारकी वस्तुओं तथा घरमें उपयोग आनेवाले नाना प्रकारके भाजनोंकी पात्र थी ।।११८॥ छठवीं सर्वरत्न निधि इन्द्रनील मणि, महानील मणि, वज्रमणि आदि बड़ी-बड़ी शिखाके धारक उत्तमोत्तम रत्नोंसे परिपूर्ण थी ॥११९॥ सातवीं शङ्ख-निधि, भेरी, शंख, नगाड़े, वीणा, झल्लरी और मृदङ्ग आदि आघातसे तथा फूँककर बजाने

---

१. नाशरहिताः, निधनानि च ख० । २. पुराणाद्याः म० । ३. भोजनानां म० ।

पट्टचीनमहानेत्रदुकूलवरकम्बलैः । वस्त्रैर्विचित्रवर्णाढ्यैः पूर्णपद्मनिधिः सदा ॥१२१॥
कटकैः कटिसूत्राद्यैः स्त्रीपुंसाभरणैः शुभैः । स पिङ्गलनिधिः पूर्णो गजवाजिविभूषणैः ॥१२२॥
[1]कामवृष्टिवशास्तेऽमी नवापि निधयः सदा । निष्पादयन्ति निःशेषं चक्रवर्तिमनीषितम् ॥१२३॥
शतानि त्रीणि षष्ट्या तु सूपकाराः परे परे । कल्याणसिक्थमाहारं प्रत्यहं ये वितन्वते ॥१२४॥
सहस्रसिक्थः कवलो द्वात्रिंशत् तेऽपि चक्रिणः । एकश्चासौ सुभद्रायाः एकोऽन्येषां तु तृप्तये ॥१२५॥
चित्रकारसहस्राणि नवतिर्नवभिः सह । द्वात्रिंशत् ते सहस्राणि नृपा मुकुटबद्धकाः ॥१२६॥
देशाश्चापि हि तावन्तो जयन्त्यपि सुरस्त्रियः । अन्तःपुरसहस्राणि तस्य षण्णवतिः प्रभोः ॥१२७॥
हलकोटी तथा गावस्त्रिकोटयः कामधेनवः । कोटयश्चाष्टादशाश्वानां निश्चेया वातरंहसाम् ॥१२८॥
लक्षाश्चतुरशीतिस्तु मदमन्थरगामिनाम् । हस्तिनां सुरथानां च प्रत्येकं चक्रवर्तिनः ॥१२९॥
[2]आदित्ययशसा सार्द्धं [3]विवर्द्धनपुरोगमाः । पञ्च पुत्रशतान्यस्य वशाश्चरमदेहकाः ॥१३०॥
भाजनं भोजनं शय्या चमूर्वाहनमासनम् । [4]निधिरत्नपुरं नाट्यं भोगास्तस्य दशाङ्गकाः ॥१३१॥
स षोडशसहस्रैश्च गणबद्धसुरैः सदा । सेवायां सेव्यते दक्षैः प्रमादरहितैर्हितैः ॥१३२॥
विभवेन नरेन्द्रोऽसौ तादृशेन युतोऽपि सन् । शास्त्रार्थक्षुण्णधीश्चक्रे दुर्गतिग्रहनिग्रहम् ॥१३३॥
स द्वात्रिंशत्सहस्राणां स्मयबाहुल्यमस्मयः । अपाकरोद्विकीर्यैतान् दोःकृताहितमन्थनः ॥१३४॥
[5]श्रीवृक्षलक्षितोरस्के सचतुःषष्टिलक्षणे । षोडशे मनुराजेऽस्मिन् विडौजः श्रीविडम्बिनि ॥१३५॥
स्वायम्भुवे महाभागे भरते भरतक्षितिम् । नीत्या शासति खण्डानां नित्याखण्डितपौरुषे ॥१३६॥

योग्य नाना प्रकारके बाजोंसे पूर्ण थी ॥१२०॥ आठवीं पद्मनिधि पाटाम्बर, चीन, महानेत्र, दुकूल, उत्तम कम्बल तथा नाना प्रकारके रङ्ग-बिरङ्ग वस्त्रोंसे परिपूर्ण थी ॥१२१॥ और नौवीं पिङ्गलनिधि कड़े तथा कटिसूत्र आदि स्त्री-पुरुषोंके आभूषण और हाथी, घोड़ा आदिके अलङ्कारोंसे परिपूर्ण थी ॥१२२॥ ये नौकी नौ निधियाँ कामवृष्टि नामक गृहपतिके आधीन थीं और सदा चक्रवर्तीके समस्त मनोरथोंको पूर्ण करती थीं ॥१२३॥ चक्रवर्तीके एक-से-एक बढ़कर तीन सौ साठ रसोइया थे जो प्रतिदिन कल्याणकारी सीथोंसे युक्त आहार बनाते थे ॥१२४॥ एक हजार चावलोंका एक कवल होता है ऐसे बत्तीस कवल प्रमाण चक्रवर्तीका आहार था, सुभद्राका आहार एक कवल था और एक कवल अन्य समस्त लोगोंकी तृप्तिके लिए पर्याप्त था ॥१२५॥ चक्रवर्तीके निन्यानबे हजार चित्रकार थे, बत्तीस हजार मुकुटबद्ध राजा थे, उतने ही देश थे और देवाङ्गनाओंको भी जीतनेवाली छियानबे हजार स्त्रियाँ थीं ॥१२६-१२७॥ एक करोड़ हल थे, तीन करोड़ कामधेनु गायें थीं, वायुके समान वेगशाली अठारह करोड़ घोड़े थे, मत्त एवं धीरे-धीरे गमन करनेवाले चौरासी लाख हाथी और उतने ही उत्तम रथ थे ॥१२८-१२९॥ अर्ककीर्ति और विवर्धनको आदि लेकर पाँचसौ चरम शरीरी तथा आज्ञाकारी पुत्र थे ॥१३०॥ १ भाजन, २ भोजन, ३ शय्या, ४ सेना, ५ वाहन, ६ आसन, ७ निधि, ८ रत्न, ९ नगर और १० नाट्य ये दश प्रकारके भोग थे ॥१३१॥ सेवामें निपुण, प्रमाद रहित एवं परमहितकारी सोलह हजार गणबद्ध देव सदा उनकी सेवा करते थे ॥१३२॥ यद्यपि राजाधिराज चक्रवर्ती इस प्रकारके विभवसे सहित थे तथापि उनकी बुद्धि शास्त्रोंका अर्थ विचारनेमें निरत रहती थी और वे दुर्गतिरूपी ग्रहका सदा निग्रह करते रहते थे ॥१३३॥ भुजाओंसे शत्रुओंका मथन करने वाले चक्रवर्तीने यद्यपि बत्तीस हजार राजाओंको बिखेर कर उनका अभिमान नष्ट कर दिया था तथापि स्वयं अभिमानसे रहित थे ॥१३४॥ जिनका वक्षःस्थल श्रीवृक्षके चिह्नसे सहित था, जो चौंसठ लक्षणोंसे युक्त थे, जो इन्द्रकी लक्ष्मीको तिरस्कृत करनेवाले थे और जो नित्य एवं अखण्डित पौरुषको धारण करनेवाले थे ऐसे स्वयंभूपुत्र सोलहवें कुलकर भरत महाराज जब भरत क्षेत्र सम्बन्धी छह खण्डोंकी भूमिका

१. कामदृष्टि-म० । २. अर्ककीर्तिना । ३. विवर्द्धनकुमारादयः । ४. निधिरत्नं पुरं म० । ५. श्रीवत्स-म० ।

धर्मार्थकाममोक्षेषु यथेष्टमनुरागिणः । जनाः सन्ततमारेमुर्निःप्रत्यूहसमीहिताः ॥१३७॥

अवाग्विसर्गमन्येषां पूर्वधर्मफलं प्रभुः । श्रिया स दर्शयन् केषां नाभूद्धर्मस्य देशकः ॥१३८॥

शार्दूलविक्रीडितवृत्तम्

धर्मस्याचरितस्य पूर्वजनने मार्गे जिनानां महान्
माहात्म्येन सपौरुषः सुखनिधिर्लोकैककल्पद्रुमः ।
सम्यग्दर्शनरत्नरञ्जितमनोवृत्तिर्मनश्चक्रभृत्
चक्रे शक्रनिभः श्रियाऽत्र भरतः शार्दूलविक्रीडितम् ॥१३९॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ भरतदिग्विजयवर्णनो नाम एकादशः सर्गः ।

नीतिपूर्वक शासन करते थे तब धर्म, अर्थ, काम और मोक्षमें यथेष्ट अनुराग रखने वाले लोग निर्विघ्न रूपसे निरन्तर आनन्दका उपभोग करते थे ॥१३५-१३७॥ जो अपनी लक्ष्मीके द्वारा विना वचन बोले ही अन्य मनुष्योंके लिए पूर्वजन्ममें किये हुए धर्मका फल दिखला रहे थे ऐसे भरत महाराज किनके लिए धर्मके उपदेशक नहीं थे। भावार्थ—उनकी अनुपम विभूतिको देखकर लोग अपने आप समझ जाते थे कि यह इनके पूर्वकृत धर्मका फल है इसलिए सबको धर्म करना चाहिए ॥१३८॥ इस प्रकार पूर्वजन्ममें आचरण किये हुए धर्मके माहात्म्यसे जो स्वयं अतिशय महान थे, पौरुषसे युक्त थे, सुखके भाण्डार थे, लोगोंके लिए कल्पवृक्ष स्वरूप थे, सम्यग्दर्शन रूपी रत्नसे रञ्जित मनोवृत्तिसे युक्त थे, और लक्ष्मीसे इन्द्रके समान थे ऐसे चक्रवर्ती भरत, सिंहकी चेष्टाके समान सुदृढ़ मनको जिनमार्गमें लीन रखने लगे ॥१३९॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें भरतकी दिग्विजयका वर्णन करनेवाला ग्यारहवाँ सर्ग समाप्त हुआ ॥११॥

द्वादशः सर्गः

चकार वन्दनां गत्वा चक्री भर्तुरनारतम् । स त्रिषष्टिपुराणानि शुश्राव च सविस्तरम् ॥१॥
चतुर्विंशतितीर्थेशवन्दनार्थं[1] शिरःस्पृशम् । अचीकरदसौ वेश्मद्वारे वन्दनमालिकाम् ॥२॥
अदृष्टपूर्वतीर्थेशाः प्रविष्टाः समवस्थितिम् । कदाचिच्चक्रिणा सार्द्धं विवर्द्धन[2]पुरोगमाः ॥३॥
क्लिष्टाः स्थावरकायेष्वनादिमिथ्यात्वदृष्टयः । दृष्ट्वा भगवतो लक्ष्मीं राजपुत्राः सुविस्मिताः ॥४॥
अन्तर्मुहूर्तकालेन प्रतिपन्नसुसंयमाः । त्रयोविंशान्यहो चित्रं शतानि नवभिर्बभुः ॥५॥
तान् प्रशस्य ततश्चक्री शासनं च जिनेशिनाम् । नत्वेशं साधुसङ्घं च विवेश मुदितः पुरीम् ॥६॥
शनैर्याति ततः काले साम्राज्ये लोकपालिनः । चतुर्वर्गोचितज्ञानजलक्षालितचेतसः ॥७॥
ततः स्वयंवरारम्भे प्राप्ते भूचरखेचरे । वृते मेघेश्वरे धीरे सुसुलोचनया तया ॥८॥
युद्धे बद्धे[3]ऽर्ककीर्त्तौ च मुक्ते च कृतपूजने । अकम्पनसुताभर्त्ता पूजितश्चक्रवर्त्तिना ॥९॥
स हास्तिनपुराधीशः प्रासादस्थोऽन्यदा वृतः । स्त्रीभिः खे खेचरं यान्तं खेचर्या[4] वीक्ष्य मूर्च्छितः ॥१०॥

अथानन्तर चक्रवर्ती भरत समवसरणमें जाकर निरन्तर भगवान् वृषभदेवको नमस्कार करते थे और त्रेशठ शलाकापुरुषोंके पुराण विस्तारके साथ सुनते थे ॥१॥ उन्होंने चौबीस तीर्थङ्करों-की वन्दनाके लिए अपने महलोंके द्वारपर शिरका स्पर्श करने वाली वन्दनमालाएँ बँधवाई थीं। भावार्थ—चक्रवर्ती भरतने अपने महलोंके द्वारपर रत्ननिर्मित चौबीस घंटियोंसे सहित ऐसी वन्दन-मालाएँ बँधवाई थीं जिनका निकलते समय शिरसे स्पर्श होता था। घंटियोंकी आवाज सुनकर भरतको चौबीस तीर्थकरोंका स्मरण हो आता था जिससे वह उन्हें परोक्ष नमस्कार करता था ॥२॥ किसी समय चक्रवर्तीके साथ विवर्द्धन कुमार आदि नौ सौ तेईस राजकुमार भगवान्के समवसरणमें प्रविष्ट हुए। उन्होंने पहले कभी तीर्थंकरके दर्शन नहीं किये थे। वे अनादि मिथ्यादृष्टि थे और अनादि कालसे ही स्थावर कायोंमें जन्ममरण कर क्लेशको प्राप्त हुए थे। भगवान्की लक्ष्मी देखकर वे सब परम आश्चर्यको प्राप्त हुए और अन्तर्मुहूर्तमें ही उन्होंने संयम प्राप्त कर लिया ॥३-५॥ चक्रवर्तीने उन सब कुमारोंकी तथा जिनेन्द्रदेवके शासनकी प्रशंसा की और अन्तमें वे श्रीजिनेन्द्र भगवान् तथा मुनिसंघको नमस्कार कर प्रसन्न होते हुए अयोध्या नगरीमें प्रविष्ट हुए ॥६॥

तदनन्तर धीरे-धीरे समय व्यतीत होनेपर लोगोंकी रक्षा करने वाले एवं चतुर्वर्गके वास्तविक ज्ञानरूपी जलसे प्रक्षालित चित्तके धारक महाराज भरतके साम्राज्यमें सर्व प्रथम स्वयंवर प्रथाका प्रारम्भ हुआ। स्वयंवर मण्डपमें अनेक भूमिगोचरी तथा विद्याधर इकट्ठे हुए। बनारसके राजा अकम्पनकी पुत्री सुलोचनाने हस्तिनापुरके राजा सोमप्रभके पुत्र मेघेश्वर जयकुमारको वरा। अर्ककीर्ति और जयकुमारका युद्ध हुआ जिसमें जयकुमारने अर्ककीर्तिको बाँध लिया। पश्चात् अकम्पनकी प्रेरणासे जयकुमारने अर्ककीर्तिको छोड़ दिया एवं उसका सत्कार किया और चक्रवर्तीने सुलोचनाके पति जयकुमारका सत्कार किया ॥७-९॥

तदनन्तर किसी समय हस्तिनापुरका राजा जयकुमार स्त्रियोंसे घिरा महलकी छतपर बैठा था कि आकाशमें जाते हुए विद्याधर और विद्याधरीको देखकर अकस्मात् मूर्च्छित हो

---

१. तीर्थेशं वन्दनार्थं म० । २. विवर्द्धनकुमारप्रभृतयः ९२३ भरतपुत्राः अनादिमिथ्यादृष्टयः सर्वतः पूर्वं भगवतो वैभवं दृष्ट्वा संयमं स्वीचक्रुरिति कथासारः । ३. बद्धे च कीर्तौ च म० । ४. विद्याधर्या सह ।

विह्वलान्तःपुरस्त्रीभिः कृतमूर्च्छाप्रतिक्रियः[1]। हा प्रभावति ! यातासि केत्यवादीत्प्रबुद्धवान् ॥११॥
जये जातिस्मरे जाते तत्प्रियाऽपि सुलोचना। प्रासादवलभौ क्रीडत्पारावतयुगेक्षणात् ॥१२॥
भूत्वा जातिस्मरा मूर्च्छां गत्वा प्राप्य प्रतिक्रियाम्[2]। हिरण्यवर्मणो नाम गृह्णतीव समुत्थिता ॥१३॥
हिरण्यवर्मपूर्वोऽहमित्युवाच जयः प्रियाम्। साऽहं प्रभावतीत्याह प्रहृष्टा तं सुलोचना ॥१४॥
विद्याधरभवं पूर्वमभिज्ञानैरुभावपि। परस्परस्य संवाद्यं स्पष्टं विदधतुः प्रियौ ॥१५॥
ततोऽन्तःपुरलोकस्य कौतुकव्याप्तचेतसः। किमेतदिति जिज्ञासाज्ञापनार्थं जयोक्तया ॥१६॥
सुखदुःखरसोन्मिश्रमवियोगसुखान्वितम्। द्वयोश्चरितमाख्यातं चतुर्भवमयं तया ॥१७॥
उट्टिण्टिकारिसम्बन्धं सुकान्तरतिवेगयोः। दम्पत्योर्दग्धयोस्तेन मरणं करुणावहम् ॥१८॥
मार्जारेण सता तेन स्वपारावतजन्मनि। भक्षणे दुःखमरणं स्वं जगाद सुलोचना ॥१९॥
साधुदानानुमोदेन प्रभावत्या प्रभावितः। हिरण्यवर्मणो भोगं महाविद्याधरश्रियः ॥२०॥
स्वपूर्ववैरिणा दाहं तयोः सह तपस्यथोः। आद्यकल्पसमुत्पत्तिं संक्लेशपरिणामतः ॥२१॥
क्रीडार्थमागतस्यास्य धर्मा देवमिथुनस्य च। वैरिणो नरकोत्थस्य भीमसाधोश्च मर्षणम् ॥२२॥
स्वर्गच्यवनपर्यन्तं दम्पत्योश्चरितं यथा। [3]दृष्टश्रुतानुभूतार्थं सविस्तरमुदीरितम् ॥२३॥

गया ॥१०॥ घबड़ायी हुई अन्तःपुरकी स्त्रियोंने उसकी मूर्च्छाका उपचार किया जिससे सचेत होकर वह कहने लगा कि 'हाय ! प्रभावति ! तू कहाँ गई ?' ॥११॥ उधर विद्याधर और विद्याधरीको देखकर जयकुमारको जातिस्मरण हुआ और इधर महलके छज्जेपर क्रीड़ा करते हुए कबूतर और कबूतरीका युगल देखनेसे सुलोचनाको भी जातिस्मरण हो गया जिससे वह भी मूर्च्छित हो गई। पश्चात् मूर्च्छाका उपचार प्राप्त कर सुलोचना हिरण्यवर्माका नाम लेती हुई उठी ॥१२-१३॥ प्रियाके मुखसे हिरण्यवर्माका नाम सुनकर जयकुमारने उससे कहा कि पहले मैं ही हिरण्यवर्मा था इसके उत्तरमें सुलोचनाने भी प्रसन्न होती हुई कहा कि वह प्रभावती मैं ही हूँ ॥१४॥ इस प्रकार पति-पत्नी दोनोंने अनेक चिह्नोंसे हम पहले विद्याधर थे, इसका स्पष्ट निर्णय कर लिया ॥१५॥

तदनन्तर जिसका चित्त कौतुकसे व्याप्त हो रहा था ऐसे अन्तःपुरके समस्त लोगोंकी 'यह क्या है' इस जिज्ञासाको दूर करनेके लिए जयकुमारकी प्रेरणा पाकर सुलोचनाने दोनोंके पिछले चार भवोंसे सम्बन्ध रखनेवाला चरित कहना शुरू किया। उनका वह चरित सुख और दुःख रूपी रससे मिला हुआ था तथा संयोग सम्बन्धी सुखसे सहित था ॥१६-१७॥ उसने बताया कि सुकान्त और रतिवेगा नामक दम्पतिके साथ उट्टिंटिकारिका क्या सम्बन्ध था तथा किस प्रकार उसने उक्त दोनों दम्पतियोंको जलाकर उनका करुणापूर्ण मरण किया था। उट्टिंटिकारि मरकर बिलाव हुआ और सुकान्त तथा रतिवेगा मरकर कबूतर-कबूतरी हुए तो उट्टिंटिकारिने कबूतर-कबूतरीका भक्षण किया। जिससे उन्हें मरते समय बड़ा दुःख उठाना पड़ा ॥१८-१९॥ मुनिदानकी अनुमोदनासे कबूतरीका जीव प्रभावती नामकी विद्याधरी हुई और कबूतरका जीव हिरण्यवर्मा नामका विद्याधर हुआ तथा दोनों ही विद्याधरोंकी लक्ष्मीका उपभोग करते रहे। कदाचित् हिरण्यवर्मा और प्रभावती वनमें तपस्या करते थे उसी समय अपने पूर्व भवके वैरी—मार्जारके जीव (विद्युद्वेग नामक चोर) ने उन्हें अग्निमें जला दिया। संक्लिष्ट परिणामोंके कारण हिरण्यवर्मा और प्रभावती मरकर प्रथम स्वर्गमें देव-देवी हुए और विद्युद्वेग चोरका जीव मरकर नरक गया। किसी समय उक्त देव-देवियोंका युगल क्रीडाके लिए पृथिवीपर आया था और विद्युद्वेगका जीव नरकसे निकलकर भीम नामका साधु हुआ था। सो कारण पाकर तीनों जीवों-

---

१. कृतमूर्च्छानिवारणः। २. प्रतिक्रियः म०। ३. दृष्टं श्रुता म०।

निजाज्ञया च कथितं श्रीपालचरितं तथा । सान्तःपुरो जयः श्रुत्वा महान्तं विस्मयं श्रितः ॥२४॥
भवपञ्चकसम्बन्धस्नेहसागरवर्तिनोः । स्मरणादेव सम्प्राप्ताः विद्याः प्राग्जन्मजास्तयोः ॥२५॥
ततो विद्याप्रभावेण विद्याधरयुवश्रियौ । विजह्रतुर्जयन्तौ तौ लोकं खेचरगोचरम् ॥२६॥
जिनेन्द्रवन्दनापूर्वं त्रिवर्गपरिपोषिणा । मन्दरस्य रतं तेन कन्दरासु समं तया ॥२७॥
कुलशैलनितम्बेषु सुविशालनितम्बया । रेमे किन्नरगीतेषु रामया सोऽभिरामया ॥२८॥
कर्मभूमिभवेनापि क्रीडितं भोगभूमिषु । कलागुणविदग्धेन मिथुनेन यथेप्सितम् ॥२९॥
शक्रप्रशंसनादेत्य रतिप्रभसुरेण सः । परीक्ष्य स्वस्त्रिया मेरावन्यदा पूजितो जयः ॥३०॥
सर्वासामेव शुद्धीनां शीलशुद्धिः प्रशस्यते । शीलशुद्धिविशुद्धानां किङ्करास्त्रिदशा नृणाम् ॥३१॥
वर्षाणि बहुपत्नीकः सुबहूनि बहुप्रजाः । बुभुजे परमान् भोगान् विजयेन समं जयः ॥३२॥
सुतयाऽकम्पनस्यासावाक्रीड्याद्रिषु चान्यदा । वन्दनार्थं जिनेन्द्रस्य वृषभस्य समागमत् ॥३३॥
प्रत्यासन्नमसुञ्चन्तीं[1] प्रोवाच दयितां च सः । प्रिये पश्य जिनाधीशं त्रैलोक्यपरिवारितम् ॥३४॥
प्रातिहार्यैर्युतोऽष्टाभिश्चतुस्त्रिंशन्महाद्भुतैः । अयं भाति विभुर्धाता[2] त्रैलोक्यपरमेश्वरः ॥३५॥
अमी चतुर्विधा देवाः सौधर्मप्रमुखाः प्रिये । देव्योऽमीषामपि मूर्ध्ना प्रणमन्ति जिनेश्वरम् ॥३६॥

ने परस्पर क्षमा भाव धारण किया । काल पाकर भीम मुनि तो मोक्ष चले गये और देवदम्पती स्वर्गसे च्युत होकर हम दोनों हुए हैं । इस प्रकार स्वर्गसे च्युत होने पर्यन्त देवदम्पतीका चरित जैसा देखा, सुना अथवा अनुभव किया था वैसा सुलोचनाने विस्तारके साथ वर्णन किया ॥२०-२३॥ तदनन्तर जयकुमारकी आज्ञा पाकर सुलोचनाने श्रीपाल चक्रवर्तीका भी चरित कहा जिसे अन्तःपुरके साथ-साथ सुनकर जयकुमार परम आश्चर्यको प्राप्त हुए ॥२४॥ जो पाँच भवोंके सम्बन्धसे समुत्पन्न स्नेह रूपी सागरमें निमग्न थे ऐसे जयकुमार और सुलोचनाको स्मरण मात्रसे ही पूर्व भव सम्बन्धी विद्याएँ प्राप्त हो गईं ॥२५॥ तदनन्तर विद्याके प्रभावसे विद्याधर और विद्याधरियोंकी शोभाको जीतते हुए वे दोनों विद्याधरोंके लोकमें विहार करने लगे ॥२६॥ धर्म, अर्थ और काम इस त्रिवर्गको पुष्ट करनेवाला जयकुमार कभी जिनेन्द्र भगवान्की वन्दना कर सुमेरुपर्वतकी गुफाओंमें सुलोचनाके साथ रमण करता था और कभी जहाँ किन्नर देव गाते थे ऐसे कुलाचलोंके नितम्बोंपर विशाल नितम्बोंसे सुशोभित सुन्दरी सुलोचनाके साथ क्रीड़ा करता था ॥२७-२८॥ वह यद्यपि कर्मभूमिमें उत्पन्न हुआ था तथापि कला गुणमें विदग्ध आर्य दम्पतीके समान भोगभूमियोंमें इच्छानुसार क्रीड़ा करता था ॥२९॥

किसी समय इन्द्रके द्वारा की हुई प्रशंसासे प्रेरित होकर रतिप्रभ नामक देवने अपनी स्त्रीके साथ सुमेरु पर्वतपर जयकुमारके शीलकी परीक्षा की और परीक्षा करनेके बाद उसकी पूजा की ॥३०॥ सो ठीक ही है क्योंकि सब प्रकारकी शुद्धियोंमें शीलशुद्धि ही प्रशंसनीय है। जो मनुष्य शीलकी शुद्धिसे विशुद्ध हैं उनके देव भी किंकर हो जाते हैं ॥३१॥ बहुत पत्नियों और बहुत पुत्रोंसे सुशोभित जयकुमार अपने छोटे भाई विजयके साथ उत्तमोत्तम भोग भोगता रहा ॥३२॥

तदनन्तर किसी दिन वह सुलोचनाके साथ पर्वतोंपर क्रीड़ा कर श्री वृषभ जिनेन्द्रकी वन्दनाके लिए समवसरण गया ॥३३॥ समवसरणके समीप पहुँचकर उसने पासमें खड़ी सुलोचनासे कहा कि प्रिये ! तीन लोकके जीवोंसे घिरे हुए जिनेन्द्रदेवको देखो ॥३४॥ ये त्रिलोकीनाथ आठ प्रातिहार्योंसे सहित हैं तथा चौंतीस अतिशयोंसे सुशोभित हो रहे हैं ॥३५॥ हे प्रिये ! ये सौधर्म आदि चारों निकायके देव और इनकी देवियाँ मस्तक झुका-झुकाकर जिनेन्द्र देवको

१. मवोचन्ती म० । २. विशुद्धान्तो म०, ख० ।

नानर्द्धियतिभिर्युक्ताः सप्ततिर्गणधारिणः । अमी वृषभसेनाद्याः प्रकाशन्तेऽन्तिकं प्रभोः ॥३७॥
असौ बाहुबली कान्ते ! केवली जटिलो वृतः । स्वभ्रातृमुनिभिर्भाति न्यग्रोध इव पादपैः ॥३८॥
एष सोमप्रभो देवि ! शोभते गुरुरावयोः । श्रेयसा सहितो योगी तपःश्रीपरिवारितः ॥३९॥
अयं पुत्रसहस्रेण तपस्थो जनकस्तव । अकम्पनमहाराजो राजते तपसः[1] श्रिया ॥४०॥
दुर्मर्षणादयस्तेऽमी त्वत्स्वयंवरयोधिनः । उपशान्तधियः कान्ते ! तपस्यन्ति महानृपाः ॥४१॥
ब्राह्मीयं सुन्दरीयं च समस्तार्यागणाग्रणीः । कुमारीभ्यां प्रिये ताभ्यां मारभङ्गः स्फुटीकृतः ॥४२॥
भरतोऽयं नृपैः सार्द्धमुपविष्टो जिनान्तिके । अन्तःपुरमिदं तस्य सुभद्रादिकमेकतः ॥४३॥
पश्य पश्य प्रिये चित्रं यदन्योन्यविरोधिनः । तिर्यञ्चोऽमी समासीनाः सममेकत्र मित्रवत् ॥४४॥
दर्शयन्निति कान्तायै समवस्थितिमर्हतः । सोऽवतीर्य मरुन्मार्गात् कृतजैनेन्द्रसंस्तवः ॥४५॥
निविष्टश्चक्रिणः पार्श्वे विनयी नयविजयः । सुभद्रान्तिकमासाद्य समासीना सुलोचना ॥४६॥
धर्मं तत्र जयः श्रुत्वा सप्रपञ्चकथामृतम् । बोधिलाभमसौ लेभे मोहनीयतनुत्वतः ॥४७॥
स्नेहपाशं दृढं छित्त्वा प्रबोध्य स सुलोचनाम् । पुत्रायानन्तवीर्याय दत्वा राज्यं निजं कृती ॥४८॥
चक्रिणा रुध्यमानोऽपि स स्नेहवशवर्तिना । प्रवव्राज जिनस्यान्ते विजयेन जयः समम् ॥४९॥
शतान्यष्टौ जयेनामा प्राव्रजन् क्षितिपास्तदा । कलत्रपुत्रमित्राणि सराज्यान्यवहाय ते ॥५०॥
दुःसंसारस्वभावज्ञा सपत्नीभिः सिताम्बरा । ब्राह्मीं च सुन्दरीं श्रित्वा प्रवव्राज सुलोचना ॥५१॥

प्रणाम कर रही हैं ॥३६॥ ये भगवान् ऋषभदेवके समीप नाना ऋद्धियोंके धारक मुनियोंसे युक्त वृषभसेन आदि सत्तर गणधर सुशोभित हो रहे हैं ॥३७॥ हे कान्ते ! यहाँ ये केवलज्ञानी जटाधारी बाहुबली भगवान् विराजमान हैं । ये मुनि अवस्थाको प्राप्त हुए अपने भाइयोंसे घिरे हुए हैं और अनेक वृक्षोंसे घिरे वटवृक्षके समान सुशोभित हो रहे हैं ॥३८॥ हे देवि ! इधर ये तपरूपी लक्ष्मीसे घिरे हुए हमारे पिता सोमप्रभ मुनिराज, अपने छोटे भाई श्रेयान्सके साथ सुशोभित हो रहे हैं ॥३९॥ इधर ये तुम्हारे पिता अकम्पन महाराज एक हजार पुत्रोंके साथ तपमें लीन हैं तथा तपोलक्ष्मीसे अत्यधिक सुशोभित हो रहे हैं ॥४०॥ हे कान्ते ! इधर ये तुम्हारे स्वयंवरमें युद्ध करनेवाले दुर्मर्षण आदि बड़े-बड़े राजा शान्त चित्त होकर तपस्या कर रहे हैं ॥४१॥ हे प्रिये ! यह समस्त आर्यिकाओंकी अग्रणी ब्राह्मी है और यह सुन्दरी है इन दोनोंने कुमारी अवस्थामें ही कामदेवको पराजित कर दिया है ॥४२॥ इधर यह जिनेन्द्र भगवान्‌के समीप अनेक राजाओंके साथ भरत चक्रवर्ती बैठा है और उधर दूसरी ओर उसकी सुभद्रा आदि रानियाँ अवस्थित हैं ॥४३॥ हे प्रिये ! देखो देखो, कैसा आश्चर्य है कि ये परस्परके विरोधी तिर्यञ्च यहाँ एक साथ मित्रकी तरह बैठे हैं ॥४४॥ इस प्रकार प्राणवल्लभा—सुलोचनाके लिए अरहन्त भगवान्‌का समवसरण दिखाता हुआ नीतिका वेत्ता कुमार आकाशसे नीचे उतरा और जिनेन्द्र भगवान्‌की स्तुति करता हुआ विनय-पूर्वक चक्रवर्तीके पास बैठ गया तथा सुलोचना सुभद्राके पास जाकर बैठ गई ॥४५-४६॥ जयकुमारका मोह अत्यन्त सूक्ष्म रह गया था इसलिए वहाँ विस्तृत कथारूपी अमृतसे सहित धर्मका उपदेश सुनकर उसने सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक् चारित्ररूपी बोधिका लाभ प्राप्त किया ॥४७॥ तदनन्तर अतिशय बुद्धिमान् जयकुमारने स्नेहरूपी सुदृढ़ बन्धनको छेदकर सुलोचनाको समझाया, अनन्तवीर्य नामक पुत्रके लिए अपना राज्य दिया और स्नेहके वशवर्ती चक्रवर्तीके मना करनेपर भी छोटे भाई विजयके साथ जिनेन्द्रदेवके समीप दीक्षा ले ली ॥४८-४९॥ उस समय जयकुमारके साथ एक सौ आठ राजाओंने स्त्री, पुत्र, मित्र तथा राज्यको छोड़कर दीक्षा धारण कर ली ॥५०॥ दुष्ट संसारके स्वभावको जाननेवाली सुलोचनाने अपनी सपत्नियोंके साथ सफेद वस्त्र धारण कर लिये और ब्राह्मी तथा

१. तपसा श्रिया म० ।

द्वादशाङ्गधरो जातः क्षिप्रं मेघेश्वरो गणी । एकादशाङ्गभृज्जाता साऽऽर्यिकाऽपि सुलोचना ॥५२॥
भूचरेषु ततोऽन्येषु खेचरेषु च राजसु । निष्क्रान्तेषु श्रियस्त्यक्त्वा दोषिणीरिव योषितः ॥५३॥
अभूवन् गणिनो भर्त्तुरशीतिश्चतुरुत्तरा । सहस्राणि गणाश्चासन्नशीतिश्चतुरुत्तरा ॥५४॥
आद्यो वृषभसेनोऽन्यः कुम्भो दृढरथो गणी । चतुर्थः शत्रुदमनो देवशर्मा च पञ्चमः ॥५५॥
षष्ठो गणधरो धीमान् धनदेव इतीरितः । नन्दनः सोमदत्तश्च सुरदत्तस्तथा परः ॥५६॥
वायुशर्मा सुबाहुश्च देवाग्निर्द्वादशो गणी । अग्निदेवोऽग्निभूतिश्च[1] चतुर्दश उदीरितः ॥५७॥
तेजस्वी चाग्निमित्रश्च तथा हलधरः श्रुती । महीधरश्च माहेन्द्रो वसुदेवो वसुन्धरः ॥५८॥
तथैवाचलनामान्यो मेरुश्च जगतीष्यते । भूतिः सर्वसहो यज्ञः सर्वगुप्तस्तथापरः ॥५९॥
द्वौ च सर्वप्रियो देवो विजयश्चापि संज्ञया । परो विजयगुप्तश्च मित्रान्तविजयस्ततः ॥६०॥
विजयश्रीरिति ख्यातः पराख्योऽप्यपराजितः । वसुमित्रोऽपि सेनान्तो वसुसाधुरनीदृशः ॥६१॥
सत्यदेव इति ज्ञेयः सत्यवेदः पुनर्गणी । सर्वगुप्तश्च मित्रश्च सत्यवानिति नामतः ॥६२॥
विनीतः संवरश्चोभावृषिगुप्तर्षिदत्तकौ । यज्ञदेव इति प्रोक्तो यज्ञगुप्तस्तथैव च ॥६३॥
यज्ञमित्रो यज्ञदत्तः स्वायम्भुव इति स्तुतः । भागदत्तो भागफल्गुर्गुप्तफल्गुः प्रकीर्त्तितः ॥६४॥
तथाऽन्यो गणभृन्नाम्ना मित्रफल्गुः प्रजापतिः । ततः सत्ययशा नाम्ना वरुणो धनवाहिकः[2] ॥६५॥
गणी महेन्द्रदत्तश्च तेजोराशिर्महारथः । विजयश्रुतिरन्यश्च महाबल इति श्रुतः ॥६६॥
सुविशालश्च वज्रश्च वैरनामा ततोऽपरः । सप्ततिश्चन्द्रचूडोऽन्यस्ततो मेघेश्वरः परः ॥६७॥
कच्छश्चापि महाकच्छः सुकच्छोऽतिबलोऽपि च । भद्रावलिश्च विख्यातो नमिश्च विनमिस्तथा ॥६८॥
गणी भद्रबलो नन्दी तथाऽन्यः समुदीरितः । महानुभावसंज्ञश्च नन्दिमित्रश्च नामतः ॥६९॥
तथैव कामदेवश्च चरमोऽनुपमः स्मृतः । वृषभस्य गणिनस्तेऽमी अशीतिश्चतुरुत्तराः ॥७०॥

सुन्दरीके पास जाकर दीक्षा ले ली ॥५१॥ मेघेश्वर जयकुमार शीघ्र ही द्वादशाङ्गके पाठी होकर भगवान्‌के गणधर हो गये और आर्यिका सुलोचना भी ग्यारह अङ्गोंकी धारक हो गई ॥५२॥ तदनन्तर अनेक भूमिगोचरी और विद्याधर राजाओंने जब दोषवती स्त्रियोंके समान लक्ष्मीका त्यागकर दीक्षा धारण कर ली तब भगवान्‌के चौरासी गणधर हो गये और गणोंकी संख्या चौरासी हजार हो गई ॥५३-५४॥ उनमें चौरासी गणधरोंके नाम ये हैं—१ वृषभसेन, २ कुम्भ, ३ दृढ़रथ, ४ शत्रुदमन, ५ देवशर्मा, ६ धनदेव, ७ नन्दन, ८ सोमदत्त, ९ सुरदत्त, १० वायुशर्मा, ११ सुबाहु, १२ देवाग्नि, १३ अग्निदेव, १४ अग्निभूति, १५ तेजस्वी, १६ अग्निमित्र, १७ हलधर, १८ महीधर, १९ माहेन्द्र, २० वसुदेव, २१ वसुन्धर, २२ अचल, २३ मेरु, २४ भूति, २५ सर्वसह, २६ यज्ञ, २७ सर्वगुप्त, २८ सर्वप्रिय, २९ सर्वदेव, ३० विजय, ३१ विजयगुप्त, ३२ विजयमित्र, ३३ विजयश्री, ३४ पराख्य, ३५ अपराजित, ३६ वसुमित्र, ३७ वसुसेन, ३८ साधुसेन, ३९ सत्यदेव, ४० सत्यवेद, ४१ सर्वगुप्त, ४२ मित्र, ४३ सत्यवान्, ४४ विनीत, ४५ संवर, ४६ ऋषिगुप्त, ४७ ऋषिदत्त, ४८ यज्ञदेव, ४९ यज्ञगुप्त, ५० यज्ञमित्र, ५१ यज्ञदत्त, ५२ स्वायंभुव, ५३ भागदत्त, ५४ भागफल्गु, ५५ गुप्त, ५६ गुप्तफल्गु, ५७ मित्रफल्गु, ५८ प्रजापति, ५९ सत्ययश, ६० वरुण, ६१ धनवाहिक, ६२ महेन्द्रदत्त, ६३ तेजोराशि, ६४ महारथ, ६५ विजय-श्रुति, ६६ महाबल, ६७ सुविशाल, ६८ वज्र, ६९ वैर, ७० चन्द्रचूड, ७१ मेघेश्वर, ७२ कच्छ, ७३ महाकच्छ, ७४ सुकच्छ, ७५ अतिबल, ७६ भद्रावलि, ७७ नमि, ७८ विनमि, ७९ भद्रबल, ८० नन्दी, ८१ महानुभाव, ८२ नन्दिमित्र, ८३ कामदेव और ८४ अनुपम। भगवान् वृषभदेवके ये चौरासी गणधर थे ॥५५-७०॥

१. भूतश्च म० । २. धनवाहकः म०, ख० ।

सङ्घः परिषदि श्रीमान् बभौ सप्तविधस्तदा । विचित्रगुणपूर्णानामृषीणां वृषभेशिनः ॥७१॥
सहस्राणि च चत्वारि तत्र सप्तशतानि च । पञ्चाशच्च महाभागा बभुः[1] पूर्वधरास्तदा ॥७२॥
तावन्त्येव सहस्राणि शतं पञ्चाशतायुतम् । श्रुतस्य शिक्षकाः[2] प्रोक्ताः संयताः संयताचकाः ॥७३॥
सहस्राणि नवाधीता मुनयोऽवधिलोचनाः[3] । विंशतिस्ते सहस्राणि केवलज्ञानलोचनाः[4] ॥७४॥
विंशतिस्ते सहस्राणि षट् शतानि च वैक्रियाः[5] । विक्रियाशक्तियोगेन जयन्तः शक्रमप्यलम् ॥७५॥
द्वादशैव सहस्राणि तथा सप्तशतानि च । पञ्चाशच्च युतास्तत्र मत्या विपुलया[6] बभुः ॥७६॥
तावन्त एव संख्याताः संख्ययाऽसंख्यसद्‌गुणाः । जेतारो हेतुवादज्ञा वादिनः प्रतिवादिनाम् ॥७७॥
सपञ्चाशत्सहस्रास्ता शुद्धज्ञा बभुरार्यिकाः । श्राविकाः पञ्चलक्षयस्ताखिलक्षाः श्रावकाश्च ते ॥७८॥
छद्मस्थकालनिर्मुक्तां पूर्वलक्षां जिनेश्वरः । विजहार महीं भव्यान् भवाब्धेस्तारयन् बहून् ॥७९॥

स्रग्धराच्छन्दः

इत्थं कृत्वा समर्थं भवजलधिजलोत्तारणे भावतीर्थं
कल्पान्तस्थायि भूयस्त्रिभुवनहितकृत् क्षेत्रतीर्थं स कर्तुम् ।
स्वाभाव्यादारुरोह श्रमणगणसुरव्रातसंपूज्यपादः
कैलासाख्यं महीध्रं निषधमिव वृषादित्य इद्धप्रभाढ्यः ॥८०॥

तस्मिन्नद्रौ जिनेन्द्रः स्फटिकमणिशिलाजालरम्ये निषण्णो
योगानां सन्निरोधं सह दशभिरथो योगिनां यैः सहस्रैः ।
कृत्वा कृत्वान्तमन्ते चतुरपरमहाकर्मभेदस्य शर्म-
स्थानं स्थानं स सैद्धं समगमदमलस्रग्धराभ्यर्च्यमानः ॥८१॥

भगवान् वृषभदेवकी सभामें नाना प्रकारके गुणोंसे पूर्ण मुनियोंका सात प्रकारका संघ था ॥७१॥ उनमें चार हजार सात सौ पचास महाभाग तो पूर्वधर थे ॥७२॥ चार हजार सात सौ पचास मुनि श्रुतके शिक्षक थे, ये सब मुनि इन्द्रियोंको वश करनेवाले थे ॥७३॥ नौ हजार मुनि अवधिज्ञानी थे, बीस हजार केवलज्ञानी थे, बीस हजार छह सौ विक्रिया ऋद्धिके धारक थे, ये मुनि अपनी विक्रिया शक्तिके योगसे इन्द्रको भी अच्छी तरह जीतनेवाले थे, बीस हजार सात सौ पचास विपुलमति मनःपर्यय ज्ञानके धारक थे, बीस हजार सात सौ पचास ही असंख्यात गुणोंके धारक; हेतुवादके ज्ञाता तथा प्रतिवादियोंको जीतनेवाले वादी थे, शुद्ध आत्मतत्त्वको जाननेवाली पचास हजार आर्यिकाएँ थीं, पाँच लाख श्राविकाएँ थीं और तीन लाख श्रावक थे ॥७४-७८॥ भगवान्की कुल आयु चौरासी लाख पूर्व वर्षकी थी उसमेंसे छद्मस्थ कालके तेरासी लाख वर्ष पूर्व वर्ष कम कर देनेपर एक लाख पूर्व वर्ष तक उन्होंने अनेक भव्य जीवोंको संसार-सागरसे पार करते हुए पृथिवीपर विहार किया था ॥७९॥ इस प्रकार मुनिगण और देवोंके समूहसे पूजित चरणोंके धारक श्री वृषभ जिनेन्द्र, संसाररूपी सागरके जलसे पार करनेमें समर्थ रत्नत्रयरूप भाव तीर्थका प्रवर्तन कर कल्पान्त काल तक स्थिर रहनेवाले एवं त्रिभुवन जनहितकारी क्षेत्र तीर्थको प्रवर्तनके लिए स्वभाववश (इच्छाके विना ही) कैलास पर्वतपर उस तरह आरूढ़ हो गये जिस तरह कि देदीप्यमान प्रभाका धारक वृषका सूर्य निषधाचलपर आरूढ़ होता है ॥८०॥ स्फटिक मणिकी शिलाओंके समूहसे रमणीय उस कैलास पर्वतपर आरूढ़ होकर भगवान्ने एक हजार राजाओंके साथ योग निरोध किया और अन्तमें चार अघातिया कर्मोंका अन्त कर निर्मल मालाओंके धारक देवोंसे पूजित हो अनन्त

१-४७५० । २-४१५० । ३-९००० । ४-२०००० । ५-२०६०० । ६-१२७५० ।

उद्घः सङ्घोऽस्य [1] मौनः स्फुटभुवनगुरोर्देवदेवस्य देहं
देवौघश्चक्रवर्त्तिप्रमुखनृपगणश्चातिभक्त्या समेत्य ।
गन्धैः पुष्पैश्च धूपैः सुरभिभिरमलैरक्षतैश्च प्रदीपैः
सम्पूज्यानम्य सम्यग्वृषभजिनगुणश्रीफलं याचते स्म ।।८२।।

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ वृषभेश्वरपरिनिर्वाणवर्णनो नाम द्वादशः सर्गः ।।१२।।

सुखके स्थानभूत मोक्षस्थानको प्राप्त किया ।।८१।। मोक्षप्राप्तिके अनन्तर मुनियोंका श्रेष्ठ संघ, देवोंका समूह और चक्रवर्ती आदि प्रमुख राजाओंका समूह—इन सबने तीव्र भक्तिवश आकर गन्ध, पुष्प, सुगन्धित धूप, उज्ज्वल अक्षत और देदीप्यमान दीपकके द्वारा त्रिजगद्गुरु देवादि देव वृषभदेवके शरीरकी पूजा कर तथा अच्छी तरह नमस्कार कर यही याचना की कि हम-लोगोंको श्री ऋषभ जिनेन्द्रके गुण लक्ष्मीरूपी फलकी प्राप्ति होवे ।। ८२ ।।

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें श्रीवृषभदेवकी निर्वाण-प्राप्तिका वर्णन करनेवाला बारहवाँ सर्ग समाप्त हुआ ।।१२।।

---

१. मुनीनामयं मौनः 'तस्येदम्' इत्यण् प्रत्ययः ।

त्रयोदशः सर्गः

अनुभूय चिरं लक्ष्मीं भूपतिर्भरतेश्वरः । आदित्ययशसं पुत्रमभिषिच्य भुवो विभुः ॥१॥
दीक्षां जग्राह जैनेन्द्रीमुग्रामात्मपरिग्रहाम् । दुर्निग्रहेन्द्रियग्राममृगनिग्रहवागुराम् ॥२॥
पञ्चमुष्टिभिरुत्पाट्य त्रुटयद्बन्धस्थितिः कचान् । लोचानन्तरमेवापद् राजन् श्रेणिक ! केवलम् ॥३॥
द्वात्रिंशत्त्रिदशेन्द्रैः स कृतकेवलपूजनः । दीपको मोक्षमार्गस्य विजहार चिरं महीम् ॥४॥
पूर्वलक्षाः कुमारत्वे तस्यागुः सप्तसप्ततिः । साम्राज्ये षट् प्रभोरेका श्रामण्ये विश्वदृश्वनः ॥५॥
शैलं वृषभसेनाद्यैः कैलासमधिरुह्य सः । शेषकर्मक्षयान्मोक्षमन्ते प्राप्तः सुरैः स्तुतः ॥६॥
आदित्ययशसः पुत्रो जातः स्मितयशःश्रुतिः । श्रियं तस्मै वितीर्यासौ तपसा प्राप निर्वृतिम् ॥७॥
बलस्तस्मादभूत्पुत्रः सुबलोऽतो महाबलः । ततोऽतिबलनामा च तस्यामृतबलः सुतः ॥८॥
सुभद्रः सागरो भद्रो रवितेजाः शशी ततः । प्रभूततेजास्तेजस्वी तपनोऽन्यः प्रतापवान् ॥९॥
अतिवीर्यः सुवीर्योऽतस्तथोदितपराक्रमः । महेन्द्रविक्रमः सूर्य इन्द्रद्युम्नो महेन्द्रजित् ॥१०॥
प्रभुर्विभुरविध्वंसो वीतभीर्वृषभध्वजः । गरुडाङ्को मृगाङ्काख्य इत्याद्याः पृथिवीभृतः ॥११॥
आदित्यवंशसम्भूताः क्रमेण पृथुकीर्तयः । सुते न्यस्तभराः प्रापुस्तपसा परिनिर्वृतिम् ॥१२॥

अथानन्तर षट्खण्ड पृथिवीके स्वामी महाराज भरतने चिरकाल तक लक्ष्मीका उपभोगकर अर्ककीर्ति नामक पुत्रका अभिषेक किया और स्वयं अतिशय कठिन आत्मरूप परिग्रहसे युक्त, एवं कठिनाईसे निग्रह करने योग्य इन्द्रियरूपी मृग समूहको पकड़नेके लिए जालके समान जिन-दीक्षा धारण कर ली ॥१-२॥ गौतम स्वामी कहते हैं कि हे राजन् श्रेणिक ! महाराज भरतने अपने समस्त केश पञ्चमुट्ठियोंसे उखाड़कर फेंक दिये तथा उनके कर्मबन्धनकी स्थिति इतनी जल्दी क्षीण हुई कि उन्होंने केशलोंचके बाद ही केवलज्ञान प्राप्त कर लिया ॥३॥ तदनन्तर बत्तीसों इन्द्रोंने आकर जिनके केवलज्ञानकी पूजा की थी और जो मोक्षमार्गको प्रकाशित करनेके लिए दीपकके समान थे ऐसे भगवान् भरतने चिरकाल तक पृथिवीपर विहार किया ॥४॥ सर्व-दर्शी भगवान् भरतकी आयु भी चौरासी लाख पूर्वकी थी उसमेंसे सतहत्तर लाख पूर्व तो कुमार कालमें बीते, छह लाख पूर्व साम्राज्य पदमें व्यतीत हुए और एक लाख पूर्व उन्होंने मुनि पदमें विहार किया ॥५॥ आयुके अन्त समय वे वृषभसेन आदि गणधरोंके साथ कैलास पर्वतपर आरूढ़ हो गये और शेष कर्मोंका क्षयकर वहींसे उन्होंने मोक्ष प्राप्त किया, देवोंने उनकी स्तुति-वन्दना की ॥६॥

राजा अर्ककीर्तिके स्मितयश नामका पुत्र हुआ। अर्ककीर्ति उसे लक्ष्मी दे तपके द्वारा मोक्षको प्राप्त हुआ ॥७॥ स्मितयशके बल, बलके सुबल, सुबलके महाबल, महाबलके अतिबल, अतिबलके अमृतबल, अमृतबलके सुभद्र, सुभद्रके सागर, सागरके भद्र, भद्रके रवितेज, रवितेजके शशी, शशीके प्रभूततेज, प्रभूततेजके तेजस्वी, तेजस्वीके तपन, तपनके प्रतापवान्, प्रतापवान्के अतिवीर्य, अतिवीर्यके सुवीर्य, सुवीर्यके उदितपराक्रम, उदितपराक्रमके महेन्द्रविक्रम, महेन्द्र-विक्रमके सूर्य, सूर्यके इन्द्रद्युम्न, इन्द्रद्युम्नके महेन्द्रजित्, महेन्द्रजित्के प्रभु, प्रभुके विभु, विभुके अविध्वंस, अविध्वंसके वीतभी, वीतभीके वृषभध्वज, वृषभध्वजके गरुडाङ्क और गरुडाङ्कके मृगाङ्क आदि अनेक राजा क्रमसे सूर्यवंशमें उत्पन्न हुए। ये सब राजा विशाल यशके धारक थे

१. कल्पवासिनः १२, भवनवासिनः १०, व्यन्तराः ८, सूर्याचन्द्रमसौ इति = ३२ । २. मोक्षम् ।

मोक्षमिक्ष्वाकवो जग्मुर्भरताद्या निरन्तराः । ते चतुर्दशलक्षास्तु प्रापैकोऽग्रेऽहमिन्द्रताम् ॥१३॥
तथा दशगुणाश्चाष्टौ परिपाट्या नरेश्वराः । मुक्तास्तदन्तरे प्रापदेकैकः[१] सुरनाथताम् ॥१४॥
धीरा राज्यधुरां त्यक्त्वा धृत्वान्तेऽन्ये तपोधुराम् । स्वर्गमेकेऽपवर्गं तु जग्मुरादित्यवंशजाः ॥१५॥
योऽसौ बाहुबली तस्माज्जातः सोमयशाः सुतः । सोमवंशस्य कर्तासौ तस्य सूनुर्महाबलः ॥१६॥
ततोऽभूत्सुबलः सूनुरभूद्भुजबली ततः । एवमाद्याः शिवं प्राप्ताः सोमवंशोद्भवा नृपाः ॥१७॥
पञ्चाशत्कोटिलक्षाश्च सागराणां प्रमाणतः । तीर्थं वृषभनाथस्य तदा वहति सन्तते ॥१८॥
इक्ष्वाकवो द्विधादित्यसोमवंशोद्भवा नृपाः । उग्राद्या कौरवाद्याश्च मोक्षं स्वर्गं च भेजिरे ॥१९॥
नमेः खेचरनाथस्य रत्नमाली शरीरजः । रत्नवज्रोऽभवत्तस्मात्ततो रत्नरथस्तथा ॥२०॥
रत्नचिह्नाभिधानोऽस्मात् तस्माच्चन्द्ररथः सुतः । वज्रजङ्घो बभूवास्माद् वज्रसेनसुतस्ततः ॥२१॥
सञ्जातो वज्रदंष्ट्रोऽस्मादभूद्वज्रध्वजस्ततः । वज्रायुधश्च वज्रोऽतः सुवज्रो वज्रभृत्पुनः ॥२२॥
सोऽब्रवीच्चारुदत्ताख्यः कुबेरविभवः प्रभुः । पुर्यामिभ्यपतिस्तस्य तनया रूपगर्विता ॥१२२॥
नाम्ना गन्धर्वसेनेति गान्धर्वपथपण्डिता । गान्धर्वे योऽत्र मे जेता स भर्तेत्यवतिष्ठते ॥१२३॥
तदर्थमत्र लोकोऽयं मिलितो लोभनोदितः । वीणावादनविज्ञानो नानादेशसमागतः ॥१२४॥

अन्तमें दुःखी होकर अङ्गारकने कुमारको छोड़ दिया। नीचे गिरनेके भयसे कुमार कुछ खिन्न हुए परन्तु श्यामाके द्वारा नियुक्त श्यामलछाया नामकी दासी उन्हें बीचमें ही सँभालकर अपने नगर ले जाने लगी। उस समय यह आकाशवाणी हुई कि कुमारको इसी ग्राममें लाभ होनेवाला है इसलिए इस समय यहीं छोड़ दो। आकाशवाणीके अनुसार श्यामलछाया कुमारको अपनी पर्णलध्वी नामक विद्याके लिए सौंपकर अपने घर चली गई और कुमार उस पर्णलध्वी विद्याके द्वारा पत्तेके समान लघु शरीर होकर धीरे-धीरे पृथिवीकी ओर आये ॥१११-११३॥ तदनन्तर कुमार वसुदेव, चम्पानगरीके बाह्योद्यानमें कमलोंसे ढँका हुआ जो कमल सरोवर था उसमें गिरे। तालाबसे निकलकर वे तटपर आये ॥११४॥ सरोवरके तटपर मानस्तम्भ आदिसे युक्त श्रीवासुपूज्य भगवान्का मन्दिर था। वसुदेवने पास जाकर प्रदक्षिणा दी, वन्दना की और उसके बाद दीपिकाओंके प्रकाशसे प्रकाशित उसी मन्दिरमें वह बस गये ॥११५॥ प्रातःकाल भगवान्की पूजाके लिए एक ब्राह्मण आया तो वसुदेवने उससे पूछा कि यह कौन देश है? तथा कौन नगरी है? इसके उत्तरमें ब्राह्मणने कहा कि यह अङ्गदेश है और यह तीन लोकमें प्रसिद्ध चम्पा नगरी है। इसे क्या तुम नहीं जानते? अरे महाविद्वन्! क्या तुम यहाँ आकाशसे पड़े हो?॥११६-११७॥ इसके उत्तरमें वसुदेवने कहा कि हे ब्राह्मण! आपने बिलकुल ठीक जाना। क्या आप ज्योतिष जानते हैं? आपका ज्ञान संवादी—यथार्थज्ञान है। अहा! जिन-शासन अन्यथा नहीं हो सकता ॥११८॥ रूपके लोभसे दो यक्ष कुमारियाँ मुझे हरकर ले गई थीं; उनका आपसमें झगड़ा होने लगा और मैं छूटकर आकाशसे पृथिवीपर गिरा हूँ ॥११९॥ यह उत्तर देकर विशाल नेत्रोंके धारक वसुदेवने ब्राह्मणका वेष रख गन्धर्वनगरीके समान उस चम्पापुरीमें प्रवेश किया ॥१२०॥ वहाँ उन्होंने जहाँ-तहाँ वीणा हाथमें लिये मनुष्योंको देखकर एक ब्राह्मणसे पूछा कि ये लोग इधर-उधर क्यों घूम रहे हैं? ॥१२१॥

ब्राह्मणने कहा कि इस नगरीमें कुबेरके समान वैभव वाला एक चारुदत्त नामका सेठ रहता है उसकी गन्धर्वसेना नामकी पुत्री है। वह पुत्री सौन्दर्यके गर्वसे युक्त है, गन्धर्व शास्त्रमें अत्यन्त निपुण है तथा उसने यह नियम किया है कि जो मुझे गन्धर्वशास्त्र-संगीतशास्त्रमें जीतेगा वही मेरा पति होगा ॥१२२-१२३॥ लोभसे प्रेरित, वीणा बजानेमें निपुण, तथा नाना-

१. खेटस्यैवात्र म० । २. समर्पितः म०, ग०, ङ० ।

रूपलावण्यसौभाग्यसागरप्लवकारिणी । [1]हारिणी हरिणीनेत्रा कन्या [2]व्यामोहयज्जगत् ॥१२५॥
कन्यार्थी च यशोऽर्थी च वीणाविधिविशारदः । ब्राह्मणः क्षत्रियो वैश्यो जयार्थी हि जनः स्थितः ॥१२६॥
मासे मासे समाजश्च भवत्यत्र कलाविदाम् । सदा जयपताकाया हर्त्री कन्या सरस्वती ॥१२७॥
समाजः समतीतश्च ह्यस्तनेऽहनि साम्प्रतम् । गुणनैकमनस्कानां पुनर्मासेन जायते ॥१२८॥
उपाध्यायः प्रसिद्धोऽत्र किन्नामा साम्प्रतं पुरि । वदेति तेन पृष्टश्च जगौ सुग्रीव इत्यसौ ॥१२९॥
ऊचे गत्वेति सुग्रीवमभिवाद्य गृहीव सः । गौतमो गोत्रतस्तेऽहं कर्तुमिच्छामि शिष्यताम् ॥१३०॥
अभिरूपोऽतिमुग्धोऽयमिति मत्वा दयावता । प्रतिपन्नश्च तत्रास्थाद्वीणया [3]हासयन् जनम् ॥१३१॥
सम्प्राप्ते दिवसे तस्मिन् समाजोऽभूत्स पूर्ववत् । वसुदेवोऽपि संविश्य पश्यति स्म महाजनम् ॥१३२॥
सा चुक्षोभ सभा लोकैर्वाद्यश्रवणवेदिभिः । कौतूहलिभिरन्यैश्च महाकोलाहलाकुलैः ॥१३३॥
ततः कन्या सभामध्यमविशद्विशदप्रभा । स्वलंकृता दिवो मध्यं प्रावृषीव [4]शतह्रदा ॥१३४॥
वीणावाद्यविदग्धेषु जितेषु बहुषु क्रमात् । गन्धर्वसेनया यद्वन्मूर्तगान्धर्वविद्यया ॥१३५॥
वसुदेवः समासीनस्ततः सोऽपि वरासने । [5]समानीताः समानीताः वीणाः स समदूषयत् ॥१३६॥
सुघोषाख्यां ततो वीणां दत्तां गन्धर्वसेनया । सुसप्तदशतन्त्रीकां सन्ताड्य मुदितोऽवदत् ॥१३७॥
साध्वी साध्वी सुवीणेयं प्रवीणे ! दोषवर्जिता । वद गान्धर्वसेने ! ते गेयवस्तु मनीषितम् ॥१३८॥

देशोंसे आये हुए ये लोग उसी कन्याके लिए यहाँ इकट्ठे मिले हैं ॥१२४॥ रूप लावण्य और सौभाग्यके सागरमें तैरनेवाली इस मृगनेत्री मनोहर कन्याने समस्त संसारको व्यामोहित कर रक्खा है ॥१२५॥ यहाँ जो भी ब्राह्मण, क्षत्रिय अथवा वैश्य रहता है वह कन्याका अर्थी, यशका अर्थी, वीणा बजानेमें निपुण और विजयका अभिलाषी है ॥१२६॥ यहाँ एक-एक महीनेमें कलाके जानकार मनुष्योंकी सभा जुड़ती है जिससे सदा जयपताकाको हरनेवाली यही कन्यारूपी सरस्वती रहती है—सदा इसीकी जीत होती है ॥१२७॥ पिछले दिन ही यहाँ गुणी मनुष्योंकी सभा जुड़ी थी अब एक माह बाद फिरसे होगी ॥१२८॥ यह सुन वसुदेवने उस ब्राह्मणसे पूछा कि इस नगरीमें संगीतका प्रसिद्ध विद्वान् कौन है ? यह कहो ? इसके उत्तरमें ब्राह्मणने कहा कि इस समय सुग्रीव संगीतका सबसे अधिक प्रसिद्ध विद्वान् है ॥१२९॥

तदनन्तर वसुदेव घरके लोगोंकी तरह सुग्रीवके पास चले गये और उसे नमस्कार कर बोले कि मैं गौतम गोत्री हूँ तथा आपकी शिष्यता करना चाहता हूँ ॥१३०॥ यह परम सुन्दर तथा भोला-भाला है यह मानकर सुग्रीवने दयापूर्वक उन्हें स्वीकार कर लिया—अपना शिष्य बना लिया। और वे अपनी उलटी-सीधी वीणासे सबको हँसाते हुए वहाँ रहने लगे ॥१३१॥ दिन आनेपर पहलेकी भाँति फिरसे विद्वानोंकी सभा हुई; वसुदेव भी उस सभामें प्रविष्ट होकर विशाल जन-समूहको देखने लगे ॥१३२॥ वह सभा बाजा सुननेकी कलासे युक्त तथा बहुत भारी कोलाहल करनेवाले अन्य कौतूहली मनुष्योंसे क्षोभको प्राप्त हो रही थी ॥१३३॥ तदनन्तर जिस प्रकार वर्षाऋतुमें बिजली आकाशके मध्यमें प्रवेश करती है उसी प्रकार निर्मल कान्तिकी धारक एवं उत्तमोत्तम आभूषणोंसे अलंकृत कन्याने सभाके मध्यमें प्रवेश किया ॥१३४॥ मूर्तिमती गन्धर्व विद्याके समान कन्या गन्धर्वसेनाके द्वारा जब क्रम-क्रमसे वीणा बजानेमें निपुण बहुतसे विद्वान् जीत लिये गये तब वसुदेव भी उत्तम आसनपर आसीन हुए। उस समय वसुदेवको अनेक वीणाएँ दी गईं पर उन सबको दोषयुक्त बता दिया ॥१३५-१३६॥ अन्तमें गन्धर्वसेनाने अपनी सुघोषा नामकी सत्तरह तारोंवाली वीणा उन्हें दी। उसे बजाकर वे प्रसन्न होते हुए बोले कि यह

१. हरिणी म० । २. व्यमोहयजगत् म० । ३. हासयज्जनम् म० । ४. विद्युत् । ५. समानीताः समानीतां वीणाः म० ।

मृद्ररूपवीणयाम्येषामादेशस्थानमग्रतः । विदुषां दीयतां मेऽद्य गेयवस्तुनि पण्डिते ॥१३९॥
साऽऽह विष्णुकुमारस्य बलिबन्धनकारिणः । त्रिविक्रमकृतौ गीतं हाहातुम्बुरुनारदैः ॥१४०॥
यत्तदद्य त्वया वस्तु वाद्यतां वाद्यविद् यदि । पुराणप्रतिबद्धं हि गेयवस्तु प्रशस्यते ॥१४१॥
[1]ततं चाप्यवनद्धं च घनं सुषिरमित्यपि । यथास्वं लक्षणैर्युक्तमातोद्यं स्याच्चतुर्विधम् ॥१४२॥
ततं तन्त्रीगतं तेषामवनद्धं हि पौष्करम् । घनं तालस्ततो वंशस्तथैव सुषिराख्यया ॥१४३॥
प्राणिप्रीतिकरं प्रायः श्रवणेन्द्रियतर्पणात् । गान्धर्वदेहसम्बद्धं ततं गान्धर्वमीरितम् ॥१४४॥
वीणा वंशश्च गानं च तस्य योनिरितीरितम् । गान्धर्वं त्रिविधं चैतत्स्वरतालपदे गतम् ॥१४५॥
वैणाश्चापि च शारीरा द्विविधास्तु स्वराः स्मृताः । विधानं लक्षणं चापि तेषामिति निरूपितम् ॥१४६॥
अति[श्रुति]वृत्तिस्वरग्रामवर्णालङ्कारमूर्च्छनाः । धातुसाधारणाद्याश्च[2] दारुवीणास्वराः स्मृताः ॥१४७॥
जातिवर्णस्वरग्रामस्थानसौधारण[साधारण][3]क्रियाः । सालङ्कारविधिश्चायं शारीरस्वरगोचरः ॥१४८॥
अति[जाति]तद्धितवृत्तानि सन्धिस्वरविभक्तयः । नामाख्यातोपसर्गाद्या वर्णाद्यास्ते पदे विधिः ॥१४९॥
[4]आवापश्चापि[5] निःक्रामो[6] विक्षेपश्च[7] प्रवेशनम्[8] । शम्याताल[9] परावर्त्तः[10] सन्निपातः[11] सवस्तुकः[12] ॥१५०॥

वीणा बहुत अच्छी है, बहुत अच्छी है, हे चतुरे! यह वीणा निर्दोष है। हे गन्धर्वसेने! कह तुझे कौन-सी गेय वस्तु पसन्द है? तू गेय वस्तुओंमें पण्डित है अतः मुझे आदेश दे मैं इन विद्वानोंके आगे कोमल-कान्त वीणा बजाता हूँ ॥१३७–१३९॥ इसके उत्तरमें गन्धर्वसेनाने कहा कि बलिको बाँधनेवाले विष्णुकुमार मुनिने जब अपनी तीन डगोंका कर्तव्य दिखाया था तब हाहा, तुम्बुरु तथा नारदने जो गेय वस्तु गाई थी यदि आप वाद्य विद्याके जानकार हैं तो वही वस्तु आज बजाइए क्योंकि पुराणसे सम्बन्ध रखनेवाली गेय वस्तु ही प्रशंसनीय होती है ॥१४०–१४१॥ गन्धर्वसेनाका आदेश पाकर वसुदेव संगीत विद्याका निम्नप्रकार वर्णन करने लगे—

१ तत, २ अवनद्ध, ३ घन और ४ सुषिरके भेदसे बाजे चार प्रकारके हैं। ये सभी बाजे यथायोग्य अपने-अपने लक्षणोंसे युक्त हैं ॥१४२॥ जो तारसे बजते हैं ऐसे वीणा आदि तत कहलाते हैं। जो चमड़ेसे मढ़े जाते हैं ऐसे मृदङ्ग आदि अवनद्ध कहलाते हैं। काँसेके झाँझ, मजीरा आदि घन कहलाते हैं और बाँसुरी आदिको सुषिर कहते हैं ॥१४३॥ इनमें तत नामका वादित्र कर्ण इन्द्रियको तृप्त करनेवाला होनेसे प्रायः प्राणियोंके लिए अधिक प्रीति उपजानेवाला है तथा गन्धर्व शरीरके साथ सम्बद्ध होनेसे गान्धर्व नामसे प्रसिद्ध है ॥१४४॥ गान्धर्वकी उत्पत्तिमें वीणा, वंश और गान ये तीन कारण हैं तथा स्वरगत, तालगत और पदगतके भेदसे वह तीन प्रकारका माना गया है ॥१४५॥ वैण और शारीरके भेदसे स्वर दो प्रकारके माने गये हैं और उनके भेद तथा लक्षण इस प्रकार कहे गये हैं ॥१४६॥ श्रुति, वृत्ति, स्वर, ग्राम, वर्ण, अलंकार, मूर्च्छना, धातु और साधारण आदि वैण स्वर माने गये हैं और जाति, वर्ण, स्वर, ग्राम, स्थान, साधारण क्रिया और अलंकार विधि ये शारीर स्वरके भेद कहे गये हैं ॥१४७–१४८॥ जाति, तद्धित, छन्द, सन्धि, स्वर, विभक्ति, सुबन्त, तिङन्त, उपसर्ग तथा वर्ण आदि पदगत गान्धर्वकी विधि हैं और आवाप, निष्क्राम, विक्षेप, प्रवेशन, शम्याताल, परावर्त, सन्निपात, सवस्तुक

---

१. ततं चैवावनद्धं च घनं सुषिरमेव च । चतुर्विधन्तु विज्ञेयमातोद्यं लक्षणान्वितम् ॥१॥
ततं तन्त्रीगतं ज्ञेयमवनद्धन्तु पौस्करम् । घनं तालस्तु विज्ञेयः सुषिरो वंश उच्यते ॥२॥
नाट्य-शास्त्र अध्याय २८

२. 'ज्याश्च' ख० पुस्तके । ३. सौधरणक्रियाः ख०, म० । सौवारण- क० । ४. आवायश्चापि म०, घ० । ५. तालप्रक्षेपः आवापः । ६. तालनिष्कासनं क्रमः । ७. तिर्यक्चालनं विक्षेपः । ८. पुनस्तत्र प्रवेशः प्रवेशनम् । ९. उभयोस्तालयोः सदृशी शब्दवृत्तिः शम्यातालम् । १०. वामहस्तेन दक्षिणतालास्ताटनं परावर्तः । ११. संनिपातः शब्दसाम्यम् । १२. सवस्तुकः सलघुकः ।

मन्त्राविदार्यंगलया[मात्राविदार्याङ्गलया]गतिप्रकरणं यतिः ।
गीती च मार्गावयवाः पादभागाः सपाणयः ॥१५१॥
द्वाविंशतिप्रमाणोऽयं विधिस्तालगतस्तदा । गन्धर्वसंग्रहस्तत्र प्रयुक्तस्तेन विस्तरः ॥१५२॥
[1]षड्जश्चाप्यृषभश्चैव गान्धारो मध्यमोऽपि च । पञ्चमो धैवतश्च स्यान्निषादः सप्तमः स्वरः ॥१५३॥
वादी चापि च संवादी तौ विवाद्यनुवादिनौ । प्रयुक्ता वसुदेवेन चत्वारोऽमी यथाक्रमम् ॥१५४॥
संवादो मध्यमग्रामे पञ्चमस्यर्षभस्य च । षड्जग्रामे च षड्जस्य संवादः पञ्चमस्य च ॥१५५॥
षड्जश्चतुःश्रुतिश्च स्यादृषभस्त्रिश्रुतिस्तथा । गान्धारो द्विश्रुतिश्चैव मध्यमश्च चतुःश्रुतिः ॥१५६॥
चतुर्भिः पञ्चमश्चैव द्विश्रुतिर्धैवतस्तथा । त्रिश्रुतिश्च निषादोऽपि षड्जग्रामे स्वरास्त्वमी ॥१५७॥
चतुःश्रुतिश्च विज्ञेयो मध्यमे मध्यमाश्रयः । द्विश्रुतिश्चैव गान्धार ऋषभस्त्रिश्रुतिः स्मृतः ॥१५८॥
षड्जश्चतुःश्रुतिश्चैव निषादो द्विश्रुतिस्तथा । धैवतस्त्रिश्रुतिर्ज्ञेयः पञ्चमस्त्रिश्रुतिस्तथा ॥१५९॥
द्वाविंशतिस्त्विमा वेद्याः श्रुतयोऽत्र निदर्शनात् । द्वैग्रामिक्यस्तथैव स्युर्मूर्च्छनास्तु चतुर्दश ॥१६०॥
आदावुत्तरमन्द्रा स्याद् रजनी चोत्तरायता । चतुर्थी शुद्धषड्जा तु पञ्चमी मत्सरीकृता ॥१६१॥

मात्रा, अविदार्य, अङ्ग, लय, गति, प्रकरण, यति, दो प्रकारकी गीति, मार्ग, अवयव, पादभाग और सपाणि । ये तालगत गान्धर्वके बाईस[2] प्रकार हैं । इस प्रकार गान्धर्व (तत) वाद्यका जितना विस्तार है वसुदेवने उस सबका प्रयोग किया अर्थात् तदनुसार वीणा बजाई ॥१४९-१५२॥ दूसरी तरहसे स्वर १ षड्ज, २ ऋषभ, ३ गान्धार, ४ मध्यम, ५ पञ्चम, ६ धैवत और ७ निषादके भेदसे सात प्रकारके हैं[3] । इन स्वरोंके प्रयोग करनेके वादी[4], संवादी[5], विवादी और अनुवादी ये चार प्रकार हैं सो वसुदेवने इन चारों प्रकारोंका यथाक्रमसे प्रयोग किया ॥१५३-१५४॥ मध्यम ग्राममें पञ्चम और ऋषभ स्वरका तथा षड्ज ग्राममें षड्ज तथा पञ्चम स्वरका संवाद होता है ॥१५५॥ षड्ज[6] ग्रामके षड्ज स्वरमें चार, ऋषभमें तीन, गान्धारमें दो, मध्यममें चार, पञ्चममें चार, धैवतमें दो और निषादमें तीन श्रुतियाँ होती हैं[7] ॥१५६-१५७॥ मध्यम ग्रामके मध्यम स्वरमें चार, गान्धारमें दो, ऋषभमें तीन, षड्जमें चार, निषादमें दो, धैवतमें तीन और पञ्चममें तीन श्रुतियाँ[8] होती हैं ॥१५८-१५९॥ इस प्रकार षड्ज और मध्यम—दोनों ग्रामोंमें प्रत्येककी बाईस-बाईस श्रुतियाँ होती हैं एवं उक्त दोनों ग्रामोंकी मिलकर चौदह मूर्च्छनाएँ कही गई हैं॥१६०॥ इनमें पहली उत्तरभद्रा, दूसरी रजनी, तीसरी उत्तरायता, चौथी शुद्धषड्जा, पाँचवीं मत्सरीकृता,

---

१. खड्गश्चापि म० । २. आवापस्त्वथ निष्कामो विक्षेपश्च प्रवेशकः । शम्यातालः सन्निपातः परिवर्तः सवस्तुकः ॥१५॥ मात्राविदार्यङ्गलया यतिः प्रकरणं तथा । गीतयोऽवयवा मार्गा पादभागाः सपाणयः । इत्येकविंशको ज्ञेयो विधिस्तालगतो बुधैः ॥१६॥ नाट्यशास्त्र अध्याय २८ । ३. षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा । पञ्चमो धैवतश्चैव निषादः सप्त च स्वराः ॥१९॥ चतुर्विधत्वमेतेषां विज्ञेयं श्रुतियोगतः । वादी चैवाथ संवादी अनुवादी विवाद्यपि ॥२०॥ ४. 'रागोत्पादनशक्तेर्वदनं तद्योगतो वादी' । वादी राजा स्वरस्तस्य संवादी स्यादमात्यवत् । शत्रुर्विवादी तस्य स्यादनुवादी तु भृत्यवत् ॥ ५. श्रुतयोऽष्टौ द्वादश वा भवन्ति मध्ये ययोः स्वरयोः । संवादिनौ तु कथितौ परस्परं निषादगान्धारौ (॥ संगीतदर्पणे १-६-६६ ॥) ६. ग्रामः स्वराणां समूहः स्यान्मूर्च्छनादेः समाश्रयः । तौ द्वौ धरातले तत्र स्यात् षड्जग्राम आदिमः ॥ द्वितीयो मध्यमग्रामः (संगीतमहोदधौ १-७-५) ७. षड्जश्चतुश्रुतिर्ज्ञेय ऋषभस्त्रिश्रुतिः स्मृतः । द्विश्रुतिश्चापि गान्धारो मध्यमश्च चतुःश्रुतिः ॥२३॥ चतुःश्रुतिः पञ्चमः स्यात् त्रिश्रुतिर्धैवतस्तथा । द्विश्रुतिस्तु निषादः स्यात् षड्जग्रामे स्वरान्तरे ॥२४॥ ना. शा. अ. २८ । ८. चतुःश्रुतिस्तु विज्ञेयो मध्यमः पञ्चमः पुनः । त्रिश्रुतिर्धैवतस्तु स्याच्चतुःश्रुतिक एव च ॥२५॥ निषादषड्जौ विज्ञेयौ द्विचतुःश्रुतिसम्भवौ । ऋषभस्त्रिश्रुतिश्च स्यात् गान्धारो द्विश्रुतिस्तथा ॥२६॥ ना. शा. अ. २८॥

अश्वक्रान्ता तथा षष्ठी सप्तमी चाभिरुद्गता । षड्जग्रामाश्रिता ह्येता विज्ञेयाः सप्त मूर्च्छनाः ॥१६२॥
सौवीरी हरिणाश्वा च स्यात्कलोयवना[कलोपनता] तथा । शुद्धमध्यमसंज्ञा च मार्गवी पौरवी तथा १६३॥
रिष्यका[हृष्यका]सप्तमी चेति मूर्च्छनाः सप्त वर्णिताः । मध्यमग्रामसम्भूता बोद्धव्या बुधसत्तमैः ॥१६४॥
षड्जेनोत्तरमन्द्रा स्यादृषभेनाभिरुद्गता । अश्वक्रान्ता तु गान्धारे मध्यमे मत्सरीकृता ॥१६५॥
पञ्चमे शुद्धषड्जा स्याद्धैवते चोत्तरायता । निषादे रजनी ज्ञेया इत्येताः सप्त मूर्च्छनाः ॥१६६॥
मध्यमग्रामजाश्चापि मध्यमे गन्धरर्षभैः । षड्जेन च निषादेन धैवतेन च मूर्च्छनाः ॥१६७॥
पञ्चमेन च विज्ञेया सौवीर्याद्या यथाक्रमम् । रिष्यकान्ता[हृष्यकान्ता]इतीमाश्च ताश्चतुर्दश मूर्च्छनाः॥१६८॥
षट्पञ्चैकस्वरास्तानाः[षट्पञ्चकस्वरास्तासां]षाडवौडवसंश्रयाः ।
साधारणकृताश्चैव काकलीसमलङ्कृताः ॥१६९॥
आन्तरस्वरसंयुक्ता मूर्च्छना ग्रामयोर्द्वयोः । द्विधैकमूर्च्छनासिद्धिर्यथायोगमुदाहृता ॥१७०॥
तानाश्चतुरशीतिः स्युः पञ्चषट्स्वरसम्भवाः । ते पञ्चत्रिंशदेकान्नपञ्चाशच्च यथाक्रमम् ॥१७१॥

छठवीं अश्वक्रान्ता और सातवीं आभिरुद्गता ये सात षड्ज ग्रामकी मूर्च्छनाएँ हैं[1] ॥१६१-१६२॥ और पहली सौबीरी, दूसरी हरिणाश्वा, तीसरी कलोपनता, चौथी शुद्धमध्यमा, पाँचवीं मार्गवी, छठवीं पौरवी और सातवीं रिष्यका (हृष्यका) ये सात मूर्च्छनाएँ[2] मध्यम ग्राममें विद्वज्जनोंके द्वारा जानने योग्य हैं ॥१६३-१६४॥ षड्ज स्वरमें उत्तरमन्द्रा, ऋषभमें आभिरुद्गता, गान्धारमें अश्वक्रान्ता, मध्यममें मत्सरीकृता, पञ्चममें शुद्ध षड्जा, धैवतमें उत्तरायता और निषादमें रजनी मूर्च्छना होती है। ये मूर्च्छनाएँ षड्जग्राम सम्बन्धिनी हैं ॥१६५-१६६॥ अब मध्यम[3] ग्राम सम्बन्धिनी मूर्च्छनाएँ कहते हैं। मध्यम ग्रामके मध्यम, गान्धार, ऋषभ, षड्ज, निषाद, धैवत और पञ्चम स्वरमें क्रमसे सौवीरीको आदि लेकर हृष्यका तक सात मूर्च्छनाएँ होती हैं अर्थात् मध्यममें सौवीरी, गान्धारमें हरिणाश्वा, ऋषभमें कलोपनता, षड्जमें शुद्धमध्यमा, निषादमें मार्गवी, धैवतमें पौरवी और पञ्चममें हृष्यका मूर्च्छना होती है। इस प्रकार दोनों ग्रामोंकी ये चौदह मूर्च्छनाएँ हैं[5] ॥१६७-१६८॥ इन चौदह मूर्च्छनाओंके षाडव, औडव, साधारण-कृत और काकलीके भेदसे चार-चार स्वर होते हैं। इस तरह इनके छप्पन स्वर हो जाते हैं। जिसकी उत्पत्ति छह स्वरोंसे होती है उसे षाडव और जिसकी पाँच स्वरोंसे उत्पत्ति होती है उसे औडव कहते हैं[6] ॥१६९॥ षड्ज मध्यम इन दोनों ग्रामोंकी मूर्च्छनाएँ अनन्तर स्वरसे भी संयुक्त होती हैं तथा इनका यथायोग्य मेल होनेपर एक मूर्च्छना दो रूप हो जाती है इसकी सिद्धि भी बताई गई है[7] ॥१७०॥ तान चौरासी प्रकारकी हैं इनमें पाँच स्वरोंसे उत्पन्न होनेवाली पैंतीस और छह स्वरोंसे उत्पन्न

---

१. आद्या ह्युत्तरमन्द्रा स्याद् रजनी चोत्तरायता । चतुर्थी शुद्धषड्जा तु पञ्चमी मत्सरीकृता ॥२७॥ अश्वक्रान्ता तु षष्ठी स्यात् सप्तमी चाभिरुद्गता । षड्जग्रामाश्रिता एता विज्ञेयाः सप्तमूर्च्छनाः ॥२८॥ नाट्य-शास्त्र अध्याय २८ । २. सौवीरी हरिणाश्वा च स्यात् कलोपनता तथा । चतुर्थी शुद्धमध्या तु मार्गवी पौरवी तथा ॥२९॥ हृष्यका चैव विज्ञेया सप्तमी द्विजसत्तमाः । मध्यमग्रामजा ह्येता विज्ञेयाः सप्त मूर्च्छनाः ॥ ३० ॥ ना० शा० अ० २८ । ३. तत्र षड्जग्रामे—षड्जेनोत्तरमन्द्रा, निषादेन रजनी, धैवतेनोत्तरायता, पञ्चमेन शुद्धषड्जा, मध्यमेन मत्सरीकृता, गान्धारेणाश्वक्रान्ता, ऋषभेणाभिरुद्गता इति । ना० शा० पृ० ३२० । ४. अथ मध्यमग्रामे—मध्यमेन सौवीरी, गान्धारेण हरिणाश्वक्रान्ता, ऋषभेण कलोपनता, षड्जेन शुद्धमध्यमा, निषादेन मार्गी, धैवतेन पौरवी, पञ्चमेन हृष्यका इति ना० शा० पृ० ३२० । ५. एवमेताः क्रमयुताः षट्पञ्चाशत् स्वराः स्मृताः । षाडवोडवितसंज्ञिताः पूर्णाः साधारणकृताश्चेति चतुर्विधाश्चतुर्दशमूर्च्छनाः । ना० शा० पृ० ३२० । ६. षट्पञ्चकस्वरास्तासां षाडवोडुवितस्मृताः । साधारणकृताश्चेति काकली संमलं कृताः ॥ ७. अन्तरस्वरसंयुक्ता मूर्च्छना ग्रामयोर्द्वयोः ॥३२॥ द्विविधैकमूर्च्छनासिद्धिः इत्यादि व्याख्यानेन नाट्यशास्त्रस्य ३२० पृष्ठे स्पष्टीकृतम् ।

अन्तरस्वरसंयोगो नित्यमारोहिसंश्रयः । कार्योऽह्यल्पविशेषेण नावरोही कदाचन ॥१७२॥
क्रियमाणोऽवरोही स्यादल्पो वा यदि वा बहु ।
याति रागं श्रुतिश्चैव नयते स्वं ततः स्वरः[जातिरागं श्रुतिञ्चैव नयते त्वन्तरस्वरः] ॥१७३॥
षाड्जी स्यादार्षभी चैव धैवत्यथ निषादजा ।
सुषड्जा दिव्य[सुषड्जोदीच्य]वा चैव तया वै षड्जकैशिकी ॥१७४॥
षड्जमध्या तथा चैव षड्जग्रामसमाश्रया । जातयोऽष्टौदशोद्दिष्टा मध्यमग्रामजाश्रिताः ॥१७५॥
गान्धारी मध्यमा चैव गान्धारी दिव्यवा[गान्धारोदीच्यवा]तथा ।
पञ्चमो रक्तगान्धारी तथाऽन्या रक्तपञ्चमी ॥१७६॥
मध्यमोदिव्यवा[मध्यमोदीच्यवा]चैव नन्दयन्ती तथैव च ।
कर्मारवी च विज्ञेया तथान्ध्री कैशिकी तथा ॥१७७॥
स्वरसाधारणगतास्तिस्रो ज्ञेयास्तु जातयः । मध्यमा षड्जमध्या च पञ्चमी चेति सूरिभिः ॥१७८॥
ताश्चापि द्विविधाः शुद्धा विकृताश्च प्रकीर्त्तिताः । अपरस्परनिष्पन्ना ज्ञेयाश्चैव तु जातयः ॥१७९॥
अपृथग्लक्षणैर्युक्ता द्वैग्रामिक्यः स्वरप्लुताः । चतस्रो जातयो नित्यं ज्ञेयाः सप्तस्वरा बुधैः ॥१८०॥
चतस्रः षट्स्वराश्चान्या दश पञ्चस्वराः स्मृताः । मध्यमोदीच्यवा चैव तथा वै षड्जकैशिकी ॥१८१॥

होनेवाली उनचास हैं[1] ॥१७१॥ अन्तर स्वरका संयोग सदा आरोही अवस्थामें ही करना चाहिए अवरोही अवस्थामें थोड़ा या बहुत किसी भी रूपमें कभी भी नहीं करना चाहिए ॥१७२॥ क्योंकि यदि अवरोही अवस्थामें थोड़ा या बहुत अन्तर स्वरका संयोग किया जाता है तो उस समय अन्तर स्वर जातिके राग और श्रुति दोनोंको समाप्त कर देता है[2] ॥१७३॥ अब दोनों ग्रामोंकी जातियोंका वर्णन करते हैं, उनमें षड्ज ग्रामसे सम्बन्ध रखनेवाली १ षाड्जी, २ आर्षभी, ३ धैवती, ४ निषादजा, ५ सुषड्जा, ६ उदीच्यवा, ७ षड्जकैशिकी और ८ षड्जमध्या ये आठ जातियाँ हैं एवं नीचे लिखी दश जातियाँ मध्यमग्रामके आश्रित हैं—१ गान्धारी, २ मध्यमा ३ गान्धारोदीच्यवा, ४ पञ्चमी, ५ रक्तगान्धारी, ६ रक्तपञ्चमी, ७ मध्यमोदीच्यवा, ८ नन्दयन्ती, ९ कर्मारवी, १० आन्ध्री, ११ कैशिकी । दोनों ग्रामोंकी मिलाकर अठारह जातियाँ होती हैं[3] ॥१७४-१७७॥ इन जातियोंमें मध्यमा, षड्जमध्या और पञ्चमी ये तीन जातियाँ साधारण स्वरगत हैं[4] ॥१७८॥ ये जातियाँ शुद्ध और विकृतके भेदसे दो प्रकारकी कही गई हैं। जो परस्परमें मिलकर उत्पन्न नहीं हुई हैं तथा पृथक्-पृथक् लक्षणोंसे युक्त हैं वे शुद्ध कहलाती हैं और जो समान लक्षणोंसे युक्त हैं वे विकृत कहलाती हैं। विकृत जातियाँ दोनों ग्रामोंकी जातियोंसे मिलकर बनती हैं तथा दोनोंके स्वरोंसे आप्लुत रहती हैं। इन जातियोंमें चार जातियाँ सात स्वरवाली, चार जातियाँ छह स्वरवाली और शेष दश जातियाँ पाँच स्वरवाली कही गई हैं। मध्यमोदीच्यवा, षड्जकैशिकी, कर्मारवी और गान्धारपञ्चमी ये चार जातियाँ सात स्वरवाली हैं।

---

१. तत्र मूर्च्छनातानाश्चतुरशीतिः । तत्रैकोनपञ्चाशत् षट्स्वराः, पञ्चत्रिंशत् पञ्चस्वराः । नाट्यशास्त्र पृ० ३२० 'मूर्च्छना एव तानाः स्युः शुद्धा आरोहणाश्च ताः' । (नारदपुराणे) 'विस्तार्यन्ते प्रयोगाय मूर्च्छनाः शेषसंश्रयाः । तानास्तेपूनपञ्चाशत् सप्तस्वरसमुद्भवाः' ॥ (संगीतदामोदरे १-३५) ।
२. अन्तरस्वरसंयोगो नित्यमारोहिसंश्रयः । कार्यस्त्वल्पो विशेषेण नावरोही कदाचन ॥ क्रियमाणोऽवरोही स्यादल्पो वा यदि वा बहु । जातिरागं श्रुतिश्चैव नयन्ते त्वन्तरे स्वराः ॥३५॥ नाट्यशास्त्र अध्याय २८ ।
३. नाट्यशास्त्रे तु षड्जग्रामाश्रिताः सप्त, मध्यमग्रामाश्रितास्त्वेकादश जातयो निर्दिष्टाः । (श्लोका अष्टाविंशाध्याये ३६-४२) । ४. स्वरसाधारणगतास्तिस्रो ज्ञेयास्तु जातयः । मध्यमा पञ्चमी चैव षड्जमध्या तथैव च ॥३६॥ ना० शा० अ० २८ ।

कर्मारवी च सम्पूर्णा तथा गान्धारपञ्चमी । षड्जान्ध्री नन्दयन्ती च गान्धारोदीच्यवा तथा ॥१८२॥
चतस्रः षट्स्वरा ह्येताः शेषाः पञ्चस्वरा दश । नैषादी[1] वार्षभी चैव धैवती षड्जमध्यमा ॥१८३॥
षड्जोदीच्यवती चैव पञ्च षड्जाश्रया स्मृताः । गान्धारी रक्तगान्धारी मध्यमा पञ्चमी तथा ॥१८४॥
कैशिकी चेति विज्ञेया पञ्चैता मध्यमाश्रयाः । यास्ताः पञ्चस्वरा ज्ञेया याश्चैताः षट्स्वराः स्मृताः ॥
कदाचित्[2] षाडवीभूताः कदाचिच्चौडवीकृताः । [3]षड्जग्रामेऽपि[4] सम्पूर्णा विज्ञेया बहु[षड्ज]कैशिकी ॥१८६
[5]षट्स्वराश्चैव विज्ञेया षड्जे ता गानयोगतः । [6]सम्पूर्णा मध्यमग्रामे ज्ञेया कर्मारवी तथा ॥१८७॥
गान्धारपञ्चमी चैव मध्यमोदीच्यवा तथा । पुनश्च षट्स्वरोपेता गान्धारोदीच्यवा तथा ॥१८८॥
आन्ध्री च नन्दयन्ती च मध्यमग्रामसंश्रयाः । [7]एवमेता बुधैर्ज्ञेया द्वैग्रामिक्यो हि जातयः ॥१८९॥
[8]षट्स्वरे सप्तमस्त्वंशो नेष्यते षड्जमध्यमः । संवादिलोपाद् गान्धारस्तत्रैव न विशिष्यते ॥१९०॥
गान्धारी रक्तगान्धारी कैशिकीनां च पञ्चमः । षड्जायाश्चैव गान्धारी मानसं विद्धि षाडवम् ॥१९१॥
षाडवे धैवतो नास्ति षड्जोदीच्या वियोगतः । संवादिलोपात्सप्तैताः षट्स्वरेण विवर्जिताः ॥१९२॥
आसां तु रक्तगान्धार्याः षड्जमध्यमपञ्चमाः । सप्तमश्चैव विज्ञेयो येषु नौडवितं भवेत् ॥१९३॥
द्वौ षड्जमध्यमावंशौ गान्धारोऽथ निषादवान् । ऋषभश्चैव पञ्चम्याः कैशिक्याश्चैव धैवतः ॥१९४॥

षड्जा, आन्ध्री, नन्दयन्ती और गान्धारोदीच्यवा ये चार जातियाँ छह स्वरवाली हैं और शेष दश जातियाँ पाँच स्वरवाली हैं । नैषादी, आर्षभी, धैवती, षड्जमध्यमा और षड्जोदीच्यवती ये पाँच जातियाँ षड्जग्रामके आश्रित हैं और गान्धारी, रक्तगान्धारी, मध्यमा, पञ्चमी तथा कैशिकी ये पाँच मध्यमग्रामके आश्रित हैं । इन जातियोंमें जो पाँच स्वरवाली (ओडव) और छह स्वरवाली (षाडव) जातियाँ कही गई हैं वे कदाचित् क्रमसे षाडव (छह स्वरवाली) और ओडव (पाँच स्वरवाली) हो जाती हैं । षड्जग्राममें सात स्वरवाली षड्जकैशिकी जाति होती है और गानके योगसे छह स्वरवाली भी होती है । मध्यमग्राममें सात स्वरवाली कर्मारवी, गान्धारपञ्चमी और मध्यमोदीच्यवा होती हैं और छह स्वरवाली गान्धारोदीच्यवा, आन्ध्री एवं नन्दयन्ती जातियाँ होती हैं । इस तरह विद्वानोंके द्वारा ये दोनों ग्रामोंकी जातियाँ जानने योग्य हैं ॥१७६-१८९॥ जहाँ छह स्वर होते हैं वहाँ षड्जमध्यम स्वर उसका सप्तांश नहीं होता और संवादिका लोप हो जानेसे वहाँ गान्धारस्वर विशेषताको प्राप्त नहीं होता ॥१९०॥ गान्धारी, रक्तगान्धारी, कैशिकी और षड्जामें पञ्च स्वर नहीं होता तथा षाडवको गान्धारीका हृदय जानना चाहिए ॥१९१॥ षाडवमें धैवत स्वर नहीं रहता क्योंकि वहाँ षड्जोदीच्यवा जातिका वियोग हो जाता है । एवं ये सात जातियाँ संवादीका अभाव होनेसे छह स्वरोंसे वर्जित रहती हैं ॥१९२॥ इनमेंसे रक्तगान्धारी जातिमें षड्ज मध्यम और पञ्चमस्वर सप्तमस्वर रूप हो जाते हैं तथा इनमें औडवित नहीं रहता ॥१९३॥ षड्ज, मध्यम, गान्धार, निषाद और ऋषभ ये पाँच अंश पञ्चमी जातिमें रहते हैं और कैशिकीमें धैवतके साथ छह रहते हैं । ये बारहों जातियाँ पञ्चस्वरमें सदा वर्जनीय मानी गई हैं । किन्तु इनमें जो औडवितसे रहित हैं उनका स्वरके आश्रय निरन्तर प्रयोग

---

१. निषादवृषभी म० । २. षोडशीभूता कदाचित् षडवीकृताः म० । 'कदाचित् षाडवीभूता कदाचिच्चौडवीकृता' ना० शा० अ० २८ । ३. षड्जग्रामे तु विज्ञेया सम्पूर्णं षड्जकैशिकी ॥६१॥ ना० शा० अ० २८ । ४. ग्रामे च म० । ५. षड्जग्रामे तु विज्ञेया षाड्ज्येका षट्स्वराश्रया ॥५६॥ ना०शा०अ० २८ । ६. सम्पूर्णा मध्यमग्रामे ज्ञेया कर्मारवी तथा ॥६०॥ मध्यमोदीच्यवा चैव तथा गान्धारपञ्चमी । ना० शा० अ० २८ । ७. एवमेता बुधैर्ज्ञेया द्वैग्रामिक्यश्च जातयः ॥६२॥ ना० शा० अ० २८ । ८. षट्स्वर्ये सप्तमांशा तु नेष्यते षड्जमध्यमा । संवादिलोपाद् गान्धारस्तत्रैव न भविष्यति ॥६३॥ ना० शा० अ० २८ ।

एवं तु द्वादशैवेह वर्ज्याः पञ्च स्वरे सदा । यास्तु नौडविता नित्यं कर्तव्या हि स्वराश्रयाः ॥१६५॥
सर्वस्वराणां नाशस्तु विहितस्त्वथ जातिषु । न मध्यमस्य नाशस्तु कर्तव्यो हि कदाचन ॥१६६॥
सर्वस्वराणां प्रवरो ह्यनाशान्मध्यमः स्मृतः । गान्धर्वकल्पे विहिते समस्तेष्वपि मध्यमः ॥१६७॥
जातीनां लक्षणं तारो मन्द्रो न्यासादिरेव च । अल्पत्वं च बहुत्वं च षाडवौडविते तथा ॥१६८॥
एवमेता बुधैर्ज्ञेया जातयो दशलक्षणाः । यथा यस्मिन् रसे यावदिति तत्प्रतिपाद्यते ॥१६९॥
यस्मिन् भवति रागश्च यस्माच्चैव प्रवर्तते । मन्द्रश्च तारमन्द्रश्च योऽत्यर्थमुपलभ्यते ॥२००॥
ग्रहोपन्यासविन्याससंन्यासन्यासगोचरः । अनुवृत्तिश्च या चेह सोंऽशः स्याद्दशलक्षणः ॥२०१॥
[1]संसारोत्स्वाचलस्थानमल्पत्वं दुर्बलासु च । द्विविधोत्तरमार्गस्तु जातीनां व्यक्तिकारकः ॥२०२॥(?)
मन्द्रात्वं[2] पसरो नास्ति न्यासौ तु द्वाववस्थितौ । गान्धारो न्यासलिङ्गं तु दृष्टमार्षभमेव च ॥२०३॥(?)
ग्रहस्तु[3] सर्वजातीनामंशवत् परिकीर्तितः । यत्प्रवृत्ते भवेदंशः सोंऽशो ग्रहविकल्पितः ॥२०४॥
[4]द्वैग्रामिकीनां जातीनां सर्वासां चैव नित्यशः । अंशास्त्रिषष्टिर्विज्ञेयास्तासां वै षट्सु संग्रहः ॥२०५॥
[5]मध्यमोदीच्यवायास्तु नन्दयन्त्यास्तथैव च । ततो गान्धारपञ्चम्यां पञ्चमोंऽशो ग्रहस्तथा ॥२०६॥
धैवत्याश्च तथा द्व्यंशौ विज्ञेयौ धैवतर्षभौ । पञ्चम्याश्च तथा ज्ञेयौ ग्रहांशौ पञ्चमर्षभौ ॥२०७॥
गान्धारोदीच्यवायाश्च ग्रहांशौ षड्जमध्यमौ । आर्षभ्यास्तु तथा चैव विज्ञेया धैवतर्षभौ ॥२०८॥

करना चाहिए ॥१६४-१६५॥ जातियोंमें समस्त स्वरोंका नाश किया जा सकता है परन्तु मध्यम-स्वरका नाश कभी नहीं करना चाहिए ॥१६६॥ क्योंकि मध्यम स्वरका कभी नाश नहीं होता इसलिए वह समस्त स्वरोंमें प्रधान स्वर माना गया है। साथ ही यह मध्यमस्वर गान्धर्व कल्पके समस्त भेदोंमें भी स्वीकृत किया गया है ॥१६७॥ १ तार, २ मन्द्र, ३ न्यास आदि (४ उपन्यास, ५ ग्रह, ६ अंश) ७ अल्पत्व, ८ बहुत्व, ९ षाडव और १० औडवित ये जातियोंके नाम हैं ॥१६८॥ इस प्रकार विद्वानों द्वारा ये दश जातियाँ जानने योग्य हैं। उन जातियोंका जिस रसमें जितना प्रयोग होता है उसका कथन किया जाता है ॥१६९॥ राग जिसमें रहता है, राग, जिससे प्रवृत्त होता है, जो मन्द्र अथवा तारमन्द्र रूपसे अधिक उपलब्ध होता है, जो ग्रह उपन्यास, विन्यास, संन्यास और न्यासरूपसे अधिक उपलब्ध होता है, तथा जो अनुवृत्ति पाई जाती है वह दश प्रकारका अंश कहलाता है ॥२००-२०१॥ सञ्चार, अंश, बलस्थान, दुर्बल स्वरों-की अल्पता और नाना प्रकारका अन्तर मार्ग ये जातियोंको प्रकट करनेवाले हैं ॥२०२॥ मन्द्रमें अंश नहीं होता परन्तु न्यासमें दो अंश होते हैं। गान्धार ग्रह तथा न्यासमें आर्षभ अंश देखा जाता है ॥२०३॥ समस्त जातियोंमें जिस प्रकार अंश स्वीकार किया गया है उसी प्रकार ग्रह भी माना गया है। जिस ग्रहके प्रवृत्त होनेपर जो अंश होता है वह अंश उसी ग्रहसे विकल्पित माना जाता है ॥२०४॥ समस्त द्वैग्रामिकी जातियोंके सदा त्रेशठ अंश जानना चाहिए और जातियोंका संग्रह छह स्वरोंमें माना गया है ॥२०५॥ मध्यमोदीच्यवा, नन्दयन्ती और गान्धार पञ्चमीमें पञ्चम अंश तथा पञ्चम ही ग्रह रहता है ॥२०६॥ धैवतीमें धैवत और ऋषभ ये दो अंश तथा दो ग्रह और पञ्चमीमें पञ्चम तथा ऋषभ दो अंश और दो ग्रह जानना चाहिए ॥२०७॥ गान्धारो-

१. सञ्चारोंऽशबलस्थानमल्पत्वं दुर्बलेषु च । विविधोऽन्तरमार्गस्तु जातीनां व्यक्तिकारकः ॥९१॥ अ० २८ नाट्यशास्त्रे एवं पाठः । २. मन्द्रो ह्यंशपरो नास्ति न्यासे तु द्वौ व्यवस्थितौ । गान्धारे च ग्रहे न्यासे दृष्ट-मार्षभदैवतम् ॥९४॥ नाट्य अ० २८ । ३. ग्रहस्तु सर्वजातीनामंश एव हि कीर्तितः । यत्प्रवृत्तं भवेद्गानं सोंऽशो ग्रहविकल्पितः ॥७१॥ ना० शा० अ० २८ । ४. द्वैग्रामिकीनां जातीनां सर्वासामपि नित्यशः । अंशास्त्रिषष्टिर्विज्ञेयास्तासां चैव तथा ग्रहः ॥७५॥ ना० शा० अ० २८ । ५. नाट्यशास्त्रस्य अष्टाविंशतितमाध्यायस्य ७६-८७ श्लोकाः द्रष्टव्याः ।

निषादः षाडवश्चैव गान्धारोऽथर्षभस्तथा । तथैव षड्जकैशिक्याः षड्जगान्धारमध्यमाः ॥२०९॥
तिसृणामपि जातीनां ग्रहा न्यासाश्च कीर्त्तिताः । गान्धार ऋषभश्चैष निषादः पञ्चमस्तथा ॥२१०॥
ग्रहाद्यंशाश्च चत्वारस्तथैवान्त्याः प्रकीर्त्तिताः । षड्जश्चाप्यृषभश्चैव मध्यमः पञ्चमस्तथा ॥२११॥
मध्यमायां ग्रहांशौ तु गान्धारो धैवतस्तथा । निषादषड्जगान्धारा मध्यमाः पञ्चमस्तथा ॥२१२॥
गान्धारो रक्तगान्धार्यां गृहांशाः परिकीर्त्तिताः । अञ्चितर्षभयोगास्तु कैशिकांशा[1] ग्रहास्तथा ॥२१३॥
स्वराः सर्वे च विज्ञेयाः ग्रहांशौ षड्जमध्यमौ । एवं त्रिषष्टिर्विज्ञेया ग्रहाश्चांशाः स्वजातिषु ॥२१४॥
अंशवच्च ग्रहा ज्ञेयाः सर्वास्वपि हि जातिषु । सर्वासामेव जातीनां त्रिजात्यास्तु गुणाः स्मृताः ॥२१५॥
षड्गुणास्तेषु विज्ञेया वर्द्धमानाः स्वरास्तथा । एकस्वरो द्विस्वरश्च त्रिस्वरोऽथ चतुःस्वरः ॥२१६॥
पञ्चस्वरस्तथा चैव षट्स्वरः सप्तकस्तथा । पूर्वमुक्तमिदं त्वासां ग्रहांशपरिकल्पनम् ॥२१७॥
पञ्चैव तु भवेत् षड्जे निषादर्षभहीनतः । उपन्यासा भवन्त्यत्र गान्धारः पञ्चमस्तथा ॥२१८॥
न्यासश्चात्र भवेत् षष्ठो लोपो वै सप्तमर्षभौ । गान्धारस्य तु बाहुल्यं तत्र कार्यं प्रयोक्तृभिः ॥२१९॥
आर्षभ्यास्तु तथा त्वंशौ निषादो धैवतस्तथा । एतावन्तो ह्युपन्यासा न्यासश्चाप्यार्षभस्तथा ॥२२०॥
धैवत्या धैवतश्चैव न्यासश्चैवार्षभः स्मृतः । उपन्यासा भवन्त्यत्र धैवतर्षभपञ्चमाः ॥२२१॥
षड्जपञ्चमहीनं च पञ्चस्वर्यं विधीयते । पञ्चमं च विना चैव षाडवः परिकीर्तितः ॥२२२॥
आरोहणीयौ तौ कार्यौ लङ्घनीयौ तथैव च । निषादश्चर्षभश्चैव गान्धारो बलवाँस्तथा ॥२२३॥

दीच्यवामें षड्ज और मध्यम ये दो अंश तथा ग्रह हैं। आर्षभीमें धैवत, ऋषभ और निषाद ये तीन अंश और ग्रह हैं। [2]नैषादिनीमें षाडव, गान्धार और ऋषभ ये तीन अंश और ग्रह हैं। इसी प्रकार षड्ज कैशिकीमें षड्ज, गान्धार और मध्यम ये तीन अंश तथा ग्रह हैं ॥२०८–२०९॥ तीनों जातियोंके ग्रह और न्यास कहे जा चुके हैं। गान्धार, ऋषभ, निषाद और पञ्चम ये चार ग्रहके आदि अंश हैं तथा षड्ज, ऋषभ, मध्यम और पञ्चम ये अन्त्य अंश कहे गये हैं ॥२१०–२११॥ मध्यमा जातिमें गान्धार और धैवत ये दो ग्रह एवं अंश हैं। निषाद, षड्ज, गान्धार, मध्यम और पञ्चम ये रक्तगान्धारीके ग्रह और अंश हैं। कैशिकीमें ऋषभ योगके साथ समस्त ग्रहोंसे युक्त समस्त स्वर हैं। इसमें षड्ज और मध्यम ये दो ग्रह और अंश हैं। इस प्रकार अपनी-अपनी जातियों-में त्रेसठ ग्रह तथा इतने ही अंश जानना चाहिए ॥२१२–२१४॥ समस्त जातियोंमें अंशोंके ही समान ग्रह जानना चाहिए। समस्त जातियोंके गुण त्रिजातीय होते हैं ॥२१५॥ इनमें एकसे लेकर बढ़ते-बढ़ते छहगुने स्वर हो जाते हैं और वे एक स्वर, दो स्वर, तीन स्वर, चार स्वर, पाँच स्वर, छह स्वर और सात स्वर—इस क्रमसे होते हैं। इन जातियोंमें ग्रह और अंश कल्पना पहले कही जा चुकी है ॥२१६–२१७॥ षड्जमें निषाद और ऋषभको छोड़कर शेष पाँच स्वर होते हैं और वहाँ गान्धार तथा पञ्चम अपन्यास होते हैं। षष्ठ स्वर न्यास होता है एवं ऋषभ तथा सप्तम स्वरका लोप होता है। इसमें प्रयोक्ताओंको गान्धारकी बहुलता करनी चाहिए ॥२१८–२१९॥ आर्षभीमें निषाद और धैवत ये दो अंश तथा ये ही दो उपन्यास होते हैं और आर्षभ न्यास होता है ॥२२०॥ धैवतीमें धैवत और आर्षभन्यास तथा धैवत, ऋषभ और पञ्चम ये उपन्यास होते हैं ॥२२१॥ इसमें षड्ज और पञ्चमको छोड़कर पाँच स्वरोंका प्रयोग किया जाता है तथा पञ्चमको छोड़कर शेष षाडव कहा जाता है ॥२२२॥ पूर्वोक्त पञ्चस्वर्य और षाडव आरोहणीय और लङ्घनीय दोनों प्रकारके हैं। इसी प्रकार निषाद, ऋषभ और बलवान्

---

१. कैशिकीसग्रहास्तथा ख०।

२. नैषादिन्या निषादस्तु गान्धारश्चार्षभस्तथा ।
अंशाश्च षड्ज कैशिक्याः षड्जगान्धारपञ्चमाः ॥७९॥
—ना० शा० अ० २८।

निषादश्च [1]निषादांशो गान्धारश्चर्षभस्तथा। एवमेते ह्युपन्यासा न्यासश्चैव तु सप्तमः ॥२२४॥
धैवत्या अपि कर्त्तव्यौ षाडवौडवितौ तथा। तद्वच्च लङ्घनीयौ तु बलवन्तौ तथैव च ॥२२५॥
अंशास्तु षड्जकैशिक्या ज्ञेयौ गान्धारपञ्चमौ। उपन्यासाश्च विज्ञेयाः षड्जपञ्चममध्यमाः ॥२२६॥
गान्धारश्च भवेन्न्यासो हीनस्वर्यं नवात्र तु। दौर्बल्यं चात्र कर्त्तव्यं धैवतस्यर्षभस्य च ॥२२७॥
षड्जश्च मध्यमश्चैव निषादो धैवतस्तथा। षड्जगोदीच्यवांशास्तु न्यासश्चैवात्र मध्यमः ॥२२८॥
उपन्यासस्तथा चैव धैवतः षड्ज एव तु। परस्परांशातिगमश्छन्दतश्च विधीयते ॥२२९॥
पञ्चमर्षभहीनं तु [2]पञ्चस्वर्यं तु तत्र वै। षड्जश्चाप्यर्षभश्चैव गान्धारश्च बली भवेत् ॥२३०॥
षड्जमध्यास्तु सर्वेषामुपन्यासास्तथैव च। षड्जश्च सप्तमश्चैव न्यासौ कार्यौ प्रयोक्तृभिः ॥२३१॥
[3]गान्धारसप्तमोपेतं [4]पञ्चस्वर्यं च तद् [5]भवेत्। षाडवः सप्तमोपेतः कार्यश्चैवात्र योगतः ॥२३२॥
सर्वस्वराणां सञ्चार इष्टवस्तु विधीयते। षड्जग्रामाश्रया ह्येताः विज्ञेयाः सप्त जातयः ॥२३३॥
गान्धार्याः पञ्चधैवांशा धैवतर्षभवर्जिताः। षड्जश्च पञ्चमश्चैव ह्युपन्यासाः प्रकीर्तिताः ॥२३४॥
गान्धारोऽत्र भवेन्न्यासो षाडवर्षभसम्भवः। धैवतर्षभहीनं च तथा चौडवितं भवेत् ॥२३५॥
लङ्घनीयौ च तौ नित्यमार्षभाद्धैवतं व्रजेत्। इति गान्धारविहितः स्वरन्यासांशसञ्चरः ॥२३६॥
लक्षणं रक्तगान्धार्या एवं तत्समतां गतम्। बलवाँश्चैव तत्र स्याद्धैवतः पञ्चमस्तथा ॥२३७॥
गान्धारषड्जयोश्चाऽत्र सञ्चारो ह्युभयं विना। [6]उपन्यासः समध्यस्तु मध्यमस्तु विधीयते ॥२३८॥
गान्धारोदीच्यवायास्तु विज्ञेयौ षड्जमध्यमौ। सप्तमश्च ततोऽन्यत्र षट्स्वर्यमृषभं विना ॥२३९॥

गान्धार भी आरोहणीय तथा लङ्घनीय दोनों प्रकारके हैं ॥२२३॥ निषाद, निषादका अंश, गान्धार और ऋषभ इस प्रकार ये उपन्यास हैं परन्तु सप्तम स्वर न्यास ही होता है ॥२२४॥ धैवती जातिमें भी षाडव और औडवितका प्रयोग करना चाहिए। ये दोनों ही पूर्वकी भाँति लङ्घनीय तथा आरोहणीय होते हैं ॥२२५॥ षड्ज कैशिकीके गान्धार और पञ्चम ये ग्रहांश हैं तथा षड्ज, पञ्चम और मध्यम ये उपन्यास हैं ॥२२६॥ यहाँपर गान्धार चाहे हीन स्वरवाला हो चाहे अधिक स्वरवाला हो न्यास होता है साथ ही इसके यहाँ धैवत तथा ऋषभ स्वरमें दुर्बलताका प्रयोग करना चाहिए ॥२२७॥ षड्ज, मध्यम, निषाद और धैवत''' ये षड्जोदीच्यवाके अंश हैं, मध्यम न्यास हैं और धैवत तथा षड्ज उपन्यास हैं। यहाँ छन्दके अनुसार परस्परके अंशोंमें व्यतिक्रम भी हो जाता है ॥२२८-२२९॥ जहाँ पञ्चम और ऋषभको छोड़कर शेष पाँच स्वर होते हैं वहाँ षड्ज, ऋषभ और गान्धार बलवान् होते हैं ॥२३०॥ षड्ज और मध्यम सबके उपन्यास हैं तथा षड्ज और सप्तम सबके न्यास हैं ॥२३१॥ पञ्चस्वर्य गान्धार और सप्तम स्वरसे युक्त होता है तथा षाडवको सप्तम स्वरसे युक्त अवश्य करना चाहिए ॥२३२॥ इन समस्त स्वरोंका संचार इच्छानुसार किया जाता है। ये सात जातियाँ षड्ज ग्रामके आश्रय रहती हैं ॥२३३॥ गान्धारी जातिमें धैवत और ऋषभको छोड़कर शेष पाँच ही अंश रहते हैं। षड्ज और पञ्चम उपन्यास होते हैं ॥२३४॥ इसमें षाडव और ऋषभसे उत्पन्न गान्धार न्यास होता है तथा धैवत और ऋषभसे रहित औडवित होता है ॥२३५॥ यहाँ ऋषभ और धैवत नियमसे लङ्घनीय माने गये हैं और जब लङ्घन होता है तो ऋषभसे धैवतकी ओर ही होता है। इस प्रकार गान्धारी जातिके स्वर न्यास और अंशोंके संचारका वर्णन किया ॥२३६॥ रक्तगान्धारीका लक्षण इसी—गान्धारीके समान होता है। विशेषता यह है कि इसमें धैवत और पञ्चम स्वर बलवान् होते हैं ॥२३७॥ यहाँ धैवत और पञ्चमके बिना गान्धार और षड्जका संचार होता है, तथा मध्य सहित मध्यम उपन्यास होता है ॥२३८॥ गान्धारोदीच्यवामें षड्ज, मध्यम और सप्तम

---

१. नषादोऽसौ म०। २. पंचमं यत्तु म०। ३. गान्धारं सप्तमोपेतं म०। ४. यवस्वर्यं ग०।
५. "गान्धारसप्तमोपेतं पंचस्वर्यं विधीयते" नाट्यशास्त्रे। ६. उपन्यासो मध्यमस्तु म०।

कार्यः स्वन्तरमार्गश्च न्यासोपन्यास एव च । गान्धारोदीच्यवायास्तु तत्र सर्वो विधिः स्मृतः ॥२४०॥
मध्यमायाः भवेदंशौ विना गान्धारसप्तमौ । एक एव ह्यपन्यासो न्यासश्चैव तु मध्यमः ॥२४१॥
गान्धारसप्तमापेतं पञ्चस्वर्यं विधीयते । षट्स्वरं चाप्यगान्धारं कर्त्तव्यं तु प्रयोगतः ॥२४२॥
षड्जमध्यमयोश्चाऽत्र कार्यं बाहुल्यमेव हि । गान्धारलङ्घनं चात्र नित्यं कार्यं प्रयोक्तृभिः ॥२४३॥
मध्यमोदीच्यवायाः स्यादेको ह्यंशस्तु मध्यमः । शेषो विधिश्च कर्त्तव्यो मध्यमायास्तु यो भवेत् ॥२४४॥
[1]द्वावंशावथ पञ्चम्यामृषभः पञ्चमस्तथा । अपन्यासो भवेदेको न्यासश्चैव तु पञ्चमः ॥२४५॥
मध्यमाया विधिर्योऽत्र षाडवौडविते तथा । दौर्बल्यं चात्र कर्त्तव्यं षड्जगान्धारपञ्चमैः ॥२४६॥
कुर्यादत्र सञ्चारं पञ्चमस्यर्षभस्य च । गान्धारगमनं चैव कुर्यादपि च पञ्चमैः ॥२४७॥
अथ गान्धारपञ्चम्याः [2]पञ्चमोंऽशः प्रकीर्तितः । पञ्चमश्चर्षभश्चैव ह्यपन्यासः प्रकीर्त्तितः ॥२४८॥
[3]न्यासश्चैवात्र गान्धारः स च पूर्वस्वरो भवेत् । पञ्चम्यास्त्वथ गान्धार्याः सञ्चरः संविधीयते ॥२४९॥
ऋषभः पञ्चमश्चैव गान्धारोऽथ निषादवान् । चत्वारोंऽशास्तथा [4]ह्यान्ध्रया अपन्यासास्त एव च ॥२५०॥
गान्धारश्च तथा न्यासः षड्जापेतश्च षाडवः । गान्धारर्षभयोश्चापि सञ्चरस्तु परस्परम् ॥२५१॥
सप्तमस्य च षष्ठस्य न्यासगत्यनुपूर्वशः । षड्जस्य लङ्घनं चात्र नास्ति चौडवितं तथा ॥२५२॥

अंश जानना चाहिए। इसमें ऋषभके बिना छह स्वर होते हैं ॥२३९॥ इसमें अन्तरमार्ग, न्यास और अपन्यास करना चाहिए तथा उनमें गान्धारोदीच्यवाकी सब विधि स्मरणमें रखना चाहिए ॥२४०॥ मध्यमामें गान्धार और सप्तमको छोड़कर षड्ज, ऋषभ, मध्यम, पञ्चम और धैवत ये पाँच अंश होते हैं। इसमें एक मध्यम ही अपन्यास तथा न्यास रहता है ॥२४१॥ यहाँ गान्धार और सप्तमसे रहित पञ्चस्वर्य किया जाता है और कभी प्रयोगवश गान्धारको छोड़कर षट्स्वर्य भी किया जाता है ॥२४२॥ इसमें प्रयोक्ताओंको षड्ज और मध्यम स्वरकी बहुलता करनी चाहिए तथा गान्धार स्वरका लङ्घन निरन्तर करना चाहिए—उसे छोड़ते रहना चाहिए ॥२४३॥ मध्यमोदीच्यवामें एक ही मध्यम अंश होता है और शेष विधि जो मध्यमामें होती है वही इसमें करनी चाहिए ॥२४४॥ पञ्चमी जातिमें ऋषभ और पञ्चम ये दो अंश होते हैं तथा ये ही दो अपन्यास होते हैं परन्तु न्यास एक पञ्चम ही होता है ॥२४५॥ मध्यमाकी जो विधि बता आये हैं वह तथा षाडव और औडवित इसमें भी जानना चाहिए तथा इसमें षड्ज गान्धार और पञ्चम स्वरको दुर्बल करना चाहिए ॥२४६॥ यहाँ पञ्चम और ऋषभ स्वरका संचार करना चाहिए तथा पञ्चम स्वरके साथ गान्धार स्वरका भी संचार किया जा सकता है ॥२४७॥ गान्धार पञ्चमीका एक पञ्चम अंश ही कहा गया है तथा पञ्चम और ऋषभ ये दो उसके अपन्यास कहे गये हैं ॥२४८॥ इसमें गान्धार न्यास होता है और वह अपने पूर्व स्वरको लिये हुए होता है। पञ्चमी और गान्धारी जातिका परस्पर संचार भी किया जाता है ॥२४९॥ आन्ध्री जातिके ऋषभ, पञ्चम, गान्धार और निषाद ये चार अंश हैं तथा ये ही चार अपन्यास हैं ॥२५०॥ गान्धार न्यास है, तथा षड्जसे रहित षाडव—षड्स्वर्य है। यहाँ गान्धार और ऋषभ स्वरका परस्पर संचार होता है ॥२५१॥ कभी-कभी न्यासकी गतिके अनुसार षष्ठ और सप्तम

---

१. द्वादशावथ म० । द्वावंशावथ पञ्चम्या भवतः पञ्चमर्षभौ । अपन्यासो निषादश्च पञ्चमर्षभसंयुतः॥१२३॥ न्यासः पञ्चम एव स्यात् मध्यमर्षभहीनता । दुर्बलाश्चात्र कर्त्तव्या षड्जगान्धारमध्यमाः॥१२४॥ कुर्याच्चाप्यत्र सञ्चारं मध्यमस्यर्षभस्य च । गान्धारगमनं चाल्पं सप्तमात् सम्प्रयोजयेत् ॥१२५॥ —ना० शा० अध्याय २८ । कैशिक्यास्तु भवन्त्यंशाः सर्वे चर्षभवर्जिताः । एत एव ह्यपन्यासा न्यासौ गान्धारसप्तमौ ॥१३७॥ धैवतेंऽशे निषादे च न्यासः पञ्चम इष्यते । —ना० शा० २८ अ० । २. पञ्च दोषाः प्रकीर्तिताः म०, ग० । ३. न्यासश्चैवानुगान्धारः म०, ग० । ४. चैते ह्युपन्यासा ग० । चैव ह्युपन्यासा म० ।

नन्दयन्त्या अपि न्यासा अंशाश्चापि तथैव च । गान्धारो मध्यमश्चैव पञ्चमश्चैव नित्यशः ॥२५३॥
न षड्जो लङ्घनीयोंऽशो न चान्ध्रीसञ्चरः स्मृतः । लङ्घनं ह्यर्षभस्यात्र तच्च मन्द्रगतं स्मृतम् ॥२५४॥
तारे चापि ग्रहे कार्यस्तथा न्यासश्च नित्यशः । कर्मार्व्यास्तथा ह्यंश ऋषभः पञ्चमस्तथा ॥२५५॥
धैवतश्च निषादोऽपि ह्यपन्यासः प्रकीर्त्तितः । पञ्चमश्च भवेन्न्यासो हीनस्वर्यस्तथैव च ॥२५६॥
गान्धारस्य विशेषेण सर्वतो गमनं भवेत् । कैशिक्यास्तु सषड्जायाः सर्वे चैवार्षभं विना ॥२५७॥
एत एव ह्युपन्यासा गान्धारः सप्तमो भवेत् । [2]धैवते सनिषादे च न्यासः पञ्चम एव च ॥२५८॥
अपन्यासः कदाचित् स ऋषभोऽभिविधीयते । [3]व्यार्षभं षाडवं चात्र धैवतश्चर्षभं विना ॥२५९॥
तथा [4]नौडवितं कुर्याद्बलिनश्चान्त्यपञ्चमाः । दौर्बल्यमृषभस्यात्र लङ्घनं च विशेषतः ॥२६०॥
सषड्जो मध्यमश्चात्र सञ्चारस्तु विधीयते । यथारसं बुधैर्योज्या जातयः स्वरसञ्चराः ॥२६१॥
इत्यादि स यथायोग्यं तथा गन्धर्वविस्तरे[5] । सुगीते वसुदेवेन श्रोतारो विस्मयं ययुः ॥२६२॥
तुम्बुरुर्नारदः किंवा गन्धर्वः किन्नरो ह्ययम् । वीणावादनमीदृक्षं कुतोऽन्यस्येति वेदनम् ॥२६३॥
विष्णुगीतक्रमोद्देशस्थानं गीतं सुवीणया । श्रुत्वा गन्धर्वसेनाऽभूद् विस्मिता च निरुत्तरा ॥२६४॥
तथा जयपताकायां वसुदेवेन संसदि । गृहीतायां समुत्तस्थौ गम्भीरः साधुनिस्वनः ॥२६५॥
अनुरागवती वव्रे वसुदेवं स्वभावतः । कण्ठे [6]कण्ठगुणं कन्या कुर्वती तस्य संसदि ॥२६६॥

स्वरका भी संचार होता है। इसमें षड्ज स्वरका लङ्घन और औडवित नहीं होता ॥२५२॥ जो न्यास, अंश तथा अपन्यास आन्ध्री जातिके हैं वे ही नन्दयन्तीके भी हैं। इसमें गान्धार, मध्यम और पञ्चम स्वर नित्य रहते हैं ॥२५३॥ इसमें षड्ज स्वर लङ्घनीय नहीं हैं और न आन्ध्रीके समान इसमें संचार ही होता है। इसमें ऋषभ स्वरका लङ्घन होता है और वह मन्द्र-गतिके समय होता है ॥२५४॥ तार ग्रहमें भी निरन्तर उसीके अनुरूप न्यास करना चाहिए। कर्मारवी जातिमें ऋषभ, पञ्चम, धैवत और निषाद ये चार अंश कहे गये हैं तथा ये ही चार अपन्यास बतलाये गये हैं। इसमें पञ्चम न्यास होता है और वह हीनस्वर्य होता है ॥२५५–२५६॥ यहाँ गान्धार स्वरका विशेष रूपसे सर्वत्र गमन होता है। षड्जा सहित कैशिकीमें ऋषभ-को छोड़कर शेष सभी अंश और अपन्यास माने गये हैं। गान्धार और सप्तममें दो न्यास हैं परन्तु धैवत और निषाद अंशमें एक पञ्चम ही न्यास होता है ॥२५७–२५८॥ कभी-कभी इसमें ऋषभ भी न्यास हो जाता है। इसमें षाडव ऋषभसे रहित होता है तथा धैवत ऋषभके बिना प्रयुक्त होता है। यहाँ औडवित नहीं करना चाहिए, अन्तिम और पञ्चम स्वरको बलवान् करना चाहिए तथा ऋषभको दुर्बल करना चाहिए और उसीका विशेष रूपसे लङ्घन करना चाहिए ॥२५९–२६०॥ इसमें षड्ज और मध्यमका संचार किया जाता है। इस प्रकार स्वरोंमें संचार करनेवाली जातियाँ कहीं। विद्वान् इनका रसके अनुसार प्रयोग करें ॥२६१॥

इस प्रकार गन्धर्व शास्त्रके विस्तारके साथ जब वसुदेवने यथायोग्य उत्तम गाना गाया तब सभी श्रोता आश्चर्यको प्राप्त हो गये ॥२६२॥ लोग कहने लगे कि यह क्या तुम्बुरु है ? या नारद है ? या गन्धर्व है ? अथवा किन्नर है क्योंकि ऐसी वीणा बजाना किसी दूसरेको कहाँ आ सकती है ? ॥२६३॥ बलिको बाँधते समय नारद आदिने विष्णुकुमार मुनिका जिस रूपसे स्तवन किया था वसुदेवने वीणा बजाकर वही गाया जिसे सुनकर गन्धर्वसेना आश्चर्यसे चकित एवं निरुत्तर हो गई ॥२६४॥ इस प्रकार जब सभामें विजयपताका वसुदेवने ग्रहण की तब चारों ओरसे 'साधु-साधु' 'ठीक-ठीक'का जोरदार शब्द गूँज उठा ॥२६५॥ स्वाभाविक अनुरागसे भरी

---

१. मन्दयन्त्या म० । २. धैवतं सनिषादे च म०, ग० । ३. विगतम् आर्षभं यस्मात् तत् । ४. तथा चौडवितं कुर्याद्बलिनश्चात्र पञ्चमः म० । ५. विस्तारे म० । ६. मालाम् ।

गन्धर्व इव देवोऽसौ वृतो गन्धर्वकन्यया । गान्धर्वसेनया हर्षसम्बन्धं जगतो व्यधात् ॥२६७॥
चारुदत्तस्ततस्तुष्टो यथोक्तविधिना ततः । [1]विवाहं मगधाधीश निरवर्त्तयदेतयोः ॥२६८॥
सुग्रीवश्च यशोग्रीव उपाध्यायौ च कन्यके । वितीर्य वसुदेवाय नितान्तं तोषमापतुः ॥२६९॥
कलागुणविदग्धाभिस्ताभिरानकदुन्दुभिः[2] । रामाभिरभिरामाभिश्चिरं चिक्रीड तत्र सः ॥२७०॥

स्रग्धरावृत्तम्

लब्ध्वा लुब्धेन रन्ध्रं कथमपि हरता वैरिणा खेऽतिदूरं
नीत्वा मुक्तं पतन्तं गतशरणमधः पद्मखण्डोपधानम् ।
कृत्वा यः शीघ्रमस्मिन्झटिति घटयति प्राज्यलाभैः पुमांसं
कर्तुं भव्यस्तमेकं पथि जिनकथिते धर्मबन्धुं यतध्वम् ॥२७१॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ गान्धर्वसेनावर्णनो नाम एकोनविंशतितमः सर्गः ॥१९॥

गन्धर्वसेनाने सभामें ही वसुदेवके गलेमें माला डालकर उनका वरण किया ॥२६६॥ उस समय गन्धर्व-कन्यासे वृत गन्धर्वके समान गन्धर्वसेनासे वृत वसुदेवने समस्त जगत्को हर्षित कर दिया ॥२६७॥ तदनन्तर गौतम स्वामी कहते हैं कि हे श्रेणिक ! कन्याके पिता चारुदत्तने सन्तुष्ट होकर दोनोंका विधिपूर्वक विवाह कर दिया ॥२६८॥ उपाध्याय सुग्रीव और यशोग्रीव भी अपनी-अपनी कन्याएँ वसुदेवके लिए प्रदान कर सन्तोषको प्राप्त हुए ॥२६९॥ अनेक कलाओं और गुणोंमें चतुर उन सुन्दर स्त्रियोंके साथ वसुदेव वहाँ चिरकालतक क्रीड़ा करते रहे ॥२७०॥ लोभसे भरा वैरी विद्याधर छिद्र पा जिसे हरकर आकाशमें बहुत दूर ले गया और वहाँसे अशरण अवस्थामें जिसे कमल वनमें नीचे छोड़ा ऐसे पुरुषको भी जो शीघ्र ही उत्कृष्ट लाभोंसे युक्त करता है हे भव्यजनो ! तुम जिन-कथित मार्गमें उस एक धर्म रूप बन्धुको प्राप्त करनेका प्रयत्न करो ॥२७१॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें गन्धर्वसेना कन्याका वर्णन करनेवाला उन्नीसवाँ सर्ग समाप्त हुआ ॥१९॥

---

१. विवाहो मगधाधीशो (?) म० । २. वसुदेवः ।

विंशतितमः सर्गः

अथापृच्छत्पृथुश्रीकः श्रेणिकोऽत्र गणेश्वरम् । कथं विष्णुकुमारेण विभो बलिरबध्यत ॥१॥
अभणीद्गणमुख्यश्च शृणु श्रेणिक ! वैष्णवीम् । दृष्टिशुद्धिकरीं श्रव्यां सत्कथां कथयामि ते ॥२॥
उज्जयिन्यामभूद्राजा[1] श्रीधर्मा[2] नाम विश्रुतः । श्रीमती श्रीमती तस्य महादेवी महागुणा ॥३॥
चत्वारो मन्त्रिणश्चास्य मन्त्रमार्गविदो बलिः । बृहस्पतिश्च नमुचिः प्रह्लाद इति चाख्रितः ॥४॥
अन्यदा श्रुतपारस्थः ससप्तशतसंयतः । आगत्याकम्पनस्तस्थौ बाह्योद्याने महामुनिः ॥५॥
वन्दनार्थं नृपो लोकं [3]निर्यान्तमिव सागरम् । प्रासादस्थस्तदालोक्य मन्त्रिणोऽपृच्छदित्यसौ ॥६॥
अकालयात्रया लोकः क्व यातीति ततो बलिः । राजन्नज्ञानिनो द्रष्टुं श्रमणानित्यवेदयत् ॥७॥
ततो जिगमिषू राजा निषिद्धोऽपि बलाद् ययौ । मन्त्रिणोऽपि सहागत्य दृष्ट्वा किञ्चिदवीवदन् ॥८॥
गुर्वादेशाच्च सङ्घोऽपि स्थितो मौनमुपाश्रितः । यान्तः प्रतिनिवृत्यामी संमुखं वीक्ष्य योगिनम् ॥९॥
[4]अनूनुदन्नृपाध्यक्षं मिथ्यामार्गविमोहिताः । प्रमाणमार्गतस्तान् स जिगाय श्रुतसागरः ॥१०॥
स्थितं प्रतिमया रात्रौ जिघांसूस्तांश्च तद्दिवा । देवतास्तम्भितान् दृष्ट्वा राजा देशादपाकरोत् ॥११॥
तदा नागपुरे चक्री महापद्म इतीरितः । अष्टौ च कन्यकास्तस्य ताश्च विद्याधरैर्हृताः ॥१२॥

अथानन्तर विशाल लक्ष्मीके धारक राजा श्रेणिकने गौतम गणधरसे पूछा कि हे विभो ! विष्णु कुमार मुनिने बलिको क्यों बाँधा था ? ॥१॥ इसके उत्तरमें गौतम गणपतिने कहा कि हे श्रेणिक ! तू सम्यग्दर्शनको शुद्ध करनेवाली विष्णुकुमार मुनिकी मनोहारिणी कथा सुन, मैं तेरे लिए कहता हूँ ॥२॥

किसी समय उज्जयिनी नगरीमें श्रीधर्मा नामका प्रसिद्ध राजा रहता था । उसकी श्रीमती नामकी पटरानी थी । वह श्रीमती वास्तवमें श्रीमती—उत्तम शोभासे सम्पन्न और महा गुणवती थी ॥३॥ राजा श्रीधर्माके बलि, बृहस्पति, नमुचि और प्रह्लाद ये चार मन्त्री थे । ये सभी मन्त्री मन्त्र मार्गके जानकार थे ॥४॥ किसी समय श्रुतके पारगामी तथा सात सौ मुनियोंसे सहित महामुनि अकम्पन आकर उज्जयिनीके बाह्य उपवनमें विराजमान हुए ॥५॥ उन महामुनिकी वन्दनाके लिए नगरवासी लोग सागरकी तरह उमड़ पड़े । महलपर खड़े हुए राजाने नगरवासियोंको देख मन्त्रियोंसे पूछा कि ये लोग असमयकी यात्रा द्वारा कहाँ जा रहे हैं ? तब बलिने उत्तर दिया कि हे राजन् ! ये लोग अज्ञानी दिगम्बर मुनियोंकी वन्दनाके लिए जा रहे हैं ॥६-७॥ तदनन्तर राजा श्रीधर्माने भी वहाँ जानेकी इच्छा प्रकट की । यद्यपि मन्त्रियोंने उसे बहुत रोका तथापि वह जबर्दस्ती चल ही पड़ा । अन्तमें विवश हो मन्त्री भी राजाके साथ गये और मुनियोंके दर्शनकर कुछ विवाद करने लगे ॥८-९॥ उस समय गुरुकी आज्ञासे सब मुनि सङ्घ मौन लेकर बैठा था इसलिए ये चारों मन्त्री विवश होकर लौट आये । लौटकर आते समय उन्होंने सामने एक मुनिको देखकर राजाके समक्ष छेड़ा । सब मन्त्री मिथ्यामार्गमें मोहित तो थे ही इसलिए श्रुतसागर नामक उक्त मुनिराजने उन्हें जीत लिया ॥ १०॥ उसीदिन रात्रिके समय उक्त मुनिराज प्रतिमा योगसे विराजमान थे कि सब मन्त्री उन्हें मारनेके लिए गये परन्तु देवने उन्हें कीलित कर दिया। यह देख राजाने उन्हें अपने देशसे निकाल दिया ॥११॥

उस समय हस्तिनापुरमें महापद्म नामक चक्रवर्ती रहता था । उसकी आठ कन्याएँ थीं

---

१. उज्जयिन्यां भवेद्राजा म० । २. श्रीधर्मो म० । ३. निर्यातमिव म० । ४. अनूनुदं म०

आनीताः शुद्धशीलास्ताः संवेगिन्यः प्रवव्रजुः । तेऽपि संवेगिनोऽष्टौ च खेचराः तपसि स्थिताः ॥१३॥
चक्रवर्ती च तद्धेतोः पद्मं लक्ष्मीमतीसुतम् । ज्येष्ठं राज्ये निधायान्त्यदेहोऽदीक्षिष्ट विष्णुना ॥१४॥
तपो विष्णुकुमारोऽसौ रत्नत्रयधरस्तपन् । निधिर्बभूव लब्धीनां नदीनां वा नदीपतिः ॥१५॥
नवराज्यस्थमागत्य पद्मं बलिपुरोगमाः । मन्त्रिणोऽशिश्रियन् देशकालावस्थाविदस्तथा ॥१६॥
स्थितं सिंहबलं दुर्गे पद्मं वल्युपदेशतः । गृहीत्वाऽऽह गृहाणेष्टं वरमित्येति बलिं तदा[1] ॥१७॥
तं प्रणम्य विदग्धोऽसौ हस्तन्यासं न्यधाद् वरम् । ततः सन्तोषिणां तेषां काले याति कदाचन ॥१८॥
आगत्याकम्पनाचार्यस्तदा नागपुरं शनैः । मुनीनामग्रहीद् योगं चातुर्मास्यावधिं बहिः ॥१९॥
ततस्ते मन्त्रिणो भीताः शङ्काविषमुपागताः । तदपाकरणोपायं चिन्तयन्ति स्म सस्मयाः ॥२०॥
अब्रवीद् बलिराश्रित्य पद्मं राजन् ! वरस्त्वया । दत्तः स दीयतां मेऽद्य राज्यं सप्तदिनावधि ॥२१॥
दत्तं गृहाण ते राज्यमित्युक्त्वाऽदृश्यवत्स्थितः । राज्यस्थोऽपि बलिस्तेषामुपद्रवमकारयत् ॥२२॥
यतीनभ्यन्तरीकृत्य परितोऽहर्निशं कृतम्[2] । पत्रधूमादिकोच्छिष्टशरावोत्सर्जनादिकम् ॥२३॥
उपसर्गसहास्तेऽपि कायोत्सर्गेण योगिनः । तस्थुः सालम्बमादाय प्रत्याख्यानं ससूरयः ॥२४॥
तस्मिन् काले गुरुर्विष्णोर्मिथिलायामवस्थितः । दिव्यज्ञानी जगौ ध्यात्वा स संयुक्तोऽनुकम्पया ॥२५॥

और आठ विद्याधर उन्हें हरकर ले गये थे। शुद्ध शीलको धारण करनेवाली वे कन्याएँ जब वापिस लाई गईं तो उन्होंने संसारसे विरक्त हो दीक्षा धारण कर ली। उधर संसारसे विरक्त हो वे आठ विद्याधर भी तप करने लगे ॥१२-१३॥ इस घटनासे चरमशरीरी महापद्म चक्रवर्ती भी संसारसे विरक्त हो गया जिससे उसने लक्ष्मीमती रानीसे उत्पन्न पद्म नामक बड़े पुत्रको राज्य देकर छोटे पुत्र विष्णु कुमारके साथ दीक्षा धारण कर ली ॥१४॥ जिस प्रकार सागर नदियोंका भाण्डार होता है उसी प्रकार रत्नत्रयके धारी एवं तप तपने वाले विष्णुकुमार मुनि अनेक ऋद्धियोंके भाण्डार हो गये ॥१५॥ देशकालकी अवस्थाको जाननेवाले बलि आदि मन्त्री नये राज्यपर आरूढ़ राजा पद्मकी सेवा करने लगे ॥१६॥ उस समय राजा पद्म, बलि मन्त्रीके उपदेशसे किलेमें स्थित सिंहबल राजाको पकड़नेमें सफल हो गया इसलिए उसने बलिसे कहा कि वर माँगकर इष्ट वस्तुको ग्रहण करो ॥१७॥ बलि बड़ा चतुर था इसलिए उसने प्रणामकर उक्त वरको राजा पद्मके हाथमें धरोहर रख दिया अर्थात् 'अभी आवश्यकता नहीं है जब आवश्यकता होगी तब माँग लूँगा' यह कहकर अपना वर धरोहर रूप रख दिया। तदनन्तर बलि आदि चारों मन्त्रियोंका सन्तोष पूर्वक समय व्यतीत होने लगा ॥१८॥

अथानन्तर किसी समय धीरे-धीरे विहार करते हुए अकम्पनाचार्य, अनेक मुनियोंके साथ हस्तिनापुर आये और चार माहके लिए वर्षायोग धारण कर नगरके बाहर विराजमान हो गये ॥१९॥ तदनन्तर शङ्कारूपी विषको प्राप्त हुए बलि आदि मन्त्री भयभीत हो गये और अहंकारके साथ उन्हें दूर करनेका उपाय सोचने लगे ॥२०॥ बलिने राजा पद्मके पास आकर कहा कि राजन् ! आपने मुझे जो वर दिया था उसके फलस्वरूप सात दिनका राज्य मुझे दिया जाय ॥२१॥ 'सँभाल, तेरे लिए सात दिनका राज्य दिया' यह कहकर राजा पद्म अदृश्यके समान रहने लगा। और बलिने राज्य-सिंहासनपर आरूढ़ होकर उन अकम्पनाचार्य आदि मुनियोंपर उपद्रव करवाया ॥२२॥ उसने चारों ओरसे मुनियोंको घेरकर उनके समीप पत्तोंका धुआँ कराया तथा जूठन व कुल्हड़ आदि फिंकवाये ॥२३॥ अकम्पनाचार्य सहित सब मुनि 'यदि उपसर्ग दूर होगा तो आहार-विहार करेंगे अन्यथा नहीं' इस प्रकार सावधिक संन्यास धारण कर उपसर्ग सहते हुए कायोत्सर्गसे खड़े हो गये ॥२४॥

उस समय विष्णुकुमार मुनिके अवधिज्ञानी गुरु मिथिला नगरीमें थे। वे अवधिज्ञानसे

---

१. बलिस्तदा म० । २. कृतः म० ।

आचार्याकम्पनादीनां सप्तसप्तशतयोगिनाम् । वर्त्ततेऽवृत्तपूर्वोऽयमुपसर्गोऽद्य दारुणः ॥२६॥
क्षुल्लकः पुष्पदन्तस्तं क नाथेत्यतिसम्भ्रमः । अप्राक्षीदित्यथ प्राह स हास्तिनपुरे स्फुटम् ॥२७॥
कुतोऽपवर्त्तते नाथ स इत्युक्ते जगौ गुरुः । प्राप्तवैक्रियसामर्थ्याद्विष्णोर्जिष्णोर्विधृष्यतः ॥२८॥
तस्मै स क्षुल्लको गत्वा तमुदन्तं न्यवेदयत् । विक्रियालब्धिसद्भावपरीक्षामकरोन्मुनिः ॥२९॥
बाहुः प्रसारितस्तेन गिरिभित्तौ विभिद्यताम् । [1]अरुद्धप्रसरो दूरं सहसाप्सु यथा तथा ॥३०॥
ज्ञातलब्धिपरिप्राप्तिर्जिनशासनवत्सलः । गत्वा पद्मं मुनिः प्राह प्रणतं प्रणतप्रियः ॥३१॥
पद्मराज ! किमारब्धं भवता राज्यवर्त्तिना । न वृत्तं कौरवेष्वत्र कदाचिदपि यद्भुवि ॥३२॥
अनार्यजनसंवृत्तमुपसर्गं तपस्विनाम् । निवर्त्तयेन्नृपस्तस्य प्रवृत्तिस्तु कुतस्ततः ॥३३॥
निर्वाप्यते ज्वलन्नाग्निर्जलेन सुमहानपि । उत्तिष्ठेद् यद्यसौ तस्मात्तस्य शान्तिः कुतोऽन्यतः ॥३४॥
[2]नन्वाऽऽज्ञाफलमैश्वर्यमाज्ञादुर्वृत्तशासनम् । ईश्वरः स्थाणुरप्युक्तः क्रियाशून्यो[3] यदीश्वरः ॥३५॥
तन्निवर्त्तय दुर्वृत्ताद्बलिमाशु पशूपमम् । प्रद्वेषः कोऽस्य मित्रारिसमभावेषु साधुषु ॥३६॥
साधोः शीतलशीलस्य[4] तापनं न हि शान्तये । गाढतप्तो दहत्येव तोयात्मा विकृतिं गतः ॥३७॥

विचार कर तथा दयासे युक्त हो कहने लगे कि हा ! आज अकम्पनाचार्य आदि सात सौ मुनियों-पर अभूतपूर्व दारुण उपसर्ग हो रहा है ॥२५-२६॥ उस समय उनके पास पुष्पदन्त नामका क्षुल्लक बैठा था। गुरुके मुखसे उक्त दयार्द्र वचन सुन उसने बड़े संभ्रमके साथ पूछा कि हे नाथ ! वह उपसर्ग कहाँ हो रहा है ? इसके उत्तरमें गुरुने स्पष्ट कहा कि हस्तिनापुरमें ॥२७॥ क्षुल्लकने पुनः कहा कि हे नाथ ! यह उपसर्ग किससे दूर हो सकता है ? इसके उत्तरमें गुरुने कहा कि जिसे विक्रिया ऋद्धिकी सामर्थ्य प्राप्त है तथा जो इन्द्रको भी धौंस दिखानेमें समर्थ है ऐसे विष्णुकुमार मुनिसे यह उपसर्ग दूर हो सकता है ॥२८॥ क्षुल्लक पुष्पदन्तने उसी समय जाकर विष्णुकुमार मुनिसे यह समाचार कहा और उन्होंने 'विक्रिया ऋद्धि प्राप्त हुई है या नहीं ?' इसकी परीक्षा की ॥२९॥ उन्होंने परीक्षाके लिए सामने खड़ी पर्वतकी दीवालके आगे अपनी भुजा फैलाई सो वह भुजा, पर्वतकी उस दीवालको भेदनकर विना किसी रुकावटके दूरतक इस तरह आगे बढ़ती गई जिस तरह मानो पानीमें ही बढ़ी जा रही हो ॥३०॥

तदनन्तर जिन्हें ऋद्धिकी प्राप्तिका निश्चय हो गया था, जो जिनशासनके स्नेही थे और नम्र मनुष्योंके लिए अत्यन्त प्रिय थे ऐसे विष्णुकुमार मुनि उसी समय विनयावनत राजा पद्मके पास जाकर उससे बोले कि हे पद्मराज ! राज्य पाते ही तुमने यह क्या कार्य प्रारम्भ कर रक्खा ? ऐसा कार्य तो कुरुवंशियोंमें पृथिवीपर कभी हुआ ही नहीं ॥३१-३२॥ यदि कोई दुष्टजन तपस्वी-जनोंपर उपसर्ग करता है तो राजाको उसे दूर करना चाहिए । फिर राजासे ही इस उपसर्गकी प्रवृत्ति क्यों हो रही है ? ॥३३॥ हे राजन् ! जलती हुई अग्नि कितनी ही महान् क्यों न हो अन्त-में जलके द्वारा शान्त कर दी जाती है फिर यदि जलसे ही अग्नि उठने लगे तो अन्य किस पदार्थसे उसकी शान्ति हो सकती है ? ॥३४॥ निश्चयसे ऐश्वर्य, आज्ञारूप फलसे सहित है अर्थात् ऐश्वर्यका फल आज्ञा है और आज्ञा दुराचारियोंका दमन करना है, यदि ईश्वर—राजा इस क्रियासे शून्य है—दुष्टोंका दमन करनेमें समर्थ नहीं है तो फिर ऐसे ईश्वरको स्थाणु—ठूँठ भी कहा है अर्थात् वह नाममात्रका ईश्वर है ॥३५॥ इसलिए पशुतुल्य बलिको इस दुष्कार्यसे शीघ्र ही दूर करो। मित्र और शत्रुओंपर समान भाव रखनेवाले मुनियोंपर इसका यह द्वेष क्या है ? ॥३६॥ शीतल स्वभावके धारक साधुको सन्ताप पहुँचाना शान्तिके लिए नहीं है क्योंकि जिस प्रकार अधिक तपाया हुआ पानी विकृत होकर जला ही देता है उसी प्रकार अधिक

१. अरुद्धः प्रसरः म० । २. न त्वाज्ञा म० । ३. उक्तक्रियाशल्यो म० । ४. शीतलशीतस्य म० ।

धीराः प्रच्छन्नसामर्थ्या[1] गाढावष्टब्धमूर्त्तयः । साधवोऽपि कदाचित् स्युर्दाहका ननु चाग्निवत् ॥३८॥
तेन ते यावदायाति नापायो वल्युपेक्षणम् । नृप ! तावन्निवर्त्तस्व मोपेक्षस्व स्वतोऽन्यतः ॥३९॥
पद्मस्ततो नतः प्राह नाथ ! राज्यं मया बलेः । सप्ताहावधिकं दत्तं नाधिकारोऽधुनाऽत्र मे ॥४०॥
त्वमेव भगवन् ! गत्वा शाधि ते कुरुते वचः । वलिर्दाक्षिण्यतोऽक्षूणादित्युक्ते वलिमाप सः ॥४१॥
आह चैनमथो साधो ! किं दिनार्द्धनिमित्तकम् । संवर्द्धनमधर्मस्य कुरुषे कर्म गर्हितम् ॥४२॥
तपःकर्मैकनिष्ठैस्तैः किमनिष्टमनुष्ठितम् । वरिष्ठेन त्वया येषु कनिष्ठेनेव यत्कृतम् ॥४३॥
स्वकर्मबन्धभीरुत्वान्नान्यानिष्टं कदाचन । तपस्विनो विचेष्टन्ते मनोवाक्कायकर्मभिः ॥४४॥
तदित्थमुपशान्तेषु न ते युक्तं दुरीहितम् । उपसंहर शान्त्यर्थमुपसर्गं प्रमादजम् ॥४५॥
ततो वलिरुवाचामी यान्ति मे यदि राज्यतः । तदा निरुपसर्गः स्यादन्यथा तदवस्थितिः ॥४६॥
विष्णुरूचे स्वयोगस्था न यान्ति पदमप्यतः । कुर्वन्त्यमी तनुत्यागं न व्यवस्थितिलङ्घनम् ॥४७॥
अनुमन्यस्व मे भूमिं स्थातुं तेषां पदत्रयम् । मातिकर्कशमात्मानं कुर्वयाचकयाचितः ॥४८॥
अनुमन्याब्रवीदित्थं तद्बहिः पदमप्यमी । यद्यतीयुस्ततो दण्ड्या न मे दोषोऽत्र विद्यते ॥४९॥
तदा हि पुरुषो लोके प्रत्यवायेन युज्यते । यदा प्रच्यवते वाक्यात् न तु वाक्यस्य पालकः ॥५०॥

माताके ऊपर जो स्नेह होता है वह दूधके अनुसार प्रकट होता है, इसलिए तू मेरी बात सुन ॥५०-५१॥ मेरे बड़े भाई राजा तृणविन्दुकी सर्वयशा देवीसे उत्पन्न हुआ मधुपिङ्गल नामका पुत्र है जो अपनी शोभासे समस्त राजाओंका तिरस्कार कर स्थित है—सबसे अधिक सुन्दर एवं प्रतापी है ॥५२॥ मैंने पहले ही उसके लिए तेरे देनेका मनमें संकल्प कर लिया था। इसलिए तू स्वयंवरमें मेरा ही मनोरथ पूर्ण कर ॥५३॥ इस प्रकार कहकर माता दिति आँसू छोड़ने लगी। माताको रोती देख कन्या सुलसाने कहा कि हे माता ! तू रो मत। मैं राजाओंके सामने जो तुझे इष्ट है वही करूँगी—तेरे कहे अनुसार मधुपिङ्गलको ही वरूँगी ॥५४॥ मन्दोदरीने यह सब सुना और जाकर कन्याकी प्राप्तिके लिए उत्कण्ठित राजा सगरके लिए एकान्तमें कह सुनाया ॥५५॥

तदनन्तर राजा सगरने शीघ्र ही अपने विश्वभूति नामक पुरोहितसे एकान्तमें मनुष्योंके लक्षणोंको बतानेवाला एक शास्त्र बनवाया ॥५६॥ और उसे धूमसे धूसरित कर तथा लोहेकी सन्दूक्में भरवा कर स्वयंवरकी भूमिमें गड़वा दिया। जब स्वयंवरका दिन आया तब सगरने स्वयंवरकी भूमिको खुदवा कर लोहेका वह सन्दूक् निकलवाया और उससे उक्त शास्त्र निकालकर राजाओंके आगे दिखाया ॥५७॥ स्वयंवरमें जो राजा आये थे, वे मनुष्योंके लक्षण सुनना चाहते थे। इसलिए उन सबके आगे पुरोहितने जोर-जोरसे उस शास्त्रको बाँचना शुरू किया ॥५८॥ उसमें लिखा था कि राजाके पैर मछली, शंख तथा अंकुश आदिके चिह्नोंसे युक्त होते हैं, कमलके भीतरी भागके समान उनका मध्य भाग होता है, एड़ियोंकी उत्तम शोभासे वे सहित होते हैं, उनकी अँगुलियोंके पौरा एक दूसरेसे सटे रहते हैं, उनके नख चिकने एवं लाल होते हैं, उनकी गाँठें छिपी रहती हैं, वे नसोंसे रहित होती हैं, कुछ-कुछ ऊष्ण होते हैं, कछुएके समान उठे होते हैं और पसीनासे युक्त रहते हैं ॥५९-६०॥ पापी मनुष्यके पैर सूपाके आकार, फैले हुए, नसोंसे व्याप्त, टेढ़े, रूखे नखोंसे युक्त, सूखे एवं विरल अँगुलियोंवाले होते हैं ॥६१॥ जो पैर छिद्र सहित एवं कषैले रंगके होते हैं वे वंशका नाश करनेवाले माने गये हैं। हिंसक मनुष्यके पैर जली हुई मिट्टीके समान और क्रोधी मनुष्यके पैर पीले रंगके जानना चाहिए ॥६२॥ जिनकी पिण्डलियाँ थोड़े एवं अत्यन्त सूक्ष्म रोमोंसे युक्त और ऊपर-ऊपर गोल होती जाती हैं, जिनके घुटने अच्छे हैं और जाँघें गोल हैं वे

---

१. सुलसे ! शृणु वृत्तं मे वत्से त्वं मातृवत्सले म० । २. सुत्यानुसारिणी म० । ३. जन्मता क०, घ०, ङ० । ४. स्थितं क्षेत्रमधिक्षिप्य म० । ५. कन्यायाः स्वीकारे चित्तं यस्य स तस्मै ।

एकैकं कूपके रोम राज्ञां द्वे द्वे सुमेधसाम् । त्र्यादीनि जडनिस्वानां केशाश्चैवंफलाः स्मृताः ॥६४॥
अल्पं दक्षिणतो वक्रं स्थूलग्रन्थि शुभं शिशोः । शिश्नं तद्विपरीतं तु विपरीतफलं मतम् ॥६५॥
म्रियन्ते स्वल्पवृषणा विषमैः स्त्रीबलाश्च तैः । समैर्भूपाश्चिरायुष्काः प्रलम्बवृषणा नराः ॥६६॥
सशब्दमूत्राः सुखिनो विपरीतास्तु दुःखिनः । द्व्यादिप्रदक्षिणावर्त्तधाराः श्रीशास्तु नेतरे ॥६७॥
स्थूलस्फिक्च पुमान्निःस्वो मांसलस्फिक् सुखी भवेत् । माण्डूकस्फिक् नरो व्याघ्रादुद्धतस्फिक्मृतिं व्रजेत्
राजा सिंहकटिः प्रोक्तो वानरौष्ट्रकटिर्धनी । समोदरः सुखी दुःखी घटोरुपिठरोदरः ॥६९॥
सम्पूर्णैर्धनिनः पार्श्वैर्निम्नवक्रैरभोगिनः । कुक्षिभिश्च तथा निम्नैर्भोगिनः समकुक्षयः ॥७०॥
उन्नतैः कुक्षिभिर्भूपाः कुधना विषमैश्च तैः । सर्पोदरा दरिद्रास्तु भवन्ति बहुभोजनाः ॥७१॥
विस्तीर्णोन्नतगम्भीरवृत्तनाभिः सुखी नरः । निम्नाल्पादृश्यनाभिस्तु कथितः क्लेशभाजनः ॥७२॥
शूलबाधाश्च दारिद्र्यं विषमा वलिमध्यमाः । सा वामदक्षिणावर्ता [1]साध्यां मेधां करोति च ॥७३॥
कुरुते भूपतिं नाभिः पद्मकर्णिकया समा । आयतोपर्यधः[2]पार्श्वा वित्तगोमच्चिरायुषः ॥७४॥

शुभ हैं—अच्छे पुरुष हैं और जिनकी पिण्डलियाँ, घुटने तथा जाँघें सूखी हैं वे निन्दनीय हैं ॥६३॥ राजाओंके एक रोम-कूपमें एक रोम होता है, विद्वानोंके एक रोम-कूपमें दो रोम होते हैं और मूर्ख तथा निर्धन मनुष्योंके एक रोम-कूपमें तीनको आदि लेकर अनेक रोम होते हैं। रोमोंके समान ही केशोंका भी फल समझना चाहिए ॥६४॥ बच्चेका लिंग यदि छोटा दाहिनी ओर कुछ टेढ़ा और मोटी गाँठसे युक्त है तो शुभ है और इससे विपरीत अशुभ है ॥६५॥ जिन मनुष्योंके वृषण (अण्डकोष) अत्यन्त छोटे होते हैं वे शीघ्र मर जाते हैं, जिनके विषम—एक छोटे एक बड़े होते हैं वे स्त्रियोंपर अपना बल रखते हैं—स्त्रियोंको वश करनेवाले होते हैं, जिनके एक बराबर होते हैं वे राजा होते हैं और जिनके नीचेकी ओर लटकते रहते हैं वे दीर्घजीवी होते हैं ॥६६॥ पेशाब करते समय जिनका मूत्र शब्द सहित निकलता है वे सुखी होते हैं और जिनका मूत्र शब्दरहित निकलता है वे दुखी होते हैं। पेशाब करते समय जिनके मूत्रकी पहली और दूसरी धारा दाहिनी ओर पड़ती है वे लक्ष्मीके स्वामी होते हैं और जिनकी धारा इसके विपरीत पड़ती है वे निर्धन होते हैं ॥६७॥ जिस पुरुषका नितम्ब स्थूल होता है वह दरिद्र होता है, जिसका पुष्ट होता है वह सुखी होता है और जिसका मण्डूकके समान ऊँचा उठा होता है वह व्याघ्रसे मृत्युको प्राप्त होता है ॥६८॥ जिसकी कमर सिंहकी कमरके समान पतली होती है वह राजा होता है और जिसकी कमर वानर अथवा ऊँटकी कमरके समान होती है वह धनी होता है। जिसका पेट न छोटा न बड़ा किन्तु समान होता है वह सुखी होता है और जिसका पेट घड़ा अथवा मटकाके समान हो वह दुखी होता है ॥६९॥ जिनकी पसलियाँ भरी हुई हों वे सुखी होते हैं और जिनकी पसलियाँ नीची तथा टेढ़ी हों वे भोगरहित होते हैं। जिनकी कूँख नीची हो वे भोग रहित होते हैं, जिनकी कूँख सम हों वे भोगी होते हैं, जिनकी कूँख उठी हुई हों वे राजा होते हैं और जिनकी कूँख विषम हों वे निर्धन होते हैं। जिनका उदर सर्पके समान लम्बा हो वे दरिद्र तथा बहुत भोजन करनेवाले होते हैं ॥७०-७१॥ जिसकी नाभि चौड़ी, ऊँची, गहरी और गोल होती है वह सुखी होता है और जिसकी नाभि छोटी तथा कुछ-कुछ दीखनेवाली होती है वह क्लेशका पात्र होता है ॥७२॥ यदि मध्य भागकी रेखाएँ विषम हैं, तो वे शूलकी बाधा तथा दरिद्रताको उत्पन्न करती हैं और वही रेखा यदि बायीं और दाहिनी ओर आवर्तों—भँवरोंसे युक्त हैं तो उत्तम बुद्धिको करती हैं ॥७३॥ कमलकी कर्णिकाके समान नाभि मनुष्यको राजा बना देती है और जिसका ऊपर, नीचे तथा आजू-बाजूका भाग विस्तृत हो ऐसी नाभि मनुष्यको धनवान्

१. साध्यं म० । २. पार्श्वं म० ।

शास्त्रार्थी स्त्रीप्रियो नित्यमाचार्यो बह्वपत्यकः । एकद्वित्रिचतुर्भिः स्याद्वलिभिः क्षितिपोऽवलिः[2] ॥७५॥
ज्ञेयाः स्वदारसन्तुष्टा ऋजुभिर्वलिभिर्नराः । [3]अगम्यगामिनः पापा विषमैर्वलिभिः पुनः ॥७६॥
[4]मांसलैर्मृदुभिः पार्श्वैर्दक्षिणावर्त्तरोमभिः । भूपास्तद्विपरीतैस्तु परप्रेष्यकरा नराः ॥७७॥
सुभगाः स्युरनुद्धूतैश्चूचुकैः पीवरैर्नराः । दीर्घैश्च विषमैर्मर्त्या जायन्ते धनवर्जिताः ॥७८॥
मांसलं हृदयं राज्ञां पृथून्नतमवेपनम् । विपरीतमपुण्यानां खररोमभिराचितम् ॥७९॥
वक्षोभिश्च समैराढ्याः पीनैः शूरास्त्वकिञ्चनाः । तनुभिर्विषमैर्निनिःस्वास्तथा शस्त्रान्तजीविताः[5] ॥८०॥
पीनेन जानुना ह्याढ्यो भोगवानुन्नतेन तु । निःस्वो निम्नास्थिनद्धेन विषमो विषमेण ना ॥८१॥
नित्यमस्वेदनाः कक्षाः पीनोन्नतसुगन्धयः । निश्चेतव्या धनेशानां सङ्कुलाः समरोमभिः ॥८२॥
निःस्वस्य चिपिटा ग्रीवा संशुष्का च सिराचिता । कम्बुग्रीवो नृपः शूरो महिषग्रीवमानवः ॥८३॥
अरोमशमभग्नं च पृष्ठं शुभकरं मतम् । रोमशं चातिभुग्नं[6] च न शुभावहमिष्यते ॥८४॥
अल्पावमांसलौ भुग्नौ[7] रोमशावधनस्य तु । सुश्लिष्टौ मांसलावंसौ शौर्यवित्तवतां नृणाम् ॥८५॥
पीनौ समौ प्रलम्बौ च करौ करिकरोपमौ । नृपाणामधनानां तु नृणां ह्रस्वौ च रोमशौ ॥८६॥
दीर्घा दीर्घायुषां पुंसां करशाखाः सुकोमलाः । सुभगानामवलिताः सूक्ष्मा मेधाविनां पुनः ॥८७॥

गोमान् और दीर्घजीवी करती है ॥७४॥ जिसके एक वलि होती है वह शास्त्रार्थी होता है, जिसके दो वलि होती हैं वह निरन्तर स्त्रीका प्रेमी होता है, जिसके तीन वलि होती हैं वह आचार्य होता है और जिसके चार वलि होती हैं वह बहुत सन्तानवाला होता है और जिसके एक भी वलि नहीं होती वह राजा होता है ॥७५॥ जिन मनुष्योंकी वलि सीधी होती हैं वे स्वदार-सन्तोषी होते हैं और जिनकी वलि विषम होती हैं वे अगम्यगामी एवं पापी होते हैं ॥७६॥ जिन मनुष्योंके पसवाड़े पुष्ट, कोमल एवं दाहिनी ओर आवर्ताकार रोमोंसे सहित होते हैं वे राजा होते हैं और जिनके इनसे विपरीत होते हैं वे दूसरोंके आज्ञाकारी किङ्कर होते हैं ॥७७॥ जिन मनुष्योंके स्तनोंके अग्रभाग छोटे और स्थूल हों वे उत्तम भाग्यशाली होते हैं और जिनके दीर्घ अथवा विषम होते हैं वे निर्धन होते हैं ॥७८॥ राजाओंका हृदय पुष्ट, चौड़ा, ऊँचा और कम्पनसे रहित होता है तथा पुण्यहीन मनुष्योंका हृदय इससे विपरीत तीक्ष्ण रोमोंसे व्याप्त होता है ॥७९॥ जिनके वक्षःस्थल सम हों वे सम्पत्तिशाली होते हैं, जिनके स्थूल हों वे शूर-वीर किन्तु निर्धन होते हैं और जिनके कृश तथा विषम हों वे निर्धन एवं शस्त्रसे मरनेवाले होते हैं ॥८०॥ जो मनुष्य स्थूल घुटनेसे सहित होता है वह धनाढ्य होता है, जिसका घुटना ऊँचा उठा होता है वह भोगी होता है, जिसका गहरा तथा हड्डियोंसे बद्ध रहता है वह निर्धन होता है और जिसका विषम होता है वह विषम ही रहता है ॥८१॥ धनाढ्य मनुष्योंकी बगलें निरन्तर पसीनासे रहित, पुष्ट, ऊँची, सुगन्धित और समान रोमोंसे व्याप्त रहती हैं ॥८२॥ निर्धन मनुष्यकी गरदन चपटी सूखी एवं नसोंसे व्याप्त रहती है। इसके विपरीत शङ्खके समान गरदनवाला मनुष्य राजा होता है और भैंसेके समान गरदनवाला मनुष्य शूर-वीर होता है ॥८३॥ जो पीठ रोमरहित एवं सीधी हो वह शुभ मानी गई है तथा जो रोमोंसे व्याप्त और अत्यन्त झुकी हुई हो वह अच्छी नहीं मानी गई है॥८४॥निर्धन मनुष्यके कन्धे छोटे, अपुष्ट, नीचेकी ओर झुके हुए और रोमोंसे व्याप्त होते हैं तथा पराक्रमी और धनवान् मनुष्योंके कन्धे सटे हुए एवं पुष्ट होते हैं ॥८५॥ राजाओंके हाथ स्थूल, सम, लम्बे और हाथीकी सूँडके समान होते हैं परन्तु निर्धन मनुष्योंके हाथ छोटे और रोमोंसे युक्त रहते हैं ॥८६॥ दीर्घायु मनुष्योंकी अङ्गुलियाँ लम्बी तथा अत्यन्त कोमल होती हैं, भाग्यशाली

---

१. शास्त्रार्थस्त्रीप्रियो म० । २. वलिरहितः । ३. अन्यदाररता नीचा वर्जिता विषमैर्नराः ख० । ४. अस्य श्लोकस्य स्थाने 'ख' पुस्तके इत्थं पाठः 'स्थूलैश्च मृदुभिः पार्श्वैर्दक्षिणावर्तरोमभिः । राजा भवति मर्त्योऽसावन्यथा किंकरो भवेत् ॥' ७७ ॥ ५. -जीविनः म० । ६. चातिभग्नं म० । ७. भग्नौ म० ।

स्थूला धनविमुक्तानां चिपिटाः प्रेष्यकारिणाम् । आढ्याः कपिकरा मर्त्याः क्रूरा व्याघ्रकराः स्मृताः ॥८८॥
निगूढगूढसुश्लिष्टसन्धिसन्मणिबन्धनैः । भूपा दारिद्र्ययुक्तास्तैः सशब्दैश्च श्लथैस्तथा ॥८९॥
निम्नैः करतलैः क्लीबाः पितृवित्तविवर्जिताः । धनिनः [1]संभृतैर्निम्नैः प्रोत्तानैस्तु प्रदायकाः ॥९०॥
लाक्षाभैरीश्वरा निस्स्वा विषमैर्विषमाश्च तैः । अगम्यगामिनः पीतैरूक्षै रूपविवर्जिताः ॥९१॥
तुषच्छविनखैः क्लीबाः स्फुटितैर्वित्तवर्जिताः । आताम्रैश्च चमूनाथाः कुनखैः परितर्किणः ॥९२॥
अङ्गुष्ठजैर्यवैराढ्याः पुत्रिणोऽङ्गुष्ठमूलजैः । निम्नातिस्निग्धरेखाभिर्धनिनो व्यत्ययेऽन्यथा ॥९३॥
सुघनाङ्गुलयोऽर्थाढ्या विरलाङ्गुलयोऽन्यथा । तिस्रः करमिता रेखा नृपतेर्मणिबन्धनात् ॥९४॥
[2]प्रदेशिनीं सृता रेखा लक्षणं परमायुषः । छिन्नाभिस्ताभिरूनाभिरायुरूनं निरूपितम् ॥९५॥
असिशक्तिगदाकुन्तचक्रतोमरपूर्विकाः । कथयन्ति चमूनाथं कररेखाः परिस्फुटम् ॥९६॥
कृशैस्तु चिबुकैर्दीर्घैर्निस्स्वा धन्यास्तु मांसलैः । [3]ओष्ठैरस्फुटितावक्रैर्भूपा विम्बफलोपमैः ॥९७॥
तीक्ष्णदंष्ट्राः समाः स्निग्धा विशदा दशना घनाः । जिह्वा रक्ता च दीर्घा च श्लक्ष्णा भोगवतां नृणाम् ॥९८॥
आननं सम्भृतं सौम्यं समं राज्ञामवक्रकम् । दुर्भगानां बृहद्वक्त्रं शठानां परिमण्डलम् ॥९९॥

मनुष्योंकी बलिरहित और बुद्धिमान् मनुष्योंकी छोटी-छोटी होती हैं ॥८७॥ निर्धन मनुष्योंके हाथ स्थूल रहते हैं, सेवकोंके हाथ चिपटे होते हैं, वानरोंके समान हाथवाले मनुष्य धनाढ्य होते हैं और व्याघ्रके समान हाथवाले मनुष्य शूर-वीर होते हैं ॥८८॥ जिनकी कलाइयाँ अत्यन्त गूढ एवं सुश्लिष्ट सन्धियोंसे युक्त होती हैं वे राजा होते हैं और जिनकी कलाइयाँ ढीलीं तथा शब्दोंसे सहित हैं वे दरिद्रतासे युक्त होते हैं ॥८९॥ जिनकी हथेलियाँ गहरी—भीतरको दबी हुई हों वे नपुंसक तथा पिताके धनसे रहित होते हैं, जिनकी हथेलियाँ भरी हुई तथा गहरी हों वे धनाढ्य होते हैं और जिनकी हथेलियाँ ऊपरको उठी हुई हों वे दानी होते हैं ॥९०॥ जिनकी हथेलियाँ लाखके समान लाल हों वे धनाढ्य होते हैं, जिनकी विषम होती हैं वे दरिद्र तथा विषम होते हैं, जिनकी पीली हों वे अगम्यगामी होते हैं और जिनकी रूक्ष होती हैं वे सौन्दर्यसे रहित कुरूप होते हैं ॥९१॥ जिनके नख तुषके समान हों वे नपुंसक, जिनके फटे हों वे निर्धन, जिनके कुछ-कुछ लाल हों वे सेनापति और जिनके भद्दे हों वे तर्क-वितर्क करनेवाले होते हैं ॥९२॥ जिनके अँगूठेपर यवका चिह्न हो वे धनाढ्य होते हैं, जिनके अँगूठेके मूलमें यवका चिह्न हो वे अधिक पुत्रवाले होते हैं, जिनके अँगूठेमें गहरी तथा चिकनी रेखाएँ होती हैं वे धनाढ्य होते हैं और जिनके इससे विपरीत रेखाएँ हैं वे निर्धन होते हैं ॥९३॥ जिनकी अँगुलियाँ अत्यन्त सघन होती हैं वे धन-सम्पन्न होते हैं और जिनकी अँगुलियाँ विषम होती हैं वे निर्धन होते हैं। जिनकी कलाईसे लेकर हाथ तक तीन रेखाएँ होती हैं वे राजा होते हैं ॥९४॥ प्रदेशिनी अँगुली तक लम्बी रेखा दीर्घायुका चिह्न है अर्थात् जिसकी रेखा कनिष्ठासे लेकर प्रदेशिनी तक लम्बी चली जाती है वह दीर्घायु होता है और जिसकी रेखाएँ कटी तथा छोटी होती हैं वह अल्प आयुका धारक होता है ॥९५॥ तलवार, शक्ति, गदा, भाला, चक्र और तोमर आदिकी रेखाएँ हाथमें हों तो वे स्पष्ट कहती हैं कि यह व्यक्ति सेनापति होगा ॥९६॥ जिनकी दाढ़ी पतली और लम्बी होती है वे दरिद्र होते हैं तथा जिनकी पुष्ट होती है वे धनी होते हैं। जिनके ओंठ बिना फटे, सीधे और बिम्बीफलके समान लाल होते हैं वे राजा होते हैं ॥९७॥ जिनकी डाढ़ें तीक्ष्ण, सम और स्निग्ध होती हैं, दाँत सफेद और सघन रहते हैं एवं जीभ लाल, लम्बी और कोमल होती है वे भोगी होते हैं ॥९८॥ जिनका मुख भरा हुआ, सौम्य, सम और कुटिलता रहित होता है वे राजा होते हैं। जिनका मुख बहुत बड़ा होता है वे अभागे

१. संवृतै-म०, ग० । २. प्रदेशिनी स्मृता म० । ३. उष्ठैरस्फुटिता वक्त्रैर्भूपा म० ।

स्त्रीवक्त्रमनपत्यानां निम्नं वक्त्रं च निश्चितम् । ह्रस्वं कृपणमर्त्यानां दीर्घमद्रव्यभागिनाम् ॥१००॥
शङ्कुकर्णाः महीपालाः रोमकर्णाश्चिरायुषः । ऋज्वी समपुटा नासा स्वल्पच्छिद्रा च भोगिनाम् ॥१०१॥
सुकृत्क्षुतं[1] धनेशानां द्वित्रिः शास्त्रवतां विदुः । संहतं च प्रमुक्तं च विदितं चिरजीविनाम् ॥१०२॥
रक्तान्तैः पद्मपत्राभैर्नेत्रैः श्रीधनभागिनः । गजेन्द्रवृषनेत्रास्तु भवन्ति वसुधाधिपाः ॥१०३॥
अमङ्गलदृशः पापाः पिङ्गलासङ्गसङ्गिनः । असम्भाष्याः सदा पुंसामदृश्याश्च विशेषतः ॥१०४॥
मानसैर्वाचिकैः कायैः पापैः सञ्चर्चिताः सदा । दुर्जना दुर्भगाः क्रूराः पापा मार्जारलोचनाः ॥१०५॥
लक्षणानां समस्तानां गुणदोषविचिन्तने । चक्षुर्लक्षणमेवात्र पर्याप्तं फलसाधने ॥१०६॥
मानोन्मानस्वरं देहं गतिसंहतिमन्वयम् । सारं वर्णं बुधो दृष्ट्वा प्रकृतिं च वदेत्फलम् ॥१०७॥
इति प्रवाच्यमानेऽसौ पुस्तके मधुपिङ्गलः । नेत्रदोषकृताशङ्को निर्गत्य सदसोऽगमत् ॥१०८॥
सुलसां च परित्यज्य प्रव्रज्य नवयौवनः । मुनिचर्याश्रितो देशान् पर्यटन्मधुपिङ्गलः ॥१०९॥
इतः सुलसदम्भोजलोचनां[2] सुलसां स्वयम् । प्राप्तः स्वयंवरे दक्षः सगरः सुखमन्वभूत् ॥११०॥
तदात्वेऽस्येति शब्दश्चेद् वैदग्ध्यमभिकथ्यते । नातिगूढतया जन्तुरायत्यां तु दुरन्तताम् ॥१११॥
सामुद्रिकोऽन्यदाऽद्राक्षीन्निःसङ्गमधुपिङ्गलम् । मध्याह्ने पुरि कस्याश्चित्पारणार्थमुपागतम् ॥११२॥

होते हैं और जिनका मुख गोलाकार होता है वे मूर्ख होते हैं ॥९९॥ सन्तान-रहित मनुष्योंका मुख स्त्रीके समान तथा नीचा होता है। कंजूस मनुष्योंका मुख छोटा और निर्धन मनुष्योंका मुख लम्बा होता है ॥१००॥ जिनके कान कीलाके समान हों वे राजा होते हैं, जिनके कानोंपर रोम होते हैं वे दीर्घायु होते हैं, जिनकी नाक सीधी समान पुटवाली एवं छोटे छिद्रोंसे युक्त होती है वे भोगी होते हैं ॥१०१॥ जिनको एक छींक आवे वे धनाढ्य, जिनको दो-तीन छींकें एक साथ आवें वे विद्वान् तथा जिनको लगातार अनेक खुली छींकें आवें वे दीर्घायु होते हैं ॥१०२॥ जिनके नेत्र अन्तमें लाल और कमल पत्रके समान हों वे लक्ष्मीमान् और जिनके गजेन्द्र एवं बैल-के समान हों वे राजा होते हैं ॥१०३॥ जो मनुष्य पिङ्गलवर्णके नेत्रोंसे युक्त हैं वे अमाङ्गलिक और पापी हैं उनके साथ न कभी बात करना चाहिए और न उनकी ओर खासकर देखना चाहिए ॥१०४॥ जिनके नेत्र मार्जारके नेत्रोंके समान रहते हैं वे सदा मानसिक, वाचनिक और कायिक पापोंसे युक्त होते हैं तथा दुर्जन, अभागे, क्रूर और पापी माने गये हैं ॥१०५॥ समस्त लक्षणोंके गुण और दोषका विचार करते समय चक्षुके लक्षणका पूर्ण विचार करना चाहिए क्योंकि फलकी सिद्धिके लिए यही पर्याप्त कारण है ॥१०६॥ विद्वान्को चाहिए कि वह मनुष्यके मान, उन्मान, स्वर, देह, चाल-ढाल, वंश, उत्तमवर्ण और प्रकृतिको देखकर फलका प्रतिपादन करे ॥१०७॥

इस प्रकार पुस्तक बाँचे जानेपर मधुपिङ्गलको यह आशङ्का हो गयी कि हमारे नेत्रमें दोष है इसीलिए वह सभासे निकलकर चला गया ॥१०८॥ यद्यपि मधुपिङ्गल नवयौवनसे युक्त था तथापि सुलसाको छोड़कर दीक्षित हो गया और मुनिचर्याको धारणकर अनेक देशोंमें विहार करने लगा ॥१०९॥ इधर राजा सगर बड़ा चतुर था इसलिए वह कमलके समान सुन्दर नेत्रोंवाली सुलसाको स्वयंवरमें स्वयं प्राप्तकर सुखका उपभोग करने लगा ॥११०॥ आचार्य कहते हैं कि ऐसी प्रवृत्ति तत्काल तो चतुराई कही जाती है परन्तु वह सदा छिपी नहीं रहती इसलिए इसका करने-वाला प्राणी आगामी कालमें अवश्य ही दुष्परिणामको प्राप्त होता है—उसका खोटा फल भोगता है ॥१११॥

तदनन्तर एक दिन मध्याह्नके समय पारणाके लिए किसी नगरमें आये हुए दिगम्बर मुद्रा

---

१. कृतं म० । २. सुलसती सुशोभमाने अम्भोजलोचने यस्याः सा ताम् ।

पादमस्तकपर्यन्तान्निरूप्यावयवान्यतेः । सशिरःकम्पमाहासौ महाविस्मयसङ्गतः ॥११३॥
तिलमात्रोऽपि देहस्य नेक्ष्यतेऽवयवो मुनेः । सामुद्रया सुदृष्ट्या यः शुद्धया परिदूष्यते ॥११४॥
तिष्ठत्वन्यदिहामुष्य सल्लक्षणकदम्बकम् । राज्यं सौभाग्यमप्याह मधुपिङ्गलनेत्रता ॥११५॥
ईदृग्लक्षणयुक्तोऽपि यदयं नवयौवने । परिभ्रमति भिक्षार्थी तद्धिक् सामुद्रशास्त्रकम् ॥११६॥
यद्येष दग्धदैवेन कदर्थयितुमर्थितः । तत्किमर्थमनिन्द्येन लक्षणौघेन चर्चितः ॥११७॥
अथवा दुःखभीरुत्वान्न स्पृशन्ति सुखैषिणः । फलितामपि दुष्पाकां विषवल्लीमिव श्रियम् ॥११८॥
शुभलक्षणपूर्णस्य पुनः शुद्धान्वयस्य हि । युज्यते[1] क्षपतोऽमुष्य मुमुक्षोर्दीक्षया धृतिः ॥११९॥
सामुद्रिकवचः श्रुत्वा नरः कश्चिदुवाच तम् । किं सामुद्रिकवार्त्ताऽस्य न श्रुता विश्रुतावनौ ॥१२०॥
मिलितैः खलभूपालैः सुलसायाः स्वयंवरे । चक्षुर्लक्षणहीनोऽयमिति संसदि दूषितः ॥१२१॥
यथैव सूचकः पुंसां पृष्ठमांसस्य खादकः । निन्दितः स्वप्रशंसी च तथैव किल पिङ्गलः ॥१२२॥
परप्रमाणको मुग्धो मत्वात्मानमलक्षणम् । मधुपिङ्गः शुभाक्षोऽयं विलक्षस्तपसि स्थितः ॥१२३॥
प्रमादालस्यदर्पेभ्यो ये स्वतो नागमेक्षिणः । ते शठैर्विप्रलभ्यन्ते दृष्टादृष्टार्थगोचरे ॥१२४॥
स्वयंवरे नरश्रेष्ठः कन्यया सगरो वृतः । वृतः[2] क्षत्रसमूहेन भोगासक्तोऽवतिष्ठते ॥१२५॥

धारी मधुपिङ्गलको एक सामुद्रिकशास्त्रीने देखा ॥११२॥ वह पैरसे लेकर मस्तक तक मुनिराजके समस्त अवयवोंको देखकर बहुत भारी आश्चर्यमें पड़ गया और शिर हिलाता हुआ कहने लगा कि इन मुनिके शरीरमें तिल बराबर भी ऐसा अवयव नहीं दिखाई देता जो सामुद्रिक शास्त्रकी शुद्ध दृष्टिसे दूषित किया जा सके अर्थात् जिसमें सामुद्रिक-शास्त्रके अनुसार दोष बताया जा सके ॥११३-११४॥ इनके शरीरमें जो उत्तमोत्तम अन्य लक्षणोंका समूह है वह तो एक ओर रहे एक नेत्रोंकी पीलाई ही इनके राज्य तथा सौभाग्यको सूचित कर रही है ॥११५॥ क्योंकि ऐसे लक्षणोंसे युक्त होनेपर भी जब यह नई जवानीमें भिक्षाके लिए इधर-उधर भ्रमण कर रहा है तब ऐसे सामुद्रिक शास्त्रको धिक्कार हो ॥११६॥ यदि दुर्दैव इसे पीड़ित ही करना चाहता है तो फिर निर्दोष लक्षणोंके समूहसे इसे युक्त क्यों किया ? ॥११७॥ अथवा यह भी हो सकता है कि जो मनुष्य सुखकी इच्छा रखते हैं वे दुःखसे भयभीत होनेके कारण फलोंसे लदी किन्तु खोटा फल देनेवाली विष लताके समान प्राप्त हुई लक्ष्मीको छूते भी नहीं हैं ॥११८॥ यथार्थमें यह मुनि शुभ लक्षणोंसे पूर्ण और शुद्ध कुलका है तथा मोक्षकी इच्छासे तप कर रहा है इसलिए इसका दीक्षा द्वारा सन्तोष धारण करना युक्त ही है ॥११९॥

सामुद्रिकके उक्त वचन सुनकर किसी मनुष्यने उससे कहा कि क्या आपने इसके सामुद्रिक शास्त्रकी बात सुनी नहीं ? वह तो समस्त पृथिवीमें प्रसिद्ध है ॥१२०॥ सुलसाके स्वयंवरमें इकट्ठे हुए दुष्ट राजाओंने 'यह नेत्रके लक्षणोंसे हीन है' यह कहकर इसे सभामें दूषित ठहराया था ॥१२१॥ उस समय कहा गया था कि जिस प्रकार पीठ पीछे दूसरेकी बुराई करनेवाला चुगल और अपनी प्रशंसा स्वयं करनेवाला मनुष्य निन्दित है उसी प्रकार यह पिङ्गल भी निन्दित है—दोषयुक्त है ॥१२२॥ यह मधुपिङ्गल भोला-भाला था तथा दूसरोंको प्रमाण मानता था इसलिए शुभ नेत्रोंका धारक होनेपर भी अपने आपको अशुभ लक्षणवाला मान बैठा और लज्जित हो तप करने लगा ॥१२३॥ ठीक ही है जो मनुष्य प्रमाद, आलस्य और अहंकारके कारण स्वयं शास्त्रोंको नहीं देखते हैं वे देखे-अनदेखे पदार्थोंके विषयमें धूर्तोंके द्वारा ठगे जाते हैं ॥१२४॥ मधुपिङ्गलके चले जानेपर कन्याने स्वयंवरमें राजा सगरको वर लिया जिससे वह क्षत्रियोंके समूहसे घिरा भोगोंमें आसक्त है ॥१२५॥

---

१. क्षपितेऽ-ग । -क्षिपितेऽ-ङ । ऽक्षयतो ख. । २. वृतक्षत्र -म० ।

इति श्रुत्वा महाक्रोधः स मृत्वा मधुपिङ्गलः । जातो वननिकायेषु[1] महाकालोऽधमामरः ॥१२६॥
अहो कषायपानस्य वैषम्यं यद्विरोधिनः । सम्यक्त्वौषधिपानस्य जातमत्यन्तदूषणम् ॥१२७॥
सुलसापहृतिं ध्यात्वा सोपायां सगरेण सः । क्रोधाग्निना महाकालो[2] जज्वाल हृदये भृशम् ॥१२८॥
स्त्रीवैरविषदग्धस्य हृदयस्य विदाहिनः । स दाहोपशमं कर्तुं न शशाक शमाम्बुना ॥१२९॥
अचिन्तयदसौ येन शत्रोर्दुःखपरम्परां[3] । जायते दीर्घसंसारे तमुपायं करोम्यहम् ॥१३०॥
प्राणी प्रत्यपकाराय चेष्टते ह्यपकारिणः । तैरुपायैर्यकैर्याति मूढधीः स्वयमप्यधः ॥१३१॥
आगतश्च महाकालः सत्रक्रोधेन दीपितः । नारदेन जितं जल्पे पश्यति स्म स पर्वतम् ॥१३२॥
शाण्डिल्याकृतिरूपोऽद्य तस्य विश्वासमाह सः । मागाः पर्वत! निर्वेदं जल्पे[4]ऽहं जित इत्यलम् ॥१३३॥
ध्रौव्यनाम्नो गुरोः शिष्यः शाण्डिल्योऽहं पिता च ते । वैन्यश्चापि तथोदञ्चः प्रावृतश्चैव पञ्चमः ॥१३४॥
सूनोः क्षीरकदम्बस्य भवतो यः पराभवः । स ममैव ततोऽस्याहं मार्जनाय समुद्यतः ॥१३५॥
सहायं मां परिप्राप्य कुरु क्षेत्रमकण्टकम् । मरुत्सखस्य रौद्रस्य शिखिनः किमु दुष्करम् ॥१३६॥
इति पर्वतमाभाष्य पुरस्कृत्य स दुष्टधीः । सक्षत्रं भरतक्षेत्रं चक्रे व्याधिशताकुलम् ॥१३७॥
चक्रे व्याधिविनाशाय शान्तिकर्म च पर्वतः । विश्वासेन ततो लोकः शरणं प्रतिपद्यते ॥१३८॥
सगरः क्षत्रलोकेन सहोपेत्य तमादरात् । होमैर्मन्त्रविधानैश्च बभूव विगतज्वरः ॥१३९॥

यह सुनकर मधुपिङ्गलको बहुत भारी क्रोध उत्पन्न हुआ और उसी समय मरकर वह व्यन्तर देवोंमें महाकाल नामका नीच देव हुआ ॥१२६॥ आचार्य कहते हैं कि अहो कषाय रूपी कषैले शरबतकी बड़ी विषमता है क्योंकि वह सम्यग्दर्शन रूपी ओषधिके शरबतको अत्यन्त दूषित कर देता है। भावार्थ—जिस प्रकार कषैला रस पीनेसे उसके पूर्व पिया हुआ मीठा रस दूषित हो जाता है उसी प्रकार क्रोधादि कषायोंकी तीव्रतासे सम्यग्दर्शन रूप ओषधिका रस दूषित हो जाता है—सम्यग्दर्शन नष्ट हो जाता है, यह बड़े आश्चर्यकी बात है ॥१२७॥ राजा सगरने उपाय भिड़ाकर सुलसाका अपहरण किया था इसका ध्यान आते ही महाकाल, हृदयमें क्रोध रूपी अग्निसे अत्यन्त जलने लगा ॥१२८॥ उसका हृदय स्त्रीके वैर रूपी विषसे जलकर तीव्र दाह उत्पन्न कर रहा था इसलिए वह शान्ति रूपी जलसे उसकी दाहको शान्त करनेके लिए समर्थ नहीं हो सका ॥१२९॥ वह विचार करने लगा कि जिससे शत्रुको दीर्घ संसारमें दुःखोंकी परम्परा प्राप्त होती रहे मैं उसी उपायको करता हूँ ॥१३०॥ आचार्य कहते हैं कि यह प्राणी अपने अपकारी मनुष्यका उन उपायोंसे अपकार करनेकी—बदला लेनेकी चेष्टा करता है कि जिनसे वह मूर्ख स्वयं नीचेकी ओर जाता है—अधोगतिको प्राप्त होता है ॥१३१॥ इस प्रकार राजा सगरके ऊपर क्रोधसे देदीप्यमान होता हुआ महाकाल पृथिवीपर आया और आते ही उसने शास्त्रार्थमें नारदके द्वारा जीते हुए पर्वतको देखा ॥१३२॥ महाकालने शाण्डिल्यका रूप धारण कर पर्वतको विश्वास दिलाते हुए उससे कहा कि हे पर्वत ! तुम इस बातका खेद मत करो कि मैं शास्त्रार्थमें हार गया हूँ ॥१३३॥ ध्रौव्य नामक गुरुके मैं शाण्डिल्य, तुम्हारे पिता क्षीरकदम्बक, वैन्य, उदञ्च और प्रावृत ये पाँच शिष्य थे ॥१३४॥ तुम क्षीरकदम्बकके पुत्र हो इसलिए जो तुम्हारा पराभव है वह मेरा ही पराभव है और इसीलिए मैं उसे दूर करनेके लिए उद्यत हूँ ॥१३५॥ तुम मेरी सहायता पाकर अपने क्षेत्रको निष्कण्टक करो, क्योंकि वायुसे प्रज्वलित भयंकर अग्निको क्या कार्य कठिन है ? अर्थात् कुछ भी नहीं ॥१३६॥ इस प्रकार दुर्बुद्धिके धारक महाकालने पर्वतसे कहकर तथा उसे आगे कर राजाओं सहित समस्त भरत क्षेत्रको सैकड़ों बीमारियोंसे व्याकुल कर दिया ॥१३७॥ उन बीमारियोंको नष्ट करनेके लिए पर्वत शान्तिकर्म करता था जिससे लोग विश्वास कर उसकी शरणमें आने लगे ॥१३८॥ राजा सगर भी अनेक

१. व्यन्तरदेवेषु । अवनिकायेषु म० । २. महाकायो म० । ३. परम्परां म० । ४. वादे ।

हिंसानोदनयाऽनार्षान् क्रूरान् क्रूरः स्वयंकृतान्। वेदानध्यापयन् विप्रान् क्षिप्रं देवोऽनयद्वशम् ॥१४०॥
अश्वमेधोऽजगोमेधो यागो यागफलैषिणाम्। दर्शितः क्षत्रियादीनां साक्षात्प्रत्ययकारिणाम् ॥१४१॥
सूयन्ते यत्र राजानः शतशोऽपि सहस्रशः। राजसूयक्रतुस्तेन दर्शितो राजवैरिणा ॥१४२॥
प्राग्दिवाकरदेवाख्यः खेचरो नारदान्वितः। पापविघ्नकरस्तेन विघ्नितः सुरमायया ॥१४३॥
अणिमादिगुणोत्कृष्टे[1] विकुर्वाणे सुराधमे। विद्याबलसमृद्धोऽपि मानुषः किं करिष्यति ॥१४४॥
घातयित्वा बहून् जीवान् ब्राह्मणादिभिरुद्यतैः। यष्टेऽयष्ट[2] स दुष्टस्तान् स्वपरानिष्टकृत्सुरः ॥१४५॥
इष्ट्वा च सगरं यागे सुलसां च कृपोज्झितः। हिंसानन्दं परिप्राप्तः प्रयातश्च निजं पदम् ॥१४६॥
प्रवर्तिताश्च ते वेदा महाकालेन कोपिना। विस्तारितास्तु सर्वस्यामवनौ पर्वतादिभिः ॥१४७॥
नारदस्य सुतायाऽसौ खेचरोऽपि सुदृष्टये। सुतां परमकल्याणीं ददौ विद्यासमन्विताम् ॥१४८॥
अन्वये तनुजातेयं क्षत्रियायां सुकन्यका। सोमश्रीरिति विख्याता वसुदेवद्विजन्मनः ॥१४९॥
करालब्रह्मदत्तेन मुनिना दिव्यचक्षुषा। वेदे जेतुः समादिष्टा महतः सहचारिणी ॥१५०॥
इति श्रुत्वा तदाधीत्य सर्वान् वेदान् यदूत्तमः[3]। जित्वा सोमश्रियं श्रीमानुपयेमे[4] विधानतः ॥१५१॥
वरे प्रेम वरं जातं नववध्वा यथा दृढम्। वरस्यापि तथा तस्यां तत्र का सुखवर्णना ॥१५२॥

राजाओंके साथ आदरपूर्वक उसके पास आया और बताये हुए होम तथा मन्त्र-विधानसे नीरोग हो गया ॥१३९॥ दुष्ट महाकाल देव हिंसाकी प्रेरणा देनेके लिए स्वयं बनाये हुए अनार्ष वेद ब्राह्मणोंको पढ़ाता था और उन्हें शीघ्र अपने वश कर लेता था ॥१४०॥ उसने यज्ञके फलकी इच्छा रखनेवाले एवं साक्षात् विश्वास करनेवाले क्षत्रिय आदि जनोंको अश्वमेध, अजमेध तथा गोमेध यज्ञ बतलाये ॥१४१॥ जिसमें सैकड़ों हजारों राजा होमे जाते थे ऐसा राजसूय यज्ञ भी उस राजाओंके वैरी महाकालने दिखलाया था ॥१४२॥ यद्यपि प्राग्दिवाकर देव नामका विद्याधर नारदके साथ आकर महाकालके इस पाप कार्यमें विघ्न करनेके लिए उद्यत था तथापि देवकी मायाने उसके इस कार्यमें विघ्न डाल दिया ॥१४३॥ सो ठीक ही है क्योंकि अणिमादि गुणोंसे उत्कृष्ट नीच देव जब अपनी विक्रिया दिखानेमें तत्पर है तब मनुष्य विद्याबलसे समृद्ध होनेपर भी क्या कर सकता है ? ॥१४४॥ इस प्रकार निज और परका अहित करनेवाले उस दुष्ट देवने आज्ञापालन करनेमें उद्यत ब्राह्मण आदिके द्वारा बहुत जीवोंका घात कराकर उन्हें यज्ञमें होम दिया। यही नहीं उस निर्दयने राजा सगर और सुलसाको भी यज्ञमें होम दिया और इस प्रकार हिंसानन्द नामक रौद्र ध्यानको प्राप्त होता हुआ अपने स्थानपर चला गया ॥१४५-१४६॥ क्रोधसे युक्त महाकाल देवने उन अनार्ष वेदोंको चलाया और पर्वत आदिने समस्त पृथिवीपर उनका विस्तार किया ॥१४७॥ नारदका एक सम्यग्दृष्टि पुत्र था। उसे प्राग्दिवाकर देव नामक विद्याधरने विद्याओंसे सहित अपनी परम कल्याणी पुत्री प्रदान की थी ॥१४८॥ उसी वंशमें वसुदेव ब्राह्मणकी क्षत्रिया स्त्रीसे यह सोमश्री नामकी उत्तम कन्या उत्पन्न हुई है ॥१४९॥ करालब्रह्मदत्त नामक अवधिज्ञानी मुनिराजने कहा था कि जो इसे वेदोंमें जीतेगा उसी महापुरुषकी यह स्त्री होगी ॥१५०॥

यह सुनकर श्रीमान कुमार वसुदेवने उस समय समस्त वेदोंका अध्ययन किया और सोमश्रीको जीतकर विधिपूर्वक उसके साथ विवाह किया ॥१५१॥ जिस प्रकार नववधूका कुमार वसुदेवमें दृढ़ प्रेम था उसी प्रकार कुमार वसुदेवका भी नववधूमें दृढ़ प्रेम था। इसलिए उनके

१. सुरोत्कृष्टे म०। २. यष्टे यष्टा स दुष्टस्तां म०। ३. वसुदेवः। ४. परिणीतवान्।

पृथ्वीच्छन्दः

रहस्यकृत वक्षसा घनपयोधरोत्पीडनं
चुचुम्ब सकचग्रहं जघनमाजघानाधरम् ।
ददंश नृवरो वरः सनखपातमस्या वधू-
र्विवेद मदनातुरा न च तथाविधं बाधनम् ॥१५३॥
चचार खचरीसखः खचरलोकलोकाधिकः
स्वरूपगुणसम्पदारतिपु दक्षिणो यो युवा ।
स्वतन्त्रजिनभक्तयाऽऽरमदतीव सोमश्रिया
पुरे गिरितटाभिधे सुमतिचारुयोषित्सखः ॥१५४॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ सोमश्रीलाभवर्णनो नाम त्रयोविंशः सर्गः ॥२३॥

सुखका क्या वर्णन किया जाय ? ॥१५२॥ कुमार वसुदेवने एकान्त स्थानमें अपने वक्षःस्थलसे उसके स्थूल स्तनोंका पीडन किया, केश खींचते हुए चुम्बन किया, नखक्षत करते हुए नितम्बका आस्फालन किया और अधरको डसा परन्तु कामातुर सोमश्रीने उस प्रकारकी बाधाको कुछ भी नहीं जाना ॥१५३॥ जो अपने सौन्दर्य तथा गुण रूपी सम्पदाके द्वारा विद्याधरोंसे भी श्रेष्ठ थे, जो विद्याधरियोंके साथ भ्रमण करते थे, जो रतिक्रियामें अत्यन्त कुशल एवं युवा थे और जो सुबुद्धि रूपी सुन्दर स्त्रीके सखा थे, ऐसे कुमार वसुदेवने गिरितट नामक नगरमें स्वतन्त्र एवं जिनभक्त रमणी सोमश्रीके साथ अत्यधिक क्रीडा की ॥१५४॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें सोमश्रीके लाभका वर्णन करनेवाला तेईसवाँ सर्ग समाप्त हुआ ॥२३॥

चतुर्विंशः सर्गः

अथासावेकदा शौरिरिन्द्रशर्मोपदेशतः । उद्याने साधयन् विद्यां निशि धूर्त्तैर्निरीक्षितः ॥१॥
आरोप्य शिबिकां क्वापि दूरं नीतो दिवानने[1] । अपसृत्य ततो यातो नगरं तिलवस्तुकम् ॥२॥
बाह्यचैत्यगृहोद्याने रात्रौ सुप्तः प्रबोधितः । केनचिद्राक्षसेनेव पुंसा मानुषभक्षिणा ॥३॥
भो ! भो ! बुध्यस्व बुध्यस्व कस्त्वं स्वपिषि मानुष । व्याघ्रस्येव क्षुधार्त्तस्य ममास्ये पतितः स्वयम् ॥४॥
विनिद्रो रौद्रनादेन शौरिः शूरतरोऽमुना । जिघांसन्तं भुजेनारिमाजघान भुजेन सः ॥५॥
दृढमुष्टिघनाघातघोरनिर्घोषभीषणम् । भूतं[2] भूतलसंक्षोभं युद्धमुद्धतयोस्तयोः ॥६॥
चिरेण दानवाकारो यादवेन बलीयसा । निहत्य मल्लयुद्धेऽसौ मोचितः प्रियजीवितम् ॥७॥
प्रभाते पौरलोकस्तं नराशिनरनाशनम्[3] । रथेन पुरमावेश्य सत्पौरुषमपूजयत् ॥८॥
कन्याः पञ्चशतान्यत्र रूपलावण्यवाहिनीः । कुलशीलवतीर्लब्ध्वा तत्र तावदतिष्ठपत्[4] ॥९॥
कुतस्त्योऽयं नृमांसादः पुरुषः परुषाशयः । इति तेन तदा पृष्टैर्वृद्धैरिति निवेदितम् ॥१०॥
आसीन्नृपः कलिङ्गेषु पुरे काञ्चननामनि । जितशत्रुगणः[5] ख्यातो जितशत्रुरभिख्यया ॥११॥
आसीदयममोघाज्ञः स्वदेशे देशपालकः । जीवघातनिवृत्तेच्छः सर्वत्राभयघोषणः ॥१२॥

अथानन्तर एक समय कुमार वसुदेव, इन्द्रशर्मा ब्राह्मणके उपदेशसे गिरितट नगरके उद्यान-में रातको विद्या सिद्ध कर रहे थे कि कुछ धूर्तोंने उन्हें देख लिया ॥१॥ वे उन्हें पिछली रात्रिमें पालकीपर बैठाकर कहीं दूर ले गये। वसुदेव वहाँसे चलकर तिलवस्तु नामक नगर पहुँचे ॥२॥ और वहाँ नगरके बाहर जो चैत्यालय था उसके उद्यानमें रात्रिके समय सो गये, वहाँ राक्षसके समान एक मनुष्यभक्षी पुरुषने आकर उन्हें जगाया ॥३॥ वह कहने लगा कि अरे मनुष्य ! जाग-जाग, तू यहाँ कौन सो रहा है ? भूखसे पीड़ित बाघके समान मेरे मुखमें तू स्वयं आकर पड़ा है ॥४॥ शूर-वीर वसुदेव उस भयंकर शब्दसे जाग उठे। जब मनुष्यभक्षी पुरुष अपनी भुजासे वसुदेवको मारनेके लिए उद्यत हुआ तब उन्होंने भी अपनी भुजाओंसे उसे कसकर पिटाई लगाई ॥५॥ तदनन्तर प्रबल शक्तिको धारण करनेवाले उन दोनोंके बीच पृथिवीको कँपा देनेवाला युद्ध हुआ। उनका वह युद्ध मुट्ठियोंके प्रबल प्रहारसे उत्पन्न घोर शब्दसे भयंकर था ॥६॥ वसुदेव बहुत बलवान् थे इसलिए उन्होंने बहुत देर तक युद्ध करनेके बाद उस दानवाकार मनुष्यको मल्लयुद्धमें मारकर प्राण-रहित कर दिया ॥७॥ जब प्रातःकाल हुआ तब नगरवासी लोग, उत्तम पौरुषके धारी एवं नरभोजी मनुष्यको नष्ट करनेवाले वसुदेवको रथपर बैठाकर नगरमें ले गये और उन्होंने वहाँ उनका बहुत सन्मान किया ॥८॥ कुमार वसुदेव उस नगरमें रूप और सौन्दर्यको धारण करनेवाली कुल और शीलसे सुशोभित पाँच सौ कन्याएँ प्राप्त कर वहीं रहने लगे ॥९॥ मनुष्योंके मांसको खानेवाला यह दुष्ट मनुष्य यहाँ कहाँसे आया था ? इस प्रकार वसुदेवके पूछनेपर वहाँके वृद्धजनोंने इस प्रकार कहा ॥१०॥

कलिङ्ग देशके काञ्चनपुर नामक नगरमें शत्रुओंके समूहको जीतनेवाला एक जितशत्रु नामका राजा था ॥११॥ अपने देशमें उस राजाकी आज्ञाका कोई भी उल्लङ्घन नहीं करता था। वह नीति पूर्वक देशका पालन करता था, उसकी इच्छा जीव-हिंसासे दूर रहती थी तथा समस्त

---

१. पश्चिमरात्रौ। २. जातम्। ३. मनुष्यभक्षिमनुष्यनाशकं—वसुदेवम्। ४. स्थितवान्। ५. जितः शत्रुगणो येन सः।

तनयस्तस्य सौदासः स मांसरसलालसः । मायूरमांसमात्रायाः पितुराज्ञामदापयत् ॥१३॥
प्रत्यहं शिखिनां मांसं सूपकारेण संस्कृतम् । भक्षयत्यप्रकाशं तत् प्रासादान्तरवस्थितः ॥१४॥
कदाचित्तु हृते मांसे मार्जारेण पुरो बहिः । सूपकारो गतोऽपश्यन्मृतं शिशुमुपांशु च ॥१५॥
आनीयादात्सुसंस्कृत्य सौदासोऽप्यघसन्मुदा । अपृच्छच्च स तं मांसं कस्येदमिति सादरः ॥१६॥
अशितानि पुरा भद्र ! पिशितानि बहूनि भोः । न शतांशेन तान्यस्य स्पृशन्ति स्म रसान्तरम् ॥१७॥
सत्यं ब्रूहि हितं साधो ! सत्यमस्मन्न ते भयम् । इत्युक्तः सोऽवदत्सर्वं नीत्या युक्तः स्वचेष्टितम् ॥१८॥
सौदासोऽपि च तत् श्रुत्वा सूपकारं शशास सः । तुष्टोऽस्मि मर्त्यमांसं मे नित्यमानीयतामिति ॥१९॥
पितर्युपरते तावत्सौदासेऽपि पदस्थिते । सोपायं सूपकारोऽभूदन्वहं शिशुमारकः ॥२०॥
प्रत्येकं प्रत्यहं हानिमपत्यानामवेत्य वै । परीक्ष्य भक्षको लोकैराशु देशादपाकृतः ॥२१॥
रन्ध्रे व्याघ्रवदापत्य निशि नीत्वा तु मानुषान् । दिवाऽरण्ये चरः कुर्याद् व्यसनोपहतो न किम् ॥२२॥
असाध्यो लोकवित्रासी स एष भवताऽधुना । प्रापितः साधुना मृत्युमसाधारणशक्तिना ॥२३॥
इत्यावेद्य वयोवृद्धाः सौदासस्य कुचेष्टितम् । वस्त्रमाल्यविभूषाद्यैः पूजयन्ति स्म यादवम् ॥२४॥
लेभे च सोऽचलग्रामे सार्थवाहस्य देहजाम् । वेदसामपुरं चामा प्रयातो वनमालया ॥२५॥

राज्यमें उसने अभयकी घोषणा करा रक्खी थी ॥१२॥ उसका एक सौदास नामका पुत्र था । वह मांस खानेका बड़ा लम्पट था इसलिए उसने पितासे मयूरका मांस खानेकी आज्ञा प्राप्त कर ली थी ॥१३॥ प्रतिदिन रसोइया उसे मयूरका मांस तैयार कर देता था और वह उसे महलके भीतर छिपकर खाया करता था ॥१४॥ किसी एक दिन तैयार मांसको बिल्ली उठा ले गई जिससे मांसकी तलाशमें रसोइया नगरके बाहर गया वहाँ उसने एक मरा हुआ बालक देखा जिसे वह छिपाकर ले आया और अच्छी तरह तैयार कर उसे सौदासके लिए दे दिया । सौदासने उस मांसको बड़ी प्रसन्नतासे खाया और आदरपूर्वक उस रसोइयासे पूछा कि यह मांस किसका है ? ॥१५-१६॥ वह कहने लगा कि हे भद्र ! मैंने पहले बहुतसे मांस खाये हैं पर वे इस मांसके रसके सौवें भागका भी स्पर्श नहीं करते ॥१७॥ हे भले आदमी ! जो बात सत्य और हितकारी हो वह कहो । यह सच है कि तुम्हें मुझसे कुछ भी भय नहीं है । इस प्रकार कहनेपर नीतिसे युक्त रसोइयाने अपनी सब चेष्टा सौदासके लिए बतला दी ॥१८॥ रसोइयाकी बात सुनकर सौदासने उसकी बहुत प्रशंसा की और कहा कि मैं तुम्हारे ऊपर बहुत सन्तुष्ट हूँ तुम प्रतिदिन मेरे लिए मनुष्यका ही मांस लाया करो ॥१९॥

तदनन्तर पिताके मरनेपर सौदास राज्य-सिंहासनपर आरूढ़ हुआ और उसका रसोइया किसी उपायसे प्रतिदिन बच्चोंको मारने लगा ॥२०॥ 'प्रतिदिन एक-एक बच्चेकी हानि होती जा रही है' यह देख नगरवासी लोगोंमें खलबली मच गई । उन्होंने परीक्षा कर सौदासको शिशु-भक्षक पाया । और उसे शीघ्र ही देशसे बाहर खदेड़ दिया ॥२१॥ अब वह अवसर देख व्याघ्रकी तरह रात्रिमें झपाटा मारकर मनुष्योंको ले जाता है और दिनभर जङ्गलमें रहता है सो ठीक ही है क्योंकि व्यसनमें पड़ा मनुष्य क्या नहीं करता है ? ॥२२॥ हे कुमार ! लोगोंको भय-भीत करनेवाला यह वही सौदास था । यह हमलोगोंके लिए असाध्य था परन्तु असाधारण शक्तिको धारण करनेवाले आपने उसे आज यमलोक पहुँचा दिया ॥२३॥ इस प्रकार नगरके वयो-वृद्ध लोगोंने सौदासकी कुचेष्टाओंका वर्णन कर वस्त्र, माला तथा आभूषण आदिसे वसुदेवका खूब सत्कार किया ॥२४॥

तदनन्तर वहाँसे चलकर कुमार वसुदेवने अचलग्रामके सेठकी वनमाला नामक पुत्रीको प्राप्त किया—उसके साथ विवाह किया और वहाँसे वनमालाके साथ चलकर वे वेदसामपुर

तत्पुराधिपतिं युद्धे स जित्वा कपिलश्रुतिम् । उवाह विधिना वीरस्तत्कन्यां कपिलाभिधाम् ॥२६॥
तस्यामजनयत्पुत्रं प्रसिद्धं कपिलाख्यया । प्रीतिं श्वसुरपुत्रेण प्राप्तश्चांशुमता पराम् ॥२७॥
वारिबन्धेऽन्यदा गन्धगजेन[1] ह्रियमाणकः । दृढमुष्टिर्जघानेभं नीलकण्ठः शुचाभवत्[2] ॥२८॥
पतितश्च शनैः शौरिस्तडागाम्भस्यनाकुलः । अटव्याश्च विनिष्क्रम्य गतः शालगुहां पुरीम् ॥२९॥
तत्र पद्मावतीं लेभे धनुर्वेदोपदेशतः । जित्वा जयपुरेशं च तत्सु[3]तामपि लब्धवान् ॥३०॥
साकमंशुमता यातो भद्रिलाख्यपुरं परम् । पौण्ड्रश्च नृपतिस्तत्र दुहिता चारुहासिनी ॥३१॥
दिव्यौषधिप्रभावेन सा युवे[4]वेषधारिणी । तेन विज्ञातवृत्तान्ता परिणीतातिहारिणी ॥३२॥
पुत्रं पात्रं श्रियां तस्यां स पौण्ड्रमुदपादयत् । निशि हंसापदेशेन हृतश्चाङ्गारकारिणा ॥३३॥
विसृष्टश्चापि गङ्गायां पपात वियतः शनैः । अपश्यत्पुरं प्रातरिलावर्धनसंज्ञकम् ॥३४॥
तत्रापणे निविष्टोऽसौ वणिक्दत्तवरासने । आपणः क्षणमात्रेण पूर्यते स्म धनैश्च सः ॥३५॥
तत्प्रभावमसौ बुद्ध्वा वणिग्नीत्वा स्वमन्दिरम् । ददौ रत्नवतीं यूने कन्यां धन्याय सम्पदा ॥३६॥
भुञ्जानः स तया दिव्यान् भोगानन्तरवर्जितान् । यातः शक्रमहं द्रष्टुमेकदा तु महापुरम् ॥३७॥
पुरो बहिरसौ दृष्ट्वा प्रासादान् विपुलान् बहून् । पृष्टवानिति केनामी किमर्थं वा निवेशिताः ॥३८॥

पहुँचे ॥२५॥ वीर वसुदेवने वेदसामपुरके राजा कपिलमुनिको युद्धमें जीतकर उसकी कपिला नामक पुत्रीके साथ विधि-पूर्वक विवाह किया ॥२६॥ वहाँ कपिलाके भाई अंशुमान नामक साले-के साथ वसुदेव परम प्रीतिको प्राप्त हुए जिससे वहाँ रहकर उन्होंने कपिलाके कपिल नामक पुत्र उत्पन्न किया ॥२७॥ एक दिन जिस नीलकण्ठने पहले नीलयशाका अपहरण किया था वह गन्ध-हस्तीका रूप धरकर वेदसामपुरमें आया। उसे बन्धनमें डालनेके लिए जब वसुदेव उसपर आरूढ हुए तो उन्हें वह हरकर आकाशमें ले गया। यह देख वसुदेवने उसे मुट्ठियोंके दृढ प्रहारसे खूब पीटा जिससे शोकवश वह गन्धहस्तीका रूप छोड़कर नीलकण्ठ हो गया ॥२८॥ वसुदेव धीरे-धीरे तालाबके जलमें गिरे और बिना किसी आकुलताके अटवीसे निकलकर शालगुहा नामक नगरीमें पहुँच गये ॥२९॥ वहाँ धनुर्वेदके उपदेशसे उन्होंने पद्मावती नामकी कन्या प्राप्त की। वहाँसे चलकर जयपुर गये और वहाँके राजाको जीतकर उसकी कन्या भी प्राप्त की ॥३०॥ वहाँसे चलकर वे अपने साले अंशुमान्के साथ भद्रिलपुर नामक श्रेष्ठ नगर गये। वहाँ उस समय पौण्ड्र नामका राजा राज्य करता था। उसकी चारुहासिनी नामकी एक कन्या थी, वह कन्या दिव्य ओषधिके प्रभावसे सदा युवाका वेष धारण करती थी। वसुदेवको इसका पता लग गया इसलिए उन्होंने उस अतिशय सुन्दरी कन्याके साथ विवाह कर लिया ॥३१-३२॥ तथा कुछ समय बाद उस कन्यामें उन्होंने लक्ष्मीका पात्र एक पौण्ड्र नामका पुत्र उत्पन्न किया। एक दिन वसुदेव रात्रिके समय शयन कर रहे थे कि उनका वैरी अंगारक उन्हें हंसका रूप धरकर हर ले गया ॥३३॥ जब उससे छूटे तो धीरे-धीरे आकाशसे गङ्गा नदीमें गिरे। उसे पारकर जब किनारे-पर आये तो सबेरा होते ही उन्होंने इलावर्धन नामका नगर देखा ॥३४॥ वहाँ वे एक दुकानमें सेठके द्वारा दिये हुए उत्तम आसनपर बैठ गये। उनके बैठते ही क्षणमात्रमें वह दुकान धनसे भर गई ॥३५॥ इसको सेठ, वसुदेवका ही प्रभाव जानकर उन्हें अपने घर ले गया तथा वहाँ ले जाकर उसने भाग्यशाली तरुण वसुदेवके लिए अपनी रत्नवती कन्या प्रदान की ॥३६॥ वसुदेव रत्नवतीके साथ निरन्तराय दिव्य भोगोंको भोगते हुए वहीं रहने लगे। तदनन्तर वे एक समय इन्द्रध्वज विधान देखनेके लिए महापुर नगर गये ॥३७॥ वहाँ उन्होंने नगरके बाहर बहुतसे बड़े-बड़े महल देखकर किसी मनुष्यसे पूछा कि ये महल किसने किसलिए बनवाये हैं? ॥३८॥

---

१. गन्धगजेन्द्रह्रियमाणकः घ० । २. स चाभवत् म० । ३. तत्रैता- म० । ४. युवत्वेष- म०, क०, ग०, घ०, ङ० ।

तेनोक्तं सोमदत्तेन राज्ञा कन्यास्वयंवरे। कारिता बहुशश्चित्राः प्रासादाः पृथिवीभृताम् ॥३९॥
स्वयंवरविधेः कन्या कुतश्चिदपि हेतुतः। विरक्ताऽभूदतः सर्वे राजानश्च विसर्जिताः ॥४०॥
इत्याकर्ण्य स तस्याश्च चिन्तयन्मनसो गतिम्। पश्यन्निन्द्रमहं तत्र शौरिर्यावदवस्थितः ॥४१॥
तावच्च सहसा प्राप्ताः सरक्षाः नृपतिस्त्रियः। इन्द्रध्वजं च वन्दित्वा प्रस्थिताः स्वगृहं पुनः ॥४२॥
आलानस्तम्भमाभज्य तदा स समदद्विपः। मारयन्सहसाऽऽगच्छन्मर्त्यान्मृत्युरिव स्वयम् ॥४३॥
लोकस्य मार्यमाणस्य महाकलकलध्वनिः। दिशो दश तदा व्याप रसतः पश्यतः पथि ॥४४॥
प्राप्तश्च मत्तमातङ्गो वेगी प्रवहणान्यसौ। कन्या प्रवहणाच्चैका पपात सभया क्षितौ ॥४५॥
करिणं निर्मदीकृत्य तां ररक्ष भयाकुलाम्। पश्यतः सर्वलोकस्य कृतक्रीडः स यादवः ॥४६॥
परित्यज्य गजं श्रान्तं कन्यां भयविमूर्छिताम्। समाश्वासयदुत्थाय सा तमैक्षिष्ट रूपिणम् ॥४७॥
दीर्घमुष्णं च निःश्वस्य वाष्पाकुलविलोचना[1]। त्रपानता करं तस्य जग्राह स्पर्शसौख्यदम् ॥४८॥
गते शौरौ यथास्थानं धात्री वृद्धा महत्तराः। प्रगृह्य कन्यकां तां च ययुरन्तःपुरालयम् ॥४९॥
ततः कुबेरदत्तस्य [2]भवने कृतभूषणम्। शौरिमेत्य प्रतीहारी राजादेशात्ततोऽवदत् ॥५०॥
ज्ञातमेव हि ते नूनं वृत्तं देव ! यथा नृपः। सोमदत्तः प्रिया चास्य पूर्णचन्द्रेति कीर्तिता ॥५१॥
नाम्ना भूरिश्रवाः पुत्रः सोमश्रीस्तनयाऽनयोः। अस्याः स्वयंवरार्थं च समाहूता नरेश्वराः ॥५२॥
सोमश्रीर्निशि हर्म्यस्था देवागमनदर्शनात्। जातिस्मरणसंयुक्ता मुमूर्च्छ प्रेमवाहिनी ॥५३॥

मनुष्यने कहा कि राजा सोमदत्तने अपनी कन्याके स्वयंवरमें आनेवाले राजाओंके ठहरनेके लिए ये नाना प्रकारके महल बनवाये थे ॥३९॥ परन्तु कन्या, किसी कारण स्वयंवरकी विधिसे विरक्त हो गई इसलिए स्वयंवर नहीं हो पाया और सब लोग विदा कर दिये गये ॥४०॥ यह सुनकर कुमार वसुदेव, उस कन्याके मनकी गतिका विचार करते हुए इन्द्रध्वज विधान देखनेके लिए ज्योंही बैठे त्योंही रक्षकोंके साथ राजाकी स्त्रियाँ सहसा वहाँ आ पहुँचीं। कुछ समय बाद वे स्त्रियाँ इन्द्रध्वज विधानको नमस्कारकर अपने घरकी ओर चलीं ॥४१-४२॥ उसी समय बन्धनका खम्भा तोड़कर एक मदोन्मत्त हाथी साक्षात् मृत्यु (यम) की तरह मनुष्योंको मारता हुआ वहाँ आ पहुँचा ॥४३॥ उस समय जो लोग मारे जा रहे थे तथा जो मार्गमें यह सब देखते हुए चिल्ला रहे थे उनका बहुत भारी कलकल शब्द दशों दिशाओंमें व्याप्त हो गया ॥४४॥ वह मदोन्मत्त हाथी बड़े वेगसे उन स्त्रियोंके वाहनोंके समीप आया जिससे भयभीत हो एक कन्या वाहनसे नीचे पृथिवीपर गिर पड़ी ॥४५॥ यह देख कुमार वसुदेवने उस हाथीको मदरहित कर भयसे घबड़ाई हुई उस कन्याकी रक्षा की और सब लोगोंके देखते-देखते वे उस हाथीके साथ क्रीड़ा करने लगे ॥४६॥ तदनन्तर जब हाथी थक गया तो उसे छोड़ उन्होंने भयसे मूर्च्छित कन्याको सान्त्वना दी। कन्याने उठकर सुन्दर रूपके धारक वसुदेवको देखा। देखते ही वह गरम और लम्बी साँस भरने लगी, उसके नेत्र आँसुओंसे व्याप्त हो गये तथा लज्जासे नम्रीभूत होकर उसने स्पर्शजन्य सुखको देनेवाला कुमारका हाथ पकड़ लिया ॥४७-४८॥

तदनन्तर वसुदेव यथास्थान चले गये और वृद्धा धाय, तथा कुलकी बड़ी बूढ़ी स्त्रियाँ उस कन्याको लेकर अन्तःपुर चली गयीं ॥४९॥ तत्पश्चात् एक दिन कुमार वसुदेव कुबेरदत्त सेठके घर आभूषण आदि धारणकर बैठे थे कि इतनेमें राजाकी आज्ञासे उनकी द्वारपालिनी आकर कहने लगी कि हे देव ! यह समाचार आपको अच्छी तरह विदित ही है कि यहाँका राजा सोमदत्त है और उसकी रानी पूर्णचन्द्र नामसे प्रसिद्ध है ॥५०-५१॥ इन दोनोंके भूरिश्रवा नामका पुत्र और सोमश्री नामकी कन्या है। कन्या सोमश्रीके स्वयंवरके लिए राजाने अनेक राजाओंको बुलाया था ॥५२॥ परन्तु सोमश्री रात्रिके समय महलके ऊपर बैठी थी वहाँ देवोंका आगमन देख वह

१. विमोचना म०। २. भुवने म०।

लब्धसंज्ञा समुत्थाय ध्यायन्ती स्वर्गिणं पतिम् । स्नानाशननिवृत्तेच्छा मौनव्रतमशिश्रियत् ॥५४॥
एकान्ते पृष्टया कृच्छ्रात् कथितं च ममानया । पूर्वजन्मनि देवेन सह क्रीडितमात्मनः ॥५५॥
पूर्वप्रच्युतदेवस्य हरिवंशे समुद्भवः । विज्ञातश्चानया देव्या सत्यात् केवलिभाषितात् ॥५६॥
समागमश्च विज्ञातः पत्या हस्तिभयच्छिदा । संवादे चाधुना जाते सा ते वाञ्छति सङ्गमम् ॥५७॥
राज्ञा मद्वचनाज्ज्ञात्वा प्रेषिताहं तवान्तिकम् । सौम्य ! सोमश्रिया साकं भज वीवाहमङ्गलम् ॥५८॥
इत्यावेदितसम्बन्धः स तुष्टोऽन्धकवृष्टिजः । सोमश्रियमुवाहेष्टां सोमदत्ततनूद्भवाम् ॥५९॥
स्वास्यारविन्दसौगन्ध्यमकरन्दोपयोगिनोः । काले याति सुखे तावत् सोमश्रीवसुदेवयोः ॥६०॥
अथ कोऽप्येकदा भर्तुर्भुजपञ्जरशायिनीम् । सोमश्रियं श्रियं वाऽरिरहरन्निशि खेचरः ॥६१॥
विबुद्धस्तु पतिः पत्नीमपश्यन् परमाकुलः । सोमश्रीः क्व गताऽसि त्वमेह्येहीति जुहाव ताम् ॥६२॥
वचोऽनन्तरमेषाऽहमिति दत्वा वचः श्रिताम् । खेटस्वसारमद्राक्षीत्सोमश्रीरूपवर्तिनीम् ॥६३॥
निष्क्रान्तासि बहिः कान्ते किमर्थमिति नोदिता । घर्मशान्त्यर्थमित्याह सोमश्रीरिव सा स्वयम् ॥६४॥
कृतरूपपरावर्तिः शौरिरूपवशीकृता । कन्याभावमुदस्यैनमरीरमदरिस्वसा ॥६५॥
नित्यशो भुक्तभोगा च सुप्ते पत्यौ स्वपित्यसौ । प्राक् प्रबुद्धा करोत्यूरुपादसंवाहनादिकम् ॥६६॥

जाति स्मरणसे युक्त हो गई और अपने पूर्व पतिके प्रेमको प्रकट करती हुई मूर्च्छित हो गई ॥५३॥ जब वह सचेत हुई तो उठकर अपने देव पतिका ध्यान करने लगी और स्नान, भोजन आदिकी इच्छा छोड़ मौन लेकर बैठ गई ॥५४॥ एकान्तमें मैंने उससे पूछा तो उसने बड़ी कठिनाईसे मुझे बताया कि पूर्वजन्ममें मैंने देवके साथ क्रीड़ा की थी उसने यह भी बताया कि जब मैं देवी थी और वह देव मुझसे पहले ही वहाँसे च्युत हो गया तब केवली भगवान्के सत्य कथनसे मुझे मालूम हुआ था कि वह देव हरिवंशमें उत्पन्न हुआ है तथा हाथीके भयको नष्ट करनेवाले उस पतिके साथ मेरा पुनः समागम होगा। इस समय केवली भगवान्का कथन ज्योंका-त्यों मिल गया है अर्थात् जैसा उन्होंने बताया था वैसा ही हुआ है इसलिए वह आपके समागमकी इच्छा करती है ॥५५-५७॥ मेरे कथनसे सब समाचार जानकर राजाने मुझे आपके पास भेजा है इसलिए हे सौम्य ! मेरी यही प्रार्थना है कि आप सोमश्रीके साथ विवाह मङ्गलको प्राप्त हों ॥५८॥

इस प्रकार पूर्व भवका सम्बन्ध बतलानेपर वसुदेव बहुत ही संतुष्ट हुए और उन्होंने राजा सोमदत्तकी पुत्री सोमश्रीके साथ जो कि उनकी पूर्वभवकी प्रिय स्त्री थी विवाह कर लिया ॥५९॥ तदनन्तर जब अपने मुख कमलकी सुगन्धि और मकरन्दका उपयोग करनेवाले सोमश्री और वसुदेवका काल सुखसे व्यतीत हो रहा था तब एक दिन रात्रिके समय पतिके भुजपञ्जरमें शयन करनेवाली लक्ष्मीके समान सुन्दर सोमश्रीको कोई विद्याधर वैरी हर ले गया ॥६०-६१॥ जब वसुदेव जागे तब पत्नीको न देख बहुत व्याकुल हुए और 'हे सोमश्री ! तू कहाँ गई ? जल्दी आओ, आओ' इस प्रकार उसे पुकारने लगे ॥६२॥ जिस विद्याधरने सोमश्रीका हरण किया था उसकी बहिनने वसुदेवके पास आकर सोमश्रीका रूप धारण कर लिया और उनके पुकारते ही कहा कि 'मैं यह तो हूँ' इस प्रकार उत्तर देकर पासमें खड़ी हुई तथा सोमश्रीका रूप धारण करनेवाली विद्याधरकी बहिनको वसुदेवने देखा ॥६३॥ उसे देखकर कुमारने पूछा कि हे प्रिये ! बाहर किसलिए गई थीं ? इसके उत्तरमें उसने स्वयं सोमश्रीके समान कहा कि गरमी शान्त करनेके लिए गई थी ॥६४॥ इस प्रकार वसुदेवके रूपसे वशीभूत हुई शत्रुकी बहिन रूप बदलकर तथा अपना कन्याभाव छोड़कर उनके साथ क्रीड़ा करने लगी ॥६५॥ वह प्रतिदिन भोग भोगनेके बाद पति जब सो जाते थे तब सोती थी और उनके पहले ही जागकर जंघा तथा पैर आदिका मर्दन करने लगती थी ॥६६॥

अन्यदा तु विबुद्धोऽसौ प्रथमं कथमप्यथ । सोमश्रीरूपमुक्तां तां ददर्श शयितां निशि ॥६७॥
धीरो विस्मययुक्तस्तां सहसा स्वयमुत्थिताम् । अप्राक्षीद् ब्रूह्यहो का त्वं सोमश्रीरिव वर्तसे ॥६८॥
सा प्रणम्याभणीत्सौम्य ! दक्षिणश्रेण्यवस्थितम् । स्वर्णाभं पुरमस्येशश्चित्तवेगो नभश्चरः ॥६९॥
पत्न्यङ्गारवती तस्य प्रत्यङ्ग सङ्गतप्रभा । सूनुर्मानसवेगोऽस्याः सुता वेगवती त्वहम् ॥७०॥
राज्यं मानसवेगे च पिता न्यस्य तपस्यया । पापस्योपशमं कर्तुं तपोवनमुपाविशत् ॥७१॥
नीता मानसवेगेन सोमश्रीः स्वपुरं परम् । आर्य ! तिष्ठति तत्रासौ शीलवेलावलम्बिनी ॥७२॥
तस्याः प्रसादने तेन प्रयुक्ताऽहमशक्तितः । त्वत्प्रियायाः सखी जाता सत्त्वशीलवशीकृता ॥७३॥
वार्तानिवेदनायाहं प्रेषिताऽशु तया तदा । त्वत्कलत्रत्वमायाता विचित्राश्चित्तवृत्तयः ॥७४॥
इत्यावेद्य तदादेशाद्वेगवत्या निवेदितम् । सक्रमं पितृबन्धुभ्यः सोमश्रीहरणादिकम् ॥७५॥
श्रुत्वा च तत्तथा तेऽपि विषण्णमतयः स्थिताः । वेगवत्यपि पत्यामा प्रकृत्या चिरमारमत् ॥७६॥
तया सह सुखं तस्य रममाणस्य भोगिनः । सम्प्राप्तो माधवो मासो मधुमत्तमधुव्रतः ॥७७॥
कदाचित्सह सुप्तोऽसौ तया सुरतखिन्नया । हृतो मानसवेगेन खेचरेण निशि द्रुतम् ॥७८॥
ताडितश्च विबुद्धेन खेचरो दृढमुष्टिना । तेन गङ्गाजले तं च मुमोच भयविह्वलः ॥७९॥
विद्यां साधयतस्तत्र स्कन्धे विद्याधरस्य सः । पपात नभसस्तस्य विद्यासिद्धिस्तथोदिता ॥८०॥
सिद्धविद्यः प्रणम्यासौ प्रयातो यदुनन्दनम् । कन्या विद्याधरी चैनं निनाय खचराचलम् ॥८१॥

अथानन्तर किसी दिन वसुदेव उससे पहले जाग गये और रात्रिके समय सोमश्रीका रूप छोड़कर सोती हुई उस स्त्रीको उन्होंने असली रूपमें देख लिया ॥६७॥ यह देख धीर-वीर वसुदेव आश्चर्यमें पड़ गये। उसी समय वह स्त्री भी सहसा जाग उठी। वसुदेवने उससे पूछा कि अहो ! तू सोमश्रीके समान कौन है ? ॥६८॥ इसके उत्तरमें उसने प्रणाम कर कहा कि हे सौम्य ! दक्षिण श्रेणीमें एक स्वर्णाभ नामका नगर है। इसका स्वामी मनोवेग नामका विद्याधर है ॥६९॥ मनोवेगकी अङ्गारवती नामकी अत्यन्त सुन्दर पत्नी है। उसके मानसवेग नामका पुत्र और वेगवती नामकी मैं पुत्री हूँ ॥७०॥ हमारे पिता मानसवेगको राज्य देकर तपस्यासे पापका उपशम करनेके लिए तपोवनमें चले गये ॥७१॥ हे आर्य ! हमारा भाई मानसवेग, सोमश्रीको हरकर अपने श्रेष्ठ नगरको ले गया जहाँ वह शीलकी मर्यादाका अवलम्बन लेकर विद्यमान है ॥७२॥ मानसवेगने उसे प्रसन्न करनेके लिए मुझे नियुक्त किया था पर मैं इस कार्यमें समर्थ नहीं हो सकी अतः आपकी प्रियाके सत्त्व और शील गुणसे वशीभूत हो उसकी सखी बन गई ॥७३॥ उस समय शीघ्रतासे अपना समाचार देनेके लिए उसने मुझे आपके पास भेजा था पर मैं आपकी स्त्री बन गई सो ठीक ही है क्योंकि चित्तवृत्तियाँ नाना प्रकारकी होती हैं ॥७४॥ इस प्रकार वेगवतीने कुमारको सब समाचार बताकर उनकी आज्ञानुसार सोमश्रीके पिता तथा भाई आदिको भी उसके हरण आदिके सब समाचार क्रमसे सुनाये ॥७५॥ जिन्हें सुनकर वे सब खेदखिन्न हुए। इधर वेगवती भी अपने असली रूपमें रहकर चिरकाल तक पतिके साथ क्रीड़ा करती रही ॥७६॥

अथानन्तर जब भोगी वसुदेव वेगवतीके साथ सुखसे क्रीड़ा करते हुए समय व्यतीत कर रहे थे तब वसन्तका महीना आ पहुँचा और भ्रमर मधु पी-पी कर उन्मत्त होने लगे ॥७७॥ कदाचित् वसुदेव संभोगसे खिन्न हुई वेगवतीके साथ सो रहे थे कि रात्रिके समय मानसवेग विद्याधर उन्हें शीघ्र ही हर ले गया। जागनेपर उन्होंने मुट्ठियोंके दृढ़ प्रहारसे उसे इतना पीटा कि उसने भयसे विह्वल हो उन्हें गङ्गाके जलमें छोड़ दिया ॥७८-७९॥ उस समय गङ्गाके जलमें बैठकर एक विद्याधर विद्या सिद्ध कर रहा था सो वसुदेव आकाशसे उसके कन्धेपर गिरे और उनके गिरते ही उस विद्याधरको विद्या सिद्ध हो गई ॥८०॥ विद्या सिद्ध होनेपर वह विद्याधर तो

तदनन्तरमाकीर्णं खेचरैर्नभसस्तलम् । पुष्पाणि पञ्चवर्णानि मुञ्चद्भिः प्रणतैः पुरः ॥८२॥
प्रवेशितः पुरं सोऽथ रथेन रविरोचिषा । तूर्यशङ्खनिनादेन पूरिताखिलदिङ्मुखम् ॥८३॥
कन्यां मदनवेगां च मदनोपमविभ्रमः । उपयेमे मुदा दत्तां खगैर्दधिमुखादिभिः ॥८४॥
बिभ्राणो वसुदेवोऽत्र भावं मदनवेगजम्[1] । चिक्रीड निविडस्तन्या चिरं मदनवेगया ॥८५॥

द्रुतविलम्बितवृत्तम्

अनुभवन्तममुं जिनधर्मजं शमनुषङ्गजमङ्गजगोचरम्[2] ।
रतिषु लब्धवरा वरमङ्गना जनकबन्धविमोक्षमयाचत ॥८६॥

इति अरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ मदनवेगालाभवर्णनो नाम चतुर्विंशतितमः सर्गः ॥२४॥

वसुदेवको प्रणाम कर चला गया और एक विद्याधर कन्या उन्हें विजयार्ध पर्वतपर ले गई ॥८१॥ उनके वहाँ पहुँचते ही आकाश विद्याधरोंसे व्याप्त हो गया । वे विद्याधर उस समय पाँच रङ्गके फूलोंकी वर्षा कर रहे थे तथा सामने आ-आकर प्रणाम करते थे ॥८२॥ तदनन्तर उन विद्याधरोंने सूर्यके समान देदीप्यमान रथपर बैठाकर वसुदेवका नगरमें प्रवेश कराया । उस समय तुरही और शङ्खोंके शब्दसे दशों दिशाएँ भर गई थीं ॥८३॥ वहाँ कामदेवके समान सुन्दर शरीरके धारक वसुदेवने, दधिमुख आदि विद्याधरोंके द्वारा प्रदत्त मदनवेगा नामक कन्याके साथ हर्षपूर्वक विवाह किया ॥८४॥ और वहीं रहकर कामके वेगसे उत्पन्न भावको धारण करते हुए वसुदेवने पीनस्तनी मदनवेगाके साथ चिरकाल तक क्रीड़ा की ॥८५॥

कदाचित् कुमार वसुदेव, जिनधर्मके प्रसादसे मदनवेगाके साथ कामजनित सुखका उपभोग कर रहे थे कि रतिकालमें मदनवेगाने उन्हें अत्यन्त आनन्द दिया इसलिए प्रसन्न होकर उन्होंने मदनवेगासे कहा कि 'प्रिये ! मैं तुमपर बहुत प्रसन्न हूँ जो वर माँगना हो माँगो ।' इस प्रकार वह वर पाकर मदनवेगाने उनसे यही वर माँगा कि हमारे पिता बन्धनमें पड़े हैं सो उन्हें छुड़ा दीजिए ॥८६॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें मदनवेगाके लाभका वर्णन करनेवाला चौबीसवाँ सर्ग समाप्त हुआ ॥२४॥

---

१. कामवेगोत्पन्नं । २. समसुखं गज म० ।

पञ्चविंशः सर्गः

भ्राता मदनवेगायाः श्रित्वा दधिमुखोऽन्यदा । पितृबन्ध[1]विमोक्षार्थी सम्बन्धं शौरयेऽवदत् ॥१॥
शृणु देव ! नमेर्वंशे संख्यातीतेषु राजसु । अरिञ्जयपुराधीशो मेघनादोऽभवन्नृपः ॥२॥
पद्मश्रीस्तस्य कन्याऽभूत् सा च नैमित्तिकैः पुरा । स्त्रीरत्नं भवितेत्येवमादिष्टा चक्रवर्त्तिनः ॥३॥
नभस्तिलकनाथश्च प्रियपूर्वमनेकशः । वज्रपाणिरिति ख्यातस्तामयाचत रूपिणीम् ॥४॥
अलाभे च ततस्तस्या स रुष्टो दुष्टखेचरः । युद्धे जेतुमशक्तोऽगादकृतार्थो निजं पुरम् ॥५॥
मेघनादोऽपि तत्काले जातकेवललोचनम् । मुनिमभ्यर्च्य पप्रच्छ नृसुरासुरसंसदि ॥६॥
प्रभो ! मे दुहितुर्भर्त्ता भविता भरतेऽत्र कः । इति पृष्टोऽवदत्सोऽपि वरमन्वयपूर्वकम् ॥७॥
कौरवान्वयसम्भूतो भूतो गजपुरे नृपः । कार्तवीर्य इति ख्यातिं बिभ्रद्वीर्यसमुद्धतः ॥८॥
सोऽवधीत् कामधेन्वर्थं जमदग्निं[2] तपस्विनम् । क्रोधात्परशुरामस्तं जघान पितृघातिनम् ॥९॥
क्षत्रियेषु तथाऽन्येषु सकलत्रेषु शत्रुणा । क्रुद्धेन दत्तयुद्धेषु मार्यमाणेषु भूरिषु ॥१०॥
अन्तर्वत्नी तदा पत्नी कार्तवीर्यस्य कातरा । तारा रहसि निःसृत्य प्राविशत्कौशिकाश्रमम् ॥११॥
वसन्ती तत्र सा भीरुः प्रसूता तनयं शुभम् । क्षत्रियत्रासनिर्भेदमष्टमं चक्रवर्त्तिनम् ॥१२॥

अथानन्तर किसी दिन मदनवेगाका भाई दधिमुख अपने पिताको बन्धनसे छुड़ानेकी इच्छा करता हुआ कुमार वसुदेवके पास आकर निम्नाङ्कित सन्दर्भ कहने लगा ॥१॥ उसने कहा कि हे देव ! सुनिए, नमिके वंशमें असंख्यात राजाओंके हो जानेसे अरिञ्जयपुरका स्वामी राजा मेघनाद हुआ ॥२॥ उसके एक पद्मश्री नामकी कन्या थी । उस कन्याके विषयमें निमित्तज्ञानियोंने बताया था कि यह चक्रवर्तीकी स्त्री-रत्न होगी ॥३॥ उसीके समयमें नभस्तिलक नगरका राजा वज्रपाणि भी हुआ । उसने रूपवती पद्मश्री कन्याकी पहिले अनेक बार याचना की परन्तु जब वह उसे नहीं प्राप्त कर सका तो उस दुष्ट विद्याधरने रुष्ट होकर युद्ध ठान दिया । मेघनाद प्रबल शक्तिका धारक था इसलिए वज्रपाणि उसे युद्धमें जीत नहीं सका फलस्वरूप वह कार्यमें असफल हो अपने नगरको वापिस लौट गया ॥४-५॥ उसी समय किन्हीं मुनिराजको केवलज्ञानरूपी लोचनकी प्राप्ति हुई सो उनकी पूजाके अर्थ अनेक मनुष्य, देव और धरणेन्द्रोंकी सभा जुटी । उस सभामें केवली भगवान्‌की पूजा कर मेघनादने उनसे पूछा कि हे प्रभो ! इस भरत क्षेत्रमें मेरी पुत्रीका भर्ता कौन होगा ? इस प्रकार पूछनेपर केवलज्ञानी मुनिराजने उसके योग्य वर और उसके कुलका निरूपण किया ॥६-७॥

उन्होंने कहा कि हस्तिनापुर नगरमें कौरववंशमें उत्पन्न हुआ कार्तवीर्य नामका एक राजा था जो पराक्रमसे बहुत ही उद्दण्ड था ॥८॥ उसने कामधेनुके लोभसे जमदग्नि नामक तपस्वीको मार डाला था । जमदग्निका लड़का परशुराम था वह भी बड़ा बलवान् था अतः उसने क्रोध-वश पिताका घात करनेवाले कार्तवीर्यको मार डाला ॥९॥ इतनेसे ही उसका क्रोध शान्त नहीं हुआ अतः उसने क्रुद्ध होकर युद्धमें स्त्री-पुत्रों सहित और भी अनेक क्षत्रियोंको मार डाला । इस तरह जब वह अनेक क्षत्रियोंको मार रहा था तब राजा कार्तवीर्यकी गर्भवती तारा नामकी पत्नी भयभीत हो गुप्त रूपसे निकलकर कौशिक ऋषिके आश्रममें जा पहुँची ॥१०-११॥ वहाँ भय सहित निवास करती हुई तारा रानीने एक पुत्र उत्पन्न किया जो क्षत्रियोंके त्रासको नष्ट करने-

---

१. पितृबन्धु म० । २. यमदग्निं क०, ख०, ग० ।

यस्माद्भूमिगृहे जातः सुभौमस्तेन भाषितः। कौशिकस्याश्रमे रम्ये प्रच्छन्नो वर्धतेऽधुना ॥१३॥
स हन्ता जामदग्न्यस्य षड्खण्डपतिरूर्जितः। दुहितुर्भविता भर्त्ता भवतोऽल्पैर्दिनैरिह ॥१४॥
सप्तकृत्वः कृतान्ताभः स कृत्वा क्षत्रमारणम्। रामोऽपि निभृतं चेतो धत्ते द्विजहितेऽधुना ॥१५॥
एवमेकातपत्रायां पृथिव्यां जमदग्निजः। प्रतापाग्निपरीताशः पूरिताशो विजृम्भते ॥१६॥
सुभौमे वर्धमाने तु तापसाश्रमवासिनि। उत्पाताः शतशो जाता जामदग्न्यगृहेऽधुना ॥१७॥
आशङ्कितः स नैमित्तं पृच्छति स्म सविस्मयः। उत्पाताः कथयन्तीमे किमनिष्टमिति श्रुतम् ॥१८॥
स आह वर्धते वैरी भवतोऽन्तर्हितः क्वचित्। विज्ञेयः कथमित्युक्ते प्राह नैमित्तिकस्ततः ॥१९॥
हतक्षत्रियसङ्घानां दंष्ट्रा यस्य जिघत्सतः। पायसत्वेन वर्त्तन्ते स एवारिस्तवोद्धतः ॥२०॥
इति श्रुत्वा स [1]जिज्ञासुः शत्रुं क्षत्रियपुङ्गवम्। विशालां [2]सत्रशालां तामाश्वेव समचीकरत् ॥२१॥
[3]सत्रमध्ये व्यवस्थाप्य दंष्ट्राभरितभाजनम्। [4]निरूपिततदध्यक्षो यत्नवानवतिष्ठते ॥२२॥
आकर्ण्य मेघनादस्तं कृत्वा केवलिवन्दनाम्। गत्वा गजपुरं शीघ्रं पश्यति स्म कुमारकम् ॥२३॥
शस्त्रशास्त्रार्णवस्यान्ते वर्त्तमानमधिश्रियम्। ज्वलत्प्रतापमभितो भानुमन्तमिवोदितम् ॥२४॥
शनैः स प्रेरितस्तेन वृत्तान्तविनिवेदिना। अहितेन्धनदाहाय वायुनेव [5]तनूनपात् ॥२५॥
आजगाम च तेनैव सह शत्रुगृहं गृहात्। बुभुक्षुरुपविष्टश्च दर्भासनपरिग्रहः ॥२६॥

तदनन्तर एक दिन मानसवेगने किसी तरह कुमार वसुदेवको देख लिया जिससे 'कुमार वसुदेव हमारी स्त्री सोमश्रीके साथ रूप बदलकर रहता है' यह शिकायत लेकर वह पत्नीके साथ वैजयन्ती नगरीके राजा बलसिंहके पास गया ॥३३॥ राजा बलसिंह न्यायपरायण पुरुष था इसलिए जब उसने इस शिकायतकी छानबीन की तो मानसवेग हार गया। हार जानेसे मानसवेग बहुत ही लज्जित हुआ और वसुदेवके साथ युद्ध करनेके लिए उठ खड़ा हुआ ॥३४॥ यह देख कितने ही विद्याधर वसुदेवका पक्ष लेकर खड़े हो गये। तदनन्तर वसुदेव और मानसवेगका युद्ध हुआ ॥३५॥ वेगवतीकी माताने जमाई वसुदेवके लिए एक दिव्य धनुष तथा दिव्य बाणोंसे भरे हुए दो तरकस दे दिये और प्रभावतीने युद्धका समाचार जानकर शीघ्र ही प्रज्ञप्ति नामकी विद्या दे दी। उसके प्रभावसे कुमारने मानसवेगको युद्धमें शीघ्र ही बाँध लिया ॥३६-३७॥ तदनन्तर मानसवेगकी माताने कुमारसे पुत्र भिक्षा माँगी जिससे दयायुक्त हो कुमारने उसे सोमश्रीके पास

---

१. सुपरावृत्ति रूपं म०, ग० । २. -दुपलक्षितम् ग० । ३. पत्या ग० । ४. वेदात् म० । ५. युद्धे ।

तेन मानसवेगेन बन्धुभावमुपेयुषा । सपत्नीको विमानेन प्रापितः स महापुरम् ।।३९।।
सोमश्रीबन्धुभिस्तत्र जाते तस्य समागमे । गतो मानसवेगोऽपि स्वस्थानं तद्वचःस्थितः ।।४०।।
श्रुतानुभूतवार्त्तादिप्रश्नप्रकथनात्मनोः । याति कामरसक्षिप्तचेतसोः समयस्तयोः ।।४१।।[1]
अश्वरूपधरेणासावेकदा सूर्पकारिणा । हरता नभसः क्षिप्तो[2] गङ्गायामतपद् यदुः ।।४२।।
स तामुत्तीर्य सम्प्राप्तस्तापसाश्रममत्र च । निरीक्ष्योन्मादिनीं नारीं नरास्थिमयशेखराम् ।।४३।।
पप्रच्छ तापसं कश्चित् कस्येयं युवतिर्वरा । परिभ्रमति विभ्रान्ता महोन्मादवशा वशा ।।४४।।
तस्मै सोऽकथयद् राज्ञो जरासन्धस्य देहजा । नाम्ना केतुमतीयं च जितशत्रुनृपप्रिया ।।४५।।
मन्त्रवादिपरिव्राजा वराकी स्ववशीकृता । हतस्यास्यास्थिमालां च मालीकृत्याटति क्षितिम् ।।४६।।
इत्याकर्ण्य कृपायुक्तो महामन्त्रप्रभावतः । आवेशपूर्वकं तस्याः स चक्रे ग्रहनिग्रहम् ।।४७।।
शौरिस्तदा नियुक्तैस्तु जरासन्धस्य मानवैः । पुरं राजगृहं नीतः परिवार्योपकार्यपि ।।४८।।
तानवोचदसौ राज्ञः कोऽपराधो मया कृतः । ब्रूत मे येन नीयेऽहं[3] तद्राजपुरुषाः रुषा ।।४९।।
इत्युक्ता इत्यवोचंस्ते यो राजदुहितुर्ग्रहम् । व्युदस्यति भवेत्सोऽत्र राजारिजनकः किल ।।५०।।
इत्यावेद्य वधस्थानं नीतो नीचैर्नरैर्वृतः । खमुत्क्षिप्यापनीतः प्राक् केनचित्खचरेण सः ।।५१।।
उक्तश्च वीर ! विद्धि त्वं प्रभावत्याः पितामहम् । मां भगीरथनामानं त्वन्मनोरथपूरकम् ।।५२।।

ले जाकर छोड़ दिया ।।३८।। इस घटनासे मानसवेग कुमारका गहरा बन्धु हो गया और विमान द्वारा सोमश्री सहित वसुदेवको उनके अभीष्ट स्थान महापुर नगरतक पहुँचाने गया ।।३९।। वहाँ पहुँचनेपर वसुदेवका सोमश्रीके बन्धुओंके साथ समागम हो गया और मानसवेग भी उनका आज्ञाकारी हो अपने स्थानपर वापिस चला गया ।।४०।। तदनन्तर सुनी एवं अनुभवी बातोंके प्रश्नोत्तर करना ही जिनका काम शेष था और जिनके चित्त कामरसके आधीन थे ऐसे उन दोनों दम्पतियोंका समय सुखसे व्यतीत होने लगा ।।४१।।

अथानन्तर एक समय कुमारका शत्रु राजा त्रिशिखरका पुत्र सूर्पक अश्वका रूप रखकर कुमारको हर ले गया और आकाशसे उसने नीचे गिरा दिया जिससे वे गङ्गा नदीमें जा गिरे ।।४२।। गङ्गा नदीको पारकर कुमार वसुदेव तापसोंके एक आश्रममें पहुँचे। वहाँ उन्होंने मनुष्योंकी हड्डियोंका सेहरा धारण करनेवाली एक पागल स्त्रीको देखकर किसी तापससे पूछा कि यह सुन्दरी युवती किसकी स्त्री है जो मदोन्मादके वश हो पागल हस्तिनीके समान इधर-उधर घूम रही है ।।४३-४४।। तापसने कहा कि यह राजा जरासन्धकी पुत्री केतुमती है और राजा जितशत्रुको विवाही गई है ।।४५।। इस बेचारीको एक मन्त्रवादी परिव्राजकने अपने वश कर लिया था वह मर गया इसलिए उसकी हड्डियोंके समूहकी माला बनाकर यह पृथिवीपर घूमती रहती है ।।४६।। यह सुनकर वसुदेवकी दया उमड़ पड़ी और उन्होंने महामन्त्रोंके प्रभावसे शीघ्र ही केतुमतीके पिशाचका निग्रह कर दिया ।।४७।। वहाँ वसुदेवकी खोजमें जरासन्धके आदमी पहलेसे ही नियुक्त थे इसलिए यद्यपि कुमार उपकारी थे तथापि वे उन्हें घेरकर राजगृह नगर ले गये ।।४८।। उनको ले जानेवाले लोगोंसे वसुदेवने पूछा कि हे राजपुरुषो ! बताओ तो सही मैंने राजाका कौन-सा अपराध किया है जिससे मैं इस तरह क्रोधपूर्वक ले जाया जा रहा हूँ ।।४९।। इस प्रकार कहनेपर राजपुरुष बोले कि जो राजपुत्रीके पिशाचको दूर करेगा वह राजाको घात करनेवाले शत्रुका पिता होगा ।।५०।। इस प्रकार कहकर नीच मनुष्योंसे घिरे वसुदेव वध स्थान-पर ले जाये गये परन्तु वध होनेके पहले ही कोई विद्याधर उन्हें झपटकर आकाशमें ले गया ।।५१।। उस विद्याधरने कुमारको सम्बोधते हुए कहा कि हे वीर ! तुम मुझे प्रभावतीका

---

१. कामरसाक्षिप्तचेतसोः म० । २. क्षिप्रो म० । ३. नीयेयं म० ।

प्रभावतीसमीपं त्वं मया नीतिज्ञ! नीयसे। इति प्रियवचोवाची निनाय खचराचलम् ॥५३॥
प्राप्य गन्धसमृद्धं च नगरं नगमूर्धनि। प्रवेशितो महाभूत्या विद्याधरजनैर्वृतः ॥५४॥
प्रशस्ततिथिनक्षत्रयोगे [1]योगे कृते ततः। पितृबन्धुजनैः शौरिप्रभावत्योः प्रहृष्टयोः ॥५५॥
प्रागेव मदनावेशपरस्परवशात्मकौ। वधूवरौ वरौ वृत्तौ भोगसागरवर्त्तिनौ ॥५६॥

रथोद्धतावृत्तम्

सम्प्रयुक्तमपि वल्लभैः सदा विप्रयोजयति पापकृत्परम्।
पूर्वतोऽपि शतशोऽतिवल्लभैर्युज्यते तु जिनधर्मकृत्पुरा ॥५७॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ प्रभावतीलाभवर्णनो नाम त्रिंशः सर्गः ॥३०॥

पितामह जानो, भगीरथ मेरा नाम है और तुम्हारे मनोरथको पूर्ण करनेवाला हूँ ॥५२॥ हे नीतिज्ञ ! मैं तुम्हें प्रभावतीके पास लिये जाता हूँ—इस प्रकार मधुर वचन कहता हुआ वह विद्याधर उन्हें विजयार्ध पर्वतपर ले गया ॥५३॥ वहाँ पर्वतके मस्तकपर एक गन्धसमृद्ध नामक नगर था। उसमें अनेक विद्याधरोंसे घिरे हुए वसुदेवका उसने बड़े वैभवके साथ प्रवेश कराया ॥५४॥ तदनन्तर प्रशस्त तिथि और नक्षत्रके योगमें प्रभावतीके पिता तथा बन्धुजनोंने हर्षसे युक्त वसुदेव और प्रभावतीका विवाहोत्सव किया ॥५५॥ वसुदेव और प्रभावतीके हृदय कामके आवेशसे पहले ही एक दूसरेके वशीभूत थे। अतः अब वर-वधू बनकर दोनों भोग रूपी सागरमें निमग्न हो गये ॥५६॥ गौतम स्वामी कहते हैं कि यद्यपि पापी मनुष्य प्रियजनोंके साथ संयोगसे प्राप्त हुए अन्य मनुष्यको सदा प्रियजनोंसे वियुक्त करता है तथापि पूर्वभवमें जिनधर्मको धारण करनेवाला मनुष्य पूर्वकी अपेक्षा सैकड़ों बार अतिशय प्रियजनोंके साथ संयोगको प्राप्त होता है ॥५७॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें प्रभावतीके लाभका वर्णन करनेवाला तीसवाँ सर्ग समाप्त हुआ ॥३०॥

---

१. योग म०, सम्बन्धे कृते सतीत्यर्थः।

एकत्रिंशत्तमः सर्गः

अथ हर्म्यतले सुप्तः प्रभावत्या सहान्यदा । सूर्पकेण हृतः शौरिर्बुबुधे स चिरेण खे ॥१॥
जघान मुष्टिघातेन विद्विषं चामुचत् स खात् । गोदावर्याः पपातायं ह्रदे देहसुखावहे ॥२॥
तत्र कुण्डपुरे लेभे कन्यां पद्मरथस्य सः । माल्यकौशलयोगेन कलाकौशलशालिनीम् ॥३॥
ततोऽपि नीलकण्ठेन नीत्वा मुक्तोऽपतद् यदुः । चम्पासरसि सम्प्राप्तस्तस्यां सोऽमात्यदेहजाम् ॥४॥
जलक्रीडारतस्तत्र स हृतः सूर्पकारिणा । विमुक्तश्च पपातासौ भागीरथ्यां मनोरथी ॥५॥
पर्यटन्नटवीं तत्र म्लेच्छराजेन वीक्षितः । परिणीय सुतां तस्य जराख्यां तत्र चावसत् ॥६॥
जरत्कुमारमुत्पाद्य तस्यामुन्नतविक्रमः । अवन्तिसुन्दरीं प्राप शूरसेनां च शंसिताम् ॥७॥
पुरुषान्वेषिणीमन्यां कन्यां जीवद्यशःश्रुतिम् । उपयम्यापराश्चासावरिष्टपुरमाययौ ॥८॥
राजा तत्र तदा धीरो रुधिरो युधि रोधनः । तस्य मित्रा महादेवी देवीव द्युतिसम्पदा ॥९॥
ज्येष्ठो हिरण्यनाभाख्यस्तनयो नयवित्तयोः । रणशौण्डो महासत्त्वः शस्त्रशास्त्रे कृतग्रहः ॥१०॥
कलापारमिता रूपयौवनोदयधारिणी । तनया रोहिणीनाम्ना रोहिणीव यशस्विनी ॥११॥

अथानन्तर—किसी समय कुमार वसुदेव प्रभावतीके साथ महलमें सो रहे थे कि उसी समय उनका वैरी शूर्पक उन्हें हरकर आकाशमें ले गया ॥ कुछ देर बाद जब उनकी नींद खुली तो मुक्कोंके प्रहारसे उन्होंने शत्रुको पीटना शुरू किया। मुक्कोंकी मारसे घबड़ाकर शूर्पकने उन्हें आकाशसे छोड़ दिया जिससे वे शरीरको सुख पहुँचानेवाले गोदावरीके कुण्डमें गिरे ॥१-२॥ वहाँसे निकलकर वे कुण्डपुर ग्राममें पहुँचे। वहाँका राजा पद्मरथ था उसकी कला कौशलसे सुशोभित एक सुन्दरी कन्या थी। उस कन्याकी प्रतिज्ञा थी कि जो मुझे माला गूँथनेमें पराजित करेगा उसीके साथ मैं विवाह करूँगी। कुमार वसुदेवने उसे माला गूँथनेका कौशल दिखाकर प्राप्त किया—उसके साथ विवाह किया ॥३॥ एक दिन कुमारका शत्रु नीलकण्ठ वहाँसे भी उन्हें हरकर ले गया तथा आकाशमें ले जाकर उसने छोड़ दिया। भाग्यवश कुमार चम्पानगरीके तालाबमें गिरे। वहाँसे निकलकर उन्होंने चम्पापुरीमें प्रवेश किया तथा वहाँके मन्त्रीकी पुत्रीके साथ विवाह किया ॥४॥ एक दिन कुमार चम्पानगरीमें जलक्रीड़ा कर रहे थे कि वैरी शूर्पक फिर हर ले गया। अबकी बार उससे छूटकर अनेक मनोरथोंको धारण करनेवाले कुमार भागीरथी नदीमें गिरे ॥५॥ वहाँसे निकलकर वे अटवीमें घूमने लगे। वहाँ म्लेच्छोंके राजाने उन्हें देखा जिससे वे म्लेच्छराजकी जरा नामक कन्याको विवाहकर वहीं रहने लगे ॥६॥ उन्नत पराक्रमको धारण करनेवाले वसुदेवने उस कन्यामें जरत्कुमार नामका पुत्र उत्पन्न किया। उसी समय कुमारने अवन्तिसुन्दरी और शूरसेना नामकी उत्तम कन्याको भी प्राप्त किया ॥७॥ तदनन्तर पुरुषको खोजनेवाली जीवद्यशा नामकी कन्याको एवं अनेक कन्याओंको विवाह कर कुमार वसुदेव अरिष्टपुर नामक नगर आये ॥८॥ उस समय वहाँ युद्धमें शत्रुओंको रोकनेवाला धीर वीर रुधिर नामका राजा था। उसकी मित्रा नामकी महारानी थी जो कान्ति रूपी सम्पदासे देवीके समान जान पड़ती थी ॥९॥ उन दोनोंके नीतिका वेत्ता, रण-निपुण महा पराक्रमी एवं शस्त्र और शास्त्रका अभ्यास करनेवाला हिरण्यनाभका ज्येष्ठ पुत्र था ॥१०॥ और कलाओंकी पारगामिनी, रूप तथा यौवनके अभ्युदयको धारण करनेवाली, रोहिणी नामकी पुत्री थी। वह

---

१. अपराः अन्याः कन्याः विवाह्य असौ अरिष्टपुरम् आययौ । २. नीतिज्ञः ।

स्वयंवरविधौ तस्याः सङ्गताः सकलाः नृपाः। जरासन्धं पुरोधाय समुद्रविजयादयः ॥१२॥
तत्र चित्रमणिस्तम्भधारितेषु यथाक्रमम्। ते मञ्चेषु समासीना नृपा भूषितविग्रहाः ॥१३॥
वसुदेवोऽपि तत्रैव भ्रात्रलक्षितवेषभृत्[1]। तस्थौ पाणविकान्त स्थो गृहीतपणवोऽग्रणीः ॥१४॥
ततः स्वयंवरान्तर्भूभागं सौभाग्यभूमिका। प्रविष्टा रोहिणी कन्या रोहिणीवातिरूपिणी ॥१५॥
तदा च सर्वभूपालैर्बलितैरलमाकुलैः। साऽलोकि युगपन्नेत्रैरर्चयद्भिरिवाम्बुजैः ॥१६॥
तद्रूपश्रवणाद् येषां परा प्रीतिरभूत्पुरा। सा रूपदर्शनात्तेषां महत्त्वमगमत्परम् ॥१७॥
श्रुतितूलततौ[2] वृद्धो योऽनुरागतनूनपात्। दर्शनेन्धनदीप्तस्य तस्य वृद्धिः किमुच्यताम् ॥१८॥
शङ्खतूर्यरवस्यान्ते ततो धात्री पवित्रवाक्। धृतप्रसाधनां कन्यां मान्यामाहाभितो नृपान् ॥१९॥
आतपत्रमिदं यस्य चन्द्रमण्डलपाण्डुरम्। त्रिखण्डजयतो लब्धं यशः स्वमिव शोभते ॥२०॥
यस्य चाज्ञाकराः सर्वे भूचरास्तु नभश्चराः। वसुन्धरेश्वरः सोऽयं जरासन्धोऽवतिष्ठते ॥२१॥
वृणीष्व रोहिणीशं[3] तं नृपं त्वल्लाभलोभतः। रोहिणीसङ्गमुज्झित्वा क्षितिं चन्द्रमिवागतम् ॥२२॥
तस्मिन्नरागिणीं बुद्ध्वा रोहिणीं साह सात्त्विका। जरासन्धसुतास्त्वेते वृणीष्वैषु हृदि स्थितम् ॥२३॥
धात्री चेतोविदूचे तां मथुरानाथमग्रतः। उग्रसेननृपं पश्य रोचते यदि ते सुते ॥२४॥

पुत्री सचमुच ही रोहिणी ताराके समान कीर्तिमती थी॥११॥रोहिणीके स्वयंवरमें जरासंधको आगे कर समुद्रविजय आदि समस्त राजा आये ॥१२॥ शोभित शरीरको धारण करनेवाले राजा लोग स्वयंवर मण्डपमें नाना प्रकारके मणिमयी खम्भोंसे सुशोभित मञ्चोंपर यथाक्रमसे बैठ गये ॥१३॥ भाइयोंकी पहचानमें न आ सके ऐसे वेषको धारण करनेवाले कुमार वसुदेव भी स्वयंवरमें गये और पणव नामक बाजा बजानेवालोंके पास जाकर बैठ गये। उस समय कुमार अपने हाथमें पणव नामक बाजा लिये हुए थे और उसके बजानेवालोंमें सबसे अग्रणी जान पड़ते थे ॥१४॥

तदनन्तर सौभाग्यकी भूमि और रोहिणी-ताराके समान अतिशय रूपवती रोहिणी कन्याने स्वयंवरके भीतर प्रवेश किया ॥१५॥ उस समय समस्त राजाओंने मुड़-मुड़कर, आकुलतासे युक्त नेत्रों द्वारा एक साथ उसका अवलोकन किया। उस समय उसकी ओर देखनेवाले राजा ऐसे जान पड़ते थे मानो नेत्ररूपी कमलोंसे उसकी पूजा ही कर रहे हों ॥१६॥ जिन राजाओंको पहले उसका रूप सुनकर परम प्रीति उत्पन्न हुई थी अब उसका रूप देखकर उन राजाओंकी वह परम प्रीति और भी अधिक महत्त्वको प्राप्त हो गई ॥१७॥ सो ठीक ही है क्योंकि जो अनुरागरूपी अग्नि श्रवण रूपी रूईकी सन्ततिमें लगकर धीरे-धीरे सुलग रही थी वह यदि दर्शन-रूपी ईंधनको पाकर एक दम प्रज्वलित हो उठे तो उसकी वृद्धिका क्या कहना है ? ॥१८॥ तदनन्तर जब शङ्ख और तुरही आदि वादित्रोंका शब्द शान्त हुआ तब पवित्र वचन बोलनेवाली धाय, अलंकारोंको धारण करनेवाली माननीय कन्याको राजाओंके सम्मुख ले जाकर कहने लगी ॥१९॥ कि हे पुत्रि ! जिसका यह चन्द्र-मण्डलके समान सफेद छत्र, तीनखण्डोंकी विजयसे प्राप्त यशरूपी धनके समान सुशोभित हो रहा है और समस्त भूमिगोचरी तथा विद्याधर राजा जिसके आज्ञाकारी हैं ऐसा यह वसुधाका स्वामी राजा जरासंध बैठा है॥२०-२१॥ हे रोहिणी! तुझे पानेके लोभसे रोहिणीका समागम छोड़कर पृथिवीपर आये हुए चन्द्रमाके समान जान पड़ता है ऐसे इस राजा जरासंधको तू स्वीकृत कर॥२२॥ सत्त्वगुणको धारण करनेवाली धायने जब देखा कि इसका अनुराग जरासंधमें नहीं है तब उसने आगे बढ़कर कहा कि ये जरासन्धके पुत्र हैं इनमेंसे जो तुझे पसन्द हो उसे वर॥२३॥ उनमें भी जब अनुराग नहीं देखा तब चित्तको जाननेवाली धायने आगे बढ़कर कहा कि हे बेटी ! यह आगे मथुराके स्वामी राजा उग्रसेन बैठे हैं यदि तेरी रुचि हो

१. भ्रातृभिरलक्षितं वेषं बिभर्तीति भ्रात्रलक्षितवेषभृत्। २. तनौ म०। श्रुतिकुलतनौ ग०। ३. रोहिणी शान्तम् म०।

लब्धधीः साह शौर्यादीन् पश्य सौर्यपुराधिपान् । मालामारोपयामीषामेकस्य रुचितस्य ते ॥२५॥
इत्युक्ते तेषु चेतोऽस्या बभार गुरुगौरवम् । ततोऽदर्शयदेषास्यै पाण्डुं विदुरमप्यतः ॥२६॥
दमघोषं यशोघोषं दन्तवक्त्रं सुविक्रमम् । [1]शल्यं शल्यमिवारीणां तथ्यं शत्रुञ्जयं नृपम् ॥२७॥
चन्द्राभं चन्द्रवत्कान्तं मुख्यं कालमुखं ततः । पौण्ड्रं च पुण्डरीकाक्षं मत्स्यं मात्सर्यवर्जितम् ॥२८॥
सञ्जयं च जये सक्तं सोमदत्तं नृपोत्तमम् । तत्पुत्रं भ्रातृभिर्युक्तं भूरिश्रवसमाश्रवम्[2] ॥२९॥
सूनुनांऽशुमताऽत्यन्तं कपिलं विपुलेक्षणम् । तथा पद्मरथं भूपं सोमकं सोमसौम्यकम् ॥३०॥
देवकं देवनाथाभं श्रीदेवं श्रीवधूश्रितम् । प्रदर्श्य तान् नृपानित्थं वंशस्थानादिशंसिनी ॥३१॥
अन्यानपि च कन्यायै धात्री सा न्यायविज्जगौ । एतावन्तो नृपा बाले मुख्याः किमिदमास्यते ॥३२॥
कुरु कन्ये गुणं कण्ठे चित्तस्थस्येह कस्यचित् । त्वत्सौभाग्यगुणाकृष्टराजमस्यास्य सन्निधौ ॥३३॥
[3]त्वं प्रकाशय सौभाग्यं कस्यचिच्चित्तहारिणः । योग्यभर्तृपरिप्राप्तिचित्तचिन्तास्तनिद्रयोः ॥
वृतयोग्यवरा पित्रोर्मुग्धे कुरु सुखासिकाम् ॥३४॥
एवमुक्ताऽवदत्कन्या[4] साधु मातरुदीरितम् । किन्तु त्वद्दर्शितेष्वेषु न मनो रज्यते क्वचित् ॥३५॥
दर्शनानन्तरं यत्र स्नेहोऽभिव्यज्यते हृदि । पौनरुक्त्यं भवेद्वाच्यं तत्राप्यत्राप्यतर्षता[5] ॥३६॥

तो इसकी ओर देख ॥२४॥ तदनन्तर विवेकवती धायने आगे बढ़कर कहा कि सौर्यपुरके स्वामी समुद्रविजय आदिको देख, यदि तेरी रुचि हो तो इनमेंसे किसी एकके गलेमें माला डाल ॥२५॥ धायके इस प्रकार कहनेपर कन्याके चित्तने उन सबके ऊपर गुरुके समान गौरव धारण किया अर्थात् उन्हें गुरु समझकर प्रणाम किया । तदनन्तर धायने कन्याके लिए राजा पाण्डुको दिखाया और उसके बाद विदुरको भी दिखलाया ॥२६॥ जब उसे इनमेंसे किसीपर भी कन्याका अनुराग नहीं दिखा तब उसने यशकी घोषणा करनेवाले दमघोष, अतिशय पराक्रमी दन्तवक्त्र, शत्रुओंके लिए शल्यके समान दुःख देनेवाले शल्य, सार्थक नामको धारण करनेवाले शत्रुञ्जय, चन्द्रमाके समान सुन्दर चन्द्राभ, अतिशय मुख्य कालमुख, कमलके समान नेत्रोंको धारण करनेवाले पौण्ड्र, मात्सर्यसे रहित मत्स्य, विजय प्राप्त करनेमें लीन संजय, राजाओंमें उत्तम सोमदत्त, भाइयोंसे सहित सोमदत्तका आज्ञाकारी पुत्र भूरिश्रवा, अंशुमान् नामक पुत्रसे सहित तथा अतिशय विशाल नेत्रोंको धारण करनेवाला राजा कपिल, राजा पद्मरथ, सोम—चन्द्रमाके समान सौम्य राजा सोमक, इन्द्रके समान आभाको धारण करनेवाला देवक और लक्ष्मीरूपी वधूसे सेवित श्रीदेव राजाको दिखाया तथा इन सब राजाओंको दिखाकर उनके वंश और स्थान आदिका भी वर्णन किया ॥२७-३१॥ तदनन्तर न्यायको जाननेवाली धायने कन्याके लिए और भी अनेक राजाओंका परिचय देते हुए कहा कि हे बाले! मुख्य इतने ही हैं। इस तरह चुपचाप क्यों खड़ी है? इनमेंसे जो भी तेरे हृदयमें स्थित हो—जिसे तू चाहती हो उसके कण्ठमें माला डाल दे। ये सभी राजा तेरे सौभाग्यरूपी गुणसे आकर्षित होकर इधर तेरे समीप स्थित हैं इनमें जो तुम्हारे चित्तको हरण करनेवाला हो उसके सौभाग्यको प्रकाशित कर। हे मुग्धे! तेरे लिए योग्य भर्ताकी प्राप्तिकी चिन्तासे तेरे माता-पिताकी निद्रा नष्ट हो गई है सो योग्य वरको स्वीकार कर उन्हें सुखी बना ॥३२-३४॥

धायके इस प्रकार कहनेपर कन्याने उत्तर दिया कि हे मातः! आपने ठीक कहा है किन्तु आपके द्वारा दिखाये हुए इन राजाओंमेंसे किसीपर मेरा मन अनुरक्त नहीं हो रहा है ॥३५॥ देखनेके बाद ही जिसके ऊपर हृदयमें स्नेह प्रकट हो जाता है उसे वरनेके लिए वचन कहना पुनरुक्त होता है तथा आन्तरिक स्नेहके प्रकट होनेपर ही स्त्री-पुरुष दोनोंमें सन्तोषका अनुभव

---

१. शूल्यं म० । २. -माश्रयं म० । ३. षट्पादोऽयं श्लोकः । ४. कन्यां म० । ५. -प्यनर्थता म० ।

न रागो न च विद्वेषो न मोहो न च शून्यता । मुनेरिव ममामीषु जातोपेक्षा कुतोऽप्यहो ॥३७॥
यद्यमीभ्यः परः कोऽपि विधिना मे विधित्सितः । वरस्तं दर्शयत्वद्य विधिरेव जगद्गुरुः ॥३८॥
तद्वचोऽनन्तरं कन्या शुश्राव पणवध्वनिम् । श्रव्यं श्रवणमार्गेण गत्वा चेतोऽतिकर्षिणम् ॥३९॥
इतः पश्य वरारोहे ! त्वन्मनोहरणक्षमम् । राजहंसमिति स्पष्टं बभाण पणवः स हि ॥४०॥
परावृत्य ततः कन्या पश्यन्ती सा व्यलोकत । राजलक्षणसंयुक्तं वसुदेवं [1]वसूपमम् ॥४१॥
अन्योन्यदृष्टिसम्पातनिशात[2]शरसम्पदा । मनो मनसिजश्चक्रे ततो जर्जरितं तयोः ॥४२॥
आसाद्य सा ततस्तस्य भूषणस्वनहारिणी । कण्ठे कण्ठगुणं चक्रे स्तनचक्रेण सन्नता ॥४३॥
मञ्चस्थस्योपकण्ठेऽस्य समासीना व्यराजत । रोहिणी हारिणी तारा रोहिणीव कलावतः[3] ॥४४॥
नवसङ्गमसञ्जातसाध्वसेन सकम्पना । कन्या सा स्वाङ्गसङ्गेन तस्याङ्गसुखमाहरत् ॥४५॥
तं स्वयंवरमालोक्य केचिदूचुरिदं[4] नृपाः । जातोऽनुरूपयोर्योगो रत्नकाञ्चनयोरिव ॥४६॥
अहो नैपुण्यमेतस्याः कन्याया यदयं नृपः । कोऽपि गूढकुलः श्रीमान् प्रधानपुरुषो वृतः ॥४७॥
मात्सर्योपहतास्त्वन्ये जगुः पाणविकं वरम् । कुर्वन्त्या पश्यतात्यन्तमन्यायः कन्यया कृतः ॥४८॥
पराभूतिमिमां राज्ञां नैव युक्तमुपेक्षितुम् । सर्वदातिप्रसङ्गः स्यादेवं सति महीतले ॥४९॥
कुलीनानां समाजेऽस्मिन् परस्यावसरोऽस्य कः । वक्तु वा वक्तुकामश्चेत्कुलीनः कुलमात्मनः ॥५०॥
न चेदेवं करोत्येष कोऽपि नीचान्वयोद्भवः । कुव्यतां राजपुत्रस्य कन्याप्यस्त्विह कस्यचित् ॥५१॥

होता है ॥३६॥ इन राजाओंपर मुझे न राग है, न द्वेष है, न मोह है और न शून्यता है । अहो ! मुनिके समान मेरी इन सबपर किसी कारणसे उपेक्षा हो गई है ॥३७॥ यदि विधाताने इन सबसे बढ़कर कोई दूसरा वर मेरे लिए बनाना चाहा है तो जगत्का गुरु विधाता ही आज उस वरको दिखलावे ॥३८॥ इतना कहनेके बाद ही कन्याने, कर्ण मार्गसे भीतर जाकर चित्तको खींचनेवाली पणवकी मधुर ध्वनि सुनी ॥३९॥ वह ध्वनि मानो स्पष्ट रूपसे यही कह रही थी कि हे सुन्दरि ! तुम्हारे मनको हरण करनेवाला राजहंस इधर बैठा है, अतः इस ओर देखो ॥४०॥ तदनन्तर ज्योंही कन्याने मुड़कर उस ओर देखा, त्योंही उसे राजलक्षणोंसे युक्त कुबेरके समान वसुदेव दिखे ॥४१॥ उसी क्षण कामदेवने परस्पर दृष्टि सम्मिश्रण रूप तीक्ष्ण बाणोंकी सम्पदासे दोनोंका मन जर्जरित कर दिया ॥४२॥ तदनन्तर जो आभूषणोंके शब्दसे अतिशय मनोहर जान पड़ती थी और स्तनचक्रके भारसे नीचेकी ओर झुक रही थी । ऐसी रोहिणीने पास जाकर वसुदेवके गलेमें माला डाल दी ॥४३॥ मञ्चपर आसीन वसुदेवके समीप बैठी हुई रोहिणी, चन्द्रमाके समीप स्थित रोहिणी ताराके समान मनोहर जान पड़ती थी ॥४४॥ नवीन समागमसे उत्पन्न भयके कारण जिसका शरीर कुछ-कुछ काँप रहा था ऐसी रोहिणीने अपने शरीरके स्पर्शसे वसुदेवके शरीरको सुख उत्पन्न कराया ॥४५॥ उस स्वयंवरको देखकर कितने ही राजा यह कहने लगे कि अहो ! जिस प्रकार रत्न और सुवर्णका संयोग होता है उसी प्रकार यह दोनों योग्य वर-वधूका संयोग हुआ है ॥४६॥ अहो ! इस कन्याकी चतुराई देखो कि जिसने छिपे कुलसे युक्त लक्ष्मी सम्पन्न एवं प्रधान पुरुष रूप इस किसी अनिवर्चनीय राजाको वरा है ॥४७॥ मात्सर्यसे पीड़ित अन्य राजा लोग यह कह रहे थे कि देखो पणववादकको वर बनाती हुई कन्याने यह बड़ा अन्याय किया है ॥४८॥ राजाओंको इस पराभवकी उपेक्षा करना उचित नहीं है क्योंकि ऐसा होनेसे तो पृथिवी तलपर सदा अतिप्रसङ्ग होने लगेगा—कुल मर्यादाकी सब व्यवस्था ही भङ्ग हो जायगी ॥४९॥ कुलीन मनुष्योंकी इस सभामें इस अकुलीन मनुष्यका असर ही क्या था ? अथवा यह कुलीन है और अपना कुल बताना चाहता है तो बतावे ॥५०॥ यदि यह ऐसा नहीं करता

---

१. 'वसुर्मयूखाग्निधनाधिपेषु' इति वैजयन्ती । २. तीक्ष्ण । ३. चन्द्रस्य । ४. -रिमं म० ।

वसुदेवस्ततो धीरः प्रोवाच क्षुभितान् नृपान् । श्रूयतां क्षत्रियैर्दृप्तैः साधुभिश्च वचो मम ॥५२॥
स्वयंवरगता कन्या वृणीते रुचिरं वरम् । कुलीनमकुलीनं वा न क्रमोऽस्ति स्वयंवरे ॥५३॥
अक्षान्तिस्तत्र नो युक्ता पितुर्भ्रातुर्निजस्य वा । स्वयंवरगतिज्ञस्य परस्येह च कस्यचित् ॥५४॥
कश्चिन्महाकुलीनोऽपि दुर्भगः सुभगोऽपरः । कुलसौभाग्ययोर्नेह प्रतिबन्धोऽस्ति कश्चन ॥५५॥
तदत्र यदि सौभाग्यमविज्ञातस्य मेऽनया । अभिव्यक्तं न वक्तव्यं भवद्भिरिह किञ्चन ॥५६॥
अथ पौरुषदर्पेण कश्चिदत्र न शाम्यति । शमयामि तमाकर्णकृष्टमुक्तैः शिलीमुखैः ॥५७॥
तच्छ्रुत्वाऽऽशु जरासन्धः क्रुद्धः प्राह नृपान् नृपाः । गृह्यतामयमुद्वृत्तो[1] रुधिरश्च सपुत्रकः[2] ॥५८॥
क्षुभिताः पूर्वमेवाऽऽसन् द्विगुणं चक्रिवाक्यतः । खलप्रकृतयो भूपाः सन्नद्धाः योद्धुमुद्यताः ॥५९॥
साधुप्रकृतयः केचित्तत्र क्षत्रियपुङ्गवाः । तस्थुः पापनिवृत्तेच्छाः पृथक् स्वबलसङ्गताः ॥६०॥
पक्षास्तु रुधिरस्यैके प्रतिपक्षबिभित्सया । सन्नह्य सहसा प्राप्ताः रुधिरारुणवीक्षणाः ॥६१॥
रथं हिरण्यनाभः स्वं तस्थावारोप्य रोहिणीम् । समस्तबलसंयुक्तो रुधिरोऽपि वरं वरम् ॥६२॥
रुधिरो मधुरैर्वाक्यैर्निजयोधानबोधयत् । यूयं महारथा[3] युद्धे[4] कुरुध्वं युक्तमात्मनः ॥६३॥
वरेण श्वशुरोऽवाचि पूज्य ! मे स्यन्दनं द्रुतम् । समर्पय महानेकशस्त्रास्त्रपरिपूरितम् ॥६४॥

है—अपना कुल नहीं बतलाता है तो यह कोई नीच कुलमें उत्पन्न हुआ है अतः इसे यहाँसे हटा दिया जाय और यह कन्या किसी राजपुत्रको दे दी जाय ॥५१॥

तदनन्तर धीर-वीर वसुदेवने क्षोभको प्राप्त हुए राजाओंसे कहा कि अहंकारसे भरे क्षत्रिय तथा सज्जन पुरुष हमारे वचन सुनें ॥५२॥ स्वयंवरमें आई हुई कन्या अपनी इच्छाके अनुरूप कुलीन अथवा अकुलीन वरको वरती है। स्वयंवरमें कुलीन अथवा अकुलीनका कोई क्रम नहीं है ॥५३॥ इसलिए कन्याके पिता, भाई अथवा स्वयंवरकी विधिको जाननेवाले किसी अन्य महाशयको इस विषयमें अशान्ति करना योग्य नहीं है ॥५४॥ कोई महाकुलमें उत्पन्न होकर भी दुर्भग—स्त्रीके लिए अप्रिय होता है और कोई नीच कुलमें उत्पन्न होकर भी सुभग—स्त्रीके लिए प्रिय होता है। यही कारण है कि इस विषयमें कुल और सौभाग्यका कोई प्रतिबन्ध नहीं है ॥५५॥ इसलिए यदि इस कन्याने मुझ अपरिचितका सौभाग्य प्रकट किया है तो इस विषयमें आप लोगोंको कुछ नहीं कहना चाहिए ॥५६॥ इतनेपर भी यदि कोई पराक्रमके गर्वसे यहाँ शान्त नहीं होता है तो मैं कानतक खींचकर छोड़े हुए बाणोंसे उसे शान्त कर दूँगा ॥५६॥ वसुदेवके उक्त वचन सुनकर राजा जरासन्ध शीघ्र ही कुपित हो उठा। उसने राजाओंसे कहा कि इस उद्दण्डको तथा पुत्र सहित राजा रुधिरको पकड़ लो ॥५७॥ दुष्ट स्वभावके राजा पहले हीसे कुपित थे फिर चक्रवर्तीका आदेश पाकर तो दूने कुपित हो गये। तदनन्तर वे दुष्ट राजा तैयार होकर युद्धके लिए उद्यत हो गये ॥५८-५९॥ वहाँ जो सज्जन प्रकृतिके राजा थे वे पापसे निःस्पृह हो अपनी-अपनी सेना लेकर अलग खड़े हो गये ॥६०॥ जो क्षत्रिय रुधिरके पक्षके थे वे क्रोधसे रक्तके समान लाल-लाल नेत्र करते हुए, शत्रुको घायल करनेकी इच्छासे शीघ्र ही तैयार होकर वहाँ आ पहुँचे ॥६१॥ राजा रुधिरका पुत्र स्वर्णनाभ रोहिणीको अपने रथपर चढ़ाकर खड़ा हो गया और समस्त सेनासे युक्त राजा रुधिर उत्कृष्ट वर—वसुदेवको अपने रथपर सवार कर खड़ा हो गया ॥६२॥ रुधिरने मीठे-मीठे शब्दों द्वारा अपने योधाओंको सम्बोधते हुए कहा कि हे महारथियो ! तुम लोग युद्धमें अपने अनुरूप ही कार्य करो—जैसा तुम लोगोंका नाम है वैसा ही कार्य करो ॥६३॥ वसुदेवने अपने श्वसुर—राजा रुधिरसे कहा कि हे पूज्य ! आप मुझे अनेक

---

१. -मुद्वृत्ता म० । २. सुपुत्रकः म० । ३. महारथो म० । ४. युद्धैः कुरुध्वं युद्धमात्मनः ग० ।

कान्दिशीकान् करोम्यद्य यद्द्रुतं चत्रियानमून् । संख्येऽप्रख्यातवंशस्य सहन्तां मे शरानमी ॥६५॥
इत्युक्ते रुधिरोऽतोषि पुरुषान्तरवीक्षणात् । अढौकयद्[2]दृढास्त्राढ्यं जव[3]नाश्वमहारथम् ॥६६॥
खेटो दधिमुखः शौरिं शूरो रथव[4]रस्थितः । मनोरथ इव प्राप्तस्तदा दिव्यास्त्रभासुरः ॥६७॥
प्रणतश्च स तं प्राह रथमारोह मे द्रुतम् । सारथिस्तव युद्धेऽहं जहि शत्रुकदम्बकम् ॥६८॥
आरुरोह रथं शौरिस्तस्य तुष्टः परिष्कृतः । चापी च कवची चित्रशरसंघातसंकुलम् ॥६९॥
द्विसहस्ररथं सैन्यं षट्सहस्रमदद्विपम् । चतुर्दशसहस्राश्वं लक्षात्मकपदातिकम् ॥७०॥
[5]रौधिरं युधि सान्निध्यं शौरेराशु तदाश्रितम् । शत्रुसैन्यविनाशाय कृतनिश्चयमाबभौ ॥७१॥
चतुरङ्गेण तेनाशु बलेन बलशालिना । अदृष्टपारम[6]भ्याच्च शौरिः शत्रुबलोदधिम् ॥७२॥
सम्पातश्च तयोर्जातः सेनयोश्चतुरङ्गयोः । समुद्रघोषयोः शङ्खतूर्यादिरवरौद्रयोः ॥७३॥
हस्त्यश्वरथपादातमौचित्येन यथायथम् । हस्त्यश्वरथपादातमभ्येत्या[7]युध्यदाहवे ॥७४॥
नीरन्ध्रशरजालेन नभोरन्ध्रपिधायिना । न सहस्रकरोऽदर्शि रणेऽन्यत्र कथैव[8] का ॥७५॥
असिचक्रगदाघातरक्तधारान्धकारिते । निरुद्धः पादसञ्चारो रणे तेजोनिधेरपि ॥७६॥
पतद्भिर्मत्तमातङ्गैः पर्वतैरिव सर्वतः । नरैरश्वै रथैर्वोपः शीर्यमाणैर्महानभूत् ॥७७॥

अस्त्र-शस्त्रोंसे भरा हुआ रथ शीघ्र ही दीजिए ॥६४॥ जिससे मैं इन क्षत्रियोंको शीघ्र ही पलायमान कर दूँ। ये लोग युद्धमें जिसके कुलका पता नहीं ऐसे मेरे बाणोंको सहन करें ॥६५॥ वसुदेवके इस प्रकार कहनेपर राजा रुधिर बहुत सन्तुष्ट हुआ। वह पुरुषोंके अन्तरको समझनेवाला जो था। तदनन्तर उसने मजबूत अस्त्र-शस्त्रोंसे युक्त एवं वेगशाली घोड़ोंसे जुता हुआ महारथ बुलाया ॥६६॥ उसी समय शूर, वीर, उत्तम रथपर स्थित तथा दिव्य अस्त्रोंसे देदीप्यमान दधिमुख नामका विद्याधर मनोरथके समान कुमार वसुदेवके पास आ पहुँचा ॥६७॥ और नम्र होकर बोला कि आप शीघ्र ही मेरे रथपर चढ़ जाइए। युद्धमें मैं आपका सारथी रहूँगा। आप इच्छानुसार शत्रुओंके समूहको नष्ट कीजिए ॥६८॥ उसके वचन सुनकर वसुदेव बहुत सन्तुष्ट हुए और धनुष हाथमें ले तथा कवच धारण कर नाना प्रकारके बाणोंके समूहसे भरे हुए उसके रथपर चढ़ गये ॥६९॥ जिसमें दो हजार रथ थे, छह हजार मदोन्मत्त हाथी थे; चौदह हजार घोड़े थे और एक लाख पैदल सैनिक थे। ऐसी राजा रुधिरकी विशाल सेना, शत्रु सेनाके नाशका दृढ़ निश्चय कर शीघ्र ही कुमार वसुदेवके समीप आ गई ॥७०-७१॥ उस बलशाली चतुरङ्ग सेनाके साथ वसुदेव शीघ्र ही, जिसका अन्त नहीं दिखाई देता था ऐसे शत्रुकी सेना रूपी समुद्रके सम्मुख गये ॥७२॥

तदनन्तर समुद्रके समान शब्द करनेवाली एवं शङ्ख तुरही आदिके शब्दोंसे भयंकर दोनों चतुरङ्ग सेनाओंमें मुठभेड़ शुरू हुई ॥७३॥ हाथी, घोड़ा, रथ और पैदल सैनिक यथायोग्य रीतिसे हाथी, घोड़ा, रथ और पैदल सैनिकोंके सामने जाकर रणक्षेत्रमें युद्ध करने लगे ॥७४॥ आकाश-विवरको आच्छादित करनेवाले सघन बाणोंके समूहसे उस समय युद्धमें सूर्य भी दिखाई नहीं देता था फिर अन्य पदार्थोंकी तो बात ही क्या थी? ॥७५॥ तलवार, चक्र और गदाके प्रहारसे निकलती हुई खूनकी धाराओंसे जहाँ अन्धकार फैल रहा था ऐसे उस रणक्षेत्रमें सूर्यका भी पादसंचार—किरणोंका संचार रुक गया था। पक्षमें अतिशय तेजस्वी मनुष्यका पैदल आना जाना रुक गया था ॥७६॥ वहाँ सब ओर पर्वतोंके समान बड़े-बड़े हाथी गिर रहे थे तथा मनुष्य घोड़े और रथ जीर्ण-शीर्ण होकर धराशायी हो रहे थे। इन सबसे वहाँ बहुत भारी शब्द हो रहा

१. भयद्रुतान् । २. आढौक्य म० । ३. यावनाश्व—म० । ४. रथवरं स्थितः म० । ५. रुधिरस्येदं रौधिरं । ६. मध्यं च म० । अभ्याश्च सन्मुखं जगाम । ७. अभ्येत्य + अयुध्यत् + आहवे । ८. रणेऽन्यत्रैव म० ।

अथ सेनामुखं खिन्नं चिरं कृतरणं निजम् । शौरिर्हिरण्यनाभश्च साधारयितुमुद्यतौ ॥७८॥
तौ दृष्टिमुष्टिसन्धानप्रयोगानभिलक्षितौ । शरै[1]श्छादयितुं लग्नौ परयो[2]धानितस्ततः ॥७९॥
न नागो न रथो नाश्वो न नरो वा महाहवे । यो न जर्जरितस्ताभ्यां मुञ्चद्भ्यां निशितान् शरान् ॥८०॥
द्विट्प्रयुक्तशरासारं वायव्यास्त्रेण सोऽकिरत् । शौरिर्माहेन्द्रबाणेन निचकर्त्त धनूंष्यपि ॥८१॥
छत्राणि शशिशुभ्राणि शत्रूणां स यशांसि च । सुतुङ्गान्मूर्धजान्मान्यान् शरपातैरपातयत् ॥८२॥
युध्यमाने तथा तस्मिन् वीरे वीरभयानके । हिरण्यनाभवीरेण रणे पौण्ड्रः पुरस्कृतः ॥८३॥
कुमारयोस्तयोस्तत्र सुमहारथवर्त्तिनोः । शरैर्युद्धमभूद्रौद्रं यथा सिंहकिशोरयोः ॥८४॥
अपातयद् ध्वजं छत्रं रौधिरिः[3] सारथिं रिपोः । रथस्य तुरगान् वेगादध्यक्षांश्च शरैः शितैः ॥८५॥
ततश्चण्डरुषा पौण्ड्रो वज्रदण्डनिभैः शरैः । कृतानुरूपमस्यारेः स चकार तदेव हि ॥८६॥
ततो हिरण्यनाभोऽपि बिभेद कवचं द्विषः । केतुं छत्रं च बाणौघै रथसारथिवाजिनः ॥८७॥
विरथीकृत्य पौण्ड्रोऽपि तमाशु शितसायकैः[4] । सद्यः प्राणहरं तस्य संधत्ते यावदाशुगम् ॥८८॥
वसुदेवोऽर्द्धचन्द्रेण तावच्छित्वाऽस्य तद्धनुः । चक्रे हिरण्यनाभं च स्वरया[5]स्व रथे स्थिरे ॥८९॥
छाद्यमाने तथा पौण्ड्रे शौरिणा शरवर्षिणा । ववृषुः शरसङ्घातानेकीभूय बहुद्विषः ॥९०॥
शरैः शरान् निवार्याऽसौ बिभेद निशितैः शरैः । शत्रून् शत्रुवितीर्णोच्चैः साधुकारः पदे पदे ॥९१॥

था ॥७७॥ तदनन्तर चिरकाल तक युद्ध करनेके बाद जो खेद खिन्न हो गया था ऐसी अपनी सेनाके अग्रभागको सहारा देनेके लिए वसुदेव और स्वर्णनाभ दोनों ही उद्यत हुए ॥७८॥ दृष्टिको अपहरण करनेवाले प्रयोगसे जिन्हें कोई देख नहीं पाता था ऐसे ये दोनों ही जहाँ-तहाँ बाणोंके द्वारा शत्रु-पक्षके योद्धाओंको आच्छादित करने लगे ॥७९॥ उस महायुद्धमें न ऐसा हाथी था, न रथ था, न घोड़ा था और न मनुष्य ही था जो तीक्ष्ण बाणोंको छोड़नेवाले उन दोनोंके द्वारा जर्जरित न किया गया हो॥८०॥कुमार वसुदेव,शत्रुके द्वारा चलाये हुए बाणोंकी वर्षाको तो वायव्य अस्त्रसे तितर-बितर कर देते थे और अपने माहेन्द्र बाणसे शत्रुओंके धनुष तकको तोड़ देते थे॥८१॥ उन्होंने बाणोंके प्रहारसे शत्रुओंके चन्द्रमाके समान सफेद छत्र, उज्ज्वल यश तथा अतिशय-उन्नत माननीय शिरके बालोंको नीचे गिरा दिया ॥८२॥ इधर वीरोंको भय उत्पन्न करनेवाले शूरवीर वसुदेव इस प्रकारका भयंकर युद्ध कर रहे थे और उधर वीर स्वर्णनाभने युद्धक्षेत्रमें पौण्ड्र राजा-को अपने सामने किया ॥८३॥ जिस प्रकार सिंहके दो बच्चोंका भयंकर युद्ध होता है उसी प्रकार अतिशय महान् रथपर बैठे हुए उन दोनों कुमारोंमें भी बाणों द्वारा भयंकर युद्ध होने लगा ॥८४॥ स्वर्णनाभने देखते-देखते तीक्ष्ण बाणोंसे शत्रुकी ध्वजा, छत्र, सारथि और रथके घोड़ोंको शीघ्र ही नीचे गिरा दिया ॥८५॥ तदनन्तर राजा पौण्ड्रने भी अत्यन्त कुपित हो वज्रदण्डके समान तीक्ष्ण बाणोंसे शत्रुकी नकल करते हुए उसकी ध्वजा, छत्र, सारथि और घोड़ोंको धराशायी कर दिया ॥८६॥ तत्पश्चात् स्वर्णनाभने भी बाणोंके समूहसे शत्रुके कवच, पताका, छत्र, रथ, सारथि, और घोड़ोंको काट डाला ॥८७॥ यह देख पौण्ड्रने भी तीक्ष्ण बाणोंके द्वारा स्वर्णनाभको शीघ्र ही रथ-रहित कर तत्काल ही उसके प्राणोंको हरण करनेवाला बाण ज्योंही धनुषपर चढ़ाया त्योंही वसुदेवने अर्धचन्द्राकार बाणसे उसके धनुषको काट डाला और शीघ्रताके साथ स्वर्णनाभको अपने स्थिर रथपर चढ़ा लिया ॥८८-८९॥ तदनन्तर लगातार बाण वर्षा करनेवाले वसुदेवने जब पौण्ड्रको आच्छादित कर लिया तब बहुतसे शत्रु एक होकर—मिलकर वसुदेवपर बाणोंके समूहकी वर्षा करने लगे ॥९०॥ परन्तु फिर भी वसुदेव अपने बाणोंसे शत्रुके बाणोंका निवारण

---

१. शनैः म० । २. परं योधानितस्ततः म० । ३. रुधिरस्यापत्यम् पुमान् रौधिरिः । ४. शितिसायकैः म० । ५. त्वरयाश्वरथे म० ।

अथ साधुनृपैस्तत्र न्यायविद्भिरितीरितम् । न द्रष्टव्यमिदं युद्धमेकस्य बहुभिः सह ॥९२॥
ततो जगौ जरासन्धो धर्मयुद्धदिदृक्षया । अनेन सह कन्यार्थमेकैको युध्यतामिति ॥९३॥
ततः शत्रुंजयो लग्नः शौरिणा योद्धुमुद्यतः । शेषास्तु प्रेक्षका जाता क्षत्रियाः [१]तमत्सराः ॥९४॥
शरान् शत्रुञ्जयोत्क्षिप्तान् शौरिः प्रक्षिप्य दूरतः । तं ध्वस्तरथसन्नाहं विह्वलीकृत्य मुक्तवान् ॥९५॥
दत्तवक्त्रस्ततो दत्तचिरयुद्धो मदोद्धतः । विरथीकृत्य निर्मुक्तो निःसारीकृतपौरुषः ॥९६॥
रिपुं कालमुखं प्राप्तं रणे कालमिवोद्धतम् । प्राणशेषमसौ कृत्वा विससर्जोर्जितो यदुः ॥९७॥
शल्यं रथेन सम्प्राप्तं तीक्ष्णसायकमोचकम् । जृम्भणास्त्रेण रौद्रेण बबन्धान्धकवृष्णिजः ॥९८॥
समुद्रविजयं प्राह जरासन्धस्ततो द्रुतम् । त्वं हरास्य रणे दर्पं पार्थिवास्त्रविशारदः ॥९९॥
अपि न्यायविदुत्तस्थौ स राजा राजशासनात् । युद्धे प्रायोऽनुवर्त्तन्ते प्रभुं न्यायविदोऽपि हि ॥१००॥
समुद्रविजयादेशात्पुनः सारथिना रथः । दधावोच्चैर्ध्वजच्छत्रो वासुदेवरथं[२] प्रति ॥१०१॥
दृष्ट्वा ज्येष्ठरथं दूरात् कनीयान् सारथिं जगौ । ज्यायांसं मम जानीहि समुद्रविजयं त्विमम् ॥१०२॥
मन्दमत्र गुरौ वाह्यो रथो दधिमुख ! त्वया । सापेक्षं हि मया योध्यमनेन गुरुणा रणे ॥१०३॥
यथोद्दिष्टं ततस्तेन रथः सारथिना रणे । नोदितोऽपि ययौ मन्दः स्यन्दनं गुर्वधिष्ठितम् ॥१०४॥

कर तीक्ष्ण बाणोंसे शत्रुपर प्रहार करते रहे। उस समय कुमारकी कुशलतासे प्रसन्न होकर शत्रु भी उन्हें पद-पदपर साधु-साधु—बहुत अच्छा बहुत अच्छा कहकर धन्यवाद दे रहे थे ॥९१॥

अथानन्तर जो वहाँ न्याय-नीतिके जाननेवाले सज्जन राजा थे उन्होंने कहा कि हम लोगोंको यह युद्ध नहीं देखना चाहिए क्योंकि यह एकका अनेकके साथ हो रहा है—एकके ऊपर अनेक व्यक्ति प्रहार कर रहे हैं इसलिए यह अन्यायपूर्ण युद्ध है ॥९२॥ तदनन्तर धर्म-युद्ध देखनेकी इच्छासे जरासंधने कहा कि अच्छा, कन्याके लिए इसके साथ एक-एक राजा युद्ध करे ॥९३॥ तत्पश्चात् जरासंधका आदेश पाकर राजा शत्रुञ्जय कुमार वसुदेवके साथ युद्ध करनेके लिए उठा और शेष राजा मत्सर रहित हो युद्ध देखने लगे ॥९४॥ कुमारने शत्रुञ्जयके द्वारा चलाये हुए बाणोंको दूर फेंककर उसके रथ और कवचको तोड़ डाला तथा उसे मूर्च्छित कर छोड़ दिया ॥९५॥ तदनन्तर मदसे उद्धत राजा दत्तवक्त्र युद्ध करने लगा परन्तु कुमारने उसका भी रथ तोड़ डाला और उसके पौरुषको निःसार कर उसे भगा दिया ॥९६॥ तदनन्तर जो यमराजके समान उद्धत था ऐसा कालमुख युद्धके लिए सामने आया सो अतिशय बलवान् वसुदेवने उसे भी प्राण-शेषकर छोड़ दिया ॥९७॥ अब रथपर सवार हो तीक्ष्ण बाणोंको छोड़ता हुआ शल्य सामने आया सो वसुदेवने उसे भी अतिशय भयंकर जृम्भण नामक अस्त्रसे बाँध लिया ॥९८॥

तदनन्तर जरासंधने समुद्रविजयसे कहा कि हे राजन् ! तुम अस्त्र-विद्यामें अत्यन्त निपुण हो इसलिए शीघ्र ही युद्धमें इसका गर्व हरण करो ॥९९॥ यद्यपि समुद्रविजय न्याय-नीतिके वेत्ता थे—युद्ध नहीं करना चाहते थे तथापि राजा जरासंधकी आज्ञासे उठे सो ठीक ही है क्योंकि युद्धके विषयमें न्यायके वेत्ता मनुष्य भी प्रायः अपने स्वामीका ही अनुसरण करते हैं ॥१००॥ तत्पश्चात् समुद्रविजयकी आज्ञा पाकर सारथिके द्वारा चलाया हुआ रथ, ऐसा रथ कि जिसपर बहुत ऊँची ध्वजा और छत्र लगा हुआ था, वसुदेवके रथकी ओर दौड़ा ॥१०१॥ वसुदेवने दूरसे ही बड़े भाईके रथको देखकर अपने सारथिसे कहा कि इन्हें तुम मेरे बड़े भाई समुद्रविजय जानो ॥१०२॥ हे दधिमुख ! ये हमारे पितातुल्य हैं अतः तुम्हें इनके आगे रथ धीरे-धीरे ले जाना चाहिए। मुझे रणभूमिमें इनके साथ इनकी रक्षाका ध्यान रखते हुए ही युद्ध करना चाहिए ॥१०३॥ सारथि-दधिमुखने, वसुदेवकी आज्ञानुसार ही रथ चलाया जिससे वह प्रेरित होनेपर भी

---

१. त्यक्तमत्सराः म० । २. वसुदेवं रथं म० ।

निजसारथिमाजिस्थः[1] समुद्रविजयो जगौ । भद्र ! योधमिमं दृष्ट्वा सस्नेहं मे मनः कुतः ॥१०५॥
दक्षिणाक्षिभुजास्पन्दो बन्धुसम्बन्धगन्धनः । युधि वध्यस्य सान्निध्ये वद सम्बध्यते कथम् ॥१०६॥
सुनिमित्तविसंवादो नानुभूतश्च जातुचित् । विरुद्धदेशकालत्वात्संवादोऽपि न युज्यते ॥१०७॥
इत्युक्ते सोऽवदत् स्वामिन्नभ्यमित्रमितस्य ते । अवश्यं बन्धुसम्बन्धो जितजेयस्य जायते ॥१०८॥
परै राजन्नजय्यस्य राजलोकस्य सन्निधौ । परस्य विजये पूजां राजराजादवाप्स्यसि ॥१०९॥
सोऽभिनन्दिततद्वाच्यः कार्मुकी तं सकार्मुकम् । शरधेः शरमुद्धृत्य जगादोद्धृतसायकम् ॥११०॥
भो धीर ! ते यथादृष्टं मृधे धनुषि कौशलम् । तथा निर्वहणं तस्य त्वं कुरुष्व ममाग्रतः ॥१११॥
शौर्यशैल ! तवोत्तुङ्गमानश्रृङ्गमनावृतम् । आवृणोमि शरैर्मेघैः समुद्रविजयस्त्वहम् ॥११२॥
कुमारः स्वरभेदेन जगौ किं नो बहूदितैः । आवयोरिह राजेन्द्र ! रणे व्यक्तिर्भविष्यति ॥११३॥
समुद्रविजयस्त्वं चेत्संग्रामविजयस्त्वहम् । न चेत्प्रत्येषि तत्क्षिप्रं क्षिप संधाय सायकम् ॥११४॥
इत्युक्ते मुक्तमाध्यस्थ्यो वैशाखस्थानमास्थितः । संधाय शरमाकृष्य विव्याध क्रोधतो नृपः ॥११५॥
प्रतिक्षिप्तेन स क्षिप्रमाशुगेन तमाशुगम् । दूरादेव च विच्छेद वैशाखस्थानमण्डितः ॥११६॥
मुक्तान्मुक्तान्नृपेणासाविषूनिषुभिराहवे । प्रत्युन्मुक्तैरतिक्षिप्रं दूरादेव निराकरोत् ॥११७॥
वायव्यवारुणाद्यैस्तौ दिव्यास्त्रैरस्त्रकोविदौ । युयुधाते नृदेवानां साधुकारैः स्तुतौ चिरम् ॥११८॥

समुद्रविजयसे अधिष्ठित रथकी ओर धीरे-धीरे ही चला ॥१०४॥ युद्धके मैदानमें आनेपर राजा समुद्रविजयने अपने सारथिसे कहा कि हे भद्र ! इस योद्धाको देखकर मेरा मन स्नेहयुक्त क्यों हो रहा है ? ॥१०५॥ दाहिनी आँख तथा भुजा भी फड़क रही है जो बन्धुके समागमको सूचित करनेवाली है परन्तु युद्धके मैदानमें जब कि शत्रु सामने खड़ा है इस शकुनकी संगति कैसे बैठ सकती है तुम्हीं कहो ॥१०६॥ उत्तम शकुनोंमें विसंवाद—विरोधका कभी अनुभव नहीं किया और देश तथा कालके विरुद्ध होनेसे निमित्तोंका संवाद भी संगत नहीं जान पड़ता ॥१०७॥ समुद्रविजयके इस प्रकार कहनेपर सारथिने कहा कि हे स्वामिन् ! अभी आप शत्रुके सामने खड़े हैं जब इसे आप जीत लेंगे तब अवश्य ही बन्धु समागम होगा ॥१०८॥ हे राजन् ! यह शत्रु दूसरोंके द्वारा अजेय है अतः इसके जीत लेनेपर आप राजाओंके समक्ष राजाधिराज जरासंधसे अवश्य ही विशिष्ट सम्मानको प्राप्त करेंगे ॥१०९॥

समुद्रविजयने सारथिके वचनोंकी प्रशंसाकर धनुष उठाया और तरकशसे बाण निकालकर धनुष हाथमें ले बाण निकालकर खड़े हुए कुमार वसुदेवसे कहा कि हे धीर ! युद्धमें तुम्हारे धनुषका जैसा कौशल देखा है अब मेरे आगे वैसा ही उसका समारोप करो—उसी प्रकारकी कुशलता दिखाते रहो तो जानें ॥११०-१११॥ हे शूरवीरताके पर्वत ! तुम्हारा अतिशय उन्नत यह मानरूपी शिखर अभी तक अनाच्छादित है सो मैं बाणरूपी मेघोंसे अभी आच्छादित करता हूँ मैं समुद्रविजय हूँ ॥११२॥ कुमारने आवाज बदलकर कहा कि हे राजेन्द्र ! हम लोगोंको बहुत कहनेसे क्या लाभ है ? युद्धमें ही हम दोनोंकी प्रकटता हो जायगी—जो जैसा होगा वह वैसा सामने आ जावेगा ॥११३॥ यदि आप समुद्रविजय हैं तो मैं संग्रामविजय हूँ । यदि आपको प्रतीति न हो तो शीघ्र ही धनुषपर बाण रखकर छोड़िए ॥११४॥ वसुदेवके इस प्रकार कहनेपर जिनकी मध्यस्थता छूट गई थी तथा जो वैशाख आसनसे खड़े थे ऐसे राजा समुद्रविजयने डोरीपर बाण रखकर तथा खींचकर क्रोधवश जोरसे मारा ॥११५॥ उधर वैशाख आसनसे सुशोभित वसुदेवने शीघ्र ही बदलेमें चलाये हुए बाणसे समुद्रविजयके उस बाणको दूरसे ही काट डाला ॥११६॥ इस प्रकार राजा समुद्रविजयने युद्धमें जितने बाण छोड़े उन सबको बदलेमें छोड़े हुए बाणोंके द्वारा वसुदेवने बहुत शीघ्र दूरसे ही निराकृत कर दिया ॥११७॥ तदनन्तर जो अस्त्र

१. युद्धस्थः ।

ज्येष्ठो मुमोच यान् बाणान् योद्धसारथिवाजिनाम् । तान् कनिष्ठोऽच्छिनद्बाणैर्वैनतेय इवोरगान् ॥११९॥
एकैकं स त्रिधा छित्त्वा क्षुरप्रं भ्रातृयोजितम् । युवा विव्याध तस्यास्त्रै रथसारथिवाजिनः ॥१२०॥
दृष्ट्वास्त्रकौशलं तस्य शशंसुरवनीश्वराः । शिरःकम्पाङ्गुलिस्फोटसाधुवादविधायिनः ॥१२१॥
ज्यायानज्ञातसम्बन्धः पुनः सन्धाय सायकम् । दिव्यमस्त्रसहस्राणां सहस्रममुचद् रुषा ॥१२२॥
अस्त्रं ब्रह्मशिरः शीघ्रमस्त्रच्छादनमप्यसौ । युवा क्षिप्त्वाऽच्छिनद्रौद्रं ज्यायसा क्षिप्तसायकम् ॥१२३॥
परं कौशलमस्त्रेषु वसुदेवस्य यद्रणे । चिच्छेदास्त्राणि चित्राणि ररक्ष च निजाग्रजम् ॥१२४॥
इत्थं कृतरणक्रीडः कनीयान् ज्यायसे ततः । प्रजिघाय घनस्नेहः स्वनामाङ्कं शनैः[1] शरम् ॥१२५॥
अनुकूलमिषुं राजा तमादायेत्यवाचयत् । अज्ञातो निर्गतो योऽसौ महाराज ! तवानुजः ॥१२६॥
सोऽयं वर्षशतेऽतीते सम्प्राप्तः स्वजनान्तिकम् । पादप्रणाममद्यार्य वसुदेवः करोति ते ॥१२७॥
भ्रातृस्नेहसमुद्रेकात्समुद्रविजयस्ततः । क्षिप्तचापो रथात्तूर्णमुत्तीर्याप निजानुजम् ॥१२८॥
उत्तीर्णः स्यन्दनादाशु वसुदेवोऽपि दूरतः । प्रणतः पादयोस्तेन दोर्भ्यामालिङ्ग्य चोद्धृतः ॥१२९॥
आश्लिष्य रुदतोर्भ्रात्रोः साश्रुलोचनयोस्तयोः । प्राप्याक्षुभ्यादयः सर्वे कण्ठलग्नास्ततोऽरुदन् ॥१३०॥

विद्यामें निपुण थे और राजा लोग 'साधु-साधु' शब्द कहकर जिनकी स्तुति कर रहे थे ऐसे उन दोनोंने वायव्य तथा वारुण आदि अस्त्रोंसे चिरकाल तक युद्ध किया ॥११८॥ योद्धा, सारथि और घोड़ोंको लक्ष्यकर बड़े भाई जिन बाणोंको छोड़ते थे छोटे भाई उन्हें अपने बाणोंसे उस तरह छेद डालते थे जिस तरह कि गरुड़ सर्पोंको छेद डालता है ॥११९॥ तदनन्तर युवा वसुदेवने भाईके द्वारा चलाये हुए एक-एक बाणके तीन-तीन टुकड़े कर अपने अस्त्रोंसे उनके रथ, सारथि और घोड़ोंको छेद डाला ॥१२०॥ वसुदेवके अस्त्र-कौशलको देखकर राजा लोग उनकी बड़ी प्रशंसा कर रहे थे। उस समय कितने ही राजा अपना शिर हिला रहे थे, कोई अंगुलियाँ चटका रहे थे और कोई मुखसे साधु-साधु शब्दका उच्चारण कर रहे थे ॥१२१॥ बड़े भाईको इस बातका पता नहीं था कि इसके साथ हमारा क्या सम्बन्ध है इसलिए उन्होंने क्रोधमें आकर वसुदेवपर हजारों अस्त्रोंसे युक्त दिव्य रौद्रास्त्र छोड़ा परन्तु कुमार वसुदेवने भी शीघ्र ही अस्त्रोंको आच्छादित करनेवाला ब्रह्मशिर नामक अस्त्र छोड़कर बड़े भाईके द्वारा छोड़े हुए उस रौद्रास्त्रको बीचमें ही काट डाला ॥१२२-१२३॥ वसुदेवका संग्राममें शस्त्र चलानेका कौशल परम प्रशंसनीय था क्योंकि उन्होंने नाना प्रकारके शस्त्रोंको तो काट दिया था परन्तु अपने बड़े भाईको सुरक्षित रक्खा था ॥१२४॥

इस प्रकार रणक्रीड़ा करते-करते जिनका हृदय स्नेहसे भर गया था ऐसे वसुदेवने बड़े भाईके पास अपने नामसे चिह्नित बाण भेजा। उनका वह बाण मन्दगतिसे गमन करता हुआ बड़े भाईके पास पहुँचा ॥१२५॥ राजा समुद्रविजयने उस अनुकूल बाणको लेकर उसमें लिखा हुआ यह समाचार पढ़ा कि 'हे महाराज ! जो अज्ञात रूपसे निकल गया था वही मैं आपका छोटा भाई वसुदेव हूँ। सौ वर्ष बीत जानेके बाद वह आज आत्मीय जनोंके समीप आया है। हे आर्य ! वह आपके चरणोंमें प्रणाम करता है ॥१२६-१२७॥ तदनन्तर भ्रातृ स्नेहकी प्रबलतासे समुद्रविजयने अपने हाथका धनुष दूर फेंक दिया और वे शीघ्र ही रथसे उतरकर छोटे भाईके पास जा पहुँचे ॥१२८॥ इधर वसुदेव भी शीघ्र ही रथसे उतरकर दूरसे ही उनके चरणोंमें गिर गये। समुद्रविजयने दोनों भुजाओंसे उठाकर उनका आलिङ्गन किया ॥१२९॥ दोनों भाई एक दूसरेका आलिङ्गन कर रोने लगे और उनके नेत्रोंसे आँसू टप-टप गिरने लगे। उसी समय अक्षुभ्य

१. निजं म० ।

श्वसुरास्तस्य यावन्तः सपुत्रास्तत्र सङ्गताः । बान्धवाश्चापरे लग्ना रुरुदू रणरङ्गगाः ॥१३१॥
जरासन्धादयस्तुष्टा दृष्ट्वा भ्रातृसमागमम् । शशंसू रोहिणीं कन्यां तद्भ्रातृपितृबान्धवाः ॥१३२॥
यथास्वं शिबिरस्थानं दिनान्ते ते ययुर्नृपाः । वसुदेवकथासक्ता[1] निशा निन्युर्दिनान्यपि ॥१३३॥
ततस्तिथौ प्रशस्तायां रोहिणीचन्द्रसङ्गमे । रोहिणीमुपयेमेऽसौ समुद्रविजयानुजः ॥१३४॥
दृष्ट्वा विवाहमुर्वीशास्तुष्टिपुष्टिसमन्विताः । वर्षं तस्थुर्जरासन्धसमुद्रविजयादयः ॥१३५॥
कृतसाहाय्यकः संख्ये वसुदेवः[2] सुपूजितः । आपृच्छ्य प्रययौ प्रीतो निजं दधिमुखः पदम् ॥१३६॥
वरो नववधूहारिवक्त्राम्भोजमधुव्रतः । न सस्मार स्मरासक्तः पूर्वभुक्तवधूलताः ॥१३७॥

शार्दूलविक्रीडितम्

प्रादुर्भूतसमस्तभूतलमहाभूपाललोकैः समं
सम्भूयाद्भुतविक्रमैकशरणप्राणै रणप्राङ्गणे ।
प्रारब्धोऽप्यतिलुब्धबुद्धिभिरभूज्जय्यो न यद्दोःसखः
शौरिः शौर्यगिरिर्जिनोक्ततपसस्तत्तस्य तत्प्राभवम् ॥१३८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ रोहिणीस्वयंवर-भ्रातृसमागमवर्णनो नाम एकत्रिंशः सर्गः ॥३१॥

आदि शेष भाई भी आ गये और सब गले लगकर रोने लगे ॥१३०॥ उस समय युद्धभूमिमें वसुदेवके जितने श्वसुर, साले तथा अन्य बन्धुजन थे वे सब उनसे लिपटकर रोने लगे ॥१३१॥ जरासन्ध आदि राजा, भाइयोंके इस समागमको देखकर बहुत ही सन्तुष्ट हुए। रोहिणीके भाई, पिता तथा अन्य सम्बन्धी जन उसकी बहुत प्रशंसा करने लगे ॥१३२॥

तदनन्तर सायंकालके समय सब राजा लोग अपने-अपने शिविरोंमें गये और वसुदेवकी ही कथामें आसक्त हो दिन तथा रात्रियाँ व्यतीत करने लगे ॥१३३॥ तत्पश्चात् शुभ तिथिमें जब कि चन्द्रमा रोहिणी नक्षत्रपर था वसुदेवने रोहिणीको विधिपूर्वक विवाहा ॥१३४॥ जरासन्ध तथा समुद्रविजय आदि राजा उस विवाहोत्सवको देखकर बहुत ही प्रसन्न हुए और एक वर्ष तक वहीं राजा रुधिरके यहाँ रहे आये ॥१३५॥ युद्धमें जिसने सहायता की थी तथा वसुदेवने जिसका अच्छा सम्मान किया था ऐसा दधिमुख वसुदेवसे आज्ञा लेकर प्रसन्न होता हुआ अपने स्थानपर चला गया ॥१३६॥ कामासक्त वसुदेव नवीन स्त्रीके सुन्दर मुख कमलके भौंरे बन गये थे इसलिए उन्होंने पहले भोगी हुई स्त्रीरूपी लताओंका स्मरण भी नहीं किया ॥१३७॥ गौतम स्वामी कहते हैं कि देखो शूरवीरताके पर्वत वसुदेव यद्यपि रणांगणमें अकेले ही थे केवल भुजाएँ ही उनकी सहायक थीं और अद्भुत पराक्रमके धारक, अतिशय लोभी पृथिवीतलके समस्त राजाओंने एक साथ मिलकर उन्हें पराजित करना चाहा था तथापि वे उन्हें पराजित नहीं कर सके सो यह अच्छी तरह तपे हुए जिनेन्द्र कथित तपका ही प्रभाव समझना चाहिए ॥१३८॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें रोहिणीका स्वयंवर और भाइयोंके समागमका वर्णन करनेवाला इकतीसवाँ सर्ग समाप्त हुआ ॥३१॥

---

१. शक्तो म० । २. वसुदेवः स पूजितः । म० वसुदेवेन सुपूजितः शिष्टाचारीकृत इत्यर्थः ।

द्वात्रिंशः सर्गः

अथ सा रोहिणी भर्त्रा विचित्रे शयनेऽन्यदा । प्रसुप्ता चतुरः स्वप्नान् ददर्श शुभसूचिनः ॥१॥
रुन्द्रं[1] चन्द्र[2]समच्छायं गजेन्द्रं मन्द्रगर्जितम् । समुद्रं सान्द्रनिर्घोषं [3]महीध्रोच्चैर्महोर्मिकम् ॥२॥
चन्द्रं चन्द्रमुखी पूर्णं दृष्ट्वा पूर्णमनोरथा । कुन्दशुभ्रं मृगेन्द्रं सा ददर्शास्यप्रवेशिनम् ॥३॥
विबुद्धा च प्रभाते तान् विबुद्धाम्बुजलोचना[4] । पत्ये न्यवेदयत्सोऽस्या इति स्वप्नफलं जगौ ॥४॥
उत्पत्स्यते सुतः क्षिप्रं धीरोऽलङ्घ्यः शशिप्रभः । एकवीरो भुवो भर्त्ता प्रिये ! ते जनताप्रियः ॥५॥
इति पत्या समादिष्टं श्रुत्वा स्वप्नफलं शुभम् । हारिणी रोहिणी हृष्टा शिश्रिये श्रियमैन्दवीम् ॥६॥
च्युत्वा कल्पान्महाशुक्रान्महासामानिकः सुरः । गर्भेऽभूदिह रोहिण्या धरण्या इव सन्मणिः ॥७॥
ततः पूर्णेषु मासेषु सुखं सम्पूर्णदोहला । साऽसूत सुतमृक्षेषु शुभेषु शशिसन्निभम् ॥८॥
तस्य जन्मोत्सवं दृष्ट्वा जरासन्धपुरःसराः । यथास्थानं ययुः प्रीताः पार्थिवाः कृतपूजनाः ॥९॥
अभिरामः स रामाख्यां प्रख्याप्य पृथिवीतले । वर्द्धते वर्द्धयन् प्रीतिं पित्रोर्बन्धुजनस्य च ॥१०॥
श्रीमण्डपस्थितान् सर्वानेकदा रौधिरास्पदे । समुद्रविजयाद्यांस्तान् वसुदेवहितोद्यतान् ॥११॥
खावतीर्णाभिनन्द्यैका दिव्या विद्याधरी श्रिता । वसुदेवमितः प्राह सुखासनकृतासना ॥१२॥

अथानन्तर किसी समय वह रोहिणी अपने भर्ता—वसुदेवके साथ विचित्र शय्यापर शयन कर रही थी कि उसने शुभको सूचित करनेवाले चार स्वप्न देखे ॥१॥ पहले स्वप्नमें उसने गम्भीर गर्जन करता हुआ चन्द्रमाके समान सफेद विशाल हाथी देखा । दूसरे स्वप्नमें पर्वतके समान ऊँची एवं बड़ी-बड़ी लहरोंसे युक्त अत्यधिक शब्द करनेवाला समुद्र देखा । तीसरे स्वप्नमें पूर्ण चन्द्रमाको देखकर चन्द्रमुखी रोहिणीका मनोरथ पूर्ण हो गया और चौथे स्वप्नमें उसने मुखमें प्रवेश करता हुआ कुन्दके समान सफेद सिंह देखा ॥२-३॥ प्रातःकालके समय जागनेपर जिसके नेत्र खिले हुए कमलके समान सुशोभित थे ऐसी रोहिणीने वे स्वप्न पतिके लिए बतलाये और पतिने उनका यह फल बताया कि हे प्रिये ! तुम्हारे शीघ्र ही ऐसा पुत्र होगा, जो धीर, वीर, अलङ्घ्य, चन्द्रमाके समान कान्तिवाला, अद्वितीय वीर, पृथिवीका स्वामी और जनताका प्यारा होगा ॥४-५॥ इस प्रकार पतिके द्वारा बताये हुए स्वप्नोंका शुभ फल सुनकर सुन्दरी रोहिणी हर्षित हो उठी तथा चन्द्रमाकी शोभा धारण करने लगी ॥६॥ उसी समय महासामानिक देव महाशुक्र स्वर्गसे च्युत होकर रोहिणीके गर्भमें उस तरह स्थित हो गया जिस तरह कि पृथिवीके गर्भमें उत्तम मणि स्थित होता है ॥७॥

तदनन्तर जिसके समस्त दोहला पूर्ण किये गये थे ऐसी रोहिणीने सुखसे नौ माह पूर्ण होनेपर शुभ नक्षत्रोंमें चन्द्रमाके समान सुन्दर पुत्र उत्पन्न किया ॥८॥ जो जरासन्ध आदि राजा एक वर्षसे राजा रुधिरके यहाँ रह रहे थे वे उस पुत्रका जन्मोत्सव देखकर प्रसन्न होते हुए अपने-अपने स्थानपर गये । जाते समय राजा रुधिरने उन सबका खूब सत्कार किया ॥९॥ वह बालक अत्यन्त सुन्दर था इसलिए पृथिवी तलपर अपना 'राम' नाम प्रसिद्ध कर माता-पिता और बन्धुजनोंकी प्रीतिको बढ़ाता हुआ दिन-प्रतिदिन बढ़ने लगा ॥१०॥

तदनन्तर एक समय कुमार वसुदेवके हितमें उद्यत समुद्रविजय आदि सभी भाई राजा रुधिरके घर श्रीमण्डपमें बैठे थे कि एक दिव्य विद्याधरी आकाशसे उतरकर वहाँ आई और

---

१. रुद्रं ग०, म० । २. चन्द्रं म० । ३. महीन्ध्रोच्चै—म० । ४. विकसितकमलनयना ।

देव ! वेगवती पत्नी बालचन्द्रा च मे सुता । पादयोस्तव सम्पत्य वाञ्छति प्रियदर्शनम् ॥१३॥
कुमारी त्वद्गतप्राणा बालचन्द्राऽवतिष्ठते । गत्वा तां त्वं विवाह्याऽऽशु कुरु तच्चित्तनिर्वृतिम् ॥१४॥
तदाऽऽकर्ण्य वचस्तेन दृष्टिर्ज्येष्ठे समर्पिता । अभिप्रायविदा तेन लघ्वेहीति[1] विसर्जितः ॥१५॥
तमादाय गता साऽपि पुरं गगनवल्लभम् । समुद्रविजयाद्याश्च ययुः शौर्यपुरं नृपाः ॥१६॥
भार्यां वेगवतीं दृष्ट्वा शौरिर्गगनवल्लभे । बालचन्द्रामुवाहाऽत्र पूर्णचन्द्रसमाननाम् ॥१७॥
नववध्वा तया[2] सार्धं वेगवत्या च हृद्यया । रममाणोऽवसत्तत्र दिनानि कतिचित्सुखी ॥१८॥
ताभ्यां जिगमिषोस्तस्य शीघ्रं शौर्यपुरं पुरम् । चक्रे[3] वनवती देवी विमानं रत्नभास्वरम् ॥१९॥
पिता काञ्चनदंष्ट्रोऽथ परिवारं ददौ परम् । समस्तं बालचन्द्राया वेगवत्याश्च सोऽग्रजः ॥२०॥
कामगेन विमानेन सोऽनेन वनितासखः । अरिञ्जयपुरं गत्वा विद्युद्वेगं निरैक्षत[4] ॥२१॥
प्रियां मदनवेगां तामनावृष्णिं च देहजम् । आदायाऽऽशु विमानेन तेनैव वियदुद्ययौ ॥२२॥
पुरं गन्धसमृद्धं द्राक् श्रीसमृद्धमवाप्य सः । सुतां गान्धारराजस्य पश्यति स्म प्रभावतीम् ॥२३॥
समारोप्य विमाने तां परिवारसमन्विताम् । प्राप्तः प्राप्तमहाहर्षः सहसाऽसितपर्वतम् ॥२४॥
सिंहदंष्ट्रात्मजां दृष्ट्वा स नीलयशसं प्रियाम् । तत्रारमत्तया चित्रं[5] प्रवियुक्तसमेतया ॥२५॥
तामप्यादाय सम्प्राप्तः किन्नरोद्गीतमत्र च । नीलोत्पलदलश्यामां कामं श्यामाममानयत् ॥२६॥

सबको अभिनन्दनकर सुखदायक आसनपर बैठ गई। कुछ समय बाद उसने वसुदेवको लक्ष्यकर कहा कि हे देव ! आपकी पत्नी वेगवती तथा हमारी पुत्री बालचन्द्रा आपके चरणोंमें गिरकर आपका प्रिय दर्शन करना चाहती हैं ॥११-१३॥ कुमारी बालचन्द्राके प्राण एक आपमें ही अटक रहे हैं इसलिए शीघ्र जाकर उसे विवाहो और उसका चित्त सन्तुष्ट करो ॥१४॥ विद्याधरीके वचन सुनकर कुमार वसुदेवने अपनी दृष्टि बड़े भाई समुद्रविजयपर डाली और अभिप्रायको जाननेवाले बड़े भाईने भी 'जल्दी जाओ' यह कहकर उन्हें छोड़ दिया—विद्याधरीके साथ जानेकी अनुमति दे दी ॥१५॥ तदनन्तर विद्याधरी वसुदेवको लेकर गगनवल्लभपुर गई और समुद्रविजय आदि राजा शौर्यपुर चले गये ॥१६॥ वसुदेवने गगनवल्लभ नगरमें अपनी प्रिया वेगवतीसे मिलकर पूर्णचन्द्रके समान मुखवाली बालचन्द्राको विवाहा ॥१७॥ और विवाहके बाद वे नयी वधू बालचन्द्रा तथा हृदयको अत्यन्त प्रिय लगनेवाली वेगवतीके साथ क्रीड़ा करते हुए कुछ दिन तक वहीं सुखसे रहे आये ॥१८॥

कुछ दिन बाद कुमार वसुदेवने उन दोनों स्त्रियोंके साथ शीघ्र ही शौर्यपुर लौटनेकी इच्छा प्रकट की जिससे एणीपुत्रकी पूर्व भवकी माँ वनवती देवीने रत्नोंसे देदीप्यमान एक विमान रचकर उन्हें दे दिया ॥१९॥ यह देख बालचन्द्राके पिता काञ्चनदंष्ट्र तथा वेगवतीके बड़े भाई मानसवेगने समस्त परिवारके साथ बालचन्द्रा और वेगवतीको कुमारके लिए सौंप दिया ॥२०॥ कुमार, दोनों स्त्रियोंको साथ ले इच्छानुसार चलनेवाले विमानके द्वारा अरिञ्जयपुर नगर गये और वहाँ जाकर विद्युद्वेगसे मिले ॥२१॥ वहाँसे प्रिया मदनवेगा और अनावृष्णि नामक उसके पुत्रको लेकर वे शीघ्र ही उसी विमानसे आकाशमें उड़ गये ॥२२॥ तदनन्तर शीघ्र ही लक्ष्मीसे समृद्ध गन्धसमृद्ध नामक नगरमें जाकर वे गान्धार राजाकी पुत्री प्रभावतीसे मिले ॥२३॥ तत्पश्चात् परिवार सहित उसे विमानमें बैठाकर महान् हर्षको प्राप्त होते हुए वे असितपर्वत नामक नगरमें पहुँचे ॥२४॥ वहाँ राजा सिंहदंष्ट्रकी पुत्री प्रिया नीलंयशासे मिले और वियोगके बाद मिली हुई उस नीलंयशाके साथ नाना प्रकारकी क्रीड़ा करने लगे ॥२५॥ तत्पश्चात् उसे साथ ले किन्नरोद्गीत नामक नगर पहुँचे और वहाँ नील कमलकी कलिकाओंके समान श्यामवर्ण श्यामा नामक

१. शीघ्रमागच्छेत्युक्त्वा विसर्जितः । २. सार्द्रं म० । ३. या नागदेवता पूर्वं प्रोक्ता सैव वनवतीत्यपरनामधेया । ४. निरीक्ष्यत म०, क० । ५. चित्तं प्रवियुक्तं समेतया म० ।

श्यामामादाय सम्प्राप्तः श्रावस्तीमनयत्ततः । प्रियङ्गुसुन्दरीं शौरिस्तां च बन्धुमतीं प्रियाम् ॥२७॥
महापुरात्समादाय सोमश्रियमसौ प्रियाम् । इलावर्धनतो निन्ये मान्यां रत्नावतीं च ताम् ॥२८॥
नगरे भद्रिलाभिख्ये गृहीत्वा चारुहासिनीम् । पौण्ड्रं संस्थाप्य तत्रैव गत्वा जयपुरं ततः ॥२९॥
अश्वसेनामुपादाय गत्वा शालगुहं पुरम् । पद्मावतीं समादाय वेदसामपुरं ययौ ॥३०॥
कपिलं तत्र पुत्रं स्वमभिषिच्य ततोऽपि च । गृहीत्वा कपिलां प्रापदचलग्राममत्र च ॥३१॥
मित्रश्रियं प्रगृह्यागान्नगरं तिलवस्तुकम् । कन्यापञ्चशतं ग्राही पुरं गिरितटं गतः ॥३२॥
ततः सोमश्रिया युक्तश्चम्पां प्राप महापुरीम् । अतोऽमात्यसुतां निन्ये सह गन्धर्वसेनया ॥३३॥
पुरे विजयखेटे च सूनुमक्रूरदृष्टिकम् । दृष्ट्वा विजयसेनां स निन्ये कुलपुरं ततः ॥३४॥
पद्मश्रियमुपादाय तथैवावन्तिसुन्दरीम् । सूरसेनां सपुत्रां च जरां जीवद्यशोऽन्विताम् ॥३५॥
गृहीत्वाऽन्याः स्वभार्याः स वसुदेवः ससम्मदः । आययौ प्रमदं प्राप्तो विमानेनाशुगामिना ॥३६॥
आससाद विमानं तच्चारुसङ्गीतसङ्गतम् । आशु शौर्यपुरं सूर्यविमानमिव भास्वरम् ॥३७॥
ततो [1]वनवती देवी समुद्रविजयं स्वयम् । प्राग् दृष्ट्वाऽवर्धयत्तुष्ट्या वसुदेवागमाख्यया ॥३८॥
कारयित्वा ततः पौरैः पुरशोभां नृपो मुदा । निर्ययौ बन्धुभिः सार्द्धं तस्याभिमुखमादृतैः ॥३९॥
सोऽवतीर्य विमानाग्रादग्रजान् गुरुबान्धवान् । प्रणनाम प्रियायुक्तः प्रणतः प्रणयात् परैः ॥४०॥
देव्यः शिवादयो नत्वं सयोषं साश्रुलोचनाः । तमाश्लिष्याशिषो भूयः खेऽविश्लेषफला ददुः ॥४१॥
सन्मानितयथायोगजनताजनितादरः । स रेमे रोहिणीशोऽस्मिन् बन्धुसिन्धुहितोदयः ॥४२॥

स्त्रीको उन्होंने अच्छी तरह मनाया—प्रसन्न किया ॥२६॥ तदनन्तर श्यामाको लेकर श्रावस्ती पहुँचे। वहाँसे प्रियङ्गुसुन्दरी और बन्धुमतीको साथ ले महापुर गये। महापुरसे प्रिया सोमश्रीको लेकर इलावर्धनपुर पहुँचे। वहाँसे माननीय रत्नावतीको लेकर भद्रिलपुर गये। वहाँसे चारुहासिनीको साथ लेकर तथा उसके पुत्र पौण्ड्रको वहीं बसाकर जयपुर गये। वहाँसे अश्वसेनाको साथ ले शालगुह नगर पहुँचे। वहाँसे पद्मावतीको लेकर वेदसामपुर गये ॥२७–३०॥ वहाँ अपने कपिल नामक पुत्रका राज्याभिषेक कर कपिलाको साथ ले अचलग्राम आये ॥३१॥ वहाँसे मित्रश्रीको लेकर तिलवस्तु नगर गये वहाँ पाँच सौ कन्याओंको ग्रहणकर गिरितट नगर पहुँचे ॥३२॥ वहाँसे सोमश्रीको साथ ले चम्पापुरी पहुँचे। वहाँसे मन्त्रीकी पुत्री और गन्धर्वसेनाको साथ ले विजयखेट नगर गये। वहाँ अक्रूरदृष्टि नामक पुत्रसे मिलकर तथा विजयसेनाको साथ लेकर कुलपुर पहुँचे ॥३३–३४॥ वहाँसे पद्मश्री, अवन्तिसुन्दरी, पुत्र सहित सूरसेना, जरा, जीवद्यशा तथा अपनी अन्य स्त्रियोंको साथ ले हर्षित होते हुए शीघ्रगामी विमानसे वापिस आये ॥३५–३६॥ जो सुन्दर संगीतसे युक्त, तथा सूर्यके विमानके समान देदीप्यमान था ऐसा उनका वह विमान शीघ्र ही शौर्यपुर आ पहुँचा ॥३७॥

तदनन्तर वनवती देवीने स्वयं ही पहलेसे आकर वसुदेवके आगमनसे उत्पन्न हर्षसे राजा समुद्रविजयको वृद्धिंगत किया—वसुदेवके आगमनका समाचार सुनाकर प्रसन्न किया ॥३८॥ तत्पश्चात् राजा समुद्रविजय, प्रजाजनोंसे नगरकी शोभा कराकर बड़े हर्षसे आदरसे युक्त बन्धुजनोंके साथ कुमार वसुदेवको लेनेके लिए उनके सम्मुख गये ॥३९॥ वसुदेवने अपनी समस्त स्त्रियों सहित विमानसे उतरकर बड़े भाइयों तथा अन्य गुरुजनोंको प्रणाम किया तथा अन्य लोगोंने प्रेमपूर्वक वसुदेवको प्रणाम किया ॥४०॥ जिनके नेत्रोंमें हर्षके अश्रु भर रहे थे ऐसी शिवा आदि महारानियोंने स्त्रियों सहित नमस्कार करते हुए वसुदेवका आलिङ्गन कर आकाशकी ओर मुँह कर बार-बार यही आशीर्वाद दिया कि अब पुनः वियोग न हो ॥४१॥ कुमारने आगत जनताका यथायोग्य सन्मान किया और जनताने भी उनके प्रति आदरका भाव प्रकट किया।

---

१. धनवती म० ।

समुद्रविजयं दृष्ट्वा वसुदेवं च देवता[1] । ययौ[2] वनवतीप्रीता निजं स्थानं हितोद्यता ॥४३॥

शार्दूलविक्रीडितवृत्तम्

लोकः शौर्यपुरोद्भवोऽपि च तदा शौर्यार्जितं निर्जित-
क्ष्माभृच्चक्रमुदारचारुचरितं विद्याधरीवल्लभम् ।
देवाभं वसुदेवमाप्तविभवं दृष्ट्वातितुष्टोऽगदीद्
धर्मस्यैष जिनोदितस्य महिमा पूर्वार्जितस्येत्यसौ ॥४४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ सकलबन्धुवधू-समागमवर्णनो नाम द्वात्रिंशः सर्गः ॥३२॥

समाप्तं चेदं विद्याधरकाण्डम्

तदनन्तर जिनका उदय, बन्धरूपी सागरके लिए हितकारी था ऐसे रोहिणीश—कुमार वसुदेव (पक्षमें चन्द्रमा) शौर्यपुरमें रहते हुए क्रीड़ा करने लगे ॥४२॥ सदा हित करनेमें उद्यत रहनेवाली वनवती देवी समुद्रविजय और वसुदेवको देखकर बहुत प्रसन्न हुई और अन्तमें उनसे पूछकर अपने स्थानको चली गयी ॥४३॥ जो शूर वीरतासे बलिष्ट थे, जिन्होंने राजाओंके समूहको जीत लिया था, जो उदार एवं सुन्दर चरित्रसे युक्त थे, विद्याधरियोंके स्वामी थे, देवतुल्य थे, और महान् वैभवको प्राप्त थे ऐसे वसुदेवको देखकर उस समय शौर्यपुरके लोग अत्यन्त सन्तुष्ट हो यही कहते थे कि यह पूर्वोपार्जित जैनधर्मकी ही महिमा है ॥४४॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें समस्त भाइयों और स्त्रियोंके समागमको वर्णन करनेवाला बत्तीसवाँ सर्ग समाप्त हुआ ॥३२॥

विद्याधर काण्ड समाप्त

---

१. वसुदेवःपक्षे चन्द्रः । २. वेगवती ग०, क०, ङ० ।

त्रयस्त्रिंशः सर्गः

अथ स प्रार्थितः प्राज्यैः पार्थिवः[1] पार्थिवात्मजैः । [2]शस्त्रोपदेशमातन्वन्नास्ते सूर्यपुरे यदुः ॥१॥
*जातु कंसादिभिः शिष्यैर्धनुर्वेदविचक्षणैः । गतो राजगृहं शौरिर्जरासन्धदिदृक्षया ॥२॥
अश्रौषीद् घोषणां राज्ञः पुरे[3] राजकराजिते । सावधानस्य लोकस्य [4]समाकर्णयतस्तदा ॥३॥
यः सिंहरथमुद्वृत्तं तं सिंहपुरवासिनम् । सत्यसिंहरथारूढमारूढपुरुपौरुषम् ॥४॥
जीवग्राहं गृहीत्वाऽसौ दर्शयिष्यति मेऽग्रतः । स एव पुरुषो लोके शूरः शूरतरोऽपि च ॥५॥
तस्य मानधनस्यान्ते पीतशत्रुयशोऽम्बुधेः । आनुषङ्गिकमप्येतत्फलमन्यसुदुर्लभम् ॥६॥
जीवद्यशसमा[5]शान्तविश्रान्तयशसं गुणैः । सुतामीप्सितदेशेन सह दास्यामि सुन्दरीम् ॥७॥
श्रुत्वा तां घोषणां श्रव्यां वीरैकरसभावितः । कंसेनाग्राहयद्धीरः पताकां यदुनन्दनः ॥८॥
गत्वाऽसौ स समारुह्य विद्यासिंहमयं रथम् । सिंहशृङ्खलमच्छैत्सीत् शरैस्ते हरयोऽप्यगुः ॥९॥
शत्रुमुत्प्लुत्य कंसस्तं बबन्ध गुरुशासनात् । दृष्ट्वा कंसस्य कौशल्यं वसुदेवो जगौ तकम् ॥१०॥

अथानन्तर राजा वसुदेव, श्रेष्ठ राजपुत्रों द्वारा प्रार्थित होनेपर उन्हें शस्त्र विद्याका उपदेश देते हुए सूर्यपुरमें रहने लगे ॥१॥ किसी दिन कुमार वसुदेव, धनुर्विद्यामें प्रवीण अपने कंस आदि शिष्योंके साथ, राजा जरासंधको देखनेकी इच्छासे राजगृह नगर गये ॥२॥ उस समय वह राजगृह नगर बाहरसे आये हुए अनेक राजाओंके समूहसे शोभित था। उसी समय वहाँ सावधान होकर श्रवण करनेवाले लोगोंके लिए राजा जरासंधकी ओरसे निम्नाङ्कित घोषणा दी गई थी जिसे वसुदेवने भी सुना ॥३॥ घोषणामें कहा गया था कि "सिंहपुरका स्वामी राजा सिंहरथ बड़ा उद्दण्ड है, वह वास्तविक सिंहोंके रथपर सवारी करता है और उत्कट पराक्रमका धारक है। जो मनुष्य उसे जीवित पकड़कर हमारे सामने दिखावेगा वही पुरुष संसारमें शूर और अतिशय शूरवीर समझा जावेगा ॥४-५॥ शत्रुके यशरूपी सागरको पीनेवाले उस पुरुषको सन्मानरूपी धन तो समर्पित किया ही जावेगा उसके बाद यह अन्य जन दुर्लभ आनुषङ्गिक फल भी प्राप्त होगा ॥६॥ गुणोंके कारण जिसका यश दिशाओंके अन्तमें विश्राम कर रहा है तथा जो अद्वितीय सुन्दरी है ऐसी अपनी जीवद्यशा नामकी पुत्री भी मैं उसे इच्छित देशके साथ दूँगा" ॥७॥

उस हृदयहारी घोषणाको सुनकर वीररसमें पगे हुए धीर-वीर वसुदेवने कंससे पताका ग्रहण करवाई। भावार्थ—वसुदेवने प्रेरित कर कंससे, सिंहरथको पकड़नेकी प्रतिज्ञा स्वरूप पताका उठवाई ॥८॥ तदनन्तर वसुदेव, कंसको साथ ले विद्यानिर्मित सिंहोंके रथपर सवार हो सिंहपुर गये। जब सिंहरथ, सिंहोंके रथपर बैठकर युद्धके लिए वसुदेवके सामने आया तब उन्होंने बाणोंके द्वारा उसके सिंहोंकी रास काट डाली जिससे उसके सिंह भाग गये ॥९॥ उसी समय कंसने गुरुकी आज्ञासे उछलकर शत्रुको बाँध लिया। कंसकी चतुराई देख वसुदेवने उससे कहा

---

१. पार्थिवैः म०। २. शास्त्रोपदेश-म०। ३. राजकेन-राजसमूहेन राजिते-शोभिते। ४. समाकर्ण्य यतस्तदा म०। ५. -माक्रान्त-म।

* म पुस्तके प्रथमश्लोकादनन्तरं निम्नाङ्कितः श्लोको दृश्यते—

दृष्ट्वा कंसस्य कौशल्यं वसुदेवो जगौ तकम्।
वरं वृणीष्व तेनोक्तं तिष्ठत्वार्य तवान्तिकम् ॥२॥

वरं वृणीष्व तेनोक्तं तिष्ठाचार्यं तवौकसि[1] । दर्शितो वसुदेवेन जरासन्धाय सोऽप्यरिः ॥११॥
दृष्ट्वा च तेन तुष्टेन सुतोपनयनं प्रति । वसुदेवः समादिष्टः कंसेनारेर्ग्रहं जगौ ॥१२॥
पृष्टः कंसो नृपेणाख्यत् स्वजातिमिति भूपते । मम मञ्जोदरी[2] माता कौशाम्ब्यां सीधुकारिणी ॥१३॥
कंसवाक्यमिति श्रुत्वा ततो राजेत्यचिन्तयत् । आकृतिः कथयत्यस्य नायं सीधुकरीसुतः ॥१४॥
आनीनयन्नृपं मंक्षु कौशाम्ब्यास्तां निजैस्ततः । प्राप्ता [3]मञ्जोदरी त्वात्तमंजूषानाममुद्रिका ॥१५॥
पृष्टा पूर्वापरं राज्ञा व्यजिज्ञपदिति प्रभो । यमुनायाः प्रवाहेऽयं लब्धो मंजूषया सह ॥१६॥
संवर्द्धितः शिशू राजन् मया कारुण्ययुक्तया । उपालम्भसहस्राणां भूयो भाजनभूतया[4] ॥१७॥
स्वभावाच्चण्डतुण्डोऽयमर्भकान् दुर्भगोऽर्भकः । रमयन्न शिरस्ताडाद्विना क्रीडति पुण्यवान् ॥१८॥
गृहं सीधु[5]गृहीत्यर्थं वेश्यानां बालिकाः श्रिताः । पाणिनाऽऽकृष्य वेणीस्ताः सुखलीकृत्य मुञ्चति ॥१९॥
लोकोपालम्भतो भीत्या मयकाऽयं निराकृतः । कृतवान् शस्त्रशिक्षार्थी शिष्यतां किल कस्यचित् ॥२०॥
कंसमंजूषिका ह्येषा माता तिष्ठति नाहकम् । तद्गुणैरस्य दोषैर्वा न स्पृश्ये स्पृश्यतामियम् ॥२१॥
इत्युक्ते दर्शितायां च तया तस्यां व्यलोकत । तन्नाममुद्रिकां राजा ततो वाचयति स्म सः ॥२२॥
गर्भस्थोऽपि सुतोऽत्युग्रः पद्मावत्युग्रसेनयोः । जीवताद्वरमात्मीयैः कर्मभिः कृतरक्षणः ॥२३॥
वाचयित्वेति विज्ञाय राजा स्वस्रीयमात्मनः । हृष्टः कन्यां ददौ तस्मै सम्पन्नगुणसम्पदाम् ॥२४॥

कि वर माँग। कंसने उत्तर दिया कि हे आर्य! अभी वर आपके ही घर रहने दीजिए। वसुदेवने शत्रुको ले जाकर जरासंधको दिखा दिया ॥१०-११॥ शत्रुको सामने देख जरासंध संतुष्ट हुआ और वसुदेवसे बोला कि तुम पुत्री जीवद्यशाके साथ विवाह करो। इसके उत्तरमें वसुदेवने कह दिया कि शत्रुको कंसने पकड़ा है मैंने नहीं ॥१२॥ राजा जरासंधने जब कंससे उसकी जाति पूछी तब उसने कहा कि हे राजन्! मेरी माता मञ्जोदरी कौशाम्बीमें रहती है और मदिरा बनानेका काम करती है ॥१३॥ तदनन्तर कंसके वचन सुनकर राजा इस प्रकार विचार करने लगा कि इसकी आकृति कहती है कि यह मदिरा बनानेवालीका पुत्र नहीं है ॥१४॥ तत्पश्चात् राजा जरासंधने अपने आदमी भेजकर शीघ्र ही कौशाम्बीसे मञ्जोदरीको बुलाया और मञ्जोदरी मंजूषा तथा नामकी मुद्रिका लेकर वहाँ आ पहुँची ॥१५॥ राजाने उससे पूर्वापर कारण पूछा तो वह कहने लगी कि हे प्रभो! मैंने यमुनाके प्रवाहमें इसे इस मञ्जूषाके साथ पाया था ॥१६॥ हे राजन्, इस शिशुको देखकर मुझे दया आ गई अतः पीछे चलकर हजारों उपालम्भोंका पात्र बनकर भी मैंने इसका पालन-पोषण किया ॥१७॥ यह बालक स्वभावसे ही उग्रमुख है—कठोर शब्द बकनेवाला है। यद्यपि यह पुण्यवान् है तो भी अभागा जान पड़ता है। यह बच्चोंके साथ खेलता था तो उनके शिरमें थप्पड़ लगाये बिना नहीं खेलता था। मदिरा खरीदनेके लिए घरपर वेश्याओंकी लड़कियाँ आती थीं तो हाथसे उनकी चोटियाँ खींचकर तथा उन्हें तंग करके ही छोड़ता था ॥१८-१९॥ इसकी इस दुष्प्रवृत्तिसे मेरे पास लोगोंके उलाहने आने लगे जिनसे डरकर मैंने इसे निकाल दिया। यह शस्त्र विद्या सीखना चाहता था इसलिए किसीका शिष्य बन गया ॥२०॥ यह कांसकी मञ्जूषा ही इसकी माता है मैं नहीं हूँ अतः इसके गुण अथवा दोषोंसे मेरा कोई सम्बन्ध नहीं है। लीजिए यह मञ्जूषा है—यह कहकर उसने साथ लाई हुई मञ्जूषा राजाको दिखा दी। जब मंजूषा खोली गई तो उसमें उसके नामकी मुद्रिका दिखी। राजा जरासंध उसे लेकर बाँचने लगा ॥२१-२२॥ उसमें लिखा था कि यह राजा उग्रसेन और रानी पद्मावतीका पुत्र है। जब यह गर्भमें स्थित था तभीसे अत्यन्त उग्र था। इसकी उग्रतासे भयभीत होकर ही इसे छोड़ा गया है, यह जीवित रहे तथा इसके अपने कर्म ही इसकी रक्षा करें ॥२३॥ मुद्रिकाको बाँचकर राजा जरासंध समझ गया कि यह हमारा भानजा है अतः उसने हर्षित होकर उसे

---

१. तवान्तिके म०, ख० । २-३. रंजोदरी म० । ४. भीतया म० । ५. सीधुनो मद्यस्य ग्रहीतिस्तदर्थम् ।

सद्योजातं पिता नद्यां मुक्तवानिति स क्रुधा। वरीत्वा मथुरां लब्ध्वा सर्वसाधनसङ्गतः ॥२५॥
कंसः कालिन्दसेनाया सुतया सह निर्घृणः। गत्वा युद्धे विनिर्जित्य बबन्ध पितरं द्रुतम् ॥२६॥
महोग्रो भग्नसञ्चारमुग्रसेनं निगृह्य सः। अतिष्ठिपत् कनिष्ठाशः स्वपुरद्वारगोचरे ॥२७॥
वसुदेवोपकारेण हृतः प्रत्युपकारधीः। न वेत्ति किं करोमीति किङ्करत्वमुपागतः ॥२८॥
अभ्यर्थ्य गुरुमानीय मथुरां पृथुभक्तितः। स्वसारं प्रददौ तस्मै देवकीं गुरुदक्षिणाम् ॥२९॥
आस्ते कंसोपरोधेन मथुरायां ततो यदुः। प्रदीव्य दिव्यदीप्त्याऽसौ देवक्या हारिवाक्यया ॥३०॥
सूरसेनमहाराष्ट्रराजधानीं द्विषन्तपः। शशास मथुरां कंसो जरासन्धातिवल्लभः ॥३१॥
जातुचिन्मुनिवेलायामतिमुक्तकमागतम्। कंसज्येष्ठं मुनिं नत्वा पुरः स्थित्वा सविभ्रमम् ॥३२॥
हसन्ती नर्मभावेन जगौ जीवद्यशा इति। आनन्दवस्त्रमेतत्ते देवक्याः स्वसुरीक्ष्यताम्[1] ॥३३॥
तस्या निर्बन्धचित्ताया प्रमत्ताया निवृत्तये। वचोगुप्तिमसौ भित्त्वा संसारस्थितिविज्जगौ ॥३४॥
अहो क्रीडनशीलायास्तवेयमतिमूढता। शोकस्थाने प्रपन्नासि यदानन्दमनन्दिनि ॥३५॥
भविता यो हि देवक्या गर्भेऽवश्यमसौ शिशुः। पत्युः पितुश्च ते मृत्युरितीयं भवितव्यता ॥३६॥
ततो भीतमतिर्मुक्त्वा मुनिं साश्रुनिरीक्षणा। गत्वा न्यवेदयत्पत्ये सत्यं हि यतिभाषितम् ॥३७॥

गुणरूपी सम्पदासे सम्पन्न अपनी जीवद्यशा पुत्री दे दी ॥२४॥ पिताने मुझे उत्पन्न होते ही नदीमें छोड़ दिया था। यह जानकर कंसको बड़ा क्रोध आया इसलिए उसने जरासंधसे मथुराका राज्य माँगा और जरासंधने दे भी दिया। उसे पाकर सब प्रकारकी सेनासे युक्त कंस जीवद्यशा-के साथ मथुरा गया। वह निर्दय तो था ही इसलिए वहाँ जाकर उसने पिता उग्रसेनके साथ युद्ध ठान दिया तथा युद्धमें उन्हें जीतकर शीघ्र ही बाँध लिया ॥२५-२६॥ तत्पश्चात् जो प्रकृतिका अत्यन्त उग्र था और जिसकी आशाएँ अत्यन्त क्षुद्र थीं ऐसे उस कंसने अपने पिता राजा उग्रसेनका इधर-उधर जाना बन्द कर उन्हें नगरके मुख्य द्वारके ऊपर कैद कर दिया ॥२७॥

वसुदेवके उपकारका आभारी होनेसे कंस उनका प्रत्युपकार तो करना चाहता था पर यह नहीं निर्णय कर पाता था कि मैं इनका क्या प्रत्युपकार करूँ। वह सदा अपने-आपको वसुदेवका किङ्कर समझता था ॥२८॥ एक दिन वह प्रार्थनापूर्वक बड़ी भक्तिसे गुरु वसुदेवको मथुरा ले आया और वहाँ लाकर उसने उन्हें गुरु-दक्षिणा स्वरूप अपनी देवकी नामक बहिन प्रदान कर दी ॥२९॥ तदनन्तर वसुदेव, कंसके आग्रहसे, सुन्दर कान्तिकी धारक एवं मधुर वचन बोलनेवाली देवकीके साथ क्रीड़ा करते हुए मथुरामें ही रहने लगे ॥३०॥ शत्रुओंको सन्तप्त करनेवाला एवं जरासंधको अतिशय प्रिय कंस, शूरसेन नामक विशाल देशकी राजधानी मथुराका शासन करने लगा ॥३१॥

एक दिन कंसके बड़े भाई अतिमुक्तक मुनि आहारके समय राजमन्दिर आये सो कंसकी स्त्री जीवद्यशा नमस्कार कर विभ्रम दिखाती हुई उनके सामने खड़ी हो गई और हँसती हुई क्रीड़ा भावसे कहने लगी कि यह आपकी बहिन देवकीका आनन्द वस्त्र है इसे देखिए ॥३२-३३॥ संसारकी स्थितिको जाननेवाले मुनिराज, उस निर्मर्याद चित्तकी धारक एवं राज्य-वैभवसे मत्त जीवद्यशाको रोकनेके लिए अपनी वचनगुप्ति तोड़कर बोले कि अहो! तू हँसी कर कर रही है परन्तु यह तेरी बड़ी मूर्खता है तू दुःखदायक शोकके स्थानमें भी आनन्द प्राप्त कर रही है ॥३४-३५॥ तू यह निश्चित समझ, कि इस देवकीके गर्भसे जो पुत्र होगा वह तेरे पति और पिताको मारनेवाला होगा। यह ऐसी ही होनहार है—इसे कोई टाल नहीं सकता ॥३६॥

यह सुनते ही जीवद्यशा भयभीत हो उठी, उसके नेत्रोंसे आँसू निकलने लगे। वह उसी समय मुनिराजको छोड़ पतिके पास गई और 'मुनिके वचन सत्य ही निकलते हैं' यह विश्वास

१. रीक्षताम् क०, ग०।

श्रुत्वा कंसोऽपि शंकावानाशु गत्वा पदानतः । वसुदेवं वरं वव्रे तीव्रधीः सत्यवाग्व्रतम् ॥३८॥
स्वामिन् ! वरप्रसादो मे दातव्यो भवता ध्रुवम् । प्रसूतिसमये वासो देवक्या मद्गृहेऽस्त्विति ॥३९॥
सोऽप्यविज्ञातवृत्तान्तो दत्तवान् वरमस्तधीः । नापायः शङ्क्यते कश्चित्सोदरस्य गृहे स्वसुः ॥४०॥
[1]पश्चाद्विदितवृत्तान्तः पश्चात्तापहतान्तरः । सहकारवनान्तस्थमतिमुक्तकमाप्तवान् ॥४१॥
देवक्या सह वन्दित्वा चारणश्रमणं स तम् । दत्ताशिषमुपासृत्य पप्रच्छ मनसि स्थितम् ॥४२॥
भगवन्नत्र कंसोऽयं कृतेनान्यत्र जन्मनि । पितुरेव रिपुर्जातः कर्मणा केन दुर्मतिः ॥४३॥
कथं वा मम पुत्रोऽस्य कंसस्य भविता विभो । हिंसकः पापचित्तस्य वद वाञ्छामि वेदितुम् ॥४४॥
इति पृष्टो मुनिः प्राह स दीप्तावधिलोचनः । संशयच्छेदिनी यस्माद्प्रवृत्तिर्दिव्यचक्षुषः ॥४५॥
आकर्णयस्व देवानाम्प्रिय ! सर्वजनप्रियः । कथयामि यथाप्रश्नं वस्तु जिज्ञासितं नृप ॥४६॥
मथुरायामिहैवासीदुग्रसेने तु राजनि । प्राक् पञ्चाग्नितपोनिष्ठो वशिष्ठो नाम तापसः ॥४७॥
एकपादस्थितश्चासावूर्ध्वबाहुर्बृहज्जटः । यमुनायास्तटे सोऽज्ञः तपस्तपति तापसः ॥४८॥

जमाकर उसने सब समाचार कह सुनाया ॥३७॥ स्त्रीके मुखसे यह समाचार सुनकर कंसको भी शङ्का हो गई। वह तीक्ष्ण बुद्धिका धारक तो था ही इसलिए शीघ्र ही उपाय सोचकर सत्यवादी वसुदेवके पास गया और चरणोंमें नम्रीभूत होकर वर माँगने लगा ॥३८॥ उसने कहा कि हे स्वामिन् ! मेरा जो वर आपके पास धरोहर है उसे दे दीजिए और वह वर यही चाहता हूँ कि 'प्रसूतिके समय देवकीका निवास मेरे ही घरमें रहा करे' ॥३९॥ वसुदेवको इस वृत्तान्तका कुछ भी ज्ञान नहीं था इसलिए उन्होंने निर्बुद्धि होकर कंसके लिए वह वर दे दिया। भाईके घर बहिनको कोई आपत्ति आ सकती है यह शङ्का भी तो नहीं की जा सकती ? ॥४०॥ पीछे जब उन्हें इस वृत्तान्तका पता चला तो उनका हृदय पश्चात्तापसे बहुत दुःखी हुआ। वे उसी समय आम्रवनके मध्यमें स्थित चारण ऋद्धिधारी अतिमुक्तक मुनिराजके पास गये और देवकीके साथ प्रणाम कर समीपमें बैठ गये। मुनिराजने दोनोंको आशीर्वाद दिया। तदनन्तर वसुदेवने उनसे अपने हृदयमें स्थित निम्नाङ्कित प्रश्न पूछा ॥४१-४२॥

हे भगवन् ! कंसने अन्य जन्ममें ऐसा कौन-सा कर्म किया कि जिससे वह दुर्बुद्धि अपने पिताका ही शत्रु हुआ। इसी प्रकार हे नाथ ! मेरा पुत्र इस पापी कंसका विघात करनेवाला कैसे होगा ?—यह मैं जानना चाहता हूँ सो कृपाकर कहिए ॥४३॥ अतिमुक्तक मुनिराज देदीप्यमान अवधिज्ञानरूपी नेत्रके धारक थे और अवधिज्ञानरूपी दिव्य नेत्रके धारक पुरुषोंकी वाणी चूँकि संशयको नष्ट करनेवाली होती है इसलिए कुमार वसुदेवके पूछनेपर मुनिराज कहने लगे ॥४४॥

हे देवोंके प्रिय ! राजन् ! सुन, तेरा प्रश्न सब लोगोंके लिए प्रिय है इसलिए मैं तेरे प्रश्नके अनुसार तेरी जिज्ञासित वस्तुको कहता हूँ ॥४५॥ इसी मथुरा नगरीमें जब राजा उग्रसेन राज्य करता था तब पहले पञ्चाग्नि तप तपनेवाला एक वशिष्ठ नामक तापस रहता था ॥४६॥ वह अज्ञानी यमुना नदीके किनारे तप तपता था, एक पाँवसे खड़ा रहता था, ऊपरकी ओर भुजा उठाये रहता था और बड़ी-बड़ी जटाओंको धारण करता था ॥४७॥ वहाँपर लोगोंकी पनिहारिनें पानीके लिए आती थीं। एक दिन जिनदास सेठकी प्रियङ्गुलतिका नामकी पनिहारिन भी वहाँ आई। हितकी बुद्धि रखनेवाली अन्य पनिहारिनोंने प्रियङ्गुलतिकासे कहा कि हे प्रियङ्गुलतिके !

१. अत्र क० ग० ङ० पुस्तकेषु एवंविधः पाठः—'पश्चाद्विदितवृत्तान्तः पश्चात्तापहतान्तरः । देवकी रुदमानासौ निजनाथं जगाद सा ॥४१॥ बहवो नन्दनास्तेऽस्मिन् किं करिष्याम्यहं पुनः । तच्छ्रुत्वा स वनान्तस्थमतिमुक्तकमाप्तवान् ॥४२॥'

जलार्थं तत्र लोकानां घटदासीभिः सा तथा । भणिता जिनदासस्य चेटिकाहितबुद्धिभिः ॥४९॥
प्रियङ्गुलतिके त्वस्य प्रणामं कुरु सत्वरम् । सा चावादीन्न मे भक्तिरस्योपरि करोमि किम् ॥५०॥
ततो हठान्नामिताभिः[1] सा जगौ धीवरस्य हे । पातिताहं पदद्वन्द्वे श्रवणाद्रुष्टः[2] स मूढधीः ॥५१॥
गतो राजसमीपेऽसौ जगावाक्रोशितोऽप्यहम् । श्रेष्ठिना जिनदत्तेन भो प्रभो कारणं विना[3] ॥५२॥
राज्ञा ह्यानाय्य[4] पृष्टोऽसौ जिनदत्तो बभाण तम् । अस्य मे दर्शनं नास्ति किं शाप्यमब्रवीन्मुनिः ॥५३॥
शापितश्चास्य दास्याऽहं पृष्टा चानाय्य तेन सा । कथं न नमसे पापे मुनिं निन्दयसि क्रुधा ॥५४॥
तयोक्तं न मुनिस्त्वेष धीवरोऽस्ति प्रभो कुधीः । जटाभारस्य नो अस्य शुद्धिः कुत्रापि दृश्यते ॥५५॥
शोधिते बहवो मत्स्याः सूक्ष्मास्तेभ्यश्च निर्गताः । लज्जितो हसितो लोकैर्मृषावादी त्वसौ मुनिः ॥५६॥
[5]यदा स परीक्षितो राज्ञा तदा कोपं विधाय सः । प्रकाशितनिजाज्ञानो मथुराया विनिर्गतः ॥५७॥
वाराणसीं समासाद्य समासादितनिश्चयः । गत्वा बाह्यञ्च[6] गङ्गायाः सङ्गमे कुरुते तपः ॥५८॥
वीरभद्रगुरुश्चागात् सपञ्चशतशिष्यकः । तद्देशं तत्र चैकेन नवप्रव्रजितेन सः ॥५९॥
प्रशंसितो वशिष्ठोऽयमहो घोरतपा इति । वारितः स तपः कीदृगज्ञानस्येति सूरिणा ॥६०॥
वशिष्ठेन किमज्ञोऽहमित्युक्तो गुरुरब्रवीत् । त्वं षड्जीवनिकायानां पीडनादज्ञ इत्यसौ ॥६१॥
पञ्चाग्नितपसि प्रायो नियोगो दहनस्य हि । दह्यन्ते तेन चावश्यं पञ्चैकविकलेन्द्रियाः ॥६२॥

तू शीघ्र ही इस साधुको नमस्कार कर। उत्तरमें प्रियङ्गुलतिकाने कहा कि इसके ऊपर मेरी भक्ति बिलकुल नहीं है। मैं क्या करूँ? ॥४८-४९॥ तदनन्तर अन्य पनिहारिनोंने प्रियङ्गुलतिकाको जबर्दस्ती उस साधुके चरणोंमें नमा दिया। प्रियङ्गुलतिकाने रुष्ट होकर कहा कि अहो! तुम लोगों-ने मुझे धीवरके चरणोंमें गिरा दिया। प्रियङ्गुलतिकाके उक्त वचन सुनते ही मूर्ख साधु कुपित हो उठा ॥५०-५१॥ वह सीधा राजा उग्रसेनके पास गया और कहने लगा कि हे प्रभो! जिनदत्त सेठने मुझे बिना कारण ही गाली दी है ॥५२॥ राजाने जिनदत्त सेठको बुलाकर पूछा तो उसने कहा कि नाथ! मैंने तो इसे देखा भी नहीं है फिर गाली तो दूर रही है। इसके उत्तरमें साधुने कहा कि इसकी दासीने गाली दी है। राजाने दासीको बुलाकर क्रोध दिखाते हुए पूछा कि अरी पापिन! तू इस साधुको नमस्कार क्यों नहीं करती? उल्टी निन्दा करती है? ॥५३-५४॥

दासीने कहा कि प्रभो! यह साधु नहीं है यह तो मूर्ख धीवर है। इसकी जटाओंमें कहीं भी शुद्धता नहीं दिखाई देती ॥५५॥ साधुकी जटाएँ शोधी गईं तो उनसे बहुत-सी छोटी-छोटी मछलियाँ निकल पड़ीं। इससे साधु बहुत लज्जित हुआ और यह 'असत्यवादी है' यह कहकर लोगोंने उसकी बहुत हँसी उड़ाई ॥५६॥ जब राजाने उसकी परीक्षा ली तो वह क्रोधकर अपना अज्ञान प्रकट करता हुआ मथुरासे बाहर चला गया ॥५७॥ और बनारस जाकर वहाँ रहनेका उसने निश्चय कर लिया। अब वह बनारसके बाहर जाकर गङ्गाके किनारे तप करने लगा ॥५८॥ किसी एक दिन वहाँ अपने पाँच सौ शिष्योंके साथ वीरभद्र मुनिराज आये। उनके संघके एक नवदीक्षित मुनिने वशिष्ठकी तपस्या देख, 'अहा! यह घोर तपस्वी वशिष्ठ है' इस प्रकार उसकी प्रशंसा की। 'अरे अज्ञानीका तप कैसा?' यह कहते हुए आचार्यने उस नवदीक्षित मुनिको प्रशंसा करनेसे रोका ॥५९-६०॥ वशिष्ठने पूछा कि 'मैं अज्ञानी कैसे हूँ?' इसके उत्तरमें आचार्य-ने कहा कि तुम छह कायके जीवोंको पीड़ा पहुँचाते हो इसलिए अज्ञानी हो ॥६१॥ पञ्चाग्नि तप-में अग्निका संसर्ग अवश्य रहता है और उस अग्निके द्वारा पञ्चेन्द्रिय, विकलेन्द्रिय तथा एके-

---

१. नामिता आभिः । २. श्रवणाद्दुष्टो क०, ग० । ३. प्रभोऽहं कारणाद्विना म० । ४. राज्ञानाय्य म० । ५. ख पुस्तके एकोनपञ्चाशत्तमात् षट्पञ्चाशत्तमपर्यन्ताः श्लोकाः न सन्ति । तत्स्थाने निम्नाङ्कितः पाठोऽधिको वर्तते—'श्रेष्ठिनो जिनदत्तस्य भृत्ययाऽज्ञान इत्यसौ । हेतोः कुतोऽप्यधिक्षिप्तः प्रियङ्गुलतिकाख्यया ॥ क्रुद्धो राजानमद्राक्षीद् राज्ञा चापि परीक्षितः ॥' ६. बाह्यश्च म०, ग० ।

पृथिव्यप्तेजसां वायोः प्राणिनां च वनस्पतेः । प्रघाते ज्ञानहीनस्य कुतः स्यात् प्राणिसंयमः ॥६३॥
विरागस्यापि मिथ्यादृग्ज्ञानचारित्रमानिनः । संज्ञानपूर्वको जन्तोः कुतश्चेन्द्रियसंयमः ॥६४॥
केवलं कायसन्तापं भजमानस्य मानिनः । सम्यक्संयमहीनस्य तापस्यं मुक्तये कुतः ॥६५॥
जैन एव हि सन्मार्गे संयमस्तप एव च । दर्शनं चापि चारित्रं ज्ञानं चाशेषभासनम् ॥६६॥
अवेहि तापसात्मीयं पितरं व्यालतां गतम् । ज्वालाधूमावलीव्याप्ते दह्यमानमिहेन्धने ॥६७॥
इत्युक्ते तापसः काष्ठं कुठारेण विपाट्य सः । ददर्श दंदशूकं तं दह्यमानं तदाकुलम् ॥६८॥
कृततापसधर्मस्य ब्रह्माख्यस्वपितुर्गतिम् । कुत्सितामवगम्यासावज्ञत्वं चापि चात्मनः ॥६९॥
ज्ञात्वा च जैनधर्मस्य ज्ञानपूर्वकतां तथा । वीरभद्रगुरोरन्ते [1]वशिष्ठोऽधिष्ठितस्तपः ॥७०॥
एको लाभान्तरायस्य कर्मणः परिपाकतः । [2]तपस्यतामभूत् साधुः स भिक्षालब्धिवर्जितः ॥७१॥
स पर्युपासनाद्धेतोरागमागमनाय च । शिवगुप्तयतेर्यत्नात् गुरुणापि समर्पितः ॥७२॥
सन्तप्तं च स षण्मासान् वीरदत्ते न्ययोजयत् । तथा सोऽपि सुमत्याख्ये षण्मासान् सोऽप्यपालयत् ॥७३॥
यतिधर्मविधानज्ञः परीषहसहस्ततः । बभूवैकविहारी स वशिष्ठो विदितः क्षितौ ॥७४॥
मथुरायामथ सम्प्राप्तो विहरन् स महातपाः । पूज्यते च प्रजापालप्रजाभिर्गुरुवत्तया ॥७५॥

न्द्रिय जीव अवश्य जलते हैं ॥६२॥ पृथिवी, जल, अग्नि, वायु और वनस्पति इन पाँच स्थावरों तथा अन्य त्रस प्राणियोंका विघात होनेसे अज्ञानी जीवके प्राणिसंयम कैसे हो सकता है ॥६३॥ इसी प्रकार जो विरक्त होकर भी मिथ्यादर्शन, मिथ्याज्ञान और मिथ्याचारित्रको माननेवाला है उसके सम्यग्ज्ञान पूर्वक होनेवाला इन्द्रिय संयम भी कैसे हो सकता है ?॥६४॥ जो केवल काय-क्लेश तपको प्राप्त है, मानसे भरा हुआ है और समीचीन संयमसे रहित है उसकी तपस्या मुक्तिके लिए कैसे हो सकती है ?॥६५॥ एक जैन मार्ग ही सन्मार्ग है, उसीमें संयम, तप, दर्शन, चारित्र और समस्त पदार्थोंको प्रकाशित करनेवाला ज्ञान प्राप्त हो सकता है ॥६६॥ हे तापस ! तुम जानते हो तुम्हारा पिता मरकर साँप हुआ है और ज्वालाओं तथा धूमकी पंक्तिसे व्याप्त इसी ईंधनमें जल रहा है ॥६७॥

आचार्यके इस प्रकार कहनेपर तापसने कुल्हाड़ासे उस काष्ठको चीरकर देखा तो उसके अन्दर साँप जलता हुआ छटपटा रहा था ॥६८॥ तदनन्तर आचार्यने फिर कहा कि तेरे पिताका नाम ब्रह्मा था और वह तेरे ही समान तापसके धर्मका पालन करता था। उसीसे उसकी यह कुगति हुई है। आचार्यके मुखसे यह सब जानकर वशिष्ठ तापसको जान पड़ा कि मैं अज्ञानी हूँ और जैनधर्म सम्यग्ज्ञानसे परिपूर्ण है। अतः उसने उन्हीं वीरभद्र गुरुके पास जैन दीक्षा धारण कर ली ॥६९-७०॥ उनके साथ अनेक मुनि तपस्या करते थे परन्तु लाभान्तराय कर्मके उदयसे उन सबमें एक वशिष्ठ मुनि ही भिक्षाके लाभसे वर्जित रह जाते थे अर्थात् उन्हें भिक्षाकी प्राप्ति बहुत कम होती थी ॥७१॥ तदनन्तर वीरभद्र गुरुने सेवाके निमित्त और आगमका विशिष्ट ज्ञान प्राप्त करनेके लिए वशिष्ठ मुनिको यत्नपूर्वक शिवगुप्तयतिको सौंप दिया ॥७२॥ छह महीने तक तप करनेके बाद शिवगुप्त यतिने वशिष्ठ मुनिको वीरदत्त नामक मुनिराजके लिए सौंप दिया। वीरदत्त मुनिने भी छह माह अपने पास रखकर उन्हें सुमति नामक मुनिके लिए सौंप दिया और सुमति मुनिने भी छह माहतक उनका अच्छी तरह पालन किया ॥७३॥ तदनन्तर अनेक गुरुओंके पास रहनेसे जो मुनि-धर्मकी विधिको अच्छी तरह जानने लगे थे और परिषह सहन करनेका जिन्हें अच्छा अभ्यास हो गया था ऐसे वशिष्ठ मुनि पृथिवीपर प्रसिद्ध एकविहारी हो गये—अकेले ही विचरण करने लगे ॥७४॥

अथानन्तर महातपस्वी वशिष्ठ मुनि कदाचित् विहार करते हुए मथुरा आये सो राजा

---

१. वशिष्ठः तपोऽधिष्ठितवान् इत्यर्थः । २. तपः कुर्वतामन्येषां मध्ये । तपस्यन्समभूत् साधुः क० ।

धृतातपनयोगं तं मुदा पर्वतमस्तके । सप्तैत्योचुस्तपोवश्याः किं कुर्मस्तेऽथ देवताः ॥७६॥
कर्तव्यं मम नास्तीति स निषिध्य तपोधनः । व्यसर्जयद्धि[1] तद्वश्या गताश्च वनदेवताः ॥७७॥
मासोपवासिने तस्मै निःस्पृहाय तपस्विने । पारणास्वन्नदानाय स्पृहयन्त्यखिलाः प्रजाः ॥७८॥
उग्रसेनोऽन्यदा दातुं पारणां तमयाचत । न्यवारयत्तदा दातॄन् मथुरावासिनोऽखिलान् ॥७९॥
पारणासु नृपस्तस्य विसस्मार तिसृष्वपि । दूताग्निद्विरदक्षोभव्यासङ्गेन प्रमादवान् ॥८०॥
अटित्वा मथुरां सर्वामलाभे श्रमपीडितः । श्रमणोऽन्ते विशश्राम नगरद्वारि सोऽन्यदा ॥८१॥
तं दृष्ट्वा केनचित्प्रो[2]क्तं हा कष्टं भूभृता कृतम् । भिक्षां स्वयं न दत्तेऽस्मै परानपि निषिद्धवान् ॥८२॥
तदाऽऽकर्ण्य रुषा तेन ध्यातास्ताः पूर्वदेवताः । कार्यं कुर्यात मेऽन्यस्मिन् जन्मनीति विनिर्ययौ ॥८३॥
निकारायोग्रसेनस्य प्रकृतोग्रनिदानतः । स मिथ्यात्वमितो मृत्वा पद्मावत्युदरेऽवसत् ॥८४॥
तस्मिन् गर्भस्थिते देवीमेकान्ते कृशविग्रहाम् । नृपः पप्रच्छ तां कान्ते दौर्हृदं ते किमित्यसौ ॥८५॥
नाथावाच्यमचिन्त्यं च गर्भदोषेण चिन्तितम् । इत्युक्ते स त्वयाऽवश्यं वाच्यमित्यवदन्नृपः ॥८६॥

तथा प्रजाने बड़ी प्रतिष्ठाके साथ उनकी पूजा की ॥७५॥ एक समय वे बड़ी प्रसन्नतासे पर्वतके मस्तकपर आतापन योग धारण कर विराजमान थे कि उनके तपसे वशीभूत हुईं सात देवियाँ पास आकर कहने लगीं कि हम लोग आपका क्या कार्य करें ?॥७६॥ तपोधन वशिष्ठ मुनिने यह कहकर उन देवियोंको वापिस कर दिया कि मेरा कोई काम नहीं है। अन्तमें उनके आधीन हुईं वे वन-देवियाँ चली गईं ॥७७॥ आहारकी इच्छासे रहित वशिष्ठ मुनि एक मासके उपवास-का नियम लेकर तपस्या कर रहे थे, इसलिए समस्त प्रजा पारणाओंके समय उन्हें आहार देना चाहती थी ॥७८॥ परन्तु राजा उग्रसेनने किसी समय नगरवासियोंसे यह याचना की कि मासो-पवासी मुनिराजके लिए पारणाओंके समय मैं ही आहार दूँगा और इसी भावनासे उसने मथुरा-में रहनेवाले सब दाताओंको आहार देनेसे रोक दिया ॥७९॥ मुनिराज एक-एक मास बाद तीन बार पोरणाओंके लिए आये परन्तु तीनों बार राजा प्रमादी बन आहार देना भूल गया। पहली पारणाके समय जरासन्धका दूत आया था सो उसकी व्यवस्थामें निमग्न हो आहार देना भूल गया। दूसरी पारणाके समय आग लग गई सो उसकी व्यवस्थामें संलग्न होनेसे प्रमादी हो गया और तीसरी पारणाके समय नगरमें हाथीने क्षोभ मचा दिया इसलिए उसके व्यासंगसे प्रमादी हो आहार देना भूल गया ॥८०॥ मुनि आहारके लिए समस्त मथुरा नगरीमें घूमे परन्तु कहीं आहार प्राप्त नहीं हुआ। अन्तमें श्रमसे पीड़ित हो नगरके द्वारमें विश्राम करने लगे ॥८१॥ उन्हें देख किसी नगरवासीने कहा कि हाय बड़े खेदकी बात राजाने कर रक्खी है—इन मुनि-राजके लिए वह स्वयं आहार देता नहीं है तथा दूसरोंको मना कर रक्खा है ॥८२॥ वह सुनकर मुनिराजको क्रोध आ गया। उन्होंने उसी समय पहले आई हुई देवियोंका स्मरण किया। स्मरण करते ही देवियाँ आ गईं। उन्हें देख मुनिने कहा कि 'आप लोग अन्य जन्ममें मेरा काम करें।' मुनिकी आज्ञा स्वीकृत कर देवियाँ वापिस चली गईं और मुनि वनकी ओर प्रस्थान कर गये ॥८३॥ राजा उग्रसेनका अपमान करनेके लिए वशिष्ठ मुनिने यह उग्र निदान बाँध लिया कि मैं उग्रसेनका पुत्र होकर इसका बदला लूँ। निदानके कारण वे मुनि पदसे भ्रष्ट हो मिथ्यात्व गुण-स्थानमें आ गये और उसी समय मरकर राजा उग्रसेनकी रानी पद्मावतीके उदरमें निवास करने लगे ॥८४॥ जब कंसका जीव पद्मावतीके गर्भमें था तब पद्मावतीका शरीर एकदम दुर्बल हो गया। एक दिन राजाने उससे एकान्तमें पूछा कि कान्ते ! तुम्हारा दोहला क्या है ? जिसके कारण तुम सूखकर काँटा हुई जा रही हो ॥८५॥ पद्मावतीने कहा कि हे नाथ ! गर्भके दोषसे मुझे

---

१. विद्वद्वश्या ग० (?) । २. प्रोक्तो म० ।

साऽस्य निर्बन्धतो वाचा दुःखगद्गदयाऽगदीत् । विपाट्य जठरं पातुं रुधिरं तव मे स्पृहा ॥८७॥
सचिवोपायतस्तस्या दौहृदे विहिते ततः । असूत तनयं देवी भ्रकुटीकुटिलाननम् ॥८८॥
गर्भप्रभृतिरौद्रं तं कंसमञ्जूषिकाकृतम् । देव्यमोचयदेकान्ते प्रवाहे यामुने[1] भयात् ॥८९॥
अवीवृधदसौ लब्ध्वा कौशाम्ब्यां सीधुकारिणी । कृतकंसाभिधं शेषं तवापि विदितं नृप ॥९०॥
निदानदोषदुष्टोऽयं कृतवान् पितृनिग्रहम् । उग्रसेननृपं चापि मोचयिष्यति ते सुतः ॥९१॥
नृपोक्तः कंससम्बन्धः पितृबन्धनिबन्धनः । वच्मि ते पुत्रसम्बन्धं शृणु सन्धाय मानसम् ॥९२॥
देवक्याः सप्तमः सूनुः शङ्खचक्रगदासिभृत् । निहत्य कंसपूर्वारीन् निःशेषां भोक्ष्यति क्षितिम् ॥९३॥
चरमोत्तमदेहास्तु शेषाः षडपि सूनवः । न तेषाम[2]पमृत्युः स्यादाधिव्याधिमतस्त्यज ॥९४॥
रामभद्रसमेतानां तेषां जन्मान्तराणि ते । भणामि शृणु सस्त्रीकश्चित्तप्रीतिकराण्यहम् ॥९५॥
शूरसेननृपे पाति मथुरां भानुरिभ्यभूत् । इभ्यो द्वादशकोटीशो यमुना तस्य भामिनी ॥९६॥
सुभानुर्भानुकीर्तिश्च भानुषेणस्तथा परः । शूरश्च सूरदेवश्च शूरदत्तस्तथैव च ॥९७॥
शूरसेनश्च सप्तैते यमुनाभानुसूनवः । अभिरामाः स्वभावेन तेऽन्योऽन्यानुगतास्तदा ॥९८॥
कालिन्दी तिलका कान्ता श्रीकान्ता सुन्दरी द्युतिः । चन्द्रकान्ता च तत्कान्ता क्रमेण कुलबालिकाः ॥९९॥
भानुः प्राव्रजदन्तेऽसौ गुरोरभयनन्दिनः । तथा यमुनदत्तापि जिनदत्तार्यिकान्तिके ॥१००॥

जो दोहला हुआ है वह न तो कहने योग्य है और न विचार करने योग्य है । रानीके इस प्रकार कहनेपर राजाने कहा कि वह दोहला तुम्हें अवश्य कहना चाहिए ॥८६॥ राजाका हठ देख उसने दुःखसे गद्गद वाणी द्वारा कहा कि हे नाथ ! मेरी इच्छा है कि मैं आपका पेट फाड़कर आपका रुधिर पीऊँ ॥८७॥ तदनन्तर मन्त्रियोंके उपायसे उसका दोहला पूर्ण किया गया । नौ माह बाद रानी पद्मावतीने ऐसा पुत्र उत्पन्न किया जिसका मुख भौंहोंसे अत्यन्त कुटिल था ॥८८॥ चूँकि वह बालक गर्भसे ही अत्यन्त रौद्र था इसलिए रानी पद्मावतीने भयसे उसे काँसकी मञ्जूषामें बन्द कर एकान्तमें यमुनाके प्रवाहमें छुड़वा दिया ॥८९॥ वह मञ्जूषा बहती-बहती कौशाम्बी नगरी पहुँची । वहाँ एक कलारिनने उसे पाकर पुत्रका कंस नाम रक्खा तथा उसका पालन-पोषण किया । हे राजन् ! इसके आगेका सब समाचार तुम्हें विदित ही है ॥९०॥ निदानके दोषसे दूषित होकर इसने पिताका निग्रह किया है । आगे चलकर तुम्हारा पुत्र उसे मारेगा और उसके पिता राजा उग्रसेनको भी बन्धनसे छुड़ावेगा ॥९१॥ हे राजन् ! कंसने अपने पिताको बन्धनमें क्यों डाला इसका कारण बतलानेवाला कंसका वृत्तान्त कहा । अब तेरे पुत्रोंका वृत्तान्त कहता हूँ सो मनको स्थिर कर सुन ॥९२॥

देवकीका सातवाँ पुत्र शङ्ख, चक्र, गदा तथा खड्गको धारण करनेवाला होगा और वह कंस आदि शत्रुओंको मारकर समस्त पृथिवीका पालन करेगा ॥९३॥ शेष छहों पुत्र चरमशरीरी होंगे । उनकी अपमृत्यु नहीं हो सकेगी, अतः चिन्ता रूपी व्याधिका त्याग करो ॥९४॥ मैं रामभद्र (बलदेव) सहित उन सबके पूर्वभव तुम्हें कहता हूँ सो अपनी स्त्रीके साथ श्रवण करो। अवश्य ही उन सबके पूर्वभव तेरे चित्तको प्रीति करनेवाले होंगे ॥९५॥

जब राजा सूरसेन मथुरापुरीकी रक्षा करते थे तब यहाँ बारह करोड़ मुद्राओंका अधिपति भानु नामका सेठ रहता था । उसकी स्त्रीका नाम यमुना था ॥९६॥ उन दोनोंके सुभानु, भानुकीर्ति, भानुषेण, शूर, सूरदेव, शूरदत्त और शूरसेन ये सात पुत्र उत्पन्न हुए । ये सातों भाई अत्यन्त सुन्दर तथा स्वभावसे ही एक दूसरेके अनुगामी थे ॥९७–९८॥ उन सातों पुत्रोंकी क्रमसे कालिन्दी, तिलका, कान्ता, श्रीकान्ता, सुन्दरी, द्युति और चन्द्रकान्ता ये सात स्त्रियाँ थीं जो उच्च कुलोंकी कन्याएँ थीं ॥९९॥ कदाचित् भानु सेठने अभयनन्दी गुरुके समीप और उसकी

---

१. यमुनाया इदमिति यामुनं तस्मिन् यामुने । २. तेषामपि म० ।

द्यूतवेश्याप्रसङ्गेन विनाश्य द्रविणं पितुः। चौर्यार्थं भ्रातरः सर्वे गतास्तूज्जयिनीं पुरीम् ॥१०१॥
कनीयांसं महाकाले सन्तत्यर्थं निधाय ते। प्राविशन् निशि निःशङ्काः पुरीं षडपि चेतरे ॥१०२॥
कमलायास्तदा भर्त्ता राजाऽत्र वृषभध्वजः। वप्रश्रीवल्लभस्तस्य [1]दृढमुष्टिर्भटोत्तमः ॥१०३॥
स वज्रमुष्टये मङ्गीं स्वाङ्गजायाङ्गजार्त्तये। राज्ञा विमलचन्द्रेण विमलाजामदापयत् ॥१०४॥
सातिवल्लभिका तस्य [2]वल्लकीवाङ्कवर्तिनी। [3]श्वश्रूं शुश्रूषया मङ्गी सङ्गता नानुवर्त्तते ॥१०५॥
अन्तःकलुषिणी साऽस्याः स[4]तंतापायचिन्तनी। उपायं चिन्तयन्त्यास्ते छद्मना तद्वियोजने ॥१०६॥
सा वसन्तोत्सवे रन्तुं वनं प्रमदपूर्वकम्। द्राङ् मामन्वेहि मङ्गीति राज्ञा[5]मा प्राग्गतेऽङ्गजे ॥१०७॥
माल्यदानापदेशेन तामादिष्टां वधूं कुधीः। संदष्टां दंदशूकेन धूपिनेन घटोदरे ॥१०८॥
मूर्च्छितां विषवेगेन श्वश्रूर्भृत्यैरजीहरत्। श्मशानं तन्महाकालं कालस्यापि भयङ्करम् ॥१०९॥
स रात्रौ गृहमागत्य ज्ञात्वा वृत्तान्तमाविशत्। महाकालं महास्नेहादन्वेष्टुं स्वप्रियां प्रियः ॥११०॥
खड्गदीप्रकरः सोऽयं तच्छ्मशानमशङ्कितः। [6]रात्रौ प्रतिमयाऽपश्यद् वरधर्ममुनिं स्थितम् ॥१११॥

स्त्री यमुनाने जिनदत्ता आर्यिकाके समीप दीक्षा ले ली ॥१००॥ सातों भाइयोंने जुआ और वेश्या व्यसनमें फँसकर पिताका सब धन नष्ट कर दिया। जब उनके पास कुछ भी नहीं रहा तब सब भाई चोरी करनेके लिए उज्जयिनी नगरी गये ॥१०१॥ उज्जयिनीके बाहर एक महाकाल नामका वन है। वहाँ सन्ततिकी रक्षाके लिए छोटे भाईको रखकर शेष छहों भाई निःशङ्क हो रात्रिके समय नगरीमें प्रविष्ट हुए ॥१०२॥

उस समय उज्जयिनीका राजा वृषभध्वजका था। उसकी स्त्रीका नाम कमला था। राजा वृषभध्वजका दृढमुष्टि नामका एक उत्तम योद्धा था। उसकी स्त्रीका नाम वप्रश्री था। उन दोनोंको वज्रमुष्टि नामका पुत्र था। युवा होनेपर जब वह कामसे पीड़ित हुआ तब उसने राजा विमलचन्द्रसे उनकी विमला रानीसे उत्पन्न मङ्गी नामक पुत्री उसके लिए दिलवा दी ॥१०३-१०४॥ मङ्गी वज्रमुष्टिके लिए बहुत प्यारी थी। वह वीणाकी तरह सदा उसीके साथ रहती थी और शुश्रूषा-सेवासे युक्त हो सासके अनुकूल आचरण नहीं करती थी अर्थात् सासकी कभी सेवा नहीं करती थी। इसलिए उसकी सास मन-ही-मन बहुत कलुषित रहती थी और निरन्तर उसके नाशका उपाय सोचती रहती थी। एक दिन वह छलसे उसके मारनेका उपाय सोचती हुई बैठी थी कि इतनेमें वसन्तोत्सवका समय आ गया और उसका पुत्र वज्रमुष्टि प्रमदवनमें क्रीड़ा करनेके लिए राजाके साथ पहले चला गया तथा मंगीसे कह गया कि हे मंगि! तू शीघ्र ही मेरे पीछे आ जाना ॥१०५-१०७॥ इधर सासने मंगीको वसन्तोत्सवमें नहीं जाने दिया। उस दुर्बुद्धिने एक घड़ेमें धूपिन जातिका जहरीला साँप पहलेसे बुला रक्खा था। अवसर देख उसने मंगीसे कहा कि तू वसन्तोत्सवमें नहीं जा सकी है इसलिए दुःखी न हो। मैंने तेरे लिए पहलेसे ही सुन्दर माला बुला रखी है। जा उस घड़ेमेंसे निकालकर पहिन ले। भोली भाली मंगीने मालाके लोभसे घड़ेमें ज्योंही हाथ डाला त्योंही उस धूपिन सर्पने उसे डस लिया ॥१०८॥ मंगी विषके वेगसे तुरन्त ही मूर्च्छित हो गई और सासने उसे अपने भृत्यों द्वारा उस महाकाल नामक श्मशानमें जो यमराजके लिए भी भय उत्पन्न करनेवाला था छुड़वा दिया ॥१०९॥

वज्रमुष्टि जब रात्रिको घर आया और सब वृत्तान्त उसे मालूम हुआ तो वह बड़े स्नेहसे अपनी प्रिया मंगीको ढूँढ़नेके लिए महाकाल श्मशानमें जा घुसा ॥११०॥ उस समय उसके हाथमें एक चमकती हुई तलवार थी। उसीके बलपर वह निःशङ्क होकर श्मशानमें घुसा जा रहा था। आगे चलकर उसने उस श्मशानमें रात्रिभरके लिए प्रतिमा योग लेकर विराजमान वर धर्म

१. दृष्टमुष्टि -म०। २. वीणेव। ३. श्वश्रूशुश्रूषया म०,ग०। ४. सक्तापाय -ग०। ५. राज्ञा अमा = सहेत्यर्थः। ६. रात्रिप्रतिमया-म०, ख०, ग०।

त्रिः परीत्य स तं नत्वा जगौ ते पादपूजनम् । कुर्वे पद्मसहस्रेण मुने ! मङ्गीं लभे यदि ॥११२॥
उक्त्वेति प्रगतो लब्ध्वा स तामानीय मानिनीम् । महामुनिपदस्पर्शान्निर्विषां विदधे वधूम् ॥११३॥
मुनिपादोपकण्ठेऽसौ तावत्तिष्ठेत्युदीर्य ताम् । सुदर्शनं सरो यातः पद्मानामानिनीषया ॥११४॥
शूरसेनस्तमादर्श्य महास्नेहं प्रियां प्रति । स जिज्ञासुर्मनस्तस्या रूपी रूपमदर्शयत् ॥११५॥
गूढधीः कृतसल्लापस्तया सकृतमन्त्रणः । तस्य दर्शनमात्रेण जाताऽसौ कामविह्वला ॥११६॥
तमागत्याब्रवीद् देव ! मामिच्छ कृपयान्वितः । स बभाण करोम्येवं कथं भर्तरि जीवति ॥११७॥
बिभेम्यतः प्रियेऽवश्यं वीर्यान्वितभटादहम् । त्वं मा कुर्वीर्भयं नाथ ! सा तं प्राह सुरक्तधीः ॥११८॥
असिना घातयाम्येनं तेनाभ्युपगतं तथा[1] । तत्र गूढतनुस्तस्थौ तत्कृतं[2] तद्दिदृक्षया ॥११९॥
आगत्याभ्यर्च्य साध्वंह्री[3] नमतोऽस्य शिरस्यसिः । मुक्तस्तया निरुद्धो द्राक् शूरसेनेन तेन सः ॥१२०॥
अन्तर्हितवपुर्यातः सूरसेनो विरक्तधीः । ततोऽनु मायया मङ्गी तस्य स्पर्शेण शङ्किता ॥१२१॥
स्वदोषच्छादनायासौ पपात धरणीतले । भर्त्रा पृष्टा प्रिये किं नु केनचिद् भीषिताऽत्र हि ॥१२२॥
न किञ्चिदपि चास्त्यत्र तां प्रबोध्य भयातुराम् । वज्रमुष्टिर्मुनिं नत्वा सकान्तः स्वगृहं गतः ॥१२३॥

नामक मुनिराजको देखा ॥१११॥ उसने तीन प्रदक्षिणाएँ देकर मुनिराजको नमस्कार किया और कहा कि हे मुनिराज ! यदि मैं मंगीको प्राप्त कर सका तो एक हजार कमलोंसे आपके चरणोंकी पूजा करूँगा ॥११२॥ इस प्रकार कहकर वह ज्योंही आगे बढ़ा त्योंही उसे उसकी स्त्री मंगी मिल गई । वह उसे मुनिराजके पास ले आया और उनके चरणोंके स्पर्शसे उसने उसे विष रहित कर लिया ॥११३॥

तदनन्तर 'जबतक मैं न आ जाऊँ तबतक तुम मुनिराजके चरणोंके समीप बैठना' इस प्रकार मंगीसे कहकर वज्रमुष्टि कमल लानेकी इच्छासे सुदर्शन नामक सरोवरकी ओर चला गया ॥११४॥ पास ही छिपा हुआ शूरसेन मंगीके प्रति वज्रमुष्टिका महान् स्नेह देख चुका था इसलिए उसने उसके मनका भाव जाननेकी इच्छासे उसे अपना रूप दिखाया । वह सुन्दर तो था ही ॥११५॥ वह अपने अभिप्रायको छिपाकर उसके साथ मीठी-मीठी बातचीत और गुप्त सलाह करने लगा । मंगी उसे देखते ही कामसे विह्वल हो गई ॥११६॥ उसी विह्वल दशामें उसने शूरसेनके पास जाकर कहा कि हे देव ! आप कृपाकर मुझे स्वीकृत कीजिए । मंगीकी प्रार्थना सुनकर शूरसेनने कहा कि जबतक तुम्हारा पति जीवित है तबतक मैं ऐसा कैसे कर सकता हूँ ? हे प्रिये ! मैं इस शक्तिशाली सुभटसे अवश्य ही डरता हूँ । इसके उत्तरमें अनुरागसे भरी मंगीने कहा कि हे नाथ ! आप इसका भय नहीं कीजिए । मैं इसे तो तलवारसे अभी मार डालती हूँ । शूरसेनने उत्तर दिया कि यदि ऐसा है तो मुझे स्वीकार है । इस प्रकार कहकर वह उसका वह कार्य देखनेकी इच्छासे वहीं छिपकर खड़ा हो गया ॥११७-११९॥

तदनन्तर वज्रमुष्टिने आकर मुनिराजके चरणोंकी पूजा की और पूजा करनेके बाद ज्योंही वह नमस्कार करने लगा त्योंही मंगीने उसके शिरपर तलवार छोड़ना चाही, परन्तु शूरसेनने शीघ्र ही आकर तलवार छीन ली ॥१२०॥ शूरसेनको यह दृश्य देखकर संसारसे वैराग्य हो आया, इसलिए वह अपने-आपको प्रकट किये बिना ही वहाँसे चला गया । मंगी उसके स्पर्शसे शङ्कित हो गई, इसलिए अपना दोष छिपानेके लिए वह माया बताती हुई पृथिवी तलपर गिर पड़ी । वज्रमुष्टिको मंगीके इस दुष्कृत्यका पता नहीं चल पाया । इसलिए वह उससे पूछता है कि प्रिये ! क्या यहाँ तुम्हें किसीने डरा दिया है ? यहाँ भयका तो कुछ भी कारण दिखाई नहीं देता । इस प्रकार भयसे पीड़ित मंगीको सचेत कर वज्रमुष्टिने मुनिराजको नमस्कार किया और तदुपरान्त वह स्त्रीको साथ ले घर चला गया ॥१२१-१२३॥

१. यदा म० । २. तत्कृत्यं म० । ३ मुनिचरणौ ।

चौरास्ततः समागत्य चौर्याल्लब्धधनं तदा । विभज्य समभागेन स्वं गृहाणेति तं जगुः ॥१२४॥
अनिच्छन् शूरसेनोऽपि जगौ दारार्थमर्थिनः । घटन्तेऽनर्थकार्यं ते वज्रमुष्टिस्त्रियः समाः ॥१२५॥
दृष्ट्वा श्रुत्वा च वृत्तान्तं षट् कनिष्ठाः विरागिणः । प्राव्रजन् वरधर्मान्ते [1]ज्येष्ठेभ्योऽप्यनयद् धनम् ॥१२६॥
सप्तसु श्रुतवार्त्तासु निष्क्रान्तास्वथ तास्वपि । तस्यैव स गुरोरन्ते सुभानुः प्राव्रजत्सुधीः ॥१२७॥
मुनीन् कालान्तरेणामूनागतान् वीक्ष्य सूरिणा । दीक्षाहेतुमसौ पृष्ट्वा वज्रमुष्टिरदीक्षत ॥१२८॥
आर्यिकास्तास्तथा पृष्ट्वा जिनदत्तापुरःसराः । मङ्गी संस्मृतवृत्तान्ता प्रवव्राज दृढव्रता ॥१२९॥
भृतघोरतपोभाराः सर्वेऽप्याराध्य तेऽभवन् । सौधर्मे चार्णवायुष्कास्त्रायस्त्रिंशत्सुरोत्तमाः ॥१३०॥
पूर्वस्मिन् धातकीखण्डे भारते रौप्यपर्वते । च्युत्वा दक्षिणश्रेण्यां च नित्यालोकपुरोत्तमे ॥१३१॥
चित्रचूलमनोहर्योर्ज्येष्ठश्चित्राङ्गदोऽङ्गजः । जज्ञे[2] त्रिद्वन्द्वगर्भास्तु क्रमेणैव तथोत्तरे ॥१३२॥
कान्तौ गरुडसेनौ द्वौ गरुडध्वजवाहनौ । चूलौ मणिहिमादी च व्योमानन्दचरौ वरौ ॥१३३॥
अभिरूपतमाः सर्वे भूरिविद्योद्यताः स्थिताः । चित्रचूलसुता मूर्ध्नि ते चूलामणयो नृणाम् ॥१३४॥
राजा मेघपुरे चैव सर्वश्रीशो धनञ्जयः । धनश्रीरिति विख्याता तस्य कन्यातिरूपिणी ॥१३५॥

तदनन्तर शूरसेनके जो छह भाई चोरी करनेके लिए गये थे उन्होंने चोरीसे प्राप्त हुए धनके बराबर हिस्से कर शूरसेनसे कहा कि अपना हिस्सा उठा लो ॥१२४॥ शूरसेनने हिस्सा लेनेके प्रति अनिच्छा प्रकट करते हुए कहा कि लोग स्त्रियोंके पीछे ही नाना प्रकारके अनर्थ करते हैं और स्त्रियाँ वज्रमुष्टिकी स्त्रीके समान होती हैं ॥१२५॥ इस वृत्तान्तको देख-सुनकर छह छोटे भाइयोंने विरक्त होकर उसी समय वरधर्मगुरुके समीप दीक्षा ले ली और बड़ा भाई स्त्रियोंके पास धन ले गया ॥१२६॥ जब उन भाइयोंकी सातों स्त्रियोंने यह वृत्तान्त सुना तो उन्होंने भी विरक्त हो दीक्षा ले ली । अन्तमें बड़े भाई सुभानुकी बुद्धि भी ठिकाने आ गई इसलिए उसने भी उन्हीं वरदत्त गुरुके पास दीक्षा ले ली ॥१२६-१२७॥

अथानन्तर किसी समय अपने गुरुके साथ विहार करते हुए वे सातों मुनि उज्जयिनी आये । उनके दर्शन कर वज्रमुष्टिने उनसे दीक्षा लेनेका कारण पूछा । उत्तरमें उन्होंने वज्रमुष्टि और मंगीका सब वृत्तान्त कह सुनाया जिसे सुन वज्रमुष्टिको बहुत खेद हुआ तथा उसी समय उसने दीक्षा ले ली ॥१२८॥ उसी समय आर्यिका जिनदत्ताके साथ विहार करती हुई पूर्वोक्त सात आर्यिकाएँ भी उज्जयिनी आईं । मंगीने उनसे दीक्षाका कारण पूछा । उन्होंने जो उत्तर दिया उसे सुनकर मंगीको अपना पिछला सब वृत्तान्त स्मृत हो गया इसलिए उसने भी दृढ़ व्रत धारण कर दीक्षा ले ली ॥१२९॥ तदनन्तर घोर तपके भारको धारण करनेवाले सातों मुनिराज आयुके अन्तमें समाधिमरण कर सौधर्म स्वर्गमें एक सागरकी आयुवाले त्रायस्त्रिंश जातिके उत्तम देव हुए ॥१३०॥

धातकीखण्डद्वीपके पूर्व भरतक्षेत्रमें जो विजयार्ध पर्वत है उसकी दक्षिण श्रेणीमें एक नित्यालोक नामका नगर है ॥१३१॥ उसमें किसी समय राजा चित्रचूल राज्य करता था उसकी स्त्रीका नाम मनोहरी था । बड़े भाई सुभानुका जीव उन्हीं दोनोंके चित्राङ्गद नामका पुत्र हुआ और शेष छह भाइयोंके जीव भी उन्हींके क्रम-क्रमसे तीन युगलोंके रूपमें गरुडकान्त, सेनकान्त, गरुडध्वज गरुडवाहन, मणिचूल और हिमचूल नामके छह पुत्र हुए । ये सभी आकाशमें आनन्दसे विचरण करते थे तथा अत्यन्त उत्कृष्ट थे ॥१३२-१३३॥ चित्रचूलके ये सभी पुत्र अत्यन्त सुन्दर थे, अनेक विद्याओंके प्राप्त करनेमें उद्यत थे और मनुष्योंके मस्तकपर चूडामणिके समान स्थित थे ॥१३४॥ उसी समय मेघपुर नगरमें सर्वश्री नामका स्त्रीका स्वामी धनञ्जय नामका राजा राज्य करता था । राजा धनञ्जय और रानी सर्वश्रीके एक धनश्री नामकी अत्यन्त रूपवती

---

१. ज्येष्ठश्चासौ इभ्यश्चेति ज्येष्ठेभ्यः । २. यज्ञे म० ।

स्वयंवरमगुस्तस्या विश्वे विद्याधरात्मजाः । [1]तत्रात्ममैथुनं वव्रे कन्याऽसौ हरिवाहनम् ।।१३६।।
वयं स्वयंवरव्याजात् स्वविवाहाय मायया । समाहूता इति क्रुद्धास्तत्पित्रे गगनायनाः ।।१३७।।
परस्परवधं चक्रुस्ते तत्कन्यार्थिनस्ततः । चित्रचूलसुता निन्द्यं दृष्ट्वा क्षत्रवधं तकम् ।।१३८।।
पापहेतुं विनिन्द्याक्षविषयान् विषमानमी । भूतानन्दजिनस्यान्ते प्रव्रज्यां ते प्रपेदिरे ।।१३९।।
सप्ताप्याराध्य माहेन्द्रे सप्ताब्ध्युपमजीविताः । सामानिकसुरा भूत्वा सुखं बुभुजिरे चिरम् ।।१४०।।
ततश्च्युत्वाऽग्रजोऽत्रैव भारते हस्तिनाह्वये । नगरे श्रेष्ठिनः शङ्खो बन्धुमत्यामभूत्सुतः ।।१४१।।
इतरे गङ्गदेवस्य तत्पुरेशस्य भूपतेः । नन्दना नन्दयशसो द्वन्द्वभूतास्तु जज्ञिरे ।।१४२।।
गङ्गश्च गङ्गदत्तश्च गङ्गरक्षितकस्तथा । नन्दश्चापि सुनन्दश्च नन्दिषेणश्च सुन्दरः ।।१४३।।
सप्तमस्तु सुतो देव्या गर्भे दौर्भाग्यदग्धया । त्यक्तः संवर्धितश्चासौ धात्र्या रेवतिकाख्यया ।।१४४।।
शङ्खो [2]यातोऽन्यदाऽऽदाय तं निर्नामकनामकम् । हृद्यं मनोहरोद्यानं पौरलोकसमाकुलम् ।।१४५।।
भुञ्जानानाह राजन्याँस्तत्र राजसुतैः सह । भोक्तुं नाहूयते कस्मादयं निर्नामकोऽनुजः ।।१४६।।
आहूतस्तैरसौ भोक्तुमासीनः सादरैः सह । [3]राज्ञ्या चागतया मात्रा कोपात्पादेन ताडितः ।।१४७।।
धिग् मद्धेतोरयं दुःखं निर्नामा प्राप्तवानिति । दुःखी शङ्खस्तमादाय गत्वा राजादिभिर्वने ।।१४८।।

कन्या थी ।।१३५।। धनश्रीका किसी समय स्वयंवर किया गया, स्वयंवरमें समस्त विद्याधरोंके पुत्र गये परन्तु कन्याने उनमें अपने पिताके भानजे हरिवाहनको वरा ।।१३६।। 'जब इसे अपने सम्बन्धीके साथ ही विवाह करना था तो स्वयंवरके बहाने छलपूर्वक हम लोगोंको क्यों बुलाया—यह कहते हुए अन्य विद्याधर कन्याके पितापर क्रुद्ध हो गये ।।१३७।। तदनन्तर उस कन्याकी इच्छा रखते हुए वे विद्याधर परस्पर एक-दूसरेका वध करने लगे। राजा चित्रचूलके पुत्र भी स्वयंवरमें गये थे इस निन्दनीय क्षत्रिय-वधको देखकर वे विचार करने लगे कि अहो ! ये इन्द्रियोंके विषम विषय ही पापके कारण हैं। इस प्रकार इन्द्रियोंके विषयोंकी निन्दा कर भूतानन्द जिनराजके समीप दीक्षित हो गये ।।१३८-१३९।। सातों मुनिराज अन्तमें समाधि धारण कर माहेन्द्र स्वर्गमें सात सागरकी आयुके धारक सामानिक जातिके देव हुए और वहाँकी विभूतिसे चिरकाल तक सुख भोगते रहे ।।१४०।।

तदनन्तर वहाँसे च्युत होकर बड़े भाईका जीव इसी भरतक्षेत्रके हस्तिनापुर नगरमें किसी सेठकी बन्धुमती स्त्रीसे शङ्ख नामका पुत्र हुआ ।।१४१।। शेष छह भाइयोंके जीव इसी नगरके राजा गङ्गदेवकी नन्दयशा रानीसे तीन युगलके रूपमें गङ्ग, गङ्गदत्त, गङ्गरक्षित, नन्द, सुनन्द और नन्दिषेण नामके छह सुन्दर पुत्र हुए ।।१४२-१४३।। रानी नन्दयशाके गर्भमें जब सातवाँ पुत्र आया तब उसके अत्यन्त दुर्भाग्यका उदय आ गया उससे दुखी होकर उससे उत्पन्न होनेपर उस पुत्रको छोड़ दिया, निदान, रेवती नामक धायने पालन-पोषण कर उसे बड़ा किया ।।१४४।। रानी नन्दयशाके इस त्याज्य पुत्रका नाम निर्नामक था। यह निर्नामक, श्रेष्ठिपुत्र शङ्खको बड़ा प्रिय था। एक दिन शङ्ख, निर्नामकको साथ लेकर नागरिक मनुष्योंसे भरे हुए मनोहर उद्यानमें गया ।।१४५।। वहाँ राजा गङ्गदेवके छहों पुत्र एक साथ भोजन कर रहे थे उन्हें देख शङ्खने कहा कि यह निर्नामक भी तो तुम्हारा छोटा भाई है इसे भोजन करनेके लिए क्यों नहीं बुलाते ? ।।१४६।। शङ्खकी बात सुन राजपुत्रोंने निर्नामकको बुला लिया और वह भाइयोंके साथ भोजन करनेके लिए बैठ गया। उसी समय उसकी माता रानी नन्दयशा कहींसे आ गई और उसने क्रोधसे आगबबूला हो उसे लात मार दी ।।१४७।। इस घटनासे शङ्खको बड़ा दुःख हुआ। वह कहने लगा कि मेरे निमित्तसे ही निर्नामकको यह दुःख उठाना पड़ा है

---

१. पितुर्भगिनीपुत्रम् इति ग पुस्तके टिप्पणी । २. जातो म० । ३. राज्ञामागतया म० ।

द्रुमषेणर्षिमेकान्ते दृष्ट्वा नत्वा स पृष्टवान् । निर्नामकस्य जन्मानि सावधिः सोऽभ्यधान्मुनिः ॥१४९॥
आसीच्चित्ररथो राजा नगरे गिरिपूर्वके । कामिनी गुणिनी यस्य कान्ता कनकमालिनी ॥१५०॥
मांसप्रियस्य तस्यासीत्सूदोऽमृतरसायनः । राज्ञा च मांसपाकज्ञो दशग्रामेश्वरः कृतः ॥१५१॥
मांसदोषं नृपः श्रुत्वा सुधर्माल्त्रिशतैर्नृपैः । क्षिप्त्वा मेघरथे लक्ष्मीमदीक्षिष्ट मुमुक्षया ॥१५२॥
नवराजेन सूदोऽपि श्रावकेन सता ततः । निर्मदीकृत्य मांस्पाको ग्राममात्रपतिः कृतः ॥१५३॥
सूदेन कुपितेनासौ मुनिर्मांसनिषेधनः । कटुवालाम्बुविषाहारं दत्त्वा प्राणैर्वियोजितः ॥१५४॥
उर्जयन्तगिरौ मृत्वा स्वयोगादूर्जितादभूत् । द्वात्रिंशदब्धितुल्यायुः सोऽहमिन्द्रोऽपराजिते ॥१५५॥
सूपकारो मृतः प्राप पृथिवीं वालुकाप्रभाम् । त्रिसमुद्रोपमं कालं नारकं दुःखमन्वभूत् ॥१५६॥
ततश्चोद्वृत्य पर्यट्य तिर्यग्गतिमहाटवीम् । सोऽङ्गी मलयराष्ट्रान्तःपलाशग्रामवर्त्तिनोः ॥१५७॥
कुटुम्बिनोर्जडप्रायोयक्षिलायक्षदत्तयोः । यक्षस्वावरजो नाम्ना सूनुर्यक्षलिकोऽभवत् ॥१५८॥
स भ्रात्रा वार्यमाणोऽपि पर्यटन् शकटं शठः । उपरिष्टात्तदान्धाहेरवाहयदनिष्टकृत् ॥१५९॥[1]
भग्नभोगा भुजङ्गी तु म्रियमाणातिदुःखतः । अकामनिर्जरायोगात् मानुष्यगतिमार्जयत् ॥१६०॥
मृत्वा श्वेताम्बिकापुर्यां वासवस्य महीपतेः । जाता वसुन्धरागर्भे[2] देवी नन्दयशा त्वियम् ॥१६१॥

अतः मुझे धिक्कार है। अन्तमें वह दुखी होता हुआ निर्नामकको लेकर राजा आदिके साथ वनमें गया ॥१४८॥ वहाँ एकान्तमें द्रुमषेण नामक मुनिराजको देखकर शङ्खने उनसे निर्नामकके पूर्वभव पूछे। मुनिराज अवधिज्ञानी थे अतः उसके भवान्तर इस प्रकार कहने लगे ॥१४९॥

गिरिनगर नामक नगरमें राजा चित्ररथ रहता था, उसकी कनकमालिनी नामकी गुणवती एवं सुन्दरी स्त्री थी ॥१५०॥ राजा चित्ररथ मांस खानेका बड़ा प्रेमी था, उसका एक अमृतरसायन नामका रसोइया था जो मांस पकाना बहुत अच्छा जानता था। उसकी कलासे प्रसन्न होकर राजाने उसे दश ग्रामोंका स्वामी बना दिया था ॥१५१॥ एक दिन राजाने सुधर्म नामक मुनिराजसे मांस खानेके दोष सुने जिससे प्रभावित होकर उसने राज्य-लक्ष्मीको मेघरथ नामक पुत्रके लिए सौंप दी और स्वयं मोक्ष प्राप्त करनेकी इच्छासे तीन सौ राजाओंके साथ दीक्षा धारण कर ली ॥१५२॥ नवीन राजा मेघरथ श्रावक बन गया इसलिए उसने मांस पकानेवाले रसोइयाको अपमानित कर केवल एक ग्रामका स्वामी कर दिया ॥१५३॥ इस घटनासे रसोइया बड़ा कुपित हुआ। उसने सोचा कि मेरे अपमानके कारण मांसका निषेध करनेवाले ये मुनि ही हैं इसलिए उसने कडुवी तूमड़ीका विषमय आहार देकर मुनिको प्राण रहित कर दिया ॥१५४॥ मुनिराजका समाधिमरण ऊर्जयन्तगिरिपर हुआ था। प्रबल आत्मध्यानके प्रभावसे वे मरकर अपराजित नामक अनुत्तर विमानमें बत्तीस सागरकी आयुके धारक अहमिन्द्र हुए ॥१५५॥ रसोइया मरकर तीसरी बालुकाप्रभा पृथिवीमें गया और वहाँ तीन सागर तक नरकके तीव्र दुःख भोगता रहा ॥१५६॥ वहाँसे निकलकर तिर्यञ्च गति रूपी महा अटवीमें भ्रमण करता रहा। एक बार वह मलय देशके अन्तर्गत पलाश नामक ग्राममें रहनेवाले यक्षदत्त और यक्षिला नामक दम्पतीके यक्षलिक नामका पुत्र हुआ। यह यक्षलिक स्वभावसे ही मूर्ख था। और यक्षस्व नामक बड़े भाईसे छोटा था ॥१५७-१५८॥ एक बार दुष्ट यक्षलिक गाड़ीपर बैठा कहीं जा रहा था। सामने मार्गमें एक अन्धी सर्पिणी पड़ी थी। बड़े भाईके रोकनेपर अनिष्टकारी यक्षलिकने उसपर गाड़ी चला दी जिससे उसका फण कट गया। तीव्र दुःखसे वह मरणोन्मुख हो गई उसी समय अकामनिर्जराके कारण उसने मनुष्यगतिका बन्ध कर लिया ॥१५९-१६०॥ तदनन्तर सर्पिणी मरकर श्वेताम्बिका पुरीमें वहाँके राजा वासवकी स्त्री वसुन्धराके गर्भमें यह नन्दयशा

१. उपरिष्टात्ततो ग्राहे म०, ख०, ग० । २. वसुन्धरी गर्भे-म० ।

सौर्ये यत्त्वलिको नाम्ना निर्नामा मुनिमारणात् । निर्दयत्वाच्च पूर्वत्र मात्रा विद्वेषतां गतः ॥१६२॥
श्रुत्वा तद्द्विशतचक्रैः राजा संसारभीरुधीः । देवनन्दे श्रियं न्यस्य तस्यान्ते दीक्षितो मुनेः ॥१६३॥
राजपुत्राश्च ते सर्वे श्रेष्ठी शङ्खश्च दीक्षितः । सुनिर्मलं तपश्चक्रुर्भवचक्रनिवृत्तये ॥१६४॥
राज्ञी चापि सधात्रीका बन्धुमत्या सहाश्रिता । प्रव्रज्यां सुव्रतार्यान्ते सुव्रतव्रातभूषिताम् ॥१६५॥
कुर्वन्निर्नामकस्तीव्रं सिंहनिःक्रीडितं तपः । निदानमकरोदन्यजनने जनकान्तताम्[1] ॥१६६॥
धात्री मानुष्यकं प्राप्ता पुरे भद्रिलसाह्वये । सुदृष्टिश्रेष्ठिनो भार्या वर्तते ह्यलकाभिधा ॥१६७॥
गङ्गाद्या देवकीगर्भे षडपि द्वन्द्वभाविनः । उत्पत्स्यन्ते क्रमणैव[2] विक्रमैकमहार्णवाः ॥१६८॥
हारिणा स्वर्गिणा धात्रीं सुत्रामादेशकारिणा । प्राप्स्यन्ते जातिमात्रेण[3] तत्राप्स्यन्ति च यौवनम् ॥१६९॥
नृपदत्तोऽग्रजस्तेषां देवपालस्तथाऽपरः । तृतीयोऽनीकदत्तस्तु तुरीयोऽनीकपालकः ॥१७०॥
[4]शत्रुघ्नो जितशत्रुस्ताविति नामभिरीरिताः । रूपेण सदृशाः सर्वे भविष्यन्ति तवात्मजाः ॥१७१॥
हरिवंशशशाङ्कस्य जिनस्य त्रिजगद्गुरोः । शिष्यतां ते करिष्यन्ति गमिष्यन्ति च निर्वृतिम् ॥१७२॥
आगत्य देवकीगर्भे निर्नामा सप्तमः[5] सुतः । उत्पद्य भविता वीरो वासुदेवोऽत्र भारते ॥१७३॥

शार्दूलविक्रीडितम्

श्रुत्वा कंसभवान्तरं तदुदयं सञ्चिन्त्य पुण्योदयात्
सोपेक्षान्तरमित्रतामुपगतोऽप्यत्राभवत्कालवित् ।

नामकी पुत्री हुई ॥१६१॥ और यत्त्वलिक निर्नामक हुआ, इस यत्त्वलिकने रसोइयाकी पर्यायमें मुनिराजको मारा था तथा सर्पिणीके साथ अत्यन्त निर्दयताका व्यवहार किया था इसलिए माता नन्दयशाके साथ विद्वेषको प्राप्त हुआ है ॥१६२॥ यह सुनकर राजा गङ्गदेव संसारसे भयभीत हो गया और अपने देवनन्द नामक पुत्रको राज्यलक्ष्मी सौंपकर दो सौ राजाओंके साथ उन्हीं मुनिके समीप उसने दीक्षा धारण कर ली ॥१६३॥ समस्त राजपुत्रों और श्रेष्ठिपुत्र शङ्खने भी दीक्षा ले ली तथा सब, संसार चक्रसे निवृत्त होनेके लिए निर्मल तप करने लगे ॥१६४॥ रानी नन्दयशाने रेवती धाय और बन्धुमती सेठानीके साथ सुव्रता नामक आर्यिकाके समीप उत्तम व्रतोंके समूहसे सुशोभित दीक्षा धारण कर ली ॥१६५॥ निर्नामकने मुनि होकर सिंहनिष्क्रीडित नामक कठिन तप किया था और यह निदान बाँध लिया कि मैं जन्मान्तरमें नारायण होऊँ ॥१६६॥ रेवती धाय मनुष्य पर्याय प्राप्त कर भद्रिलसा नगरमें सुदृष्टि नामक सेठकी अलका नामकी स्त्री हुई है ॥१६७॥ गङ्ग आदि छह पुत्रोंके जीव युगलिया रूपसे देवकीके गर्भमें क्रम-क्रमसे उत्पन्न होंगे और वे पराक्रमके महासागर—अत्यन्त पराक्रमी होंगे ॥१६८॥ इन्द्रका आज्ञाकारी हारी नामका देव उन पुत्रोंको उत्पन्न होते ही धायके जीव अलकाके पास पहुँचा देगा वहीं वे यौवनको प्राप्त करेंगे ॥१६९॥ उन पुत्रोंमें बड़ा पुत्र नृपदत्त, दूसरा देवपाल, तीसरा अनीकदत्त, चौथा अनीकपालक, पाँचवाँ शत्रुघ्न और छठवाँ जितशत्रु नामसे प्रसिद्ध होगा। तुम्हारे ये सभी पुत्र रूपसे अत्यन्त सदृश होंगे अर्थात् समान रूपके धारक होंगे ॥१७०-१७१॥ ये सभी कुमार हरिवंशके चन्द्रमा, तीन जगत्के गुरु श्री नेमिनाथ भगवान्की शिष्यताको प्राप्त कर मोक्ष जावेंगे ॥१७२॥ निर्नामकका जीव देवकीके गर्भमें आकर सातवाँ पुत्र होगा। वह अत्यन्त वीर होगा तथा इस भरत क्षेत्रमें नौवाँ नारायण होगा ॥१७३॥ जिनमतकी लक्ष्मीकी प्रशंसा करनेवाले कालज्ञ वसुदेव, मुनिराजके मुखसे कंसके भवान्तर तथा पुण्यके उदयसे प्राप्त हुए उसके अभ्युदयको सुनकर उसके साथ उपेक्षा पूर्ण मित्रताको प्राप्त हुए अर्थात् उन्होंने मित्रता

---

१. जनानां मध्ये कान्ततां मनोज्ञताम् (क० टि०) जनकान्तिकम् म०, ग०, ङ०, ख० ।
२. क्रमेणैक-म० । ३. यातमात्रेण म०, क० । ४. शत्रुघ्न-म० । ५. देवकीसुतः म० ।

आकर्ण्याष्टसुतप्रियासुचरितं चामुत्र चेहात्र च
प्राप्तः सम्मदमुन्नतं जिनमतश्रीशंसनो यादवः ॥१७४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कंसोपाख्यानबलदेववासुदेव-
देवकीतनयागारचरितवर्णनो नाम त्रयस्त्रिंशः सर्गः ॥३३॥

तो पूर्ववत् बनाये रक्खी परन्तु उसमें उपेक्षाका भाव आ गया। वे अपने आठों पुत्र तथा प्रिया देवकीके पूर्वभव एवं वर्तमान भव सम्बन्धी चरितको सुनकर अत्यधिक हर्षको प्राप्त हुए ॥१७४॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें कंसका
उपाख्यान तथा बलदेव, वासुदेव और देवकीके अन्य पुत्रोंके गृह चरितका वर्णन
करनेवाला तैंतीसवाँ सर्ग समाप्त हुआ ॥३३॥

चतुस्त्रिंशः सर्गः

स्ववंशभाविनं श्रुत्वा जिनेन्द्रं देवकीप्रियः । हृष्टः श्रेणिक ! नत्वेति पृष्टवानतिमुक्तकम् ॥१॥
कथं नाथ ! जिनो भावी हरिवंशविशेषकः । चरितं श्रोतुमिच्छामि तस्येत्युक्तेऽवदन्मुनिः ॥२॥
द्वीपेऽत्रैव सुपद्मायां शीतोदायास्त्वपाक्तटे[1] । अभूत् सिंहपुरे भूभृदर्हद्दासो महाहितः ॥३॥
जायाऽस्य जिनदत्ताऽसौ कृतोरुजिनपूजना । लेभे श्रीभमृगेन्द्रार्कचन्द्रसुस्वप्नदृक् सुतम् ॥४॥
अपराजित इत्याख्यां स परैरपराजितः । पितृभ्यां लम्भितो द्यावापृथिव्योः प्रथितस्ततः ॥५॥
पुत्रीं चक्रभृतस्तत्र पवित्रगुणमालिनीम् । कन्यां प्रीतिमतीं मान्यामुपयेमे स यौवने ॥६॥
तमन्योऽन्यातिशायिन्यो मानिन्यो गुणमण्डनाः । कन्याश्चारीरमन् धन्याः[3] सहस्रगणनाः पतिम् ॥७॥
राजा मनोहरोद्याने वन्द्यं देवैर्विवन्दिषुः । अन्येद्युः ससुतो यातो जिनं विमलवाहनम् ॥८॥
प्रवव्राज नृपोऽस्यान्ते पञ्चराजशतान्वितः । बभ्रेऽपराजितो राज्यं सम्यक्त्वं चैव निर्मलम् ॥९॥
जिनेन्द्रपितृनिर्वाणं गन्धमादनपर्वते । श्रुत्वा कृत्वाऽष्टमं भक्तं कृतनिर्वाणभक्तिकः ॥१०॥
जिनार्चां चैत्यगेहार्चां समर्च्य धनदार्पिताम् । आसीनो जातु जायाभ्यो धर्मं सप्रोषधोऽवदत्[4] ॥११॥

अथानन्तर गौतम स्वामी कहते हैं कि हे श्रेणिक ! 'तीर्थंकर भगवान् अपने वंशमें उत्पन्न होने वाले हैं' यह सुनकर कुमार वसुदेव बहुत ही हर्षित हुए और उन्होंने उसी समय अतिमुक्तक मुनिराज को नमस्कार कर इस प्रकार पूछा कि 'हे नाथ । हरिवंश के तिलक स्वरूप जिनेन्द्र भगवान् किस प्रकार होंगे ? मैं उनका चरित सुनना चाहता हूँ ।' कुमार वसुदेवके इस प्रकार कहने पर अतिमुक्तक मुनिराज कहने लगे ॥१-२॥

इसी जम्बूद्वीपके विदेह क्षेत्रमें शीतोदा नदीके दक्षिण तटपर सुपद्मा नामका देश है। उसमें सिंहपुर नामका नगर है। और उसमें किसी समय राजा अर्हद्दास रहता था जो अत्यन्त योग्य था ॥३॥ जिनेन्द्र भगवान् की महा पूजा करने वाली जिनदत्ता उसकी स्त्री थी। एक बार उसने लक्ष्मी, हाथी, सिंह, सूर्य और चन्द्रमा ये पाँच शुभ स्वप्न देखनेके वाद उत्तम पुत्र प्राप्त किया ॥४॥ चूँकि वह पुत्र दूसरोंके द्वारा कभी पराजित नहीं होता था इसलिए माता-पिताने उसका 'अपराजित' नाम रक्खा । अपराजित आकाश और पृथिवी दोनोंमें ही अत्यन्त प्रसिद्ध था ॥५॥ यौवन काल आनेपर अपराजितने चक्रवर्ती की पवित्र गुणों की मालासे सहित, प्रीतिमती नामकी माननीय कन्याके साथ विवाह किया ॥ ६ ॥ इसके सिवाय जो परस्पर एक दूसरे की शोभाका उल्लङ्घन कर रही थीं, माननीय थीं एवं गुण रूपी आभूषणोंसे सुशोभित थीं ऐसी सौभाग्यशालिनी एक हजार कन्याएँ उसे और भी क्रीड़ा कराती थीं ॥ ७ ॥ किसी एक दिन राजा अर्हद्दास, मनोहर नामक वनमें देवोंके द्वारा वन्दनीय विमलवाहन भगवान् की वन्दना करनेके लिए अपने पुत्र सहित गया ॥ ८ ॥ उपदेशसे प्रभावित होकर राजा अर्हद्दासने पाँच सौ राजाओंके साथ उन्हीं भगवान्के समीप दीक्षा ली । पिताके दीक्षा लेनेके बाद युवराज अपराजितने राज्य एवं निर्मल सम्यग्दर्शन धारण किया ॥९॥ एक दिन अपराजितने सुना कि गन्धमादन पर्वतपर जिनेन्द्र विमलवाहन और पिता अर्हद्दासको मोक्ष प्राप्त हो गया है । यह सुनकर उसने तीन दिनका उपवासकर निर्वाण भक्ति की ॥१०॥

एक बार राज अपराजित, कुबेरके द्वारा समर्पित जिन-प्रतिमा एवं चैत्यालयमें विराजमान अर्हत्प्रतिमा की पूजाकर उपवासका नियम ले मन्दिरमें बैठा हुआ अपनी स्त्रियोंके लिए

१. दक्षिणतटे । २. शयिनो क०, ख०, म० । ३. चारीरमद्धन्याः म० । ४. प्रोषधोऽब्रुधत् म० । प्रौषधोऽब्रुवत् ख०, ग०, घ०, ङ० ।

काले तत्र मुनी व्योम्नश्चारणाववतेरतुः । नत्वा चितौ सुखासीनौ पप्रच्छेति कृताञ्जलिः ॥१२॥
तोषः साधुषु मे नाथौ ! जैनस्याकृत्रिमो युवाम् । अपूर्वो वीच्य किं जातः सहजस्नेहवर्त्मनः ॥१३॥
अस्ति तत्पूर्वसम्बन्धः स्नेहाधिक्यप्रबोधनः । राजन्नित्याह तत्राद्यः स्त्रवन्निव गिरामृतम् ॥१४॥
पाश्चात्यपुष्कराद्धस्य विदेहस्यापरस्य हि । रौप्याद्रेरुत्तरश्रेण्यामस्ति गण्यपुरं पुरम् ॥१५॥
सूर्याभो[1] विभुरस्यासासीत्सूर्याभ इति भूपतिः । धारिणी धारिणीवार्या गृहिणी तस्य हारिणी[2] ॥१६॥
पुत्रास्त्रयस्तयोश्चिन्तामनश्चपलपूर्वकाः । गत्यन्ता वेगवन्तस्ते स्नेहवन्तः सुपौरुषाः ॥१७॥
तत्रैवारिञ्जयो राजा पुरेऽरिञ्जयसंज्ञके । कन्याऽस्याजितसेनायां जाता प्रीतिमती वरा ॥१८॥
सिद्धविद्या प्रसिद्धाऽसौ स्त्रैणगर्हणकारिणी । गुरुं प्राह वरं देहि पितरेकमभीप्सितम् ॥१९॥
कन्याकूतविदूचे स वृणीष्व वरमीप्सितम् । तपसोऽन्यमितीदं च श्रुत्वाऽह प्रीतिमत्यपि ॥२०॥
तपो वरप्रसादो मे पितर्यदि न दीयते । गतियुद्धे विजेत्रेऽहं देयेत्येष वरोऽस्तु मे ॥२१॥
तथाऽस्त्वित्यभिधायासावाजुहाव नभश्चरान्[3] । स्वयंवरे स्वकन्याया गतियुद्धजिगीषया ॥२२॥
विश्वान् विद्याधरान् प्राप्तान् प्राह कन्यापिता ततः । गतियुद्धं[4] समर्थोऽस्या ददातु दुहितुर्मम ॥२३॥
मेरुं प्रदक्षिणीकृत्य कृत्वा जिनवरार्चनम् । प्राप्तस्येह द्वयोः पूर्वमेकस्य विजयो मतः ॥२४॥

धर्मोपदेश कर रहा था ॥११॥ कि उसी समय दो चारणऋद्धिधारी मुनिराज आकाशसे नीचे उतरे। जब दोनों मुनिराज पृथ्वीतलपर सुखसे विराजमान हो गये तब राजा अपराजितने हाथ जोड़ नमस्कार कर उनसे इस प्रकार पूछा—॥१२॥

हे नाथ ! वैसे तो जैनधर्मके साधुओंको देखकर मुझे अकृत्रिम—स्वाभाविक आनन्द होता ही है परन्तु आप दोनोंके दर्शन कर आज अपूर्व ही आनन्द हो रहा है तथा मेरा स्वाभाविक स्नेह उमड़ पड़ा है सो इसका कारण क्या है ? ॥१३॥ उन मुनियोंमें जो बड़े मुनि थे वे अपनी वाणीसे अमृत झराते हुए के समान बोले कि हे राजन् ! पूर्वभवका सम्बन्ध ही स्नेहकी अधिकताको प्रकट करनेवाला है। मैं पूर्वभवका सम्बन्ध कहता हूँ सो सुनो—॥१४॥

पश्चिम पुष्करार्धके पश्चिम विदेह क्षेत्रमें जो रूप्याचल है उसकी उत्तर श्रेणीमें एक गण्यपुर नामका नगर है ॥१५॥ उस नगरका स्वामी सूर्याभ था जो सचमुच ही सूर्याभ-सूर्यके समान आभा वाला था और धारिणी उसकी स्त्री थी जो दूसरी धारिणी—पृथिवीके समान जान पड़ती थी और आर्य तथा अत्यन्त सुन्दरी थी ॥१६॥ उन दोनोंके चिन्तागति, मनोगति और चपलगति नामके तीन पुत्र थे। जो अतिशय वेगशाली, स्नेहवान् और उत्तम पराक्रमसे मुक्त थे ॥१७॥ उसी समय अरिञ्जयपुरमें राजा अरिञ्जय रहता था उसकी अजितसेना नामकी स्त्री थी और उससे उसके प्रीतिमती नामकी उत्तम कन्या उत्पन्न हुई थी ॥१८॥ प्रीतिमतीको अनेक विद्याएँ सिद्ध थीं, वह अत्यन्त प्रसिद्ध थी और स्त्री पर्यायकी सदा निन्दा करती रहती थी। एक दिन उसने अपने पितासे कहा कि हे पिताजी ! मुझे एक इच्छित वर दीजिए ॥१९॥ पिता कन्याके भावको जानता था इसलिए उसने कहा कि तपके सिवाय और जो कुछ वर तुझे इष्ट हो सो माँग ले। पिताका उत्तर सुनकर प्रीतिमतीने कहा कि हे पिताजी ! यदि तप करनेका वर आप नहीं देते हैं तो यह वर मुझे अवश्य दीजिये कि गति युद्धमें जीतने वालेके लिए ही मैं दी जाऊँ ॥२०-२१॥ 'तथास्तु' कहकर पिताने कन्याका वर स्वीकृत कर लिया और गतियुद्धमें जीतनेकी इच्छासे अपनी कन्याका स्वयंवर रचकर उसमें विद्याधरोंको आमन्त्रित किया ॥ २२ ॥ तदनन्तर जब सब विद्याधर आगये तब कन्याके पिताने सबको लक्ष्य बनाते हुए कहा कि आप लोगोंमें जो भी समर्थ हो वह मेरी पुत्रीके लिए गतियुद्धका अवसर देवे ॥ २३ ॥ गतियुद्धका रूप यह है कि वर और कन्या जो भी, मेरु पर्वतकी

---

१. सूर्याभवतु—म० (?) । २. मनोहारिणी । ३. नभश्चरं म० । ४. गतियुद्धे म० ।

जीयेत येन कन्येयं गतियुद्धेऽतिवेगिना । परिणेया तेन वीरेण मन्मनोरथपूरिणा ॥२५॥
मेचकं वस्त्रयुगलं मालां च मुकुटं गदाम्। लाङ्गलं मुसलं चापं सशरं शरधिद्वयम् ॥३६॥
रथं दिव्यास्त्रसंपूर्णमुच्चैस्तालध्वजोर्जितम्। कुबेरः कामपालाय[3] ददौ छत्रादिभिः सह ॥३७॥
भ्रातरोऽपि दशार्हास्ते वस्त्राभरणपूर्वकैः। सम्प्राप्तपूजनास्तेन भोजाद्याश्च नृपाः कृताः ॥३८॥
तीर्थकृत्पुनरन्यूनैर्वयोयोग्यैः सुवस्तुभिः। प्राज्यैः पूजनमेवासौ किं तत्र बहुवर्णनैः ॥३९॥
प्रविशन्तु पुरीं सर्वे भवन्त इति रैपतिः[4]। तानुक्त्वा पूर्णभद्रं च सन्दिश्यान्तर्हितः क्षणात् ॥४०॥
ततो यादवसङ्घास्तावभिषिच्याम्बुधेस्तटे। जयशब्देन संघुष्य हृष्टा हलगदाधरौ ॥४१॥
विविशुर्द्वारिकां भूत्या चतुरङ्गबलान्विताः। सप्रजाः कृतपुण्यास्ते प्राप्तां दिवमिव स्वयम् ॥४२॥
पूर्णभद्रोपदिष्टेषु भद्रेषु भवनेष्वसी। [5]यथायथं सुखं तस्थुः प्रजाश्च निजसंस्थया ॥४३॥

आश्रय कर चारों ओर सुशोभित हो रही थीं ॥२८॥ अन्तःपुरके घरोंकी पंक्तियोंसे घिरा एवं वापिका तथा बगीचा आदिसे विभूषित बलदेवका भवन सुशोभित हो रहा था ॥२९॥ बलदेव के महलके आगे एक सभामण्डप सुशोभित था जो इन्द्रके सभामण्डपके समान था और अपनी दीप्तिसे सूर्यकी किरणोंका खण्डन करनेवाला था ॥३०॥ उस नगरीमें उग्रसेन आदि सभी राजाओंके योग्य महलोंकी पंक्तियाँ सुशोभित थीं जो आठ-आठ खण्डकी थीं ॥३१॥ जिसका वर्णन करना शक्य नहीं था तथा जो अनेक द्वारोंसे युक्त थी ऐसी सुन्दर नगरीकी रचना कर कुबेरने श्रीकृष्णसे निवेदन किया अर्थात् नगरी रची जानेकी सूचना श्रीकृष्णको दी ॥३२॥ उसी समय कुबेरने श्रीकृष्णके लिए मुकुट, उत्तम हार, कौस्तुभमणि, दो पीत-वस्त्र, लोकमें अत्यन्त दुर्लभ नक्षत्रमाला आदि आभूषण, कुमुद्वती नामकी गदा, शक्ति, नन्दक नाम का खड्ग, शार्ङ्ग नामका धनुष, दो तरकश, वज्रमय बाण, सब प्रकारके शस्त्रोंसे युक्त एवं गरुड की ध्वजासे युक्त दिव्य रथ, चमर और श्वेत छत्र प्रदान किये ॥३३-३५॥ साथ ही बलदेवके लिए दो नील-वस्त्र, माला, मुकुट, गदा, हल, मुसल, धनुष-बाणोंसे युक्त दो तरकश, दिव्य अस्त्रोंसे परिपूर्ण एवं तालकी ऊँची ध्वजासे सबल रथ और छत्र आदि दिये ॥३६-३७॥ समुद्र-विजय आदि दसों भाई तथा भोज आदि राजाओंका भी कुबेरने वस्त्र, आभरण आदिके द्वारा खूब सत्कार किया ॥३८॥ श्री नेमिनाथ तीर्थंकर अपनी अवस्थाके योग्य उत्तमोत्तम वस्तुओंके द्वारा पूजाको प्राप्त हुए ही थे। इस विषयका अधिक वर्णन करनेसे क्या प्रयोजन है? ॥३९॥ 'आप सब लोग नगरीमें प्रवेश करें' इस प्रकार सबसे कहकर और पूर्णभद्र नामक यक्षको संदेश देकर कुबेर क्षणभरमें अन्तर्हित हो गया ॥४०॥

तदनन्तर यादवोंके संघने समुद्रके तटपर श्रीकृष्ण और बलदेवका अभिषेक कर हर्षित हो उनकी जयजयकार घोषित की ॥४१॥ तत्पश्चात् जिन्होंने पुण्यका संचय किया था ऐसे श्रीकृष्ण आदिने चतुरङ्ग सेना और समस्त प्रजाके साथ, प्राप्त हुए स्वर्गके समान उस द्वारिकापुरीमें बड़े वैभवसे प्रवेश किया ॥४२॥ पूर्णभद्र यक्षके द्वारा बतलाये हुए मङ्गलमय भवनोंमें प्रजाके सब लोग अपने परिवारके साथ यथायोग्य सुखसे ठहर गये ॥४३॥

---

१. अष्टखगाः (ग० टि०)। २. कुबेरः। ३. बलभद्राय। ४. कुबेरः। ५. यथा स्वेच्छं म०।

माथुराः सौर्यजा[1] [2]वीर्यपुरपौराः पुरा यथा। यथास्वं [3]कृतसंकेतसंनिवेशा ययुर्धृतिम् ॥४४॥
पुर्यामर्धचतुर्थानि दिनानि धनदाज्ञया। यक्षा ववृषुरक्षीणधनधान्यादि धामसु ॥४५॥
तत्र स्थितस्य कृष्णस्य प्रतापेन वशीकृताः। अपरान्तिकभूपालाः शासनं प्रतिपेदिरे ॥४६॥
बहुराजसहस्राणां तनयाः स सहस्रशः। परिणीय ततो रेमे यथेष्टं द्वारिकापतिः ॥४७॥
तत्र नेमिकुमारोऽपि कुमार इव चन्द्रमाः। संवर्धते स्म निःशेषकलानिलयविग्रहः ॥४८॥
दशार्हवदनाम्भोजविकासकरणोदयः। बालभानुर्बभासेऽसौ ज्योतिर्धूततमस्तरः ॥४९॥
रामदामोदरानन्दं प्रत्यहं प्रतिवर्धयन्। चकार क्रीडितं बाल्ये पौरनेत्रमनोहरम् ॥५०॥
समस्तयदुपत्नीनां करात्करमितस्ततः। अलंकुर्वन्नलंरूपी स ययौ यौवनोदयम् ॥५१॥
प्रव्यक्तलक्षणे तत्र यूनि श्यामाम्बुजेक्षणे। विश्रान्तदृष्टिमन्यत्र नेतुं शेकुर्न योषितः ॥५२॥
जिनरूपशरो दूराज्जगतो हृदयस्थलीम्। बिभेद न पुनर्जैनीं पररूपशरायतिः ॥५३॥
नोपमा जिनरूपस्य नोपमेयं क्षितौ यतः। उपमानोपमेयार्थं खिद्यते स्म हरिस्ततः ॥५४॥
स्वान्तरङ्गजनैर्जातु क्रियमाणासु केलिषु। स्वविवाहकथास्वीशः स्मेरास्यो लज्जते स्वयम् ॥५५॥
बोधत्रयाम्बुनिर्धूतमोहनीयकलङ्कजम्। न तस्य भूतिधूलीभिर्धूसरीकृतमान्तरम् ॥५६॥

मथुरा, सूर्यपुर और वीर्यपुरके निवासी लोग अपने-अपने मोहल्लोंके पूर्व जैसे ही नाम रख कर यथा योग्य संतोषको प्राप्त हुए ॥४४॥ कुबेरकी आज्ञासे यक्षोंने इस नगरीके समस्त भवनों में साढ़े तीन दिन तक अटूट धन-धान्यादिकी वर्षा की थी ॥४५॥ जब श्रीकृष्ण वहाँ रहने लगे तब उनके प्रतापसे वशीभूत हो पश्चिमके राजा उनकी आज्ञा मानने लगे ॥४६॥ तदनन्तर द्वारिकापुरीके स्वामी श्रीकृष्ण अनेक राजाओंकी हजारों कन्याओंके साथ विवाह कर वहाँ इच्छानुसार क्रीड़ा करने लगे ॥४७॥

जिनका शरीर समस्त कलाओंका स्थान था ऐसे नेमिकुमार भी वहाँ बालचन्द्रमाके समान दिनों-दिन बढ़ने लगे ॥४८॥ जिनका उदय यादवोंके मुख-कमलको विकसित करने वाला था, एवं जिन्होंने अपनी ज्योतिसे अन्धकारके समूहको नष्ट कर दिया ऐसे नेमिकुमार रूपी बालसूर्य अत्यधिक सुशोभित हो रहे थे ॥४९॥ प्रतिदिन बलभद्र और श्रीकृष्णके आनन्द को बढ़ाते हुए नेमिकुमार बाल्य अवस्थामें नगरनिवासी लोगोंके नेत्र और मनको हरण करनेवाली क्रीड़ा करते थे ॥५०॥ अतिशय रूपके धारक भगवान् नेमिनाथ जहाँ-तहाँ समस्त यादवोंकी स्त्रियोंके एक हाथसे दूसरे हाथको सुशोभित करते हुए यौवन अवस्थाको प्राप्त हुए ॥५१॥ जिनके शरीरमें अनेक शुभ लक्षण प्रकट थे, तथा जिनके नेत्र नील कमलके समान थे ऐसे युवा नेमिकुमारपर लगी दृष्टिको स्त्रियाँ दूसरी जगह ले जानेमें समर्थ न हो सकीं ॥५२॥ भगवान्के रूपरूपी बाणने दूरसे ही जगत्के जीवोंकी हृदयस्थलीको भेद दिया था परन्तु उनकी हृदयस्थलीको दूसरोंका रूपरूपी बाणोंका समूह नहीं भेद सका था। भावार्थ—यौवन प्रकट होनेपर भी भगवान्के हृदयमें कामकी बाधा उत्पन्न नहीं हुई थी ॥५३॥ चूँकि पृथिवीतलपर भगवान्के रूपकी न उपमा थी और न उपमेय ही था इसलिए भगवान्के रूपके विषयमें उपमान और उपमेयके लिए इन्द्रको खेदखिन्न होना पड़ा ॥५४॥ क्रीड़ाओंके समय अपने कुटुम्बी जनोंके द्वारा अपने विवाहकी चर्चा की जानेपर नेमिजिनेन्द्र मन्द-मन्द मुसकराते हुए स्वयं लज्जित हो उठते थे ॥५५॥ तीन ज्ञान रूपी जलके द्वारा जिसके भीतरका मोहरूपी कलङ्क धुल गया था ऐसा भगवान्का अन्तःकरण वैभवरूपी धूलिसे धूसर नहीं हुआ ॥५६॥

---

१. सौरजा म०, ग०। २. वीरपुर म०, ग०। ३. पूर्वपूर्वस्वनाम्ना (ग० टि०)।

शालिनीच्छन्दः

[1]जैनैर्वा[2]र्ष्णैर्वै[3]ष्णवैर्बाल[4]भद्रैश्चन्द्रालोकप्राकटैः सद्गुणौघैः ।
[5]स्पृष्टात्यर्थं हृष्टलोकोर्मिराभाद्वेलेवाब्धेर्द्वारिका द्वारकान्ता[6] ॥५७॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ द्वारवतीनिवेशवर्णनो नाम एकचत्वारिंशः सर्गः ॥४१॥

गौतम स्वामी कहते हैं कि जो नेमिजिनेन्द्र, भोजक वृष्णि, कृष्ण और बलभद्रके उत्तम गुणोंके समूहरूपी प्रकट चाँदनीसे स्पृष्ट थी, जिसमें हर्षसे भरे लोग तरङ्गोंके समान उछल रहे थे तथा जो द्वारोंसे सुन्दर थी ऐसी द्वारिकापुरी समुद्रकी वेलाके समान अत्यधिक सुशोभित हो रही थी ॥ ५७ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेमाचार्य रचित हरिवंश पुराणमें द्वारिकापुरीका वर्णन करनेवाला इकतालीसवाँ सर्ग समाप्त हुआ ॥ ४१ ॥

---

१. नेमिजिनसम्बन्धिभिः । २. वृष्णीनामिमे वार्ष्णास्तैः । ३. विष्णोरिमे वैष्णवास्तैः श्रीकृष्णसम्बन्धिभिः । ४. बलभद्रस्येमे बालभद्रास्तैः । ५. स्पष्टात्यर्थं म० । ६. द्वारैः कान्ता मनोहरा ।

द्वाचत्वारिंशः सर्गः

अथ सभ्यसमाकीर्णामन्यदा यादवीं सभाम् । आजगाम नभोगामी नारदो नभसो मुनिः ॥१॥
आपिशङ्गजटाभारश्मश्रुकूर्चः शशिद्युतिः । विद्युद्वलयविद्योतिशारदाम्बुधरोपमः ॥२॥
विचित्रवर्णविस्तीर्णयोगपट्टविभूषितः । परिवेषवतो बिभ्रद्दौषधीशस्य विभ्रमम् ॥३॥
[1]चलद्दुकूलकौपीनपरिधानपरिच्युतः[1]। दिवोऽनुग्रहबुद्ध्येव जगतः कल्पपादपः ॥४॥
देहस्थितेन शुद्धेन त्रिगुणेनोज्ज्वलीकृतः । यज्ञोपवीतसूत्रेण स रत्नत्रितयेन वा ॥५॥
असाधारणरूपेण गौरवाधानहेतुना । नैष्ठिकब्रह्मचर्येण पाण्डित्येनेव मण्डितः ॥६॥
शुद्धप्रकृतिरत्यन्तमरिषड्वर्गवर्जितः । राज्योदय इवोदारो राजलोकस्य पूजितः ॥७॥
द्वारिकाविभवालोकस्वशिरःकम्पविग्रहम् । तेऽवतीर्णं तमालोक्य सहसोत्थाय पार्थिवाः[2] ॥८॥
नमस्यासनदानादि सोपचारेण सक्रमम् । पूजयन्ति स्म सन्मानमात्रेण परितोषिणम् ॥९॥
जिनकृष्णबलालोकसंभाषणसुखामृतम् । पीत्वाप्यतृप्तनेत्रस्तमध्यतिष्ठत्सभार्णवम् ॥१०॥
पूर्वापरविदेहानां जिनेन्द्राणां कथामृतैः । समेरुवन्दनोदन्तैर्मनोऽमीषामतर्पयत् ॥११॥

अथानन्तर किसी समय आकाशमें गमन करनेवाले नारद मुनि आकाशसे उतर कर सभासदोंसे भरी हुई यादवोंकी सभामें आये ॥१॥ उन नारदजीकी जटाएँ दाढ़ी और मूँछ कुछ-कुछ पीले रङ्गकी थीं तथा वे स्वयं चन्द्रमाके समान शुक्ल कान्तिके धारक थे इसलिए बिजलियोंके समूहसे सुशोभित शरद् ऋतुके मेघके समान जान पड़ते थे ॥२॥ वे रङ्ग-बिरङ्गे एक विस्तृत योगपट्टसे विभूषित थे इसलिए परिवेष (मण्डल) से युक्त चन्द्रमाकी शोभा धारण कर रहे थे ॥३॥ उनका कौपीन और चद्दर हवासे मन्द-मन्द हिल रहा था इसलिए वे उनसे ऐसे जान पड़ते थे मानो जगत्का उपकार करनेकी इच्छासे आकाशसे कल्प वृक्ष ही नीचे आ गिरा हो ॥४॥ वे अपने शरीरपर स्थित तीन लरके उस शुद्ध यज्ञोपवीत सूत्रसे अत्यन्त उज्ज्वल थे जो सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्र इन तीन गुणोंके समान जान पड़ता था ॥५॥ वे जिस प्रकार असाधारण पाण्डित्यसे सुशोभित थे उसी प्रकार गौरवकी उत्पत्तिके असाधारण कारण रूप नैष्ठिक ब्रह्मचर्यसे सुशोभित थे ॥६॥ वे राजाओंके उत्कृष्ट राज्योदयके समान समस्त राजाओंके पूजनीय थे क्योंकि जिस प्रकार राज्योदय शुद्धप्रकृति अर्थात् भ्रष्टाचार-रहित मन्त्री आदि प्रकृतिसे सहित होता है उसी प्रकार नारद भी शुद्धप्रकृति अर्थात् निर्दोष स्वभावके धारक थे और राज्योदय जिस प्रकार शत्रुओंके षड्वर्गसे रहित होता है उसी प्रकार नारद भी काम, क्रोध, लोभ, मोह, मद और मात्सर्य इन छह अन्तरङ्ग शत्रुओंसे रहित थे ॥७॥ द्वारिकाका वैभव देख, आश्चर्यसे जिनका शिर तथा शरीर कंपित हो रहा था ऐसे नारदजीको आकाशसे नीचे उतरते देख सब राजा लोग सहसा उठ कर खड़े हो गये ॥८॥ सम्मान मात्रसे संतुष्ट हो जाने वाले नारदजीको सबने नमस्कार तथा आसन-दान आदि उपचारोंसे क्रमपूर्वक सम्मान किया ॥९॥ श्रीनेमि जिनेन्द्र, कृष्ण नारायण और बलभद्रके दर्शन तथा संभाषणसे उत्पन्न सुखरूपी अमृतका पान करके भी जिनके नेत्र तृप्त नहीं हुए थे ऐसे नारद मुनि सभा रूप सागरके मध्यमें अधिष्ठित हुए—विराजमान हुए ॥ ९-१० ॥ तत्पश्चात् नारदने

---

१. चलद्दुकूलकौपीनपरिधानपरिच्युतः ग०, घ०, ङ०, म० । २. पार्थिवः म० ।

प्रस्तावेऽत्र गणिज्येष्ठं श्रेणिकोऽपृच्छदित्यसौ । क एष नारदो नाथ ! कुतो वाऽस्य समुद्भवः ॥१२॥
गण्युवाच वचो गण्यः शृणु श्रेणिक मण्यते । उत्पत्तिरन्त्यदेहस्य[1] नारदस्य स्थितिस्तथा ॥१३॥
आसीत्सौर्यपुरस्यान्ते दक्षिणे तापसाश्रमः । वसन्ति तापसास्तस्मिन् फलमूलादिवृत्तयः ॥१४॥
सुमित्रस्तापसस्तत्र स सोमयशसि स्त्रियाम् । उञ्छवृत्तिः शशिच्छायं पुत्रमेकमजीजनत् ॥१५॥
तमुत्तानशयं यावत्तौ संस्थाय तरोरधः । उञ्छवृत्त्यर्थमायातौ नगरं क्षुत्पिपासितौ ॥१६॥
संक्रीडमानमेकान्ते तावत्तं जृम्भकामराः । दृष्ट्वा पूर्वभवस्नेहान्नीत्वा वैताड्यपर्वतम् ॥१७॥
मणिकाञ्चनसंज्ञायां गुहायां तत्र तं शिशुम् । कल्पवृक्षसमुद्भूतैर्दिव्याहारैरवर्द्धयन् ॥१८॥
स्वेष्टाय तेऽष्टवर्षाय सरहस्यं जिनागमम् । देवास्तस्मै ददुस्तुष्टा विद्यां चाकाशगामिनीम् ॥१९॥
नारदो बहुविद्योऽसौ नानाशास्त्रविशारदः । संयमासंयमं लेभे साधुः साधुनिषेवया ॥२०॥
कन्दर्पस्य विजेतापि कन्दर्पनिभविभ्रमः । [2]सकन्दर्पप्रियो हासलीलोऽभूल्लोभवर्जितः ॥२१॥
अन्त्यदेहः प्रकृत्यैव निःकषायोऽप्यसौ क्षितौ । रणप्रेक्षाप्रियः प्रायो जातो जल्पाकभास्करः[3] ॥२२॥
जिनजन्माभिषेकादिमहातिशयदर्शने । कुतूहलितया लोकं परिभ्रमति विभ्रमी ॥२३॥

पूर्व-पश्चिम विदेह क्षेत्रमें उत्पन्न तीर्थङ्करोंकी कथा रूप अमृतसे तथा मेरु पर्वतकी वन्दनाके समाचारोंसे उन सबके मनको सन्तुष्ट किया ॥११॥

इसी अवसरमें राजा श्रेणिकने गौतम गणधरसे पूछा कि हे नाथ ! यह नारद कौन है ? और इसकी उत्पत्ति किससे हुई है ? इसके उत्तरमें पूज्य गणधर देव कहने लगे कि हे श्रेणिक ! चरमशरीरी नारदकी उत्पत्ति तथा स्थिति कहता हूँ सो श्रवण कर ॥१२-१३॥

सौर्यपुरके पास दक्षिण दिशामें एक तापसोंका आश्रम था उसमें फल-मूल आदिका भोजन करनेवाले अनेक तापस रहते थे॥ १४ ॥ वहाँ उञ्छ वृत्तिसे आजीविका करनेवाले एक सुमित्र नामक तापसने अपनी सोमयशा नामक स्त्रीमें चन्द्रमाके समान कान्तिवाला एक पुत्र उत्पन्न किया ॥१५॥ भूख और प्याससे पीडित सुमित्र और सोमयशा, दोनों दम्पती चित्त सोनेवाले उस बच्चेको एक वृक्षके नीचे रखकर उञ्छ वृत्तिके लिए जब तक नगरमें आये तब तक एकान्तमें क्रीड़ा करते हुए उस बालकको देखकर जृम्भक नामक देव पूर्वभवके स्नेहसे उठाकर वैताड्यपर्वतपर ले गये। वहाँ उन्होंने मणिकाञ्चन नामक गुहामें उस बालकको रखकर कल्प वृक्षोंसे उत्पन्न दिव्य आहारसे उसका पालन-पोषण किया ॥१६-१८॥ वह बालक देवोंको बहुत ही इष्ट था इसलिए जब वह आठ वर्षका हुआ तब उन्होंने सन्तुष्ट होकर उसे रहस्यसहित जिनागम और आकाशगामिनी विद्या प्रदान की ॥१९॥ वही नारदके नामसे प्रसिद्ध हुआ। नारद अनेक विद्याओंका ज्ञाता तथा नाना शास्त्रोंमें निपुण था। वह साधुके वेषमें रहता था तथा साधुओंकी सेवासे उसने संयमासंयम—देशव्रत प्राप्त किया था। वह कामको जीतनेवाला होकर भी कामके समान विभ्रमको धारण करता था, कामी मनुष्योंको प्रिय था, हास्य रूप स्वभावसे युक्त था, लोभसे रहित था, चरमशरीरी था, यद्यपि स्वभावसे ही निष्कषाय था तथापि पृथ्वीमें युद्ध देखना उसे बहुत प्रिय था, अधिकतर वह अधिक बोलनेवालोंमें शिरोमणि था, और जिनेन्द्र भगवान्‌के जन्माभिषेक आदि महान् अतिशयोंके देखनेका कुतूहली होनेसे विभ्रमपूर्वक लोकमें परिभ्रमण करता रहता था॥ २०-२३ ॥

---

१. चरमशरीरस्य (ग० टि०, म० टि०)। नारदस्य चरमशरीरत्वमाम्नायविरुद्धमस्ति अतः 'अन्त्यदेहस्य' स्थाने 'अत्यदेहस्य' इति पाठो योजनीयः। न विद्यते देहो यस्य सोऽदेहः कामः, तमतिक्रान्त इत्यदेहस्तस्य, कामवाधारहितस्येति तदर्थः। एवं २२ तमे श्लोकेऽपि अन्त्यदेहः' इत्यस्य स्थाने 'अत्यदेहः' इति पाठो योजनीयः (प० ला०)। २. कन्दर्पेण सह वर्तन्ते इति सकन्दर्पास्तेषां प्रियः (ग० टि०)। ३. वाचालभानुः (ग० टि०)।

स एष नारदो राजन् परिपृच्छय यदूत्तमान् । केशवान्तःपुरं द्रष्टुं प्रविष्टोऽन्तःपुरालयम् ॥२४॥
तत्र विष्णोर्महादेवीं प्राणेभ्योऽपि गरीयसीम् । धृतप्रसाधनां साध्वीं करस्थे मणिदर्पणे ॥२५॥
प्रेक्षमाणां निजं रूपं सत्यभामां विदूरतः । अद्राक्षीन्नारदः साक्षाद् दृष्टेरतिमिव स्थिताम् ॥२६॥
स्वरूपालोकनाक्षिप्तचेतसा सत्यया यतिः । न दृष्टः सहसा रुष्टो निर्जगाम ततो द्रुतम् ॥२७॥
दध्याविति स लोकेऽस्मिन् सविद्याधरभूचराः । मामुत्थाय नमस्यन्ति राज्ञामन्तःपुरस्त्रियः ॥२८॥
सत्यभामा त्वियं रूपमदगर्वितमानसा । धिग् मां नालोकतेऽस्मापि धृष्टा विद्याधरात्मजा ॥२९॥
तदस्या रूपसौभाग्यगर्वपर्वतचूरणम् । प्रतिपक्षवधूवज्रसंपातेन[1] करोम्यहम् ॥३०॥
रूपसौभाग्यतो ह्यन्यां सत्यभामातिशातिनीम् । हरिर्लघु लभेत् कन्यां बहुरत्ना वसुन्धरा ॥३१॥
ततः पश्यामि भामाया निश्वासश्याममाननम् । कुतोऽनर्थविमोक्षः स्यात् कुपिते मयि नारदे ॥३२॥
इति ध्यायन् खमुत्पत्य कुण्डिनाख्यमयात्पुरम् । यत्र भीष्मो नृपस्तिष्ठत्यरिभीष्मो महान्वयः ॥३३॥
रुक्मीति तनयस्तस्य नयपौरुषपोषणः । रुक्मिणी च शुभा कन्या कलागुणविशारदा ॥३४॥
तां ददर्श च शुद्धान्ते शुद्धान्तःकरणः श्रिताम् । पितृस्वस्त्रानुरागिण्या सन्ध्ययेवोदयश्रियम् ॥३५॥
सौलक्षण्यं च सौरूप्यं सौभाग्यं त्रिजगद्गतम् । गृहीत्वेव हरे पुण्यैः परमैस्तां विनिर्मिताम् ॥३६॥
पाणिपादमुखाम्भोजजङ्घोरुजघनश्रिया । रोमराजिभुजानाभिकुचोदरतनुत्विषा ॥३७॥

हे राजन् ! यह वही नारद, यादवोंसे पूछकर श्रीकृष्णका अन्तःपुर देखनेके लिए अन्तःपुरके महलमें प्रविष्ट हुआ ॥२४॥ उस समय कृष्णकी महादेवी सत्यभामा, जो उन्हें प्राणोंसे भी अधिक प्रिय थी, आभूषणादि धारणकर हाथमें स्थित मणिमय दर्पणमें अपना रूप देख रही थी। नारदने उस साध्वीको दूरसे ही देखा। वह उनकी दृष्टिके सामने साक्षात् रतिके समान जान पड़ती थी। अपना रूप देखनेमें जिसका चित्त उलझा हुआ था ऐसी सत्यभामा नारदको न देख सकी इसलिए वह सहसा रुष्ट हो वहाँसे शीघ्र ही बाहर निकल आये ॥२५–२७॥ बाहर आकर वह विचार करने लगे कि इस संसारमें समस्त विद्याधर और भूमिगोचरी राजा तथा उनके अन्तःपुरोंकी स्त्रियाँ उठकर मुझे नमस्कार करती हैं परन्तु यह विद्याधरकी लड़की सत्यभामा इतनी ढीठ है कि इसने सौन्दर्यके मदसे गर्वितचित्त हो मेरी ओर देखा भी नहीं अतः इसे धिक्कार है ॥२८–२९॥ अब मैं सपत्नी रूपी वज्रपातके द्वारा इसके सौन्दर्य, सौभाग्य और गर्वरूपी पर्वतको अभी हाल चूर-चूर करता हूँ ॥३०॥ रूप और सौभाग्यमें सत्यभामाको अतिक्रान्त करने वाली अन्य कन्याको श्री कृष्ण शीघ्र ही प्राप्त कर सकते हैं क्योंकि यह पृथ्वी अनेक रत्नोंसे युक्त है। सपत्नीके आनेपर मैं सत्यभामाके मुखको श्वासोच्छ्वाससे मलिन देखूँगा। मुझ नारदके कुपित होनेपर इसका अनर्थसे छुटकारा कैसे हो सकता है ? ॥३१–३२॥ इस प्रकार विचार करते हुए नारद आकाशमें उड़कर उस कुण्डिनपुरमें जा पहुँचे, जहाँ शत्रुओंके लिए भयंकर महाकुलीन राजा भीष्म रहते थे ॥ ३३ ॥ उनके नीति और पौरुषको पुष्ट करनेवाला रुक्मी नामका पुत्र था तथा कला और गुणोंमें निपुण रुक्मिणी नामकी एक शुभ कन्या थी ॥ ३४ ॥ निर्मल अन्तःकरणके धारक नारदने, राजा भीष्मके अन्तःपुरमें, अनुराग—प्रेमको धारण करनेवाली फुआसे युक्त उस रुक्मिणी नामक कन्याको देखा जो अनुराग—लालिमाको धारण करनेवाली सन्ध्यासे युक्त सूर्यकी उदयकालीन लक्ष्मीके समान जान पड़ती थी ॥ ३५ ॥ वह कन्या ऐसी जान पड़ती थी मानो तीनों जगत्के उत्तम लक्षण, उत्तम रूप और उत्तम भाग्यको लेकर नारायण-कृष्णके उत्कृष्ट पुण्यके द्वारा ही रची गयी हो ॥ ३६ ॥ वह कन्या अपने हाथ, पैर, मुख, कमल, जङ्घा और स्थूल नितम्बकी शोभासे,

---

१. सन्तापेन म०, ग० ।

भ्रूकर्णाक्षिशिरःकण्ठघोणाधरपुटाभया[1] । अभिभूयोपमाः सर्वाः स्थितां जगति तां पराम् ॥३८॥
दृष्ट्वाऽसौ विस्मितो दध्यौ दृष्टानेकाङ्गनोत्तमः । अहो रूपस्य पर्यन्ते कन्येयं वर्त्तते भुवि ॥३९॥
संयोज्य हरिणा कन्यामनन्यसदृशीमिमाम् । भनज्मि सत्यभामाया रूपसौभाग्यदुर्मदम् ॥४०॥
इति ध्यायन्तमायातं नारदं वीक्ष्य रुक्मिणी । अभ्युत्तस्थौ रणद्भूषा स्वभावविनयैकभूः ॥४१॥
साञ्जलिः प्रणनामासौ प्रत्युपेत्य तमादरात् । द्वारिकापतिपत्याप्त्या[2] सोऽभ्यनन्दयदानताम् ॥४२॥
प्रश्नितेन तया तेन द्वारावत्या विकीर्त्तने । कृतेऽनुरागिणी कृष्णे रुक्मिणी नितरामभूत् ॥४३॥
कृष्णं भीष्मसुताचित्तभित्तौ नारदचित्रकृत् । वर्णरूपवयोविद्धं विलिख्य बहिरुद्ययौ ॥४४॥
विलिख्य पट्टके स्पष्टं रुक्मिण्या रूपमद्भुतम् । हरयेऽदर्शयद्गत्वा चित्तसंमोहकारणम् ॥४५॥
दृष्ट्वा चित्रगतां कन्यां श्यामां स्त्रीलक्षणाञ्चिताम् । पप्रच्छ हरिरित्येवं द्विगुणादरसंगतः ॥४६॥
कस्येयं भगवन् ! कन्या विचित्रा पट्टके त्वया । दुष्करं मानुषीं क्षिप्त्वा[3] विचित्रासुरकन्यका ॥४७॥
इति पृष्टोऽवदत्सोऽस्मै यथावृत्तमवञ्चकः । श्रुत्वा सौरिरपि प्राप्तश्चिन्तां कन्याकरग्रहे ॥४८॥
काले पितृष्वसा तस्मिन्नेकान्ते हितकाम्यया । रुक्मिणीमित्यभाषिष्ट सर्ववृत्तान्तवेदिनी ॥४९॥
आकर्णय वचो बाले कदाचिदतिमुक्तकः । दिव्यचक्षुरिहायातस्त्वां दृष्ट्वाऽवददित्यसौ ॥५०॥

रोमराजि, भुजा, नाभि, स्तन, उदर तथा शरीरकी कान्तिसे, भौंह, कान, नेत्र, शिर, कण्ठ, नाक और अधरोष्ठकी आभासे संसारकी समस्त उपमाओंको अभिभूत-तिरस्कृत कर उत्कृष्ट-रूपसे स्थित थी ॥ ३७-३८ ॥ अनेक उत्तमोत्तम स्त्रियोंको देखनेवाले नारद उस कन्याको देखकर आश्चर्यमें पड़ गये तथा इस प्रकार विचार करने लगे कि 'अहो ! यह कन्या तो पृथिवीपर रूपकी चरम सीमामें विद्यमान है—सबसे अधिक रूपवती है ॥ ३९ ॥ जो अपनी सानी नहीं रखती ऐसी इस कन्याको कृष्णके साथ मिलाकर मैं सत्यभामाके रूप तथा सौभाग्य-सम्बन्धी दुष्ट अहङ्कारको अभी हाल खण्डित किये देता हूँ' ॥ ४० ॥

इस प्रकार विचार करते हुए नारदको आये देख, शब्दायमान भूषणोंसे युक्त तथा स्वाभाविक विनयकी भूमि रुक्मिणी उठकर खड़ी हो गयी ॥ ४१ ॥ उसने हाथ जोड़कर बड़े आदरसे सम्मुख जाकर नारदको प्रणाम किया तथा नारदने भी 'द्वारिकाके स्वामी तुम्हारे पति हों' इस आशीर्वादसे उस नम्रीभूत कन्याको प्रसन्न किया ॥ ४२ ॥ उसके पूछनेपर जब नारदने द्वारिकाका वर्णन किया तब वह कृष्णमें अत्यन्त अनुरक्त हो गयी ॥ ४३ ॥ अन्तमें नारदरूपी चित्रकार, रुक्मिणीके हृदयकी दीवालपर वर्ण रूप तथा अवस्थासे युक्त कृष्णका चित्र खींचकर बाहर चले गये ॥ ४४ ॥

बाहर आकर नारदने रुक्मिणीका आश्चर्यकारी रूप स्पष्टरूपसे चित्रपर लिखा और चित्तमें विभ्रम उत्पन्न करनेवाला वह रूप उन्होंने जाकर श्रीकृष्णके लिए दिखाया ॥ ४५ ॥ नवयौवनवती तथा स्त्रियोंके लक्षणोंसे युक्त उस चित्रगत कन्याको देखकर कृष्णने दुगुने आदरसे युक्त हो नारदसे इस प्रकार पूछा कि हे भगवन् ! यह किसकी विचित्र कन्या आपने चित्रपटपर अङ्कित की है ? यह तो मानुषीका तिरस्कार करनेवाली कोई विचित्र देव-कन्या जान पड़ती है ॥ ४६-४७ ॥ कृष्णके इस प्रकार पूछनेपर छल-रहित नारदने सब समाचार ज्योंका-त्यों सुना दिया तथा उसे सुनकर कृष्ण उसके साथ विवाह करनेकी चिन्ता करने लगे ॥ ४८ ॥

उधर सब समाचारको जाननेवाली फुआने हितकी इच्छासे एकान्तमें ले जाकर योग्य समयमें रुक्मिणीसे इस प्रकार कहा कि हे बाले ! तू मेरे वचन सुन । किसी समय अवधि-ज्ञानके धारक अतिमुक्तक मुनि यहाँ आये थे । उन्होंने तुझे देखकर कहा था कि 'यह कन्या

१. पुटोभया म० । २. द्वारिकापतिरेव पतिस्तस्याप्तिः प्राप्तिस्तया । ३. क्षिप्ता म० ।

स्त्रीलक्षणवती लक्ष्मीरिव वक्षःस्थलाश्रिता । बालेयं वासुदेवस्य भविष्यति भविष्यतः ॥५१॥
षोडशानां सहस्राणां विष्णोः स्त्रीगुणसंयुजाम् । अन्तरन्तःपुरस्त्रीणां प्रभुत्वमियमेष्यति ॥५२॥
इत्यादिश्य तदा यातः सिद्धादेशो महामुनिः । कथा चान्तर्हिता विष्णोः कियन्तंचिदनेहसम् ॥५३॥
पुनर्जन्मकथेवेयं नारदेन कथा कृता । यदि सत्यमिदं सर्वं सत्यं वेद्मि मुनेर्वचः ॥५४॥
त्वं पुनः शिशुपालाय बाले ! बान्धवतां युजे । सुप्रभुत्वभृता भ्रात्रा रुक्मिणा[1] किल दीयसे[2] ॥५५॥
विवाहसमयस्तेऽपि प्रत्यासन्नस्तु वर्तते । अद्य श्वो वा त्वदर्थं च शिशुपालः किलैष्यति ॥५६॥
विदर्भपतिपुत्री तन्निशम्य वचनं जगौ । कथमस्य मुनेर्वाक्यमन्यथा भवति क्षितौ ॥५७॥
तन्मदीयमभिप्रायं कथञ्चिदपि सत्त्वरम् । द्वारिकापतये यत्नात् प्रापयेति स मत्प्रियः ॥५८॥
इति श्रुत्वा मनो ज्ञात्वा कन्यकायाः पितृष्वसा । विससर्ज रहस्येनं लेखमाप्तेन सत्वरम् ॥५९॥
त्वन्नामग्रहणाहारप्रीणितप्राणधारिणी । हरे ! कांक्षति ते रक्ता रुक्मिणी हरणं त्वया ॥६०॥
शुक्लाष्टम्यां हि माघस्य यदि माधव ! रुक्मिणीम् । त्वमेत्य हरसि क्षिप्रं तवेयमविसंशयम् ॥६१॥
अन्यथा तु वितीर्णायाश्चैधाय गुरुबान्धवैः । त्वदलाभे भवेदस्याः शरणं मरणं हरे ! ॥६२॥
नागवल्यपदेशेन बाह्योद्यानस्थितामिमाम् । तदवश्यं त्वमागत्य स्वीकुरुष्व कृपापरः ॥६३॥
लेखार्थमिति तत्त्वार्थमधिगम्य स माधवः । सावधानमनास्तस्थौ रुक्मिणीहरणं प्रति ॥६४॥

स्त्रियोंके उत्तम लक्षणोंसे युक्त है अतः लक्ष्मीके समान होनहार नारायण श्रीकृष्णके वक्षःस्थलका आलिङ्गन प्राप्त करेगी। कृष्णके अन्तःपुरमें स्त्रियोंके योग्य गुणोंसे युक्त सोलह हजार रानियाँ होंगी उन सबमें यह प्रभुत्वको प्राप्त होगी—उन सबमें प्रधान बनेगी।' इस प्रकार कहकर अमोघवादी मुनिराज उस समय चले गये और कुछ समय तक कृष्णकी चर्चा अन्तर्हित रही आयी। परन्तु आज नारदने पुनर्जन्मकी कथाके समान यह कथा पुनः उठायी है। यदि यह सब सत्य है तो मैं समझती हूँ कि मुनिराजके उक्त वचन सत्य ही निकलेंगे। परन्तु हे बाले! विचारणीय बात यह है कि तेरा भाई रुक्मी जो अत्यधिक प्रभावको धारण करनेवाला है वह तुझे बन्धुपनेको धारण करनेवाले शिशुपालके लिए दे रहा है। तेरे विवाहका समय भी निकट है और आज-कलमें तेरे लिए शिशुपाल यहाँ आनेवाला है ॥ ४९–५६ ॥

फुआके ऐसे वचन सुन रुक्मिणीने कहा कि मुनिराजके वचन पृथिवीपर अन्यथा कैसे हो सकते हैं ॥ ५७ ॥ इसलिए आप मेरे अभिप्रायको किसी तरह शीघ्र ही प्रयत्न कर द्वारिकापतिके पास भेज दीजिए। वही मेरे पति होंगे ॥ ५८ ॥ कन्याके यह वचन सुनकर तथा उसका अभिप्राय जानकर फुआने शीघ्र ही एक विश्वासपात्र आदमीके द्वारा गुप्त रूपसे यह लेख श्रीकृष्णके पास भेज दिया ॥ ५९ ॥ लेखमें लिखा था कि हे कृष्ण! रुक्मिणी आपमें अनुरक्त है तथा आपके नामग्रहणरूपी आहारसे सन्तुष्ट हो प्राण धारण कर रही है। यह आपके द्वारा अपना हरण चाहती है। हे माधव! यदि माघ शुक्ला अष्टमीके दिन आप आकर शीघ्र ही रुक्मिणीका हरण कर ले जाते हैं तो निःसन्देह यह आपकी होगी। अन्यथा पिता और बान्धवजनोंके द्वारा यह शिशुपालके लिए दे दी जायेगी और उस दशामें आपकी प्राप्ति न होनेसे मरना ही इसे शरण रह जायेगा अर्थात् यह आत्म-घातकर मर जायेगी। यह नागदेवकी पूजाके बहाने आपको नगरके बाह्य उद्यानमें स्थित मिलेगी सो आप दयालु हो अवश्य ही आकर इसे स्वीकृत करें ॥ ६०-६३ ॥ इस प्रकार लेखके यथार्थ भावको ज्ञातकर कृष्ण, रुक्मिणीका हरण करनेके लिए सावधानचित्त हो गये ॥ ६४ ॥

१. रुक्मिणी म० । २. दीयते म० ।

कन्यादानकृतारम्भविदर्भेश्वरवाक्यतः । चेदीनामीश्वरः[1] प्राप्तो वैदर्भपुरमादरात् ॥६५॥
बलेन महता तस्य चतुरङ्गेण रागिणा । [2]मण्डिताशान्तरं जातं कुण्डिनं नगरं तदा ॥६६॥
इतश्चावसरज्ञेन नारदेन रहस्यरम् । चोदितो हरिरप्याप्तो गूढवृत्तः सहाग्रजः ॥६७॥
दत्तनागवलिः कन्या पुरोपवनवर्त्तिनी । पितृष्वस्रादिभिर्युक्ता माधवेन निरीक्षिता ॥६८॥
श्रुतीन्धनसमृद्धोऽनुरागबन्धहुताशनः । अतिवृद्धिं तदा प्राप्तस्तयो[3]र्दर्शनवायुना ॥६९॥
कृतोचितकथस्तत्र रुक्मिणीमाह माधवः । त्वदर्थमागतं भद्रे ! विद्धि मां हृदयस्थितम् ॥७०॥
सत्यं यदि मयि प्रेम त्वया बद्धमनुत्तरम् । तदेहि रथमारोह मन्मनोरथपूरणि ॥७१॥
पितृष्वस्राऽपि साऽवाचि योऽतिमुक्तकभाषितः । स एव तव कल्याणि वरः[4] पुण्यैरिहाहृतः ॥७२॥
यत्रापि पितरौ भद्रे ! दातारौ दुहितुर्मतौ । तत्राऽपि विधिपूर्वौ तौ ततो ज्येष्ठो विधिर्गुरुः ॥७३॥
सानुरक्तां त्रपायुक्तां श्रीमत्यास्तनयां[5] ततः । रथमारोपयद्दोर्भ्यामुत्क्षिप्यामीलितेक्षणः ॥७४॥
निर्वाहकस्तयोरासी[6]त्तदान्योन्यसुखावहः । सर्वाङ्गीणस्तनुस्पर्शः प्रथमो मन्मथार्त्तयोः ॥७५॥
सुगन्धिमुखनिश्वासस्तयोरन्योन्ययोगतः । वास्यवासकभावस्थो वशीकरणतामगात् ॥७६॥
विमुखीकृतचैद्येन सम्मुखीकृतविष्णुना । विधिनैकेन रुक्मिण्यास्तत्कल्याणमनुष्ठितम् ॥७७॥

इधर कन्यादानकी तैयारी करनेवाले विदर्भेश्वर—राजा भीष्मके कहे अनुसार शिशुपाल आदरके साथ कुण्डिनपुर जा पहुँचा ॥ ६५ ॥ उस समय उसकी रागसे युक्त बहुत भारी चतुरङ्गिणी सेनासे कुण्डिनपुरके दिग्दिगन्त सुशोभित हो उठे ॥ ६६ ॥ इधर अवसरको जाननेवाले नारदने शीघ्र ही आकर एकान्तमें कृष्णको प्रेरित किया सो वे भी बड़े भाई बलदेवके साथ गुप्त रूपसे कुण्डिनपुर आ पहुँचे ॥ ६७ ॥ रुक्मिणी नागदेवकी पूजाकर फुआ आदिके साथ नगरके बाह्य उद्यानमें पहलेसे ही खड़ी थी सो कृष्णने उसे अच्छी तरह देखा ॥ ६८ ॥ उन दोनोंकी जो अनुरागरूपी अग्नि एक दूसरेके श्रवणमात्र ईंधनसे युक्त थी वह उस समय एक दूसरेको देखने रूप वायुसे अत्यन्त वृद्धिको प्राप्त हो गयी ॥ ६९ ॥ कृष्णने यथायोग्य चर्चा करनेके बाद वहाँ रुक्मिणीसे कहा कि 'हे भद्रे ! मैं तुम्हारे लिए ही आया हूँ और जो तुम्हारे हृदयमें स्थित है वही मैं हूँ ॥ ७० ॥ यदि सचमुच ही तूने मुझमें अपना अनुपम प्रेम लगा रखा है तो हे मेरे मनोरथोंको पूर्ण करनेवाली प्रिये ! आओ रथपर सवार होओ' ॥ ७१ ॥ फुआने भी रुक्मिणीसे कहा कि हे कल्याणि ! अतिमुक्तक मुनिने जो तुम्हारा पति कहा था वही यह तुम्हारे पुण्यके द्वारा खींचकर यहाँ लाया गया है ॥ ७२ ॥ हे भद्रे ! जहाँ माता-पिता पुत्रीके देनेवाले माने गये हैं वहाँ वे कर्मोंके अनुसार ही देनेवाले माने गये हैं इसलिए सबसे बड़ा गुरु कर्म ही है ॥ ७३ ॥

तदनन्तर जिनके नेत्र कुछ-कुछ निमीलित हो रहे थे ऐसे श्रीकृष्णने अनुराग और लज्जासे युक्त रुक्मिणीको अपनी दोनों भुजाओंसे उठाकर रथपर बैठा दिया ॥ ७४ ॥ कामकी व्यथासे पीडित उन दोनोंका जो सर्व-प्रथम सर्वाङ्गीण शरीरका स्पर्श हुआ था वह उन दोनोंके लिए परस्पर सुखका देनेवाला हुआ था ॥ ७५ ॥ उन दोनोंके मुखसे जो सुगन्धित श्वास निकल रहा था वह परस्पर मिलकर एक दूसरेको सुगन्धित कर रहा था तथा एक दूसरेको वशमें करनेके लिए वशीकरणमन्त्रपनेको प्राप्त हो रहा था ॥ ७६ ॥ रुक्मिणीका वह कल्याण, शिशुपालको विमुख और कृष्णको सम्मुख करनेवाले एक विधि—पुराकृत कर्मके द्वारा ही किया गया था। भावार्थ—रुक्मिणीका जो कृष्णके साथ संयोग हुआ था उसमें उसका पूर्वकृत कर्म ही प्रबल कारण था क्योंकि उसने पूर्वनिश्चित योजनाके साथ

१. शिशुपालः । २. शोभितदिगन्तरालम् । ३. कृष्णरुक्मिण्योः । ४. कल्याणवरः म० । ५. तनया म० । ६. –रासीदन्योन्य म० ।

रुक्मिणः शिशुपालस्य भीष्मस्य च हरिस्ततः । रुक्मिणीहरणोदन्तं दत्त्वा रथमचोदयत् ॥७८॥
पाञ्चजन्यमतो दध्मौ मुखरीकृतदिग्मुखम् । सुघोषं तु बलः शङ्खं चुक्षोभाखिलं ततः ॥७९॥
रुक्मी विदितवृत्तान्तः शिशुपालश्च सत्वरौ । धीरौ धीरौ परिप्राप्तौ रथिनौ रथिनौ प्रति ॥८०॥
रथैः षष्टिसहस्रैस्तैः करिणामयुतेन च । त्रिभिः शतसहस्रैश्च वाजिनां वायुरंहसाम् ॥८१॥
असिचक्रधनुःपाणिबहुलक्षपदातिभिः । ग्रसमानौ दिशो शेषा निकटत्वमुपागतौ ॥८२॥
अर्धासनसुखासीनां सान्त्वयन् भीष्मजां हरिः । ग्रामाकरसरःसिन्धूर्दर्शयन् प्रययौ शनैः ॥८३॥
अथ रौद्रं बलं प्राप्तमन्वीक्ष्य हरिणेक्षणा । रुक्मिण्युवाच भर्त्तारमपायपरिशङ्किनी ॥८४॥
भ्राता मे कुपितः प्राप्तः सम्प्रत्येष[1] महारथः । शिशुपालश्च तन्नाथ[2] न मन्ये स्वन्तमात्मनः ॥८५॥
युवयोः पृथुसेनाभ्यामाभ्यां जाते महारणे । विजयं प्रति संशीतिरहो मे मन्दभाग्यता ॥८६॥
ब्रुवाणामिति तां शार्ङ्गी मा भैषीर्मृदुमानसे । बहुत्वेन किमन्येषां मयि सत्त्ववति स्थिते ॥८७॥
[3]इत्युक्त्वाऽसौ क्षुरप्रेण क्षिप्रमप्राकृतास्त्रवित् । अयत्नेनैव चिच्छेद तालवृक्षं पुरःस्थितम् ॥८८॥
अङ्गुलीयकनद्धं च वज्रं सञ्चूर्ण्य पाणिना । तस्याः सन्देहमामूलं चिच्छेद यदुनन्दनः ॥८९॥
ततः सा प्राञ्जलिः प्राह प्रियसामर्थ्यवेदिनी । नाथ ! यत्नेन मे भ्राता रक्षणीयस्त्वयाहवे ॥९०॥

आये हुए शिशुपालको विमुख कर दिया था और अनायास आये हुए श्रीकृष्णको सम्मुख कर दिया था ॥ ७७ ॥

तदनन्तर श्रीकृष्णने रुक्मिणीके भाई रुक्मी, शिशुपाल और भीष्मको रुक्मिणीके हरणका समाचार देकर अपना रथ आगे बढ़ा दिया ॥ ७८ ॥ उसी समय श्रीकृष्णने दिशाओंको मुखरित करनेवाला अपना पाञ्चजन्य और बलदेवने अपना सुघोष नामका शङ्ख फूँका जिससे शत्रुकी सेना क्षोभयुक्त हो गयी ॥ ७९ ॥ समाचार मिलते ही रुक्मी और शिशुपाल दोनों धीर-वीर, बड़ी शीघ्रतासे रथोंपर सवार हो, धीर-वीर एवं रथोंपर सवार होकर जाने वाले कृष्ण और बलदेवका सामना करनेके लिए पहुँचे ॥८०॥ साठ हजार रथों, दश हजार हाथियों, वायुके समान वेगशाली तीन लाख घोड़ों और खड्ग, चक्र, धनुष, हाथमें लिये कई लाख पैदल सिपाहियोंके द्वारा शेष दिशाओंको ग्रस्त करते हुए वे दोनों वीर निकटताको प्राप्त हुए ॥८१-८२॥ इधर अर्धासनपर बैठी रुक्मिणीको सान्त्वना देते एवं ग्राम, खानें, सरोवर तथा नदियोंको दिखाते हुए श्रीकृष्ण धीरे-धीरे जा रहे थे ॥८३॥

तदनन्तर भयंकर सेनाको आयी देख मृगनयनी रुक्मिणी अनिष्टकी आशङ्का करती हुई स्वामीसे बोली कि 'हे नाथ ! क्रोधसे युक्त यह मेरा भाई महारथी रुक्मी और शिशुपाल अभी हाल आ रहा है इसलिए मैं अपना भला नहीं समझती ॥८४-८५॥ विशाल सेनासे युक्त इन दोनोंके साथ एकाकी आप दोनोंका महायुद्ध होनेपर विजयमें सन्देह है । अहो ! मैं बड़ी मन्द भाग्यवती हूँ' ॥८६-८७॥ इस प्रकार कहती हुई रुक्मिणीसे श्रीकृष्णने कहा कि 'हे कोमल हृदये ! भयभीत न हो, मुझ पराक्रमीके रहते हुए दूसरोंकी संख्या बहुत होनेपर भी क्या हो सकता है ?' इस प्रकार कहकर असाधारण अस्त्रके जाननेवाले श्रीकृष्णने अपने बाणसे सामने खड़े हुए ताल-वृक्षको अनायास ही काट डाला ॥८८॥ और अँगूठीमें जड़े हुए हीराको हाथसे चूर्णकर उसके सन्देहको जड़-मूलसे नष्ट कर दिया ॥८९॥

तदनन्तर इन कार्योंसे पतिकी शक्तिको जाननेवाली रुक्मिणीने हाथ जोड़कर कहा कि

१. सम्प्रत्येव म० । २. सन्नाथ क० । ३. सप्ताशीतितमात् श्लोकादग्रे घ०, ग०, ङ०, म० पुस्तकेषु निम्नाङ्कितौ श्लोकौ अधिकावुपलभ्येते ।

तयोक्तं मुनिरादेशः सप्ततालानृजून् पुमान् । यश्छिनत्त्येकबाणेन स हरिर्नान्यथा शुभे ॥१॥
तद्वचः शौरिणा श्रुत्वा क्रमेणाक्रम्य तत्स्थिरम् । स चिच्छेद क्षुरप्रेणाप्यनृजुं तालमण्डलीम् ॥२॥

एवमस्त्विति सन्त्रस्तां सान्त्वयित्वा[1] प्रियां हरिः । न्यवर्त्तयद्रथं वेगादभ्यमित्रं[2] हली तथा ॥९१॥
रुष्टयोः शरजालेन द्विष्टसैन्यं ततोऽनयोः । श्लिष्टं ननाश विध्वस्तक्लिष्टदर्पमभिद्रुतम् ॥९२॥
[3]हरिणेव रणे रौद्रे हरिणा[4] दमघोषजः[5] । हलिना भीष्मजो राजा भीष्माकारः पुरस्कृतः ॥९३॥
द्वन्द्वयुद्धे[6] शिरस्तुङ्गं शिशुपालस्य पातितम् । विष्णुना यशसा साकं सायकेन विदूरतः ॥९४॥
हली जर्जरितं कृत्वा रथेन सह रुक्मिणम् । प्राणशेषमपाकृत्य कृती कृष्णयुतो ययौ ॥९५॥
रुक्मिणीं परिणीयासौ गिरौ रैवतके हरिः । विभूत्या परया तुष्टः सबन्धुरविशत् पुरीम् ॥९६॥
स्वं विवेश गृहं शीरी रेवतीदर्शनोत्सुकः । शार्ङ्गपाणिरपि प्रीतो नववध्वा युतो निजम् ॥९७॥

पृथिवीच्छन्दः

अनेकरथचक्रचूर्णि विजिगीषुतेजोहरं निरीक्ष्य शिशुपालघाति[7] चरितं हरेराहवे ।
वपुः स्वमुपसंहरन् करसहस्रतीक्ष्णोऽप्ययं गतोऽस्तगिरिगह्वरं ग्रहणशङ्कयेवांशुमान् ॥९८॥
अनेन घनरागिणा समनुवर्त्तिता रागिणी महोदयनिषेविणाप्यनुरतेन पूर्वं तु या ।
तयाऽस्तमितसम्पदं तमनुवृत्तया सन्ध्यया कुसुम्भकुसुमाभया तदनुरक्तता दर्शिता ॥९९॥

हे नाथ ! आपके द्वारा युद्धमें मेरा भाई यत्नपूर्वक रक्षणीय है अर्थात् उसकी आप अवश्य रक्षा कीजिए ॥९०॥ 'ऐसा ही होगा' इस प्रकार भयभीत प्रियाको सान्त्वना देकर श्रीकृष्ण तथा बलभद्रने बड़े वेगसे शत्रुकी ओर अपने रथ घुमा दिये ॥९१॥ तदनन्तर रोषसे भरे हुए इन दोनोंके बाणोंके समूहसे मुठभेड़को प्राप्त हुई शत्रुकी सेना चारों ओर भागकर नष्ट हो गयी तथा उसका सब अहंकार नष्ट-भ्रष्ट हो गया ॥९२॥ भयंकर युद्धमें सिंहके समान शूर-वीर कृष्णने शिशुपालको और बलदेवने भयंकर आकारको धारण करनेवाले भीष्मपुत्र राजा रुक्मीको सामने किया ॥९३॥ द्वन्द्व-युद्धमें श्रीकृष्णने अपने बाणके द्वारा यशके साथ-साथ शिशुपालका ऊँचा मस्तक दूर जा गिराया ॥९४॥ और बलदेवने रथके साथ-साथ रुक्मीको इतना जर्जर किया कि उसके प्राण ही शेष रह गये। तदनन्तर कुशल बलदेव कृष्णके साथ वहाँसे चल दिये ॥९५॥ रैवतक (गिरनार) पर्वतपर श्रीकृष्णने विधि-पूर्वक रुक्मिणीके साथ विवाह किया और उसके पश्चात् उत्कृष्ट विभूतिसे सन्तुष्ट हो भाई-बलदेवके साथ द्वारिकापुरीमें प्रवेश किया ॥९६॥ रेवतीके देखनेके लिए उत्सुक बलदेवने अपने महलमें प्रवेश किया और प्रीतिसे युक्त कृष्णने भी नववधूके साथ अपने महलमें प्रवेश किया ॥९७॥

तदनन्तर सूर्य अस्त होनेके सम्मुख हुआ सो ऐसा जान पड़ता था मानो युद्धमें अनेक रथोंके चक्रको चूर्ण करनेवाला, विजिगीषु राजाओंके तेजको हरनेवाला एवं शिशुपालका घात करनेवाला कृष्णका चरित देखकर वह अपने आपके पकड़े जानेकी आशङ्कासे भयभीत हो गया था इसीलिए तो हजार किरणोंसे तीक्ष्ण होनेपर भी वह अपने शरीरको संकुचितकर अस्ताचलकी गुफामें चला गया था ॥९८॥ प्रातःकालके समय राग (प्रेम-पक्षमें ललाई) से युक्त जिस सन्ध्याको सूर्यने महान् उदय (उदय-पक्षमें वैभव) के धारक होनेपर भी तीव्र राग (प्रेम-पक्षमें ललाई) से युक्त हो अपने बदलेके प्रेमसे अच्छी तरह अनुवर्तित किया था अर्थात् सन्ध्याको रागयुक्त देख अपने आपको भी रागयुक्त किया था उस सन्ध्याने अब सायंकालके समय कुसुम्भके फूलके समान लाल वर्ण हो किरणरूप सम्पत्तिके नष्ट हो जानेपर भी सूर्यके प्रति अपनी अनुरक्तता दिखलायी थी। भावार्थ—'सूर्यने महान् अभ्युदयसे

---

१. शान्तयित्वा म० । २. दस्य मित्रं म० । ३. सिंहेनेव । ४. कृष्णेन । ५. शिशुपालः । ६. द्वन्द्वयुक्ते म० । ७. घात—म०, ग० ।

ततोऽञ्जनमहारजोमलिनमूर्त्तिभिर्मोहनैः प्रभञ्जनवशैरिव प्रतिभयावहैरुद्धतैः ।
तमःपटलपातकैरभिपतद्भिरत्युन्मुखैः खलैरिव निरन्तरैर्जगदभिद्रुतं च द्रुतम् ॥१००॥
किरन्नमृतदीधितिर्बहुलमन्धकारं करैः तृषेव जनलोचनैः सपदि पीयमानस्ततः ।
जगन्मदनदीपनस्तपनजातसन्तापनुत् सुखाय सुखिनामपि[1] प्रकटमुज्जगामोदयम् ॥१०१॥
विकासमगमद् विधोः कुमुदिनी करामर्शनाज्जगत्यखिलजन्तुभिः सह निजप्रियाप्रोषितैः ।
तदा न खलु पद्मिनी विरहदीप्तचक्राह्वरहो यैप्रमदहेतवोऽपि सुखयन्ति नो दुःखितान् ॥१०२॥
प्रदोषसमये ततो मुषितमानिनीमानके प्रवृत्तवति दम्पतिप्रमदसम्पदापादने ।
सुधाधवलचन्द्रिकाधवलितेषु हर्म्येषु ते मनोज्ञवनितासखास्तु परिरेमिरे यादवाः ॥१०३॥
मुरारिरपि रुक्मिणीतनुलताद्विरेफस्तदा चिरं रमितया तयाऽरमत रम्यमूर्त्तिर्निशि ।
अशेत शयनस्थले मृदुनि गूढगूढाङ्गना[2] घनस्तनभुजानन[3] स्पर्शलब्धनिद्रासुखः ॥१०४॥
ततः प्रमितयामिनीनिखिलयामभेदा मदप्रसुप्तयदुकामिनीजनभियेव नीचोच्चकैः ।
क्रमेण पटुपक्षपातसुभगास्त्वकूजुः कलं क्षपाक्षयनिवेदिनो विविधचूडकाः कुक्कुटाः ॥१०५॥
तया प्रथमबुद्धया प्रथमसन्ध्ययेवोषसि प्रशस्तकरपद्मया विहितदेहसंवाहनः ।
विबुध्य हरिराश्रितां श्रियमिव व्यलोकिष्ट तां रतिव्यतिकरस्फुरत्परिमलां ह्रिया सन्नताम् ॥१०६॥

युक्त होनेपर भी मेरे प्रति राग धारण किया था इसलिए इस विपत्तिके समय मुझे भी इसके प्रति राग धारण करना चाहिए' यह विचारकर ही मानो सन्ध्याने सूर्यास्तके समय लालिमा धारण कर ली ॥९९॥ तदनन्तर अञ्जनकी महारजके समान काले, मोह उत्पन्न करनेवाले, प्रचण्ड पवनके समान भयंकर, उद्धत, सब ओर फैलनेवाले, उन्मुख एवं अन्तर-रहित अन्धकारके समूहरूपी पापोंसे जगत् शीघ्र ही ऐसा आच्छादित हो गया मानो दुर्जनोंसे ही व्याप्त हुआ हो ॥१००॥ तत्पश्चात् जो अपनी किरणोंसे गाढ़ अन्धकारको दूर हटा रहा था, मनुष्योंके नेत्र तृषासे पीड़ित होकर ही मानो जिसका शीघ्र पान कर रहे थे, जो जगत्के जीवोंको कामकी उत्तेजना करनेवाला था और जो सूर्यसे उत्पन्न हुए सन्तापको नष्ट कर रहा था ऐसा चन्द्रमा सुखी मनुष्योंके सुखको और भी अधिक बढ़ानेके लिए उदयको प्राप्त हुआ ॥१०१॥ उस समय जगत्में समस्त जीवोंके साथ-साथ, चन्द्रमाकी किरणोंके स्पर्शसे कुमिदिनी विकासको प्राप्त हुई और अपनी प्रियासे वियुक्त विरहसे देदीप्यमान चक्रवाकोंके साथ-साथ कमलिनी विकासको प्राप्त नहीं हुई सो ठीक ही है क्योंकि दुःखी मनुष्योंको हर्षके कारण सुख नहीं पहुँचा सकते ॥१०२॥ तदनन्तर मानवती स्त्रियोंके मानको हरनेवाले एवं दम्पतियोंको हर्षरूपी सम्पत्तिके प्राप्त करानेवाले प्रदोष कालके प्रवृत्त होनेपर वे यादव अपनी सुन्दर स्त्रियोंके साथ चूनाके समान उज्ज्वल चाँदनीसे शुभ्र महलोंमें क्रीड़ा करने लगे ॥१०३॥ जो रुक्मिणीके शरीररूपी लतापर भ्रमरके समान जान पड़ते थे ऐसे सुन्दर शरीरके धारक कृष्ण भी रात्रिके समय चिरकाल तक रमण की हुई रुक्मिणीके साथ क्रीड़ा करते रहे और क्रीड़ाके अनन्तर कोमल शय्यापर उसके गाढ़ आलिङ्गित स्थूल स्तन, भुजा और मुखके स्पर्शसे निद्रा सुखको प्राप्त कर सो रहे ॥१०४॥ तदनन्तर रात्रिके समस्त भेदोंको जाननेवाले, उत्तम पङ्खोंकी फड़फड़ाहटसे सुन्दर, रात्रिके अन्तकी सूचना देनेवाले और नाना प्रकारकी कलँगियोंसे युक्त मुर्गे पहले नीची और बादमें ऊँची ध्वनिसे सुन्दर बांग देने लगे सो उससे ऐसा जान पड़ता था मानो 'मदमें सोई हुई यदु स्त्रियाँ जाग न जाँय' इस भयसे ही वे एक साथ न चिल्लाकर क्रम-क्रमसे चिल्लाते थे ॥१०५॥ प्रातःकालमें प्रातः सन्ध्याके समान रुक्मिणी पहले जाग गयी और अपने उत्तम करकमलोंसे कृष्णका शरीर दबाने लगी। उसके कोमल हाथोंका स्पर्श पा श्रीकृष्ण

१. सखा सुमुखिनामपि म०, ग०, घ० । २. जघनस्तन ग० । ३. अत्र छन्दोभङ्गः ।

प्रभातपटहस्फुटध्वननशङ्खसंगीतकप्रघोषघनगर्जिताम्बुधिनिनादिनी द्वारिका ।
गृहं गृहमितोऽमुतो बुधितराजलोकाभवद् यथायथमनुष्ठितस्वकनियोगसर्वप्रजा ॥१०७॥
परैर्घटितमप्यतो विघटयन् पदार्थं झटित्युपेत्य [1]घटयन्परैर्विघटितं समर्थक्रियः ।
परं भुवनचक्षुरुज्ज्वलमनिद्रमभ्युद्ययौ यथा जिनवचःपथो विधिरिवाऽथ वा भानुमान् ॥१०८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ रुक्मिणीहरणवर्णनो नाम द्वाचत्वारिंशः सर्गः ॥ ४२ ॥

भी जाग गये और जागकर उन्होंने रतिक्रीड़ाके कारण जिसके शरीरसे सुगन्धि निकल रही थी तथा जो लज्जासे नम्रीभूत थी ऐसी रुक्मिणीको पासमें बैठी लक्ष्मीके समान देखा ॥१०६॥ उस समय द्वारिकापुरी प्रातःकालके नगाड़ोंके जोरदार शब्दों, शङ्खों, मधुर संगीतों और मेघोंकी उत्कट गर्जनाके समान समुद्रकी गम्भीर गर्जनाके शब्दोंसे गूँज उठी। इधर-उधर घर-घर राजा और प्रजाके लोग जाग उठे तथा यथायोग्य अपने-अपने कार्योंमें सब प्रजा लग गयी॥ १०७॥ तदनन्तर जो शीघ्र ही आकर दूसरोंके द्वारा संयोजित पदार्थको यहाँ से दूर हटा रहा था, तथा दूसरोंके द्वारा वियोजित पदार्थको मिला रहा था, अत्यन्त चतुर था, समर्थ था, जगत्का उज्ज्वल एवं जागृत रहनेवाला उत्कृष्ट नेत्र था, जो जिनेन्द्र भगवान्के वचनमार्गके समान था अथवा विधाताके समान था ऐसा सूर्य उदयको प्राप्त हुआ। भावार्थ—रात्रिके समय चन्द्रमा, ग्रह, नक्षत्र आदि कान्तिमान् पदार्थ अपने साथ अन्धकारको भी थोड़ा-बहुत स्थान दे देते हैं पर सूर्य आते ही साथ उस अन्धकारको पृथिवीतलसे दूर हटा देता है। इसी प्रकार रात्रिके समय चकवा-चकवी परस्पर वियुक्त हो जाते हैं परन्तु सूर्य उदय होते ही उन्हें मिला देता है ॥१०८॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त जिनसेनाचार्यरचित हरिवंशपुराणमें रुक्मिणी-हरणका वर्णन करनेवाला ब्यालीसवाँ सर्ग समाप्त हुआ ॥ ४२ ॥

---

१. प्रतिपत्य दुर्विघटितं म०, ख०, घ०, ङ० ।

त्रिचत्वारिंशः सर्गः

सत्यभामागृहाभ्यर्णमाकीर्णं द्रव्यसम्पदा । धिष्ण्यं विष्णुर्ददौ दिव्यं रुक्मिण्यै परिवारवत्[1] ॥१॥
महत्तरप्रतीहारीभृत्यादिपरिवारिता[2] । यानाश्वरथयुग्यादि पत्या गौरविताऽतुषत् ॥२॥
ज्ञात्वा भामा[3] हरीष्टां तां भामां भामातिशायिनीम् । सा सेर्ष्याऽपि हरिं धीरा रहः क्रीडास्वरीरमत् ॥३॥
एकदा मुखताम्बूलं निष्ठ्यूतं भीष्मजन्मना[4] । सोंऽशुकान्तेन[5] संगोप्य सत्यभामागृहं गतः ॥४॥
स्वभावमुखसौगन्ध्यबद्धभ्रान्तालिमण्डलम् । अहरत्सत्यभामा तद् भ्रान्त्या सद्गन्धवस्त्विति ॥५॥
वर्णगन्धाढ्यमापिष्य समालभत चादरात् । हसिता हरिचन्द्रेण सा चुक्रोश तमीर्ष्यया ॥६॥
सौभाग्यातिशयं सत्या सपत्न्या हरिचेष्टितैः । विदित्वा रूपलावण्यं द्रष्टुमभ्युत्सुकाऽभवत् ॥७॥
अवदच्च पतिं नाथ ! रुक्मिणीं मम दर्शय । श्रोत्रयोरिव संहृष्टिं नेत्रयोरपि मे कुरु ॥८॥
प्रतिपद्य स तद्वाक्यमन्तर्गूढो विनिर्गतः । मणिवाप्यास्तटे कान्तां संस्थाप्य पुनरागतः ॥९॥
आनयामि तवाभीष्टां विशोद्यानमिति प्रियाम् । सम्प्रेष्यानुगतस्तस्थौ गुल्मसंगूढविग्रहः ॥१०॥
तावच्च मणिवाप्यन्ते मणिभूषणधारिणीम् । पादाग्रेण स्थितां चूतलतामालम्ब्य पाणिना ॥११॥
प्रोल्लसत्स्थूलधम्मिल्लां वामहस्तेन बिभ्रतीम् । स्तनभारनतामूर्ध्वफलन्यस्तायतेक्षणाम् ॥१२॥

श्रीकृष्णने सत्यभामाके महलके पास, नाना प्रकारकी सम्पदाओंसे व्याप्त एवं योग्य परिजनोंसे सहित एक सुन्दर महल रुक्मिणीके लिए दिया ॥१॥ उसे महत्तरिका, द्वारपालिनी तथा सेवक आदि परिजनोंसे युक्त किया। नाना प्रकारके वाहन घोड़े, रथ, बैल आदि दिये तथा पट्टरानी पदसे उसका गौरव बढ़ाया जिससे वह बहुत ही सन्तुष्ट हुई ॥२॥ इधर सत्यभामाको जब पता चला कि श्रीकृष्ण समस्त स्त्रियोंको अतिक्रान्त करनेवाली एक स्त्री लाये हैं और वह उन्हें अत्यधिक प्रिय है तब वह ईर्ष्यासे सहित होनेपर भी बड़ी धीरतासे उन्हें नाना प्रकारकी क्रीड़ाओंमें रमण कराने लगी ॥३॥

एक दिन कृष्ण रुक्मिणीके द्वारा उगले हुए मुखके पानको वस्त्रके छोरमें छिपाकर सत्यभामाके घर गये वह पान स्वभावसे ही सुगन्धित था और उसपर रुक्मिणीके मुखकी सुगन्धिने चार चाँद लगा दिये थे इसलिए उसपर भ्रमरोंका समूह आ बैठा था। 'यह कोई सुगन्धित पदार्थ है' इस भ्रान्तिसे सत्यभामाने उसे ले लिया और उत्तम वर्ण तथा गन्धसे युक्त उस पानके उगालको अच्छी तरह पीसकर अपने शरीरपर लगा लिया। यह देख श्रीकृष्णने उसकी खूब हँसी उड़ायी जिससे वह ईर्ष्यावश उनके प्रति आगबबूला हो गयी ॥४-६॥

कृष्णकी चेष्टाओंसे सौतके सौभाग्यका अतिशय जानकर सत्यभामा उसका रूपलावण्य देखनेके लिए उत्सुक हो गयी ॥७॥ और एक दिन पतिसे बोली कि 'हे नाथ ! मुझे रुक्मिणी दिखलाइए, कानोंकी तरह मेरे नेत्रोंको भी हर्ष उपजाइए' ॥८॥ सत्यभामाकी बात स्वीकृतकर वे हृदयमें कुछ रहस्य छुपाये हुए गये और मणिमय वापिकाके तटपर रुक्मिणीको खड़ाकर पुनः सत्यभामाके पास आ गये ॥९॥ तदनन्तर 'तुम उद्यानमें प्रवेश करो, मैं तुम्हारी इष्ट रुक्मिणीको अभी लाता हूँ' यह कहकर उन्होंने सत्यभामाको तो आगे भेज दिया और आप स्वयं पीछेसे जाकर किसी झाड़ीके ओटमें शरीर छिपाकर खड़े हो गये ॥१०॥ मणिमय आभूषणोंको धारण करनेवाली रुक्मिणी मणिमय वापिकाके समीप एक हाथसे आम्रकी लता पकड़कर पञ्जोंके बल खड़ी थी। उस समय वह अपनी अतिशय सुशोभित बड़ी

---

१. परिचारवत् ख० । २. परिबारताः म० । ३. सत्यभामा । ४. रुक्मिण्या । ५. सोंऽशुकान्त्येन म० ।

निरूप्य रुक्मिणीं सत्या देवतामिव रूपिणीम् । देवतेयमिति ध्यात्वा विकीर्य कुसुमाञ्जलिम् ॥१३॥
निपत्य पादयोस्तस्याः स्वसौभाग्यमयाचत । विपक्षस्य तु दौर्भाग्यमीर्ष्याशल्यकलङ्किता ॥१४॥
अन्तरेऽत्र हरिः सत्यां हारिस्मितमुखोऽवदत् । अपूर्वं दर्शनं स्वस्रोरहो वृत्तं नयान्वितम् ॥१५॥
श्रुत्वा तत्सत्यभामोचे ज्ञाततत्त्वा रुषान्विता । किं भवान्नयदिच्छं[1] नौ दर्शनं किं तवेति[2] तम् ॥१६॥
कृतकृष्णवचा भामां[3] रुक्मिणी विनयात्ततः । ननाम कुलजातानां विनयः सहजो मतः ॥१७॥
विहृत्य चिरमुद्यानं लतामण्डपमण्डितम् । ताभ्यामधोक्षजो यातो निवृत्तो भवनं निजम् ॥१८॥
ताभ्यामेकदिनौपम्यमनेकेषु दिनेष्वतः । तस्य यात्सु सुखाम्भोधिवर्तिनः शौर्यशालिनः ॥१९॥
दुर्योधनोऽन्यदा दूतं हरये प्रियपूर्वकम् । प्रजिघाय घनस्नेहः स हास्तिनपुराधिपः ॥२०॥
यः प्रागुत्पत्स्यते यस्या रुक्मिणीसत्यभामयोः । सूनुरुत्पत्स्यमानायाः स वरो दुहितुर्मम ॥२१॥
इति दूतवचः श्रुत्वा प्रीतः सम्पूज्य तं हरिः । विससर्ज स पत्येऽतः कार्यसिद्धिं न्यवेदयत् ॥२२॥
तां वार्तामुपलभ्याऽसौ भामा[4] भीष्मात्मजान्तिकम् । व्यसृजन्निजदूतीस्ताः पादयोः प्रणता जगुः ॥२३॥
स्वामिनि ! स्वामिनी नस्त्वामिति वक्ति वचो वरम् । अवतंसमिव श्लाघ्यं कुरु कर्णे मनस्विनी ॥२४॥
आवयोः प्रथमं यस्यास्तनयोऽत्र भविष्यति । सुतां दुर्योधनस्यासौ भाविनीं परिणेष्यति ॥२५॥

मोटी चोटी बायें हाथसे पकड़े थी। स्तनोंके भारसे वह नीचेको झुक रही थी तथा ऊपर लगे हुए फलपर उसके बड़े-बड़े नेत्र लग रहे थे। देवीके समान सुन्दर रूपको धारण करनेवाली रुक्मिणीको देखकर सत्यभामाने समझा कि 'यह देवी है' इसलिए उसने उसके सामने फूलोंकी अञ्जलि बिखेर कर तथा उसके चरणोंमें गिरकर अपने सौभाग्य और सौतके दौर्भाग्यकी याचना की वह ईर्ष्या रूपी शल्यसे कलङ्कित जो थी ॥११-१४॥ इसी समय मन्द-मन्द मुसकाते हुए श्रीकृष्णने आकर सत्यभामासे कहा कि अहा ! दो बहिनोंका यह नीतियुक्त अपूर्व मिलन हो लिया ? ॥१५॥ श्रीकृष्णके वचन सुन सत्यभामा सब रहस्य जान गयी और कुपित हो बोली कि अरे ! क्या आप हैं ? हम दोनोंका इच्छानुरूप दर्शन हो इसमें आपको क्या मतलब ? ॥१६॥ तदनन्तर कृष्णके वचन स्वीकारकर रुक्मिणीने सत्यभामाको विनयपूर्वक नमस्कार किया सो ठीक ही है क्योंकि उच्च कुलमें उत्पन्न हुए मनुष्योंके विनय स्वभावसे ही होता है ॥१७॥ श्रीकृष्ण लतामण्डपोंसे सुशोभित उद्यानमें उन दोनों रानियोंके साथ चिरकाल तक क्रीड़ा कर अपने महलमें लौट गये ॥१८॥

तदनन्तर सुखसागरमें निमग्न एवं पराक्रमसे सुशोभित कृष्णके अनेक दिन उन दोनों रानियोंके साथ जब एक दिनके समान व्यतीत हो रहे थे तब एक दिन अत्यधिक स्नेहसे युक्त हस्तिनापुरके राजा दुर्योधनने इस प्रिय समाचारके साथ कृष्णके पास अपना दूत भेजा कि 'आपकी रुक्मिणी और सत्यभामा रानियोंमेंसे जिसके पहले पुत्र उत्पन्न होगा वह यदि मेरे पुत्री उत्पन्न हुई तो उसका पति होगा' ॥१९-२१॥ दूत के उक्त वचन सुनकर श्रीकृष्ण बहुत प्रसन्न हुए और उन्होंने दूतका सम्मान कर उसे विदा किया। दूतने भी अपने स्वामीके लिए कार्य सिद्ध होनेका समाचार कह सुनाया ॥२२॥

यह समाचार सुनकर सत्यभामाने रुक्मिणीके पास अपनी दूतियाँ भेजीं और वे रुक्मिणीके चरणोंमें नम्रीभूत हो कहने लगीं कि हे स्वामिनि ! हम लोगोंकी स्वामिनी—सत्यभामा आपसे कुछ उत्तम वचन कह रही हैं सो हे मानवति ! आभरणकी तरह उस प्रशंसनीय वचनको आप कानमें धारण करें—श्रवण करें। वह वचन यह है कि 'हम दोनोंमेंसे जिसके पहले पुत्र होगा वह दुर्योधनकी होनहार पुत्रीको विवाहेगा यह निश्चित हो चुका है। उस

---

१. -दित्थं म० । २. तवेरितं ग० । ३. कृतकृष्णवचो भामा म०, ग० । ४. भीष्मजान्तिकं म० ।

तत्रापत्यविहीनाया विलूनालकवल्लरीम् । [1]स्नास्यतस्तामधः कृत्वा पादयोस्तु वधूवरौ ॥२६॥
प्रशस्यं च यशस्यं च यशोभागिनि भागिनि । यदि ते रोचते कार्यमिदमार्येऽनुमन्यताम् ॥२७॥
कर्णामृतमिवाकर्ण्य तन्निवृत्य जगावसौ । तथाऽस्त्विति ततो गत्वा ताः स्वामिन्यै न्यवेदयन्[2] ॥२८॥
रुक्मिणी तु शिरःस्नाता शयिता शयने निशि । स्वप्ने हंसविमानेन विजहार किलाम्बरे ॥२९॥
विबुद्धा च समाचख्यौ पत्ये स्वप्नमसौ जगौ । सुपुत्रस्ते वियच्चारी भविताऽत्र महानिति ॥३०॥
वचः पत्युरसौ श्रुत्वा विकासमगमद् वधूः । तेजसांऽशुमतः श्लिष्टा पद्मिनीव दिनानने ॥३१॥
अवतीर्याऽच्युतेन्द्रस्तु रुक्मिणीगर्भमाश्रितः । पूरयन् परमानन्दमुपेन्द्रस्य जनस्य च ॥३२॥
तत्काले सत्यभामाऽपि शिरःस्नातवती सती । अधत्त स्वश्च्युतं गर्भे सुतं सुस्वप्नपूर्वकम् ॥३३॥
वर्धमानौ च तौ गर्भौ वर्धमानयशोलतौ । वर्द्धमानां मुदं मात्रोः पितुश्चाकुरुतां पराम् ॥३४॥
पूर्णप्रसवमासेऽत्र प्रसूता रुक्मिणी सुतम् । नरलक्षणसम्पूर्णं सत्याऽपि युगपन्निशि ॥३५॥
प्रहिताश्च हितास्ताभ्यां युगपन्निशि वर्द्धकाः । शिरोऽन्ते सत्यया विष्णोः पादान्ते तस्थुरन्यया ॥३६॥
प्रबुधश्च [3]हरिर्दिष्ट्यै रुक्मिणीपुत्रजन्मना । आनन्दितो ददौ तेभ्यः स्वाङ्गस्पृष्टं विभूषणम् ॥३७॥
परावृत्य पुनः पश्यन् सत्यभामाजनैः स्तुतः । पुत्रोत्पत्त्या ददौ तुष्टस्तेभ्योऽप्यर्थं जनार्दनः ॥३८॥

विवाहके समय जिसके पुत्र न होगा उसकी कटी हुई केश-लताको पैरोंके नीचे रखकर वधू और वर स्नान करेंगे'। यह कार्य बहुत ही प्रशस्त तथा यशको बढ़ानेवाला है इसलिए हे यशस्विनि! हे भाग्यशालिनि! हे आर्ये! यदि आपको रुचता है—अच्छा लगता है तो स्वीकृति दीजिए ॥२३-२७॥ कानोंके लिए अमृतके समान आनन्द देनेवाले उस वचनको सुनकर रुक्मिणीने सन्तुष्ट हो 'तथास्तु' कह दिया और दूतियोंने जाकर अपनी स्वामिनी—सत्यभामा के लिए वह समाचार कह सुनाया ॥२८॥

तदनन्तर चतुर्थ स्नानके बाद रुक्मिणी जब रात्रिमें शय्यापर सोई तब उसने स्वप्नमें हंसविमानके द्वारा आकाशमें विहार किया ॥२९॥ जागनेपर उसने वह स्वप्न पतिदेव श्रीकृष्णके लिए कहा और उसके उत्तरमें उन्होंने कहा कि तुम्हारे आकाशमें विहार करनेवाला कोई महान् पुत्र होगा ॥३०॥ पतिके वचन सुनकर रुक्मिणी, प्रातःकालके समय सूर्यकी किरणोंसे संसर्गको प्राप्त हुई कमलिनीके समान विकासको प्राप्त हुई ॥३१॥ तदनन्तर श्रीकृष्ण तथा अन्य समस्त जनोंके परम आनन्दको बढ़ाता हुआ अच्युतेन्द्र, स्वर्गसे अवतार ले रुक्मिणीके गर्भमें आया ॥३२॥

उसी समय सत्यभामाने भी शिरसे स्नानकर उत्तम स्वप्नपूर्वक स्वर्गसे च्युत हुए पुत्रको गर्भमें धारण किया ॥३३॥ जिनकी यशरूपी लता बढ़ रही थी ऐसे बढ़ते हुए दोनों गर्भोंने अपनी-अपनी माताओं और पिताके परम आनन्दको वृद्धिङ्गत किया ॥ ३४ ॥ प्रसवका महीना पूर्ण होनेपर रुक्मिणीने उत्तम मनुष्यके लक्षणोंसे युक्त पुत्र उत्पन्न किया और उसीके साथ-साथ सत्यभामाने भी रात्रिमें उत्तम पुत्रको जन्म दिया ॥३५॥ दोनों ही रानियोंने हितके इच्छुक एवं शुभ समाचार देनेवाले पुरुष रात्रिके ही समय एक साथ श्रीकृष्णके पास भेजे। उस समय श्रीकृष्ण शयन कर रहे थे इसलिए सत्यभामाके द्वारा भेजे सेवक उनके सिरके पास और रुक्मिणीके द्वारा भेजे सेवक उनके चरणोंके समीप खड़े हो गये ॥३६॥ जब श्रीकृष्ण जगे तो पहले उनकी दृष्टि चरणोंके पास खड़े सेवकोंपर पड़ी। उन्होंने भाग्य-वृद्धिके लिए पहले रुक्मिणीके पुत्र-जन्मका समाचार सुनाया जिससे प्रसन्न होकर कृष्णने उन्हें अपने शरीरपर स्थित आभूषण पुरस्कारमें दिये ॥३७॥ तदनन्तर जब कृष्णने मुड़कर दूसरी ओर देखा तो

१. स्नास्येते म०, ख०, आस्येते ग०, ङ०, घ० । २. न्यवेदयत् म० । ३. हरिर्दिष्ट्यै म० ।

तस्यामेव च वेलायां बलवान् नभसा व्रजन्। धूमकेतुर्विमानस्थो धूमकेतुरिवासुरः ॥३९॥
स्तम्भितेन विमानेन कथञ्चिदपि विस्मितः। अधोऽवलोकमानोऽसौ विभङ्गज्ञानलोचनः ॥४०॥
रुक्मिण्याः सुतमालोक्य रोषाऽरुणनिरीक्षणः। दर्शनेन्धनसंदीप्तपूर्ववैरविभावसुः ॥४१॥
महारक्षाधिकारस्य परिवारजनस्य सः। रुक्मिण्याश्च महानिद्रां निपात्यापत्यपातकः ॥४२॥
शिशुमुद्धृत्य बाहुभ्यां महीध्रमिव गौरवात्। नभः समुद्ययौ नीलो [1]नीलबुद्धिर्महासुरः ॥४३॥
हस्ताभ्यां किमु मृद्नामि पूर्ववैरिणमेनकम्। [2]खगेभ्यो नखनिर्भिन्नं खे बलिं विकिरामि किम् ॥४४॥
नक्रचक्रमहारौद्रे मकरग्राहसंकुले। पातयामि समुद्रे किं क्षुद्रं मे द्रोहिणं रिपुम् ॥४५॥
अथवा मांसपिण्डेन मारितेनामुनाऽत्र किम्। [3]त्यक्तश्चापेतरक्षस्तु स्वयमेव मरिष्यति ॥४६॥
इति संचिन्त्य पुण्येन शिशोरेव महासुरः। पश्यन्नवततारातो खदिराटवीम् ॥४७॥
अधस्तक्षशिलायास्तं निधायार्भकमाशु सः। धूमकेतुरिवादृश्यो धूमकेतुरभूत्ततः ॥४८॥
तदनन्तरमेवाऽत्र मेघकूटपुराधिपः। कालसंवर इत्याख्यः सार्द्धं कनकमालया ॥४९॥
प्राप्तो भौमविहारेण विमानेन वियच्चरः। शिशोस्तस्य प्रभावेण खण्डिताऽस्य गतिस्तदा ॥५०॥
किमेतदित्यसौ ध्यात्वा परं विस्मयमागतः। अवतीर्य शिलां [4]पृथ्वीमुच्छ्वसन्तीं व्यलोकत ॥५१॥
समुत्क्षिप्य शिलां स्वैरमपसार्य स दृष्टवान्। अक्षताङ्गमनङ्गाभमर्भकं कनकप्रभम् ॥५२॥

सत्यभामाके सेवकजनोंने उनकी स्तुति कर उन्हें सत्यभामाके पुत्रोत्पत्तिका समाचार सुनाया जिससे सन्तुष्ट होकर कृष्णने उन्हें भी पुरस्कारमें धन दिया ॥३८॥

उसी समय अग्निके समान देदीप्यमान धूमकेतु नामका एक महाबलवान् असुर विमानमें बैठकर आकाशमार्गसे जाता हुआ रुक्मिणीके महलपर आया ॥ ३९ ॥ आतेके ही साथ उसका विमान रुक गया जिससे कुछ आश्चर्यमें पड़कर वह नीचेकी ओर देखने लगा। वह विभङ्गावधिज्ञानरूपी नेत्रको धारण करनेवाला था ही इसलिए उसके द्वारा रुक्मिणीके पुत्रको देख क्रोधसे उसके नेत्र लाल हो गये और दर्शनरूपी ईन्धनसे उसकी पूर्व वैररूपी अग्नि भड़क उठी। उस पापीने आते ही कड़ी रक्षामें नियुक्त पहरेदारोंको, परिवारके लोगोंको तथा स्वयं रुक्मिणीको महानिद्रामें निमग्न कर पुत्रको उठा लिया और वजनमें पर्वतके समान भारी उस पुत्रको दोनों भुजाओंसे लेकर वह मलिनबुद्धि एवं श्यामरङ्गका धारक महा असुर आकाशमें उड़ गया ॥ ४०–४३ ॥ आकाशमें ले जाकर वह विचार करने लगा कि इस पूर्व भवके बैरीको क्या मैं हाथोंसे मसल डालूँ ? या नखोंसे चीरकर आकाशमें पक्षियोंके लिए इसकी बलि बिखेर दूँ ? अथवा मुझसे द्रोह करनेवाले इस क्षुद्र शत्रुको नाकोंके समूहसे महाभयंकर एवं मगरों और ग्राहोंके समूहसे भरे हुए समुद्रमें गिरा दूँ ? अथवा यह मांसका पिण्ड तो है ही। इसके मारनेसे क्या लाभ है ? यह रक्षकोंसे रहित ऐसा ही छोड़ दिया जायेगा तो अपने-आप मर जायेगा ॥ ४४–४६ ॥ बालकके पुण्यसे इस प्रकार विचार करता वह महासुर जा रहा था कि दूरसे खदिर अटवीको देख वह नीचे उतरा ॥ ४७ ॥ और वहाँ तक्षशिलाके नीचे उस बालकको रखकर वह धूमकेतु नामका असुर, धूमकेतु ताराके समान शीघ्र ही अदृश्य हो गया ॥ ४८ ॥

तदनन्तर उसी समय मेघकूट नगरका राजा कालसंवर, अपनी कनकमाला रानीके साथ पृथिवीके समस्त स्थलोंपर विहार करता हुआ विमान-द्वारा आकाश-मार्गसे वहाँ आया सो बालकके प्रभावसे उसकी गति रुक गयी ॥ ४९–५० ॥ 'यह क्या है' इस प्रकार विचारकर कालसंवर परम आश्चर्यको प्राप्त हुआ। नीचे उतरकर उसने हिलती हुई एक बड़ी मोटी शिला देखी ॥ ५१ ॥ स्वेच्छासे शिला हटाकर जब उसने देखा तो उसके नीचे अक्षत शरीर,

---

१. मलिनाशयः। २. पक्षिभ्यः। ३. त्यक्तश्चापदरक्षस्तु म०। ४. विशालाम्।

गृहीत्वा करुणोपेतः प्रियायै दातुमुद्यतः । तनयस्तेऽनपत्याया गृहाणेति प्रियंवदः ॥५३॥
प्रसार्य करयुग्मं सा पुनः संकोच्य कोविदा । अनिच्छन्तीव संतस्थे खेचरी दीर्घदर्शिनी ॥५४॥
प्रिये ! किमिदमित्युक्ते सा जगौ तव सूनवः । महाभिजनसम्पन्नाः सन्ति पञ्चशतानि ते ॥५५॥
तैरज्ञातकुलं दृप्तैस्ताड्यमानं शिरस्यमुम् । न शक्नोमि तदा द्रष्टुं तन्मे वरमपुत्रता ॥५६॥
इत्युक्ते सान्त्वयित्वा[1] तां गृहीत्वा कर्णपत्रकम् । युवराजोऽयमित्युक्त्वा पट्टमस्य बबन्ध सः ॥५७॥
ततो जग्राह तुष्टा सा तनयं नयशालिनी । सपुत्रौ तौ प्रविष्टौ च मेघकूटपुरं परम्[2] ॥५८॥
गूढगर्भा महादेवी प्रसूता तनयं शुभम् । इति वार्त्तां पुरे कृत्वा कोविदः कालसंवरः ॥५९॥
नृत्यद्विद्याधरीवृन्द[3]सिंजत्सिञ्जीरबन्धुरम् । तस्य पुण्यनिधानस्य जन्मोत्सवमकारयत् ॥६०॥
प्रकृष्टद्युम्नधामत्वात् प्रद्युम्न इति संज्ञितः । कुमारो वर्द्धते तत्र कुमारशतसेवितः ॥६१॥
इतश्च रुक्मिणी सूनुं विबुद्धा नेक्षते यदा । वृद्धधात्रीभिरित्युच्चैः सह द्रष्टुं ततस्तदा ॥६२॥
विललाप च हा पुत्र ! हृतः केनाऽपि वैरिणा । विधिना निधिमादर्श्य नेत्रं मेऽपहृतं कथम् ॥६३॥
वियोजिता मया नूनमपत्येन भवान्तरे । काचन स्त्री न हीदृक्षं भवेत्फलमहेतुकम् ॥६४॥
विलापमिति कुर्वन्त्यां रुक्मिण्यां करुणावहम् । रोदनध्वनिरुत्तस्थौ परिवारस्य मांसलः ॥६५॥

कामदेवके समान आभावाला एवं सुवर्णके समान कान्तिमान् वह बालक देखा ॥ ५२ ॥ दयासे युक्त हो कालसंवरने उस बालकको उठा लिया और 'तुम्हारे पुत्र नहीं है इसलिए यह तुम्हारा पुत्र हुआ, लो' इस प्रकार मधुर शब्द कहकर अपनी प्रियाको देनेके लिए उद्यत हुआ ॥ ५३ ॥ पहले तो विद्याधरी कनकमालाने दोनों हाथ पसार दिये पर पीछे चतुर एवं दूर तक देखनेवाली उस विद्याधरीने अपने हाथ संकोच लिये और इस प्रकार खड़ी हो गयी मानो पुत्रको चाहती ही न हो ॥ ५४ ॥ 'प्रिये ! यह क्या है ?' इस प्रकार पतिके कहनेपर उसने कहा कि आपके उच्च कुलमें उत्पन्न हुए पाँच सौ पुत्र हैं ॥ ५५ ॥ सो जब वे इस अज्ञात कुलवाले पुत्रको अहंकारसे उन्मत्त हो शिरमें थप्पड़ मारेंगे तब मैं वह दृश्य देखनेको समर्थ न हो सकूँगी इसलिए मेरा निपूती रहना ही अच्छा है ॥ ५६ ॥

रानीके इस प्रकार कहनेपर कालसंवरने उसे सान्त्वना दी और कानका सुवर्ण-पत्र ले 'यह युवराज है' ऐसा कहकर उसे पट्ट बाँध दिया ॥ ५७ ॥ तदनन्तर नीति-निपुण कनकमालाने सन्तुष्ट होकर वह पुत्र ले लिया। और पुत्रसहित दोनों मेघकूट नामक श्रेष्ठ नगरमें प्रविष्ट हुए ॥ ५८ ॥ अतिशय निपुण राजा कालसंवरने नगरमें यह घोषणा कराकर कि 'गूढ़ गर्भको धारण करनेवाली महादेवी कनकमालाने आज शुभ पुत्रको जन्म दिया है' पुण्यके भण्डारस्वरूप उस पुत्रका जन्मोत्सव कराया। जन्मोत्सवमें विद्याधरियोंके समूह नृत्य कर रहे थे और उनके नूपुरोंकी रुनझुन न्यारी ही शोभा प्रकट कर रही थी ॥५९-६०॥ स्वर्णके समान श्रेष्ठ कान्तिका धारक होनेसे उसका प्रद्युम्न नाम रखा गया। वहाँ सैकड़ों विद्याधर-कुमारोंके द्वारा सेवित होता हुआ वह प्रद्युम्न कुमार दिनों-दिन बढ़ने लगा ॥ ६१ ॥

उसी समय सुराष्ट्र देशमें एक राष्ट्रवर्धन नामका राजा था। अजाखुरी उसकी नगरी थी और विनया नामकी रानी थी जो समस्त स्त्रियोंमें उत्तम थी ॥२६॥ विनया नामक रानीसे उसके नमुचि नामका पुत्र हुआ था जो नीति और पराक्रमका भण्डार था। इसी प्रकार एक सुसीमा नामकी पुत्री थी जो कि उत्तम सीमासे युक्त पृथिवीके समान जान पड़ती थी ॥२७॥ युवराज नमुचिका पराक्रम समस्त पृथिवीमें प्रसिद्ध था। वह अभिमानका मानो बड़ा ऊँचा पर्वत था और माननीय राजाओंका निरन्तर तिरस्कार करता रहता था ॥२८॥ एक दिन युवराज नमुचि और उसकी बहिन सुसीमा दोनों ही स्नान करनेके लिए समुद्रतटपर आये। इधर हितकारी नारदने श्रीकृष्णके लिए उन दोनोंकी खबर दी ॥२९॥ श्रीकृष्ण खबर पाते ही बलदेवके साथ वहाँ गये और प्रभास तीर्थके तीरपर जिसकी सेना ठहरी हुई थी ऐसे उस नमुचिको मारकर तथा कन्या सुसीमाको हरकर द्वारिका आ गये ॥३०॥ वहाँ लक्ष्मणाके भवनके समीप सुवर्णमय उत्तम महल देकर उसके साथ इच्छानुसार क्रीड़ा करने लगे ॥३१॥ तदनन्तर सुसीमाके पिता राजा राष्ट्रवर्धनने भी पुत्रीके लिए उत्तमोत्तम वस्त्राभूषण और श्रीकृष्णके लिए रथ, हाथी आदिकी भेंट भेजी ॥३२॥

उसी समय सिन्धुदेशके वीतभय नामक नगरमें इक्ष्वाकु वंशको बढ़ानेवाला मेरु नामका राजा रहता था, उसकी चन्द्रवती नामकी भार्या थी ॥३३॥ उससे उसके एक गौरी नामकी कन्या उत्पन्न हुई थी जो गौरवर्णकी थी, रूपवती गौरी विद्याके समान थी अथवा ईतियोंसे रहित पृथिवीके समान जान पड़ती थी ॥३४॥ निमित्तज्ञानीने बताया था कि यह नौवें नारायण श्रीकृष्णकी स्त्री होगी, इसलिए उसके वचनोंका स्मरण रखनेवाले राजा मेरुने पहले तो श्रीकृष्णके पास दूत भेजा और उसके बाद मृगलोचना गौरीको भेजा ॥३५॥ श्रीकृष्णने मनको हरनेवाली गौरीको विवाहकर उसके लिए सुसीमाके भवनके समीप ऊँचा महल प्रदान किया ॥३६॥

उसी समय बलदेवके मामा राजा हिरण्यनाभ अरिष्टपुर नगरमें राज्य करते थे।

---

१. यथा म०। २. ईतिरहिता गौरिव पृथिवी इव। ३. हरिणेक्षणा म०। ४. मनोहरणसारिणीं म०।

पद्मावतीं समुत्पन्नां कन्यां पद्मामिव स्वयम् । स्वयंवरगतां श्रुत्वा संप्राप्तौ रामकेशवौ ॥३८॥
सगौरवमिमौ दृष्टावनावृष्टिपुरस्सरौ । प्रीत्या हिरण्यनाभेन स्वजनस्नेहवर्धनौ ॥३९॥
पित्रा हिरण्यनाभस्य सत्रा प्राव्रजदग्रजः । पुरैव रेवतो नाम्ना महिम्ना यो वनश्रितः ॥४०॥
चतस्रस्तत्सुताः कन्या रेवती बन्धुमत्यपि । सीता राजीवनेत्रा च ता दत्ताः सीरिणे पुरा ॥४१॥
स्वयंवरे प्रवृत्तेऽत्र हृत्वा पद्मावतीं हठात् । रणशौण्डान्ममर्दाशु शौरिशाहवदक्षिणः ॥४२॥
परिणीय सभार्यौ तौ भ्रातरौ भ्रातृभिर्युतौ । द्वारिकामर[1]मायातावरंसातां सुरोपमौ ॥४३॥
गौरीगृहसमीपे च पद्मावत्यै गृहं हरिः । प्रदाय प्रमदोपेतः प्रसादपरमोऽभवत् ॥४४॥
नगर्यां पुष्कलावत्यां गान्धारविषयेऽभवत् । भूभृदिन्द्रगिरिस्तस्य मेरुसत्यभिधा प्रिया ॥४५॥
सुतो हिमगिरिस्तस्यां जातो हिमगिरिस्थिरः । गान्धारी दुहिता चार्वी गन्धर्वादिकलाधिका ॥४६॥
भ्रात्रा हयपुरीन्द्राय सुमुखाय ततो हरिः । दीयमानां विदित्वैनां [2]नारदादरमागतात् ॥४७॥
गत्वा हिमगिरिं हत्वा प्रतिकूलं रणाजिरे । तां हृत्वानीय सौम्यास्यामुपयम्य ससंमदः ॥४८॥
पद्मावत्या गृहोपान्ते गान्धार्यै भवनं वरम् । वितीर्य धैर्यसंपन्नामेनां भोगैरमानयत् ॥४९॥
महादेवीभिरिष्टाभिरष्टाभिरवरोधने । प्रसाधिताभिराशाभिरिव ताभिरुपासितः ॥५०॥
विन्दन् भोगफलं भूरि गोविन्दः पुण्यवृक्षजम् । संदद्जनतानन्दं ननन्द पुरुपौरुषः ॥५१॥

उनकी श्रीकान्ता नामकी उत्तम स्त्री थी। उससे उनके पद्मावती नामकी कन्या उत्पन्न हुई थी जो साक्षात् लक्ष्मीके समान जान पड़ती थी। 'उसका स्वयंवर हो रहा है' यह सुनकर अनावृष्टिके साथ-साथ बलदेव और कृष्ण भी वहाँ गये ॥३७-३८॥ आत्मीयजनोंके साथ स्नेह बढ़ानेवाले इन दोनोंको राजा हिरण्यनाभने बड़े गौरव और प्रेमके साथ देखा ॥३९॥ हिरण्यनाभका बड़ा भाई रेवत जो पिताके साथ पहले ही दीक्षित हो वनमें रहने लगा था उसकी चार कन्याएँ १ रेवती, २ बन्धुमती, ३ सीता और ४ राजीवनेत्रा बलदेवके लिए पहले ही दी जा चुकीं ॥४०-४१॥ जब पद्मावतीका स्वयंवर होने लगा तब युद्धनिपुण श्रीकृष्ण, उसे हठपूर्वक हर ले आये और रणमें जिन्होंने शूरवीरता दिखायी उन्हें शीघ्र ही नष्ट कर डाला ॥४२॥ तदनन्तर विवाह कर अपनी-अपनी स्त्रियोंको साथ लिये दोनों भाई, भाइयोंके साथ शीघ्र ही द्वारिका आये और देवोंके समान क्रीड़ा करने लगे ॥४३॥ हर्षित श्रीकृष्ण गौरीके महलके समीप पद्मावतीके लिए महल देकर बहुत प्रसन्न हुए ॥४४॥

उसी समय गान्धार देशकी पुष्कलावती नगरीमें एक इन्द्रगिरि नामका राजा रहता था। उसकी मेरुसती नामकी स्त्री थी। उससे उसके हिमगिरिके समान स्थिर हिमगिरि नामका पुत्र था और गान्धारी नामकी सुन्दरी पुत्री थी जो गन्धर्व आदि कलाओंमें अत्यन्त निपुण थी ॥४५-४६॥ शीघ्रतासे आये हुए नारदसे श्रीकृष्णको जब यह विदित हुआ कि गान्धारीका भाई उसे हयपुरीके राजा सुमुखको दे रहा है तब वे शीघ्र ही जाकर रणाङ्गणमें प्रतिकूल हिमगिरिको मारकर गान्धारीको हर लाये एवं उस सौम्यमुखीके साथ विवाह कर बहुत हर्षित हुए ॥४७-४८॥ उन्होंने पद्मावतीके महलके समीप गान्धारीके लिए उत्तम महल दिया और उस धैर्यशालिनीको उत्तम भोगोंसे सम्मानित किया ॥४९॥ इस प्रकार जो वशीकृत आठ दिशाओंके समान उन आठ इष्ट पट्टरानियोंसे अन्तःपुरमें सदा सेवित रहते थे, जो पुण्यरूपी वृक्षसे उत्पन्न भोगरूपी विशाल फलका उपभोग करते थे, जन-समूहको आनन्द प्रदान करते थे, एवं प्रबल पराक्रमके धारक थे ऐसे श्रीकृष्ण समृद्धिको प्राप्त हुए ॥५०-५१॥ गौतमस्वामी

---

१. अरं शीघ्रम् । २. नारदात् + अरम् + आगतात् ।

द्रुतविलम्बितम्

कृतरणं परिभूय[1] पुरःस्थितं रिपुगणं तृणवत्क्षणमात्रतः ।
वरवधूवररत्नमयत्नतः श्रयति भव्यजनो जिनधर्मकृत् ॥५२॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ जाम्बवत्यादिमहादेवीलाभवर्णनो नाम चतुश्चत्वारिंशः सर्गः ॥४४॥

कहते हैं कि जिनधर्मको धारण करनेवाला भव्य जीव युद्धमें सामने खड़े शत्रुओंके समूहको क्षणमात्रमें तृणके समान पराजित कर अनायास ही उत्तमोत्तम स्त्रीरूपी रत्नोंको प्राप्त कर लेता है ॥५२॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें जाम्बवती आदि महादेवियोंके लाभका वर्णन करनेवाला चवालीसवां सर्ग समाप्त हुआ ॥४४॥

१. प्रविभूय म०, ग० ।

पञ्चचत्वारिंशः सर्गः

अथ प्राप्ता महासत्त्वास्तदा द्वारवतीं पुरीम् । भागिनेया दशार्हाणां प्रसिद्धाः पञ्च पाण्डवाः ॥१॥
युधिष्ठिरोऽर्जुनो ज्येष्ठो भीमसेनो महाबलः । नकुलः सहदेवश्च पञ्चैते पाण्डुनन्दनाः ॥२॥
[1]मागधोऽत्रान्तरेऽप्राक्षीत्प्राञ्जलिर्गणनायकम् । अन्वये भगवन् ! कस्य पाण्डुः पाण्डवनन्दनाः ॥३॥
गण्याह कुरुराजानामन्ववाये महोदये । शान्तिकुन्थ्वरनामानो यत्र तीर्थकरास्त्रयः ॥४॥
आदितः कुरुवंश्यानां चतुर्वर्गोपसेविनाम् । कतिचिन्मागधाख्यामि शृणु नामानि भूभृताम् ॥५॥
कुरुजाङ्गलदेशस्य कुरुभूमिसमस्य हि । अभूतां भूषणे भूपौ यौ हास्तिनपुरे परे ॥६॥
श्रेयान् सोमप्रभश्चेति कुरुवंशविशेषकौ । नाभेयसमकालौ तौ दानधर्मस्य नायकौ ॥७॥
तत्र सोमप्रभस्याभूत्कुमारो [2]जयनायकः । मेघस्वरस्स एवात्र भरतेन कृताभिधः ॥८॥
तस्मात्कुरुरभूत्तस्मात्कुरुचन्द्रस्तु नन्दनः । ततः शुभङ्करो राजा जातो धृतिकरस्ततः ॥९॥
राज्ञां कोटिषु कालेन समतीतासु भूरिषु । जिनान्तरेषु चानेकसागरोपमकोटिषु ॥१०॥
धृतिदेवो धृतिकरो गङ्गदेवादयस्तथा । धृतिमित्रधृतिक्षे[3]मसुव्रतव्रातमन्दराः ॥११॥
श्रीचन्द्रसुप्रतिष्ठाद्या व्यतीताः शतशो नृपाः । धृतपद्मो धृतेन्द्रश्च धृतवीर्यः प्रतिष्ठितः ॥१२॥
इत्यादिषु व्यतीतेषु धृतिदृष्टिर्धृतिद्युतिः । धृतिप्रीतिकराद्याश्च व्यतीताः कुरुवंशजाः ॥१३॥
ततो भ्रमरघोषाख्यो हरिघोषो हरिध्वजः । सूर्यघोषः सुतेजाश्च पृथुश्च पृथिवीपतिः ॥१४॥
इभवाहननामाद्याः समतीतास्ततो नृपाः । विजयाख्यो महाराजो जयराजस्ततोऽभवत् ॥१५॥

अथानन्तर किसी दिन यादवोंके भानेज महापराक्रमी, राजा पाण्डुके पुत्र युधिष्ठिर, अर्जुन, महा बलवान् भीमसेन, नकुल और सहदेव ये पाँचों पाण्डव द्वारिकापुरी आये ॥१-२॥ इसी बीचमें राजा श्रेणिकने हाथ जोड़कर गौतमगणधरसे पूछा कि हे भगवन् ! पाण्डु और पाण्डव किसके वंशमें उत्पन्न हुए हैं ? ॥३॥ गौतमस्वामीने कहा कि पाण्डु और पाण्डव कुरुवंशमें हुए हैं जिसमें कि शान्ति, कुन्थु और अर ये तीन तीर्थंकर हुए हैं ॥४॥ हे मगधेश्वर! अब मैं प्रारम्भसे लेकर चतुर्वर्गकी सेवा करनेवाले कुरुवंशी राजाओंके कुछ नाम कहता हूँ सुनो ॥५॥

शोभामें देवकुरु-उत्तरकुरुकी तुलना करनेवाले कुरुजाङ्गल देशके हस्तिनापुर नगरमें जो आभूषणस्वरूप श्रेयान् और सोमप्रभ नामके दो राजा हुए थे वे कुरुवंशके तिलक थे, भगवान् वृषभदेवके समकालीन थे और दानतीर्थके नायक थे ॥६-७॥ उनमें सोमप्रभके जयकुमार नामका पुत्र हुआ। वह जयकुमार ही आगे चलकर भरत चक्रवर्तीके द्वारा 'मेघस्वर' इस नामसे सम्बोधित किया गया ॥८॥ जयकुमारसे कुरु पुत्र हुआ। कुरुके कुरुचन्द्र, कुरुचन्द्रके शुभंकर और शुभंकरके धृतिकर पुत्र हुआ ॥९॥ तदनन्तर कालक्रमसे अनेक करोड़ राजा और अनेक सागर प्रमाण तीर्थंकरोंका अन्तराल काल व्यतीत हो जानेपर धृतिदेव, धृतिकर, गङ्गदेव, धृतिमित्र, धृतिक्षेम, सुव्रत, व्रात, मन्दर, श्रीचन्द्र और सुप्रतिष्ठ आदि सैकड़ों राजा हुए। तदनन्तर धृतपद्म, धृतेन्द्र, धृतवीर्य, प्रतिष्ठित आदि राजाओंके हो चुकनेपर धृतिदृष्टि, धृतिद्युति, धृतिकर, प्रीतिकर आदि हुए ॥१०-१३॥ तत्पश्चात् भ्रमरघोष, हरिघोष, हरिध्वज, सूर्यघोष, सुतेजस्, पृथु और इभवाहन आदि राजा हुए। तदनन्तर विजय, महाराज और

---

१. श्रेणिकः । २. जननायकः म० । ३. धृतिक्षेत्र म० ।

ततः सनत्कुमारोऽभूच्चतुर्थश्चक्रवर्तिनाम् । रूपपाशसमाकृष्टसुरबोधितदीक्षितः ॥१६॥
सुकुमारः सुतस्तस्य तस्माद्वरकुमारकः । विश्वो वैश्वानरश्चाभूद्विश्वकेतुर्बृहद्ध्वजः ॥१७॥
विश्वसेनस्ततो जातो यस्यैरा प्राणवल्लभा । तत्सुतः पञ्चमश्चक्री शान्तिः षोडशतीर्थकृत् ॥१८॥
नारायणो नरहरिः प्रशान्तिः शान्तिवर्धनः । शान्तिचन्द्रः शशाङ्काङ्कः कुरुश्च कुरुवंशजाः ॥१९॥
एवमाद्येष्वतीतेषु सूर्योऽभूद्यस्य भामिनी । श्रीमती तीर्थकृत्कुन्थुस्तयोश्चक्रधरोऽपि सः ॥२०॥
अतिक्रान्तेषु भूपेषु ततोऽपि बहुषु क्रमात् । राजा सुदर्शनो जातो यस्य मित्रा प्रियाङ्गना ॥२१॥
तयोरर इति ख्यातः सप्तमश्चक्रवर्तिनाम् । कृती तीर्थकराणाञ्च यतोऽष्टादशसंख्यकः ॥२२॥
ततः सुचारुश्चारुश्च चारुरूपोऽथ वीर्यवान् । चारुपद्मस्तथान्येषु समतीतेषु राजसु ॥२३॥
पद्ममालः सुभौमश्च जातः पद्मरथो नृपः । ततश्चक्री महापद्मो विष्णुपद्मो तु तत्सुतौ ॥२४॥
सुपद्मः पद्मदेवश्च कुलकीर्तिस्ततः परः । कीर्तिः सुकीर्तिकीर्ती तौ वसुकीर्त्तिश्च वीर्यवान् ॥२५॥
वासुकिर्वासवाभिख्यो वसुः सुवसुरेव च । पुरुवंशश्रियो नाथः श्रीवसुश्च वसुन्धरः ॥२६॥
जज्ञे वसुरथस्तस्मादिन्द्रवीर्यश्च वीर्यवान् । चित्रो विचित्रो वीर्योऽथ विचित्रोऽपि महाबलः ॥२७॥
ततो विचित्रवीर्योऽभूत्ततश्चित्ररथो नृपः । महारथो धृतरथो वृषानन्तो वृषध्वजः ॥२८॥
श्रीव्रतो व्रतधर्मा च धृतो धारण एव च । महासरः प्रतिसरः शरः पारशरो नृपः ॥२९॥
शरद्वीपश्च राजाऽसौ द्वीपो द्वीपायनो नृपः । सुशान्तिः शान्तिभद्रश्च शान्तिषेणश्च भूपतिः ॥३०॥
भर्त्ता योजनगन्धाया राजपुत्र्यास्तु शन्तनुः । तनयः शन्तनोर्भूद्धृतव्यास इति स्मृतिः ॥३१॥
धृतधर्मा ततस्तस्य तनयोऽपि धृतोदयः । धृततेजा धृतयशा धृतमानो धृतो नृपः ॥३२॥
ततोऽपि धृतराजोऽभूत्तस्य तिस्रः प्रियाङ्गनाः । अम्बिकाऽम्बालिकाऽम्बाख्या वेद्याभिजनसंभवाः ॥३३॥
धृतराष्ट्रश्च पाण्डुश्च विदुरश्च विदां वरः । यथाक्रममभी तासां तिसृणां तनयास्त्रयः ॥३४॥

जयराज हुए ॥१४-१५॥ इनके पश्चात् उसी वंशमें चतुर्थ चक्रवर्ती सनत्कुमार हुए जो रूप-पाशसे खिंचकर आये हुए देवोंके द्वारा सम्बोधित हो दीक्षित हो गये थे ॥१६॥ सनत्कुमारके सुकुमार नामका पुत्र हुआ। उसके बाद वरकुमार, विश्व, वैश्वानर, विश्वकेतु और बृहद्ध्वज नामक राजा हुए। तदनन्तर विश्वसेन राजा हुए जिनकी स्त्रीका नाम ऐरा था। इन्हींके पञ्चम चक्रवर्ती और सोलहवें तीर्थंकर शान्तिनाथ हुए ॥१७-१८॥ इनके पश्चात् नारायण, नरहरि, प्रशान्ति, शान्तिवर्धन, शान्तिचन्द्र, शशाङ्काङ्क और कुरु राजा हुए ॥१९॥ इत्यादि राजाओंके व्यतीत होनेपर इसी वंशमें सूर्य नामक राजा हुए जिनकी स्त्रीका नाम श्रीमती था। उन दोनोंके भगवान् कुन्थुनाथ उत्पन्न हुए जो तीर्थंकर भी थे और चक्रवर्ती भी थे ॥२०॥ तदनन्तर क्रम-क्रमसे बहुत राजाओंके व्यतीत हो जानेपर सुदर्शन नामक राजा हुए जिनकी स्त्रीका नाम मित्रा था। इन्हीं दोनोंके सप्तम चक्रवर्ती और अठारहवें तीर्थंकर अरनाथ हुए ॥२१-२२॥ उनके बाद सुचारु, चारु, चारुरूप और चारुपद्म राजा हुए। तदनन्तर अन्य राजाओंके हो चुकनेपर इसी वंशमें पद्ममाल, सुभौम और पद्मरथ राजा हुए। उनके बाद महापद्म चक्रवर्ती हुए। उनके विष्णु और पद्म नामक दो पुत्र हुए ॥२३-२४॥ तदनन्तर सुपद्म, पद्मदेव, कुलकीर्ति, कीर्ति, सुकीर्ति, कीर्ति, वसुकीर्ति, वासुकि, वासव, वसु, सुवसु, श्रीवसु, वसुन्धर, वसुरथ, इन्द्रवीर्य, चित्र, विचित्र, वीर्य, विचित्र, विचित्रवीर्य, चित्ररथ, महारथ, धृतरथ, वृषानन्त, वृषध्वज, श्रीव्रत, व्रतधर्मा, धृत, धारण, महासर, प्रतिसर, शर, पारशर, शरद्वीप, द्वीप, द्वीपायन, सुशान्ति, शान्तिभद्र, शान्तिषेण, योजनगन्धा राजपुत्रीके भर्ता शन्तनु और शन्तनुके राजा धृतव्यास पुत्र हुए ॥२५-३१॥ तदनन्तर धृतधर्मा, धृतोदय, धृततेज, धृतयश, धृतमान और धृत हुए। धृतके धृतराज नामक पुत्र हुआ। उसकी अम्बिका, अम्बालिका और अम्बा नामकी तीन स्त्रियाँ थीं जो उच्चकुलमें उत्पन्न हुई थीं ॥३२-३३॥ उनमें अम्बिकासे धृतराष्ट्र, अम्बालिकासे पाण्डु और अम्बासे

भीष्मोऽपि शन्तनोरेव सन्ताने रुक्मणः पिता । यस्य गङ्गाभिधा माता राजपुत्री पवित्रधीः ॥३५॥
धृतराष्ट्रस्य तनया दुर्योधनपुरस्सराः । नयपौरुषसम्पन्नाः परस्परहिते रताः ॥३६॥
पाण्डोः कुन्त्यां समुत्पन्नः कर्णः कन्याप्रसङ्गतः । युधिष्ठिरोऽर्जुनो भीम ऊढायामभवंस्त्रयः ॥३७॥
नकुलः सहदेवश्च कुलस्य तिलकौ सुतौ । मद्रयामद्रिस्थिरौ जातौ पञ्च ते पाण्डुनन्दनाः ॥३८॥
पाण्डौ स्वर्गं गते देव्यां मद्रयां च जिनधर्मतः । पाण्डवा धार्तराष्ट्राश्च राज्येऽभूवन्विरोधिनः ॥३९॥
विभज्य कौरवं राज्यं भुञ्जतां समभागतः । पञ्चानामेकतस्तेषामितरेषां तथैकतः ॥४०॥
भीष्मश्च विदुरो द्रोणो मध्यस्थाः शकुनिः पुनः । मन्त्री दुर्योधनस्येष्टाः शशरोमादयस्तथा ॥४१॥
अजर्यं सह कर्णेन वर्यं दुर्योधनस्य तु । जरासन्धेन नैभृत्यं[1] निभृतस्याभवत्तराम् ॥४२॥
भार्गवाचार्यकं द्रोणो धनुर्वेदविशारदः । कौन्तेयधार्तराष्ट्राणां चक्रे मध्यस्थभावतः ॥४३॥
भार्गवाचार्यवंशोऽपि श्रृणु श्रेणिक वर्ण्यते । द्रोणाचार्यस्य विख्याता शिष्याचार्यपरम्परा ॥४४॥
आत्रेयः प्रथमस्तत्र तच्छिष्यः [2]कौथुमिः सुतः । तस्याभूदमरावर्तः सितस्तस्यापि नन्दनः ॥४५॥
वामदेवः सुतस्तस्य तस्यापि च [3]कपिष्ठलः । जगत्स्थामा सरवरस्तस्य शिष्यः शरासनः ॥४६॥
तस्माद्रावण इत्यासीत्तस्य विद्रावणः सुतः । विद्रावणसुतो द्रोणः सर्वभार्गववन्दितः ॥४७॥
अश्विन्यामभवत्तस्मादश्वत्थामा धनुर्धरः । रणे यस्य प्रतिस्पर्धी पार्थ एव धनुर्धरः ॥४८॥

ज्ञानिश्रेष्ठ विदुर ये तीन पुत्र हुए ॥३४॥ भीष्म भी शन्तनुके ही वंशमें उत्पन्न हुए थे । धृतराज के भाई रुक्मण उनके पिता थे और पवित्र बुद्धिको धारण करनेवाली राजपुत्री गङ्गा उनकी माता थी ॥३५॥ राजा धृतराष्ट्रके दुर्योधन आदि सौ पुत्र थे जो नय-पौरुषसे युक्त तथा परस्पर एक दूसरेके हित करनेमें तत्पर थे ॥३६॥ राजा पाण्डुकी स्त्रीका नाम कुन्ती था, जिस समय राजा पाण्डुने गन्धर्व विवाह कर कुन्तीसे कन्या अवस्थामें संभोग किया था उस समय कर्ण उत्पन्न हुए थे और विवाह करनेके बाद युधिष्ठिर, अर्जुन और भीम ये तीन पुत्र हुए ॥३७॥ इन्हीं पाण्डुकी माद्री नामकी दूसरी स्त्री थी उससे नकुल और सहदेव ये दो पुत्र उत्पन्न हुए । ये दोनों ही पुत्र कुलके तिलकस्वरूप थे और पर्वतके समान स्थिर थे । युधिष्ठिरको आदि लेकर तीन तथा नकुल और सहदेव ये पाँच पाण्डव कहलाते थे ॥३८॥ जब राजा पाण्डु और रानी मद्री जिन-धर्मके प्रसादसे स्वर्गवासी हो गये तब पाण्डव और दुर्योधनादि धार्तराष्ट्र राज्य-विषयको लेकर एक दूसरेके विरोधी हो गये ॥३९॥ जब इनका विरोध बढ़ने लगा तब भीष्म, विदुर, द्रोण, मन्त्री शकुनि तथा दुर्योधनके मित्र शशरोम आदिने मध्यस्थ बनकर कौरवोंके राज्यके बराबर दो भाग कर दिये । एक भाग युधिष्ठिर आदि पाँच पाण्डवोंको मिला और दूसरा भाग दुर्योधन आदि सौ कौरवोंको प्राप्त हुआ ॥४०–४१॥

इधर दुर्योधनकी कर्णके साथ उत्तम मित्रता हो गयी और जरासंधके साथ स्थिर बैठकें होने लगीं ॥४२॥ द्रोणाचार्य धनुर्विद्यामें अत्यन्त निपुण थे और वे मध्यस्थ-भावसे पाण्डवों तथा कौरवोंके लिए भार्गवाचार्यका काम करते थे अर्थात् दोनोंको समान रूपसे धनुर्विद्याका उपदेश देते थे ॥४३॥ गौतमस्वामी कहते हैं कि हे श्रेणिक ! द्रोणाचार्यकी शिष्य और आचार्योंकी परम्परा तो प्रसिद्ध है अतः उसे छोड़ भार्गवाचार्यकी वंशपरम्पराका वर्णन करता हूँ उसे सुन ॥४४॥ भार्गवका प्रथम शिष्य आत्रेय था, उसका शिष्य कौथुमि पुत्र था, कौथुमिका अमरावर्त, अमरावर्तका सित, सितका वामदेव, वामदेवका कपिष्ठल, कपिष्ठलका जगत्स्थामा, जगत्स्थामाका सरवर, सरवरका शरासन, शरासनका रावण, रावणका विद्रावण और विद्रावणका पुत्र द्रोणाचार्य था जो समस्त भार्गव वंशियोंके द्वारा वन्दित था—सब लोग उसे नमस्कार करते थे ॥४५–४७॥ द्रोणाचार्यकी अश्विनी नामक स्त्रीसे

१. नैर्वृत्यं ग० । २. कौण्डिनिः म० । ३. कपिष्टकः म० ।

पार्थप्रतापविज्ञानमात्सर्योपहता अथ । दुर्योधनादयः कर्तुं सन्धिदूषणमुद्यताः ॥४९॥
पञ्च कौरवराज्यार्धमेकतः शतमेकतः । भुञ्जन्ति किमितोऽन्यत्स्यादन्याय्यमिति ते जगुः ॥५०॥
समुद्रा इव चत्वारस्ततः परुषवायुभिः । अपि प्रसन्नगम्भीराः क्षुभिताः पाण्डुनन्दनाः ॥५१॥
छादयामि द्विषच्छैलं शरधाराभिरुच्छ्रितम् । इत्युत्थितोऽर्जुनोऽम्भोदः शमितोऽग्रजवायुना ॥५२॥
दृष्ट्या दहामि दायादशतमित्युदितं ब्रुवन् । मन्त्रेणाशीशमज्ज्यायान् स्फुरद्भीमभुजङ्गमम् ॥५३॥
अहितापकुलान्ताय नकुलोऽपि कृतोद्यमः । ज्येष्ठेन सनयं रुद्धो भुजपञ्जरयन्त्रितः ॥५४॥
भस्मयामि लघु द्वेषिवनखण्डमिति ज्वलन् । अशामि ज्येष्ठमेघेन सहदेवदवानलः ॥५५॥
वसतां शान्तचित्तानां दिनैः कतिपयैरपि । प्रसुप्तानां गृहं तेषां दीपितं धृतराष्ट्रजैः ॥५६॥
विबुध्य सहसा मात्रा सत्रा ते पञ्चपाण्डवाः । सुरङ्गया विनिःसृत्य गताः क्वाप्यपभीरवः ॥५७॥
ततोऽपरागो लोकस्य जातो दुर्योधनं प्रति । क्व वा पापानुरागाढ्ये नापरागः सतो भवेत् ॥५८॥

अश्वत्थामा नामक पुत्र हुआ था। यह अश्वत्थामा बड़ा धनुर्धारी थी और युद्धमें एक अर्जुन ही उसका प्रतिस्पर्धी था—अर्जुन ही उसकी बराबरी कर सकता था अन्य नहीं ॥४८॥

तदनन्तर अर्जुनके प्रताप और विज्ञानसे ईर्ष्या रखनेवाले दुर्योधन आदि कौरव सन्धिमें दोष लगानेके लिए उद्यत हो गये अर्थात् अर्जुनके लोकोत्तर प्रताप और अनुपम सूझ-बूझसे ईर्ष्या कर कौरव लोग राज्यके विषयमें पहले जो सन्धि हो चुकी थी उसमें दोष लगाने लगे ॥४९॥ वे कहने लगे कि कौरवोंके आधे राज्यको एक ओर तो सिर्फ पाँच पाण्डव भोगते हैं और एक ओर आधे राज्यको हम सौ भाई भोगते हैं—इससे बढ़कर अन्याय-पूर्ण कार्य और क्या होगा? ॥५०॥ दुर्योधनादिकका यह विचार पाण्डवोंने भी सुना। पाण्डवोंमें युधिष्ठिर शान्तिप्रिय व्यक्ति थे अतः उन्होंने इस ओर कुछ ध्यान नहीं दिया परन्तु शेष चार पाण्डव प्रसन्न तथा गम्भीर होनेपर भी उस तरह क्षोभको प्राप्त हो गये जिस तरह कि प्रचण्ड वायुसे चारों दिशाओंके चार समुद्र क्षोभको प्राप्त हो जाते हैं ॥५१॥ अर्जुनरूपी मेघ यह कहता हुआ उठकर खड़ा हो गया कि मैं उठते हुए इस शत्रुरूपी पर्वतको बाणरूपी जलकी धारासे अभी हाल आच्छादित किये देता हूँ परन्तु युधिष्ठिररूपी वायुने उसे शान्त कर दिया ॥५२॥ भीमरूपी भुजङ्ग यह कहकर उठ खड़ा हुआ कि मैं सौ-के-सौ हिस्सेदारोंको अपनी दृष्टिसे अभी भस्म किये देता हूँ परन्तु बड़े भाई युधिष्ठिरने उसे मन्त्रके द्वारा शान्त कर दिया ॥५३॥ नकुल भी, नकुल (नेवला) के समान-शत्रुरूपी सर्पोंके सन्ताप-दायी कुलका अन्त करनेके लिए उद्यम करने लगा परन्तु अग्रज—युधिष्ठिरने उसे अपने भुजरूपी पिंजरेमें कैद कर रोक रखा ॥५४॥ और सहदेवरूपी दावानल यह कहता हुआ देदीप्यमान होने लगा कि मैं शत्रुरूपी वनखण्डको अभी हाल भस्म किये देता हूँ परन्तु बड़े भाई—युधिष्ठिररूपी मेघने उसे शान्त कर दिया ॥५५॥

तदनन्तर सब पाण्डव शान्तचित्त होकर रहने लगे। कुछ दिनों बाद जब वे गहरी नींदमें सो रहे थे तब कौरवोंने उनके घरमें आग लगवा दी ॥५६॥ सहसा उनकी नींद खुल गयी और पाँचोंके पाँच पाण्डव माताको साथ ले सुरङ्गसे निकलकर निर्भय हो कहीं चले गये ॥५७॥ इस घटनासे जनताका दुर्योधनके प्रति विद्वेष उमड़ पड़ा सो ठीक ही है क्योंकि पापमें अनुराग रखनेवाले किस पुरुषपर सज्जनोंको विद्वेष नहीं होता? अर्थात् सभीपर होता

---

१. राज्यार्थं म०, ग० । २. अहितानां शत्रूणामपकृष्टं कुलमपकुलं तस्यान्तस्तस्मै, पक्षे तापेनोपलक्षितं कुलं तापकुलं अहीनां सर्पाणां यत् तापकुलं तस्यान्तस्तस्मै । ३. नकुलः पाण्डवः पक्षे नकुलो जन्तुविशेषः । ४. शान्तः कृतः ।

प्रलीनानेव तान्मत्वा पाण्डवान् गोत्रजास्ततः । निवृत्ता इव ते तस्थुः कृतकालोचितक्रियाः ॥५९॥
नदीं गङ्गां समुत्तीर्य कौन्तेयास्तु महाधियः । कृतवेषपरावर्तास्ते पूर्वां दिशमाश्रिताः ॥६०॥
कुन्तीगतिवशेनैते गच्छन्तः सुखमिच्छया । कौशिकाख्यां पुरीं प्राप्ता वर्णो यत्र नरेश्वरः ॥६१॥
तस्य प्रभावती भार्या सुता कुसुमकोमला । जनानुरागतस्तांस्तान्[2] श्रुत्वा दृष्टवती तदा ॥६२॥
युधिष्ठिरकुमारेन्दुदर्शनेन सुदर्शना । कन्याकुमुद्वती धन्या विकासमगमत्परम् ॥६३॥
अचिन्तयदसौ तस्य भाविनी प्रियभामिनी । इह जन्मनि मे भूयादयमेव परो वरः ॥६४॥
ज्ञात्वाभिप्रायमस्याः स संजातप्रेमबन्धनः । आशाबन्धं प्रदर्श्यागात्संज्ञयैव करग्रहे ॥६५॥
प्रतीक्षमाणया तस्य तया भूयः समागमम् । नीयते स्म विनोदैः स्वैः कालः कन्याजनोचितैः ॥६६॥
ततस्ते ललिताकाराः स्वभावेन सहोदराः । द्विजवेषभृतो जग्मुर्जनचित्तापहारिणः ॥६७॥
आसनं शयनं तेषां भोजनं च मनोहरम् । सुखेनैव सुपुण्यानामचिन्तितमभूत्तदा ॥६८॥
पुनस्तापसवेषेण प्राप्ताः श्लेष्मान्तकं वनम् । ते तापसाश्रमे रम्ये विशश्रमुरिहार्चिताः ॥६९॥
वसुन्धरपुरेशस्य विन्ध्यसेनस्य देहजा । वसन्तसुन्दरीनाम्ना नर्मदाजा[3]ऽस्ति तत्र च ॥७०॥
युधिष्ठिराय सा दत्ता पुरैव गुरुभिर्वरा । दग्धवार्तामुपश्रुत्य निन्दितस्वपुराकृता ॥७१॥
जन्मान्तरेऽपि काङ्क्षन्ती तस्य कान्तस्य दर्शनम् । तपश्चरितुमारब्धा तत्र सा तापसाश्रमे ॥७२॥

है ॥५८॥ तदनन्तर कुटुम्बके लोगोंने समझा कि पाण्डव तो इसी आगमें भस्म हो चुके हैं इसलिए वे मरणोत्तरकाल होनेवाली क्रियाओंको कर निश्चिन्त-जैसे होकर रहने लगे ॥५९॥

इधर महाबुद्धिमान् पाण्डव गङ्गा नदीको पार कर तथा वेष बदलकर पूर्व दिशाकी ओर गये ॥६०॥ माता कुन्ती धीरे-धीरे चल पाती थी इसलिए वे उसकी चालके अनुसार इच्छापूर्वक सुखसे धीरे-धीरे चलते हुए उस कौशिक नामकी नगरीमें पहुँचे जहाँ वर्ण नामका राजा रहता था ॥६१॥ राजा वर्णकी स्त्रीका नाम प्रभावती था और उससे उसके कुसुमकोमला नामकी पुत्री उत्पन्न हुई थी। पाण्डवोंपर लोगोंका अधिक अनुराग था इसलिए कुसुमकोमलाने भी उनका नाम सुना तथा उन्हें देखा ॥६२॥ वह भाग्यशालिनी सुन्दर कन्यारूपी कुमुदिनी, युधिष्ठिररूपी चन्द्रमाको देखनेसे परम विकासको प्राप्त हो गयी ॥६३॥ जो युधिष्ठिरकी प्रिय स्त्री होनेवाली थी ऐसी कन्या कुसुमकोमला उन्हें देख मनमें विचार करने लगी कि इस जन्ममें मेरे यही उत्तम पति हों ॥६४॥ कन्याके अभिप्रायको जानकर युधिष्ठिरके भी प्रेमरूपी बन्धन समुत्पन्न हो गया और वे उसे इशारेसे विवाहकी आशा दिखा आगे चले गये ॥६५॥ कुसुमकोमला, उनके पुनः समागमकी प्रतीक्षा करती हुई कन्याजनोंके योग्य विनोदोंसे समय बिताने लगी ॥६६॥

तदनन्तर जो स्वभावसे ही सुन्दर आकारके धारक थे ऐसे वे पाँचों भाई ब्राह्मणका वेष रख, मनुष्योंके चित्तको हरते हुए आगे चले ॥६७॥ वे सब महापुण्यशाली जीव थे इसलिए उस अज्ञातवासके समय भी उन्हें मनोहर आसन, शयन और भोजन सुखपूर्वक अचिन्तित रूपसे प्राप्त होते रहते थे ॥६८॥ तत्पश्चात् वे तापसके वेषमें श्लेष्मान्तक नामक वनमें पहुँचे वहाँ तापसोंके सुन्दर तपोवनमें उन्होंने विश्राम किया और तापसोंने उनका अच्छा सत्कार किया ॥६९॥ उस आश्रममें वसुन्धरपुरके राजा विन्ध्यसेनकी वसन्तसुन्दरी नामकी पुत्री, जो कि नर्मदा नामक स्त्रीसे उत्पन्न हुई थी रहती थी ॥७०॥ यह कन्या गुरुजनोंने युधिष्ठिरके लिए पहले ही दे रखी थी परन्तु जब उनके जल जानेका समाचार सुना तब वह अपने पूर्वकृत कर्मकी निन्दा करती हुई इस इच्छासे कि 'उन प्राणनाथका दर्शन इस जन्ममें न हो सका तो जन्मान्तरमें हो', तपस्वियोंके उस आश्रममें तप करने लगी थी ॥७१-७२॥ वह

१. -मास्तृताः म० । २. तास्तान् म० । ३. नर्मदायाश्च तत्र च क० । नर्मदायास्ति—ग०, घ०, ङ ।

उदाररूपलावण्या दुकूलपटसाटिका। जटिला वटशाखेव स्निग्धच्छाया व्यराजत ॥७३॥
आकर्णायतनेत्राभ्यां स्वधरेण[1] मुखेन्दुना। जघनस्तनभारेण मनो हरति तापसी ॥७४॥
पूज्या तापसलोकस्य सकलस्य तपोवनम्। अकरोत्पावनं तन्वी चन्द्रलेखेव निर्मला ॥७५॥
कौन्तेयानां कृतातिथ्या तापसोचितवृत्तिभिः। जहार हारिवाक्यासौ क्षुत्पिपासापथश्रमम् ॥७६॥
कुन्ती पप्रच्छ तां प्रीत्या बाले! कमलकोमले। नवे वयसि वैराग्यं कुतो जातमतिव्रते[2] ॥७७॥
इति सानुनयं पृष्टा राजपुत्री जगौ गिरा। मनो मधुरया तेषां हरन्ती हरिणेक्षणा ॥७८॥
साधु पृष्टं त्वया पूज्ये! श्रूयतामत्र कारणम्। सज्जनो हि मनोदुःखं निवेदितमुदस्यति[3] ॥७९॥
कौरवाय पुरैवाहं कौन्तेयायाग्रजाय हि। स्वभावोदारचेष्टाय गुरुभिर्विनिवेदिता ॥८०॥
समातृभ्रातृकस्यास्य मदपुण्यप्रभावतः। श्रुता वार्ता जनेभ्यो या न स्मर्तुमपि शक्यते ॥८१॥
दाहदुःखमृतं कान्तं युक्तं तेनैव वर्त्मना। अनुमर्तुं तु तापस्ये शक्तिहीनतया स्थिता ॥८२॥
निशम्येति वचः सौम्या सा जगौ भाविनीं स्नुषाम्। कृतं भद्रं त्वया भद्रे कुर्वन्त्या प्राणरक्षणम् ॥८३॥
अन्यथा चिन्तयत्येष[4] मित्रे मित्रजनो जने। अन्यथा विधिरप्यस्मादर्थ्यते[5] दीर्घदर्शिता ॥८४॥
कल्याणहेतवः प्राणाः कल्याणि! मम वाक्यतः। तपस्यन्त्यापि धार्यन्तां जीवन्ती भद्रमाप्स्यसि ॥८५॥

अतिशय रूप और लावण्यकी धारक थी, सुन्दर स्वच्छ साड़ीसे सुशोभित थी, शिरपर जटाएँ रखाये हुई थी और स्निग्ध कान्तिसे सहित थी इसलिए पायोंको धारण करनेवाली स्निग्ध छायासे सहित वटवृक्षकी शाखाके समान सुशोभित हो रही थी ॥७३॥ वह तापसी कानों तक लम्बे नेत्र, सुन्दर ओंठ, मुखरूपी चन्द्रमा एवं नितम्ब और स्तनोंके भारसे सबका मन हरती थी ॥७४॥ वह समस्त तापसोंके द्वारा पूज्य थी, चन्द्रमाकी कलाके समान कृश तथा निर्मल थी और अपने आवाससे उस तपोवनको पवित्र करती थी ॥७५॥ मधुर वचन बोलनेवाली उस तापसीने तापसोंके योग्य वृत्तिसे पाण्डवोंका अतिथि-सत्कार किया तथा उनकी भूख-प्यास और मार्गकी थकावटको दूर किया ॥७६॥

एक दिन कुन्तीने बड़े प्रेमसे उससे पूछा कि हे कमलके समान कोमलाङ्गी बेटी! तुझे नयी अवस्थामें ही वैराग्य किस कारणसे हो गया है जिससे तूने यह कठिन व्रत धारण कर रखा है? ॥७७॥ इस प्रकार स्नेहके साथ पूछी जानेपर मृगनेत्री राजपुत्री मनोहर वाणीसे उनका मन हरती हुई बोली कि हे पूज्ये! आपने ठीक पूछा है, मेरे वैराग्यका कारण सुनिए क्योंकि सज्जन पुरुष बताये हुए मनके दुःखको दूर कर देते हैं ॥७८-७९॥ मेरे गुरुजनोंने मुझे स्वभावसे उत्तम चेष्टाके धारक पाण्डवोंके बड़े भाई युधिष्ठिरके लिए पहले ही दे रखा था ॥८०॥ परन्तु मेरे पापके प्रभावसे माता और भाइयोंके साथ उनके विषयका जो समाचार लोगोंसे सुना है उसका स्मरण भी नहीं किया जा सकता ॥८१॥ 'मेरा पति दाहके दुःखसे मरा है इसलिए मुझे भी उसी मार्गसे मरना युक्त था परन्तु मैं शक्तिहीन होनेके कारण उस मार्गसे मर नहीं सकी इसलिए तपस्या करने लगी हूँ' ॥८२॥

तापसीके वचन सुन उसे होनहार पुत्रवधू जान सौम्य स्वभावकी धारक कुन्तीने कहा कि हे भद्रे! तूने बहुत उत्तम किया जो प्राणोंकी रक्षा की ॥ ८३ ॥ मित्रजन, मित्रजनके विषयमें कुछ अन्य विचार करते हैं और भाग्य उससे विपरीत कुछ अन्य ही कार्य कर देता है इसलिए दीर्घदर्शिताकी आकांक्षा की जाती है ॥८४॥ हे कल्याणि! प्राण कल्याणके कारण हैं इसलिए मेरे कहनेसे तू तपस्या करती हुई भी इन्हें अवश्य धारण कर। यदि

---

१. सुष्ठु अधरः स्वधरः तेन। २. जातमितिव्रते म०। ३. दूरीकरोति। ४. चिन्तयत्येषा म०, घ०, ग०, ङ०। ५. -दर्ष्यते म०, घ०, ग०, ङ०।

तदेवान्ववदत्पाण्डोः प्रथमस्तनयो यतः। धर्मं चाकथयद्युक्तमणुशीलगुणव्रतैः ॥८६॥
परस्परं समालापे मनः प्रीतिकरेऽनयोः। वर्तमाने तदा कन्या मनसामन्यतेति सा ॥८७॥
राजलक्षणयुक्तः स किं स्यादेष युधिष्ठिरः। समातृकोऽनुशास्तीह मामतीव कृपान्वितः ॥८८॥
सर्वथा मम पुण्येन गण्येन तपसापि च। सत्यसन्धः प्रियो जीव्यादना[1]हतिरिहोद्यमी ॥८९॥
यियासवस्तु युक्तानां पुनर्दर्शनमस्त्विति। सम्मानिताः[2] प्रियालापैर्युरस्थाच्च साशया ॥९०॥
[3]समुद्रविजयः श्रुत्वा स्वसृस्वस्रीयमारणम्। मारणाय कुरूणां स प्राप्तः कुपितमानसः ॥९१॥
जरासन्धस्ततः प्राप्य स्वयमेव महादरः। यदूनां कौरवाणां च सन्धिमापाद्य यातवान् ॥९२॥
इतोऽपि तापसाकारं त्यक्त्वेति द्विजवेषिणः। प्रयान्तो भ्रातरः कुन्त्या प्रापुरीहापुरं परम् ॥९३॥
भीमसेनो महाभीमं भृङ्गाभं भृङ्गराक्षसम्। मनुजाशनमुद्वास्य [4]तत्रास त्रासमङ्गिनाम् ॥९४॥
वीतभीभ्यः प्रजाभ्यस्ते [5]प्राप्तपूजाः समातृकाः। व्रजन्तः स्वेच्छया प्रापुस्त्रिशृङ्गाख्यं महापुरम् ॥९५॥
प्रचण्डवाहनस्तत्र प्रचण्डश्चण्डकर्मणाम्। आसीन्नृपतिरस्येष्टा वनिता विमलप्रभा ॥९६॥
रूपातिशयसम्पूर्णाः पूर्णचन्द्रसमाननाः। कलापारमिताः सर्वास्तयोर्दुहितरो दश ॥९७॥

जीवित रहेगी तो कल्याणको अवश्य प्राप्त करेगी ॥८५॥ पाण्डुके प्रथम पुत्र—युधिष्ठिरने भी माता कुन्तीके ही वचनोंका अनुवाद किया—वही बात कही और अणुव्रत, शीलव्रत तथा गुणव्रतोंसे युक्त धर्मका उपदेश दिया ॥८६॥ उस समय युधिष्ठिर तथा कन्याका, मनमें प्रीति उत्पन्न करनेवाला जो परस्पर वार्तालाप हुआ था उससे कन्याने मनमें यह समझा अर्थात् यह शङ्का उसके मनमें उत्पन्न हुई कि क्या यह राजाओंके लक्षणोंसे युक्त वही युधिष्ठिर हैं जो दयासे युक्त हो माताके साथ यहाँ मुझे अत्यधिक उपदेश दे रहे हैं ? मेरे पुण्य अथवा गणनीय आदरणीय तपसे ही यहाँ प्रकट हुए हैं। ये दृढ़प्रतिज्ञ और उद्यमी प्रिय, कुमार यहाँ बिना किसी आघातके चिर काल तक जीवित रहें ॥८७-८९॥

युधिष्ठिर आदि पाण्डव जब वहाँसे जाने लगे तब उस कन्याने 'आप शिष्ट जनोंका फिरसे दर्शन प्राप्त हो' यह कह मधुर वार्तालापसे उनका सम्मान किया। वे चले गये और कन्या युधिष्ठिरकी प्राप्तिकी आशासे उसी तपोवनमें रहने लगी ॥९०॥ इधर जब राजा समुद्रविजयने सुना कि दुर्योधनने हमारी बहिन तथा भानजोंको महलमें जला कर मार डाला है तब वे कुपित हो कौरवोंको मारनेके लिए आये ॥९१॥ तदनन्तर महान् आदरसे युक्त जरासन्धने स्वयं आकर यादवों और कौरवोंके बीच सन्धि करा दी। सन्धि कराकर जरासन्ध अपनी राजधानीको चला गया ॥९२॥

इधर पाण्डव तापसोंका वेष छोड़ सामान्य ब्राह्मणके वेषमें विचरण करने लगे और माता कुन्तीके साथ चलते-चलते सब ईहापुर नामक उत्तम नगरमें पहुँचे ॥९३॥ वहाँ एक भ्रमरके समान काला भृङ्गराक्षस नामका महाभयंकर नरभोजी राक्षस मनुष्योंको दुःखी कर रहा था सो भीमसेनने उसे नष्ट कर वहाँके निवासियोंका भय दूर किया ॥९४॥ जिनका भय नष्ट हो गया था ऐसे, प्रजाके लोगोंने मातासहित पाण्डवोंका खूब सत्कार किया। तदनन्तर इच्छानुसार चलते हुए वे त्रिशृङ्ग नामक महानगरमें पहुँचे ॥९५॥ वहाँ क्रूरकर्मा मनुष्योंके लिए तीव्र दण्ड देनेवाला प्रचण्डवाहन नामका राजा था। उसकी विमलप्रभा नामकी प्रिय स्त्री थी ॥९६॥ उन दोनोंके दश पुत्रियाँ थीं जो सबकी-सब रूपके अतिशयसे युक्त, पूर्ण चन्द्रमाके समान मुखवाली और कलाओंमें पारङ्गत थीं ॥९७॥ उनके नाम थे—

१. -दन्याहति म०। २. सम्मानिता म०। ३. ९१-९२ तमौ श्लोकौ क-पुस्तके केनापि रेखां दत्त्वा-न्यक्कृतौ। ४. तत्र + त्रास। तत्र = नगरे, अङ्गिनां त्रासम्, आस = क्षिप्तवान्। ५. प्राप्तपूजा म०।

आद्या गुणप्रभा तासु सुप्रभा ह्रीश्रियौ रतिः । पद्मा चेन्दीवरा विश्वा[1] चर्या चाशोकया सह ॥९८॥
युधिष्ठिराय ताः सर्वाः पूर्वमेव निवेदिताः । लब्ध्वा [2]तस्यान्यथा वार्त्तामणुव्रतधराः स्थिताः ॥९९॥
इभ्योऽपि प्रियमित्राख्यस्तत्र पुर्यां सपर्यया । अन्ववर्तत कौन्तेयान्[3] पुरुषान्तरविद्धनी ॥१००॥
सोमिनी भामिनी तस्य कन्या नयनसुन्दरी । सौन्दर्येण स्वरूपेण नयनानन्ददायिनी ॥१०१॥
युधिष्ठिराय वीराय प्रागेव प्रतिपादिता । राजपुत्र्यो यथा पूर्वास्तथा सा तद्व्रता स्थिता[4] ॥१०२॥
राजा सभार्य इभ्यश्च महापुरुषवेदिनौ । कुन्तीपुत्राय ताः कन्या ज्यायसे दातुमिच्छतः ॥१०३॥
तास्तु [5]निश्चिन्तचित्तत्वादन्यलोकगतोऽपि हि । स एष पतिरस्माकमिति नेच्छन्ति तं द्विजम् ॥१०४॥
ततोऽपि नगराद्याता [6]नगराजस्थिरात्मकाः । प्राप्ताश्चम्पापुरीं तेऽमी कर्णो यत्र महानृपः ॥१०५॥
तत्र भीमो महानागं पुरमध्ये मदोत्कटम् । प्रक्रीड्य[7] निर्मदीचक्रे [8]कर्णसंक्षोभकृत्कृती ॥१०६॥
ततोऽपि वैदिशं [9]याता पुरं सुरपुरोपमम् । राजा वृषध्वजो यत्र युवराजो दृढायुधः ॥१०७॥
दिशावली प्रिया राज्ञो दिशानन्दा तु नन्दना । दिशासु विदिताकारा दिशामिव विशुद्धता ॥१०८॥
भीमो राजगृहे राज्ञा गम्भीरस्वरदर्शनः । अदृश्यतदृशां[10] कान्तो भिक्षार्थी किल रूपवान् ॥१०९॥

---

१ गुणप्रभा, २ सुप्रभा, ३ ह्री, ४ श्री, ५ रति, ६ पद्मा, ७ इन्दीवरा, ८ विश्वा, ९ आचर्या और १० अशोका। इनमें गुणप्रभा ज्येष्ठ थी ॥९८॥ ये सभी कन्याएँ पहले युधिष्ठिरके लिए प्रदान की गयी थीं परन्तु बादमें उनका अन्यथा समाचार प्राप्त कर वे अणुव्रतोंको धारण करनेवाली श्राविकाएँ बन गयी थीं ॥९९॥ उसी त्रिश्रृङ्गपुरमें एक प्रियमित्र नामका सेठ रहता था जो बहुत भारी धनी तथा पुरुषोंके अन्तरको समझनेवाला था। पाण्डवोंको विशिष्ट पुरुष समझ उसने उनका बहुत सत्कार किया ॥१००॥ उसकी सोमिनी नामकी स्त्री थी और उससे उसके स्वरूप तथा सौन्दर्यसे नेत्रोंको आनन्द देनेवाली नयनसुन्दरी नामकी कन्या हुई थी ॥१०१॥ यह कन्या वीर युधिष्ठिरके लिए पहले ही दे दी गयी थी इसलिए वह भी पूर्वोक्त राजपुत्रियोंके समान अणुव्रत धारण कर रहती थी ॥१०२॥ राजा प्रचण्डवाहन और अपनी स्त्रीसहित सेठ प्रियमित्र, ब्राह्मणवेषधारी पाण्डवोंको महापुरुष समझते थे इसलिए ज्येष्ठ पुत्र युधिष्ठिरके लिए वे सब कन्याएँ देना चाहते थे ॥१०३॥ परन्तु कन्याओंने अपने मनमें यह दृढ़ निश्चय कर लिया था कि 'युधिष्ठिर भले ही परलोक चले गये हों पर इस भवमें वे ही मेरे पति हैं अन्य नहीं।' इस निश्चयसे उन्होंने ब्राह्मणवेषधारी युधिष्ठिरको अन्य पुरुष समझ स्वीकृत नहीं किया ॥१०४॥

तदनन्तर सुमेरुके समान स्थिरचित्तके धारक वे सब पाण्डव उस नगरसे भी चल दिये और चलते-चलते उस चम्पापुरीमें पहुँचे जहाँ महाराजा कर्ण राज्य करते थे ॥१०५॥ वहाँ एक मदोन्मत्त बड़ा हाथी नगरमें उपद्रव मचा रहा था सो कुशल भीमने क्रीड़ा कर उसे मदरहित कर दिया। भीमकी यह वीरता देख कर्णको क्षोभ उत्पन्न हुआ ॥१०६॥ वहाँसे चलकर वे इन्द्रपुरके समान सुन्दर वैदिशपुर पहुँचे। उस समय वहाँका राजा वृषध्वज था और युवराज दृढायुध था ॥१०७॥ राजा वृषध्वजकी रानीका नाम दिशावली था और उसके दिशानन्दा नामकी पुत्री थी। दिशाओंकी विशुद्धताके समान दिशानन्दाकी सुन्दरता समस्त दिशाओंमें प्रसिद्ध थी ॥१०८॥ एक दिन गम्भीर स्वर और गम्भीर दृष्टिको धारण करनेवाले, नेत्रप्रिय रूपवान् भीम भिक्षाकी अभिलाषासे राजमहलमें गये।

---

१. विश्वाचार्या म० । २. युधिष्ठिरस्य । ३. कौन्तेया म० । ४. स्थिताः म० । ५. निश्चित म० । ६. नगराज इव सुमेरुरिव स्थिर आत्मा येषां ते । ७. प्रक्रीडन् क० । ८. वर्ण–म० । ९. जाताः क०, ग०, घ०, म० । १०. दृशा कान्ता म० ।

ज्ञात्वा महानरं तं च कन्यामादाय तां नृपः । सान्तःपुरः पुरः स्थित्वा जगाद मधुरं वचः ॥११० ॥
तवानुरूपकन्येयं दीयते प्रतिपद्यताम्[1] । भिक्षा प्रसारय श्रीमन्[2] पाणिं पाणिग्रहं प्रति ॥१११॥
अपूर्वेयमहो भिक्षा नेदृशीं प्रति साम्प्रतम् । स्वातन्त्र्यमिति सम्भाष्य गत्वा तेभ्यो न्यवेदयत् ॥११२॥
सार्धं मासमिह स्थित्वा पुरे जग्मुरमी ततः । तरीत्य(?)नर्मदां नर्मप्रवणां विन्ध्यमाविशन् ॥११३॥
सन्ध्याकारेऽन्तरद्वीपे सन्ध्याकारे पुरे नृपः । हिडम्बवंशसंभूतः सिंहघोषोऽवतिष्ठते ॥११४॥
देवी सुदर्शना तस्य सुता हृदयसुन्दरी । मेघवेगः त्रिकूटेन्द्रो याचित्वा तां न लब्धवान् ॥११५॥
यो [3]हनिष्यति तं विन्ध्ये गदाविद्याप्रसाधकम् । भर्त्ता हृदयसुन्दर्या इति नैमित्तिकागमः ॥११६॥
द्रुमकोटरमध्यास्य साधयन्तं खगं गदाम् । तयैव गदया सागं[4] भीमोऽ[5]पीपतदेकदा[6] ॥११७॥
ततो हृदयसुन्दर्या भीमसेनस्य संगमः । हैडिम्बेन च सम्बन्धः संबभूव महोत्सवः ॥११८॥
विहृत्य विविधान् देशान् दाक्षिणात्यान् महोदयाः । ते हास्तिनपुरं गन्तुं प्रवृत्ताः पाण्डुनन्दनाः ॥११९॥
प्राप्ता मार्गवशाद्दिवे माकन्दीं नगरीं दिवः । प्रतिच्छन्दस्थितिं [7]दिव्यान् दधाना देवविभ्रमान्[8] ॥१२०॥
द्रुपदोऽस्यास्तदा भूपस्तस्य भोगवती प्रिया । धृष्टद्युम्नादयः पुत्राः प्रत्येकं दृष्टशक्तयः ॥१२१॥

वहाँ राजा वृषध्वजने उन्हें देखा ॥१०९॥ देखते ही उसने समझ लिया कि यह कोई महापुरुष है इसलिए वह कन्या दिशानन्दाको लेकर अपने अन्तःपुरके साथ भीमके आगे खड़ा हो गया और इस प्रकारके मधुर वचन कहने लगा ॥११०॥ 'हे श्रीमन्! यह कन्या ही आपके लिए अनुरूप भिक्षा है इसलिए इसे स्वीकृत कीजिए, पाणिग्रहणके लिए हाथ पसारिए' ॥१११॥ भीमने कहा कि 'अहा! यह भिक्षा तो अपूर्व रही, इस समय ऐसी भिक्षा स्वीकृत करनेके लिए मैं स्वतन्त्र नहीं हूँ'। उक्त उत्तर दे भीमने अपने आवासस्थानपर आकर युधिष्ठिर आदिके लिए यह समाचार सुनाया ॥११२॥ तदनन्तर ये सब इस नगरमें डेढ़ मास तक रहे। उसके बाद क्रीड़ाओंके प्रदान करनेमें निपुण नर्मदा नदीको पार कर विन्ध्याचलमें प्रविष्ट हुए ॥११३॥ विन्ध्याचलके बीच सन्ध्याके आकारका एक अन्तरद्वीप था उसके सन्ध्याकार नामक नगरमें हिडम्बवंशमें उत्पन्न राजा सिंहघोष रहता था ॥११४॥ उसकी सुदर्शना नामकी स्त्री थी और उससे हृदयसुन्दरी नामकी पुत्री उत्पन्न हुई थी। त्रिकूटाचलका स्वामी मेघवेग उस हृदयसुन्दरीको चाहता था और उसके निमित्त उसने राजा सिंहघोषसे याचना भी की थी परन्तु वह उसे प्राप्त नहीं कर सका ॥११५॥ हृदयसुन्दरीके विषयमें निमित्तज्ञानियोंने यह कहा था कि 'विन्ध्याचलपर गदाविद्याको सिद्ध करनेवाले विद्याधरको जो मारेगा वही हृदयसुन्दरीका पति होगा' ॥११६॥ भीमने विन्ध्याचलपर जाकर देखा कि एक विद्याधर वृक्षकी कोटरमें बैठकर गदाको सिद्ध कर रहा है। देखते ही भीमने वह गदा हाथमें ले ली और उसीके प्रहारसे उस वृक्षको एक साथ गिरा दिया ॥११७॥ तदनन्तर भीमका हृदयसुन्दरीके साथ समागम हुआ। हिडिम्बवंशी राजा सिंहघोषके साथ पाण्डवोंका यह सम्बन्ध महान् हर्षका कारण हुआ ॥११८॥

तदनन्तर महान् अभ्युदयको धारण करनेवाले पाण्डव दक्षिणके नाना देशोंमें बिहार कर हस्तिनापुर जानेके लिए उद्यत हुए ॥११९॥ मार्गके वश चलते-चलते वे सब, स्वर्गके प्रतिबिम्बको धारण करनेवाली माकन्दी नगरी पहुँचे। उस समय सुन्दर शरीरसे सुशोभित पाण्डव देवोंके विभ्रमको धारण कर रहे थे—देवोंके समान जान पड़ते थे ॥१२०॥ वहाँका राजा द्रुपद था, उसकी स्त्रीका नाम भोगवती था और उन दोनोंके धृष्टद्युम्न आदि अनेक

१. भिक्षां क०, ख०, ग०, घ० । २. श्रीमान् म०, श्रीमन् ख०, घ० । ३. हतिष्यति म० । ४. सवृक्षं । ५. पातयामास । ६. सोऽङ्गं भीमोऽपापटचदेकदा म० । ७. दिव्यां म० । ८. देवविभ्रमाः म० दिव्यां दधानां देवविभ्रमाः घ० ।

रूपलावण्यसौभाग्यकलालंकृतविग्रहा। द्रौपदी तनया तस्य द्रुपदस्योपमोज्झिता ॥१२२॥
तस्याः कृते कृताः सर्वे [1]मनोजेन नृपात्मजाः। सग्रहा इव याचन्ते नानोपायनपाणयः ॥१२३॥
दाक्षिण्यभङ्गभीतेन द्रुपदेन ततो नृपाः। विश्वे चन्द्रकवेधार्थमाहूताः कन्यकार्थिनः ॥१२४॥
द्रौपदीग्रहवश्यानां [2]काश्यप्यामिह भूभृताम्। कर्णदुर्योधनादीनां माकन्द्यां निवहोऽभवत् ॥१२५॥
सुरेन्द्रवर्धनः खेन्द्रः स्वसुतावरमार्गणैः। धनुर्गाण्डीवमादेशाद्दिव्यं तत्र तदाऽकरोत् ॥१२६॥
चण्डगाण्डीवकोदण्डमण्डलीकरणक्षमः। राधावेधसमर्थो यो द्रौपद्याः स भवेत्पतिः ॥१२७॥
इतीमां घोषणां श्रुत्वा द्रोणकर्णादयो नृपाः। समेत्य मण्डलीभूय कोदण्डमभितः स्थिताः ॥१२८॥
देवताधिष्ठितायास्तैश्चापयष्टेः प्रदर्शनम्। आसीत्सत्या इवाशक्यं स्पर्शनाकर्षणे कुतः ॥१२९॥
भाविना स्वामिना पश्चादर्जुनेन स[3]दर्जुना। दृष्ट्वा स्पृष्ट्वा तदाकृष्टा स सतीव वशं स्थिता ॥१३०॥
आरोप्याकृष्य पार्थेन धनुर्ज्यास्फालिताक्षिभिः[4]। भ्रान्तं वधिरितं कर्णैः कर्णादीनां पटुध्वनौ ॥१३१॥
वितर्कः कर्कशं दृष्ट्वा तं तेषामित्यभूदयम्। सहजैः सहजैश्वर्यो मृत्वोत्पन्नः किमर्जुनः ॥१३२॥
धन्विनः स्थानमन्यस्य सामान्यस्येदृशं कुतः। अहो दृष्टिरहो मुष्टिरहो सौष्ठवमित्यपि ॥१३३॥

पुत्र थे जो एकसे-एक बढ़कर बलवान् थे ॥१२१॥ राजा द्रुपदकी एक द्रौपदी नामकी पुत्री भी थी जिसका शरीर रूप लावण्य सौभाग्य तथा अनेक कलाओंसे अलंकृत था एवं जो अपने सौन्दर्यके विषयमें सानी नहीं रखती थी ॥१२२॥ कामदेवने सब राजपुत्रोंको उसके लिए पागल-सा बना दिया था इसलिए वे नाना प्रकारके उपहार हाथमें ले उसकी याचना करते थे ॥१२३॥ तदनन्तर 'किस-किससे बुराई की जाये' यह विचार दाक्षिण्य-भङ्गसे भयभीत राजा द्रुपदने कन्याकी इच्छा रखनेवाले सब राजकुमारोंको चन्द्रक यन्त्रका वेध करनेके लिए आमन्त्रित किया ॥१२४॥ इस पृथिवीपर द्रौपदीरूपी ग्रहके वशीभूत हुए कर्ण, दुर्योधन आदि जितने राजा थे उन सबका झुण्ड माकन्दी नगरीमें इकट्ठा हो गया ॥१२५॥ उसी समय सुरेन्द्रवर्धन नामका एक विद्याधर राजा अपनी पुत्रीके योग्य वर खोजनेके लिए वहाँ आया और उसने राजा द्रुपदकी आज्ञासे गाण्डीव नामक धनुषको वरकी परीक्षाका साधन निश्चित किया ॥१२६॥ उस समय यह घोषणा की गयी कि 'जो अत्यन्त भयङ्कर गाण्डीव धनुषको गोल करने एवं राधावेध (चन्द्रकवेध) में समर्थ होगा वही द्रौपदीका पति होगा' ॥१२७॥ इस घोषणाको सुनकर वहाँ जो द्रोण तथा कर्ण आदि राजा आये थे वे सब गोलाकार हो धनुषके चारों ओर खड़े हो गये ॥१२८॥ परन्तु सती स्त्रीके समान देवोंसे अधिष्ठित उस धनुष-यष्टिका देखना भी उनके लिए अशक्य था फिर छूना और खींचना तो दूर रहा ॥१२९॥

तदनन्तर जब सब परास्त हो गये तब द्रौपदीके होनहार पति एवं सदा सरल प्रकृतिको धारण करनेवाले अर्जुनने उस धनुष-यष्टिको देखकर तथा छूकर ऐसा खींचा कि वह सती स्त्रीके समान इनके वशीभूत हो गयी ॥१३०॥ जब अर्जुनने खींचकर उसपर डोरी चढ़ायी और उसका आस्फालन किया तो उसके प्रचण्ड शब्दमें कर्ण आदि राजाओंके नेत्र फिर गये तथा कान बहरे हो गये ॥१३१॥ तीक्ष्ण आकृतिके धारक पार्थको देखकर कर्ण आदिके मनमें यह तर्क उत्पन्न हुआ कि क्या स्वाभाविक ऐश्वर्यको धारण करनेवाला अर्जुन अपने भाइयोंके साथ मरकर यहाँ पुनः उत्पन्न हुआ है? ॥१३२॥ अर्जुनके सिवाय अन्य सामान्य धनुर्धारीका ऐसा खड़ा होना कहाँ सम्भव है? अहा इसकी दृष्टि, इसकी मुट्ठी और इसकी चतुराई—

१. मनोवेगैर्नृपात्मजाः म०, क०। २. पृथिव्याम् 'क्षोणीज्या काश्यपी क्षितिः' इति धनञ्जयः। ३. सदा सर्वदा ऋजुना सरलेन। ४. क्षितिः म० (?)।

भ्रमच्चक्रसमारूढो बाणं संधृत्य दक्षिणः। लक्ष्यं चन्द्रकवेधाख्यं विव्याध[1] नृपसन्निधौ ॥१३४॥
द्रौपदी च द्रुतं मालां कन्धरेऽभ्येत्य बन्धुरे। अकरोत्करपद्माभ्यामर्जुनस्य वरेच्छया ॥१३५॥
विप्रकीर्णा तदा माला सहसा सहवर्तिनाम्। पञ्चानामपि गात्रेषु चपलेन नभस्वता ॥१३६॥
ततश्चपललोकस्य तरवमूढस्य कस्यचित्। वाचो[2] विचेरुरित्युच्चैर्वृताः पञ्चानयेत्यपि ॥१३७॥
सद्गन्धस्य सुवृक्षस्य तुङ्गस्य फलितस्य सा। पुष्पितेव लतासीदर्जुनस्याङ्गमाश्रिता ॥१३८॥
ततः कुन्त्याः समीपं सा [3]धीरमञ्जीरबन्धना। अग्रतः पश्यतां राज्ञां नीतानीतिविदां विदा ॥१३९॥
सन्नह्य ते नृपाः केचिदनुयाता युयुत्सवः। निषिद्धा अपि यत्नेन द्रुपदेन नयैषिणा ॥१४०॥
अर्जुनेन च भीमेन धृष्टद्युम्नेन च त्रिभिः। धन्विभिर्दूरतो रुद्धा नामितः पदमप्यदुः ॥१४१॥
धृष्टद्युम्नरथस्थेन स्वनामाङ्कः किरीटिना। द्रौणस्याङ्के शरः क्षिप्तः सर्वसंबन्धवाचकः ॥१४२॥
द्रोणाश्वत्थामवीराभ्यां भीष्मेण विदुरेण च। वाचितः सर्वसम्बन्धः प्रमदं प्रददौ[4] परम् ॥१४३॥
द्रुपदस्य सगोत्रस्य द्रोणादीनां च सौख्यतः[5]। शङ्खवादित्रनिर्घोषा[6] जाताः पाण्डवसंगमे ॥१४४॥
जातबान्धवसंबन्धे परमानन्ददायिनि। संवृत्या नन्दिताः पञ्च तेऽमी दुर्योधनादिभिः ॥१४५॥
द्रौपदी दीपिकेवासौ स्नेहसंभारपूरिता। पाणिग्रहणयोगेन दिदीपेऽर्जुनधारिता ॥१४६॥

सभी आश्चर्यकारी हैं ॥१३३॥ उधर राजा लोग ऐसा विचार कर रहे थे इधर अत्यन्त चतुर अर्जुन डोरीपर बाण रख झटसे चलते हुए चक्रपर चढ़ गया और राजाओंके देखते-देखते उसने शीघ्र ही चन्द्रकवेध नामका लक्ष्य बेध दिया ॥१३४॥ उसी समय द्रौपदीने शीघ्र ही आकर वरकी इच्छासे अर्जुनकी झुकी हुई सुन्दर ग्रीवामें अपने दोनों कर-कमलोंसे माला डाल दी ॥१३५॥ उस समय जोरदार वायु चल रही थी इसलिए वह माला टूटकर साथ खड़े हुए पाँचों पाण्डवोंके शरीरपर जा पड़ी ॥१३६॥ इसलिए विवेकहीन किसी चपल मनुष्यने जोर-जोरसे यह वचन कहना शुरू कर दिया कि इसने पाँच कुमारोंको वरा है ॥१३७॥ जिस प्रकार किसी सुगन्धित, ऊँचे एवं फलोंसे युक्त वृक्षपर लिपटी फूली लता सुशोभित होती है उसी प्रकार अर्जुनके समीप खड़ी द्रौपदी सुशोभित हो रही थी ॥१३८॥ तदनन्तर कुशल अर्जुन नूपुरोंके निश्चल बन्धनसे युक्त उस द्रौपदीको अनीतिज्ञ राजाओंके आगेसे उनके देखते-देखते माता कुन्तीके पास ले चला ॥१३९॥ युद्ध करनेके लिए उत्सुक राजाओंको यद्यपि नीतिचतुर राजा द्रुपदने रोका था तथापि कितने ही राजा जबर्दस्ती अर्जुनके पीछे लग गये ॥१४०॥ परन्तु अर्जुन, भीम और धृष्टद्युम्न इन तीनों धनुर्धारियोंने उन्हें दूरसे ही रोक दिया। ऐसा रोका कि न आगे न पीछे कहीं एक डग भी रखनेके लिए समर्थ नहीं हो सके ॥१४१॥ तदनन्तर धृष्टद्युम्नके रथपर आरूढ़ अर्जुनने अपने नामसे चिह्नित एवं समस्त सम्बन्धोंको सूचित करनेवाला बाण द्रोणाचार्यकी गोदमें फेंका ॥१४२॥ द्रोण, अश्वत्थामा, भीष्म और विदुरने जब उस समस्त सम्बन्धोंको सूचित करनेवाले बाणको बाँचा तो उसने सबको परम हर्ष प्रदान किया ॥१४३॥ पाण्डवोंका समागम होनेपर राजा द्रुपद, कुटुम्बी जन, तथा द्रोणाचार्य आदिको जो महान् सुख उत्पन्न हुआ था। उससे शङ्ख और बाजोंके शब्द होने लगे ॥१४४॥ परम आनन्दको देनेवाले भाइयोंके इस समागमपर दुर्योधन आदिने भी ऊपरी स्नेह दिखाया और पाँचों पाण्डवोंका अभिनन्दन किया ॥१४५॥ जिस प्रकार स्नेह—तेलके समूहसे भारी दीपिका किसीके पाणिग्रहण—हाथमें धारण करनेसे अत्यधिक देदीप्यमान होने लगती है उसी प्रकार स्नेह—प्रेमके भारसे भरी द्रौपदी, पाणिग्रहण—विवाहके योगसे

---

१. विव्याथ म०। २. वाचोदितोरु म०, घ०। ३. धीरगा जीवबन्धना म०। ४. प्रपदौ म०। ५. सौख्यतां म०। सौख्यतः घ०, ख०। ६. निर्घोषाजाताः म०।

विवाहमङ्गलं दृष्ट्वा द्रौपद्यर्जुनयोर्नृपाः । [1]प्रयाताः पाण्डवैर्युक्तः स्थानं दुर्योधनोऽप्यगात् ॥१४७॥
अर्धराज्यविभागेन ते हास्तिनपुरे पुनः । तस्थुर्दुर्योधनाद्याश्च पाण्डवाश्च यथायथम् ॥१४८॥
आनाय्यानाय्यवृत्तोऽसौ ज्येष्ठं कन्याः पुरातनीः । विवाह्य सुखिताश्चक्रे भीमसेनो निजोचिताः ॥१४९॥
स्नुषाबुद्धिरभूत्तस्यां ज्येष्ठयोरर्जुनस्त्रियाम् । द्रौपद्यां [2]यमलस्यापि मातरीवानुवर्तनम् ॥१५०॥
तस्याः श्वसुरबुद्धिस्तु पाण्डाविव तयोरभूत् । अर्जुनप्रेमसंरुद्धमौचित्यं देवरद्वये ॥१५१॥
अत्यन्तशुद्धवृत्तेषु[3]येऽभ्याख्यानपरायणाः । तेषां तत्प्रभवं पापं को निवारयितुं क्षमः ॥१५२॥
सद्भूतस्यापि दोषस्य परकीयस्य भाषणम् । पापहेतुरमोघः स्यादसद्भूतस्य किं पुनः ॥१५३॥
प्राकृतानामपि प्रीत्या समानधनता धने । न [4]स्त्रीषु त्रिषु लोकेषु प्रसिद्धानां किमुच्यते ॥१५४॥
महापुरुषकोटीस्थकूटदोषविभाषिणाम् । असतां कथमायाति न जिह्वा शतखण्डताम् ॥१५५॥
वक्ता श्रोता च पापस्य यन्नात्र फलमश्नुते । तदमोघममुत्रास्य वृद्ध्यर्थमिति बुद्ध्यताम् ॥१५६॥
वक्तुः श्रोतुश्च सद्बुद्ध्या यथा पुण्यमयी श्रुतिः । श्रेयसे विपरीताय तथा पापमयी श्रुतिः ॥१५७॥

अर्जुनके द्वारा धारण की हुई अत्यधिक देदीप्यमान होने लगी ॥१४६॥ राजा लोग द्रौपदी और अर्जुनका विवाह-मङ्गल देखकर अपने-अपने स्थानपर चले गये और दुर्योधन भी पाण्डवोंको साथ ले हस्तिनापुर पहुँच गया ॥१४७॥ दुर्योधनादि सौ भाई और पाण्डव आधे-आधे राज्यका विभाग कर पुनः पूर्वकी भाँति रहने लगे ॥१४८॥ उज्ज्वल चारित्रके धारक युधिष्ठिर तथा भीमसेनने पहले अज्ञातवासके समय अपने-अपने योग्य जिन कन्याओंको स्वीकृत करनेका आश्वासन दिया था उन्हें बुलाकर तथा उनके साथ विवाह कर उन्हें सुखी किया ॥१४९॥ द्रौपदी अर्जुनकी स्त्री थी उसमें युधिष्ठिर और भीमकी बहू-जैसी बुद्धि थी और सहदेव तथा नकुल उसे माताके समान मानते थे ॥१५०॥ द्रौपदीकी भी पाण्डुके समान युधिष्ठिर और भीममें श्वसुर बुद्धि थी और सहदेव तथा नकुल इन दोनों देवरोंमें अर्जुनके प्रेमके अनुरूप उचित बुद्धि थी ॥१५१॥ गौतमस्वामी कहते हैं कि जो अत्यन्त शुद्ध आचारके धारक मनुष्योंकी भी निन्दा करनेमें तत्पर रहते हैं उनके उस निन्दासे उत्पन्न हुए पापका निवारण करनेके लिए कौन समर्थ है? ॥१५२॥ दूसरेके विद्यमान दोषका कथन करना भी पापका कारण है फिर अविद्यमान दोषके कथन करनेकी तो बात ही क्या है? वह तो ऐसे पापका कारण होता है जिसका फल कभी व्यर्थ नहीं जाता—अवश्य ही भोगना पड़ता है ॥१५३॥ साधारणसे-साधारण मनुष्योंमें प्रीतिके कारण यदि समान-धनता होती है तो धनके विषयमें ही होती है स्त्रियोंमें नहीं होती। फिर जो तीनों लोकोंमें प्रसिद्ध हैं उनकी तो बात ही क्या है? ॥१५४॥ महापुरुषोंकी कोटिमें स्थित पाण्डवोंके मिथ्या दोष कथन करनेवाले दुष्टोंकी जिह्वाके सौ खण्ड क्यों नहीं हो जाते? ॥१५५॥ पापका वक्ता और श्रोता जो इस लोकमें उसका फल नहीं प्राप्त कर पाता है वह मानो परलोकमें वृद्धिके लिए ही सुरक्षित रहता है ऐसा समझना चाहिए। भावार्थ—जिस पापका फल वक्ता और श्रोताको इस जन्ममें नहीं मिल पाता है उसका फल परभवमें अवश्य मिलता है और ब्याजके साथ मिलता है ॥१५६॥ सद्बुद्धिसे पुण्यरूप कथाओंका सुनना वक्ता और श्रोताके लिए जिस प्रकार कल्याणका कारण माना गया है उसी प्रकार पाप रूप कथाओंका सुनना उनके लिए अकल्याणका कारण माना गया है ॥१५७॥ इसलिए असत्य

१. आयाताः पाण्डवैर्युक्ता म०, घ० । २. सहदेवनकुलयोः म० । ३. योऽभ्याख्यान-म० । ४. स्त्रीचरित्रलोकेषु म०, घ० ।

द्रुतविलम्बितवृत्तम्

त्यजत वाचमसत्यमलोद्धतां भजत [1]सत्यवचोनिरवद्यताम् ।
[2]निजयशोविशदां सगुणोद्यतां विजयिनीं त्विह विश्वविदोदिताम्[3] ॥१५८॥
सुभृतमाचरणं शरणं भवेदसुभृतां विपदीह [4]पराभवे ।
सुचरितस्य फलं नयपौरुषं परिभवत्यहितस्य हि तां रुषम् ॥१५९॥
शिखिशिखावलिधर्मघनागमः परनिराकरणैकजिनागमः ।
विविधलाभनिधिर्ध्रियतां जनैर्व्रतविधिः[5] श्रुतवर्तिकृताञ्जनैः ॥१६०॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ कुरुवंशोत्पत्तिपाण्डवधार्तराष्ट्राणां च पार्थद्रौपदीलाभवर्णनो नाम पञ्चचत्वारिंशः सर्गः ॥४५॥

रूप दोषसे उद्धत वाणीको छोड़ो, और सत्य वचनसे उत्पन्न उस निर्मलताका सेवन करो जो अपने यशसे विशद है, गुणी मनुष्योंके प्राप्त करनेमें उद्यत है। इस लोकमें विजय प्राप्त करानेवाली है और सर्वज्ञदेवके द्वारा निरूपित है ॥१५८॥ इस संसारमें विपत्ति और पराभवके समय अच्छी तरहसे आचरित अपना आचरण ही प्राणियोंके लिए शरण है क्योंकि सदाचारका फल जो नीति और पौरुष है वह शत्रुके उस रोषको परिभूत कर देता है—दूर कर देता है ॥१५९॥ जो अग्निकी शिखावलीसे वर्धमान धर्मरूपी ग्रीष्म कालको नष्ट करनेके लिए वर्षा ऋतुके समान है, दूसरोंका निराकरण करनेके लिए एक जिनागम है, और नाना प्रकारके लाभोंका भण्डार है, ऐसा व्रतविधान, श्रुतरूपी अञ्जनकी शलाकाका प्रयोग करनेवाले मनुष्योंके द्वारा अवश्य ही धारण करने योग्य है ॥१६०॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें कुरुवंशकी उत्पत्ति, पाण्डव और धार्तराष्ट्रोंके समागम तथा अर्जुनको द्रौपदीके लाभका वर्णन करनेवाला पैंतालीसवाँ सर्ग समाप्त हुआ ॥४५॥

---

१. सत्यवचसः निरवद्यता तां । २. निजयशोविशदाशगुणोद्यतां म० । निजयशो विशदं न गुणोद्यतां क० । ३. अथवा विजयिनीं त्विह वित्थ विदोऽद्य ताम् इति पाठः क पुस्तकटिप्पणकृत इह संगतः लोके, हे विदः हे पण्डिताः अद्य अधुना, ताम् वाचं, विजयिनीं वित्थ जानीथ । ४. पुराभवे ख०, ङ० । ५. व्रतविधि-श्रुतवर्ति-क० व्रतविधिप्रतिपादकश्रुतवर्त्या कृतमञ्जनं यः इति क-प्रति टिप्पणी ।

षट्चत्वारिंशः सर्गः

अथ मानितबन्धूनां पाण्डवानां गजाह्वये । नगरे नगधीराणां काले गच्छति भोगिनाम् ॥१॥
प्रत्यहं [1]परया भूत्या वर्धमानानमूनमी[2] । पञ्चापि शतमालोक्य पूर्ववच्चलिताः स्थितेः ॥२॥
तं शकुन्युपदेशेन सद्यो द्यूते विजित्य सः । [3]पञ्चज्येष्ठं शतज्येष्ठः[4] सानुजं सानुजोऽगदीत् ॥३॥
गन्तव्यं यत्र ते नाम श्रूयते न युधिष्ठिर । स्थातव्यं सत्यसङ्घेन त्वया प्रच्छन्नवर्तिना[5] ॥४॥
इत्युक्तं [6]प्रतिपद्यासौ शमितभ्रातृमण्डलः । निरैत्परिच्छदं त्यक्त्वा द्वादशाब्दधृतावधिः ॥५॥
[7]अनुयातार्जुनं प्रेम्णा प्रमदेन च पूरिता । द्रौपदीन्दुमिव ज्योत्स्ना कृतकृष्णनिजस्थितिः (?) ॥६॥
ततस्ते धैर्यसम्पन्नाः सुवीर्या नरकुञ्जराः । क्रमेण सहिताः प्राप्ता रम्यां कालाञ्जलाटवीम् ॥७॥
प्रकीर्णकासुरीसूनुः सुतारस्तत्र खेचरः । असुरोद्गीतनगरादागत्य रमते तदा ॥८॥
कान्तया कुसुमावल्या रममाणं वनान्तरे । किरातवेषिणं कान्तं युक्तं शावरविद्यया ॥९॥
किरातवेषभृत्पत्न्या सह क्रीडन् यदृच्छया । ददर्श खेचरं चापी चापिनं स धनञ्जयः ॥१०॥
अकस्माच्च तयोर्जाते दर्शने सहसानयोः । बभूव विषमं युद्धं दिव्येषुच्छन्नदिङ्मुखम् ॥११॥
भुजयुद्धे ततो लग्ने भुजेन दृढमुष्टिना । जघानोरसि तं पार्थः खचरं बलिनं बली ॥१२॥

अथानन्तर बन्धुओंका सम्मान करनेवाले पर्वतोंके समान धीर-वीर पाण्डवोंका भोग भोगते हुए हस्तिनापुरमें सुखसे समय व्यतीत होने लगा ॥१॥ पाँचों पाण्डव उत्कृष्ट विभूतिसे प्रतिदिन वृद्धिको प्राप्त हो रहे थे, उन्हें देख सौ कौरव पहलेके समान पुनः मर्यादासे विचलित हो गये ॥२॥ एक बार शकुनिके उपदेशसे दुर्योधनने युधिष्ठिरको शीघ्र ही जुआमें जीत लिया। जीत लेनेपर अपने छोटे भाइयोंके साथ मिलकर दुर्योधनने भीमसेन आदि छोटे भाइयोंसे युक्त युधिष्ठिरसे कहा कि हे युधिष्ठिर ! चूँकि तुम सत्यवादी हो-तुम्हारे द्वारा की हुई प्रतिज्ञा कभी मिथ्या नहीं होती इसलिए तुम्हें अपनी प्रतिज्ञाके अनुसार यहाँसे चला जाना चाहिए और छिपकर वहाँ रहना चाहिए जहाँसे तुम्हारा नाम भी सुनायी न दे सके ॥३-४॥ दुर्योधनके इस कथनको सुनकर यद्यपि भीमसेन आदि भाइयोंको क्षोभ उत्पन्न हुआ तथापि युधिष्ठिर उन्हें शान्त कर बारह वर्षकी लम्बी अवधिके लिए सब राज्य-पाट छोड़ हस्तिनापुरसे बाहर निकल गये ॥५॥ जिस प्रकार चाँदनी चन्द्रमाके पीछे-पीछे चलती है उसी प्रकार प्रेम और हर्षसे भरी द्रौपदी अर्जुनके पीछे-पीछे चलने लगी ॥६॥

तदनन्तर धैर्यसे सम्पन्न, उत्तम शक्तिसे सुशोभित एवं एक-दूसरेके हित करनेमें तत्पर वे सब श्रेष्ठ पुरुष क्रम-क्रमसे कालाञ्जला नामक अटवीमें पहुँचे ॥७॥ उस समय वहाँ प्रकीर्णकासुरीका पुत्र सुतार नामका विद्याधर असुरोद्गीत नामक नगरसे आकर क्रीड़ा कर रहा था ॥८॥ वह शावरी विद्यासे युक्त था अतः किरातका सुन्दर वेष रख अपनी कुसुमावली नामक स्त्रीके साथ क्रीड़ा कर रहा था ॥९॥ उसकी स्त्री भी किरातका वेष रखे थी और दोनों इच्छानुसार साथ-साथ क्रीड़ा कर रहे थे। धनुर्धारी अर्जुनने धनुर्धारी उस विद्याधरको देखा ॥१०॥ उन दोनोंने ज्योंही अकस्मात् एक-दूसरेको देखा त्योंही उनमें भयङ्कर युद्ध होने लगा। ऐसा युद्ध कि जिसमें दिशाएँ दिव्य बाणोंसे आच्छादित हो गयीं ॥११॥ तदनन्तर उन दोनोंमें बाहुयुद्ध होनेपर बलवान् अर्जुनने दृढ़ मुट्ठी बाँधकर उस बलवान् विद्याधरकी छातीपर

---

१. परमा म० । २. कौरवाः । ३. युधिष्ठिरं । ४. दुर्योधनः । ५. वैरिणा म० । ६. प्रतिपाद्यासौ म० । ७. अनुजाता-म०, ख० ।

पतिभिक्षां ययाचेऽसावर्जुनं कुसुमावली । मुक्तः स तं प्रणम्यागाद्रौप्याद्रेर्दक्षिणां क्षितिम् ॥१३॥
गता क्रमेण ते धीराः पुरं मेघदलाभिधम् । सिंहो नरेश्वरो यत्र कान्ता कनकमेखला ॥१४॥
तनया कनकावर्ता तयोरत्यन्तसुन्दरी । मेघेभ्या[1]लकयोश्चारुलक्ष्मीः कान्ता शरीरजा ॥१५॥
ते चादेशवशात्कन्ये भीमो भीमांसवेषभृत् । भिक्षार्थमागतो लेभे पुण्यस्य किमु दुष्करम् ॥१६॥
विश्रम्य तत्र ते सौम्या दिनानि कतिचित्सुखम् । याताः क्रमेण पुन्नागा[2] विषयं कौशलाभिधम् ॥१७॥
स्थित्वा तत्रापि सौख्येन मासान् कतिपयानपि । प्राप्ता रामगिरिं प्राग् यो रामलक्ष्मणसेवितः ॥१८॥
चैत्यालया जिनेन्द्राणां यत्र चन्द्रार्कभासुराः । कारिता रामदेवेन संभान्ति[3] शतशो गिरौ ॥१९॥
नानादेशगतैर्भव्यैर्वन्द्यन्ते या दिने दिने । वन्दितास्ता जिनेन्द्राणां प्रतिमाः पाण्डुनन्दनैः ॥२०॥
चिक्रीड तत्राद्रौ द्रौपद्या सहितोऽर्जुनः । लतागृहेषु रम्येषु सीतयेव रघूत्तमः ॥२१॥
अविज्ञातसुखच्छेदा स्वेच्छया विहृतिं श्रिताः । निन्युरेकादशाब्दानि धन्यास्ते मान्यचेष्टिताः ॥२२॥
अतः परं पुनः प्राप्ता विराटपुटभेदनम् । विराटो यत्र राजासौ भार्या यस्य सुदर्शना ॥२३॥
अव्यक्ताः पाण्डवास्तत्र द्रौपदी च विचक्षणा । विराटनगरे तस्थुर्विराटस्यातिपूजिताः ॥२४॥
यथायथं विनोदेन तत्र संवसतां सताम् । [4]प्रयाति सुखिनां काले प्रमादरहितात्मनाम् ॥२५॥

भुजासे मजबूत प्रहार किया। जिससे घबड़ाकर विद्याधरकी स्त्री कुसुमावली अर्जुनसे पतिकी भिक्षा माँगने लगी। फलस्वरूप अर्जुनने उसे छोड़ दिया और वह उन्हें प्रणाम कर विजयार्ध पर्वतकी दक्षिण श्रेणीमें चला गया ॥१२-१३॥

तदनन्तर वे धीर-वीर क्रम-क्रमसे मेघदल नामक उस नगरमें पहुँचे जहाँ सिंह नामका राजा राज्य करता था। राजा सिंहकी स्त्रीका नाम कनकमेखला था और उन दोनोंके कनकावर्ता नामकी अत्यन्त सुन्दरी कन्या थी। उसी नगरीमें मेघ नामक सेठ और अलका नामक सेठानीके चारुलक्ष्मी नामकी एक सुन्दर कन्या और थी ॥१४-१५॥ निमित्तज्ञानीके आदेशानुसार भिक्षाके लिए गये हुए भयङ्कर कन्धोंको धारण करनेवाले भीमसेनने उन दोनों कन्याओंको प्राप्त किया सो ठीक ही है क्योंकि पुण्यके लिए क्या कार्य कठिन है ? ॥१६॥ सौम्य प्रकृतिके धारक उन श्रेष्ठ पुरुषोंने कुछ दिन तक वहाँ विश्राम किया। तदनन्तर क्रम-क्रमसे चलकर वे कौशल नामक देशमें पहुँचे ॥१७॥ वहाँ भी कुछ महीने तक सुखसे ठहरकर वे उस रामगिरि पर्वतपर पहुँचे जो कि पहले राम और लक्ष्मणके द्वारा सेवित हुआ था ॥१८॥ तथा जिस पर्वतपर रामचन्द्रजीके द्वारा बनवाये हुए चन्द्रमा और सूर्यके समान देदीप्यमान, सैकड़ों जिन-मन्दिर सुशोभित हो रहे थे ॥१९॥ नाना देशोंसे आये हुए भव्य जीव प्रतिदिन जिन-प्रतिमाओंकी वन्दना करते थे, पाण्डवोंने भी उन प्रतिमाओंकी बड़ी भक्तिसे वन्दना की ॥२०॥ जिस प्रकार सीताके साथ रामचन्द्रजीने क्रीड़ा की थी उसी प्रकार उस पर्वतके सुन्दर-सुन्दर लतागृहोंमें अर्जुन द्रौपदीके साथ नाना प्रकारकी क्रीड़ा करता था ॥२१॥ जिन्होंने कभी सुखके विच्छेदका अनुभव नहीं किया था, जो स्वेच्छासे जहाँ-तहाँ विहार करते थे और मान्य चेष्टाओंके धारक थे ऐसे उन भाग्यशाली पाण्डवोंने उस पर्वतपर ग्यारह वर्ष व्यतीत कर दिये ॥२२॥

तदनन्तर वहाँसे चलकर वे उस विराटनगरमें पहुँचे जहाँ विराट नामका राजा रहता था। राजा विराटकी स्त्रीका नाम सुदर्शना था ॥२३॥ पाण्डव और अत्यन्त कुशल द्रौपदी—सब अपने-आपको छिपाकर राजा विराटसे सम्मानित हो विराटनगरमें रहने लगे ॥२४॥ इस प्रकार विनोदपूर्वक वहाँ रहते हुए प्रमादरहित पाण्डवोंका सुखसे समय बीतने लगा ॥२५॥ अब इनसे सम्बन्ध रखनेवाली दूसरी घटना लिखी जाती है—

१. मेघह्यालकयो-ग०, घ०, ङ० । २. पुरुषश्रेष्ठाः । ३. संभाति म० । ४. गच्छति सति ।

चूलिका नगरी राजा चूलिकस्तस्य कामिनी। विकचा विकचाब्जास्या शतपुत्रपवित्रिता ॥२६॥
कीचकः प्रथमस्तेषां प्रथमश्चण्डकर्मणाम्। रूपयौवनविज्ञा[1]नशौर्यद्रव्यमदाविलः ॥२७॥
विराटनगरं जातु स्वसारं स सुदर्शनाम्। आगतो द्रष्टुमत्रैतां दृष्टवान् द्रौपदीं सतीम् ॥२८॥
गन्धयुक्तिविशेषेण सुगन्धीकृतदिङ्मुखाम्। रूपलावण्यसौभाग्यगुणपूरितविग्रहाम् ॥२९॥
तस्यां दर्शनमात्रेण मानिनोऽपि मनोगतम्। दैन्यमन्यत्र यातस्य तस्य [2]तन्मयतां गतम् ॥३०॥
अनेकोपाययोगैस्तामुपलोभयतामुना। स्वतोऽपि परतोऽप्यस्या नालम्भि हृदये स्थितिः ॥३१॥
प्रत्याख्यातस्य धृष्टस्य तृणीभूतस्य तस्य सा। निर्बन्धं भीमसेनाय शैलन्ध्री तं न्यवेदयत् ॥३२॥
ततः कुपितचित्तोऽसौ शैलन्ध्रीवेषभृद्बली। प्रदोषे कृतसङ्केतमेकान्ते मदनातुरम् ॥३३॥
वारीबन्धमिवायातं स्पर्शान्धं गन्धवारणम्। कण्ठे जग्राह बाहुभ्यां स्पर्शामीलितलोचनाम् ॥३४॥
भूमौ निपात्य पादाभ्यामुरस्याक्रम्य कामिनम्। पिपेष मुष्टिनिर्घातैर्निर्घातैरिव भूधरम् ॥३५॥
तथा तस्य तदा श्रद्धां प्रपूर्य परयोषिति। अमुचद् व्रज पापेति दयमानो महामनाः ॥३६॥
महावैराग्यसम्पन्नस्ततो विषयहेतुकम्। प्राव्रजत्कीचकः श्रित्वा मुनीन्द्रं रतिवर्धनम् ॥३७॥

इसी पृथिवीतलपर एक चूलिका नामकी नगरी थी। उसके राजाका नाम चूलिक था। राजा चूलिककी, विकसित कमलके समान मुखवाली एवं सौ पुत्रोंसे पवित्र विकचा नामकी स्त्री थी ॥२६॥ विकचाके सौ पुत्रोंमें सबसे बड़े पुत्रका नाम कीचक था। यह कीचक क्रूरकर्मा मनुष्योंमें अग्रणी था तथा रूप, यौवन, विज्ञान, शूर-वीरता और धनके मदसे मलिन था ॥२७॥ एक बार वह कीचक, अपनी बहिन सुदर्शनाको देखनेके लिए विराटनगर आया। वहाँ उसने द्रौपदीको देखा ॥२८॥ उस समय द्रौपदी किसी विशिष्ट सुगन्धित पदार्थके संयोगसे समस्त दिशाओंको सुगन्धित कर रही थी एवं रूप, लावण्य, सौभाग्य आदि गुणोंसे उसका शरीर परिपूर्ण था ॥२९॥ यद्यपि कीचक मानी था तथापि उसका मन देखते ही द्रौपदीके विषयमें दीनताको प्राप्त हो गया। वह वहाँसे अन्यत्र जाता था तब भी उसका मन द्रौपदीके साथ तन्मयताको ही प्राप्त रहता था ॥३०॥ कीचकने अनेक उपायोंसे द्रौपदीको स्वयं लुभाया तथा दूसरोंके द्वारा भी उसे प्रलोभन दिखलाये पर वह उसके हृदयमें स्थितिको प्राप्त न कर सका ॥३१॥ द्रौपदी उसे तृणके समान तुच्छ समझती थी और उसे मना भी कर चुकी थी पर वह अपनी धृष्टता नहीं छोड़ता था अतः विवश हो शैलन्ध्री (सैरन्ध्री) का वेष धारण करनेवाली द्रौपदीने एक दिन उसकी इस दुर्हठकी शिकायत भीमसेनसे कर दी ॥३२॥ फिर क्या था, भीमसेनका हृदय क्रोधसे उबल उठा। उन्होंने कामातुर कीचकको द्रौपदीके द्वारा सायंकालके समय एकान्त स्थानमें मिलनेका संकेत करा दिया और आप स्वयं शैलन्ध्री (द्रौपदी) का वेष रख उस स्थानपर पहुँच गये। आप अत्यन्त बलवान् तो थे ही ॥३३॥ जिस प्रकार हस्तिनीके स्पर्शसे अन्धा मदोन्मत्त हाथी बन्धनके स्थानमें स्वयं आ जाता है उसी प्रकार मदनातुर कीचक उस संकेत-स्थानमें स्वयं आ गया। तदनन्तर स्पर्शजन्य आनन्दके अतिरेकसे जिसके नेत्र निमीलित हो रहे थे ऐसे उस कीचकके कण्ठको द्रौपदीका वेष धारण करनेवाले भीमसेनने अपनी दोनों भुजाओंसे आलिङ्गित किया और पृथिवीपर पटक कर उसकी छातीपर दोनों पैरोंसे चढ़ गये। जिस प्रकार वज्राघातसे किसी पर्वतको चूर-चूर किया जाता है उसी प्रकार मजबूत मुक्कोंके प्रहारसे उसे चूर-चूर कर दिया। इस प्रकार उसकी परस्त्रीविषयक आकांक्षाको पूर्ण कर महामना भीमसेनने दयायुक्त हो 'अरे पापी जा' यह कह उसे छोड़ दिया ॥३४-३६॥

तदनन्तर विषयोंका प्रत्यक्ष फल देख कीचकको उनसे अत्यन्त वैराग्य उत्पन्न हो गया

१. विज्ञानं शौर्यं म०। २. द्रौपदीमयताम्।

अनुप्रेक्षाभिरात्मानं भावयन् भावशुद्धितः । रत्नत्रयमसौ शुद्धं श्रुतवान् कर्तुमुद्यतः ॥३८॥
कीचकं शतसंख्यास्ते भ्रातरो भ्रान्तचेतसः । अदृष्ट्वा[1] कुपिता दुष्टाश्चितकाग्निमचिन्वत ॥३९॥
तत्र चिक्षिप्सवः[2] पापाः शैलन्ध्रीं बलशालिनः । क्षिप्तास्ते तत्र भीमेन भस्मसाद्भावमागताः ॥४०॥
एकेनैवाह्वयं[3] नीतास्ते भीमेन मदोद्धताः । बहवोऽपि हि हिंस्यन्ते सिंहेनैकेन दन्तिनः ॥४१॥
अथासौ कीचकः साधुरेकान्तोद्यानमध्यगः । पर्यङ्कासनयोगस्थो यक्षेणैक्षि कदाचन ॥४२॥
तस्य चित्तपरीक्षार्थं द्रौपदीवेषमाश्रितः । निशीथेऽदर्शयद्रूपमात्मनो मदनालसम् ॥४३॥
साधुना बधिरेणेव रम्यालापश्रुतौ स्थितम् । रूपं दृष्टिविलासाढ्यामन्धेनेव[4] मनोहरम् ॥४४॥
गुप्तेन्द्रियकलापस्य मनःशुद्धिमुपेयुषः । साधोस्तस्य समुत्पन्नमवधिज्ञानलोचनम् ॥४५॥
उपसंहृतयोगं तं प्रणम्यासौ सुरस्ततः । मुनिमक्षमयन्नाथ क्षमस्वेति पुनः पुनः ॥४६॥
पुनः प्रणम्य पप्रच्छ द्रौपदीमोहकारणम् । कारणेन विना न स्यात्तादृग्मोहसमुद्भवः ॥४७॥
कतिचित्पूर्वजन्मानि द्रौपद्याः स्वस्य चेत्यसौ । कीचकाख्योऽवदद्योगी यक्षाय प्रणतात्मने ॥४८॥
तरङ्गिणीसरित्तीरे वेगवत्याश्च संगमे । म्लेच्छोऽहमभवद्रौद्रः क्षुद्रः क्षुद्रासुमद्रिपुः ॥४९॥

जिससे उसने रतिवर्धन नामक मुनिराजके पास जाकर दीक्षा धारण कर ली ॥३७॥ कीचक मुनि अनुप्रेक्षाओंके द्वारा आत्माकी भावना करते—आत्माका स्वरूप विचारते, शास्त्रोंका स्वाध्याय करते और भाव-शुद्धिके द्वारा रत्नत्रयको शुद्ध करनेके लिए उद्यम करने लगे ॥३८॥ कीचकके सौ भाइयोंने जब कीचकको नहीं देखा तो वे बहुत ही घबड़ाये । उन्होंने जहाँ-तहाँ उसकी खोज की पर कहीं नहीं दिखा। उसी समय उन्हें एक जलती हुई चिताकी अग्नि दिखी। किसीने बता दिया कि वह कीचककी ही चिता है, यह सुन वे सब भाई बहुत ही कुपित हुए । वे सोचने लगे कि कीचककी यह दशा इस शैलन्ध्रीने ही की है इसलिए वे कुपित होकर उसे (शैलन्ध्रीका वेष धारण करनेवाले भीमको) उसी चितामें डालनेकी इच्छा करने लगे । परन्तु भीमसेनने उनकी बलवत्ता ठिकाने लगा दी और एक-एक कर सबको जलती हुई चितामें डाल दिया जिससे सब जलकर राख हो गये ॥३९–४०॥ देखो, एक ही भीमसेनने मदसे उद्धत हुए अनेक पुरुषोंको नामावशिष्ट कर दिया–मरणको प्राप्त करा दिया सो ठीक ही है क्योंकि एक सिंह अनेकों हाथियोंको नष्ट कर देता है ॥४१॥

अथानन्तर किसी दिन कीचक मुनि एकान्त उपवनके मध्यमें विराजमान थे । वे उस समय पद्मासनसे योगारूढ हो निश्चल बैठे थे कि एक यक्षने उन्हें देखा ॥४२॥ उनके चित्तकी परीक्षा करनेके लिए वह यक्ष आधी रातके समय द्रौपदीका रूप रख उनके पास पहुँचा और कामसे अलसाया हुआ अपना रूप उन्हें दिखाने लगा ॥४३॥ परन्तु मुनिराज कीचक, उसके सुन्दर आलापके सुननेमें बहिरे-जैसे हो गये और दृष्टिके विलाससे युक्त उसका मनोहर रूप देखनेके लिए अन्धेके समान हो गये ॥४४॥ जिन्होंने अपनी इन्द्रियोंके समूहकी अच्छी तरह रक्षा की थी तथा जो मनकी शुद्धिको प्राप्त हो रहे थे ऐसे उन कीचक मुनिराजको उसी समय अवधिज्ञान उत्पन्न हो गया ॥४५॥ तदनन्तर ध्यान समाप्त होनेपर यक्षने उन्हें प्रणाम किया और 'हे नाथ ! क्षमा कीजिए' इस प्रकार बार-बार कहकर उनसे क्षमा माँगी ॥४६॥ तत्पश्चात् यक्षने पुनः नमस्कार कर उनसे द्रौपदीके प्रति मोह उत्पन्न होनेका कारण पूछा क्योंकि बिना कारणके उस प्रकारके मोहकी उत्पत्ति नहीं हो सकती ॥ ४७ ॥ उत्तरस्वरूप मुनिराज कीचक, नम्रीभूत यक्षके लिए अपने तथा द्रौपदीके कुछ पूर्वभव इस प्रकार कहने लगे ॥४८॥

एक समय मैं, तरङ्गिणी नामक नदीके तटपर जहाँ वेगवती नामक नदीका संगम

१. दृष्टा म०, घ० । २. विक्षिप्सवः म० । ३. नामावशेषं मरणमित्यर्थः (ग० टि०) ।
४. विलासाभ्या—म० ।

साधुदर्शनतः शान्तः [1]प्रापमर्यमनुष्यताम् । धनदेवः पिता चात्र माता मे सुकुमारिका ॥५०॥
कुमारदेवसंज्ञोऽहं मात्रा च मम सुव्रतः । मारितः साधुराहारं दत्त्वा विषविमिश्रितम् ॥५१॥
प्रविश्य नरकं पापा दुःखं साधुवधोद्भवम् । अनुभूय पुनस्तिर्यङ्नारकेष्वटतिस्म सा ॥५२॥
अव्रतोऽहमपि भ्रान्त्वा संसारं तीव्रवेदनम् । मातरिश्वतया वृत्तो(?) नुन्नोंहोमातरिश्वभिः[2] ॥५३॥
सितेन तापसेनान्ते जनितो मधुसंज्ञकः । तापस्यां मृगश्रृङ्गिण्यां प्रवृद्धस्तापसाश्रमे ॥५४॥
मुनेर्विनयदत्तस्य दानमाहात्म्यदर्शनात् । प्रव्रज्य स्वर्गमारुह्य जातोऽहं कीचकश्च्युतः ॥५५॥
चिरं पर्यट्य संसारं सुदुःखं सुकुमारिका । मानुषी दुर्भगीभूता भूताभूता[3]सुखावहा ॥५६॥
सा चानुमतिका नाम्ना सनिदानतपोयुता । जातेयं द्रौपदी तेन मोहोऽस्यां मे महानभूत् ॥५७॥

वसन्ततिलकावृत्तम्

माता स्वसा च तनुजा प्रियकामिनीत्वं मातृस्वसृत्वदुहितृत्वमुपैति पत्नी ।
संसारचक्रपरिवर्तिनि जीवलोके ही संकरव्यतिकरौ नियतौ भवेताम् ॥५८॥
वैचित्र्यमेतदवगम्य भवस्य भव्या वैराग्यमेत्य सुखतो महतोऽप्यमुष्य ।
संसारकारणनिवृत्तधियः सुवृत्ता मोक्षार्थमेव महता तपसा यतन्ताम् ॥५९॥
इत्यादि तस्य वचनं मुनिकीचकस्य श्रुत्वा सुरः सुरवधूभिरमा तदानीम् ।
सम्यक्त्वरत्नवरभूषणभूषितात्मा नत्वा गुरुं धृतियुतोऽन्तरधाद्वनान्ते ॥६०॥

होता था, क्षुद्र मनुष्योंका वैरी क्षुद्र नामका म्लेच्छ था, उस समय मेरे परिणाम अत्यन्त रौद्र रूप थे ।।४९।। एक बार अचानक ही मुनिराजके दर्शन कर मैं अत्यन्त शान्त हो गया और वैश्य कुलमें मनुष्य पर्यायको प्राप्त हुआ । इस समय मेरे पिता धनदेव और माता सुकुमारिका थी तथा मेरा निजका नाम कुमारदेव था । एक बार मेरी माताने विष मिला आहार देकर एक सुव्रत नामक मुनिको मार डाला ।।५०-५१।। उसके फल-स्वरूप वह पापिनी नरक पहुँची और वहाँ मुनिके घातसे उत्पन्न दुःख भोगकर तिर्यञ्च तथा नरकगतिके दुःख भोगती रही।।५२।। मैं भी संयमसे रहित था इसलिए तीव्र वेदनावाले संसारमें भटक कर पापरूपी पवनसे प्रेरित हुआ अपनी माताके जीवके कुत्ता हुआ । तदनन्तर तापसोंके किसी तपोवनमें सित नामक तापसके द्वारा मृगश्रृङ्गिणी नामक तापसीके मधु नामका पुत्र हुआ तथा तापसोंके आश्रममें ही मैं वृद्धिको प्राप्त हुआ ।।५३-५४।। एक दिन किसी श्रावकने विनयदत्त नामक मुनिराजको आहार दान दिया। उसका माहात्म्य देख मैंने दीक्षा ले ली और उसके फलस्वरूप स्वर्गारोहण कर वहाँसे च्युत होता हुआ कीचक हुआ ।।५५।। माता सुकुमारिका चिरकाल तक भ्रमण कर संसारमें तीव्र दुःख भोगती रही । अन्तमें वह दौर्भाग्यसे युक्त दुःखोंको भोगनेवाली मानुषी हुई ।।५६।। अनुमतिका उसका नाम था । अन्तमें वह निदान सहित तपसे युक्त हो द्रौपदी हुई है । इसी कारण इसमें मुझे मोह उत्पन्न हो गया था ।।५७।। देखो, माता बहिन हो जाती है, पुत्री प्रिय स्त्री हो जाती है, और स्त्री, माता, बहिन तथा पुत्रीपनेको प्राप्त हो जाती है । आश्चर्यकी बात है कि संसार रूपी चक्रके साथ घूमनेवाले जीवोंमें संकर और व्यतिकर नियम से होते रहते हैं ।।५८।। इसलिए हे भव्यजनो ! संसारकी इस विचित्रताको अच्छी तरह समझ कर वैषयिक सुखसे भले ही वह कितना ही महान् क्यों न हो विरक्त होओ और संसार के कारणोंसे विरक्त हो सदाचारके धारी बन विशाल तपसे मोक्षके लिए ही यत्न करो ।।५९।।

इस प्रकार कीचक मुनिके वचन सुन उस यक्षने अपनी देवियोंके साथ-साथ अपनी आत्माको उस समय सम्यग्दर्शन रूपी उत्कृष्ट रत्नोंके आभूषणोंसे आभूषित किया । तदनन्तर

---

१. वैश्यकुलम् 'ऊरव्या ऊरुजा अर्या वैश्या भूमिस्पृशो विशः' इत्यभिधानात् । 'अर्यः स्वामिवैश्ययोः' इति पाणिनिसूत्रम् । -मार्यमनुष्यताम् म०, क०, ख०, ग०, घ० । २. पापपवनैः । ३. भूतामाता सुखावहा घ० ।

सम्पूज्यमानचरणो नृसुरासुरौघैः कृत्वा तपो द्विविधमन्तरमूढधीर्यः ।
लोके प्रकाश्य जिनमार्गमनर्गलं संप्राप्तं परं पदमनत्ययमात्मशुद्धया ॥६१॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कीचकनिर्वाणगमनो नाम षट्चत्वारिंशः सर्गः ॥४६॥

वह बड़े हर्षसे मुनिराजको नमस्कार कर वनके अन्तमें अन्तर्हित हो गया–छिप गया ॥६०॥ गौतम स्वामी कहते हैं कि अन्तरङ्गमें विवेक बुद्धिको धारण करनेवाला जो मनुष्य, अन्तरङ्ग और बहिरङ्गके भेदसे दोनों प्रकारका तप करता है वह मनुष्य देव तथा असुरोंके समूहसे पूजित-चरण होता हुआ लोकमें निर्बाध जिनमार्गको प्रकाशित करता है और आत्मशुद्धिके द्वारा अविनाशी परम पदको प्राप्त होता है ॥६१॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें कीचकके निर्वाण गमनका वर्णन करनेवाला छयालीसवाँ सर्ग समाप्त हुआ ॥४६॥

सप्तचत्वारिंशः सर्गः

कीचकानुजवृत्तान्ते गोग्रहे तदनन्तरे । वृत्ते भीमार्जुनोग्राग्निभस्मितारिवनान्तरे ॥१॥
अभिन्ननिजमर्यादा भिन्नदुश्शासनान्तराः । पाण्डवाः पाण्डुभवने [1]संहताः [2]सुनया इव ॥२॥
सम्पूर्णावधयो गत्वा धर्मराजस्य ते युधि । सह दुर्योधनेनास्थुः सम्मता मुनयो यथा ॥३॥
ततः पूरितसर्वाशाः सर्वार्थामृतवर्षिणः । [3]तेऽप्यूनुष्पदमत्युच्चैः प्रावृषेण्या इवाम्बुदाः ॥४॥
[4]तत्प्रसाद्यापि चुक्षोभ गान्धारीय-शतं पुनः । नेयस्य जलवर्गस्य सुप्रसादः कियच्चिरम् ॥५॥
कृते दायादवर्गेण पूर्ववत्सन्धिदूषणे । प्रशमय्य तनून् भ्रातॄन् प्रागिवासौ युधिष्ठिरः ॥६॥
अनिच्छन् स्वच्छधीर्धीरः कृपावान् कौरवाहितम् । मात्रा भ्रात्रादिभिर्भूयः श्रितवान् दक्षिणां दिशम् ॥७॥
स विन्ध्यवनमध्यास्य तपस्यन्तं निजाश्रमे । दृष्ट्वा विदुरमानम्य शशंस सानुजैः सह ॥८॥
कृतार्थं पूज्य ते जन्म संपरित्यज्य सम्पदः । स्थितोऽभयो जिनेन्द्रोक्ते मोक्षमार्गे महातपाः ॥९॥
विशुद्धं दर्शनं यत्र तत्त्वश्रद्धानलक्षणम् । ज्ञानं सर्वार्थविद्योति चारित्रमनवद्यकम् ॥१०॥

अथानन्तर कीचकके छोटे भाइयोंका वृत्तान्त और उसके बाद जिसमें भीम तथा अर्जुनकी कोपाग्निसे शत्रुरूपी वनका अन्तराल भस्म हो गया था ऐसा गायोंका पकड़ना आदि घटनाएँ हो चुकीं तब अपनी मर्यादाको खण्डित न करनेवाले होकर भी दुःशासन (खोटा शासन अथवा दुःशासन नामक कौरवके अन्तरको) विदीर्ण करनेवाले पाण्डव समीचीन नयोंके समान एक-दूसरेके अनुकूल रहते हुए अपने पिता पाण्डुके भवनमें एकत्रित हुए॥१-२॥ अबतक उनकी अज्ञात निवासकी अवधि पूर्ण हो चुकी थी इसलिए धर्मराज-युधिष्ठिरकी आज्ञासे वे भीमसेन आदि, युद्धमें दुर्योधनके साथ जा खड़े हुए और जिस प्रकार मुनि सबको सम्मत-इष्ट होते हैं उसी प्रकार वे पाण्डव भी सबको सम्मत-इष्ट थे ॥ ३ ॥ तदनन्तर जिस प्रकार समस्त दिशाओंको पूर्ण करके और सर्वहितकारी जलकी वर्षा करनेवाले वर्षाकालिक मेघ अत्यन्त उन्नत उत्तम पदको प्राप्त कर लेते हैं उसी प्रकार सबके मनोरथोंको पूर्ण करनेवाले एवं समस्त अर्थरूपी अमृतकी वर्षा करनेवाले वे पाण्डव भी अत्यन्त उच्च पदको प्राप्त हुए। भावार्थ— पाण्डव हस्तिनापुर आकर रहने लगे और सबकी दृष्टिमें उच्च माने जाने लगे ॥४॥

तदनन्तर दुर्योधनादिक सौ भाई ऊपरसे उन्हें प्रसन्न रख कर हृदयमें पुनः क्षोभको प्राप्त होने लगे—भीतर-ही-भीतर उन्हें परास्त करनेके उपाय करने लगे सो ठीक ही है क्योंकि इधर-उधर बहने वाले जलमें स्वच्छता कितने समय तक रह सकती है ? ॥५॥ दुर्योधनादिकने पहलेके समान फिरसे सन्धिमें दोष उत्पन्न करना शुरू कर दिया और उससे भीम, अर्जुन आदि छोटे भाई फिरसे उत्तेजित होने लगे परन्तु युधिष्ठिर उन्हें शान्त करते रहे ॥६॥ स्वच्छ बुद्धिके धारक, धीर-वीर एवं दयालु युधिष्ठिर कौरवोंका कभी अहित नहीं विचारते थे इसलिए वे माता तथा भाई आदि परिवारके साथ पुनः दक्षिण दिशाकी ओर चले गये ॥७॥ चलते-चलते युधिष्ठिर विन्ध्यवनमें पहुँचे। वहाँ अपने आश्रममें रहकर तपस्या करनेवाले विदुरको देख कर उन्होंने अपने सब भाइयोंके साथ उन्हें नमस्कार किया और उनकी इस प्रकार स्तुति की ॥८॥ हे पूज्य ! आपका ही जन्म सफल है जो आप सम्पदाओंका परित्याग कर जिनेन्द्रोक्त मोक्षमार्गमें महा तप करते हुए निर्भय स्थित हैं ॥ ९ ॥ जिस मार्गमें तत्त्वश्रद्धान रूप निर्मल सम्यग्दर्शन, समस्त पदार्थोंको प्रकाशित करनेवाला ज्ञान और निर्दोष चारित्र प्रतिपादित है

---

१. संहताः म० । २. सुघना इव म० । ३. ऊनुः प्रापाः (ङ० टि०) तेप्यनुष्पदं—म० । ४. प्रासाद्यापि म०, घ० ।

व्रतगुप्तिसमित्यक्षकषायजयसंयमाः । यत्र मार्गे स्थितास्तत्र सिद्‌ध्यन्ति त्वादृशोऽचिरात् ॥११॥
इति मार्गस्तुतिं कृत्वा तं च स्तुत्वा कृतानतिः । द्वारिकां ज्ञातिभिर्ज्ञातः संविवेश सहानुजैः ॥१२॥
उत्सवः परमो जातः स्वस्रस्वस्रीयसंगमे । समुद्रविजयादीनां दशानां चिरदर्शिनाम् ॥१३॥
नेमीशहरिरामादिदशार्हसुतसुन्दराः । अन्तःपुराणि सर्वाणि प्रजाश्च तुतुषुस्तदा ॥१४॥
यथाक्रममशेषाणां दर्शने दर्शनोत्सवे । जाते परस्परं तेषां स्वजनानां सुखावहे ॥१५॥
यदुपाण्डववर्गौ तौ मेनाते मिलितौ मुदा । अपकारमपि त्यक्त्वा सूपकारं परैः कृतम् ॥१६॥
ततः प्रासादवर्येषु पञ्च पञ्चसु विष्णुना । निरूपितेषु ते तस्थुः सर्वभोगप्रदायिषु ॥१७॥
ज्येष्ठो लक्ष्मीमतीं लेभे भीमः शेषवतीं ततः । सुभद्रामर्जुनः कन्यां कनिष्ठौ विजयां रतिम् ॥१८॥
दशार्हतनयास्तास्ते परिणीय यथाक्रमम् । रेमिरेऽमूभिरिष्टाभिः पाण्डवास्त्रिदशोपमाः ॥१९॥
कथेयं कुरुवीरस्य कथिता ते समासतः । प्रद्युम्नस्याधुना वच्मि शृणु श्रेणिक चेष्टितम् ॥२०॥
विजयार्धगिरौ रम्ये प्रद्युम्नोऽसौ कलागुणैः । विधुवद्बन्धुमुद्राब्धिं सहावर्धत बर्धयन् ॥२१॥
विद्याधरोचिता विद्या स विद्याधरपुत्रकः । वियद्यानादिका बाल्ये जग्राहाशु महोद्यमः ॥२२॥
बाल्यादारभ्य लावण्यरूपसौभाग्यपौरुषैः । सोऽरिमित्रनरस्त्रीणामस्त्रीभूतैर्मनोऽहरत् ॥२३॥
यौवनं स परिप्राप्तः प्राप्तसर्वास्त्रकौशलः । हृदयेषु युवा यूनां प्रहरन्नपि वल्लभः ॥२४॥

एवं व्रत, गुप्ति, समिति तथा इन्द्रिय और कषायको जीतनेवाले संयमका निरूपण किया गया है उस मार्गमें स्थित हो आप-जैसे महानुभाव शीघ्र ही सिद्ध अवस्थाको प्राप्त हो जाते हैं ॥१०–११॥ इस प्रकार जिनेन्द्रोक्त मार्ग तथा महामुनि विदुरकी स्तुति कर युधिष्ठिर द्वारिका पहुँचे। यादवोंको पाण्डवोंके आगमनका जब पता चला तो उन्होंने इनका बड़ा स्वागत किया और छोटे भाइयोंके साथ युधिष्ठिरने द्वारिकामें प्रवेश किया ॥१२॥ समुद्रविजय आदि दशों भाइयोंने बहिन तथा अपने भानजोंको बहुत समयके बाद देखा था इसलिए इन सबके समागमसे उन्हें परम हर्ष हुआ ॥ १३ ॥ भगवान् नेमिनाथ, कृष्ण, बलदेव आदि समस्त यादव कुमार, समस्त अन्तःपुर और प्रजाके सब लोग उस समय बहुत ही सन्तुष्ट हुए ॥१४॥ नेत्रोंको आनन्द देनेवाला पाण्डवों तथा समस्त स्वजनोंका वह दर्शन—परस्परका मिलना सबके लिए सुखदायी हुआ ॥ १५ ॥ यादव और पाण्डव परस्पर मिलकर हर्षसे ऐसा मानने लगे कि शत्रुओंने हमारा अपकार नहीं उपकार ही किया है। भावार्थ—यदि दुर्योधनादिक अपकार न करते तो हम लोग इस तरह परस्पर मिलकर आनन्दका अनुभव नहीं कर सकते थे, अतः उनका किया अपकार अपकार नहीं प्रत्युत उपकार है ऐसा सब लोग मानने लगे ॥१६॥

तदनन्तर श्रीकृष्णके द्वारा दिखलाये हुए भोगोपभोगकी सब सामग्रीसे युक्त पाँच उत्तमोत्तम महलोंमें पाँचों पाण्डव पृथक्-पृथक् रहने लगे ॥१७॥ युधिष्ठिरने लक्ष्मीमती, भीमने शेषवती, अर्जुनने सुभद्रा, सहदेवने विजया और नकुलने रति नामक कन्याको प्राप्त किया ॥१८॥ यथा-क्रमसे पूर्वोक्त यादव-कन्याओंको विवाह कर देवोंकी उपमाको धारण करनेवाले पाण्डव उन इष्ट स्त्रियोंके साथ क्रीड़ा करने लगे ॥१९॥ गौतम स्वामी कहते हैं कि हे श्रेणिक! इस प्रकार मैंने तेरे लिए संक्षेपसे कुरुवीरकी कथा कही। अब मैं प्रद्युम्नकी चेष्टाएँ कहता हूँ सो सुन ॥२०॥

अत्यन्त रमणीय विजयार्ध पर्वतपर कन्या रूपी गुणोंके द्वारा बन्धु-जनोंके हर्षरूपी सागरको बढ़ाता हुआ प्रद्युम्न चन्द्रमाके समान बढ़ने लगा ॥ २१ ॥ विद्याधरपुत्र प्रद्युम्नने बड़े उद्यमके साथ बाल्यकालमें ही आकाशगामिनी आदि विद्याधरोंके योग्य विद्याओंको शीघ्र ही सीख लिया था ॥२२॥ वह बाल्य अवस्थासे ही लेकर अस्त्रके समान अपने लावण्य रूप, सौभाग्य और पौरुषके द्वारा शत्रु-मित्र पुरुष तथा स्त्रियोंके मनको हरण करता था ॥ २३ ॥ यौवनको प्राप्त होते ही प्रद्युम्न समस्त अस्त्र-शस्त्रोंमें कुशल हो गया। अपने सौन्दर्यके कारण

मन्मथो मदनः कामः कामदेवो मनोभवः । इत्यन्वर्थाभिधानः स नानङ्गोऽनङ्गनामकः ॥२५॥
युद्धे सिंहरथं जित्वा जितपञ्चशतात्मजम् । कालसंवरभूपाय सकामोऽदर्शयत्कृती ॥२६॥
तादृशं तनयं दृष्ट्वा संतुष्टः कालसंवरः । मेने श्रेणीद्वयं दृप्तं वशीकृतमिवात्मनाम् ॥२७॥
महाराज्यपदोदारफलपुष्पं नृपोऽस्य सः । यौवराजमहापट्टं बबन्ध च विधानतः ॥२८॥
शतानि तनयाः पञ्च कालसंवरभूभृतः । चिन्तयन्ति ततोऽपायं मदनस्य समन्ततः ॥२९॥
आसने शयने वस्त्रे ताम्बूलेऽशनपानके । नालं छलयितुं ते तं छलान्वेषणतत्पराः ॥३०॥
अन्यदा तु विनीतोऽसौ नीतो नीत्यानुकूलकैः । कुमारस्तैः कुमारौघैः सिद्धायतनगोपुरम् ॥३१॥
नोदितस्तैः समारूढो गोपुराग्रं सवेगवान् । विद्याकोशं तिरीटं च लेभे तद्वासिनोऽमरात् ॥३२॥
प्रविष्टश्च पुनर्वेगान्महाकालगुहामसौ । खड्गं सखेटकं लेभे छत्रचामरसंयुतम् ॥३३॥
लेभे नागगुहायां च पादपीठं सुराद्वरम् । नागशय्यासनं वीणां विद्यां प्रासादकारिणीम् ॥३४॥
मकरध्वजमुत्तुङ्गं वाप्यां युद्धे जितात्सुरात् । अग्निकुण्डेऽग्निसंशोध्यं वस्त्रयुग्ममवाप्य सः ॥३५॥
मेषाकृतिगिरौ लेभे कर्णकुण्डलयोर्द्वयम् । मौलिं चामृतमालां च पाण्डके मर्कटामरात् ॥३६॥

तरुण प्रद्युम्न यद्यपि अन्य युवाओंके हृदयपर प्रहार करता था—उनमें मात्सर्य उत्पन्न करता था तथापि वह सबको प्रिय था ॥२४॥ मन्मथ, मदन, काम, कामदेव और मनोभव इत्यादि सार्थक नामोंसे वह युक्त था। यद्यपि वह अनङ्ग—शरीरसे रहित नहीं था तथापि लोग उसे अनङ्ग कहते थे। भावार्थ—प्रद्युम्न कामदेव पदका धारक था। साहित्यमें कामका एक नाम अनङ्ग है इसलिए प्रद्युम्न भी अनङ्ग कहलाता था ॥ २५ ॥ अतिशय कुशल प्रद्युम्नने, पाँच-सौ पुत्रोंको जीतनेवाले सिंहरथको युद्धमें जीतकर कालसंवरको दिखा दिया। भावार्थ—उस समय एक सिंहरथ नामका विद्याधर कालसंवरके विरुद्ध था उसे जीतनेके लिए उसने अपने पाँच-सौ पुत्र भेजे थे परन्तु सिंहरथने उन सबको पराजित कर दिया था। प्रद्युम्न ऐसा कुशल शूरवीर था कि उसने उसे युद्धमें जीतकर कालसंवरके आगे डाल दिया ॥ २६ ॥ ऐसे वीर पुत्रको देखकर कालसंवर बड़ा सन्तुष्ट हुआ और विजयार्धकी दोनों श्रेणियोंको अपने वशीभूत मानने लगा ॥२७॥ इसीसे प्रभावित हो राजाने प्रद्युम्नके लिए विधि-विधान पूर्वक युवराज पदका वह महापट्ट बाँध दिया जो महाराज्य पद रूपी उत्कृष्ट फलके लिए पुष्पके समान था ॥२८॥ इस घटनासे राजा कालसंवरके जो पाँच-सौ पुत्र थे वे सब ओरसे प्रद्युम्नके नाशका उपाय सोचने लगे ॥ २९ ॥ वे निरन्तर छलके खोजनेमें तत्पर रहने लगे। परन्तु बैठने, सोने, वस्त्र, पान तथा भोजन, पानी आदिके समय वे उसे छलनेके लिए समर्थ नहीं हो सके ॥ ३० ॥

किसी एक समय नीतिके अनुकूल आचरण करनेवाले कुमारोंके समूह, विनीत प्रद्युम्नकुमारको सिद्धायतनके गोपुरके समीप ले गये और इस प्रकारकी प्रेरणा करने लगे कि 'जो इस गोपुरके अग्रभागपर चढ़ेगा वह उसपर रहनेवाले देवसे विद्याओंका खजाना तथा मुकुट प्राप्त करेगा'। साथियोंसे इस प्रकार प्रेरित हो कुमार वेगसे गोपुरके अग्रभागपर चढ़ गया और वहाँके निवासी देवसे विद्याओंका खजाना तथा मुकुट ले आया ॥ ३१–३२ ॥ तदनन्तर भाइयोंसे प्रेरित हो वेगसे महाकाल नामक गुहामें घुस गया और वहाँसे तलवार, ढाल, छत्र तथा चमर ले आया ॥ ३३ ॥ वहाँसे निकलकर नागगुहामें गया और वहाँके निवासी देवसे उत्तम पादपीठ, नागशय्या, आसन, वीणा तथा भवन बना देनेवाली विद्या ले आया ॥३४॥ वहाँसे आकर किसी वापिकामें गया और युद्धमें जीते हुए देवसे मकरके चिह्नसे चिह्नित ऊँची ध्वजा प्राप्त कर निकला। तदनन्तर अग्निकुण्डमें प्रविष्ट हुआ सो वहाँसे अग्निसे शुद्ध किये दो वस्त्र ले आया ॥ ३५ ॥ तत्पश्चात् मेषाकृति पर्वतमें प्रवेश कर कानोंके दो कुण्डल ले आया। उसके बाद पाण्डुक नामक वनमें प्रवेश कर वहाँके निवासी मर्कट नामक देवसे मुकुट और

विद्याकरिवरं प्राप कपित्थवनदेवतः । वल्मीके क्षुरिकां चापि कवचं मुद्रिकादिकम् ॥३७॥
शरावपर्वते लेभे कटिसूत्रमुरश्छदम् । कामः कटककेयूरकण्ठिकाभरणं शुभम् ॥३८॥
शूकरासुरतः शङ्खं दिव्यं प्राप शरासनम् । हारं सुरेन्द्रजालं च मनोवेगाद्विकीलितात् ॥३९॥
मनोवेगरिपोर्लेभे वसन्तखचरात्ततः । कन्यां नरेन्द्रजालं च तयोः सख्यस्य कारकः ॥४०॥
चापं च कौसुमं प्रापदर्जुनो भवनाधिपात् । उन्मादमोहसंतापमदशोककरान् शरान् ॥४१॥
अन्यां नागगुहां यातश्चन्दनागुरुमालिकाः । पौष्पं छत्रं च शयनं लेभे तत्र तु पार्थिवात् ॥४२॥
स दुर्जयवने लेभे जयन्तगिरिवर्तिनी । खेटवायुसरस्वत्यो रतिं कामः शरीरजाम् ॥४३॥
षोडशेष्वपि चैतेषु लाभस्थानेषु मन्मथम् । लब्धानेकमहालाभं दृष्ट्वा विस्मितमानसाः ॥४४॥
ज्ञात्वा पुण्यस्य माहात्म्यं कुमाराः संवरादयः । [1]शंश्रित्वा मदनेनामा[2] निजं नगरमाययुः ॥४५॥
लब्धं दिव्यं रथं शुभ्रैर्वृषैर्व्यूढमधिष्ठितः । चापी पञ्चशरी छत्री ध्वजी दिव्यविभूषणी ॥४६॥
मनो हरन्नरस्त्रीणां मदनो मदनेषुभिः । मेघकूटं प्रविष्टोऽसौ कुमारशतवेष्टितः ॥४७॥
सप्रणामस्ततो दृष्ट्वा प्रद्युम्नः कृष्णसंवरम् । धिष्ण्यं कनकमालायाः प्रस्थितः स रथे स्थितः ॥४८॥
तथा च स्थितनेपथ्यं नेत्रपथ्यं न दूरतः । दृष्ट्वा कनकमाला तं भावं कमपि संश्रिता ॥४९॥
रथादुत्तीर्य विनतं शंसित्वाघ्राय मस्तके । आसयित्वान्तिके तं सास्पर्शयन्मृदुपाणिना ॥५०॥

अमृतमयी माला लेकर लौटा ॥ ३६ ॥ कपित्थ नामक वनमें गया तो वहाँके निवासी देवसे विद्यामय हाथी ले आया। वल्मीक वनमें प्रवेश कर वहाँके निवासी देवसे क्षुरी, कवच तथा मुद्रिका आदि ले आया ॥३७॥ शराव नामक पर्वतमें वहाँके निवासी देवसे कटिसूत्र, कवच, कड़ा, बाजूबन्द और कण्ठाभरण आदि प्राप्त किये ॥ ३८ ॥ शूकर नामक वनमें शूकरदेवसे शङ्ख और सुन्दर धनुष प्राप्त किया तथा वहींपर कीले हुए मनोवेग नामक विद्याधरसे हार और इन्द्रजाल प्राप्त किया ॥ ३९ ॥ मनोवेगका वैरी वसन्त विद्याधर था, कुमारने उन दोनोंकी मित्रता करा दी इसलिए उससे एक कन्या तथा नरेन्द्रजाल प्राप्त किया ॥४०॥ आगे चलकर एक भवनमें प्रवेश कर उसके अधिपति देवसे पुष्पमय धनुष और उन्माद, मोह, सन्ताप, मद तथा शोक उत्पन्न करनेवाले बाण प्राप्त किये ॥ ४१ ॥ तदनन्तर एक दूसरी नागगुहामें गया तो वहाँके स्वामी देवसे चन्दन तथा अगुरुकी मालाएँ, फूलोंका छत्र और फूलोंकी शय्या प्राप्त की ॥ ४२ ॥ तदनन्तर जयन्तगिरिपर वर्तमान दुर्जय नामक वनमें गया और वहाँसे विद्याधर वायु तथा उसकी सरस्वती नामक स्त्रीसे उत्पन्न रति नामक पुत्री लेकर लौटा ॥ ४३ ॥ इस प्रकार इन सोलहों लाभके स्थानोंमें जिसे अनेक महा लाभोंकी प्राप्ति हुई थी ऐसे प्रद्युम्न कुमारको देखकर संवर आदि कुमारोंके चित्त आश्चर्यसे चकित हो गये। तदनन्तर पुण्यका माहात्म्य समझ शान्ति धारण कर वे प्रद्युम्नके साथ अपने नगर वापिस आ गये ॥ ४४-४५ ॥ जो प्राप्त हुए सफेद बैलोंसे जुते दिव्य रथपर आरूढ था, धनुष, पाँच बाण, छत्र, ध्वजा और दिव्य आभूषणोंसे आभूषित था तथा कामके बाणोंसे पुरुष और स्त्रियोंके मनको हर रहा था ऐसे प्रद्युम्नने सैकड़ों कुमारोंसे परिवृत हो मेघकूट नामक नगरमें प्रवेश किया ॥ ४६-४७ ॥

पहुँचते ही उसने नमस्कार कर कालसंवरके दर्शन किये और उसके बाद उसी भाँति रथपर बैठा हुआ कनकमालाके घरकी ओर प्रस्थान किया ॥ ४८ ॥ उस प्रकारकी वेषभूषासे युक्त तथा नेत्रोंके लिए आनन्ददायी प्रद्युम्नको समीप आया देख कनकमाला किसी दूसरे ही भावको प्राप्त हो गयी ॥ ४९ ॥ रथसे नीचे उतरकर नम्रीभूत हुए प्रद्युम्नकी कनकमालाने बहुत प्रशंसा की, उसका मस्तक सूँघा, उसे पासमें बैठाया और कोमल हाथसे उसका स्पर्श

1. संश्रित्वा म०, ग० । २. सह ।

गाढमोहोदयात्तस्यास्ततः परवशात्मनः। कर्षन्तो हृदयक्षोणीं प्रवृत्ता दुर्मनोरथाः ॥५१॥
स्वाङ्गैरस्याङ्गसङ्गं या लभेत शयने सकृत्। कामिनी भुवने सैका शेषास्त्वाकृतिमात्रकम् ॥५२॥
रूपलावण्यसौभाग्यवैदग्ध्यं गुणगोचरम्। कामाश्लेषस्य[1] सौलभ्ये दौर्लभ्ये स्यात्तृणं तु मे ॥५३॥
इतिप्रवृत्तसंकल्पामसंभावितसन्मनाः। तां प्रणम्य स लब्धाशीः प्रद्युम्नः स्वगृहं गतः ॥५४॥
इतिप्रबलदुःखेयं खेचरी निखिलाः क्रियाः। विसस्मार स्मराश्लेषसुखलाभ[2] मनोरथा ॥५५॥
अस्वस्थामपरेद्युस्तां प्रद्युम्नो द्रष्टुमागतः। अद्राक्षीद्बिसिनीपत्रपर्यस्ततनुमाकुलाम् ॥५६॥
पृच्छति स्म स तां कामः शरीरास्वास्थ्यकारणम्। इङ्गितैराङ्गिकैः[3] साऽपि[4] वाचिक्यैश्च व्यबोधयत् ॥५७॥
वैपरीत्यं ततो ज्ञात्वा निन्दित्वा कर्मचेष्टितम्। स मात्रपत्यसंबन्धप्रत्यायनपरोऽभवत् ॥५८॥
सापि तस्मै यथावृत्तमादिमध्यावसानतः। अटवीलाभसंवृद्धिविद्यालाभानवेदयत् ॥५९॥
स्वसंबन्धं ततः श्रुत्वा संदिग्धार्थमतिर्गतः। दृष्ट्वा सागरचन्द्राख्यं मुनिं चैत्यगृहे मुदा ॥६०॥
नत्वा पृष्ट्वा ततो ज्ञात्वा सर्वान् पूर्वभवान्निजान्। तथा कनकमालायाश्चन्द्राभायाः पुरा भवे ॥६१॥
सम्यग्दर्शनसंशुद्धो ज्ञातप्रज्ञप्तिलाभकः। गत्वा शीलधनोऽप्राक्षीन्मदनो मदनातुराम्[5] ॥६२॥

किया॥५०॥ तदनन्तर मोहका तीव्र उदय होनेसे उसकी आत्मा विवश हो गयी और हृदयरूपी भूमिको खोदते हुए अनेक खोटे विचार उसके मनमें उठने लगे ॥५१॥ वह विचारने लगी कि जो स्त्री शय्यापर अपने अंगोंसे इसके अंगोंके स्पर्शको एक बार भी प्राप्त कर लेती है संसारमें वही एक स्त्री है अन्य स्त्रियाँ तो स्त्रीकी आकृतिमात्र हैं ॥ ५२ ॥ यदि मुझे प्रद्युम्नका आलिङ्गन प्राप्त होता है तो मेरा रूप, लावण्य, सौभाग्य तथा चातुर्य सफल है और दुर्लभ रहता है तो यह सब मेरे लिए तृणके समान तुच्छ है ॥ ५३ ॥ जिसके मनमें कनकमालाके ऐसे विचारोंकी कल्पना भी नहीं थी ऐसा प्रद्युम्न, पूर्वोक्त संकल्प-विकल्प करनेवाली कनकमालाको प्रणाम कर तथा आशीर्वाद प्राप्त कर अपने घर चला गया ॥ ५४ ॥

उधर प्रद्युम्नके आलिङ्गनजन्य सुखको प्राप्त करनेकी जिसकी लालसा लग रही थी ऐसी विद्याधरी कनकमाला प्रबल दुःखसे दुःखी हो सब काम-काज भूल गयी ॥ ५५ ॥ दूसरे दिन उसके अस्वस्थ होनेका समाचार पा प्रद्युम्न उसे देखने गया तो क्या देखता है कि कनकमाला कमलिनीके पत्तोंकी शय्यापर पड़ी हुई बहुत व्याकुल हो रही है ॥५६॥ प्रद्युम्नने उससे शरीरकी अस्वस्थताका कारण पूछा तो उसने शरीर और वचनसम्बन्धी चेष्टाओंसे अपना अभिप्राय प्रकट किया ॥५७॥ तदनन्तर इस विपरीत बातको जानकर और कर्मकी चेष्टाओंकी निन्दा कर प्रद्युम्न उसे माता और पुत्रका सम्बन्ध बतलानेमें तत्पर हुआ ॥५८॥ इसके उत्तरमें कनकमालाने भी उसे आदि, मध्य और अन्त तक जैसा वृत्तान्त हुआ था वह सब बतलाते हुए कहा कि तू मुझे अटवीमें किस प्रकार मिला, किस प्रकार तेरा लालन-पालन हुआ और किस प्रकार मुझे विद्याओंका लाभ हुआ ॥५९॥ कनकमालासे अपना सम्बन्ध सुन प्रद्युम्नके मनमें संशय उत्पन्न हुआ जिससे वह स्पष्ट पूछनेके लिए जिन-मन्दिरमें विद्यमान सागरचन्द्र मुनिराजके पास गया और हर्षपूर्वक उन्हें नमस्कार कर उसने उनसे अपने सब पूर्वभव पूछे। पूर्वभव ज्ञात कर उसे यह भी मालूम हो गया कि यह कनकमाला पूर्वभवमें चन्द्राभा थी ॥६०-६१॥ शुद्ध सम्यग्दर्शनके धारक प्रद्युम्नको मुनिराजसे यह भी विदित हुआ कि तुझे कनकमालासे प्रज्ञप्ति विद्याका लाभ होनेवाला है। तदनन्तर शीलरूपी धनको धारण करनेवाले प्रद्युम्नने जाकर कामसे पीडित कनकमालासे प्रज्ञप्ति विद्याके विषयमें पूछा ॥६२॥

---

१. प्रद्युम्नालिङ्गनस्य। २. लाभः मनोरथा म०। ३. -राङ्गितैः म०, घ०, ङ०, -रागितैः ग०। ४. सोऽपि म०। ५. मदनातुरम् म०।

दृष्ट्वा हृष्टा जगौ तं सा शृणु काम भणामि ते । गौरीं प्रज्ञप्तिविद्यां च त्वं गृहाण यदीच्छसि ॥६३॥
ततः प्रसाद इच्छामि दीयतामितिवादिने । ददौ विधियुते विद्ये विद्याधरदुरासदे ॥६४॥
प्रसारितकरो विद्ये गृहीत्वा प्रमदी स ताम् । प्राणविद्याप्रदानान्मे गुरुस्त्वमिति सद्वचाः ॥६५॥
त्रिःपरीत्य प्रणम्याग्रे स्थितः सुकरशेखरः । अपत्योचितमादेशं याचित्वा स्वोचितं ययौ ॥६६॥
छद्मिताहमिति ज्ञात्वा सातिकोपवशात्ततः । कक्षवक्षः[1]कुचोद्देशान् नखक्षतभृतोऽकरोत् ॥६७॥
साऽदर्शयच्च पत्येऽङ्गं नाथ प्रद्युम्नचेष्टितम् । पश्येत्यपत्यसंभारं प्रत्येतिस्म स चापि तत् ॥६८॥
आहूय रहसि क्रुद्धः पुत्रपञ्चशतानि सः । आदिदेशान्यदुर्बोधं प्रद्युम्नो मार्यतामिति ॥६९॥
लब्धादेशास्ततस्तुष्टास्ते तमादाय सादराः । अन्येद्युरगमन्पापा वापीं कालाम्बुनामिकाम् ॥७०॥
निपत्य युगपत्सर्वे तस्योपरि जिघांसवः[2] । प्राचूचुदन् जलक्रीडां वाप्यां कुर्म इति द्विषः ॥७१॥
[3]कर्णे कथितमेतस्य ततः प्रज्ञप्तिविद्यया । यथातथ्यमिति क्रोधादन्तर्हिततनुः क्षणात् ॥७२॥
पपात मायया वाप्यां निर्घाता इव निर्घृणाः । तेऽपि सर्वे समं पेतुरस्योपरि जिघांसवः ॥७३॥
ऊर्ध्वपादानधोवक्त्रानेकशेषानमूनसौ । स्तम्भयित्वानुजं कृत्वा पञ्चचूडमजीगमत् ॥७४॥

प्रद्युम्नको आया देख कनकमालाने उससे कहा कि हे काम ! मैं एक बात कहती हूँ सुन, यदि तू मुझे चाहता है तो मैं तुझे गौरी और प्रज्ञप्ति नामक विद्याएँ कहती हूँ—बतलाती हूँ—तू ग्रहण कर ॥ ६३ ॥

तदनन्तर 'यह आपकी प्रसन्नता है, मैं आपको चाहता हूँ, विद्याएँ मुझे दीजिए' इस प्रकार कहनेवाले प्रद्युम्नके लिए कनकमालाने विद्याधरोंको दुष्प्राप्य दोनों विद्याएँ विधिपूर्वक दे दीं ॥ ६४ ॥ हाथ फैलाकर दोनों विद्याओंको ग्रहण करता हुआ प्रद्युम्न बड़ा प्रसन्न हुआ। जब वह विद्याएँ ले चुका तब इस प्रकारके उत्तम वचन बोला कि 'पहले अटवीसे लाकर आपने मेरी रक्षा की अतः प्राणदान दिया और अभी विद्यादान दिया—इस तरह प्राणदान और विद्यादान देनेसे आप मेरी गुरु हैं'। इस प्रकारके उत्तम वचन कह तीन प्रदक्षिणाएँ दे वह हाथ जोड़ शिरसे लगा कर सामने खड़ा हो गया और पुत्रके उचित जो भी आज्ञा मेरे योग्य हो सो दीजिए, इस प्रकार याचना करने लगा। कनकमाला चुप रह गयी और प्रद्युम्न थोड़ी देर वहाँ रुक कर चला गया ॥६५–६६॥

'मैं इस तरह इसके द्वारा छली गयी हूँ' यह जान कनकमालाने तीव्र क्रोधवश अपने कक्ष, वक्षःस्थल तथा स्तनोंको स्वयं ही नखोंके आघातसे युक्त कर लिया ॥६७॥ और पतिके लिए अपना शरीर दिखाते हुए कहा कि हे नाथ ! अपत्यजनोंके योग्य (?) यह प्रद्युम्नकी करतूत देखो। पतिने भी स्त्रीके इस प्रपञ्चपर विश्वास कर लिया ॥ ६८ ॥ राजा कालसंवर इस घटनासे बहुत ही क्रुद्ध हुआ। उसने एकान्तमें बुलाकर अपने पाँच सौ पुत्रोंसे कहा कि 'जिस तरह किसी अन्यको पता न चल सके उस तरह इस प्रद्युम्नको मार डाला जाये' ॥६९॥

तदनन्तर पिताकी आज्ञा पा हर्षसे फूले हुए वे पापी कुमार बड़े आदरसे दूसरे दिन प्रद्युम्नको साथ लेकर कालाम्बु नामक वापिका पर गये ॥७०॥ और एक साथ सब प्रद्युम्नपर कूद कर उसके घातकी इच्छा रखते हुए उसे बार-बार प्रेरित करने लगे कि चलो वापीमें जलक्रीड़ा करें ॥ ७१ ॥ उसी समय प्रज्ञप्ति विद्याने प्रद्युम्नके कानमें सब बात ज्योंकी-त्यों कह दी। सुन कर प्रद्युम्नको बहुत क्रोध आया और वह उसी क्षण मायासे अपना मूल शरीर कहीं छिपा कृत्रिम शरीरसे वापिकामें कूद पड़ा। उसके कूदते ही वज्रके समान निर्दय एवं मारनेके इच्छुक सब कुमार एक साथ उसके ऊपर कूद पड़े ॥ ७२–७३ ॥ प्रद्युम्नने एकको शेष बचा सभी कुमारोंको ऊपर पैर और नीचे मुख कर कील दिया और एक भाईको पाँच चोटियोंका

१. कचोद्देशान् म० । २. जिघित्सवः म० । ३. कर्णो म० ।

पुत्रोदन्तं ततः श्रुत्वा द्विगुणक्रोधदीपितः । सन्नह्य सर्वसैन्येन संप्राप्तः कालसंवरः ॥७५॥
विद्याविकृतसैन्येन प्रद्युम्नेन ततश्चिरम् । युद्ध्वाभग्नोऽति भग्नेच्छः स गत्वा कृष्णसंवरः ॥७६॥
ऊचे कनकमालां तां देहि प्रज्ञप्तिमित्यरम् । स्तन्येन सह बाल्येऽस्मै मया दत्तेति साऽवदत् ॥७७॥
ज्ञातमायादुरीहोऽसौ पुनरागत्य मानवान् । युध्यमानोऽमुना बद्धो निहितो हि शिलातले ॥७८॥
तदानीमेव संप्राप्तो नारदोऽतिविशारदः । प्रद्युम्नेन कृताभ्यर्चः संबन्धमखिलं जगौ ॥७९॥
कालसंवरमुन्मुच्य क्षमयित्वा ततोऽवदत् । पूर्वकर्मवशेच्छाया मातुर्मे क्षम्यतामिति ॥८०॥
[1]निरुपायानुपायज्ञो मुक्त्वा पञ्चशतान्यपि । भ्रातृस्नेहपरः कामः क्षमयित्वा पुनः पुनः ॥८१॥
आपृष्टेन स तुष्टेन कालसंवरभूभृता । विसृष्टो रुक्मिणीकृष्णदर्शनोत्सुकमानसः ॥८२॥
प्रणम्य पितरं स्नेहान्नारदेन सहाम्बरम् । अथारूढो विमानेन द्वारिकागमनं प्रति ॥८३॥
संकथाभिर्विचित्राभिर्नभस्यागच्छतोस्तयोः । अतिक्रान्तेभपुरयोः सैन्यं दृष्टिपथेऽभवत् ॥८४॥
कस्येदमटवीमध्ये पूज्य सैन्यमधो महत् । पश्चिमाशामुखं याति क्व किमर्थमतिद्रुतम् ॥८५॥
संपृष्टः कामदेवेन नारदोऽप्यगदीदिति । शृणु काम कथालेशं कथयामि तवाधुना ॥८६॥
अस्ति दुर्योधनो राजा कुरुवंशविभूषणः । दुर्योधनो द्विषां युद्धे स हास्तिनपुरे वरे ॥८७॥

धारक बना खबर देनेके लिए कालसंवरके पास भेज दिया ॥७४॥

तदनन्तर पुत्रोंका समाचार सुन द्विगुणित क्रोधसे देदीप्यमान होता हुआ कालसंवर युद्धकी तैयारी कर सब सेनाके साथ वहाँ पहुँचा ॥७५॥ उधर प्रद्युम्नने भी विद्याके प्रभावसे एक सेना बना ली सो उसके साथ चिर काल तक युद्ध कर कालसंवर हार गया और जीवन की आशा छोड़ जाकर कनकमालासे बोला कि 'तू मुझे शीघ्र ही प्रज्ञप्तिनामक विद्या दे।' कनकमालाने कहा कि 'मैं तो बाल्य अवस्थामें दूधके साथ वह विद्या प्रद्युम्नके लिए दे चुकी हूँ' ॥ ७६–७७ ॥ तदनन्तर स्त्रीकी मायापूर्ण दुश्चेष्टाको जान कर मानी कालसंवर पुनः युद्धके मैदानमें आकर युद्ध करने लगा और प्रद्युम्नने उसे बाँध कर एक शिलातलपर रख दिया ॥७८॥ उसी समय अत्यन्त निपुण नारदजी वहाँ आ पहुँचे। प्रद्युम्नने उनका सन्मान किया। तदनन्तर नारदने सब सम्बन्ध कहा ॥७९॥ तदनन्तर राजा कालसंवरको बन्धनसे मुक्त कर प्रद्युम्नने क्षमा माँगते हुए उनसे कहा कि माता कनकमालाने जो भी किया है वह पूर्व कर्मके वशीभूत होकर ही किया है अतः उसे क्षमा कीजिए ॥८०॥ उपायके ज्ञाता प्रद्युम्नने जिनका कुछ भी उपाय नहीं चल रहा था ऐसे पाँच सौ कुमारोंको भी छोड़ दिया और भ्रातृस्नेहके प्रकट करनेमें तत्पर हो उनसे बार-बार क्षमा माँगी ॥८१॥

तदनन्तर रुक्मिणी और कृष्णके दर्शनके लिए जिसका मन अत्यन्त उत्सुक हो रहा था ऐसे प्रद्युम्नने जानेके लिए राजा कालसंवरसे आज्ञा माँगी और उसने भी सन्तुष्ट होकर उसे विदा कर दिया ॥८२॥ तत्पश्चात् स्नेहपूर्वक पिताको प्रणाम कर प्रद्युम्न, द्वारिका जानेके लिए नारदके साथ-साथ विमान-द्वारा आकाशमें आरूढ हुआ ॥८३॥ नाना प्रकारकी कथाओंके द्वारा आकाशमें आते हुए दोनों जब हस्तिनापुरको पार कर कुछ आगे निकल आये तब एक सेना उनके दृष्टिपथमें आयी—एक सेना उन्हें दिखायी दी ॥८४॥ सेनाको देख प्रद्युम्नने नारदसे पूछा कि 'हे पूज्य! यह अटवीके बीच नीचे किसकी बड़ी भारी सेना विद्यमान है? इस सेनाका मुख पश्चिम दिशाकी ओर है। यह बड़ी तेजीसे कहाँ और किसलिए जा रही है?' इस प्रकार प्रद्युम्नके पूछने पर नारदने कहा कि हे प्रद्युम्न! सुनो, मैं इस समय तुझसे एक कथाका कुछ अंश कहता हूँ ॥८५–८६॥

कुरुवंशका अलंकारभूत एक दुर्योधन नामका राजा है जो युद्धमें शत्रुओंके लिए सचमुच

---

१. निरपायानु. म०, घ०।

अग्रजाय मया देया रुक्मिणीसत्यभामयोः। दुहितेति प्रतिज्ञातं पूर्वं प्रीतेन तेन च ॥८८॥
अग्रजस्त्वं ततो जातो विष्णवे विनिवेदितः। भानुश्च सत्यभामायास्तदनन्तरसान्तरैः ॥८९॥
अकस्मादुद्गच्छता क्वापि [1]हृतस्त्वं धूमकेतुना। विषण्णा रुक्मिणी जाता सत्यभामा तु तोषिणी ॥९०॥
अविज्ञातभवद्वार्तो दुर्योधनयशोधनः। कन्यकामुदधिं नाम्ना भानवे प्राहिणोदसौ ॥९१॥
[2]भाविनीन ततः सेयं महासाधनरक्षिता। द्वारिकां प्रस्थिता कन्या भानवे किल भाविनी ॥९२॥
श्रुत्वा नारदमाकाशे स्थापयित्वा क्षणं ततः। सोऽवतीर्य पुरस्तस्थौ शाबरं वेषमाश्रितः ॥९३॥
केशवेन वितीर्णं मे शुल्कं दत्वा तु गम्यताम्। इत्युक्ते कैश्चिदित्युक्तं प्रार्थ्यतां प्रार्थितं तव ॥९४॥
यदत्र निखिले सैन्ये सारभूतमितीरिते। ईरितं सारभूतात्र कन्यकेति समन्युभिः ॥९५॥
यद्येवं दीयतां मह्यं सैवेत्युक्ते जगुः परे। विष्णुना जनितो न त्वं स प्राह जनितस्त्विति ॥९६॥
असंबद्धप्रलापस्य धृष्टतां पश्यतेति ते। धनुःकोटिभिरुत्सार्य प्रवृत्ता गन्तुमुद्यताः ॥९७॥
ततः शाबरसेनाभिर्विद्यया विकृतात्मभिः। दुर्योधनबलं जित्वा कन्यामादाय खं श्रितः ॥९८॥
दिव्यरूपं तमालोक्य कन्या त्यक्तभया ततः। हृष्टा नारदवाक्येन बुद्धतत्त्वा समाश्वसीत् ॥९९॥

ही दुर्योधन है (जिसके साथ युद्ध करना कठिन है) और वह हस्तिनापुर नामके उत्तम नगर में रहता है ॥८७॥ एक बार पहले प्रसन्न होकर उसने कृष्णसे प्रतिज्ञा की थी कि यदि मेरे कन्या हुई और आपकी रुक्मिणी तथा सत्यभामा रानियोंके पुत्र हुए तो जो पुत्र पहले होगा उसके लिए मैं अपनी कन्या दूँगा ॥८८॥ तदनन्तर रुक्मिणीके तुम और सत्यभामाके भानु साथ ही साथ उत्पन्न हुए परन्तु रुक्मिणीके सेवकोंने कृष्ण महाराजके लिए पहले तुम्हारी खबर दी इसलिए तुम 'अग्रज' घोषित किये गये और सत्यभामाके स्वजनोंने पीछे खबर दी इसलिए उसका पुत्र भानु 'अनुज' घोषित किया गया ॥८९॥ तदनन्तर अकस्मात् कहीं जाता हुआ धूमकेतु नामका असुर तुम्हें हर ले गया इसलिए तुम्हारी माता रुक्मिणी बहुत दुखी हुई और सत्यभामा संतुष्ट हुई ॥९०॥ जब आपका कुछ समाचार नहीं मिला तब यशरूपी धनको धारण करनेवाले दुर्योधनने अपनी उदधिकुमारी नामकी कन्या सत्यभामाके पुत्र भानुके लिए भेज दी ॥९१॥ हे स्वामिन्! नाना भावोंको धारण करनेवाली यह वही कन्या बड़ी भारी सेनासे सुरक्षित हो द्वारिकाको जा रही है तथा सत्यभामाके पुत्र भानुकी स्त्री होनेवाली है ॥९२॥

यह सुन प्रद्युम्नने नारदको तो वहीं आकाशमें खड़ा रखा और आप उसी क्षण नीचे उतर कर भीलका वेष रख सेनाके सामने खड़ा हो गया ॥९३॥ वह कहने लगा कि 'कृष्ण महाराजने मेरे लिए जो शुल्क देना निश्चित किया है वह देकर जाइए'। भीलके इस प्रकार कहने पर कुछ लोगोंने कहा कि 'माँग क्या चाहता है'? ॥९४॥ भीलने उत्तर दिया कि 'इस समस्त सेनामें जो वस्तु सारभूत हो वही चाहता हूँ'। उसके इस प्रकार कहने पर लोगोंने क्रोध दिखाते हुए कहा कि 'सेनामें सारभूत तो कन्या है'। भीलने फिर कहा कि 'यदि ऐसा है तो वही कन्या मुझे दी जाये'। यह सुन लोगोंने कहा कि 'तू विष्णु—कृष्णसे उत्पन्न नहीं हुआ है'—कन्या उसे दी जायगी जो विष्णुसे उत्पन्न होगा। भीलने जोर देकर कहा कि 'मैं विष्णुसे उत्पन्न हुआ हूँ'। 'इस असम्बद्ध बकनेवालेकी धृष्टता [तो देखो' यह कह उसे धनुषकी कोटीसे अलग हटाकर लोग ज्योंही आगे जानेके लिए उद्यत हुए त्योंही वह विद्याके द्वारा निर्मित भीलोंकी सेनासे दुर्योधनकी सेनाको जीत कर तथा कन्या लेकर आकाशमें जा पहुँचा ॥९५-९८॥ विमानमें पहुँचकर प्रद्युम्नने अपना असली रूप रख लिया अतः सुन्दर रूपको धारण करनेवाले उसको देख कर कन्या निर्भय हो गयी और नारदके कहनेसे यथार्थ बातको जान हर्षित हो सुखकी साँस लेने लगी ॥९९॥

१. हतस्त्वं म०। २. भाविनीव म०, ख०। भाविनी+इन इतिच्छेदः।

विमानं [1]कामगं [2]कामः समारुह्य समं तया । नारदेन च संप्राप्तो द्वारिकां द्वारहारिणीम् ॥१००॥
अपश्यत्स विदूरेण सागरेण गरीयसा । प्राकारेण च तां गुप्तां गोपुराट्टालसंकुलाम् ॥१०१॥
बाह्यबाह्यालिकां भानुरश्वव्यायामहेतुना । निर्गतोऽदर्शि कामेन गगनस्थविमानिना ॥१०२॥
तुरगस्त्वरया [3]दिव्यः स्थविराकारधारिणा । नीतो भानुकुमारार्थमारूढस्तं स हारिणम् ॥१०३॥
वाह्यमानेन तेनासौ कुमारः कामरूपिणा । खलीकृत्य चिरं नीतः स्थविरान्तं निजेच्छया ॥१०४॥
अवतीर्णस्ततो भानुरहो कौशलमित्यलम् । हसितः साट्टहासेन करास्फालनकारिणा ॥१०५॥
जरन्नारोप्यमाणस्तु भानुलोकेन तं चिरम् । खलीकृत्य व्यलीकेन व्यालाश्वस्थः स्वयं ययौ ॥१०६॥
मायामर्कटमायाश्वैर्भामोपवनभङ्गकृत् । अशोषयन्महावापीं मायया मदनस्तदा ॥१०७॥
मक्षिकादंशमशकैः सकरस्पन्दनं नृपम् । निवर्त्य द्वारि चिक्रीड खरमेषरथी चिरम् ॥१०८॥
व्यामोह्य पौरलोकं च विविधक्रीडया चिरम् । वसुदेवेन संक्रीड्य मेषयुद्धेन संसदी ॥१०९॥
भोजनेऽग्रासने विप्रः सत्यायाः सोऽग्रजन्मनः । खलीकृत्यासनैर्लग्नैश्छर्दिकाहारकोऽगमत् ॥११०॥

अथानन्तर कन्या उदधिकुमारी और नारद मुनिके साथ, इच्छानुकूल गमन करनेवाले विमानपर आरूढ़ होकर प्रद्युम्न, द्वारोंसे सुन्दर द्वारिका नगरी जा पहुँचा ॥१००॥ दूरसे ही उसने विशाल सागर और कोटसे सुरक्षित एवं गोपुर और अट्टालिकाओंसे व्याप्त द्वारिकाको देखा ॥१०१॥ उसी समय सत्यभामाका पुत्र भानुकुमार, घोड़ेको व्यायाम करानेके लिए नगरी के बाह्य मैदानमें आया था उसे प्रद्युम्न ने देखा। देखते ही वह विमानको आकाशमें खड़ा रख पृथिवीपर आया और वृद्धका रूप रख सुन्दर घोड़ा लेकर भानुकुमारके पास पहुँचा। बोला कि मैं यह घोड़ा भानुकुमारके लिए लाया हूँ। देखते ही भानुकुमार उस सुन्दर घोड़ा पर सवार हो गया ॥१०२–१०३॥ इच्छानुकूल रूपको धारण करनेवाले उस घोड़ेने भानुकुमार को बहुत देर तक तंग किया और बादमें वह भानुकुमारको साथ ले अपनी इच्छानुसार उस वृद्धके पास ले आया। भानुकुमार घोड़ासे नीचे उतर आया और वृद्धने अट्टहास कर तथा हाथसे घोड़ाका आस्फालन कर व्यङ्ग्यपूर्ण भाषामें हँसी उड़ाते हुए भानुकुमारसे कहा कि अहो! घोड़ाके चलानेमें आपकी बड़ी चतुराई है ? ॥१०४–१०५॥ साथ ही वृद्धने यह भी कहा कि मैं बहुत बूढ़ा हो गया हूँ स्वयं मुझसे घोड़ापर बैठते नहीं बनता। यदि कोई मुझे बैठा दे तो मैं अपना कौशल दिखाऊँ। साथ ही भानुकुमारके लोग उसे घोड़ापर चढ़ानेके लिए उद्यम करने लगे परन्तु प्रद्युम्नने अपना शरीर इतना भारी कर लिया कि उन अनेक लोगोंको उसका उठाना दुर्भर हो गया। इस प्रकार अपनी मायासे उन सब लोगोंको तंग कर वह वृद्ध रूपधारी प्रद्युम्न उस घोड़ेपर स्वयं चढ़ गया और अपना कौशल दिखाता हुआ चला गया ॥१०६॥

तदनन्तर उसने मायामयी वानरों और मायामयी घोड़ोंसे सत्यभामाका उपवन उजाड़ डाला तथा मायासे उसकी बड़ी भारी वापिका सुखा दी ॥ १०७ ॥ नगरके द्वारपर राजा श्रीकृष्ण आ रहे थे उन्हें देख उसने मायामयी मक्खियों और डांस-मच्छरोंको इतनी अधिक संख्यामें छोड़ा कि उनका आगे बढ़ना कठिन हो गया और हाथ हिलाते हुए उनसे लौटते ही बना। तदनन्तर वह गधे और मेढ़ेके रथपर सवार हो नगरमें चिरकाल तक क्रीड़ा करता रहा ॥१०८॥ इस प्रकार नाना तरहकी क्रीड़ाओंसे नगरवासियोंको मोहित कर उसने बड़ी प्रसन्नतासे अपने बाबा वसुदेवके साथ मेषयुद्धसे क्रीड़ा की ॥१०९॥

तदनन्तर सत्यभामाके महलमें पहुँचा। वहाँ ब्राह्मणोंका भोज होनेवाला था सो प्रद्युम्न एक ब्राह्मणका रूप रख सबसे आगेके आसन पर जा बैठा। एक अपरिचित ब्राह्मणको आगे बैठा देख सब ब्राह्मण कुपित हो गये तब लगे हुए आसनोंसे उसने उन ब्राह्मणोंको खूब तंग

१. यथेच्छगामि। २. प्रद्युम्नः। ३. दिव्यस्थविराकार—म०, ग०।

विकृत्य क्षौल्लकं वेषं मातृमोदकभक्षिणा। [1]भामादेशकरस्तेन नापितश्च तिरस्कृतः ॥१११॥
संकर्षणस्य हत्वेच्छां पादाकर्षणकारिणः। आरराम चिरं स्वेच्छं लोकविस्मयकृत्कृती ॥११२॥
प्रद्युम्नागमचिह्नानि पूर्वोक्तानि तदा परम्[2]। प्रस्रुतस्तनकुम्भाया मातुरध्यक्षतां ययुः ॥११३॥
साऽतोऽचिन्तयदत्यन्तविस्मिता मे सुतो न्वयम्[3]। कृतरूपपरावृत्तिरागतः षोडशाब्दके ॥११४॥
तां प्रद्युम्नकुमारोऽपि तत्क्षणं प्रकृतिस्थितः। सुतस्नेहमितीरित्वा मातरं प्रणनाम सः ॥११५॥
[4]सानन्दा साकुलाक्षी तं रुक्मिणी तनयं नतम्। परिष्वज्य जहौ दुःखमश्रुभिः सहसा चितम् ॥११६॥
दर्शनामृतसिक्ताया पुलकव्यपदेशतः। प्रत्यङ्गरोमकूपेभ्यः सुतस्नेह इवोद्ययौ ॥११७॥
तयोः कुशलसंप्रश्ने संवृत्ते मातृपुत्रयोः। माता पुत्रमवोचत्तं चित्तनिर्वृत्तिदायिनम् ॥११८॥
धन्या कनकमालासौ पुत्र! पुत्रफलं यया। बालक्रीडावलोकाख्यमनुभूतं शिशोस्तव ॥११९॥
इत्युक्ते प्रणिपत्यासौ जगाद नयनोत्सवः। बालभावमहं मातर्दर्शयामीह दृश्यताम् ॥१२०॥
ततः स तत्क्षणं जातस्तदहर्जातदारकः। आस्वादितकराङ्गुष्ठः प्रोत्फुल्लनयनोत्पलः ॥१२१॥

किया। तत्पश्चात् उस विप्रभोजमें जितना भोजन बना था वह सब प्रद्युम्नने खा लिया। जब कुछ भी न बचा तो सत्यभामाको कृपण बता खाये हुए भोजनको वमन-द्वारा वहीं उगल वह वहाँसे बाहर चला गया ॥११०॥ अब वह क्षुल्लकका वेष रख माता रुक्मिणीके महलमें गया वहाँ उसने माता रुक्मिणीके द्वारा दिये हुए लड्डू खाये। उसी समय सत्यभामाका आज्ञाकारी नाई रुक्मिणीके शिरके बाल लेनेके लिए उसके घर आया सो प्रद्युम्नने सब समाचार जान उसका खूब तिरस्कार किया ॥१११॥ सत्यभामाकी शिकायत सुन बलदेव रुक्मिणीके महलपर आनेको उद्यत हुए तो प्रद्युम्न एक ब्राह्मणका रूप रख द्वारपर पैर फैलाकर पड़ रहा। बलदेवने उसे दूर हटनेके लिए कहा पर वह टससे मस नहीं हुआ और कहने लगा कि आज सत्यभामाके घर बहुत भोजन कर आया हूँ हमसे उठते नहीं बनता। कुपित हो बलदेवने उसकी टाँग पकड़कर खींचना चाहा पर उसने विद्याबलसे टाँगको इतना मजबूत कर लिया कि वे खींचते-खींचते तंग आ गये। इस प्रकार नाना विद्याओंमें कुशल प्रद्युम्न अपनी इच्छानुसार लोगोंको आश्चर्य उत्पन्न करता हुआ चिर काल तक क्रीड़ा करता रहा ॥११२॥

उसी समय, प्रद्युम्नके आनेके जो चिह्न पहले नारदने कहे थे वे माता रुक्मिणीको प्रत्यक्ष दिखने लगे और उसके स्तनरूपी कलशोंसे अत्यधिक दूध झरने लगा ॥११३॥ अत्यन्त आश्चर्यमें पड़कर वह विचार करने लगी कि कहीं सोलह वर्ष व्यतीत होनेके बाद यह मेरा पुत्र ही तो रूप बदल कर नहीं आ गया है? ॥११४॥ उसी क्षण प्रद्युम्नने भी अपने असली रूपमें प्रकट हो पुत्रका स्नेह प्रकट कर माताको प्रणाम किया ॥११५॥ पुत्रको देखते ही रुक्मिणी आनन्दसे भर गयी, उसके नेत्र हर्षके आँसुओंसे व्याप्त हो गये और वह नम्रीभूत पुत्रका आलिङ्गन कर चिरसंचित दुःखको आँसुओंके द्वारा तत्काल छोड़ने लगी ॥११६॥ पुत्रके दर्शन रूपी अमृतसे सींची हुई रुक्मिणीके शरीरमें प्रत्येक रोम-कूपसे रोमाञ्च निकल आये थे उनसे ऐसा जान पड़ता था मानो पुत्रका स्नेह ही फूट-फूट कर प्रकट हो रहा हो ॥११७॥ तदनन्तर जब माता और पुत्र परस्पर कुशल समाचार पूछ चुके तब माताने चित्तके लिए अत्यधिक संतोष प्रदान करनेवाले पुत्रसे कहा कि हे पुत्र! वह कनकमाला धन्य है जिसने तेरी बाल्य अवस्थाकी बाल-क्रीड़ाओंके देखने रूप पुत्र जन्मके फलका उपभोग किया ॥ ११८-११९ ॥ माताके इतना कहते ही नेत्रोंको आनन्द प्रदान करनेवाले प्रद्युम्नने नमस्कार कर कहा कि हे मातः! मैं यहाँ ही अपनी बाल-चेष्टाएँ दिखलाता हूँ, देख, ॥१२०॥

तदनन्तर वह उसी क्षण एक दिनका बालक बन गया और नेत्र रूपी नील कमलको

---

१. नामादेश—म०। २. परे म०, ग०। ३. सुतो नु + अयम् इतिच्छेदः। ४. सानन्दसाकुलाक्षी म०।

ततः स्तनन्धयो जातो गृहीतस्तनचूचुकः । तथोत्तानशयो मातुः करपल्लवसौख्यदः ॥१२२॥
संसर्पन्नुरसा जातस्तथोत्तिष्ठन्पतन्पुनः । मातुः कराङ्गुलौ लग्नो मणिकुट्टिमसर्पणः ॥१२३॥
पांशुक्रीडां विधायाम्बाकण्ठलग्नो व्यधात्सुखम् । कलालापस्मिताह्लादिवदनो वदनेक्षणः ॥१२४॥
मनोहरशिशुक्रीडापूरिताम्बामनोरथः । स्वभावस्थितदेहस्थो नत्वा विज्ञाप्य तां सुतः ॥१२५॥
क्षिप्रमुत्क्षिप्य बाहुभ्यां वियति प्रकटस्थितः । जगाद श्रूयतां सर्वैरिह यादवपार्थिवैः ॥१२६॥
युष्माकं पश्यतामेव लक्ष्मीरिव हरेः प्रिया । ह्रियते रुक्मिणी देवी यादवाः परिरक्ष्यताम् ॥१२७॥
इत्युक्त्वा शङ्खमापूर्य नारदोदधिकन्ययोः । विमाने स्थापयित्वा तां युद्धार्थं वियति स्थितः ॥१२८॥
विनिर्ययुस्ततः पुर्या योद्धुं सन्नह्य यादवाः । चतुरङ्गबलोपेताः पञ्चायुधविचक्षणाः ॥१२९॥
विद्याबलेन निःशेषं कामो यादवसाधनम् । मोहयित्वाम्बरस्थेन युयुधे हरिणा चिरम् ॥१३०॥
अस्त्रकौशलवैफल्ये कृते कृष्णस्य सूनुना । प्रौढदृष्टी महादोर्भ्यां योद्धुं वीरौ समुच्छ्रितौ ॥१३१॥
विमुक्तनारदेनोमौ वियत्यागत्य वेगिना । वारितौ तौ पितापुत्रसंबन्धविनिवेदिना ॥१३२॥
ततः प्रणतमाश्लिष्य प्रद्युम्नं[1] प्रमदी हरिः । आनन्दाश्रुपरीताक्षः समयोजयदाशिषा ॥१३३॥
मायया शायितं सैन्यं समुत्थाप्य सविद्यया । तुष्टो बान्धवलोकेन मदनः प्राविशत्पुरीम् ॥१३४॥
रुक्मिणीजाम्बवत्यौ ते जातपुत्रसमागमे । तदाचीकरतां तोषादुत्सवं वत्सवत्सले ॥१३५॥

फुला-फुलाकर हाथका अंगूठा चूसने लगा ॥ १२१ ॥ कुछ देर बाद वह माताके स्तनका चूचक मुँहमें दाबकर दूध पीने लगा तथा चित्त लेटकर माताके कर-पल्लवोंको सुख उपजाने लगा ॥ १२२ ॥ फिर छातीके बल सरकने लगा। पुनः उठनेका प्रयत्न करता परन्तु फिर नीचे गिर पड़ता। तदनन्तर माताकी हाथकी अँगुली पकड़ मणिमय फर्शपर चलने लगा ॥१२३॥ तदनन्तर धूलिमें खेलता-खेलता आकर माताके कण्ठसे लिपटकर उसे सुख उपजाने लगा और कभी माताके मुखकी ओर नेत्र लगा मुसकराता हुआ तोतली बोली बोलने लगा ॥ १२४ ॥ इस प्रकार मनोहर बाल-क्रीड़ाओंसे माताका मनोरथ पूर्ण कर वह अपने असली रूपमें आ गया और नमस्कार कर बोला कि मैं तुझे आकाशमें लिये चलता हूँ ॥ १२५ ॥

तदनन्तर वह दोनों भुजाओंसे शीघ्र ही रुक्मिणीको ऊपर उठा आकाशमें खड़ा हो कहने लगा कि 'समस्त यादव राजा सुनें। मैं तुम लोगोंके देखते-देखते लक्ष्मीकी भाँति सुन्दर श्री कृष्णकी प्रिया रुक्मिणीको हर कर ले जा रहा हूँ। हे यादवो! शक्ति हो तो उसकी रक्षा करो' ॥ १२६-१२७ ॥ इस प्रकार कहकर तथा शङ्ख फूँककर उसने रुक्मिणीको तो विमानमें नारद और उदधिकुमारीके पास बैठा दिया और स्वयं युद्धके लिए आकाशमें आ खड़ा हुआ ॥१२८॥ तदनन्तर चतुरङ्ग सेनाओंसे सहित और पाँचों प्रकारके शस्त्र चलानेमें निपुण यादव राजा, युद्धके लिए तैयार हो नगरीसे बाहर निकले ॥ १२९ ॥ प्रद्युम्न विद्याबलसे यादवोंकी सब सेनाको मोहित कर आकाशमें स्थित कृष्णके साथ चिरकाल तक युद्ध करता रहा ॥ १३० ॥ अन्तमें प्रद्युम्नने जब कृष्णके अस्त्र-कौशलको निष्फल कर दिया तब प्रौढ़ दृष्टिको धारण करनेवाले दोनों वीर अपनी बड़ी-बड़ी भुजाओंसे युद्ध करनेके लिए उद्यत हुए ॥ १३१ ॥ उसी समय रुक्मिणीके द्वारा प्रेरित नारदने आकाशमें शीघ्र ही आकर पिता-पुत्रका सम्बन्ध बतला दोनों वीरोंको युद्ध करनेसे रोका ॥ १३२ ॥

तदनन्तर नम्रीभूत पुत्रका आलिङ्गन कर श्रीकृष्ण परम हर्षको प्राप्त हुए और हर्षके आँसुओंसे नेत्रोंको व्याप्त करते हुए उसे आशीर्वाद देने लगे ॥१३३॥ तत्पश्चात् मायासे सुलायी हुई सेनाको विद्यासे उठाकर प्रद्युम्नने सन्तुष्ट हो बन्धुजनोंके साथ-साथ नगरीमें प्रवेश किया ॥ १३४ ॥ जिन्हें पुत्रकी प्राप्ति हुई थी ऐसी पुत्रवत्सला रानी रुक्मिणी और जाम्बवतीने उस

१. प्रमदं म० ।

मान्यो मान्याभिरन्यस्त्रीह्रीकरीभिरसौ[1] ततः । मनोभूर्वरकन्याभिः कल्याणमभजत्परम् ॥१३६॥

पृथिवीच्छन्दः

कनत्कनकमालया कनकमालया सेशया[2]
विवाहसमयाप्तया समभिदृष्टकल्याणकः ।
विवाह्य विधिना वधूरुदधिपूर्विका मन्मथो
जिनेन्द्रवरशासनोर्जितसुखोदयः सोऽन्वभूत् ॥१३७॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ कुरुवंशप्रद्युम्नमातृपितृसमागमवर्णनो नाम सप्तचत्वारिंशः सर्गः ॥४७॥

समय हर्षसे बहुत उत्सव कराया ॥ १३५ ॥ तदनन्तर मान्य प्रद्युम्नकुमार अन्य स्त्रियोंको लज्जा उत्पन्न करनेवाली उत्तमोत्तम मान्य कन्याओंके साथ उत्तम विवाह-मङ्गलको प्राप्त हुआ ॥ १३६ ॥ गौतम स्वामी कहते हैं कि स्वर्णकी देदीप्यमान मालासे युक्त रानी कनकमालाने अपने पति कालसंवर विद्याधरके साथ विवाहके समय आकर जिसके विवाह रूप कल्याणको देखा था एवं जिनेन्द्र भगवान्‌के उत्कृष्ट शासनके प्रभावसे जिसे बहुत भारी सुखकी प्राप्ति हुई थी ऐसा प्रद्युम्नकुमार उदधिकुमारी आदि कन्याओंको विधिपूर्वक विवाह कर उनका उपभोग करने लगा ॥ १३७ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें कुरुवंश तथा प्रद्युम्नका माता-पिताके साथ समागमका वर्णन करनेवाला सैंतालीसवाँ सर्ग समाप्त हुआ ॥४७॥

---

१. श्रीकरीभि—म० ग० । २. ईशेन पत्या सह वर्तमाना सेशा तया । सेवया म० ।

अष्टचत्वारिंशः सर्गः

अथ शम्बस्य संभूतिं सुभानोश्च यथाक्रमम् । कथयामि यथावृत्तं शृणु श्रेणिक हारिणीम् ॥१॥
देवः कैटभपूर्वोऽसौ पूर्वमुक्तोऽच्युतोद्भवः । हरये हारिणं हारं ददौ भामासुतार्थिने ॥२॥
प्रदोषसमये हारं तं प्रद्युम्नप्रयोगतः । सत्यारूपधरां भुक्त्वा लेभे जाम्बवती हरेः ॥३॥
कैटभश्च तदा च्युत्वा पुण्यादभ्रच्युतोदयः । श्रितो जाम्बवतीगर्भं सागता च निजं गृहम् ॥४॥
हरिं सत्यापि संप्राप्ता संप्राप्तमदनोदया । रमिता च दधे गर्भे सा स्वर्गच्युतमर्भकम् ॥५॥
वर्धते स्म ततो हर्षो गर्भयोर्वर्धमानयोः । पितृमातृस्वबन्धूनां[1] सिन्धूनामिव चन्द्रयोः ॥६॥
पूर्णेषु नवमासेषु शम्बं जाम्बवती सुतम् । सुषुवे सत्यभामापि सुभानुं भानुभास्वरम् ॥७॥
हृष्टा प्रद्युम्नशम्बाभ्यां रुक्मिणी जाम्बवत्यपि । भामा भानुसुभानुभ्यां श्रिताभ्यामुदयश्रियम् ॥८॥
हरेरन्यास्वपि स्त्रीषु जाताः पुत्रा यथायथम् । यदूनां हृदयानन्दाः सत्यसत्त्वयशोऽधिकाः ॥९॥
शम्बः क्रीडासु सर्वासु कुमारशतसेवितः । जित्वा सुभानुमाक्रम्य विक्रमी रमतेतराम् ॥१०॥
रुक्मिणी रौक्मिणेयाय वैदर्भीं रुक्मिणः सुताम् । ययाचे न ददौ कन्यां सोऽपि पूर्वविरोधतः ॥११॥
गत्वा मातङ्गवेषेण शम्बप्रद्युम्नसंवरौ । बलादाहरतां कन्यां रुक्मिणं परिभूय तौ ॥१२॥

अथानन्तर गौतम गणधरने कहा कि हे श्रेणिक ! अब मैं आगमानुसार क्रमसे शम्ब तथा सुभानु कुमारकी मनोहर उत्पत्तिका वर्णन करता हूँ तुम सुनो ॥१॥

राजा मधुका भाई कैटभ जिसका पहले वर्णन आ चुका है, अच्युत स्वर्गमें देव हुआ था। जब उसकी वहाँकी आयु समाप्त होनेको आयी तब वह सत्यभामाके लिए पुत्रकी इच्छा रखनेवाले श्रीकृष्णके लिए एक सुन्दर हार दे गया ॥२॥ सायंकालके समय प्रद्युम्नके प्रयोगसे सत्यभामाका रूप धारण कर रानी जाम्बवतीने कृष्णके साथ उपभोग कर वह हार प्राप्त कर लिया ॥३॥ पुण्यके उदयसे उसी समय अखण्ड अभ्युदयको धारण करनेवाला कैटभका जीव स्वर्गसे च्युत हो जाम्बवतीके गर्भमें आ गया। गर्भ धारण कर रानी जाम्बवती अपने घर आ गयी ॥४॥ तदनन्तर सत्यभामा भी श्रीकृष्णके पास पहुँची और कामके उदयको प्राप्त हो श्रीकृष्णके साथ रमण कर उसने भी स्वर्गसे च्युत किसी शिशुको गर्भमें धारण किया ॥५॥ तदनन्तर दोनों रानियोंका गर्भ बढ़ने लगा और जिस प्रकार चन्द्रमाओंके बढ़नेपर समुद्रोंका हर्ष बढ़ने लगता है उसी प्रकार उन दोनों रानियोंके गर्भके बढ़नेपर माता-पिता तथा कुटुम्बी जनोंका हर्ष बढ़ने लगा ॥६॥

तदनन्तर नौ माह पूर्ण होनेपर रानी जाम्बवतीने शम्ब नामक पुत्रको और रानी सत्यभामाने सूर्यके समान देदीप्यमान सुभानु नामक पुत्रको उत्पन्न किया ॥७॥ इधर अभ्युदयको प्राप्त प्रद्युम्न और शम्बसे रुक्मिणी तथा जाम्बवती हर्षको प्राप्त हुईं उधर भानु और सुभानुसे सत्यभामा भी अत्यधिक हर्षित हुई ॥८॥ कृष्णकी अन्य स्त्रियोंमें भी यथायोग्य अनेक पुत्र उत्पन्न हुए जो यादवोंके हृदयको आनन्द देनेवाले तथा सत्य, पराक्रम और यशसे अत्यधिक सुशोभित थे ॥९॥ सैकड़ों कुमारोंसे सेवित पराक्रमी शम्ब, समस्त क्रीड़ाओंमें सुभानु कुमारको दबा देता था और उसे जीतकर सातिशय क्रीड़ा करता था ॥१०॥

रुक्मिणीके भाई रुक्मीकी एक वैदर्भी नामकी कन्या थी। रुक्मिणीने उसे प्रद्युम्नके लिए माँगा परन्तु रुक्मीने पूर्व विरोधके कारण उसके लिए वह कन्या न दी ॥११॥ यह सुन शम्ब और प्रद्युम्न दोनों भीलके वेषमें गये और रुक्मीको पराजित कर बलपूर्वक उस कन्याको हर

१. स्वबन्धूनां म० ।

परिणीय ततः कामः कन्यामन्यामिव श्रियम् । अरीरमदरं भोगैर्द्वारिकायां मनोरमैः ॥१३॥
दक्षो जित्वा सुभानुं तं द्यूते प्रेक्षणकेक्षणे । शम्बो ददाति सर्वस्य लोकस्य सकलं धनम् ॥१४॥
क्रीडया स पुनर्जिग्ये पक्षिणोर्बहुजल्पिनोः । गन्धयुक्तिप्रयोगेण पुनः सदसि शार्ङ्गिणः ॥१५॥
अग्निशोध्येन दिव्येन सवस्त्रयुगलेन तम् । दिव्यालङ्कारयोगेन जिगाय सदसि प्रभोः ॥१६॥
बलदर्शनतो जित्वा तमसौ हृष्टविष्णुतः । मासं लब्ध्वा पुना राज्यं चक्रे दुर्ललिताः क्रियाः ॥१७॥
ताडितः पुनरुद्वृत्तः पित्रा प्रणयकोपिना । [1]युग्येन कन्यकारूपः सत्योत्सङ्गमतोऽविशत् ॥१८॥
सत्या सुतार्थमानीतां विवाह्य [2]वरकन्यकाम् । आविश्चकार रूपं स्वं शम्बो लोकस्य पश्यतः ॥१९॥
एकस्यामेव रात्रौ तु कन्यकानां शतेन सः । कल्याणस्नानकं[3] स्नात्वा मातृसौख्यकरोऽभवत् ॥२०॥
सत्यभामादिदेवीनां कुमाराः शतशस्तदा । विवाह्य बहुशः कन्याश्चिक्रीडुः शक्रकीर्तयः ॥२१॥
क्रीडापूर्वं गतो गेहमन्यदा मान्यमात्मनः । पितामहमिति प्राह शम्बः प्रणतिपूर्वकम् ॥२२॥
युष्माभिः सर्वकालेन क्लेशेन खचराङ्गनाः । पर्यटद्भिः क्षितौ लब्धाः पूज्य पूज्या मनोरमाः ॥२३॥
अक्लेशेनैकरात्रेण मया तु गृहवर्तिना । परिणीताः शतं कन्याः पश्यतान्तरमावयोः ॥२४॥
वसुदेवस्ततः प्राह वत्स त्वमिषुवत्पुनः । [4]क्षिप्तोऽपि गृहमध्येऽपि दूरमन्तरमावयोः ॥२५॥

लाये ॥१२॥ तदनन्तर दूसरी लक्ष्मीके समान सुन्दर उस कन्याको विवाह कर प्रद्युम्न द्वारिका नगरीमें उसे मनोहर भोगोंसे शीघ्र ही क्रीड़ा कराने लगा ॥१३॥ शम्ब जुआ खेलनेमें बहुत चतुर था। एक दिन उसने सबके देखते-देखते जुआमें सुभानुका सब धन जीत लिया और सब लोगोंको बाँट दिया ॥१४॥ नाना प्रकारकी बोली बोलनेवाले पक्षियोंकी क्रीड़ासे शम्बने सुभानु कुमारको जीत लिया। एक बार श्रीकृष्णकी सभामें दोनों कुमारोंके बीच सुगन्धिकी परखमें शास्त्रार्थ हो पड़ा जिसमें शम्बने सुभानुको पुनः हरा दिया ॥१५॥ एक बार उसने अग्निमें शुद्ध किये हुए दो दिव्य वस्त्रों तथा दिव्य अलंकारोंको प्राप्तकर राजा कृष्णकी सभामें सुभानुको जीत लिया ॥१६॥ एक बार अपना बल दिखाकर उसने सुभानु कुमारको ऐसा जीता कि कृष्ण महाराज उसपर एकदम प्रसन्न हो गये। कृष्णने उससे वर माँगनेका आग्रह किया जिससे एक माहका राज्य प्राप्तकर उसने बहुत विपरीत क्रियाएँ कीं ॥१७॥ प्रणय कोपको धारण करनेवाले कृष्णने उस दुराचारी शम्बको बहुत ताड़ना दी। एक दिन शम्बकुमार कन्याका रूप धारण कर रथमें सवार हो सत्यभामाकी गोदमें जा प्रविष्ट हुआ ॥१८॥ सत्यभामाने समझा कि यह कन्या मेरे पुत्र सुभानुके लिए ही लायी गयी है इसलिए उसने सुभानुके साथ विवाह करा दिया परन्तु विवाहके बाद ही शम्बकुमारने लोगोंके देखते-देखते अपना असली रूप प्रकट कर दिया ॥१९॥ उसने एक ही रात्रिमें सौ कन्याओंके साथ विवाह सम्बन्धी माङ्गलिक स्नान कर अपनी माता जाम्बवतीको बहुत सुखी किया ॥२०॥ इन्द्रके समान कीर्तिको धारण करनेवाले सत्यभामा आदि रानियोंके सैकड़ों कुमार भी उस समय अनेक कन्याओंको विवाह कर इच्छानुसार क्रीड़ा करने लगे ॥२१॥ एक दिन शम्ब अपने मान्य पितामह वसुदेवके घर गया और प्रणाम कर क्रीड़ापूर्वक इस प्रकार कहने लगा—हे पूज्य! आपने पृथिवीपर बहुत समय तक क्लेश उठाते हुए भ्रमण किया तब कहीं आप विद्याधरोंकी पूज्य एवं मनोहर कन्याएँ प्राप्त कर सके परन्तु मैंने घर बैठे विना किसी क्लेशके एक ही रात्रिमें सौ कन्याओंके साथ विवाह कर लिया। आप हम दोनोंके अन्तरको देखिए ॥२२–२४॥ यह सुन वसुदेवने कहा कि वत्स! तू बाणके समान दूसरेसे (प्रद्युम्नसे) प्रेरित हो चलता है और फिर तेरी चाल भी कहाँ है? सिर्फ घरमें ही। इसलिए हम दोनोंमें बहुत अन्तर

---

१. रथेन (ग० टि०)। २. वरकन्यकाः म०। ३. कल्याणस्नातकं म०। ४. बाणवत्परप्रेरितः प्रद्युम्नप्रेरितश्चलसि (ग० टि०)।

मया खेटपुराम्भोधिमकरेण समं निजम् । द्वारिकाकूपमण्डूकः पण्डितम्मन्य मन्यसे ॥२६॥
अनुभूतं श्रुतं दृष्टं यन्मयातिमनोहरम् । विद्याधरपुरेष्वेतदन्येषामतिदुर्लभम् ॥२७॥
इत्युक्ते प्रणतेनोक्तः शम्बेनानकदुन्दुभिः । शुश्रूषाम्यार्य वृत्तं ते भण्यतामिति सादरम् ॥२८॥
स प्राहानन्दभेर्या त्वं वत्स बोधय यादवान् । कथयामि [1]समस्तानां सहैव चरितं निजम् ॥२९॥
तथा कृते समस्तेभ्यो यादवेभ्यः सविस्तरम् । कलत्रादिसमेतेभ्यो वृत्तं तेनाकथि स्वकम् ॥३०॥
लोकालोकविभागोक्ति हरिवंशानुकीर्तनम् । स्वक्रीडां सौर्यलोकोक्तिनिर्गमं च ततो निजम् ॥३१॥
इत्यादि चरितं दिव्यं दिव्यमानुषसंभवम् । प्रद्युम्नशम्बसंभूतिभूतिपर्यवसानकम् ॥३२॥
वसुदेवस्य सर्वोऽपि सर्वविद्याधरीमयः । अन्तःपुरजनो हृष्टः श्रुतस्मरणसंगतः ॥३३॥
श्रुत्वा सभाजनाश्चापि वृद्धस्त्रीयुवबालकाः । [2]यदवोऽन्तःपुराण्येषां कुरवो द्वारिकाजनाः ॥३४॥
विस्मयं परमं प्राप्ताः शशंसुः संशयोज्झिताः । वसुदेवं शिवाद्याश्च देव्यः पीतकथारसाः ॥३५॥
यथायथं नृपा जग्मुरावासान्वासिताम्बराः । अन्तःपुराणि सर्वेषां रक्षितानि सुरक्षकैः ॥३६॥
कथा पुनर्नवीभूता प्रतिवेश्म दिने दिने । जाता जनस्य साश्चर्या वसुदेवमयी कथा ॥३७॥
नत्वा पृष्टवते [3]भूयः श्रेणिकाय गणी जगौ । कुमारान् कतिचित्पुर्यामिति वीरवचःक्रमात् ॥३८॥

है ॥२५॥ मैं विद्याधरोंके नगररूपी समुद्रोंका मगर हूँ और तू द्वारिकारूपी कूपका मेढक है फिर भी हे पण्डितंमन्य ! तू अपने आपको मेरे समान मानता है ॥२६॥ मैंने विद्याधरोंके नगरोंमें जो कुछ अनुभव किया, देखा तथा सुना है वह अत्यन्त मनोहारी है और दूसरोंके लिए अतिशय दुर्लभ है ॥२७॥ वसुदेवके इस प्रकार कहनेपर शम्बने नमस्कार कर आदरपूर्वक उनसे कहा कि हे आर्य ! मैं आपका वृत्तान्त सुनना चाहता हूँ कृपा कर कहिए ॥२८॥ इसके उत्तरमें वसुदेवने कहा कि हे वत्स ! तू आनन्दभेरी बजवाकर समस्त यादवोंको इसकी सूचना दे। सबके लिए मैं साथ ही अपना चरित्र कहूँगा ॥२९॥ तदनन्तर आनन्दभेरीके बजवानेपर जब स्त्री-पुत्रादि सहित समस्त यादव एकत्रित हो गये तब वसुदेवने उनके लिए विस्तारपूर्वक अपना सब वृत्तान्त कहा ॥३०॥ उन्होंने लोकालोकके विभागका वर्णन किया, हरिवंशकी परम्पराका निरूपण किया, अपनी क्रीड़ाओंका कथन किया, सौर्यपुरके लोगोंने राजा समुद्रविजयसे मेरी क्रीड़ाओंसे होनेवाली लोगोंकी विपरीत चेष्टाएँ कहीं, तदनन्तर मैं छलसे सौर्यपुरसे निकलकर बाहर चला गया''''यह निरूपण किया। इस प्रकार प्रद्युम्न और शम्बकी उत्पत्ति तथा उनकी विभूतिपर्यन्त अपना मनुष्य तथा विद्याधरोंसे सम्बन्ध रखनेवाला दिव्य चरित कह सुनाया ॥३१-३२॥ वसुदेवके अन्तःपुरमें जो विद्याधर स्त्रियाँ थीं वे सब उनका यह चरित सुन पूर्व वृत्तान्तको स्मरण करती हुई अत्यन्त हर्षित हुईं ॥३३॥ सभासद लोग, वृद्ध पुरुष, स्त्री, युवा, बालक, समस्त यदुवंशी, इनके अन्तःपुर, पाण्डव तथा द्वारिकाके अन्य लोग, वसुदेवके उक्त चरितको सुनकर परम आश्चर्यको प्राप्त हुए और शिवा आदि देवियाँ वसुदेवके इस कथारूपी रसका पान कर संशयरहित हो उनकी प्रशंसा करने लगीं ॥३४-३५॥ सुगन्धित वस्त्रोंको धारण करनेवाले सब राजा यथायोग्य अपने-अपने स्थानोंपर चले गये और सबके अन्तःपुर भी पहरेदारोंसे सुरक्षित हो अपने-अपने स्थानोंपर पहुँच गये ॥३६॥ अनेक आश्चर्योंसे युक्त वसुदेवकी कथा फिरसे ताजी हो गयी और पुनः प्रतिदिन घर-घर होने लगी ॥३७॥

तदनन्तर नमस्कार कर पूछनेवाले राजा श्रेणिकके लिए गौतम गणधर, भगवान् महावीर स्वामीकी दिव्यध्वनिके अनुसार कुछ कुमारोंका इस प्रकार वर्णन करने लगे ॥३८॥

१. समात्तानां म० । २. यादवोऽन्तः—म० । ३. भूपः म० ।

उग्रसेनस्य तनया धरो गुणधरोऽपि च। युक्तिको दुर्धरश्चापि सागरश्चन्द्रसंज्ञकः ॥३९॥
उग्रसेनपितृव्यस्य शान्तनस्य सुतास्त्वमी। महासेनशिविस्वस्थविषदानन्तमित्रकाः[1] ॥४०॥
महासेनस्य तनयः सुषेण इति नामतः। हृदिको विषमित्रस्य शिवेः सत्यक इत्यसौ ॥४१॥
हृदिकात्कृतिधर्मासौ दृढधर्मा च देहजः। सत्यकाद्वज्रधर्मोऽभूदसंगस्तु तदङ्गजः ॥४२॥
समुद्रविजयोद्भूता महासत्यदृढाधिकाः। नेमयोऽरिष्टनेमीशः सुनेमिर्जयसेनकः ॥४३॥
महीजयः सुफल्गुश्च तेजःसेनो मयस्तथा। मेघाख्यः शिवनन्दश्च चित्रको गौतमादयः ॥४४॥
अक्षोभ्यस्योद्भवः सुनूर्वचःक्षुभितवारिधिः। अम्भोधिजलधी चान्यौ वामदेवदृढव्रतौ ॥४५॥
तनयाः पञ्च विख्याता जाताः स्तिमितसागरात्। ऊर्मिमान् वसुमान्वीरः पातालस्थिर इत्यमी ॥४६॥
विद्युत्प्रभो नरपतिर्माल्यवान् गन्धमादनः। इत्यमी सत्यसत्त्वाढ्यास्त्रयो हिमवतः सुताः ॥४७॥
विजयस्यापि षट् पुत्रा निष्कम्पोऽकम्पनो बलिः[2]। युगन्तः[3] केशरी धीमानलम्बुष इति श्रुताः ॥४८॥
महेन्द्रो मलयः सह्यो गिरिः शैलो नगोऽचलः। इत्येतेऽन्वर्थनामानः सप्ताचलशरीरजाः ॥४९॥
धरणस्यात्मजाः पञ्च वासुकिः स धनञ्जयः। कर्कोटकः शतमुखो विश्वरूपश्च नामतः ॥५०॥
दुष्पूरो दुर्मुखाभिख्यो दुर्दर्शो दुर्धरोऽपि च। सूनवः पूरणस्यामी चत्वारश्चतुरक्रियाः ॥५१॥
पुत्राः षडभिचन्द्रस्य चन्द्रनिर्मलकीर्तयः। चन्द्रः शशाङ्कचन्द्राभौ शशी सोमोऽमृतप्रभः ॥५२॥
तनया वसुदेवस्य बहुसंख्या महाबलाः। नामतः कतिचिद्वच्मि श्रृणु श्रेणिक तानहम् ॥५३॥
पुत्रौ विजयसेनाया अक्रूरक्रूरनामकौ। ज्वलनानिलवेगाख्यौ श्यामाख्यायाः शरीरजौ ॥५४॥
पुत्राः गन्धर्वसेनायास्त्रयो लोका इव त्रयः। वायुवेगोऽमिततगतिर्महेन्द्रगिरिरित्यसौ ॥५५॥

धर, गुणधर, युक्तिक, दुर्धर, सागर और चन्द्र ये राजा उग्रसेनके पुत्र थे ॥३९॥ महासेन, शिवि, स्वस्थ, विषद और अनन्तमित्र ये उग्रसेनके चाचा राजा शान्तनके पुत्र थे ॥ ४० ॥ इनमें महासेनके सुषेण, विषमित्रके हृदिक, शिविके सत्यक, हृदिकके कृतिधर्मा और दृढधर्मा, सत्यकके वज्रधर्मा और वज्रधर्माके असंग नामका पुत्र हुआ ॥४१-४२॥ राजा समुद्रविजयके महानेमि, सत्यनेमि, दृढनेमि, भगवान् अरिष्टनेमि, सुनेमि, जयसेन, महीजय, सुफल्गु, तेजःसेन, मय, मेघ, शिवनन्द, चित्रक और गौतम आदि अनेक पुत्र हुए ॥४३-४४॥ अक्षोभ्यके, अपने वचनोंसे समुद्रको क्षुभित करनेवाला उद्धव, अम्भोधि, जलधि, वामदेव और दृढव्रत ये पाँच पुत्र प्रसिद्ध थे। स्तिमितसागरसे ऊर्मिमान्, वसुमान् वीर और पातालस्थिर ये चार पुत्र उत्पन्न हुए थे ॥४५-४६॥ राजा विद्युत्प्रभ, माल्यवान्, और गन्धमादन ये तीन हिमवत्के पुत्र थे तथा ये तीनों ही सत्यव्रत और पराक्रमसे युक्त थे ॥४७॥ निष्कम्प, अकम्पन, बलि, युगन्त, केशरिन् और बुद्धिमान् अलम्बुष ये छह पुत्र विजयके प्रसिद्ध थे ॥४८॥ महेन्द्र, मलय, सह्य, गिरि, शैल, नग और अचल, सार्थक नामोंको धारण करनेवाले ये सात पुत्र अचलके थे ॥४९॥ वासुकि, धनञ्जय, कर्कोटक, शतमुख और विश्वरूप ये पाँच पुत्र धरणके थे ॥५०॥ दुष्पूर, दुर्मुख, दुर्दर्श और दुर्धर, चतुर क्रियाओंको धारण करनेवाले ये चार पुत्र पूरणके थे ॥५१॥ चन्द्र, शशाङ्क, चन्द्राभ, शशिन्, सोम और अमृतप्रभ चन्द्रमाके समान निर्मल कीर्तिको धारण करनेवाले ये छह पुत्र अभिचन्द्रके थे ॥५२॥ और वसुदेवके महाबलवान् अनेक पुत्र थे। हे श्रेणिक! मैं यहाँ उनमें-से कुछके नाम कहता हूँ सो सुन ॥५३॥

वसुदेवकी विजयसेना रानीसे अक्रूर और क्रूर नामके दो पुत्र हुए थे। श्यामा नामक रानीसे ज्वलन और अग्निवेग ये दो पुत्र उत्पन्न हुए थे ॥५४॥ गन्धर्वसेनासे वायुवेग, अमितगति और महेन्द्रगिरि ये तीन पुत्र हुए थे। ये तीनों पुत्र ऐसे जान पड़ते थे मानो तीनों लोक

१. विषादानन्त -म०। २. बलः म०। ३. युगान्तः म०।

अमात्यदुहितुर्जाताः पद्मावत्याः सुतास्त्रयः । दारुर्वृद्धार्थनामा च दारुक इत्युदीरिताः ॥५६॥
द्वौ नीलयशसः पुत्रौ धीरौ सिंहमतङ्गजौ । नारदो मरुदेवोऽपि सोमश्रीतनयौ वरौ ॥५७॥
[1]मित्रश्रियः सुमित्राख्यः कपिलः कपिलात्मजः । पद्मश्च पद्मकाख्यश्च पद्मावत्याः शरीरजौ ॥५८॥
अश्वसेनोऽश्वसेनाया पौण्ड्राया पौण्ड्र एव तु । रत्नगर्भः सुगर्भश्च रत्नवत्याः सुतौ मतौ ॥५९॥
सोमदत्तसुतायास्तु चन्द्रकान्तशशिप्रभौ । वेगवान्वायुवेगश्च वेगवत्यास्तनूभवौ ॥६०॥
दृष्टिमुष्टिरनावृष्टिर्हिमसुष्टिश्च ते त्रयः । पुत्रा मदनवेगाया मदनप्रतिमागताः ॥६१॥
बन्धुषेणस्तथा सिंहसेनो बन्धुमतीसुतौ । प्रियङ्गुसुन्दरीसूनुः शीलायुध इति श्रुतिः ॥६२॥
द्वौ सुतौ तु प्रभावत्या गन्धारः पिङ्गलस्तथा । जरत्कुमारवाह्लीकौ जरायास्तनयौ स्मृतौ ॥६३॥
अवन्त्याः सुमुखश्चैव दुर्मुखश्च महारथः । रोहिण्या बलदेवश्च सारणश्च विदूरथः ॥६४॥
तनूजौ बालचन्द्राया वज्रदंष्ट्रामितप्रभौ । देवकीतनुजो विष्णुरितीमे वसुदेवजाः ॥६५॥
उन्मुण्डो निषधश्चासौ प्रकृतिद्युतिरप्यतः । चारुदत्तो ध्रुवः पीठः स शक्रन्दमनोऽपि च ॥६६॥
श्रीध्वजो नन्दनश्चैव धीमान् दशरथस्तथा । देवनन्दश्च विख्यातो विद्रुमः शन्तनुः परः ॥६७॥
पृथुः शतधनुश्चैव नरदेवो महाधनुः । रोमशैत्यादयः पुत्रा बहवो बलिनस्तथा ॥६८॥
भानुः सुभानुभीमौ च महाभानुसुभानुकौ । बृहद्रथश्चाग्निशिखो विष्णुसञ्जय एव च ॥६९॥
अकम्पनो महासेनो धीरो गम्भीरनामकः । उदधिर्गौतमश्चापि वसुधर्मा प्रसेनजित् ॥७०॥
सूर्यश्च चन्द्रवर्मा च चारुकृष्णश्च विश्रुतः । सुचारुर्देवदत्तश्च भरतः शंखसंज्ञकः ॥७१॥
प्रद्युम्नशम्बनामाद्याः केशवस्य शरीरजाः । शस्त्रास्त्रशास्त्रनिष्णाताः सर्वे युद्धविशारदाः ॥७२॥
तेषां पुत्राश्च पौत्राश्च यादवानां यशस्विनाम् । पैतृस्वस्रीयाः स्वस्रीयाः कुमारास्ते सहस्रशः ॥७३॥

हो हों ॥५५॥ मन्त्रीकी पुत्री पद्मावतीसे दारु, वृद्धार्थ और दारुक ये तीन पुत्र हुए थे ॥५६॥ नीलयशाके सिंह और सतंगज ये दो धीर-वीर पुत्र थे। सोमश्रीके नारद और मरुदेव ये दो पुत्र थे ॥५७॥ मित्रश्रीसे सुमित्र, कपिलासे कपिल और पद्मावतीसे पद्म तथा पद्मक ये दो पुत्र हुए थे ॥५८॥ अश्वसेनासे अश्वसेन, पौण्ड्रासे पौण्ड्र और रत्नवतीसे रत्नगर्भ तथा सुगर्भ ये दो पुत्र हुए थे ॥५९॥ सोमदत्तकी पुत्रीसे चन्द्रकान्त और शशिप्रभ तथा वेगवतीसे वेगवान् और वायुवेग ये दो पुत्र हुए थे ॥६०॥ दृढमुष्टि, अनावृष्टि और हिमसुष्टि ये तीन पुत्र मदनवेगासे उत्पन्न हुए थे। ये तीनों ही पुत्र कामदेवकी उपमाको प्राप्त थे ॥६१॥ बन्धुषेण और सिंहसेन ये बन्धुमतीके पुत्र थे तथा शीलायुध प्रियङ्गुसुन्दरीका पुत्र था ॥६२॥ रानी प्रभावती से गन्धार और पिङ्गल ये दो तथा रानी जरासे जरत्कुमार और वाह्लीक ये दो पुत्र हुए थे ॥६३॥ अवन्तीसे सुमुख, दुर्मुख और महारथ, रोहिणीसे बलदेव, सारण तथा विदूरथ, बालचन्द्रासे वज्रदंष्ट्र और अमितप्रभ और देवकीसे कृष्ण पुत्र हुए थे। इस प्रकार वसुदेवके पुत्रोंका वर्णन किया ॥६४-६५॥

उन्मुण्ड, निषध, प्रकृतिद्युति, चारुदत्त, ध्रुव, पीठ, शक्रन्दमन, श्रीध्वज, नन्दन, धीमान्, दशरथ, देवनन्द, विद्रुम, शन्तनु, पृथु, शतधनु, नरदेव, महाधनु और रोमशैत्यको आदि लेकर बलदेवके अनेक पुत्र थे ॥६६-६८॥ भानु, सुभानु, भीम, महाभानु; सुभानुक, बृहद्रथ, अग्निशिख, विष्णुसञ्जय, अकम्पन, महासेन, धीर, गम्भीर, उदधि, गौतम, वसुधर्मा, प्रसेनजित्, सूर्य, चन्द्रवर्मा, चारुकृष्ण, सुचारु, देवदत्त, भरत, शङ्ख, प्रद्युम्न तथा शम्ब आदि कृष्णके पुत्र थे। ये सभी पुत्र शस्त्र, अस्त्र तथा शास्त्रमें निपुण और युद्धमें कुशल थे ॥६९-७२॥ उन यशस्वी यादवोंके पुत्र और पौत्र, बुआके लड़के तथा भानजे भी हजारोंकी संख्यामें

---

१. मित्राश्रयः म० ।

तिस्रः कोट्योऽर्धकोटी च कुमाराणां महौजसाम् । मनोभवस्वरूपाणां रमन्ते रमणप्रियाः ॥७४॥

शार्दूलविक्रीडितम्

नित्यं द्वारवती पुरी परिगता वीरैः कुमारैरिमै
निर्गच्छद्भिरितस्ततो रथगजारूढैर्विशद्भिस्तथा ।
नानावेषधरैः प्रचण्डचरितैः पौरप्रजाह्लादिभि-
र्बभ्राजे भवनामरैरिव पुरी पाताललोकस्थिता ॥७५॥

स्रग्धराच्छन्दः

प्रायः स्वर्गच्युतानां जिनपथचरितोदारपुण्योदयानां
कीर्त्यानां कीर्त्यमानं चरितमिदमिह श्रीकुमारोत्तमानाम् ।
संश्रृण्वन्त्येकमत्या मतिविभवयुताः श्रद्दधाना जना ये
कौमारं यौवनं च व्यपगमितरुजस्ते वयो निर्विशन्ति ॥७६॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ यदुकुलकुमारोद्देशवर्णनो नाम अष्टचत्वारिंशः सर्गः ॥४८॥

थे ॥७३॥ इस प्रकार सब मिलाकर महाप्रतापी तथा कामदेवके समान सुन्दर रूपको धारण करनेवाले साढ़े तीन करोड़ कुमार, क्रीड़ाके प्रेमी हो निरन्तर क्रीड़ा करते रहते थे ॥७४॥

निरन्तर रथ तथा हाथियोंपर सवार हो बाहर निकलते तथा भीतर प्रवेश करते हुए, नाना वेषोंके धारक, प्रबल पराक्रमी और नगरवासी प्रजाको आनन्द उत्पन्न करनेवाले इन वीर कुमारोंसे युक्त द्वारावती नगरी उस समय भवनवासी देवोंसे युक्त पातालपुरीके समान सुशोभित हो रही थी ॥७५॥ गौतम स्वामी कहते हैं कि प्रायः स्वर्गसे च्युत होकर आये हुए तथा जिनेन्द्र प्रणीत मार्गका अनुसरण करनेसे सातिशय पुण्यका संचय करनेवाले इन प्रशंसनीय उत्तम यदुकुमारोंके इस कहे जानेवाले चरितको जो बुद्धिमान् मनुष्य एकाग्रचित्त होकर सुनते हैं तथा श्रद्धान करते हैं वे समस्त रोगोंको दूर कर कौमार और यौवन अवस्थाका उपभोग करते हैं—उनकी वृद्धावस्था छूट जाती है ॥७६॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त जिनसेनाचार्य रचित हरिवंश पुराणमें यदुवंशके कुमारोंका नामोल्लेख करनेवाला अड़तालीसवाँ सर्ग समाप्त हुआ ॥४८॥

एकोनपञ्चाशः सर्गः

नर्कुटकच्छन्दः[1]

अथ मधुसूदनावरजया वरया जगतामवितथकन्यया[2] शशिविशुद्धयशोधरया ।
प्रथितसुदुर्भरप्रथमयौवनभूरिभरः प्रकटमभारि हारिगुणभूषणभूषितया ॥१॥
नखमणिमण्डले[3]न्दुललिताङ्गुलिपल्लवयोरकृत[4]करक्तताहसितभास्वदलक्तकयोः ।
मृदुपदपद्मयोः प्र[5]पदभागसमोन्नतयोर्जगति यदीययोरुपमयापगतं त्रपया ॥२॥
दृढगुणगूढगुल्फनिजजानुमनोहरयोः प्रतिपदमानुपूर्व्यपरिवृत्तविलोमशयोः ।
निरुपमजङ्घयोर्जघनभूरिभरक्षमयोः स[6]विरसमल्लयोर्न हि यदीयकयोरुपमा ॥३॥
मृदुपरिवृत्तपाण्डुरगुणं [7]विगलद्बहलस्थिरवरकान्तिदीप्तिरसपूरितमूरुयुगम् ।
करिकरयष्टिवृत्तकदलीमृदिमानमतिप्रथितमतीत्य सत्यगुणचारि यदीयमभात् ॥४॥
बहुरसपूर्णवर्णकुलशैलभवप्रमदाप्रमदविधायिपुण्यसरितः कलहंसगतेः ।
गुरुजघनस्थलीपुलिनभूमिरभूमिरसौ कुसुमरथस्य शुम्भितनितम्बतटा[8] विबभौ ॥५॥
तनुमृदुरोमराजिलतयातिविनीलरु[9]चा जननयनाभिरामनिजनाभिगभीरतया ।
तनुमध्यबन्धनवलित्रयविचित्रतया ललितवधूजनेष्वतिविराजितमत्रतया[10] ॥६॥

अथानन्तर कृष्णकी छोटी बहिन जगत्में उत्तम, चन्द्रमाके समान निर्मल यशको धारण करनेवाली एवं मनोहर गुणरूपी आभूषणोंसे भूषित यशोदाकी पुत्री (जो कृष्णके बदलेमें आयी थी)ने अतिशय प्रसिद्ध प्रथम यौवनके बहुत भारी भारको धारण किया ॥१॥ जिनके अङ्गुलिरूपी पल्लव श्रेष्ठ नखरूपी चन्द्रमण्डलसे सुशोभित थे, जिन्होंने अपनी स्वाभाविक ललाईसे देदीप्यमान महावरकी हँसी की थी, तथा जो अग्रभागमें समान रूपसे ऊँचे उठे हुए थे ऐसे उसके कोमल चरण-कमलोंकी उपमा उस समय लज्जासे ही मानो संसारमें कहीं चली गयी थी। उसके कोमल चरण-कमल अनुपम थे ॥२॥ जो अत्यन्त मजबूत एवं गूढ गाँठों और घुटनोंसे मनोहर थी, उत्तरोत्तर बढ़ती हुई गोलाईसे सुशोभित एवं रोमरहित थी, नितम्बोंका बहुत भारी भार धारण करनेमें समर्थ थी, और जो परस्परके प्रतिस्पर्धी मल्लके समान जान पड़ती थी ऐसी उसकी अनुपम जङ्घाओंकी उस समय कहीं उपमा नहीं रही ॥३॥ जो कोमल गोल और शुभ्र थे, जिनसे अत्यधिक स्थायी एवं श्रेष्ठ कान्ति चू रही थी, जो दीप्ति रूपी रससे परिपूर्ण थे, हाथीकी सूँड़ और गोल कदलीकी सुकुमारताको उल्लंघन कर विद्यमान थे, अतिशय प्रसिद्ध थे और यथार्थ गुणोंसे युक्त थे, ऐसे उसके दोनों ऊरु उस समय अत्यधिक सुशोभित होने लगे ॥४॥ कलहंसके समान सुन्दर चालसे सुशोभित उस कन्याकी स्थूल जघनस्थली, अनेक रसोंसे परिपूर्ण वर्णवाले कुलाचलोंसे उत्पन्न स्त्रियोंके लिए हर्ष उत्पन्न करनेवाले पुण्यरूपी, नदीकी उस पुलिन भूमि-तट भूमिके समान सुशोभित होने लगी जो कामकी अभूमि—अगोचर तथा नितम्बरूपी सुन्दर तटोंसे युक्त थी ॥ ५ ॥ वह कन्या, सूक्ष्म, कोमल और अत्यन्त काली रोमराजिसे, मनुष्योंके नेत्रोंको आनन्द देनेवाली अपनी नाभिकी गहराईसे और शरीरके मध्यमें स्थित त्रिवलियों—तीन रेखाओंकी विचित्रतासे

---

१. "हयदशभिर्नजौ भजजला गुरु नर्कुटकम्" इति लक्षणात् (वृत्तरत्नाकरस्य) । २. यशोदायाः कन्यया (ङ० टि०) । ३. वरनिर्मलपल्लवयोः क०, अतिनिर्मल ङ०, रतिनिर्मल—म० । ४. अकृतकरक्तता हसित (?) म० । ५. प्रमदभागसमन्वितयोः म०, पादस्याग्रं प्रपदः । ६. सविरसमत्ययोः क०, सविरसमल्पयोः म० । ७. स्थिरकर—क०, ख०, ङ०, म० । ८. नितम्बतटेव बभौ म० । ९. विनीतरुचा म० । १०. —मत्रपया म० ।

उरसि नितान्तनीलनिजचूचुकयोरसकौ कठिनसुवृत्तपीवरपयोधरयोर्भरतः ।
अमृतरसक्षय[1]यक्षरणभीहरिनीलमणिस्थिरतरमुद्रिकोत्कनककुम्भवहेव बभौ ॥७॥
भुजलतयोः शिरीषमृदुपीनवरांसकयोः वरकमलप्रभापटलपाटलपल्लवयोः ।
कुरुवकताम्रकम्रनखपुष्पकयोर्वपुषस्व[2]नुकृतमुद्गकोशकरशाखकयोर्विबभौ ॥८॥
अकठिनकम्बुकण्ठचिबुकापरबिम्बफलप्रह[3]सितपाण्डुगण्डकुटिलभ्रुललाटतटी—
द्विगुणितकोमलोत्पलसुनालसुकर्णभृता चिरमनयात्यभासि धवलासितदीर्घदृशा ॥९॥
प्रमितशिरस्यतिभ्रमरकान्तिकनत्कुटिलप्रकटकटीतटीपतितकेशकलापमसौ ।
शशिवदना प्रकाशमवहद्विहसद्दशना प्रशिथिलकामपाशमिव लोकवशीकरणम् ॥१०॥
करपदमुद्रिकाकटकनूपुरपूर्वकसत्प्रथितचतुर्दशाभरणभूषणभूततनुः ।
प्रविलसदङ्गरागमृदुवस्त्रमहास्रगियं स्थगयति कन्यकोचितसुखा वपुषा[4] युवतीः ॥११॥
पितृसुतपूर्वकस्य यदुसर्वकुलस्य जनैरुचितसपर्यया विहितगौरवभूमिरसौ ।
सकलकलाकलगुणकलापमहावसतिः सकलसरस्वती स्वयमिव स्वजनोपविधौ ॥१२॥
इति समये प्रयाति तु कदाचिदसौ प्रणतैरुपहसिता प्रयाद्भिरवशाद्बलराजसुतैः ।
चिपिटनासिकं रहसि दर्पणके स्वमुखं स्फुटमवलोक्य तद्भवविरागसगात्प्रपिता ॥१३॥

संसारकी समस्त सुन्दर स्त्रियोंके बीच अत्यधिक सुशोभित होने लगी ॥ ६ ॥ वक्षःस्थलपर अत्यन्त नील चूचुकसे युक्त कठोर गोल और स्थूल स्तनोंका भार धारण करनेसे वह कन्या ऐसी सुशोभित होने लगी मानो 'अमृत रसका घर खिरकर कहीं नष्ट न हो जाये' इस भयसे इन्द्रनील मणिकी मजबूत मुहरसे युक्त देदीप्यमान सुवर्णके दो कलश ही धारण कर रही हो ॥ ७ ॥ शिरीषके फूलके समान कोमल मोटी और उत्तम कन्धोंसे युक्त, उत्तम कमलकी कान्तिके समूहके समान लाल-लाल हथेली रूप पल्लवोंसे सहित, कुरुबकके फूलके समान लाल एवं सुन्दर नखरूपी पुष्पोंसे सुशोभित तथा मूँगकी कोशोंका अनुकरण करनेवाली अङ्गुलियोंसे युक्त भुजारूपी लताओंसे वह अत्यधिक सुशोभित होने लगी ॥८॥ कोमल शङ्खके समान कण्ठ, ठुड्डी, अधरोष्ठ रूपी बिम्बीफल, प्रकृष्ट हास्यसे युक्त श्वेत कपोल कुटिल भौंहें, ललाट तट एवं द्विगुणित कोमल नील कमलकी उत्तम डण्ठलके समान कानोंको धारण करने-वाली और सफेद काले तथा विशाल नेत्रोंसे सहित वह कन्या चिर काल तक अत्यधिक सुशोभित होने लगी ॥ ९ ॥ हास्ययुक्त दाँतोंसे सहित वह चन्द्रमुखी कन्या, सुन्दर शिरपर भ्रमरोंकी कान्तिको तिरस्कृत करनेवाले देदीप्यमान घुँघराले एवं विस्तृत कटी-तटपर पड़े प्रकाशमान उस केशसमूहको धारण कर रही थी, जो लटकते हुए काम-पाशके समान लोगोंको वश करनेवाला था ॥ १० ॥ हाथ और पैरोंमें स्थित अँगूठी, कड़े तथा नूपुर आदि समीचीन एवं प्रसिद्ध चौदह आभरणोंसे जिसका शरीर आभूषण स्वरूप हो रहा था, जो शोभायमान अङ्गराग, कोमल वस्त्र और महामालाओंको धारण कर रही थी तथा जिसे कन्याओंके उचित समस्त सुख उपलब्ध थे ऐसी वह कन्या अपने शरीरके द्वारा संसारकी अन्य युवतियोंको आच्छादित कर रही थी—तिरस्कृत कर रही थी ॥११॥ वह पिता, पुत्र आदि समस्त यदुवंश-के मनुष्योंके द्वारा योग्य सत्कारके द्वारा किये हुए गौरवकी भूमि थी, समस्त कलाओं और मनोहर गुणोंके समूहकी महावसतिका थी और कुटुम्बी जनोंके समीप स्वयं शरीरधारिणी सरस्वतीके समान जान पड़ती थी ॥ १२ ॥

इस प्रकार समय व्यतीत होनेपर कदाचित् बलदेवके पुत्रोंने आकर उसे नमस्कार

१. क्षयो निवासः (क० टि०) । २. वपुषस्तनुकृत-म०, वपुषास्वनकृत-ङ० । ३. प्रसहित म० । ४. युवती म० ।

पुरि विश्रुतार्जिकागणमहत्तरिकापदया व्रतधरपादमूलमितया सह सुव्रतया ।
[1]सुगुरुरपृच्छ्यत प्रणतया निजपूर्वकृतं स्फुरदवधीक्षणः क्षणमसाविति तां न्यगदीत् ॥१४॥
तव दुहितः सुराष्ट्रविषये विषयेन्द्रियजैर्विगतभवे[2] सुखैरतिविमूर्छितमूढधिया ।
[3]परुषतयाभिरूपपदमुद्वहताङ्गभृता[4] नभृतमनङ्कुशं निभृतमात्ममनोनयनम् ॥१५॥
अतिविषमं तपो घटयतो मृतशायिकया शकटसृषेरुपर्युपरि हितं तदा त्वकया ।
विमृदितनासिकापुटतटस्य मुनेः स्खलनं मनसि न जातमीषदपि धीरतया धृतया ॥१६॥
अजनितजीवघातगुणतो नरके पतनं तव हि मनाङ्न जातमृषिगात्रवधादिह तु ।
अजनि विनासिकस्य वदनस्य महाविकृतिः फलति फलं स्वकर्मजगतां हि यथाविहितम् ॥१७॥
सकृदपि जीवघातकृदघादसकृत्परतः परवशघातदुःखमभियास्यति जन्तुरिह ।
अवयवघातकृत् सकृदपि स्वकृतैरसकृदवयवघातमेष्यति सदेति जिनस्य वचः ॥१८॥
वचनमनस्तनुभिरमियः[5] परुषाः पुरुषाः पुरुषवधादिषु प्रभुतया प्रयतन्त इह ।
दुरितमहाप्रभुः परभवेषु जनेषु पुनः प्रभवति दुःखदान[6]चतुरश्चतुरेष्वपि हि ॥१९॥
अत इह जन्तुभिः परवधादिनिवृत्तिपरैः स्वपरहितैः सदापि भवितव्यमपि प्रभुभिः ।

किया और जाते समय अपने अल्हड़ स्वभावसे उसे 'चिपटी नाकवाली' कह कर चिढ़ा दिया। उसने एकान्तमें दर्पणमें प्रतिबिम्बित चिपटी नाकसे युक्त अपना मुख देखा जिससे वह लज्जित होती हुई उस पर्यायसे विरक्त हो गयी ॥ १३ ॥ उसने नगरमें विद्यमान आर्यिकाओंके समूहकी प्रधान सुव्रता नामक गणिनीके चरणोंकी शरण प्राप्त की और उन्हें साथ लेकर वह व्रतधर नामक मुनिराजके चरणमूलमें गयी। उन्हें नमस्कार कर उसने उक्त मुनिराजसे पूछा कि 'हे भगवन् ! मैंने पूर्वभवमें क्या पाप किया था जिससे मुझे यह कुरूप प्राप्त हुआ है।' इसके उत्तरमें अवधिज्ञानरूपी नेत्रको विकसित करनेवाले मुनिराज उससे इस प्रकार कहने लगे—॥ १४ ॥

हे पुत्री ! पूर्वभवमें तेरा जीव सुराष्ट्र देशमें उत्तम रूपको धारण करनेवाला पुरुष था। वहाँ विषय और इन्द्रियजन्य सुखोंसे अत्यन्त मूढ़ बुद्धि होनेके कारण वह क्रूरतावश विषयोंमें स्वच्छन्द हुए अपने मन और नेत्रोंको स्वाधीन नहीं रख सका ॥ १५ ॥ एक बार एक मुनि मृतशय्यासे अत्यन्त विषम तप तप रहे थे। तूने उनपर अपनी गाड़ी चला दी जिससे उनकी नाक पिचक गयी। मुनिराजने अपने मनमें बहुत भारी धीरता धारण कर रखी थी इसलिए इस घटनासे उनके मनमें कुछ भी क्षोभ उत्पन्न नहीं हुआ ॥१६॥ मुनिराजके जीवका घात नहीं हुआ था इसलिए तेरा नरक वास नहीं हुआ। किन्तु उनके शरीरका कुछ घात हुआ था इसलिए इस जन्ममें तेरा मुख नासिकासे रहित हो महाविकृत हुआ है। ठीक ही है संसारमें जो जैसा कर्म करता है उसे वैसा ही फल प्राप्त होता है ॥१७॥ जिनेन्द्र भगवान्का यह कहना है कि जो प्राणी इस संसारमें एक बार भी किसी जीवका घात करता है वह उसके पापसे पर-भवमें दूसरोंके द्वारा घात होनेके दुःखको प्राप्त होगा और जो किसीके अवयवका एक बार भी घात करता है वह अपने किये पापके अनुसार अनेक बार अवयवके घातको प्राप्त होगा ॥ १८ ॥ जो क्रूर मनुष्य, प्रभुताके कारण निर्भय हो मन, वचन, कायसे मनुष्य आदि प्राणियोंके वधमें प्रयत्न करते हैं परभवोंमें वे कितने ही चतुर क्यों न हों दुःख देनेमें चतुर पापरूपी महाप्रभु उनपर बार-बार अपना प्रभाव जमाता है—उन्हें बार-बार दुःख देता है ॥ १९ ॥ इसलिए स्वपर हितको चाहनेवाले प्राणियोंको भले ही वे राजा क्यों न

१. सुरगुरु म० । २. विगतभये म०, ङ० । ३. कठोरतया (क० टि०) । पुरुषतया म०, ख०, ङ० । ४. निवभृतं म०, ङ० । ५. रभि यः पुरुषाः परुषाः म० । ६. दुःखदानचरश्चतुरेष्वपि हि म० ।

न हि भवपद्धतौ भवभृतामिह संसरतां [1]स्वकृतभुजां सतां प्रतिभवति सदा प्रभुता ॥२०॥
इति वचनं गुरोरभिनिशम्य कृतावनतिः प्रगतवती तया सह महत्तरिकार्यिकया ।
व्रतमदधाद्विमोच्य हि सकाखिलबन्धुजनं सितवसनावृतस्तनभरोद्धृतकालकचा[2] ॥२१॥
व्यपहृतभूषणस्रगियमात्मकराङ्गुलिभिर्निकञ्चितकेशभारनिखिलोत्खननं तु तदा ।
प्रविदधती बभौ कुसुमकोमलबाहुलता स्फुटमिव [3]धीकुटीकुटिलशल्यकुलोद्धरणम् ॥२२॥
जघनमुरः कुचावुदरमाचरणं च वपुः सुमृदुदुकूलकैकवसनेन कृतावरणम् ।
[4]सुविदधती सती चिरमराजत सा च तदा वृतसिकतास्थलाच्छपयसा शरदीव नदी ॥२३॥
स्वजनकृताभिनिष्क्रमणपूजनिकां जनिकां पुरुतपसां[5] निशाम्य नवसंयतिकां हि तकाम् ।
अजनि महाजनस्य सकलस्य तदेतिमतिः सधृतिः सरस्वती किमु तपस्यति किं नु रतिः ॥२४॥
व्रतगुणसंयमोपवसनादितपोभिरसौ प्रतिदिनभावनाभिरपि भावितभावयुता ।
वसति तपस्यया वसतिरागमगीतगिरां पुरुगुणसंयुता[6] गणनिवासगता सततम् ॥२५॥
बहुषु तु वर्षवासरगणेषु गतेषु ततो जिनजननाभिनिष्क्रमणनिर्वृतिभूमिषु सा ।
कृतविहृतिः कदाचन गता पृथुसार्थवशान्निजसहधर्मिणीभिरुरुविन्ध्यमहागहनम् ॥२६॥

हों सदा परहिंसा आदि पापोंसे दूर रहना चाहिए। क्योंकि संसारमें भ्रमण करनेवाले प्राणी अपने द्वारा किये हुए कर्मोंका फल भोगते हैं उनकी प्रभुता—राज्य अवस्था सदा स्थित नहीं रहती ॥ २० ॥

इस प्रकार गुरुके वचन सुन वह, सुव्रत गणिनीके साथ चली आयी और समस्त बन्धु जनोंका त्यागकर उसने सफेद साड़ीसे स्तनोंको ढक तथा काले केशोंको उखाड़कर आर्यिका का व्रत धारण कर लिया ।।२१।। जिसने आभूषण और मालाएँ उतारकर फेंक दी थीं तथा जिसकी बाहुरूपी लताएँ फूलोंके समान कोमल थीं ऐसी वह कन्या उस समय अपने हाथकी कोमल अँगुलियोंसे अपने बँधे हुए समस्त बालोंको उखाड़ती हुई ऐसी जान पड़ती थी मानो बुद्धिरूपी कुटीके भीतर विद्यमान शल्योंके समूहको ही उखाड़ रही हो ।।२२।। जघन, वक्षःस्थल, स्तन, उदर और चरणोंपर्यन्त समस्त शरीरको एक अत्यन्त कोमल वस्त्रसे आच्छादित करती हुई वह सती उस समय चिरकाल तक शरद् ऋतुकी उस नदीके समान सुशोभित हो रही थी जिसने स्वच्छ जलसे अपने बालुमय स्थलको ढक रखा था ।।२३।। कुटुम्बी-जनोंने जिसकी दीक्षा-कालीन पूजा की थी और जो बड़े-बड़े तपोंको जन्म देनेवाली थी ऐसी उस नव-दीक्षिता आर्यिकाको देखकर उस समय समस्त महाजनोंके हृदयमें यही बुद्धि उत्पन्न होती थी कि क्या यह धैर्यसहित सरस्वती है अथवा रति तपस्या कर रही है ।।२४।। व्रत, गुण, संयम तथा उपवास आदि तपों एवं प्रतिदिन भायी जानेवाली अनित्य आदि भावनाओंसे जो विशुद्ध भावोंको प्राप्त हुई थी, जो आगमोक्त अनेक पाठोंकी वसतिका थी, उत्तमोत्तम गुणोंसे सहित थी, और सदा आर्यिकाओंके समूहके साथ निवास करती थी ऐसी वह आर्यिका तपस्या करती हुई रहती थी ।।२५।।

तदनन्तर बहुत वर्षों और दिनोंके समूह व्यतीत हो जानेपर वह जिनेन्द्र भगवान्‌के जन्म, दीक्षा और निर्वाणकल्याणककी भूमियोंमें विहार कर किसी समय बहुत बड़े सङ्घकी प्रेरणा से अपनी सहधर्मिणियोंके साथ विन्ध्याचलके विशाल वनमें जा निकली ।।२६।। और रात्रिके

१. सुकृत—क०, ङ०, म० । २. कुचा म० । ३. धीरेव कुटी तत्र कुटिलशल्यकुलस्योद्धरणं पुनः त्रोटनं कुर्वती इति क पुस्तके टिप्पणी ।–मिवोद्धरणं म०, बलोद्धरणं ङ० । ४. स्वविदधती म० । ५. पुरुतपसं क०, ख०, ङ०, म० । ६. संयता म०, ङ० ।

निशि निशितासिनिर्मलनिशातमनास्त्वसकौ प्रतिपथमास्थिता[1] प्रतिमया प्रतिमाप्रतिमा ।
वरशवरसेनया स्फुटमदर्शि निशानिभया[2] बहुधनसार्थपातविधये द्रुतमागतया ॥२७॥
इह वनदेवता स्थितवतीयमिति प्रणतैः शबरशतैरितिस्ववरदानमयाच्यत सा ।
भगवति वः प्रसादनिरुपद्रविणो द्रविणं यदभिलभेमहि प्रथमकिङ्करका वयकम् ॥२८॥
इति तु वनेचरैः कृतमनोरथकैः पृथुकैः प्रबलतया सुसार्थमभितः पुनरापतितैः ।
[3]विनिहतसार्थसार्थकतयान्तमितैः प्रतिमास्थितियुतसंयतास्थितिभुवीदमदर्शि तु तैः ॥२९॥
प्रशमसमाधिभागनशनस्थितिमामरणादुपगतपुण्डरीकाद्[4]दुरुपप्लवचण्डतया[5] ।
स्वयमुपपद्य सा दिवमगात्प्रतिमास्मृतिर्मधुमथनस्वसा स्खलति न स्थितितः सुजनः ॥३०॥
नखमुखदंष्ट्रिकाविकटकोटिविपाटितया यदपि कलेवरखण्डमुपार्जितधर्मतया ।
मृतिमितया विमुक्तमविमुक्तसमाधितया तदपि कराङ्गुलित्रिकशेषमशेषमभूत् ॥३१॥
रुधिरविलिप्त[6]गुप्तपथभूतलमाकुलिताः सकलमितस्ततस्तदभिवीक्ष्य तदा शबराः ।
धृतिरिह बध्यते वरददेवतया रुधिरे इति विनिधाय दैवतमदश्चिकराङ्गुलिभिः ॥३२॥
वनमहिषं निपात्य विषमं विषमाः परितः परुषकिरातका रुधिरमांसबलिप्रकरम् ।
[7]विचकरुरुन्मग्नमशकमक्षिकमक्षिविषं प्रविततविस्रगन्धदुरभीकृतदिग्वलयम् ॥३३॥

समय, तीक्ष्ण तलवारके समान निर्मल एवं निर्विकल्प चित्तको धारण करनेवाली वह प्रतिमा तुल्य आर्यिका किसी मार्गके सम्मुख प्रतिमायोगसे विराजमान हो गयी। उसी समय किसी बहुत धनी सङ्घपर आक्रमण करनेके लिए रात्रिके समान काली भीलोंकी एक बड़ी सेना शीघ्रतासे वहाँ आयी और उसने प्रतिमायोगसे विराजमान उस आर्यिकाको देखा ॥२७॥ 'यह यहाँ वनदेवी विराजमान है' यह समझकर सैकड़ों भीलोंने नमस्कार कर उससे अपने लिए यह वरदान माँगा कि 'हे भगवति! यदि आपके प्रसादसे निरुपद्रव रहकर हम लोग धन प्राप्त कर सकेंगे तो हम आपके पहले दास होंगे' ॥२८॥ इस प्रकारका मनोरथ कर भीलोंका वह विशाल समूह बड़ी मजबूतीसे चारों ओरसे यात्रियोंके उस सङ्घपर टूट पड़ा और उसे मार-कर तथा लूटकर कृतकृत्य होता हुआ जब वह वापिस समीपमें आया तो उसने प्रतिमायोगसे स्थित आर्यिकाके खड़े होनेके स्थानपर यह देखा ॥२९॥ जब भील लोग आर्यिकाके दर्शनकर आगे बढ़ गये तब वहाँ एक सिंहने आकर उनपर घोर उपसर्ग शुरू कर दिया। उपसर्ग देख उन्होंने बड़ी शान्तिसे समाधि धारण की और मरण पर्यन्तके लिए अनशनपूर्वक रहनेका नियम ले लिया। तदनन्तर प्रतिमायोगमें ही मरणकर वे स्वर्ग गयीं सो ठीक ही है क्योंकि सज्जन पुरुष अपनी मर्यादासे कभी विचलित नहीं होते ॥३०॥ निरन्तर धर्मका उपार्जन करने-वाली एवं गृहीत समाधिको न छोड़नेवाली उस आर्यिकाका शरीर सिंहके नख, मुख और डाढ़ों के अग्रभागसे विदीर्ण होनेके कारण यद्यपि छूट गया था तथापि उसके हाथकी तीन अँगुलियाँ वहाँ शेष बच रही थीं यही तीन अँगुलियाँ उन भीलोंको दिखायी दीं ॥३१॥ खूनसे विलिप्त होनेके कारण जिसका मार्ग अन्तर्हित हो गया था ऐसी वहाँकी समस्त भूमिको उन भीलोंने उस समय बड़ी आकुलतासे यहाँ-वहाँ देखा पर कहीं उन्हें वह आर्यिका नहीं दिखी। अन्तमें उन्होंने निश्चय किया कि वरदान देनेवाली वह देवी इस रुधिरमें ही सन्तोष धारण करती है इसलिए हाथकी उन तीन अँगुलियोंको वहीं देवता रूपसे विराजमान कर दिया और बड़े-बड़े जंगली भैंसाओंको मारकर उन विषम एवं क्रूर भीलोंने सब ओर खून एवं मांसकी बलि

---

१. प्रतिपथया स्थिता प्रविशया प्रतिमा । २. रात्रिप्रभातुल्यया-कृष्णया । ३. विनिहित-म०, क० ख०, ङ० । ४. उपगतसिंहात् । ५. द्रुतपल्लवचण्डतया म० । ६. विलुप्त-म० । ७. विचकरुरुद्रमग्नशक-मक्षिक म०-विचकरुरुद्रमग्नशशकमक्षिक ग० ।

सुगतगतामम्ं परमकारुणिकां तपसा जगति जनस्ततः प्रभृति निरागसमत्र जडः ।
वनचरदर्शितेन तु पथा नरकाभिमुखः पिशितवशो निहन्ति हि पशून् महिषप्रभृतीन् ॥३४॥
न हि महिषास्र[2]पानविधिका न हि शूलकरा न हि सुरदुर्गतावपि परस्परघातकता ।
रचयति भित्तिमात्रमुपलभ्य कविः कवितां सदसतीं यथा च लिखति स्फुटचित्रकरः ॥३५॥
सदपि दुरीहितं रहसिजं हि परस्य परैः सदसि निगद्यमानमघमावहतीति[3] सताम् ।
मतमिदमस्य तु प्रकटनं जगतामसतो न नरकपातहेतुरिति कस्य सतो वचनम् ॥३६॥
अवितथमित्यमी वितथमेव शठा कवयः स्वपरमहारयो विदधते विकथाकथनम् ।
परवधकापथेषु भुवि तेषु तथेति जनः सुर-रव-मूढधीः पतति गड्डरिकाकटवत् ॥३७॥
क्व परदयापरः परमधर्मपथो भुवने विधिवदनुष्ठितस्तनुभृतां सुखदः प्रकटः ।
क्व च परघातजो नरकहेतुरधर्मकलिः कुकविविकल्पितः खलकलौ खलु धर्मतया ॥३८॥
प्रकटितलोकपालचरिताः [4]खललोकभयात्तनुभृदनुग्रहं विदधतः परिरक्षणतः ।
समहिषमेषघातमधिदैवतमत्र नृपाः विदधति यत्र तत्र कुजनेषु तु कैव कथा ॥३९॥
कथमपि कार्यसिद्धिमुपलभ्य हि दैववशात्प्रतिनिधिदेवताकृतमिति प्रतिपद्य नरः ।
निजवपुरायुधैः सुविनिकृत्य ददद्रुधिरं परतनुकर्तने भवति वा स कथं सघृणः ॥४०॥

चढ़ाना शुरू कर दी। इस बलिदानसे वहाँ मक्खियाँ और मच्छर उतराने लगे, वह स्थान आँखोंके लिए विषके समान दिखायी पड़ने लगा। तथा फैली हुई सड़ी बाससे वहाँकी दिशाएँ दुर्गन्धित हो गयीं ॥ ३२-३३ ॥ यद्यपि वह आर्यिका परम दयालु थी, निष्पाप थी और तपके प्रभावसे उत्तम गतिको प्राप्त हुई थी तथापि इस संसारमें मांसके लोभी नरकगामी मूर्ख जन भीलोंके द्वारा दिखलाये हुए मार्गसे चलकर उसी समयसे भैंसा आदि पशुओंको मारने लगे ॥३४॥ उत्तम देवगतिकी बात छोड़िए निकृष्ट देवगतिमें भी कोई देव भैंसाओंका रुधिर पान करनेवाले एवं हाथोंमें त्रिशूल धारण करनेवाले नहीं हैं और न उनमें परस्पर एक दूसरे का मारना ही है फिर भी कवि स्फुट चित्रकारके समान जरा-सी भित्तिका आधार पा सत्पुरुषोंको भी दूषण लगानेवाली कविता लिख डालते हैं ॥३५॥

दूसरेकी एकान्तमें होनेवाली सत्य कुचेष्टाका भी सभामें दूसरोंके द्वारा कहा जाना पाप बन्धका कारण है—यह सत्पुरुषोंका मत है। फिर किसीके अविद्यमान दोषको संसारके सामने प्रकट करना नरकगतिका कारण नहीं है यह किस सत्पुरुषका वचन है? अर्थात् किसीका नहीं॥३६॥ स्व-परके महावैरी ये धूर्त कवि असत्यको सत्य है ऐसा बताकर विकथाओं का कथन करते हैं और 'ये देवताओंके वचन हैं' ऐसा समझ मूर्ख प्राणी पृथिवीपर, परका वध करना आदि कुमार्गोंमें भेड़िया-धसानके समान गिरते चले जाते हैं ॥३७॥ विधि-पूर्वक आराधना करनेपर प्राणियोंको सुख देनेवाला, परजीवोंकी दयामें तत्पर संसारमें प्रकट हुआ परम धर्मका मार्ग कहाँ? और दुष्ट कलिकालमें कुकवियोंके द्वारा धर्मरूपसे कल्पित, परघातसे उत्पन्न, नरकका कारण अधर्मकी कलह कहाँ? भावार्थ—धर्म और अधर्ममें महान् अन्तर है ॥३८॥ जिन्होंने लोकपालका चरित प्रकट किया है और जो दुष्टजनोंके भयसे रक्षा कर जीवोंपर सदा अनुग्रह करते हैं ऐसे राजा भी जहाँ इस संसारमें देवताओंको लक्ष्य कर भैंसा तथा मेष आदि जन्तुओंका घात करते हैं वहाँ अन्य क्षुद्र मनुष्योंकी तो कथा ही क्या है? ॥३९॥ भाग्यवश किसी तरह कार्यकी सिद्धिको पाकर 'यह प्रतिनिधिभूत देवताके द्वारा ही कार्य सिद्ध हुआ है' ऐसा मान जो मनुष्य शस्त्रोंसे अपने ही शरीरको चीर खूनकी बलि देने लगता है वह दूसरोंके शरीरके छेदनेमें दयासहित कैसे हो सकता है? भावार्थ—मनुष्य

१. निष्पापाम्। २. महिषास्रपानवधिका म०। ३. -मावहतीहि म०। ४. खलु लोकभयात्तनु-म०।

विपुलसपर्यया प्रणतलोकसुतोषितया विगतविपर्ययत्वगुणया जगतीश्वरः ।
यदि हि वितीर्यते वरदया वरदेवतया न भवति कश्चिदप्यभिमतेन जनो विकलः ॥४१॥
प्रतिनिधिराश्रयश्च सधनस्य परस्य कृतिः प्रतिदिनदीपतैलबलिपुष्पविधिः परतः ।
अथ च वरं परस्य नियतं प्रददाति वृतं जडजनदेवता जगति हास्यमिदं परमम् ॥४२॥
प्रतिकृतिरर्चिता भुवि कृतार्थजिनाधिपतेरधिगतभक्तिभिर्द्रविणभावविधार्चनया[1] ।
फलति फलं परत्र परिणामविशेषवशादभिमतकल्पवृक्षलतिकेव जनाभिमतम् ॥४३॥
[2]अपथनिपातपातनघनानुमतैरशुभैस्त्रिभिरशुभास्रवो भवति दुर्गतिहेतुरलम् ।
पथि यतिभाषिते स्वकृतकारकतानुमतैर्भवति शुभास्रवः सुगतिहेतुरपीह शुभैः ॥४४॥
मनसि शुभे निजे वचसि वा वपुषि [3]प्रगुणे किमिति न पुण्यमेव जगदेकगतं कुरुते ।
घटयति पापमेव [4]विगुणैस्तु कृतैः करणैर्गुरुतरमत्र कारणमहो गुरुकर्मकृतम् ॥४५॥
तिमिरभरं त्रिमूढमयमत्र दृढं जगतः स्थगयदलं पवित्रनेत्रमनौषधकम् ।
तदिह जनो दिदृक्षुरपि तत्त्वमतत्त्वमपि प्रतिपदमाकुलः किमु निरूपयितुं क्षमते ॥४६॥

की कार्यसिद्धि तो अपने पूर्वकृत कर्मके अनुसार होती है परन्तु देवताकी प्रतिनिधि रूप मूर्तिकी उपासना करनेवाला मनुष्य उस सिद्धिको उस मूर्तिके द्वारा किया हुआ मानता है इसलिए प्रसन्न होकर शस्त्रोंसे ही अङ्गोंको छेदकर खूनकी बलि देने लगता है। जो अपने ही अङ्गोंको छेद डालता है उसे दूसरेके अङ्ग छेदनेमें दया कहाँ हो सकती है ? ।।४०।। नम्रीभूत मनुष्योंने बहुत बड़ी पूजासे जिसे अच्छी तरह सन्तुष्ट कर लिया है और जिसका विद्वेषरूप विपरीत गुण दूर हो गया है ऐसी वर देनेवाली उत्कृष्ट देवीके द्वारा यदि संसारमें इष्ट वर दिया जाता है तो किसी भी मनुष्यको इष्ट सामग्रीसे रहित नहीं होना चाहिए। भावार्थ— जब सभी लोग पूजाके द्वारा देवताको सन्तुष्ट कर उससे इष्ट वरदान प्राप्त कर सकते हैं तब सभीको इष्ट वस्तुओंसे भरपूर होना चाहिए ।।४१।। जिसकी मूर्ति और मन्दिरका निर्माण अन्य धनवान् मनुष्यका कार्य है, तथा जिसकी प्रतिदिन काम आनेवाली दीप, तेल, बलि, पुष्प आदिकी विधि सदा दूसरोंसे पूर्ण होती है वह मूर्खजनोंकी देवता दूसरोंके लिए माँगा हुआ वरदान निश्चित रूपसे देती है यह संसारमें बड़ी हँसीकी बात है। भावार्थ—जो अपनी मूर्ति और मन्दिर स्वयं नहीं बना सकती तथा प्रतिदिन उपयोगमें आनेवाले दीपक, तेल, नैवेद्य और फूल आदिके लिए जिसे दूसरोंका मुँह देखना पड़ता है वह दूसरोंके लिए क्या वरदान देगी ? ।।४२।। पृथिवीपर भक्तजनों द्वारा द्रव्य, भाव, पूजासे पूजी हुई कृतकृत्य जिनेन्द्र भगवान्की प्रतिमा, अपने-अपने विशिष्ट परिणामोंके अनुसार परभवमें इष्ट कल्पवृक्षकी लताके समान मनुष्योंके इष्ट मनोरथरूप फलको फलती है ।।४३।। कुमार्गमें स्वयं प्रवृत्त होना, दूसरेको प्रवृत्त कराना और प्रवृत्त होते हुए को अनुमति देना इन तीन अशुभ प्रवृत्तियोंसे अशुभ कर्मोंका आस्रव होता है जो कि दुर्गतिका मुख्य कारण है और मुनिराजके द्वारा बताये हुए मार्गमें स्वयं प्रवृत्त होना, दूसरेको प्रवृत्त कराना और प्रवृत्त होते हुए को अनुमति देना इन तीन शुभ प्रवृत्तियोंसे शुभ कर्मोंका आस्रव होता है जो कि सुगतिका मुख्य कारण है ।।४४।। इस प्रकार जब अपने ही शुभ मन, शुभ वचन और शुभ कायसे पुण्यबन्ध होता है और वे शुभ मन आदि अपने अधीन हैं तब संसारके समस्त प्राणी एक पुण्य कर्मको ही क्यों नहीं करते ? किन्तु उसके विपरीत किये हुए निरर्थक कार्योंसे पाप ही क्यों करते हैं ? अहो ! जान पड़ता है कि इसमें पूर्वबद्ध बहुत भारी कर्मोंके द्वारा किया हुआ बहुत बड़ा कारण है ।।४५।। अहो !

१. विधार्थतया म०, विधार्थनया ग० । २. अपथनिघातनिघातन-म०, ग० । ३. प्रगुणो म० ।
४. विगुणैः सुकृतैः म० ।

अतिनिचिताग्निवायुजलभूमिलतातरुभिः क्षितिरपचेतनैश्च गृहकल्पितदैवतकैः।
रविविधुतारकाग्रहगणैर्जननेत्रपथैर्गगनमतोऽस्तु मूढिरिह कस्य जनस्य न वा ॥४७॥
सदसदनेकमेकमथ नित्यमनित्यमपि स्वकपररूपभेदमपि शेषमशेषपरम्।
गुणगुणिकार्यकारणमिदाद्यखिलात्मतया जगदिदमित्यमी नियमिनो दृढमूढतया ॥४८॥
यदि च परस्परव्युदसनव्यसनाः स्युर्मृषा स्फुटमितरेतरेक्षणतया नमृषा हि तथा।
निगमनसंग्रहव्यवहृतिप्रमुखाश्च नयाः सकलनयप्रमाणपरिनिश्चितवस्तुनि याः ॥४९॥
[1]पुरुषपुरस्सरेऽभिरुचिरन्यनिवृत्तिरुचेर्मुनिपति[2]शासनाभिनिरतस्य जनस्य हि सा।
सुगतिमयत्नतो विशति सिद्धिसुखा[3]न्वयिनीं शुभमखिलार्थगोचरमुदारचरित्रमपि ॥५०॥
व्रतगुणशीलराशिरतिघोरतपो विविधं विमलमिदं यतो भवति दर्शनशुद्धियुतम्।
[4]जननजराम्रृतिक्षयकरीं सुखदां भुवि तां भजतु जनस्ततो जिनगुणग्रहणाभिरतः ॥५१॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ दुर्गोत्पत्तिवर्णनो नामैकोनपञ्चाशः सर्गः ॥४९॥

देवमूढ़ता और गुरुमूढ़ता इन तीन मूढ़ताओंरूप अन्धकारका समूह बहुत प्रबल है, वह जगत्के जीवोंके पवित्र नेत्रको अच्छी तरह आच्छादित कर रहा है और इसकी कोई ओषधि भी नहीं है इसी अन्धकारके कारण देखनेका इच्छुक मनुष्य भी पद-पदपर आकुल होता हुआ तत्त्व और अतत्त्वको देखनेमें क्या समर्थ हो पाता है ? अर्थात् नहीं हो पाता ॥४६॥ यह पृथिवी अग्नि, वायु, जल, भूमि, लता और वृक्षोंसे तथा मन्दिरोंमें कल्पित अचेतन देवोंसे व्याप्त है और आकाश मनुष्योंके नेत्रगोचर सूर्य, चन्द्र, तारा तथा ग्रहोंके समूहसे व्याप्त है इसलिए इनके विषयमें किसे मूढता नहीं होगी ? भावार्थ—पृथिवी और आकाश कल्पित देवताओंसे भरे हुए हैं इसलिए विवेकसे विचारकर यथार्थ देवका निर्णय करना चाहिए ॥४७॥ यह संसार कथञ्चित् सत् है, कथञ्चित् असत् है, कथञ्चित् एक है, कथञ्चित् अनेक है, कथञ्चित् नित्य है, कथञ्चित् अनित्य है, कथञ्चित् स्वरूप है, कथञ्चित् पररूप है, कथञ्चित् सान्त है, कथञ्चित् अनन्त है, और गुण-गुणी तथा कार्य-कारणके भेदसे अनेक रूप है फिर भी ये संसारके प्राणी गाढ़ मूढ़ताके कारण एकान्तवादमें निमग्न हैं ॥४८॥ समस्त नयों और प्रमाणोंके द्वारा निश्चित वस्तुके विषयमें जो नैगम, संग्रह तथा व्यवहार आदि प्रमुख नय माने गये हैं वे यदि परस्परमें एक दूसरेका निषेध करते हैं तो मिथ्या हैं और परस्पर एक दूसरेपर दृष्टि रखते हैं तो समीचीन हैं ॥४९॥ अन्य देवताओंकी रुचिसे रहित एवं जिनेन्द्र भगवान्के शासनमें निरत मनुष्यकी जो जीव आदि तत्त्वोंमें प्रगाढ़ श्रद्धा है उसकी वही श्रद्धा बिना किसी प्रयत्नके मोक्ष-सुखसे सम्बन्ध जोड़नेवाली सुगति अथवा सम्यग्ज्ञानको और शुभ एवं समस्त पदार्थोंको विषय करनेवाले उत्कृष्ट चारित्रको भी प्राप्त होती है। भावार्थ—मनुष्य की श्रद्धारूप परिणति ही सम्यग्ज्ञान तथा सम्यक्चारित्रकी प्राप्तिका कारण है ॥५०॥ यह व्रत गुण और शीलकी राशि तथा नना प्रकारका अत्यन्त घोर तप चूँकि दर्शनकी शुद्धिसे युक्त होनेपर ही निर्मल होता है इसलिए जिनेन्द्र भगवान्के गुण-ग्रहण करनेमें तत्पर मनुष्यको चाहिए कि वह जन्म, बुढ़ापा और मृत्युका क्षय करनेवाली एवं सुखदायी दर्शनकी शुद्धिका आराधन करे—अपने सम्यग्दर्शनको निर्मल बनावे ॥५१॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंश पुराणमें दुर्गाकी उत्पत्तिका वर्णन करनेवाला उनचासवाँ सर्ग समाप्त हुआ ॥४९॥

---

१. पुरुषपुरस्सरोभि म० । २. मुनिपतिशासनाशासनाभिरतस्य म० । ३. सिद्धिसुखान्वयिनं म०, क० । ४. भवपारमपारमनन्तं यियासु च चेन्मनः म०, ङ० । अस्मिन् पाठे छन्दोभङ्गः अनन्तपदस्य वैयर्थ्यं च वर्तते ।

पञ्चाशत्तमः सर्गः

इतः [1]केनापि वणिजा ह्यनर्घ्यैर्मणिराशिभिः । जरासन्धो नृपो दृष्टः [2]स्वक्रयाणकहेतुना ॥१॥
दृष्ट्वा कस्मात्समानीताः प्रोवाच मगधेश्वरः । [3]द्वारवत्याः प्रभो एते यत्र राजाऽच्युतो बली ॥२॥
यादवेन्द्रशिवादेव्योर्नेमिस्तीर्थकरोऽभवत् । मासान् पञ्चदश तत्र रत्नवृष्टिः कृता सुरैः ॥३॥
यादवानां च माहात्म्यं श्रुत्वा राजगृहाधिपः । वणिजः तार्किकेभ्यश्च जातः कोपारुणेक्षणः[4] ॥४॥
यदुवृद्धिमिति श्रुत्वा श्रुतवृद्धिविलोचनम् । प्रणम्य गणिनं भूपः श्रेणिकोऽपृच्छदित्यसौ ॥५॥
मणिराशिष्विवाम्भोधौ महागुणमरीचिषु । प्रख्यातेष्वखिले लोके यादवेष्वतिभूरिषु ॥६॥
अनेकाहवनिर्व्यूढदृढवीर्ये हरौ श्रुते । किमचेष्टत राजासौ [5]भगवन्मगधाधिपः ॥७॥
ततो गणभृदाचख्यावनयोर्नरमुख्ययोः । वृत्तं श्रेणिकभूपाय शुश्रूषावहितात्मने ॥८॥
बुद्धवार्तो जरासन्धः सन्धिं प्रति पराङ्मुखः । प्रमुख्यैर्मन्त्रिभिः सत्रा मन्त्रमारभते स्म[6] सः ॥९॥
उपेक्षिताः कुतो हेतो मन्त्रिणो [7]भणतारयः । वार्धौ प्रवृद्धसन्तानास्तरङ्गा इव भङ्गुराः ॥१०॥
मन्त्रिणो हि प्रभोश्चक्षुर्निर्मलं चारचक्षुषः । ते कथं स्वामिनं स्वं च वञ्चयन्ति पुरः स्थिताः ॥११॥
यदि नाम महैश्वर्यप्रमत्तेन [8]मया द्विषः । नालक्ष्यन्त प्रतन्वाना युष्माभिस्तु कथं तु ते ॥१२॥
नोच्छिद्येरन्महोद्योगैर्जातमात्रा यदि द्विषः । दुःखयन्ति दुरन्तास्ते व्याधयः कुपिता इव ॥१३॥

इधर कोई एक वणिक् अपना खरीदा हुआ माल बेचनेके लिए बहुत-से अमूल्य मणि लेकर राजा जरासन्धसे मिला ॥१॥ उन मणियोंको देखकर राजा जरासन्धने उससे पूछा कि ये मणि तुम कहाँ से लाये हो ? इसके उत्तरमें वणिक्ने कहा कि हे स्वामिन् ! ये मणि उस द्वारिकापुरीसे आये हैं जहाँ अत्यन्त पराक्रमी राजा कृष्ण रहते हैं ॥२॥ यादवोंके स्वामी कृष्ण समुद्रविजय और उनकी रानी शिवा देवीके जब नेमिनाथ तीर्थङ्कर उत्पन्न हुए थे तब पन्द्रह मास तक देवोंने रत्न-वृष्टि की थी ॥३॥ उन्हीं रत्नोंमें-से ये रत्न लाया हूँ । वणिक् तथा मन्त्रियोंसे इस प्रकार यादवोंका माहात्म्य सुनकर जरासन्ध क्रोधसे लाल-लाल नेत्रोंका धारक हो गया ॥४॥ इस प्रकार यादवोंकी वृद्धि सुनकर राजा श्रेणिकने श्रुतज्ञान रूपी नेत्रके धारक गौतम गणधरको नमस्कार कर पूछा कि हे भगवन् ! महागुण रूपी किरणोंसे सुशोभित, समुद्रमें मणियोंकी राशिके समान समस्त लोकमें प्रख्यात अत्यधिक यादवोंमें जब जरासन्धने अनेक युद्धोंमें जिनका दृढ़ पराक्रम परिपूर्णताको प्राप्त हो चुका था ऐसे कृष्णका नाम सुना तब उसकी क्या चेष्टा हुई ? सो कृपा कर कहिए ॥५-७॥

तदनन्तर गौतम गणधर, श्रवण करनेके लिए उत्सुक राजा श्रेणिकके लिए दोनों नर-श्रेष्ठ—जरासन्ध और कृष्णका चरित इस प्रकार कहने लगे—॥८॥

यादवोंका समाचार जानकर जरासन्ध सन्धिसे विमुख हो गया और मुख्य मन्त्रियोंके साथ मन्त्र करने लगा ॥९॥ उसने पूछा कि हे मन्त्रियो ! बताओ तो सही समुद्रमें बढ़ती हुई तरङ्गोंके समान भंगुर शत्रु आजतक उपेक्षित कैसे रहे आये ? ॥९-१०॥ गुप्तचर रूपी नेत्रोंसे युक्त राजाके मन्त्री ही निर्मल चक्षु हैं फिर वे सामने खड़े रहकर स्वामीको तथा अपने-आपको क्यों धोखा देते हैं ? ॥११॥ यदि महान् ऐश्वर्यमें मत्त रहनेवाले मैंने उन शत्रुओंको नहीं देखा तो आप लोगोंसे अदृष्ट कैसे रह गये ? आप लोगोंने उन्हें क्यों नहीं देखा ? ॥१२॥ यदि शत्रु उत्पन्न होते ही महान् प्रयत्नपूर्वक नष्ट नहीं किये जाते हैं तो वे कोपको प्राप्त

---

१. केनचिद्वणिजा अनर्घै०, म०, ख०, घ० । २. स्वक्रियाणक—म० । ३. 'नारायणः क्षमां शास्ति द्वारावत्याः प्रभो बली' म० । ४. कोपारुणो दृशोः ग० । ५. भगवान्मगधाधिपः । ६. -मारभ्यते स्म सः म० । ७. भरतारयः म० । ८. महाद्विषः म० ।

कंसं जामातरं हत्वा भ्रातरं चापराजितम्। प्रविष्टाः शरणं दुष्टा यादवा यादसांपतिम्[1] ॥१४॥
यद्यप्यनवगाह्याब्धिगम्भीरोदरमाश्रिताः। उपायानायनिःकृष्टा वध्यास्ते मे झषा यथा ॥१५॥
[2]द्वारिकामधितिष्ठन्तः संतिष्ठन्ते कुतोऽभयाः। तावदेव हि ते यावन्न मे कोपानलो ज्वलेत् ॥१६॥
इयन्तं कालमज्ञाता ज्ञातिभिः सह सुस्थिताः। ज्ञातानामधुना तेषां सुस्थितिर्मद्द्विषां कुतः ॥१७॥
साम्नश्चोपप्रदानस्य न ते स्थानं कृतागसः। ततो युष्माभिरेकान्तात्स्थाप्यतां भेददण्डयोः ॥१८॥
दण्डोपायप्रधानं तं स्वामिनं मन्त्रिणस्ततः[3]। प्रशाम्य प्रणताः प्रोचुः प्रसादपदवीस्थिताः ॥१९॥
आकर्ण्यतां यथा नाथ विदन्तोऽपि वयं द्विषाम्। द्वारिकायां [4]महावृद्धिं कालयापनया स्थिताः ॥२०॥
यादवान्वयसंभूताः स्वर्सुवामपि [5]दुर्जयाः। श्रीनेमिर्वासुदेवश्च बलदेवश्च ते त्रयः ॥२१॥
स्वर्गावतारकाले यः पूजितो वसुवृष्टिभिः। सुरेन्द्रैरभिषिक्तश्च जिनो जन्मनि [6]मन्दरे ॥२२॥
स कथं युधि जीयेत भवतामररक्षितः। युक्तेनापि समस्तेन राजकेन भुवस्तले ॥२३॥
बलकेशवयोश्चापि सामर्थ्यं भवता न किम्। तच्छ्रुतं बहुयुद्धेषु शिशुपालवधादिषु ॥२४॥
यत्पक्षाः पाण्डवाश्चण्डाः प्रतापार्जितकीर्तयः। विद्याधराश्च बहवो वैवाहिकपथस्थिताः ॥२५॥
कोट्यो यत्र कुमाराणां प्रसिद्धा रणशालिनाम्। स्वामिन्नर्धचतुर्थास्ते जीयन्ते यादवाः कथम् ॥२६॥
अन्तस्थानप्यपां पत्युस्तान् कदाचिदपेक्षया। मद्भीता इति मामंस्था नयमार्गविदो यदून् ॥२७॥

हुई बीमारियोंके समान दुःख देते हैं और उनका अन्त अच्छा नहीं होता ॥१३॥ ये दुष्ट यादव मेरे जमाई कंस और भाई अपराजितको मारकर समुद्रकी शरणमें प्रविष्ट हुए हैं ॥१४॥ यद्यपि वे प्रवेश करनेके अयोग्य समुद्रके मध्यभागमें स्थित हैं तथापि उपाय रूपी जलसे खींचकर मछलियोंके समान मेरे वध्य हैं ॥१५॥ द्वारिकामें रहते हुए वे निर्भय क्यों हैं ? अथवा वे तभीतक निर्भय रह सकते हैं जबतक कि मेरी क्रोधाग्नि प्रज्वलित नहीं हुई है ॥१६॥ इतने समयतक मुझे उनका पता नहीं था इसलिए अपने कुटुम्बीजनोंके साथ वे सुखसे रहे आये पर अब मुझे पता चल गया है इसलिए उनका सुख-पूर्वक रहना कैसे हो सकता है ? ॥१७॥ तीव्र अपराध करनेवाले वे साम और दानके स्थान नहीं हैं इसलिए आपलोग एकान्तरूपसे उन्हें भेद और दण्डके ही पक्षमें रखिए ॥१८॥

तदनन्तर प्रधान रूपसे दण्डको ही उपाय समझनेवाले स्वामी जरासन्धको शान्त कर प्रसादके मार्गमें स्थित मन्त्रियोंने नम्रीभूत हो कहा कि हे नाथ ! हमलोग शत्रुओंकी द्वारिकामें होनेवाली महा वृद्धिको जानते हुए भी समय व्यतीत करते रहे इसका कारण सुनिए ॥१९-२०॥ यादवोंके वंशमें उत्पन्न हुए श्री नेमिनाथ तीर्थङ्कर श्री कृष्ण और बलदेव ये तीन महानुभाव इतने बलवान् हैं कि मनुष्योंकी तो बात ही क्या देवोंके लिए भी उनका जीतना कठिन है ॥२१॥ स्वर्गावतारके समय जो रत्नोंकी वृष्टिसे पूजित हुआ था, जन्मके समय इन्द्रोंने सुमेरु पर्वतपर जिसका अभिषेक किया था और देव जिसकी सदा रक्षा करते हैं वह नेमि जिनेन्द्र युद्धमें आपके द्वारा कैसे जीता जा सकता है अथवा पृथिवी तलके समस्त राजा भी इकट्ठे होकर उसे कैसे जीत सकते हैं ? ॥२२-२३॥ शिशुपालके वधको आदि लेकर जो अनेक युद्ध हुए उनमें क्या आपने बलदेव और कृष्णकी उस लोकोत्तर सामर्थ्यको नहीं सुना ? ॥२४॥ प्रतापसे कीर्तिको उपार्जित करनेवाले महातेजस्वी पाण्डव तथा विवाह सम्बन्धसे अनुकूलता दिखलानेवाले अनेक विद्याधर इस समय जिनके पक्षमें हैं ॥२५॥ और जिनके साढ़े तीन करोड़ कुमार रणविद्यामें कुशल हैं वे यादव कैसे जीते जा सकते हैं ? ॥२६॥ नय मार्गके जानकार

१. प्रति म० । २. द्वारिकावधि तिष्ठन्तः म०, ग० । ३. मन्त्रिणस्तथा म० । ४. महावृद्धिः म० । ५. दुर्जयां म० । ६. मन्दिरे म० । मन्दरे = मेरौ ।

दैवकालबलोपेता देवताकृतरक्षणाः । सुप्तव्याघ्रोपमा देव ! तावत्तिष्ठन्तु यादवाः ॥२८॥
आस्महे वयमप्यत्र कालयापनया प्रभो ! । स्वाज्ञ स्वपर कालानां याप्यावस्था हि शस्यते ॥२९॥
अनयावस्थयाऽऽसीने त्वयि तेषां प्रकोपिनाम् । द्विषां प्रतिविधानाय प्रतिपद्यस्व पौरुषम् ॥३०॥
इत्यादि मन्त्रिभिः पथ्यं तथ्यं विज्ञापितं प्रभुः । नाग्रहीत्क्षयकाले हि ग्राही ग्राहं न मुञ्चति ॥३१॥
सचिवानपकर्ण्याशु प्रकोपाय नृपो द्विषाम् । दूतं सोऽजितसेनाख्यं प्राहिणोद्द्वारिकां पुरीम् ॥३२॥
स प्राच्यानां प्रतीच्यानामपाच्यानां च भूभृताम् । उदीच्यानामगस्थानां मध्यदेशाधिवासिनाम् ॥३३॥
चतुरङ्गबलेशानां शासनानतिलङ्घिनाम् । दूतानजीगमत्क्षिप्रमायान्त्विति पराक्रमी ॥३४॥
दूतदर्शनमात्रेण कर्णदुर्योधनादयः । ते संप्राप्ता जरासन्धं सत्यसन्धाहितैषिणः ॥३५॥
नृपैस्तैरनुयातोऽसौ तनयाद्यैर्महाबलैः । निमित्तैर्वार्यमाणोऽपि प्रतस्थेऽरिजिगीषया ॥३६॥
स दूतोऽजितसेनोऽपि स्वामिकार्यहितः पुरीम् । सुद्वारां द्वारिकां प्राप सुकृतीव दिवं कृती ॥३७॥
प्रविश्य नगरीं रम्यामनेकाद्भुतसङ्कुलाम् । दृश्यमानो जनैः पौरैराससाद नृपालयम् ॥३८॥
अशेषयादवाकीर्णां भोजपाण्डवसंयुताम् । सभां स प्राविशद्विष्णोः प्रतीहारनिवेदितः ॥३९॥
कृतप्रणतिरध्यास्य दापितासनमग्रतः । वक्तुं प्रारभत स्वामिबललाभावलेपतः ॥४०॥
आकर्ण्यतां समाधाय मनः सकलयादवैः । यथा शास्ति महाराजो मागधः परमेश्वरः ॥४१॥

यदु किसी समय किसी अपेक्षा समुद्रके मध्य जाकर रहे थे। वे 'हमसे भयभीत हैं' ऐसा मत समझिए ।।२७।। इसलिए हे देव ! जो दैव और कालके बलसे सहित हैं, देव जिनकी रक्षा करते हैं और जो सोते हुए सिंहके समान हैं ऐसे यादव उधर द्वारिकामें सुखसे रहें और इधर हम लोग भी समय व्यतीत करते हुए सुखसे रहें क्योंकि हे उत्तम आज्ञाके धारक! प्रभो ! जिसमें अपना और परका समय सुखसे व्यतीत हो वही अवस्था प्रशंसनीय कही जाती है ।।२८-२९।। आपके इस अवस्थासे रहनेपर भी यदि वे क्रोध करते हैं तो उनका प्रतिकार करनेके लिए पुरुषार्थको स्वीकृत करो ।।३०।। इसे आदि लेकर मन्त्रियोंने यद्यपि हितकारी एवं सत्य निवेदन किया तथापि जरासन्धने उसे कुछ भी ग्रहण नहीं किया सो ठीक ही है क्योंकि विनाशके समय हठी मनुष्य अपना हठ नहीं छोड़ता ।।३१।।

राजा जरासन्धने मन्त्रियोंको अनसुना कर शत्रुओंको शीघ्र ही कुपित करनेके लिए अजितसेन नामक दूतको द्वारिकापुरी भेजा ।।३२।। पराक्रमी राजा जरासन्धने चतुरङ्ग सेनाओंके स्वामी, एवं आज्ञाका उल्लङ्घन न करनेवाले पूर्व, पश्चिम, दक्षिण और उत्तर दिशाओं, पर्वतों एवं मध्यदेशके निवासी राजाओंको 'आप लोग जल्दी आइए' यह कहकर दूत भेजे ।।३३-३४।। दूतको देखते ही सत्यप्रतिज्ञ एवं हितको चाहनेवाले कर्ण, दुर्योधन आदि राजा, जरासन्धके पास आ पहुँचे ।।३५।। उक्त राजा तथा महाबलवान् पुत्र आदि कुटुम्बीजन जिसके पीछे-पीछे चल रहे थे ऐसा जरासन्ध, खोटे निमित्तोंसे रोके जानेपर भी शत्रुओंको जीतनेकी इच्छासे चल पड़ा ।।३६।।

उधर जिस प्रकार पुण्य कार्य करनेवाला कुशल मनुष्य स्वर्ग जा पहुँचता है उसी प्रकार स्वामीके कार्यमें लगा हुआ अजितसेन दूत भी उत्तमोत्तम द्वारोंसे युक्त द्वारिका नगरीमें जा पहुँचा ।।३७।। अनेक आश्चर्यकारी रचनाओंसे व्याप्त सुन्दर द्वारिकापुरीमें प्रवेशकर नगरवासी-जनोंके द्वारा देखा गया वह दूत क्रम-क्रमसे राजमहलमें पहुँचा ।।३८।। द्वारपालके द्वारा सूचना देनेपर उसने समस्त यादवोंसे व्याप्त एवं भोज और पाण्डवोंसे युक्त श्री कृष्णकी सभा में प्रवेश किया ।।३९।। प्रणाम करनेके बाद आगे दिलाये हुए आसनपर बैठकर उसने स्वामी के बलकी प्राप्तिसे उत्पन्न घमण्डसे इस प्रकार बोलना शुरू किया ।।४०।।

वह बोला कि राजाधिराज महाराज जरासन्ध जो आज्ञा देते हैं उसे समस्त यादव

यूयमेव स्फुटं ब्रूत किमनिष्टं कृतं मया। युष्माकं येन साशङ्काः प्रविष्टाः सागरोदरम् ॥४२॥
सापराधतया यूयं यद्यप्युद्भूतभीतयः। दुर्गं श्रितास्तथाप्यस्मन्नभयं नमतैत्य माम् ॥४३॥
अथ दुर्गबलाद्यूयं तिष्ठतानतिवर्जिताः। एषोऽहं सागरं पीत्वा बलैः कुर्वे कदर्थनाम् ॥४४॥
अज्ञातावस्थितीनां च कालदेशबलं बलम्। अधुना ज्ञातवार्तानां कालदेशबलं कुतः ॥४५॥
वचोहरवचः श्रुत्वा कुपिता निखिला नृपाः। कृष्णादयो जगुस्तत्र भ्रुकुटीकुटिलाननाः ॥४६॥
आयात्यासन्नकालोऽसौ समस्तबलसंयुतः। रणातिथ्यं ददामोऽस्मै सङ्ग्रामोत्कण्ठिता वयम् ॥४७॥
इत्युक्त्वा स विसृष्टस्तै रूक्षवाग्वज्रताडितः। गत्वा स्वस्वामिने [1]पूर्वं निवेद्य कृतितां गतः ॥४८॥
विमलामलशार्दूलाः समुद्रविजयं ततः। मन्त्रिणो मन्त्रनिपुणाः संमन्त्र्येति व्यजिज्ञपन् ॥४९॥
शान्तये साम लोकस्य [2]स्यात्स्वपक्षविपक्षयोः। मागधेन समं साम तस्माद्राजन् प्रयुञ्ज्महे ॥५०॥
ज्ञातिवर्गः समस्तोऽयं कुमारनिकरादिकः। अपायबहुले युद्धे संशयः कुशलं प्रति ॥५१॥
सन्ति योधा यथाऽस्माकममोघशरवर्षिणः। साधनो मागधस्यापि तथैव भुवि विश्रुतः ॥५२॥
तदेकस्यापि हि ज्ञातेरपायो रणमूर्धनि। यथा शत्रोस्तथास्माकमतिदुःखकरो भवेत् ॥५३॥
अतो विश्वजनीनार्थं साम तावत्प्रशस्यते। तदर्थं प्रेष्यतां दूतो [3]मागधान्तिकमस्मयात् ॥५४॥

मन स्थिर कर सुनें ॥४१॥ उनका कहना है कि आप ही लोग स्पष्ट बताओ कि मैंने आपका क्या अनिष्ट किया है ? जिससे कि भयभीत हो आप लोग समुद्रके मध्यमें जा बसे हो ॥४२॥ यद्यपि अपराधी होनेके कारण भयभीत हो तुम लोगोंने दुर्गका आश्रय लिया है तथापि मुझसे तुम्हें भय नहीं है तुम लोग आकर मुझे नमस्कार करो ॥ ४३ ॥ यदि दुर्गका बल पा तुम लोग बिना नमस्कार किये यहाँ रहोगे तो यह मैं समुद्रको पीकर सेनाओंके द्वारा तुम्हारी अभी हाल दुर्दशा कर दूँगा ॥४४॥ जबतक तुम्हारे यहाँ रहनेका पता नहीं था तभी तक तुम्हें काल और देशका बल, बल था पर आज पता चल जानेपर काल और देशका बल कैसे रह सकता है ? ॥४५॥

दूतके उक्त वचन सुनकर कृष्ण आदि समस्त राजा कुपित हो उठे और भौंहोंसे मुखको कुटिल करते हुए कहने लगे कि जिसकी मृत्यु निकट आ पहुँची है ऐसा तुम्हारा राजा समस्त सेनाओंके साथ आ रहा है सो युद्धके द्वारा हम उसका सत्कार करेंगे। हम लोग संग्रामके लिए उत्कण्ठित हैं ॥४६-४७॥ इस प्रकार कहकर यादवोंने दूतको विदा किया। वह उनके रूक्ष वचनरूपी वज्रसे ताडित होता हुआ द्वारिकासे चलकर अपने स्वामीके पास गया और सब समाचार कहकर कृतकृत्यताको प्राप्त हुआ ॥४८॥ तदनन्तर दूतके चले जानेपर मन्त्र करनेमें निपुण विमल, अमल और शार्दूल नामक मन्त्रियोंने सलाहकर राजा समुद्रविजयसे इस प्रकार निवेदन किया ॥४९॥

हे राजन् ! क्योंकि साम, स्वपक्ष और परपक्षके लोगोंको शान्तिका कारण होगा इसलिए हम लोग जरासन्धके साथ सामका ही प्रयोग करें। यह जो कुमारोंका समूह आदि है वह सब स्वजनोंका समूह है। अपायबहुल युद्धमें इन सबकी कुशलताके प्रति सन्देह है ॥५०-५१॥ जिस प्रकार हमारी सेनामें अमोघ बाणोंकी वर्षा करनेवाले योद्धा हैं उसी प्रकार जरासन्धकी सेना भी पृथिवीमें प्रसिद्ध है ॥ ५२ ॥ युद्धके अग्रभागमें यदि एक भी स्वजन की मृत्यु हो जायेगी तो वह जिस प्रकार शत्रुके लिए दुःखका कारण होगी उसी प्रकार हमारे लिए भी दुःखका कारण हो सकती है ॥ ५३ ॥ इसलिए सबकी भलाईके लिए साम ही प्रशंसनीय उपाय है। अतः अहङ्कारको छोड़कर साम-शान्तिके लिए जरासन्धके पास दूत भेजा

१. पूर्वां म० । २. दण्डस्य म० । ३. माधवान्तिक-म० ।

मागधः शाम्यमानोऽपि साम्ना यदि न शाम्यति । तदा तदुचितं कुर्मः को दोषः सामयोजने ॥५५॥
इति मन्त्रिभिरासन्न्य राजा विज्ञापितस्तदा । को दोष इति संमन्त्र्य लोहजङ्घमजीगमत् ॥५६॥
स दक्षः शौर्यसंपन्नः कुमारो नीतिलोचनः । जगाम निजसैन्येन जरासन्धेन सन्धये ॥५७॥
पूर्वमालवमासाद्य कृतसैन्यनिवेशनः । प्राप्तौ कान्तारभिक्षार्थं कान्तारे सार्थयोगिनौ ॥५८॥
मासोपवासिनौ दृष्ट्वा तिलकानन्दनन्दकौ । प्रतिगृह्यान्नपानाद्यैः पञ्चाश्चर्याणि लब्धवान् ॥५९॥
तीर्थं देवावताराख्यं ततः प्रभृति भूतले । भूतं भूतसहस्राणां पापोपशमकारणम् ॥६०॥
दूतो गत्वा जरासन्धं सन्धानं प्रत्यसम्मुखम् । प्रत्यबोधयदेकान्ते प्रतिबोधनपण्डितः ॥६१॥
लोहजङ्घवचोऽत्यन्तप्रसन्नः प्रतिपन्नवान् । स सन्धानं जरासन्धः षण्मासावधिकं ततः ॥६२॥
दूतः पूजां नृपात्प्राप्य स प्राप्य द्वारिकां ततः । समुद्रविजयाद्यर्थं निवेद्य स्थितवान् कृती ॥६३॥
साम्येनैव ततो वर्षे सामग्रीप्रत्यपेक्षया । पूर्णे [1]पूर्णमहासन्धो महासामन्तसन्ततिः[2] ॥६४॥
जरासन्धोऽत्र संप्राप्तः सैन्यसागररुद्धदिक् । कुरुक्षेत्रं महाक्षत्रप्रधानप्रधनोचितम् ॥६५॥
पूर्वमभ्येत्य तत्रैव केशवोऽपरसागरः । तस्थावापूर्यमाणः सन् वाहिनीनिवहैर्निजैः ॥६६॥
तत्रापाच्या नृपाः केचिदुदीच्याश्चापरान्तिकाः । संबन्धिनः सृता विष्णुं सकलैः स्वबलैर्युताः ॥६७॥

जाये ॥ ५४ ॥ हाँ, सामके द्वारा शान्त करनेपर भी यदि जरासन्ध शान्त नहीं होता है तो हम लोग फिर उसके अनुरूप कार्य करेंगे। इस प्रकार साम उपायके अवलम्बन करनेमें क्या दोष है ? ॥ ५५ ॥

१. सोऽयोग म० । २. गतिभ्रमैः म० । ३. 'पूर्वप्रयोगादसङ्गत्वाद्बन्धच्छेदात्तथागतिपरिणामाच्च' । त० सू० । 'आविद्धकुलालचक्रवद्व्यपगतलेपालाबुवदेरण्डबीजवदग्निशिखावच्च' ॥ त० सू० । ४. सद्ध्यातात् म० । ५. -रसंयतान् म० । ६. समारभ्य प्रवर्तन्ते क० । ७. क्वचिदेकत्र म० ।

मोहस्य प्रकृतीः सप्त क्षपयित्वा विशुद्धधीः । सम्यग्दर्शनमर्काभं क्षायिकं प्रतिपद्यते ॥८७॥
आरोढा क्षपकश्रेणीमप्रमत्तः प्रकृत्य सः । अथाप्रवृत्तकरणमपूर्वकरणत्वकृत् ॥८८॥
अपूर्वकरणो भूत्वा स पापप्रकृतिस्थितिम् । तनूकृत्यानुभागं चानिवृत्तिकरणाश्रितः ॥८९॥
अनिवृत्तिगुणस्थाने क्षपकव्यपदेशभाक् । शुक्लध्यानानलाक्रान्तकर्मप्रकृतिकक्षकः ॥९०॥
सन्निद्रानिद्राप्रचला-प्रचलास्त्यानगृद्धिभिः । दुर्गती सानुपूर्वीके पूर्वां जातिचतुष्टयीम् ॥९१॥
सस्थावरातपोद्योतसूक्ष्मसाधारणाभिधाः । सहैव क्षपयत्येताः षोडश प्रकृतीः कृती ॥९२॥
[1]अत्रैवातः परं स्थानं कषायाष्टकमस्यति । ततो नपुंसकं वेदं स्त्रीवेदं च ततः परम् ॥९३॥
[2]पुंवेदे नोकषायाणां षट्कं प्रक्षिप्य वै सह । निरस्याक्षिप्य पुंवेदं क्रोधसंज्वलनानने ॥९४॥
मानसंज्वलने तं च मायासंज्वलने त्वमुम् । लोभसंज्वलने त्वेनं निक्षिप्य दहति क्रमात् ॥९५॥
लोभसंज्वलनं सूक्ष्मं कृत्वा सूक्ष्मकषायगः । लोभसंज्वलनस्यान्तमन्ते कृत्वा विमोहकम् ॥९६॥
भूत्वा क्षीणकषायस्योपान्तिमे समयेऽस्यति । निद्रां च प्रचलामन्त्ये ज्ञानावृत्यन्तराययोः ॥९७॥
प्रत्येकं प्रकृतीः पञ्च चतस्रो दर्शनावृतेः । दग्ध्वैकत्ववितर्काग्नेः[3] सयोगः केवली भवेत् ॥९८॥
सद्वेद्यं चाप्यसद्वेद्यं नामदेवगतिश्रुतिः । औदारिकशरीरादिनाम्ना पञ्चतयं तथा ॥९९॥
सङ्घातपञ्चकं चापि पुनर्बन्धकपञ्चकम् । वैक्रियौदारिकाहारकायाङ्गोपाङ्गकत्रिकम् ॥१००॥
संस्थाननामषट्कं च षट्संहनननाम च । वर्णपञ्चकनामापि रसपञ्चकनाम च ॥१०१॥

अप्रमत्त संयत नामक सातवें गुणस्थान तक किसी गुणस्थानमें कर्मभूमिका मनुष्य मोहनीय कर्मकी सात प्रकृतियोंका क्षय कर विशुद्ध बुद्धिका धारक होता हुआ सूर्यके समान क्षायिक सम्यग्दर्शनको प्राप्त होता है ॥८६-८७॥ तदनन्तर सातिशय अप्रमत्तगुणस्थानवर्ती मनुष्य क्षपक श्रेणीमें चढ़कर अथाप्रवृत्तकरण (अधःप्रवृत्तकरण) को करके उसके बाद अपूर्व करणको करता है ॥८८॥ फिर अपूर्वकरण गुणस्थानवर्ती होकर पापप्रकृतियोंकी स्थिति तथा अनुभागको क्षीण करता हुआ अनिवृत्तिकरणको प्राप्त होता है ॥८९॥ तदनन्तर अनिवृत्तिकरण नामक नवम गुणस्थानमें क्षपक संज्ञाको प्राप्त होता हुआ कर्मप्रकृतिरूप वनको शुक्लध्यानरूपी अग्निसे आक्रान्त करता है ॥९०॥ फिर सत्तामें स्थित निद्रानिद्रा, प्रचलाप्रचला, स्त्यानगृद्धि, नरकगति, नरकगत्यानुपूर्वी, तिर्यञ्चगति, तिर्यञ्चगत्यानुपूर्वी, एकेन्द्रियादि चार जातियाँ, स्थावर, आतप, उद्योत, सूक्ष्म और साधारण इन सोलह प्रकृतियोंका एक साथ क्षय करता है ॥९१-९२॥ इसी गुणस्थानमें सोलह प्रकृतियोंके क्षयके बाद अप्रत्याख्यानावरण और प्रत्याख्यानावरण नामक आठ कषायोंको नष्ट करता है। फिर नपुंसकवेद और स्त्रीवेदको नष्ट कर हास्यादि छह नोकषायोंको पुंवेदमें डालकर एक साथ नष्ट करता है। फिर पुंवेदको संज्वलन क्रोधरूपी अग्निमें, संज्वलन क्रोधको संज्वलन मानमें संज्वलन मानको संज्वलन मायामें और संज्वलन मायाको संज्वलन लोभमें डालकर क्रमसे दग्ध करता है ॥९३-९५॥ फिर संज्वलन लोभको और भी सूक्ष्म कर सूक्ष्मसाम्पराय नामक दशम गुणस्थानमें पहुँचता है। इसके अन्तमें संज्वलन लोभका अन्त कर मोहकर्मका बिलकुल अभाव कर चुकता है ॥ ९६ ॥ फिर क्षीणकषायगुणस्थानवर्ती होकर एकत्ववितर्क नामक शुक्लध्यानरूपी अग्निसे इसके उपान्त्य समयमें निद्रा और प्रचलाको तथा अन्त समयमें ज्ञानावरण और अन्तरायकी पाँच-पाँच और दर्शनावरणकी चार प्रकृतियोंको जलाकर सयोग-केवली होता है ॥९७-९८॥ तदनन्तर सयोगकेवली गुणस्थानको उल्लङ्घकर जब आगामी गुण-स्थानको प्राप्त होता है तब अयोगकेवली होकर अर्हन्त अवस्थाके उपान्त्य समयमें साता वेदनीय और असाता वेदनीयमें-से कोई एक, देवगति, औदारिक शरीरको आदि लेकर पाँच शरीर,

१. अत्रैवान्तः परं म० । २. पुंवेद क० । ३. वितर्काग्निः म० ।

अष्टधा स्पर्शनामापि गन्धनाम पुनर्द्विधा । तत्प्रायोग्यानुपूर्वी च नामदेवगतेः पुनः ॥१०२॥
नामागुरुलघूच्छ्‌वासपरघातोपघातकम् । प्रशस्ताशस्तभेदस्थं विहायोगति नाम च ॥१०३॥
प्रत्येककायापर्याप्तस्थिरास्थिरशुभाशुभम् । तथा दुर्भगनामापि पुनः सुस्वरदुस्वरम् ॥१०४॥
अनादेयायशःकीर्तिनाम निर्माणनाम च । प्रकृतीर्द्वासप्ततिं नीचैर्गोत्रेण सुपिण्डिताः ॥१०५॥
सयोगकेवलिस्थानमतीत्य पदमास्थितः । अयोगकेवली हन्ति स्वोपान्त्यसमयेऽर्हतः ॥१०६॥
वेद्यमेकं मनुष्यायुर्मनुष्यगतिरेव च । तत्प्रायोग्यानुपूर्वी च जातिः पञ्चेन्द्रियाभिधा ॥१०७॥
त्रसबादरपर्याप्तसुभगादेयसंज्ञिका । उच्चैर्गोत्रं यशःकीर्तिस्तत्तीर्थङ्करनाम च ॥१०८॥
एतास्त्रयोदश ख्याताः प्रकृतीः प्रकृतिस्थिरः । अयोगकेवली हन्ति चरमे समये ततः[1] ॥१०९॥
सहस्वोच्चारणावृत्तीः पञ्च स्थित्वा स्वकालतः । सिद्धिः सादिरनन्ता स्यादनन्तगुणसन्निधिः ॥११०॥
धर्म्यध्यानप्रकारं स ध्यायन्नेमिर्यथोचितम् । षट्पञ्चाशदहोरात्रकालं सुतपसानयत् ॥१११॥

पाँच संघात, पाँच बन्धन, औदारिक, वैक्रियिक और आहारक ये तीन अङ्गोपाङ्ग, छह संस्थान, छह संहनन, पाँच वर्ण, पाँच रस, आठ स्पर्श, दो गन्ध, देवगत्यानुपूर्वी, अगुरुलघु, उच्छ्‌वास, परघात, उपघात, प्रशस्त और अप्रशस्तके भेदसे दो प्रकारकी विहायोगति, प्रत्येक शरीर, अपर्याप्त, स्थिर, अस्थिर, शुभ, अशुभ, दुर्भग, सुस्वर, दुःस्वर, अनादेय, अयशःकीर्ति, निर्माण और नीच गोत्र इन बहत्तर प्रकृतियोंको नष्ट करता है ॥९९–१०६॥ फिर अन्त समयमें साता-वेदनीय असातावेदनीयमें-से एक, मनुष्य आयु, मनुष्यगति, मनुष्यगत्यानुपूर्वी, पञ्चेन्द्रिय जाति, त्रस, बादर, पर्याप्त, सुभग, आदेय, उच्चगोत्र, यशस्कीर्ति और तीर्थङ्कर इन तेरह प्रकृतियों-को नष्ट करता है। अयोगकेवली गुणस्थानमें यह जीव प्रदेशपरिस्पन्दका अभाव हो जानेके कारण स्वभावसे स्थिर रहता है ॥१०७–१०९॥ अ इ उ ऋ लृ इन पाँच लघु अक्षरोंके उच्चारणमें जितना काल लगता है उतने काल तक चौदहवें गुणस्थानमें रहकर यह जीव सिद्ध हो जाता है। जीवकी यह सिद्धि सादि तथा अनन्त है और अनन्त गुणोंके सन्निधानसे युक्त है ॥११०॥

भगवान् नेमिनाथने धर्म्यध्यानके पूर्वोक्त दस भेदोंका यथायोग्य ध्यान करते हुए,

---

१. कर्माभावो द्विविधः—यत्नसाध्योऽयत्नसाध्यश्चेति । तत्र चरमदेहस्य नारकतिर्यग्देवायुषामभावो न यत्नसाध्यः असत्त्वात् । यत्नसाध्य इत ऊर्ध्वमुच्यते—असंयतसम्यग्दृष्ट्यादिषु चतुर्षु गुणस्थानेषु कस्मिंश्चित्सप्त-प्रकृतिप्रक्षयः क्रियते । निद्रानिद्राप्रचलाप्रचलास्त्यानगृद्धिनरकगतितिर्यग्गत्येकद्वित्रिचतुरिन्द्रियजातिनरकगतितिर्य-ग्गतिप्रायोग्यानुपूर्व्यातपोद्योतस्थावरसूक्ष्मसाधारणसंज्ञिकानां षोडशानां कर्मप्रकृतीनामनिवृत्तिबादरसाम्परायस्थाने युगपत्क्षयः क्रियते। नपुंसकवेदः स्त्रीवेदश्च तत्रैव क्षयमुपयाति । नोकषायषट्कं च सहैकेनैव प्रहारेण विनि-पातयति । ततः पुंवेदसंज्वलनक्रोधमानमायाः क्रमेण तत्रैवात्यन्तिकं ध्वंसमास्कन्दन्ति । लोभसंज्वलनः सूक्ष्मसाम्प-रायान्ते यात्यन्तम् । निद्राप्रचले क्षीणकषायवीतरागच्छद्मस्थस्योपान्त्यसमये प्रलयमुपव्रजतः । पञ्चानां ज्ञाना-वरणानां चतुर्णां दर्शनावरणानां पञ्चानामन्तरायाणां च तस्यैवान्त्यसमये प्रक्षयो भवति । अन्यतरवेदनीयदेव-गत्यौदारिकवैक्रियिकाहारकतैजसकार्मणशरीरसंस्थानषट्कौदारिकवैक्रियिकाहारकशरीराङ्गोपाङ्गषट्संहननपञ्चप्रश-स्तवर्णपञ्चाप्रशस्तवर्णगन्धद्वयपञ्चप्रशस्तरसपञ्चाप्रशस्तरसस्पर्शाष्टकदेवगतिप्रायोग्यानुपूर्व्यागुरुलघूपघातपरघातो-च्छ्वासप्रशस्ताप्रशस्तविहायोगत्यपर्याप्तकप्रत्येकशरीरस्थिरास्थिरशुभाशुभदुर्भगसुस्वरदुःस्वरानादेयायशःकीर्तिनिर्मा-णनाम नीचैर्गोत्राख्या द्वासप्ततिप्रकृतयोऽयोगकेवलिनमुपान्त्यसमये विनाशमुपयान्ति । अन्यतरवेदनीयमनुष्या-युर्मनुष्यगतिपञ्चेन्द्रियजातिमनुष्यगतिप्रायोग्यानुपूर्व्यत्रसबादरपर्याप्तकसुभगादेययशःकीर्तितीर्थङ्करनामोच्चैर्गोत्रसंज्ञि-कानां त्रयोदशानां प्रकृतीनामयोगकेवलिनश्चरमसमये विच्छेदो भवति ।

—सर्वार्थसिद्धि अ. १० सूत्र. २

पूर्वाह्णेऽश्वयुजस्यातः शुक्लप्रतिपदि प्रभुः । शुक्लध्यानाग्निना दग्ध्वा चतुर्घातिमहावनम् ॥११२॥
अनन्तकेवलज्ञानदर्शनादिचतुष्टयम् । त्रैलोक्येन्द्रासनाकम्पि सम्प्रापत्परदुर्लभम् ॥११३॥

स्रग्धरावृत्तम्

घण्टारावोरुसिंहस्फुटपटहरवोदारशङ्खस्वनैस्तां
जैनीं कैवल्यलब्धिं सकलसुरगणा द्राग्विदित्वा यथास्वम् ।
इन्द्राः सिंहासनोच्चैर्मुकुटविचलनैः स्वान् प्रयुज्याविधीन् स्वैः
प्राक्षानीकैः सहायुः क्षुभितसलिलधिव्रात[1]विद्भिस्त्रिलोक्याः ॥११४॥
आपूर्यावार्यवेगैर्गगनजलनिधिं वाहनानां समूहैः
सप्तानीकैर[2]नेकैस्त्रिदशपतिगणस्तं परीत्य प्रपेदे ।
प्रोच्चैर्मूर्धावलेपं गिरिपतिमधिपस्नानकल्याणमात्रं
भूयः कल्याणकण्ठे गुणभरणगुणादूर्जयन्तं जयन्तम् ॥११५॥
मन्दारादिद्रुमाणां सुरभितककुभां पुष्पवृष्ट्या सुराणां
दिव्यस्त्रीगीतमूर्छन्मुखरितभुवनैर्दुन्दुभीनां निनादैः ।
भेत्रा लोकस्य शोकं फलकुसुमभृताशोकशाखाभृता च
श्वेतच्छत्रत्रयेण त्रिभुवनविभुताचिह्नभूतोरुभूम्ना ॥११६॥
हंसालीपातलीलैर्धवलितखचलैश्चामराणां सहस्रैः
भाभिर्भामण्डलेन प्रतिहतविकसद्भानुभामण्डलेन ।

छद्मस्थ अवस्थाके छप्पन दिन समीचीन तपश्चरणके द्वारा व्यतीत किये ॥१११॥ तदनन्तर आश्विन शुक्ल प्रतिपदाके दिन प्रातःकालके समय भगवान्‌ने शुक्लध्यानरूपी अग्निके द्वारा चार घातियारूपी महावनको जलाकर तीन लोकके इन्द्रोंके आसन कँपा देनेवाले एवं अन्य जनदुर्लभ, केवलज्ञान, केवलदर्शन आदि अनन्तचतुष्टय प्राप्त किये ॥११२-११३॥ घण्टाओंके शब्द, विशाल सिंहनाद, दुन्दुभियोंके स्पष्ट शब्द और शंखोंकी भारी आवाजसे समस्त देवोंने शीघ्र ही निश्चय कर लिया कि जिनेन्द्र भगवान्‌को केवलज्ञान प्राप्त हो गया है तथा इन्द्रोंने भी सिंहासन और उन्नत मुकुटोंके कम्पित होनेसे अपने-अपने अवधिज्ञानका प्रयोग कर उक्त बातका ज्ञान कर लिया। तदनन्तर तीनों लोकोंके इन्द्र, समुद्रोंके समूहको क्षुभित करनेवाली अपनी-अपनी सेनाओंके साथ गिरनार पर्वतकी ओर चल पड़े ॥११४॥

उस समय इन्द्रोंने अवार्य वेगसे युक्त वाहनोंके समूह और सात प्रकारकी अनेक सेनाओंसे आकाशरूपी समुद्रको व्याप्त कर दिया और आकर गिरनार पर्वतकी तीन प्रदक्षिणाएँ दीं। उस समय वह पर्वत, ऊँचे शिखरका अभिमान धारण करनेवाले गिरिराज—सुमेरु पर्वतको भी जीत रहा था क्योंकि सुमेरु पर्वत पर तो भगवान्‌का मात्र जन्मकल्याणक सम्बन्धी अभिषेक हुआ था और गिरनार पर्वतपर दीक्षाकल्याणकके बाद पुनः ज्ञानकल्याणक होनेसे अनेक गुण प्रकट हुए थे ॥११५॥ देवलोग, दिशाओंको सुगन्धित करनेवाले मन्दार आदि वृक्षोंके फूलोंकी वर्षा करने लगे। देवाङ्गनाओंके सुन्दर संगीतसे मिश्रित दुन्दुभियोंके शब्द संसारको मुखरित करने लगे। लोगोंके शोकको नष्ट करनेवाला फल और फूलोंसे युक्त अशोक वृक्ष प्रकट हो गया। तीन लोककी विभुताके चिह्नस्वरूप श्वेत छत्रत्रय सिरपर फिरने लगे। हंसावलीके पातके समान सुशोभित एवं पर्वतकी भूमिको सफेद करनेवाले हजारों चमर ढुलने लगे। अपनी कान्तिसे देदीप्यमान सूर्यकी प्रभाके समूहको पराजित करनेवाला भामण्डल प्रकट हो गया। नाना रत्नसमूहकी किरणोंसे इन्द्रधनुषको

१. -वद्भिः म० । २. -रनीकैः म० ।

नानारत्नौघरोचिर्जनितसुरधनुर्हैमसिंहासनेन
भाषाभेदस्फुरन्त्या स्फुरणविरहितस्वाधरोद्भाषया च ॥११७॥
अष्टाभिः प्रातिहार्यैरतिशमितपरैः स्वैर्विशेषैरशेषैः
कर्माशयस्वभावत्रिदिवपतिभवैस्तैश्चतुस्त्रिंशता च ।
त्रैलोक्योद्धारणाय प्रकृतिधृत[1]धृतिर्नेमिनाथो जगत्यां
द्वाविंशो [2]हारिवंशो गुणगणदिनकृत्[3]तीर्थकृत्प्रादुरासीत् ॥११८॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्नेमिनाथ-केवलज्ञानवर्णनो नाम षट्पञ्चाशः सर्गः ॥५६॥

उत्पन्न करनेवाला स्वर्ण-सिंहासन आविर्भूत हो गया और नाना भाषाओंके भेदसे युक्त एवं ओठोंके स्फुरणसे रहित दिव्यध्वनि खिरने लगी। इस प्रकार पूर्वोक्त आठ प्रातिहार्यों, दूसरोंको अत्यन्त शान्त करनेवाली अपनी समस्त विशेषताओं और केवलज्ञान-सम्बन्धी, जन्म-सम्बन्धी तथा देवकृत चौंतीस अतिशयोंसे विभूषित, तीन लोकके उद्धारके लिए स्वाभाविक धैर्यके धारक और अनेक गुणोंके समूहको प्रकट करनेके लिए सूर्यके समान, हरिवंशके शिरोमणि बाईसवें तीर्थंकर नेमिनाथ भगवान् पृथिवीपर प्रकट हुए ॥११६-११८॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें भगवान् नेमिनाथके केवलज्ञानकी उत्पत्तिका वर्णन करनेवाला छप्पनवाँ सर्ग समाप्त हुआ ॥५६॥

---

१. प्रकृत—म० । २. हरिवंशे भवो हारिवंशः । ३. गुणगुणवृहतात् म०, घ० । जिनगुणगुणभृत्त –क० ।

सप्तपञ्चाशः सर्गः

समवादि समापादि शरणं शरणं क्षणात् । त्रिजगत्प्राणिनां देवैः पाकशासनशासनात् ॥१॥
सर्वो द्वारवतीलोको यदुभोजकुलाम्बुधिः । आरुरोह गिरिं भूत्या रामकेशवपूर्वकः ॥२॥
अवलोक्य जिनेन्द्रस्य शरणं समवादिकम् । बहिरन्तःपरं प्रापद्विस्मयं जनसागरः ॥३॥
यादृशी समवस्थानभूमिस्तीर्थकृतामिह । तादृशी श्रोतृलोकस्य समासेन निगद्यते ॥४॥
भूमेः स्वभावभूताया दिव्यारत्निप्रमोच्छ्रितिः । भूमिस्तावत्समुच्छ्राया कल्पभूमिरुपर्यतः ॥५॥
स्वर्गश्रियं श्रिया जेत्री चतुरस्रा सुखप्रदा । सैकान्तद्वादशाद्यात्मयोजना कालदेशतः ॥६॥
उच्चैर्गन्धकुटीदेशकर्णिका पद्ममूर्तिवत्[1] । भाति भूमिरसौ बाह्य[2]भूश्रीपत्रपरम्परा ॥७॥
इन्द्रनीलमयी भूमिर्बाह्यादर्शतलोपमा । भूयसामपि भूयस्त्वं विशतां विदधाति या ॥८॥
दूरादिन्द्रादयो यस्यां मानयन्ति नमस्यया । मानार्हास्त्रिजगन्नाथं साभूर्मानाङ्गणाभिधा ॥९॥
महादिक्षु चतस्रोऽस्या गव्यूतिद्वयविस्तृताः । वीथ्यस्तन्मध्यगानीयुर्मानपीठान्पुरः[3]प्रभान् ॥१०॥
स्वोत्सेधत्रिगुणात्मीयविस्तराण्युक्तिविस्तरैः । सौवर्णरत्नमूर्तीनि मान्यन्ते नृसुरासुरैः ॥११॥
नृसुरामानवस्तम्भानास्थायार्चन्ति यत्र भूः । सा त्वास्थानाङ्गणाभिख्या ज्वलल्लोहितरत्नभा ॥१२॥
मध्ये[4] वीथि चतस्रोऽत्र त्रिभङ्गा हैमपीठिकाः । भान्त्युरोद्वयसोच्छ्रायाः वृत्ताः क्रोशार्धविस्तृताः ॥१३॥

अथानन्तर देवोंने इन्द्रकी आज्ञासे क्षण-भरमें तीन जगत्के जीवोंके लिए शरणभूत समवशरणकी रचना कर दी ॥१॥ बलदेव और कृष्णको आदि ले यादव और भोजवंशके सागर स्वरूप समस्त द्वारिका निवासी बड़े वैभवके साथ गिरिनार पर्वत पर चढ़े और भीतर-बाहर जिनेन्द्र भगवान्का समवशरण देखकर वह जनताका अपार सागर परम आश्चर्यको प्राप्त हुआ ॥२-३॥ तीर्थंकरोंकी समवसरण भूमि जैसी होती है उसका यहाँ संक्षेपसे श्रोताओंके लिए वर्णन किया जाता है ॥४॥

समवसरणकी दिव्य भूमि स्वाभाविक भूमिसे एक हाथ ऊँची रहती है और उससे एक हाथ ऊपर कल्पभूमि होती है ॥५॥ यह भूमि अपनी शोभासे स्वर्गलक्ष्मीको जीतनेवाली, चौकोर, सुखदायी और देशकालके अनुसार बारह योजनसे लेकर एक योजन तक विस्तारवाली होती है। भावार्थ—समवसरण भूमिका उत्कृष्ट विस्तार बारह योजन और कमसे-कम विस्तार एक योजन प्रमाण होता है ॥६॥ यह भूमि कमलके आकार होती है इसमें गन्धकुटी तो कर्णिकाके समान ऊँची उठी होती है और बाह्य भूमि कमलदलके समान विस्तृत होती है ॥७॥ यह इन्द्रनीलमणिसे निर्मित होती है, इसका बाह्य भाग दर्पणतलके समान निर्मल होता है और प्रवेश करनेवाले बहुतसे जीवोंको एक साथ स्थान देनेवाली रहती है ॥८॥ जिसमें मानके योग्य इन्द्र आदि देव त्रिलोकीनाथ—भगवान्की दूरसे ही पूजा करते हैं वह मानाङ्गण नामकी भूमि है ॥९॥ इस भूमिकी चारों महादिशाओंमें दो-दो कोश विस्तृत चार महावीथियाँ हैं। ये वीथियाँ अपने मध्यमें स्थित चार मानस्तम्भोंके पीठ धारण करती हैं ॥१०॥ ये पीठ अपनी ऊँचाईसे तिगुने चौड़े एवं सुवर्ण और रत्नमयी मूर्तियोंके धारक होते हैं तथा मनुष्य, सुर, असुर सभी आकर इन्हें नमस्कार करते हैं ॥११॥ जहाँ स्थित होकर मनुष्य और देव, मानस्तम्भोंकी पूजा करते हैं वह आस्थानाङ्गणा नामकी भूमि है। यह भूमि देदीप्यमान लाल मणियोंकी कान्तिको धारण करती है ॥१२॥ वीथियोंके मध्यमें तीन कटनीदार चार सुवर्णमयी पीठिकाएँ हैं जो छाती बराबर

१. पद्मरूपवत् क० । २. बाह्यभू म०, बाह्याभू क० । ३. पुरः प्रभाः क०, ख०, ग०, म० । ४. मध्ये वापि म० ।

चापोनपीठिकाव्यासा योजना[1]भ्यधिकोच्छ्रयाः । शुंभिता मानवस्तंभाश्चत्वारः पीठिकास्वधि ॥१४॥
द्विषड्योजनदृश्यास्ते पालिकास्याम्बुजस्थिताः । वज्रस्फटिकवैडूर्यमूलमध्याग्रविग्रहाः ॥१५॥
द्विसहस्राश्रयो नानारत्नरश्मिविमिश्रिताः । चतुर्दिक्षूर्ध्वसिद्धार्चाः रत्नै[2]भूतोरुपालिकाः ॥१६॥
पालिकामुखपद्मस्थतपनीयस्फुरद्घटाः । घटास्याबद्धफलकाः श्रीभामाभिषवश्रियः ॥१७॥
श्रीचूलारत्नभाचक्रभास्यविंशतियोजनाः । साभिमानमनोदेवमानवस्तंभना बभुः ॥१८॥
ततः सरांसि चत्वारि[3] शुम्भदम्भोजभांज्यलम्[4] । हंससारसचक्राह्वारावरम्यककुप्स्वलम्[5] ॥१९॥
अतो वज्रमयो वप्रो वक्षोदघ्नो घनद्युतिः । द्विगुणीभूतविस्तारः परीयाय समन्ततः ॥२०॥
परीत्य परिखातोऽस्थाज्जलप्रभमणिक्षितः । जानुदघ्नाम्बुगम्भीरा कृष्णसाटीव भूस्त्रियाः ॥२१॥
हेमाम्भोजरजःपुञ्जपिञ्जरी भाविताम्भसि । स्व[6]च्छायां दिङ्मुखान्यस्यां साङ्गरागाणि चात्यभान् ॥२२॥
वल्लीवनमतोऽप्यन्तः परीत्य स्थितमित्यभात् । कुसु[7]मामोदिता शान्तं शकुन्तालिकुलाकुलम् ॥२३॥
प्राकारोऽन्तः परीयाय कनत्कनकभास्वरः । विजयादिबृहद्रौप्यचतुर्गोपुरमण्डितः ॥२४॥
तत्र दौवारिका भौमाः कटकादिविभूषणाः । प्रभावोत्सारितायोग्या मुद्गरोद्धतपाणयः ॥२५॥

ऊँची हैं गोल हैं और आधा कोश चौड़ी हैं ॥१३॥ उन पीठिकाओं पर चार मानस्तम्भ सुशोभित हैं जो पीठिकाओंकी चौड़ाईसे एक धनुष कम चौड़े हैं और एक योजनसे कुछ अधिक ऊँचे हैं ॥१४॥ वे मानस्तम्भ बारह योजनकी दूरीसे दिखायी देते हैं। पालिकाके अग्रभागपर जो कमल हैं उन्हीं पर स्थित हैं, उनका मूलभाग हीराका, मध्यभाग स्फटिकका और अग्रभाग वैडूर्यमणिका बना हुआ है ॥१५॥ हर एक मानस्तम्भ दो-दो हजार कोणोंसे सहित हैं—दो-दो हजार पहलके हैं, नाना रत्नोंकी किरणोंसे मिले हुए हैं, उनकी चारों दिशाओंमें ऊपर सिद्धोंकी प्रतिमाएँ विराजमान हैं तथा उनकी रत्नमयी बड़ी-बड़ी पालिकाएँ हैं ॥१६॥ पालिकाओंके अग्रभाग पर जो कमल हैं उन पर सुवर्णके देदीप्यमान घट हैं, उन घटोंके अग्रभागसे लगी हुई सीढ़ियाँ हैं, तथा उन सीढ़ियों पर लक्ष्मीदेवीके अभिषेककी शोभा दिखलायी गयी है ॥१७॥ वे मानस्तम्भ लक्ष्मीदेवीके चूड़ारत्नके समान अपनी कान्तिके समूहसे बीस योजन तकका क्षेत्र प्रकाशमान करते रहते हैं तथा जिनका मन अहंकारसे युक्त है ऐसे देव और मनुष्योंको वहीं रोक देनेवाले हैं ॥१८॥ उन मानस्तम्भोंकी चारों दिशाएँ हंस, सारस और चकवोंके शब्दोंसे अत्यन्त सुन्दर हैं तथा उनमें खिले हुए कमलोंसे युक्त चार सरोवर हैं ॥१९॥

सरोवरोंके आगे एक वज्रमय कोट है जो छाती बराबर ऊँचा है, अत्यन्त कान्तिसे युक्त है, ऊँचाईसे दूना चौड़ा है और चारों ओरसे घेरे हुए है ॥२०॥ इस कोटको चारों ओरसे घेरकर एक परिखा स्थित है जिसकी भूमि जलके समान कान्तिवाले मणियोंसे निर्मित है, उसमें घुटनों प्रमाण गहरा पानी भरा है तथा वह पृथिवीरूपी स्त्रीकी नीली साड़ीके समान जान पड़ती है ॥२१॥ वह परिखा अत्यन्त स्वच्छ है तथा उसका जल स्वर्णमय कमलोंकी परागके समूहसे पीला-पीला हो रहा है अतएव उसमें प्रतिबिम्बित दिशारूप स्त्रियोंके मुख अङ्गरागसे सहितके समान जान पड़ते हैं ॥२२॥ उसके आगे चारों ओरसे घेरकर स्थित लताओंका वन सुशोभित है जो फूलोंके द्वारा दिशाओंके अन्त भागको सुगन्धित कर रहा है तथा पक्षियों और भ्रमरोंके समूहसे व्याप्त है ॥२३॥ उसके आगे देदीप्यमान सुवर्णके समान चमकीला, एवं विजय आदि चाँदीके बड़े-बड़े चार गोपुरोंसे सुशोभित कोट, चारों ओरसे घेरे हुए है ॥२४॥ उन गोपुरोंपर व्यन्तर जातिके देव द्वारपाल हैं जो कटक आदि

१. योजनाभ्यधिको—म० । २. रत्नभूर्जोदपालिकाः ङ० । ऽरत्नभूतोनुपालिका : क० । ३. चत्वारः म० । ४. ज्वलि । ५. ककुरचलं क०, ख० । ६. सुखायां क० । मुखयां घ० । ७. कुसुमामादिता सान्तं म० ।

मणितोरणपार्श्वेषु गोपुराणां स्फुरत्त्विषाम् । छत्रचामरभृङ्गारपूर्वाष्टशतकान्यमान् ॥२६॥
तद्गोपुरपुरो भान्ति प्रेक्षाशालास्त्रिभूमिकाः । द्विर्द्विर्वीथ्यंतयोर्नृत्यद्द्वात्रिंशत्सुरकन्यकाः ॥२७॥
भात्यशोकवनं प्राच्यां सप्तपर्णवनं त्वपाक् । प्रतीच्यां चम्पकवनमुदीच्यामाम्रसद्वनम् ॥२८॥
[1]ससिद्धप्रतिमोऽशोकः सप्तपर्णश्च चम्पकम् । तथैवाम्रतरुस्तेषां वनानामधिपाः क्रमात् ॥२९॥
त्रिकोणाः मण्डलाकाराश्चतुरस्राश्च वापिकाः । वनेषु रत्नत[2]व्यन्ताऽशुद्धस्फटिकभूमयः ॥३०॥
विश्वाः सतोरणाः लक्ष्यास्तीर्थ्यास्तूच्चैर्वरा[3]ण्डकैः । मण्डितागाहमानेष्वगाधा द्विक्रोशविस्तृताः ॥३१॥
नन्दा नन्दोत्तरानन्दानन्दवत्यभिनन्दिनी । नन्दघोषेत्यमूर्वाप्यः षडशोकवनस्थिताः ॥३२॥
विजयाभिजया जैत्री वैजयन्त्यपराजिताः । जयोत्तरेति षड्वाप्यः सप्तपर्णवनाश्रिताः ॥३३॥
कुमुदा नलिनी पद्मा पुष्करा विकचोत्पला । कमलेत्यपि षड्वाप्यश्चम्पकाख्यवने मताः ॥३४॥
प्रभासा भास्वती भासा सुप्रभा भानुमालिनी । स्वयम्प्रभेति षड्वाप्यः सहकारवनोदिताः ॥३५॥
उदयो विजयः प्रीतिः ख्यातिश्चेति क्रमोदितैः । फलैः पूर्वादयो वाप्यः पूज्यन्ते तत्फलार्थिभिः ॥३६॥
तद्वापीपुष्पसन्दोहं यथोक्तं प्राप्य भाक्तिकाः । आस्तूपं क्रमशोऽभ्यर्च्य विशन्ति क्रमकोविदाः ॥३७॥
अन्तरेणोदयं प्रीतिं चाभितस्त्रिभुवोऽध्वसु । भान्ति नाटकशालास्ता हाटकोज्ज्वलमूर्तयः ॥३८॥
अध्यर्धक्रोशविस्तारा द्वात्रिंशज्ज्योतिषां स्त्रियः । तद्भुवो रत्ननिर्माणाः स्वच्छस्फटिकभित्तयः ॥३९॥

आभूषणोंसे सुशोभित हैं, अपने प्रभावसे अयोग्य व्यक्तियोंको दूर हटाते रहते हैं तथा जिनके हाथ मुद्गरोंसे उद्धत होते हैं ॥२५॥ देदीप्यमान कान्तिसे युक्त उन गोपुरोंके मणिमय तोरणोंकी दोनों ओर छत्र चमर तथा भृंगार आदि अष्टमङ्गल द्रव्य एक-सौ आठ एक सौ आठ संख्यामें सदा सुशोभित रहते हैं ॥२६॥ उन गोपुरोंके आगे वीथियोंकी दोनों ओर तीन-तीन खण्डकी दो-दो नाट्यशालाएँ हैं जिनमें बत्तीस-बत्तीस देव-कन्याएँ नृत्य करती हैं ॥२७॥ तदनन्तर पूर्वदिशामें अशोक वन, दक्षिणमें सप्तपर्ण वन, पश्चिममें चम्पक वन और उत्तरमें आम्रवन सुशोभित है ॥२८॥ इन चारों वनोंमें अशोक वनका अशोक वृक्ष, सप्तपर्ण वनका सप्तपर्ण वृक्ष, चम्पक वनका चम्पक वृक्ष और आम्रवनका आम्रवृक्ष स्वामी है। ये स्वामी वृक्ष सिद्धकी प्रतिमाओंसे सहित हैं अर्थात् इनके नीचे सिद्धोंकी प्रतिमाएँ विराजमान रहती हैं ॥२९॥ उन वनोंमें तिकोनी, चौकोनी और गोलाकार अनेक वापिकाएँ हैं । उन वापिकाओंके तट रत्ननिर्मित हैं तथा उनकी भूमि शुद्ध स्फटिकसे निर्मित है । ये सभी वापिकाएँ तोरणोंसे युक्त हैं, दर्शनीय हैं, सीढ़ियोंसे युक्त हैं, ऊँचे-ऊँचे वरण्डोंसे सुशोभित हैं, प्रवेश करनेमें गहरी हैं और दो कोश चौड़ी हैं ॥३०-३१॥ नन्दा, नन्दोत्तरा, आनन्दा, नन्दवती, अभिनन्दिनी, और नन्दघोषा ये छह वापिकाएँ अशोक वनमें स्थित हैं ॥३२॥ विजया, अभिजया, जैत्री, वैजयन्ती, अपराजिता और जयोत्तरा ये छह वापिकाएँ सप्तपर्ण वनमें स्थित हैं ॥३३॥ कुमुदा, नलिनी, पद्मा, पुष्करा, विश्वोत्पला और कमला ये छह वापियाँ चम्पक वनमें मानी गयी हैं ॥३४॥ और प्रभासा, भास्वती, भासा, सुप्रभा, भानुमालिनी और स्वयंप्रभा ये छह वापियाँ आम्रवनमें कही गयी हैं ॥३५॥ पूर्व आदि दिशाओंकी वापिकाएँ क्रमसे उदय, विजय, प्रीति और ख्याति नामक फल देती हैं तथा इन फलोंके इच्छुक मनुष्य इन वापिकाओंकी पूजा करते हैं ॥३६॥ क्रमके जाननेवाले भक्तजन उन वापिकाओंसे यथोक्त फूलोंका समूह प्राप्त कर स्तूपोंतक क्रम-क्रमसे जिनेन्द्र प्रतिमाओंकी पूजा करते हुए आगे प्रवेश करते हैं ॥३७॥ उदय और प्रीतिरूप फलको देनेवाली वापिकाओंके बीचके मार्गके दोनों ओर तीन खण्डकी सुवर्णमय देदीप्यमान बत्तीस नाट्यशालाएँ हैं ॥३८॥ ये नाट्यशालाएँ डेढ़ कोश चौड़ी हैं,

१. ससिद्धप्रतिमाशोकः म० । २. रत्नतद्योना म० । ३. वाराण्डकैः ङ० । अण्डकैः हंसादिपक्षिभिः ङ० टि० ।

तासु भक्त्या प्रनृत्यन्ति द्वात्रिंशज्ज्योतिषां स्त्रियः । हावभावविलासाढ्या[1] रसपुष्टिसपुष्टयः ॥४०॥
सचतुर्गोपुरातोऽपि पर्येति वनवेदिका[2] । दिग्या वज्रमयी वीथीपार्श्वयोर्ध्वजपङ्क्तयः ॥४१॥
त्रिदण्डविस्तृताश्चित्राः पीठिकाः प्रतिभक्तिगाः । योजनार्धोच्छ्रितास्तासु वंशा रत्नात्मपूर्वकाः ॥४२॥
तदग्रपालिकानद्धफलकाधिष्ठिता ध्वजाः । महान्तो दश चित्राः सत्किङ्किणीचित्रपट्टकाः ॥४३॥
शिखिहंसगरुत्मत्स्रक्सिंहेभमकराम्बुजैः । वृषरूपेण चक्रेण समधिष्ठितमूर्त्तयः ॥४४॥
तेषामष्टशतं जातिर्द्वात्रिंशच्च चतुःशती । ध्वजसंख्या भवेदेषां सामान्येन समासतः ॥४५॥
सद्वात्रिंशत्सहस्राः स्युर्लक्षाः पञ्चाशदष्ट च । साधिका ध्वजसंख्येयं सैकदिक्का द्विसंगुणा ॥४६॥
षट्पञ्चाशत्सहस्राणि लक्षा षट्षष्टिरष्टसु । ध्वजकोट्यश्चतस्रः स्युश्चतुर्दिक्ष्वपि साधिकाः ॥४७॥
प्रीतिकल्याणमध्ये स्युरभितः पञ्चभूमिकाः । नृत्तशालाः[3] प्रनृत्यन्ति यत्र भावनयोषितः ॥४८॥
प्राकारोऽन्तः परीयाय द्वितीयो हेमनिर्मितः । पञ्चभूमिकरत्नश्रीचतुर्गोपुरभूषितः ॥४९॥
हटद्धाटकपीठस्थाः कम्बुकण्ठगुणोज्ज्वलाः । शातकुम्भमयाः कुम्भाः साम्भोजास्याः सहाम्भसः ॥५०॥
शोभन्ते तद्द्विपार्श्वेषु द्वौ द्वौ मङ्गलदर्शनाः । वेत्रदण्डधरा द्वास्थास्तद्द्वाःसु भवनाधिपाः ॥५१॥
पुरस्ताद्गोपुराणां च द्वे द्वे नाटकवेश्मनी । पुरस्तात्तु ततो हैमौ द्वौ द्वौ धूपघटौ स्फुटौ ॥५२॥
चतुर्दिक्सिद्धरूपाढ्यं द्विद्विः सिद्धार्थपादपम् । कल्पवृक्षवनं तत्र वीथ्यन्तेषु यथायथम् ॥५३॥

नाना प्रकारके वेलबूटोंसे सुशोभित हैं और उनकी भूमियाँ रत्नोंकी बनी हैं तथा उनकी दीवालें स्वच्छ स्फटिकसे निर्मित हैं ॥३९॥ उनमें ज्योतिषी देवोंकी बत्तीस-बत्तीस देवाङ्गनाएँ नृत्य करती हैं जो हाव, भाव और विलाससे युक्त तथा शृङ्गार आदि रसोंकी पुष्टिसे सुपुष्ट होती हैं ॥४०॥ उसके आगे चार गोपुरोंसे युक्त अत्यन्त सुन्दर वज्रमयी वनवेदी है जो पूर्वोक्त वनोंको चारों ओरसे घेरे हुए है। चार गोपुरोंके आगे चार वीथियाँ हैं और उनके दोनों पसवाड़ोंमें ध्वजाओंकी पंक्तियाँ फहराती रहती हैं ॥४१॥ प्रत्येक विभागमें उन ध्वजा-ओंकी पृथक्-पृथक् पीठिकाएँ हैं जो तीन धनुष चौड़ी हैं, चित्र-विचित्र हैं तथा उनपर आधा योजन ऊँचे रत्नमयी बाँस लगे हुए हैं ॥४२॥ उन बाँसोंके अग्रभागपर जो पटिया लगे हैं उनमें दश प्रकारकी रङ्ग-विरङ्गी, छोटी-छोटी घण्टियों और चित्रपट्टकोंसे युक्त बड़ी ध्वजाएँ फहराती रहती हैं ॥४३॥ वे दस प्रकारकी ध्वजाएँ क्रमसे मयूर, हंस, गरुड, माला, सिंह, हाथी, मकर, कमल, बैल और चक्रके चिह्नसे चिह्नित होती हैं ॥४४॥ एक दिशामें एक जातिकी ध्वजाएँ एक-सौ आठ होती हैं और चारों दिशाओंकी मिलकर एक जातिकी चार-सौ बत्तीस होती हैं। यह इनकी सामान्य रूपसे संक्षेपमें संख्या बतलायी है ॥४५॥ विशेष रीतिसे एक दिशामें एक करोड़ सोलह लाख चौंसठ हजार हैं और चारों दिशाओंमें चार करोड़ अड़सठ लाख छत्तीस हजार कुछ अधिक हैं ॥४६-४७॥

प्रीति और कल्याणरूप फल देनेवाली वापिकाओंके बीचके मार्गमें दोनों ओर पाँच खण्डकी नृत्यशालाएँ हैं जिनमें भवनवासी देवोंकी देवाङ्गनाएँ नृत्य करती हैं ॥४८॥ नृत्य-शालाओंके आगे पाँच-पाँच खण्डके रत्नमयी चार गोपुरोंसे विभूषित स्वर्णनिर्मित दूसरा कोट है ॥४९॥ गोपुरोंके दोनों पसवाड़ोंमें देदीप्यमान सुवर्णके पीठोंपर स्थित, शङ्खके समान सुन्दर कण्ठोंमें पड़ी मालाओंसे सुशोभित मुखोंपर कमल धारण करनेवाले एवं जलसे भरे स्वर्ण-निर्मित मङ्गलकलश दो-दोकी संख्यामें सुशोभित हैं। इस दूसरे कोटके द्वारोंपर भवन-वासी देवोंके इन्द्र द्वारपाल हैं जो बेंतकी छड़ी धारण किये हुए पहरा देते हैं ॥ ५०-५१ ॥ गोपुरोंके आगे दो-दो नाट्यशालाएँ हैं और उनके आगे स्वर्णनिर्मित दो-दो धूपघट रखे हुए हैं ॥ ५२ ॥ उससे आगे चारों दिशाओंमें सिद्धोंकी प्रतिमाओंसे युक्त, दो दो सिद्धार्थ

१. विलासाढ्या म० । २. वनदेविका म० । ३. नृत्तशालाः म० ।

सचतुर्गोपुरातोऽन्तर्वेदिका वनपातत:[1] । तोरणान्तरिताः सार्वाः स्तूपा नव नवाध्वसु ॥५४॥
पद्मरागमहास्तूपपर्यन्तेषु सभागृहाः । हेमरत्नमयाश्चि[2]त्रा मुनिदेवगणोचिताः ॥५५॥
नभःस्फटिकनिर्माणस्ततः सालस्तृतीयकः । चतुश्चित्र[3]महारत्नसप्तभूमिकगोपुरः ॥५६॥
विजयो विश्रुतं कीर्तिर्विमलोदयविश्वधुक् । वासवीर्यं वरं चेति पूर्वाख्या ख्यापिताष्टधा ॥५७॥
[4]वैजयन्तं शिवं ज्येष्ठं वरिष्ठानघधारणम् । याम्यमप्रतिघं चेति दक्षिणाख्याष्टधा मताः ॥५८॥
जयन्तामितसारं च सुधामाक्षोभ्यसुप्रभम् । वरुणं वरदं चेति पश्चिमाख्याष्टधा स्मृताः ॥५९॥
अपराजितमर्थाख्यमतुलार्थममोघकम् । उदयं चाक्षयं चोदकौबेरं पूर्णकामकम् ॥६०॥
सुरत्नासनमध्यस्था द्रष्टृणां भवदर्शिनः । तद्द्वारोभयपार्श्वेषु भान्ति मङ्गलदर्पणाः ॥६१॥
यैः प्रध्वस्तमहाध्वान्तप्रभावलयभास्वरैः । भास्वतो भासमुद्भूय भासन्ते गोपुराण्यलम् ॥६२॥
विजयादिपुरद्वाःसु द्वाःस्थास्तिष्ठन्ति कल्पजाः । यथायथं ज्वलद्भूषा जयकल्याणकारिणः ॥६३॥
शालास्त्रयोऽप्यमी त्वेकद्वित्रिक्रोशोच्छ्रयोन्मिताः । मूलमध्योपरिन्या[5]सैस्तदर्धार्धसुसम्मिताः ॥६४॥
स्वरत्नित्रयहीनोक्तप्रमाणजगतीतलाः । [6]हस्तोद्विद्वाक्ष[7]विस्तीर्णव्यासा[8]र्धकपिशीर्षकाः ॥६५॥
ततोऽप्यन्तर्वणं नानातरुवल्लीगृहाकुलम् । मञ्चप्रेङ्खागिरिप्रेक्षागृहकोटिविराजितम् ॥६६॥
वेदिकाबद्धवीथीषु कल्याणादिजयाजिरम् । कदल्यः कदलीकल्पाः प्रकाशन्तेऽन्तरस्थिताः ॥६७॥

वृक्षोंसे सहित कल्पवृक्षोंका वन वीथियोंके अन्तमें यथारीति स्थित है ॥ ५३ ॥ तदनन्तर चार गोपुरोंसे सहित, वनकी रक्षा करनेवाली अन्तर्वेदिका है और मार्गोंमें तोरणोंसे युक्त, सबका भला करनेवाले नौ-नौ स्तूप हैं ॥ ५४ ॥ वे स्तूप पद्मराग मणियोंसे निर्मित होते हैं तथा उनके समीप स्वर्ण और रत्नोंके बने, मुनियों और देवोंके योग्य नाना प्रकारके सभागृह रहते हैं ॥ ५५ ॥ सभागृहोंके आगे आकाशस्फटिक मणिसे बना, नाना प्रकारके महारत्नोंसे निर्मित सात खण्डवाले चार गोपुरोंसे सुशोभित तीसरा कोट है ॥ ५६ ॥ इस कोटके पूर्व द्वारके विजय, विश्रुत, कीर्ति विमल, उदय, विश्वधुक्, वासवीर्य और वर ये आठ नाम प्रसिद्ध हैं ॥ ५७ ॥ दक्षिण द्वारके वैजयन्त, शिव, ज्येष्ठ, वरिष्ठ, अनघ, धारण, याम्य और अप्रतिघ ये आठ नाम कहे गये हैं ॥ ५८ ॥ पश्चिम द्वारके जयन्त, अमितसार, सुधाम, अक्षोभ्य, सुप्रभ, वरुण और वरद ये आठ नाम स्मरण किये गये हैं ॥ ५९ ॥ और उत्तर द्वारके अपराजित, अर्थ, अतुलार्थ, उदक, अमोघक, उदय, अक्षय और पूर्णकामक ये आठ नाम हैं ॥ ६० ॥ उन द्वारोंके दोनों पसवाड़ोंमें उत्तम रत्नमय आसनोंके मध्यमें स्थित मंगल-रूप दर्पण सुशोभित हैं जो देखनेवालोंके पूर्व भव दिखलाते हैं ॥ ६१ ॥ ये दर्पण गाढ़ अन्धकारको नष्ट करने वाले कान्तिके समूहसे सदा देदीप्यमान रहते हैं और उनसे गोपुर सूर्यकी प्रभाको तिरस्कृत कर अतिशय शोभायमान होते हैं ॥ ६२ ॥ विजयादिक गोपुरोंमें यथायोग्य 'जय हो' 'कल्याण हो' इन शब्दोंका उच्चारण करनेवाले एवं देदीप्यमान आभूषणोंसे युक्त कल्पवासी देव द्वारपाल रहते हैं ॥ ६३ ॥ ये तीनों कोट एक कोश, दो कोश और तीन कोश ऊँचे होते हैं तथा मूल मध्य और ऊपरी भागमें इनकी चौड़ाई ऊँचाईसे आधी होती है ॥ ६४ ॥ इन कोटोंके जगतीतलोंका प्रमाण अपनी ऊँचाईसे तीन हाथ कम कहा गया है और उनके ऊपर बने हुए बन्दरके शिरके आकारके कंगूरे एक हाथ तथा एक वितस्ति चौड़े और आधा वेमा ऊँचे कहे गये हैं ॥ ६५ ॥ उसके आगे नाना वृक्षों और लता-गृहोंसे व्याप्त, मञ्च, प्रेङ्खागिरि और प्रेक्षागृहोंसे सुशोभित अन्तर्वण है ॥ ६६ ॥ वेदिकाओंसे बद्ध वीथियोंके बीचमें कल्याणजय नामका आँगन है और उसमें शाल्मली वृक्षके समान

१. वनपाठतः म० (?) । २. चित्रमुनि-म० । ३. चतुश्चित्रा म० । ४, वैजयन्त्यम् । ५. परिन्यासै-म०, क०, ङ० । ६. हस्तोद्विद्वाद्य म० । ७. विस्तीर्णद्वान्तराः म०, ख० । ८. व्यासार्ध ख० ।

अन्तर्नाटकशाला स्यात्ततः कल्याणसप्रभाः । लोकपालविलासिन्यो यत्र नृत्यन्ति सन्ततम् ॥६८॥
तदन्तरे भवत्यन्यत्पीठं पीठगुणास्पदम् । प्रोदंशुरत्नजालास्ततिमिरावलिमण्डलम् ॥६९॥
सिद्धार्थपादपाः सन्ति सिद्धरूपविराजितैः । विटपैर्व्याप्य दिक्प्रान्तमिच्छयेव स्थितास्ततः ॥७०॥
स्तूपा द्वादशभूभूषा[1] भूषयन्त्यथ मन्दिरम् । हिरण्मया महामेरुं चत्वारो मेरवो यथा ॥७१॥
चतुर्दिग्गोपुरद्वारवेदिकालङ्कृताः शुभाः । चतस्रो दिक्ष्वथ ज्ञेयाश्चतसृष्वपि वापिकाः ॥७२॥
नन्दाभद्राजयापूर्णेत्यभिख्याभिः क्रमोदिताः । यज्जलाभ्युक्षिताः पूर्वां जातिं जानन्ति जन्तवः ॥७३॥
ताः पवित्रजलापूर्णसर्वपापरुजाहराः । परापरभवाः सप्त दृश्यन्ते यासु पश्यताम् ॥७४॥
अथ गव्यूतमुद्विद्धं योजनाधिकविस्तृतम् । कटीमात्रवरण्डस्थकदलीध्वजसङ्कुलम् ॥७५॥
निरन्तरविशन्निर्यज्जनद्वारोच्चतोरणम् । त्रिलोकविजयाधानमहो भाति जयाजिरम् ॥७६॥
मुक्तावालुकविस्तीर्णप्रवालसिकतान्तरम् । सुरत्नकुसुमैश्चित्रं हेमाम्भोजैस्तदर्चितैः ॥७७॥
तपनीयरसालिप्तैस्तपनैरिव भूगतैः । तत्र तत्र यथादेश्यं मण्ड्यन्ते पृथुमण्डलैः ॥७८॥
प्रासादैर्मण्डपैश्चान्यैः सुखावासैः सुशोभते । देवासुरनरापूर्णैस्तत्र तत्र विचित्रितम् ॥७९॥
क्वचिदालेख्य हृद्यानि वेश्मानि क्वचिदन्तरे । पुराणाद्भुतभूतीनि चित्राख्यानान्वितानि च ॥८०॥
क्वचित्पुण्यफलप्राप्त्या पापपाकेन च क्वचित् । धर्माधर्मगतिं साक्षाद्दर्शयन्तीव पश्यतः ॥८१॥

ऊँचे एवं अन्तरसे स्थित केलाके वृक्ष प्रकाशमान हो रहे हैं ॥ ६७ ॥ तदनन्तर उन्हींके भीतर नाटकशाला है जिसमें सुवर्णके समान कान्तिकी धारक लोकपाल देवोंकी देवाङ्गनाएँ निरन्तर नृत्य करती रहती हैं ॥ ६८ ॥ उनके मध्यमें श्रेष्ठ गुणोंका स्थान तथा ऊँची उठनेवाली किरणोंसे सुशोभित रत्नावलीसे अन्धकारके समूहको नष्ट करनेवाला दूसरा पीठ है ॥ ६९ ॥ उसके आगे सिद्धार्थवृक्ष हैं जो सिद्धोंकी प्रतिमाओंसे सुशोभित शाखाओंसे इच्छापूर्वक ही मानो दिशाओंको व्याप्त कर स्थित हैं ॥ ७० ॥ उसके आगे एक मन्दिर है जिसे पृथ्वीके आभरण स्वरूप बारह स्तूप उस तरह सुशोभित करते रहते हैं जिस तरह कि सुवर्णमय चार मेरु पर्वत जम्बूद्वीपके महामेरुको सुशोभित करते रहते हैं ॥ ७१ ॥ इनके आगे चारों दिशाओंमें शुभ वापिकाएँ हैं जो चारों दिशाओंमें बने हुए गोपुर-द्वारों और वेदिकासे अलंकृत हैं ॥ ७२ ॥ नन्दा, भद्रा, जया और पूर्णा ये चार उनके नाम हैं। उन वापिकाओंके जलमें स्नान करनेवाले जीव अपना पूर्व-भव जान जाते हैं ॥ ७३ ॥ वे वापिकाएँ पवित्र जलसे भरी एवं समस्त पापरूपी रोगोंको हरनेवाली हैं। इनमें देखनेवाले जीवोंको अपने आगे-पीछेके सात भव दिखने लगते हैं ॥ ७४ ॥ वापिकाओंके आगे एक जयाङ्गण सुशोभित है जो एक कोश ऊँचा है, एक योजनसे कुछ अधिक चौड़ा है, कटि बराबर ऊँचे वरण्डोंपर स्थित कदली-ध्वजाओंसे व्याप्त है, जिनमें मनुष्य निरन्तर प्रवेश करते और निकलते रहते हैं ऐसे द्वारों और उच्च तोरणोंसे युक्त है, तीन लोकको विजयका आधार है, उसमें बीच-बीचमें मूँगाओंकी लाल-लाल बालूका अन्तर देकर मोतियोंकी सफेद बालू बिछी हुई है, उत्तम रत्नमय पुष्पों और रखे हुए सुवर्ण-कमलोंसे चित्र-विचित्र है। उस जयाङ्गणके भूभाग, जहाँ-तहाँ सुवर्ण रससे लिप्त अतएव पृथिवीपर आये हुए सूर्योंके समान दिखनेवाले विशाल वर्तुलाकार मण्डलोंसे सुशोभित हैं। जहाँ तहाँ नाना प्रकारके चित्रोंसे चित्रित वह जयाङ्गण, देव, असुर और मनुष्योंसे परिपूर्ण भवनों, मण्डपों तथा अन्य सुखकर निवासस्थानोंसे सुशोभित है ॥ ७५-७९ ॥ कहीं चित्रोंसे सुन्दर और कहीं पुराणोंमें प्रतिपादित आश्चर्यकारी विभूतिसे युक्त तथा नाना प्रकारके कथानकोंसे सहित भवन बने हैं ॥ ८० ॥ वे भवन कहीं पुण्यके फलकी प्राप्तिसे देखनेवाले लोगोंको धर्मका साक्षात् फल दिखलाते हैं तो कहीं पापका

---

१. भूभागा क० ।

दानशीलतपःपूजाप्रारम्भास्तत्फलानि च। तद्वियोगविपत्तीश्च तानि श्रद्धापयन्त्यमून् ॥८२॥
स्फुरत्पुलकसंसक्तमुक्तादामोन्मिषन्मणिः। पताका घण्टिकारावरमणीयानिलेरिता[2] ॥८३॥
उदंशुरत्नमालेव स्फुरन्ती वीचिरर्णवे। वीक्ष्यते व्योमनीन्द्राद्यैः कौतुकाद्येन चामितः[3] ॥८४॥
राजतीन्द्रध्वजः सोऽयं तन्मध्ये हेमपीठिकाम्[4]। अलङ्कुर्वन् यथामूर्तो देहो देवजयश्रियः ॥८५॥
ततः स्तम्भसहस्रस्थो मण्डपोऽस्ति महोदयः। नाम्ना मूर्तिमती यत्र वर्तते श्रुतदेवता ॥८६॥
तां कृत्वा दक्षिणे भागे धीरैर्बहुश्रुतैर्वृतः। श्रुतं व्याकुरुते यत्र श्रायसं श्रुतकेवली ॥८७॥
तदर्धमानाश्चत्वारस्तत्परीवारमण्डपाः। आक्षेपण्यादयो येषु कथ्यन्ते कथकैः कथाः ॥८८॥
तत्प्रकीर्णकवासेषु चित्रेष्वाचक्षते स्फुटम्। ऋषयः स्वेष्टमर्थिभ्यः केवलादिमहर्द्धयः ॥८९॥
तपनीयमयं पीठं ततश्चित्रलताचितम्। यत्तद्बल्युपहारेण यथाकालं समर्च्यते ॥९०॥
[5]पीठार्हश्रीपदद्वारं सरत्नकुसुमोत्करम्। मण्डलैः पूर्यते मध्ये[6] मार्गं चन्द्रार्कसप्रभैः ॥९१॥
अभितः स्वाख्यया द्वौ तं मण्डपौ स्तः प्रभासकौ। अभ्य[7]ध्वं राजतो यत्र निधीशौ कामदायिनौ ॥९२॥
प्रेक्षाशाले विशाले स्तः प्रमदाख्ये ततोऽन्तरे[8]। यत्र कल्पनिवासिन्यो नृत्यन्त्यप्सरसः सदा ॥९३॥
विजयाजिरकोणेषु विलसत्केतुमालिनः। चत्वारो योजनोद्विद्धा लोकस्तूपा भवन्त्यमी ॥९४॥

परिपाक दिखाकर अधर्मका साक्षात् फल दिखलाते हैं ॥ ८१ ॥ वे भवन, उन दर्शकजनोंको दान, शील, तप और पूजाके प्रारम्भ तथा उनके फलोंकी एवं उनके अभावमें होनेवाली विपत्तियोंकी श्रद्धा कराते हैं ॥ ८२ ॥ उस जयाङ्गणके मध्यमें सुवर्णमय पीठको अलंकृत करता हुआ इन्द्रध्वज सुशोभित होता है जो ऐसा जान पड़ता है मानो भगवान्की विजयलक्ष्मीका मूर्तिधारी शरीर ही हो। उस इन्द्रध्वजमें देदीप्यमान गोले, लटकती हुई मोतियोंकी माला और जगमगाते हुए मणियोंसे युक्त एक पताका लगी रहती है। वह पताका वायुसे कम्पित होनेके कारण घंटियोंके शब्दसे अत्यन्त रमणीय जान पड़ती है। ऊपर उठती हुई किरणोंसे युक्त रत्नोंकी मालासे सुशोभित वह पताका जब आकाशमें फहराती है तब ऐसी जान पड़ती है मानो समुद्रमें लहर ही उठ रही हो। इन्द्रादिक देव उसे बड़े कौतुकसे देखते हैं ॥ ८३-८५ ॥

उसके आगे एक हजार खम्भोंपर खड़ा हुआ महोदय नामका मण्डप है जिसमें मूर्तिमती श्रुतदेवता विद्यमान रहती है ॥ ८६ ॥ उस श्रुतदेवताको दाहिने भागमें करके, बहुश्रुतके धारक अनेक धीर-वीर मुनियोंसे घिरे श्रुतकेवली कल्याणकारी श्रुतका व्याख्यान करते हैं ॥८७॥ महोदय मण्डपसे आधे विस्तारवाले चार परिवार मण्डप और हैं जिनमें कथा कहनेवाले पुरुष आक्षेपिणी आदि कथाएँ कहते रहते हैं ॥ ८८ ॥ इन मण्डपोंके समीपमें नाना प्रकारके फुटकर स्थान भी बने रहते हैं जिनमें बैठकर केवलज्ञान आदि महाऋद्धियोंके धारक ऋषि इच्छुकजनोंके लिए उनकी इष्ट वस्तुओंका निरूपण करते हैं ॥ ८९ ॥

उसके आगे नाना प्रकारकी लताओंसे व्याप्त एक सुवर्णमय पीठ रहता है जिसकी भव्यजीव नाना प्रकारकी सामग्रीसे समयानुसार पूजा करते हैं ॥ ९० ॥ उस पीठका श्रीपद नामका द्वार है जो रत्नों और फूलोंके समूहसे युक्त है तथा जो मार्गके बीचमें बने हुए सूर्य और चन्द्रमाके समान देदीप्यमान मण्डलोंसे परिपूर्ण है ॥ ९१ ॥ उस द्वारके दोनों ओर प्रभासक नामके दो मण्डप हैं जिनमें मार्गके सम्मुख, इच्छानुसार फल देनेवाले निधियोंके स्वामी दो देव सुशोभित रहते हैं ॥ ९२ ॥ उनके आगे प्रमदा नामकी दो विशाल नाट्यशालाएँ हैं जिनमें कल्पवासिनी अप्सराएँ सदा नृत्य करती रहती हैं ॥ ९३ ॥ विजयाङ्गणके कोनोंमें चार लोकस्तूप होते हैं जिनपर पताकाओंकी पंक्तियाँ फहराती रहती हैं, तथा जो एक योजन ऊँचे

---

१. -रावो म०, क०, ङ०। २ -लेरिताः म०, क०, ङ०। ३. वीभिता ख०, वीक्षिता म०। ४. हेमपीठका म०। ५. पीठार्हा म०, ङ०। ६. मध्ये मार्गश्चन्द्रार्क—म०, क०, ङ०। ७. अत्यर्ध्वं म०। ८. तमोऽम्बरे म०।

अधोवेत्रासनाकारा झल्लरीसममध्यगाः। ऊर्ध्वं मृदङ्गसंस्थानाः स्वान्ततालाभनालिकाः ॥९५॥
स्वच्छस्फटिकरूपास्ते सुव्यक्तान्तर्निवेशकाः। दृश्यते लोकविन्यासो यत्रादर्शतले यथा ॥९६॥
मध्यलोकस्वरूपान्तर्व्यक्तनिर्माणमूर्तयः। मध्यलोका इति ख्याताः सन्ति स्तूपास्ततः परे ॥९७॥
मन्दरस्तूपनामानो मन्दराकारभास्वराः। चतुःकाष्ठचतुर्दिक्षु चैत्या भान्ति ततोऽपरे ॥९८॥
ततोऽन्तःकल्पवासाख्याः कल्पवासिनिवेशिनः। स्तूपास्ते कल्पवासर्द्धिं साक्षात्कुर्वन्ति पश्यताम् ॥९९॥
ग्रैवेयकपरास्तेऽन्ये नाम्ना स्तूपास्तथाविधाः। ततो ग्रैवेयकाभिख्यां दर्शयन्तीव मानवान् ॥१००॥
नवानुदिशनामानस्ततः स्तूपा विराजते। नवानुदिशम[1]ध्यक्षं पश्यन्ते[2] यत्र प्राणिनः ॥१०१॥
विजयादिचतुर्दिक्का[3] विमानोद्भासिनस्ततः। सर्वार्थदायिनः सन्ति स्तूपाः सर्वार्थसिद्धयः[4] ॥१०२॥
सिद्धस्तूपाः प्रकाशन्ते ततोऽन्ये स्फटिकामलाः। यत्रैव दर्पणच्छाया दृश्यते सिद्धरूपभाक् ॥१०३॥
भव्यकूटाख्यया स्तूपा भास्वत्कूटास्ततोऽपरे। यानभव्या न पश्यन्ति प्रभावान्धीकृतेक्षणाः ॥१०४॥
प्रमोहा नाम सन्त्यन्ये स्तूपा यत्र प्रमोहिताः। विस्मरन्ति यथाग्राहं[5] चिराभ्यस्तं च देहिनः ॥१०५॥
प्रबोधाख्या भवन्त्यन्ये स्तूपा यत्र प्रबोधिताः। तत्त्वमासाद्य संसारान्मुच्यन्ते[6] साधवो ध्रुवम् ॥१०६॥
एवमन्योऽन्यसंसक्तवेदिकातोरणोज्ज्वलाः। दश स्तूपाः समुत्तुङ्गाः राजन्त्या[7]परिधेः क्रमात् ॥१०७॥
ततोऽस्ति क्रोशविस्तारः[8] परिधिर्धनुरुच्छ्रितिः। यत्र मण्डलभूवार्यं परियन्ति नरामराः ॥१०८॥

रहते हैं ॥ ९४ ॥ ये लोकस्तूप, नीचे वेत्रासनके समान, मध्यमें झालरके समान, ऊपर मृदङ्गके समान और अन्तमें तालवृक्षके समान लम्बी नालिकासे सहित हैं ॥९५॥ इनका स्वच्छ स्फटिकके समान रूप होता है, अतः इनके भीतरकी रचना अत्यन्त स्पष्ट रहती है। इन स्तूपोंमें लोककी रचना दर्पणतलके समान स्पष्ट दिखायी देती है ॥ ९६ ॥ इन स्तूपोंके आगे मध्यलोक नामसे प्रसिद्ध स्तूप हैं जिनके भीतर मध्यलोककी रचना स्पष्ट दिखती है ॥ ९७ ॥ आगे मन्दराचलके समान देदीप्यमान मन्दर नामके स्तूप हैं जिनपर चारों दिशाओंमें भगवान्‌की प्रतिमाएँ सुशोभित हैं ॥ ९८ ॥ उनके आगे कल्पवासियोंकी रचनासे युक्त कल्पवास नामक स्तूप हैं जो देखनेवालोंको कल्पवासी देवोंकी विभूति साक्षात् दिखाते हैं ॥ ९९ ॥ उनके आगे ग्रैवेयकोंके समान आकारवाले ग्रैवेयक स्तूप हैं जो मनुष्योंको मानो ग्रैवेयकोंकी शोभा ही दिखाते रहते हैं ॥१००॥ उनके आगे अनुदिश नामके नौ स्तूप सुशोभित हैं जिनमें प्राणी नौ अनुदिशोंको प्रत्यक्ष देखते हैं ॥१०१॥ आगे चलकर जो चारों दिशाओंमें विजय आदि विमानोंसे सुशोभित हैं ऐसे समस्त प्रयोजनोंको सिद्ध करनेवाले सर्वार्थसिद्धि नामके स्तूप हैं ॥१०२॥ उनके आगे स्फटिकके समान निर्मल सिद्धस्तूप प्रकाशमान हैं जिनमें सिद्धोंके स्वरूपको प्रकट करनेवाली दर्पणोंकी छाया दिखायी देती है ॥ १०३ ॥ उनके आगे देदीप्यमान शिखरोंसे युक्त भव्यकूट नामके स्तूप रहते हैं जिन्हें अभव्य जीव नहीं देख पाते क्योंकि उनके प्रभावसे उनके नेत्र अन्धे हो जाते हैं ॥ १०४ ॥ उनके आगे प्रमोह नामके स्तूप हैं जिन्हें देखकर लोग अत्यधिक विभ्रममें पड़ जाते हैं और चिरकालसे अभ्यस्त गृहीत वस्तुको भी भूल जाते हैं ॥ १०५ ॥ आगे चलकर प्रबोध नामके अन्य स्तूप हैं जिन्हें देखकर लोग प्रबोधको प्राप्त हो जाते हैं और तत्त्वको प्राप्तकर साधु हो निश्चित ही संसारसे छूट जाते हैं ॥ १०६ ॥ इस प्रकार जिनकी वेदिकाएँ एक दूसरेसे सटी हुई हैं तथा जो तोरणोंसे समुद्भासित हैं ऐसे अत्यन्त ऊँचे दशस्तूप क्रम-क्रमसे परिधि तक सुशोभित हैं ॥ १०७ ॥ इसके आगे

---

१. नवानुदिश अध्यक्षं घ०, म० । नवानुदिशनामानि ङ० । नवानामनुदिशानां समाहारो नवानुदिश ग० । २. यत्र पश्यन्ति प्राणिनः इति पाठः सुष्ठु प्रतिभाति । ३. चतुर्दिक्षु ग०, ख० । ४. सिद्धिदाः म० । ५. यथाग्राह्यं ङ० । ६. मुच्यते म० । ७. राजन्त्याः परिधेः म० । ८. विस्तारं म० ।

बाह्याः सप्तदश न्यस्ता गव्यूतैर्वृतमेकतः। कर्णिकाथ तदन्तस्था ज्ञेया सार्धत्रियोजना ॥१०९॥
परिवेष इवार्कं यः परिधिः[1] परिवेष्टते[2]। चित्ररत्नमयोऽन्तस्थं भासुरं परिमण्डलम् ॥११०॥
निर्मितस्तानन्तरं भर्तुर्व्रजस्योत्पद्यते पुरम्। दिव्यं तत्र प्रभावो हि मनसा ज्ञायिनां महान्[3] ॥१११॥
त्रिलोकसारं श्रीकान्तं श्रीप्रभं शिवमन्दिरम्। त्रिलोकीलोककान्तिश्री श्रीपुरं त्रिदशप्रियम् ॥११२॥
लोकालोकप्रकाशा द्यौरुदयोऽभ्युदयावहम्। क्षेमं क्षेमपुरं पुण्यं पुण्याहं पुष्पकास्पदम् ॥११३॥
भुवः स्वर्भूस्तपः सत्यं लोकालोकोत्तमं रुचिः। रुचावहमुदारर्धि दानधर्मपुरं परम् ॥११४॥
श्रेयः श्रेयस्करस्तीर्थं तीर्थावहमुदग्रहम्। विशालश्चित्रकूटं धीश्रीधरं च त्रिविष्टपम् ॥११५॥
मङ्गलोत्तमकल्याणशरणादिपुराणि पूः। जयापराजितादित्यजयन्त्यचलसंपुरम् ॥११६॥
विजयं तं जयन्ताभं विमलं विमलप्रभम्। कामभूर्गगनाभोगं कल्याणं कलिनाशनम् ॥११७॥
पवित्रं पञ्चकल्याणं पद्मावर्तः प्रभोदयः। परार्ध्यमण्डिता वासौ महेन्द्रं महिमालयम् ॥११८॥
स्वायम्भुवं सुधाधात्री शुद्धावासः सुखावती। विरजा वीतशोकार्थविमला विनयावनिः ॥११९॥
भूतधात्री पुराकल्पः पुराणं पुण्यसंचयः। [4]ऋषीवती यमवती रत्नवत्याजरामरा ॥१२०॥
प्रतिष्ठा ब्रह्मनिष्ठोर्वी केतुमालिन्यरिन्दमम्[5]। मनोरमं तमःपारमरत्नीरत्नसञ्चयम् ॥१२१॥
अयोध्यामृतधानीति समं ब्रह्मपु[6]राख्यया। जाताह्वयमुदात्तार्थं तत्कल्पज्ञैरुदीर्यते ॥१२२॥
अथ त्रैलोक्यसारैकसन्दोहमयमद्भुतम्। भाति भर्तृप्रभावोत्थं तत्पदं बहु विस्मयम् ॥१२३॥
कृतावधानस्तत्सिद्धिं भूयः स्रष्टापि चिन्तयन्। ध्रुवं मोमुह्यतेऽन्यस्य तथा चेत्तत्र का कथा ॥१२४॥

एक कोट रहता है जो एक कोश चौड़ा तथा एक धनुष ऊँचा होता है और उसके मण्डलकी भूमिको बचाकर मनुष्य तथा देव प्रदक्षिणा देते रहते हैं ॥१०८॥ इस परिधिमें बाहरकी ओर सत्रह कर्णिकाएँ हैं जो एक-एक कोश विस्तृत हैं और भीतरकी ओर एक कर्णिका है जो साढ़े तीन योजन विस्तार वाली है (?) ॥१०९॥ जिस प्रकार परिवेष सूर्यको घेरता है उसी प्रकार चित्र-विचित्र रत्नोंसे निर्मित यह परिधि भीतरके देदीप्यमान मण्डलको घेरे रहती है ॥११०॥ वहाँ गणधर देवकी इच्छा करते ही एक दिव्य पुर बन जाता है सो ठीक ही है क्योंकि मनःपर्यय ज्ञानके धारक जीवोंका प्रभाव महान् होता है ॥ १११ ॥ वह पुर कल्पके ज्ञाता मनुष्यके द्वारा त्रिलोकसार, श्रीकान्त, श्रीप्रभु, शिवमन्दिर, त्रिलोकीश्री, लोककान्तिश्री, श्रीपुर, त्रिदशप्रिय, लोकालोकप्रकाशाद्यौ, उदय, अभ्युदयावह, क्षेम, क्षेमपुर, पुण्य, पुण्याह, पुष्पकास्पद, भुवःस्वर्भूः, तपःसत्य, लोकालोकोत्तम, रुचि, रुचावह, उदारर्द्धि, दानधर्मपुर, श्रेय, श्रेयस्कर, तीर्थ, तीर्थावह, उदग्रह, विशाल, चित्रकूट, धीश्रीधर, त्रिविष्टप, मङ्गलपुर, उत्तमपुर, कल्याणपुर, शरणपुर, जयपुरी, अपराजितापुरी, आदित्यपुरी, जयन्तीपुरी, अचल-संपुर, विजयन्त, जयन्ताभ, विमल, विमलप्रभ, कामभू, गगनाभोग, कल्याण, कलिनाशन, पवित्र, पञ्चकल्याण, पद्मावर्त, प्रभोदय, परार्ध्य, मण्डितावास, महेन्द्र, महिमालय, स्वाय-म्भुव, सुधाधात्री, शुद्धावास, सुखावती, विरजा, वीतशोका, अर्थविमला, विनयावनि, भूत-धात्री, पुराकल्प, पुराण, पुंण्यसञ्चय, ऋषीवती, यमवती, रत्नवती, अजरामरा, प्रतिष्ठा, ब्रह्मनिष्ठोर्वी, केतुमालिनी, अरिन्दम, मनोरम, तमःपार, अरत्नी, रत्नसञ्चय, अयोध्या, अमृत-धानी, ब्रह्मपुर, जाताह्वय और उदात्तार्थ नामसे कहा जाता है ॥ ११२-१२२ ॥ भगवान्‌के प्रभावसे उत्पन्न वह नगर, तीन लोकके समस्त श्रेष्ठ पदार्थोंके समूहसे युक्त, आश्चर्यस्वरूप एवं बहुत भारी आश्चर्य उत्पन्न करता हुआ सुशोभित होता है ॥ १२३ ॥ उसका बनानेवाला कुबेर भी यदि एकाग्रचित्त हो उसके बनानेका पुनः विचार करे तो वह भी नियमसे भूलकर

---

१. परिवेः म०, ङ० । २. परिवेष्ठयते म०, परिविष्यते ङ० । ३. महत् म० । ४. रिषीवती क०, ङ० । ५. केतुमालिन्यनिन्दितम् म० । ६. ब्रह्मपराख्यया क०, ङ० ।

दशषोडशभिस्तस्य सुवर्णमणिजातिभिः । यथास्थानं स्त्रयं चित्रं निर्माणमभिराजते ॥१२५॥
तलं तिस्रो जगत्यश्च तत्र क्रोशार्धविस्तृताः । उपर्युपरि तत्र स्यात्परिहाणिश्च तावती ॥१२६॥
तासां वज्रमयी सिद्धिश्चित्ररत्नोज्ज्वला भुवाम् । यत्प्रभा शक्रचापानि तनोति परितः परा ॥१२७॥
उरोदघ्ना वरण्डास्ते भूषयन्ति ज्वलत्प्रभाः । जगतीर्यत्र राजन्ते कदल्यो धनुरन्तराः ॥१२८॥
त्रिंशदक्षमितैः[1] कूटैर्द्विगुणायतकोष्ठकैः । द्विगुणैर्भूयते तासु दशदण्डान्तरास्थितैः ॥१२९॥
द्वौ द्वौ दौवारिकावासावभितः स्तस्तदन्तिके । यत्र वैश्रवणस्यार्थः प्रतिद्वारं प्रकाशते ॥१३०॥
कूटानां सप्तशत्यासु द्वासप्तत्यधिका क्रमात् । चत्वारिंशदष्टयुक्ता कोष्ठकानां च सा गणिः ॥१३१॥
द्वाविंशतिशतान्याहुर्विंशानि जगतीत्रये । कूटसंख्या समासेन कोष्ठकानां च तावती ॥१३२॥
एकाष्टलोकसीमङ्गा[2] नवैकद्विचतुर्भिय[3]ः । षडस्तिखैकभङ्गाः[4] स्युर्जगतीकेतवः क्रमात् ॥१३३॥
वियद्भूयोनिसीमङ्गश्रेण[5]यः पूर्वकूटगाः । भूषणमण्डगलव्योमखोत्क्रमा[6] मध्यकूटगाः ॥१३४॥
खाष्टा[7]ष्टचतुरस्त्यक्षीण्यन्तकूटगता ध्वजाः । कोष्टगास्तत्र तत्रामी भाव्यन्ते ते द्विसंगुणाः ॥१३५॥
लक्षा षड्विंशतिर्ज्ञेयाः सहस्राणां च विंशतिः । षट्पञ्चाशद्द्विशत्यामा[8] तत्सर्वकदलीगणः ॥१३६॥
तत्र [9]सस्वेददेशेषु मण्डपा रत्नमण्डिताः । द्व्येकगव्यूतविस्तारसमुत्सेधाश्चकासति ॥१३७॥
तदर्धव्यासनिर्माणशिखरान्तरवासिनः । सन्ति सन्मङ्गलोद्भासि मूर्तयोर्चा जिनेश्वराः ॥१३८॥

जायेगा फिर अन्य मनुष्यकी तो बात ही क्या है ? ॥ १२४ ॥ उस नगरका निर्माण यथास्थान छब्बीस प्रकारके सुवर्ण और मणियोंसे चित्र-विचित्र है अतः अत्यधिक सुशोभित होता है ॥ १२५ ॥ उसके तल भागमें तीन जगती रहती हैं जो आधा-आधा कोश चौड़ी होती हैं और ऊपर-ऊपर उन जगतियोंमें उतनी ही हानि होती जाती है ॥ १२६ ॥ उन जगतियोंकी रचना वज्रमयी एवं चित्र-विचित्र रत्नोंसे उज्ज्वल है और उनकी श्रेष्ठ कान्ति चारों ओर इन्द्रधनुषोंको विस्तृत करती रहती है ॥ १२७ ॥ छाती प्रमाण ऊँचे तथा देदीप्यमान प्रभाके धारक बरण्डे उन जगतियोंको सुशोभित करते रहते हैं तथा उनपर एक धनुषके अन्तरसे स्थित सुशोभित पताकाएँ हैं ॥ १२८ ॥ उन जगतियोंमें तीस-तीस वितस्तियोंके कूट और उनसे द्विगुण आयामवाले दश-दश धनुषोंके अन्तरसे स्थित कोष्ठक रहते हैं ॥ १२९ ॥ उन जगतियोंके समीप दोनों ओर द्वारपालोंके दो-दो आवासस्थान हैं जिनमें प्रत्येक द्वारपर कुबेरकी अपूर्व धनराशि प्रकाशमान है ॥ १३० ॥ प्रत्येक जगतीके कूटोंकी संख्या सात-सौ बहत्तर है तथा कोष्ठकोंकी संख्या अड़तालीस है ॥ १३१ ॥ संक्षेपसे तीनों जगतियोंकी कूटसंख्या बाईस-सौ बीस है और कोष्ठोंकी संख्या उसी प्रमाणसे है ॥ १३२ ॥ प्रथम जगतीमें बत्तीस हजार तीन सौ इक्यासी, दूसरीमें चौबीस हजार दो सौ उन्नीस और तीसरीमें इकतीस हजार छप्पन ध्वजाएँ रहती हैं ॥ १३३॥ पूर्व कूटोंमें दो लाख बत्तीस हजार चार सौ सत्तर, मध्यम कूटोंमें सात लाख इकसठ हजार एक सौ, और अन्तिम कूटोंमें दो लाख चौवन हजार आठ सौ अस्सी और कोष्ठकोंमें दूनी-दूनी हैं ॥ १३४-१३५ ॥ इस प्रकार समस्त ध्वजाओंकी संख्या छब्बीस लाख बीस हजार दो सौ छप्पन है ॥ १३६ ॥ वहाँ सस्वेद प्रदेशों (?) में रत्नोंसे मण्डित अनेक मण्डप हैं जो दो कोस चौड़े और एक कोस ऊँचे हैं ॥ १३७ ॥ जिनकी रचना मण्डपोंसे आधी चौड़ी है, ऐसे शिखरोंके मध्य भागमें विराजमान जिनेन्द्र भगवान्की प्रति-

१. वितस्ति (इ० टि०) । २. ३२३८१ । ३. २४२१९ । ४. ३१०५६ । ५. २३२४७० । ६. ७६११०० । ७. २५४८८० । भूपदेन सप्त, षट्पदेन षट्, मण्डः पिच्छवाची तेन एकः, गलः कण्ठवाची तेन एकः, व्योमख-पदाभ्यां शून्यद्वयम्, यद्यपि सर्वत्र अङ्कानां वामतो गतिरिति नियमः तथापि अत्र उत्क्रमशब्देन उपरि उल्लेखः तेन पूर्वोक्ता संख्या निःसरति । ८. अमा—सह । ९. संस्वेददेशेषु म० ।

तत्रस्था[1] अपि तद्देशाद्विनिष्क्रम्य नभस्यमी । यथोपदिष्टा दृश्यन्ते सन्मुखीभूय पश्यताम् ॥१३९॥
पीठानि त्रीणि भास्वन्ति चतुर्दिक्षु भवन्ति तु । चत्वारि च सहस्राणि धर्मचक्राणि पूर्वके ॥१४०॥
द्वितीये तु महापीठे शिखिहंसध्वजेतरे । अष्टौ तिष्ठन्ति दिग्भागान्[2]भासयन्तो महाध्वजाः ॥१४१॥
अग्रे श्रीमण्डपोद्भासी[3] प्रासादो बहुमङ्गलः । गन्धकुट्यभिधानः स्यात्तत्र सिंहासनं विभोः ॥१४२॥
तत्रासीनं जिनाधीशं नृसुरासुरकोटयः । तुष्टुवुस्तुष्टचित्तास्ता मकुटन्यस्तपाणयः ॥१४३॥
विजयस्व महादेव ! विजयस्व महेश्वर । विजयस्व महाबाहो ! विजयस्व महेक्षण ॥१४४॥
इत्यादि[4] स्तुतिकोटीनामन्ते प्रव्रज्य तत्क्षणात् । गणिनामग्रणीर्जातो वरदत्तो गणाधिपः ॥१४५॥
षट्सहस्रनृपस्त्रीभिः सह राजीमती तदा । प्रव्रज्याग्रेसरी जाता सार्यिकाणां गणस्य तु ॥१४६॥
यतिवर्गादयः सर्वे गणा द्वादश ते ततः । प्रणिपत्य यथास्थानं तं प्रभुं समुपासते ॥१४७॥
परिपर्यंध्वनस्तस्मिन्पदेषु द्वादशस्वमी । पूर्वदक्षिणभागादिष्वासतेऽग्रप्रदक्षिणम् ॥१४८॥
तत्र प्रत्यक्षधर्माणो धर्मांशांशा इवामलाः । [5]भासन्ते वरदस्याग्रे वरदत्तादियोगिनः ॥१४९॥
भर्तुर्या भूतयो बाह्यास्तदन्तर्भूतितः प्रति । राजन्ते कल्पवासिन्यो युक्ता[6] स्तन्मूर्तयो यथा ॥१५०॥
ह्रीदयाक्षान्तिशान्त्यादिगुणालंकृतसम्पदः । समेत्योपविशन्त्यार्या [7]सद्धर्मतनया यथा ॥१५१॥

माएँ हैं जो उत्तम मंगल द्रव्योंसे सुशोभित हैं ॥१३८॥ यद्यपि ये प्रतिमाएँ अपने-अपने स्थान-पर स्थित हैं तथापि सामने खड़े होकर देखनेवालोंको ऐसी दिखायी देती हैं मानो उन स्थानोंसे निकलकर आकाशमें ही विद्यमान हों ॥ १३९ ॥

वहाँ चारों दिशाओंमें देदीप्यमान तीन पीठ होते हैं उनमें पहले पीठपर चार हजार धर्मचक्र सुशोभित हैं ॥१४०॥ दूसरी महापीठपर मयूर और हंसोंकी ध्वजाओंसे भिन्न आठ प्रकारकी महाध्वजाएँ दिशाओंको सुशोभित करती हुई विद्यमान हैं ॥१४१॥ तीसरी पीठपर श्रीमण्डपको सुशोभित करनेवाला अनेक मङ्गलद्रव्योंसे सहित गन्धकुटी नामका प्रासाद है उसमें भगवान्‌का सिंहासन रहता है ॥१४२॥ उस सिंहासनपर विराजमान जिनेन्द्रदेवकी सन्तुष्ट चित्तके धारक मनुष्य सुर और असुरोंके झुण्डके झुण्ड मुकुटोंपर हाथ लगाकर स्तुति करते थे ॥१४३॥ वे कह रहे थे कि हे महादेव ! आपकी जय हो । हे महेश्वर ! आप जयवन्त हों, हे महाबाहो ! आप विजयी हों, हे विशालनेत्र ! जयवन्त हों ॥१४४॥ इत्यादि करोड़ों स्तवनोंके बाद वरदत्तने तत्काल दीक्षा ले ली और गणोंके स्वामी प्रथम गणधर हो गये ॥१४५॥ उसी समय छह हजार रानियोंके साथ दीक्षा लेकर राजीमती आर्यिकाओंके समूह-की प्रधान बन गयी ॥१४६॥ मुनिसमूहको आदि लेकर बारह गण भगवान् नेमिनाथको प्रणाम कर यथास्थान उनकी उपासना करते थे ॥१४७॥ मार्गके चारों ओर घेरकर बारह सभाएँ उनकी पूर्व दक्षिण आदि दिशाओंमें मुनिसमूहको आदि लेकर बारह गण विराजमान थे ॥१४८॥ वहाँ उत्कृष्ट वरको प्रदान करनेवाले भगवान् नेमिनाथके आगे वरदत्तको आदि लेकर अनेक मुनि सुशोभित थे जो धर्मके स्वरूपको प्रत्यक्ष करनेवाले एवं अत्यन्त निर्मल धर्मेश्वरके अंशके समान जान पड़ते थे ॥१४९॥ उनके आगे कल्पवासिनी देवियाँ सुशोभित थीं जो ऐसी जान पड़ती थीं मानो भगवान्‌की बाह्याभ्यन्तर विभूतियाँ ही उनका रूप रख कर स्थित हों ॥१५०॥ उनके बाद तीसरी सभामें लज्जा, दया, क्षमा, शान्ति आदि गुणरूपी सम्पत्तिसे सुशोभित आर्यिकाएँ विराजमान थीं जो समीचीन धर्मकी पुत्रियोंके समान

---

१. तत्रस्थापि । २. दिग्भागा म० । ३. मण्डशोद्भासी म०, ङ० । ४. श्रुति म० । ५. भासते म० । ६. व्यक्तं तन्मूर्तयो यथा म०, ङ० । ७. तद्धर्म ख० ।

द्योतिर्मण्डलवासिन्यो[1] भर्तृज्योतिष्टमप्रभाः । अभिनन्द्यतदुद्भूतविभाभासश्चकासति ॥१५२॥
वनश्रियो यथा मूर्ता वानव्यन्तरयोषितः । वन्यपुष्पलतानम्रा नमन्ति वरदक्रमम् ॥१५३॥
भवनालयवासिन्यो भगवत्यतिभक्तयः[2] । स्वर्भूर्भुवो यथा लक्ष्म्यः समया तं[3] समासते ॥१५४॥
भावनाः पापबन्धस्य छेत्तारं निकषा सते । बिभ्यतः स्वभवाद्भास्वत्फणारत्नविभारुणाः ॥१५५॥
व्यन्तराः सुन्दराकारा मन्दरस्येव[4] कल्पकाः । भवन्ति भर्तुराकल्पाः सुमनोमालधारिणः ॥१५६॥
परमेश्वरभामग्नस्वप्रभा भास्करादयः । ज्योतिर्गणाः प्रभावृद्धिं प्रार्थयन्ते तमानताः ॥१५७॥
सौन्दर्येशाः[5] सुखात्मानो भागा भर्तुरिवोद्यताः । [6]स्वर्भुवः प्रतिभासन्ते सहस्राक्षपुरस्सराः ॥१५८॥
दानपूजादिधर्मांशा देहवन्तो यथामलाः । वरदं वरिवस्यन्ति नृपाश्चक्रधरादयः ॥१५९॥
अविद्यावैरमायादिदोषापायात्तद्गुणाः । हरीभाद्या विभान्त्यन्ये तिर्यञ्चस्तादृशो यथा ॥१६०॥
एवं द्वादशवर्गीयैर्द्वादशाङ्गगुणोपमैः । परीत्योक्तक्रमादीशो गणैरेभिरुपासितः ॥१६१॥
पारमेष्ठ्यमनन्यस्थं ख्यापयन्नासनश्रिया । चामरैरमरोद्धूतैः क्रमस्थैः सुमहेशिताम् ॥१६२॥

जान पड़ती थीं ॥१५१॥ चौथी सभामें प्रशंसनीय एवं अपने-आपसे निकलनेवाली प्रभासे सुशोभित ज्योतिषी देवोंकी स्त्रियाँ बैठीं थीं जो भगवान्‌की कान्तिके समान जान पड़ती थीं ॥१५२॥ पाँचवीं सभामें मूर्तिधारिणी वनकी लक्ष्मीके समान सुन्दर वनवासी व्यन्तर देवोंकी स्त्रियाँ स्थित थीं तथा वे वनकी पुष्पलताओंके समान नम्रीभूत हो भगवान्‌के चरणोंको नमस्कार कर रही थीं ॥१५३॥ छठी सभामें भगवान्‌की अत्यधिक भक्तिसे युक्त भवनवासी देवोंकी अङ्गनाएँ स्थित थीं जो ऐसी जान पड़ती थीं मानो स्वर्ग, भूमि और अधोलोककी लक्ष्मियाँ ही भगवान्‌के समीप आकर बैठी हैं ॥ १५४ ॥ सातवीं सभामें फणाके देदीप्यमान रत्नोंकी कान्तिसे लाल-लाल दिखनेवाले भवनवासी देव, अपने संसारसे भयभीत होते हुए, पापबन्धका छेदन करनेवाले भगवान्‌के समीप विद्यमान थे ॥१५५॥ आठवीं सभामें सुन्दर आकारके धारक व्यन्तर देव बैठे थे। वे भगवान्‌के आभूषण स्वरूप थे, तथा फूलोंकी मालाओं-को धारण करनेवाले मन्दरगिरिके समान जान पड़ते थे ॥१५६॥ नवमी सभामें, जिनकी अपनी प्रभा भगवान्‌की प्रभामें निमग्न हो गयी थी ऐसे सूर्य आदि ज्योतिषी देवोंके समूह नम्रीभूत हो भगवान्‌से अपनी प्रभावृद्धिकी प्रार्थना कर रहे थे ॥१५७॥ दसवीं सभामें सौन्दर्य-के स्वामी, सुखी एवं ऊपर उठे हुए भगवान्‌के अंशोंके समान इन्द्र आदि कल्पवासी देव सुशोभित हो रहे थे ॥१५८॥ ग्यारहवीं सभामें चक्रवर्ती आदि राजा भगवान्‌की उपासना करते थे और वे ऐसे जान पड़ते थे मानो शरीरधारी दान-पूजा आदि धर्मोंके निर्मल अंश ही हों ॥१५९॥ तथा बारहवीं सभामें, जिन्हें अविद्या, वैर, माया आदि दोषोंके नष्ट हो जाने-से विद्या, क्षमा आदि तत्तद्गुण प्राप्त हुए थे ऐसे सिंह, हाथी आदि तिर्यञ्च विद्यमान थे और वे ऐसे जान पड़ते थे मानो उन्हींके समान दूसरे तिर्यञ्च हों। भावार्थ—तिर्यञ्च अपनी स्वाभाविक कुटिलताको छोड़कर तदाकार होनेपर भी ऐसे लगते थे जैसे ये वे न हों दूसरे ही हों ॥१६०॥ इस प्रकार द्वादशाङ्गके गुणोंके समान बारह सभाओं-सम्बन्धी बारह गण, प्रदक्षिणा रूपसे भगवान्‌की उपासना करते थे ॥१६१॥

भगवान् नेमिनाथ, अपने सिंहासनकी शोभासे दूसरोंमें न पाये जानेवाले परमेष्ठीपना-

---

१. ज्योतिर्मण्डल-क० । २. भगवत्पतिभक्तयः म०, भगवत्यविभक्तयः ङ० । ३. समयान्तं म०, तं भगवतः समया समीपे 'अभितःपरितःसमयानिकषाहाप्रतियोगेऽपि' इति द्वितीया । ४. मन्दरेस्येव म० । ५. सौन्दर्येण म० । ६. स्वर्गोत्पन्नाः कल्पवासिदेवाः ।

त्रिलोकाधीशितां छत्रत्रयेणेन्दुत्रयत्विषा । भामण्डलेन माधिक्यं भवान्तरतमश्छिदा ॥१६३॥
सर्वर्तुकुसुमेनान्यसर्वशोकापहारिताम् । अशोकेनाभिपूज्यत्वं[1] सुमनोवृष्टिपूजया ॥१६४॥
सार्वत्वमभयाधानघोषणेन जयश्रियाम् । नन्दिमङ्गलघोषेण साधुचित्ताभिनन्दिनम् ॥१६५॥
आत्माधीनाः प्रतीहाराः प्रातिहार्यगुणोद्भवैः । भूषितोऽष्टमहोदग्रप्रातिहार्यैर्महेश्वरः ॥१६६॥
लोकानां भूतये भूतिमात्मीयां सकलां दधत् । सर्वलोकातिवर्तिन्या भासास्थानमधिष्ठितः[2] ॥१६७॥
अयमास्ते समग्रात्मा स्वार्थकामाः[3] ससंभ्रमाः । एतैत नमतैशानमित्याह्वानं सघोषणम् ॥१६८॥
वर्तयन्ति सुरास्तस्मिन्मण्डले तदनु द्रुतम् । समन्तात्तत्समायान्ति भूतिभिर्नृसुरासुराः ॥१६९॥
तद्दृष्टिगोचरे मङ्क्षु वाहनेभ्योऽवतीर्यते । मानाङ्गणमथास्थाय पूर्वं साञ्जलिमौलिभिः ॥१७०॥
तत्र बाह्ये परित्यज्य वाहनादिपरिच्छदम् । विशिष्टैः[4] ककुदैर्युक्ता मानपीठं परीत्य ते ॥१७१॥
प्रादक्षिण्येन वन्दित्वा मानस्तम्भमनादितः[5] । उत्तमाः प्रविशत्यन्तरुत्तमाहितभक्तयः॥१७२॥
पापशीला विकर्माणाः शूद्राः पाखण्डपण्डकाः[6] । विकलाङ्गेन्द्रियोद्भ्रान्ताः परियन्ति बहिस्ततः[7] ॥१७३॥
छत्रचामरभृङ्गाराद्यवहाय जयाजिरे । आप्तैरनुगताः कृत्वा विशन्त्यञ्जलिमीश्वराः ॥१७४॥

चैत्र कृष्ण नवमीको भगवान् वृषभदेवकी, वैशाख कृष्ण नवमीको मुनिसुव्रतनाथकी, वैशाख सुदी प्रतिपदाके दिन कुन्थुनाथकी, वैशाख सुदी नवमीके दिन सुमतिनाथकी, ज्येष्ठ-कृष्ण द्वादशीके दिन अनन्तनाथ जिनेन्द्रकी, ज्येष्ठ कृष्ण त्रयोदशीके दिन शान्तिनाथकी, ज्येष्ठ कृष्ण द्वादशीके दिन सुपार्श्व जिनेन्द्रकी, आषाढ़ कृष्ण दशमीके दिन नमिनाथकी, सावन सुदी चतुर्थीको नेमिनाथकी, कार्तिक कृष्ण त्रयोदशीको पद्मप्रभकी, मार्गशीर्ष कृष्ण दशमीको सुमतिनाथकी, मार्गशीर्ष सुदी प्रतिपदाके दिन पुष्पदन्त जिनेन्द्रकी, मार्गशीर्ष सुदी दशमीको अरनाथकी, मार्गशीर्ष सुदी पूर्णिमाको संभवनाथकी, मार्गशीर्ष सुदी एकादशीको मल्लिनाथकी, पौषकृष्ण एकादशीको चन्द्रप्रभ और पार्श्वनाथकी, माघ कृष्ण द्वादशीको शीतलनाथकी, माघ शुक्ल चतुर्थीको विमलनाथकी, माघ शुक्ल नवमीको अजितनाथकी, माघ शुक्ल द्वादशीको अभिनन्दननाथकी, माघशुक्ल त्रयोदशीको धर्मनाथकी, फाल्गुन कृष्ण त्रयोदशीके दिन श्रेयांसनाथकी और फाल्गुन कृष्ण चतुर्दशीके दिन वासुपूज्य भगवान्‌की दीक्षा हुई थी ॥ २२६–२३६ ॥ श्री आदि जिनेन्द्रकी प्रथम पारणा एक वर्षमें [मल्लिनाथ और पार्श्वनाथकी चौथे दिन] तथा शेष तीर्थंकरोंकी तीसरे दिन हुई थी। भावार्थ—आदि जिनेन्द्रने छह माहका योग लिया था और छह माह विधि न मिलनेसे भ्रमण करते रहे इसलिए एक वर्ष बाद उन्हें आहार मिला। मल्लिनाथ और पार्श्वनाथने दीक्षाके समय तीन दिनके उपवासका नियम लिया था इसलिए उन्हें चौथे दिन आहार मिला और शेष तीर्थंकरोंने दो दिनका उपवास किया था ॥ २३७ ॥ श्री आदिनाथ भगवान्‌ने पारणाके दिन उत्तम इक्षुरसको पवित्र किया था और शेष तीर्थंकरोंने लालसासे रहित हो गो-दुग्धके द्वारा निर्मित खीरके द्वारा आहार किया था ॥ २३८ ॥

---

१. पारणा प्रथमा मता म० । २. एक्कवरिसेण उसहो उच्छुरसं कुणइ पारणं अवरे । गोक्खीरे णिप्पण्णं अण्णं बिदियम्मि दिवसम्मि ॥ ४ अ०, ६७१ गाथा०, त्रैलोक्यप्रज्ञप्ति ।

श्रीहास्तिनपुरं रम्यमयोध्यानगरी शुभा । श्रावस्ती च विनीता च पुरं विजयपूर्वकम् ॥२३९॥
पुरं मङ्गलकं नाम्ना पाटलीखण्डसंज्ञकम् । पद्मखण्डपुरं कान्तं तथा श्वेतपुरं परम् ॥२४०॥
अरिष्टपुरमिष्टं तु सिद्धार्थपुरमप्यतः । महापुरमतो नाम्ना स्फुटं धान्यवटं पुरम् ॥२४१॥
वर्धमानपुरं ख्यातं पुरं सौमनसाह्वयम् । मन्दरं हास्तिनपुरं तथा चक्रपुरं मतम् ॥२४२॥
मिथिला राजगृहकं पुरं वीरपुरं तथा । पुरी द्वारवती [1]काम्यकृतं कुण्डपुरं पुरम् ॥२४३॥
चतुर्विंशतिसंख्यानां संख्यातानि यथाक्रमम् । जिनानां वृषभादीनां पारणानगराणि तु ॥२४४॥
स श्रेयान् ब्रह्मदत्तश्च सुरेन्द्र इव संपदा । राजा सुरेन्द्रदत्तोऽन्य इन्द्रदत्तश्च पद्मकः ॥२४५॥
सोमदत्तो महादत्तः सोमदेवश्च पुष्पकः । पुनर्वसुः सुनन्दश्च जयश्चापि विशाखकः ॥२४६॥
धर्मसिंहः सुमित्रश्च धर्ममित्रोऽपराजितः । नन्दिषेणश्च वृषभदत्तो दत्तश्च सन्नयः ॥२४७॥
वरदत्तश्च नृपतिर्धन्यश्च वकुलस्तथा । पारणासु जिनेन्द्रेभ्यो दायकाश्च स्वमी स्मृताः ॥२४८॥
[2]सर्वेषामादिभिक्षासु दातारोऽपि जिनेशिनाम् । सर्वासु वर्धमानस्य वसुधारानियोगतः ॥२४९॥
अर्धत्रयोदशोत्कर्षाद्वसुधारासु कोटयः । तावन्त्येव सहस्राणि दशघ्नानि जघन्यतः ॥२५०॥
आद्यौ द्वौ दायकौ श्यामौ ज्ञेयावन्त्यौ च वर्णतः । शेषास्तु दायकाः सर्वे सन्तप्तकनकप्रभाः ॥२५१॥
तपस्थिताश्च ते केचित्सिद्धास्तेनैव जन्मना । जिनान्ते सिद्धिरन्येषां तृतीये जन्मनि स्मृताः ॥२५२॥
वृषभमल्लीशपार्श्वानामष्टमेन चतुर्थतः । जयाजस्य ययुः शेषाश्छद्मस्था हानिषष्ठतः ॥२५३॥
ज्ञानाप्तिः पूर्वतालेऽन्त्या वृषस्य सकटामुखे । ऊर्जयन्ते गिरौ नेमेः पार्श्वस्याप्याश्रमान्तिके ॥२५४॥

---

१ श्रीसुन्दर हस्तिनापुर, २ शुभ अयोध्या, ३ श्रावस्ती, ४ विनीता, ५ विजयपुर, ६ मङ्गलपुर, ७ पाटलीखण्ड, ८ पद्मखण्डपुर, ९ श्वेतपुर, १० अरिष्टपुर, ११ सिद्धार्थपुर, १२ महापुर, १३ धान्यवटपुर, १४ वर्धमानपुर, १५ सोमनसपुर, १६ मन्दरपुर, १७ हस्तिनापुर, १८ चक्रपुर, १९ मिथिला, २० राजगृह, २१ वीरपुर, २२ द्वारवती, २३ काम्यकृत और २४ कुण्डपुर ....ये यथाक्रमसे वृषभ आदि चौबीस तीर्थंकरोंके प्रथम पारणाके दिन प्रसिद्ध हैं ॥२३९-२४४॥ १ राजा श्रेयांस, २ ब्रह्मदत्त, ३ सम्पत्तिके द्वारा सुरेन्द्रकी समानता करनेवाला राजा सुरेन्द्रदत्त, ४ इन्द्रदत्त, ५ पद्मक, ६ सोमदत्त, ७ महादत्त, ८ सोमदेव, ९ पुष्पक, १० पुनर्वसु, ११ सुनन्द, १२ जय, १३ विशाख, १४ धर्मसिंह, १५ सुमित्र, १६ धर्ममित्र, १७ अपराजित, १८ नन्दिषेण, १९ वृषभदत्त, २० उत्तम नीतिका धारक दत्त, २१ वरदत्त, २२ नृपति, २३ धन्य और २४ बकुल ये वृषभादि तीर्थंकरोंको प्रथम पारणाओंके समय दान देनेवाले स्मरण किये गये हैं ॥ २४५-२४८ ॥ समस्त तीर्थंकरोंकी आदि पारणाओं और वर्धमान स्वामीकी सभी पारणाओंमें नियमसे रत्नवृष्टि हुआ करती थी। वह रत्नवृष्टि उत्कृष्टतासे साढ़े बारह करोड़ और जघन्य रूपसे साढ़े बारह लाख प्रमाण होती थी ॥ २४९-२५० ॥ इन दाताओंमें आदिके दो दाता और अन्तके दो दाता श्यामवर्णके थे और शेष सभी दाता तपाये हुए सुवर्णके समान वर्णवाले थे ॥ २५१ ॥ इनमें कितने ही दाता तो तपश्चरण कर उसी जन्मसे मोक्ष चले गये और कितने ही जिनेन्द्र भगवान्‌के मोक्ष जानेके बाद तीसरे भवमें मोक्ष गये ॥ २५२ ॥

वृषभनाथ मल्लिनाथ, और पार्श्वनाथको तेलाके बाद, वासुपूज्यको एक उपवासके बाद और शेष तीर्थंकरोंको वेलाके बाद केवलज्ञानकी प्राप्ति हुई थी ॥ २५३ ॥ वृषभनाथ भगवान्‌को पूर्वताल नगरके शकटामुख वनमें, नेमिनाथको गिरिनार पर्वतपर, पार्श्वनाथ

---

१. काम्या कृतं म० । २. सव्वणपारणदिणे णिवडइ वररयणवरिसमंबरदो । पणघणहददहलक्खं जेट्ठं अवरं सहस्सभागं च ॥६०२॥ अ० ४ त्रैलोक्यप्रज्ञप्ति ।

वीरस्य केवलोत्पाद ऋजुकूलासरित्तटे । अन्येषां तु जिनेन्द्राणां स्वोद्यानेषु यथायथम् ॥२५५॥
वृषभस्य श्रेयसो मल्लेः पूर्वाह्ने नेमिपार्श्वयोः । केवलोत्पत्तिरन्येषामपराह्ने जिनेशिनाम् ॥२५६॥
फाल्गुने कृष्णपक्षस्य त्वेकादश्यां वृषो भृतः । द्वादश्यां केवलं मल्लिः षष्ठ्यां तु मुनिसुव्रतः ॥२५७॥
सप्तम्यामेव संप्राप्तः पक्षे तत्रैव केवलम् । सुपार्श्वजिनचन्द्रश्च चन्द्रप्रभजिनस्तदा ॥२५८॥
चतुर्थ्यां चैत्रकृष्णस्य पार्श्वदेवस्य केवलम् । अमावास्यामनन्तस्य जिनेन्द्रस्य तदिष्यते ॥२५९॥
पक्षे सिते तृतीयस्यां नमेः कुन्थोश्च केवलम् । दशम्यां सुमतेर्जातं पद्मप्रभजिनस्य च ॥२६०॥
ज्ञेयं वैशाखशुक्लस्य दशम्यां वीरकेवलम् । सितेऽश्वयुजि पक्षेऽभून्नेमेस्तत्प्रतिपद्दिने ॥२६१॥
कार्तिकासितपञ्चम्यां शम्भवस्य सितात्मनि । सुविधेस्तु तृतीयस्यां तद्द्वादश्यामरस्य तु ॥२६२॥
पुष्यकृष्णचतुर्दश्यां शीतलः केवलं[1]श्रितः । दशम्यां विमलः शुक्ले शान्तिरेकादशे दिने ॥२६३॥
अजितोऽत्र चतुर्दश्यां केवलं प्रत्यपद्यत । अभिनन्दनधर्माख्यौ पौर्णमास्यामवाप तु ॥२६४॥
ज्ञानोत्पत्त्या त्वमावाख्या माघस्य श्रेयसा कृता । श्रेयसी वासुपूज्येन द्वितीया शुक्लपक्षजा ॥२६५॥
माघकृष्णचतुर्दश्यां वृषस्य परिनिर्वृतिः । फाल्गुनस्यासिते पक्षे चतुर्थ्यां पद्मभासिनः ॥२६६॥
षष्ठ्यां सुपार्श्वनाथस्य द्वादश्यां मौनिसु[2]व्रती । सितफाल्गुनपञ्चम्यां मल्लिश्रीवासुपूज्ययोः ॥२६७॥
अमावस्या तु चैत्रस्य निर्वृता[3]भ्यां पवित्रिता । अनन्तारजिनेन्द्राभ्यां शुक्लपक्षस्य तु क्रमात् ॥२६८॥
पञ्चम्यामजितः षष्ठ्यां संभवः परिनिर्वृतः । दशम्यां सुमतिर्नाथः सुरनाथगणस्तुतः ॥२६९॥

भगवान्को आश्रमके समीप, महावीर भगवान्को ऋजुकूला नदीके तटपर और शेष तीर्थंकरोंको अपने-अपने नगरके उद्यानोंमें ही केवलज्ञान उत्पन्न हुआ था ॥ २५४–२५५ ॥ वृषभनाथ, श्रेयांसनाथ, मल्लिनाथ, नेमिनाथ और पार्श्वनाथ भगवान्को पूर्वाह्न कालमें तथा शेष तीर्थंकरोंको अपराह्ण कालमें केवलज्ञानकी उत्पत्ति हुई थी ॥ २५६ ॥

फाल्गुन कृष्ण एकादशीके दिन वृषभनाथ, फाल्गुन कृष्ण द्वादशीके दिन मल्लिनाथ, फाल्गुन कृष्ण षष्ठीके दिन मुनिसुव्रतनाथ, फाल्गुन कृष्ण सप्तमीके दिन सुपार्श्वनाथ और चन्द्रप्रभ, चैत्र कृष्ण चतुर्थीके दिन पार्श्वनाथ, चैत्रकृष्ण अमावास्याके दिन अनन्त जिनेन्द्र, चैत्र शुक्ल तृतीयाके दिन नमिनाथ और कुन्थुनाथ, चैत्रशुक्ल दशमीके दिन सुमतिनाथ और पद्मप्रभ भगवान्, वैशाख शुक्ल दशमीके दिन महावीर, आश्विन शुक्ल प्रतिपदाको नेमिनाथ, कार्तिक कृष्ण पञ्चमीको संभवनाथ, कार्तिक शुक्ल तृतीयाको सुविधिनाथ, कार्तिक शुक्ल द्वादशीको अरनाथ, पौष कृष्ण चतुर्दशीको शीतलनाथ, पौष कृष्ण दशमीको विमलनाथ, पौष शुक्ल एकादशीको शान्तिनाथ, पौष शुक्ल चतुदशीको अजितनाथ, पौष शुक्ल पूर्णिमाको अभिनन्दन और धर्मनाथ, माघकृष्ण अमावसको श्रेयांसनाथ और माघ शुक्ल द्वितीयाको वासुपूज्य भगवान् केवलज्ञानको प्राप्त हुए थे ॥ २५७–२६५ ॥

माघ कृष्ण चतुर्दशीके दिन वृषभनाथका, फाल्गुन कृष्ण चतुर्थीके दिन पद्मप्रभका, फाल्गुन कृष्ण षष्ठीके दिन सुपार्श्वनाथका, फाल्गुन कृष्ण द्वादशीके दिन मुनिसुव्रतनाथका, फाल्गुन शुक्ल पञ्चमीके दिन मल्लिनाथ और श्रीवासुपूज्यका निर्वाण हुआ है। चैत्रकी अमावास्या निर्वाणको प्राप्त हुए अनन्तनाथ और अरनाथ जिनेन्द्रके द्वारा पवित्र की गयी है। चैत्र शुक्ल पञ्चमीके दिन अजितनाथ, चैत्र शुक्ल षष्ठीके दिन संभवनाथ और चैत्रशुक्ल दशमीके दिन इन्द्रोंके समूहसे स्तुत सुमतिनाथ निर्वाणको प्राप्त हुए हैं ॥ २६६–२६९ ॥

---

१. विमलं म० । २. मौनिसुव्रतः म०, ख०, ङ०, मुनिसुव्रतस्येयं मौनिसुव्रती परिनिर्वृतिरित्यनेन सम्बन्धः । ३. निर्मिताभ्यां म०, ख० ।

वैशाखस्यापुनात्सिद्ध्या नमिः कृष्णचतुर्दशीम् । सितां प्रतिपदं कुन्थुः सप्तमीमभिनन्दनः ॥२७० ॥
शान्तेः सिद्धितिथिः सिद्धा ज्येष्ठकृष्णचतुर्दशी । तस्य शुक्लचतुर्थी तु धर्मस्य प्रतिपादिता ॥२७१ ॥
आषाढकृष्णपक्षस्य विमलस्याष्टमी मता । नेमेः शुक्लाष्टमी मान्या निर्वाणतिथिरिष्यते ॥२७२॥
श्रावणे शुक्लसप्तम्यां पार्श्वस्य परिनिर्वृतिः । श्रेयसः पौर्णमास्यां तु धनिष्ठासु प्रतिष्ठिता ॥२७३॥
चन्द्राभः शुक्लसप्तम्यां सिद्धो भाद्रपदस्य तु । अष्टम्यां पुष्पदन्तोऽस्य शीतलोऽश्वयुजस्य तु ॥२७४॥
निर्वृतः सितपञ्चम्यां कृष्णायां परिनिर्वृतिः । श्रीवीरस्य चतुर्दश्यां कार्तिकस्य विनिश्चिता ॥२७५॥
वृषोऽजितोऽपि च श्रेयान् शीतलश्चाभिनन्दनः । सुमतिश्च सुपार्श्वश्च पूर्वाह्ने चन्द्रभस्तथा ॥२७६॥
संभवः पद्मभासश्च पुष्पदन्तो भवान्तकः । अपराह्णे जिनाः सिद्धा वासुपूज्यजिनस्तथा ॥२७७॥
विमलानन्तशान्तीनां कुन्थोर्मल्लीशविंशयोः । प्रदोषसमये ज्ञेया निर्वृतिर्नेमिपार्श्वयोः ॥२७८॥
धर्मस्यारजिनेन्द्रस्य नमिवीरजिनेन्द्रयोः । प्रत्यूषे सिद्धिरुद्दिष्टा नष्टाष्टविधकर्मणाम् ॥२७९॥
[1]वृषस्य वासुपूज्यस्य नेमेः पर्यङ्कबन्धतः । कायोत्सर्गस्थितानां तु सिद्धिः शेषजिनेशिनाम् ॥२८०॥
चतुर्दशदिनान्याद्यः[2] संहृत्य विहृतिं जिनः । वीरोहर्द्वितयं शेषा मासं संहृत्य मुक्तिगाः ॥२८१॥
वीरस्यैकस्य निर्वाणं[3] षड्विंशतिसहितस्य तु । पार्श्वस्य सह नेमेः षट्त्रिंशता पञ्चभिः शतैः ॥२८२॥

वैशाख कृष्ण चतुर्दशीको नमिनाथ भगवान्, वैशाख शुक्ल प्रतिपदाको कुन्थुनाथने और वैशाख शुक्ल सप्तमीको अभिनन्दननाथने अपने निर्वाणसे पवित्र किया है ॥२७०॥ ज्येष्ठ कृष्ण चतुर्दशी शान्तिनाथ भगवान्की, ज्येष्ठ शुक्ल चतुर्थी धर्मनाथकी, आषाढ़ कृष्ण अष्टमी विमलनाथकी और आषाढ़ शुक्ल अष्टमी नेमिनाथ भगवान्की निर्वाणतिथि मानी जाती है ॥२७१-२७२॥ श्रावण शुक्ल सप्तमीको पाइर्वनाथका और श्रावण शुक्ल पूर्णिमाको धनिष्ठा नक्षत्रमें श्रेयांसनाथका निर्वाण हुआ है ॥२७३॥ भाद्रपद शुक्ल सप्तमीको चन्द्रप्रभ, भाद्रपद शुक्ल अष्टमीको पुष्पदन्त और आश्विन शुक्ल पञ्चमीको शीतलनाथ निर्वाणको प्राप्त हुए हैं एवं कार्तिक कृष्ण चतुदर्शीको श्री भगवान् महावीरका निर्वाण निश्चित है ॥२७४-२७५॥

वृषभनाथ, अजितनाथ, श्रेयांसनाथ, शीतलनाथ, अभिनन्दननाथ, सुमतिनाथ, सुपाइर्वनाथ और चन्द्रप्रभ ये पूर्वाह्नकालमें, संभवनाथ, पद्मप्रभ, संसार-भ्रमणका अन्त करनेवाले पुष्पदन्त और वासुपूज्य ये अपराह्णकालमें सिद्ध हुए हैं ॥२७६-२७७॥ विमलनाथ, अनन्तनाथ, शान्तिनाथ, कुन्थुनाथ, मल्लिनाथ, मुनिसुव्रतनाथ, नेमिनाथ और पाइर्वनाथकी सायंकालमें मुक्ति जानना चाहिए ॥२७८॥ और अष्ट प्रकारके कर्मोंको नष्ट करनेवाले धर्मनाथ, अरनाथ, नमिनाथ और महावीर जिनेन्द्रकी प्रातःकालमें सिद्धि कही गयी है ॥२७९॥

भगवान् वृषभनाथ, वासुपूज्य और नेमिनाथ पर्यङ्क आसनसे तथा शेष तीर्थंकर कायोत्सर्ग आसनसे स्थित हो मोक्ष गये हैं ॥२८०॥ आदि जिनेन्द्र भगवान् वृषभदेव, मुक्तिके पूर्व चौदह दिन तक विहारको संकोचकर मोक्ष गये हैं। भगवान् महावीर दो दिन और शेष तीर्थंकर एक मास पूर्व विहार बन्द कर मोक्षगामी हुए हैं ॥२८१॥

एक महावीर भगवान्का छब्बीस मुनियोंके साथ, पाइर्वनाथ तथा नेमिनाथका

---

१. उसहो य वासुपुज्जो णेमी पल्लंकबद्धया सिद्धा । काउस्सग्गेण जिणा सेसा मुत्ति समावण्णा । त्रै०प्र० चतुर्थ अधिकार ॥१२१०॥ २. उसहो चोद्दसदिवसे दुदिणं वीरेसरस्स सेसाणं । मासेण य विणिवत्ते जोगादो मुत्तिसम्पण्णो ॥१२०९ त्रै० प्र० च० अधिकार। ३. निर्वाणः म०, ख०, ङ० । मुक्तिः कैवल्यनिर्वाणं श्रेयो निःश्रेयसामृतम् 'इत्यमरः

मल्लिः पञ्चशतैः सिद्धः शान्तिर्नवशतैः सह । सैकैरष्टशतैर्धर्मो द्वादशः सैकषट्शतैः ॥२८३॥
सहस्रैर्विमलः षड्भिरनन्तस्तैस्तु सप्तभिः । सप्तमः पञ्चशत्यामा पद्माभोऽष्टशतैस्त्रिभिः ॥२८४॥
वृषो दशसहस्रैस्तु मुनिभिर्मुक्तिमाश्रितः । प्रत्येकं तु जिनाः शेषाः सहस्रेण समन्विताः ॥२८५॥
भरतश्चक्रवर्त्याद्यः सगरो मघवांस्ततः । सनत्कुमारनामान्यः शान्तिः कुन्थुररस्तथा ॥२८६॥
सुभूमश्च महापद्मो हरिषेणो जयोऽपरः । ब्रह्मदत्तश्च षट्खण्डनाथा द्वादशचक्रिणः ॥२८७॥
त्रिपृष्ठश्च द्विपृष्ठश्च स्वयम्भूः पुरुषोत्तमः । पुरुषोपपदौ सिंहपुण्डरीकौ प्रचण्डकौ ॥२८८॥
दत्तो नारायणो कृष्णो वासुदेवा नवोदिताः । त्रिखण्डभरताधीशाः पराखण्डितपौरुषाः ॥२८९॥
विजयोऽचलः सुधर्माख्यः सुप्रभश्च सुदर्शनः । नान्दो च नन्दिमित्रश्च रामः पद्मो बला नव ॥२९०॥
अश्वग्रीवो भुवि ख्यातस्तारको मेरुकस्तथा । निशुम्भः शुम्भदम्भोजवदनो मधुकैटभः ॥२९१॥
बलिः प्रहरणाभिख्यो रावणः खेचरान्वयः[1] । भूचरस्तु जरासन्धो नवैते प्रतिशत्रवः ॥२९२॥
[2]ऊर्ध्वगा बलदेवास्ते निर्निदाना भवान्तरे । अधोगाः सनिदानास्तु केशवाः प्रतिशत्रवः ॥२९३॥
वृषभे भरतश्चक्रो सगरोऽप्यजिते जिने । मघवांस्तुर्यश्चक्री च धर्मशान्त्यन्तरे मतौ ॥२९४॥
निजं जिनान्तरं ज्ञेयं शान्तिकुन्थ्वरचक्रिणाम् । चक्रवर्ती सुभूमोऽभूदरमल्लिजिनान्तरे ॥२९५॥

पाँच सौ छत्तीस मुनियोंके साथ निर्वाण हुआ है ॥२८२॥ मल्लिनाथ पाँच सौ, शान्तिनाथ नौ सौ, धर्मनाथ आठ सौ एक, वासुपूज्य छह सौ एक, विमलनाथ छह हजार, अनन्तनाथ सात हजार, सुपार्श्वनाथ पाँच सौ, पद्मप्रभ तीन हजार आठ सौ, वृषभनाथ दश हजार और शेष तीर्थंकर एक-एक हजार मुनियोंके साथ मोक्षको प्राप्त हुए हैं† ॥२८३–२८५॥

भरत, सगर, मघवा, सनत्कुमार, शान्तिनाथ, कुन्थुनाथ, अरनाथ, सुभूम, महापद्म, हरिषेण, जय और ब्रह्मदत्त ये बारह चक्रवर्ती छह खण्डोंके स्वामी हुए ॥२८६–२८७॥ त्रिपृष्ठ, द्विपृष्ठ, स्वयंभू, पुरुषोत्तम, पुरुषसिंह, पुरुष पुण्डरीक, (पुण्डरीक) दत्त, नारायण (लक्ष्मण) और कृष्ण ये नौ वासुदेव कहे गये हैं। ये तीन खण्ड भरतके स्वामी होते हैं तथा इनका पराक्रम दूसरोंके द्वारा खण्डित नहीं होता ॥२८८–२८९॥ विजय, अचल, सुधर्म, सुप्रभ, सुदर्शन, नान्दी, नन्दिमित्र, राम और पद्म ये नौ बलभद्र हैं ॥२९०॥ अश्वग्रीव, पृथिवीमें प्रसिद्ध तारक, मेरुक, निशुम्भ, सुशोभित कमलके समान मुखवाला मधुकैटभ, बलि, प्रहरण, विद्याधर वंशज रावण और भूमिगोचरी जरासंध ये नौ प्रतिनारायण हैं ॥२९१–२९२॥ बलभद्र ऊर्ध्वगामी—स्वर्ग अथवा मोक्षगामी होते हैं तथा भवान्तरमें कोई निदान नहीं बाँधते और नारायण अधोगामी होते हैं एवं भवान्तरमें निदान बाँधते हैं ॥२९३॥

चक्रवर्ती भरत वृषभनाथके समयमें हुआ, सगर चक्रवर्ती अजितनाथके कालमें हुआ, मघवा और सनत्कुमार धर्मनाथ तथा शान्तिनाथके अन्तरालमें हुए। शान्ति, कुन्थु और अरनाथ चक्रवर्तीका काल अपना-अपना अन्तराल काल है। सुभूम चक्रवर्ती अरनाथ और मल्लिनाथके अन्तरालमें हुआ। महापद्म मल्लिनाथ और मुनिसुव्रतनाथके अन्तरालमें हुआ।

---

१. खेचरान्वयाः म० । २. अणिदाणगदा सव्वे बलदेवा केसवा णिदाणगदा । उड्ढंगामी सव्वे बलदेवा केसवा अधोगामी ॥१४३६ त्रि० प्र० ४ अधिकार ।

† इस उल्लेखसे यह बात सिद्ध होती है कि छह माह आठ समयमें जो छह सौ आठ जीवोंके मोक्ष जानेकी बात प्रसिद्ध है वह कमसे-कम जीवोंकी बात समझनी चाहिए। अधिक जीवोंकी संख्या निर्धारित नहीं है। कितने ही लोग कहते हैं कि इतने मुनि तीर्थंकरके कालमें आगे-पीछे मोक्ष गये परन्तु यह उचित नहीं है, क्योंकि तीर्थंकरोंके मोक्ष जानेवाले शिष्योंकी संख्या त्रैलोक्यप्रज्ञप्तिके चतुर्थ अधिकारमें गाथा नं० १२१८ से १२२९ तक अलग बतलायी है।

मुनिसुव्रतमल्ल्यन्तर्महापद्मः प्रकीर्तितः । मुनिसुव्रतनम्यन्तर्हरिषेणस्तु चक्रभृत् ॥२९६॥
नमिनेम्यन्तरे चक्री जयसेनोऽभवत्ततः । ब्रह्मदत्तोऽपि निर्दिष्टो नेमिपार्श्वजिनान्तरे ॥२९७॥
अष्टानां सिद्धिरुद्दिष्टा ब्रह्मदत्तसुभूमयोः । [1]सप्तमी मघवांस्तुर्यो तृतीयं कल्पमाश्रितौ ॥२९८॥
श्रेयः प्रभृतिधर्मान्तान् पञ्चापश्यन् बलोर्जितान् । त्रिपृष्ठाद्या नृसिंहान्ताः पञ्चसंख्यास्तु केशवाः ॥२९९॥
पुण्डरीकोऽरमल्ल्यन्तर्वासुदेवः प्रकीर्तितः । मुनिसुव्रतमल्ल्यन्तर्दत्तनामा तु केशवः ॥३००॥
मुनिसुव्रतनम्योस्तु मध्ये नारायणः स्मृतः । प्रत्यक्षं वन्दको नेमेः कृष्णः पद्मसमन्वितः ॥३०१॥
[2]एकस्य सप्तमी पृथ्वी पञ्चानां षष्ठ्युदीरिता । पञ्चम्येकस्य चान्यस्य पर्यन्तस्य तृतीयभूः ॥३०२॥
[3]अष्टानां मुक्तिरुद्दिष्टा बलानां तु तपोबलात् । अन्तस्य ब्रह्मकल्पस्तु तीर्थे कृष्णस्य सेत्स्यतः ॥३०३॥
[4]धनुःशतानि पञ्चाद्ये हानिः पञ्चाशतोऽष्टसु । दशानां पञ्चसु प्रोक्ता पञ्चानामष्टसु क्षयः ॥३०४॥
उत्सेधः पार्श्वनाथस्य नवारत्निमितस्ततः । वीरस्यारत्नयः सप्त जिनोत्सेधः क्रमादयम् ॥३०५॥

महापद्म मल्लिनाथ और मुनिसुव्रतनाथके अन्तरालमें हुआ । हरिषेण, मुनिसुव्रत और नमिनाथके अन्तरालमें हुआ । जयसेन चक्रवर्ती नमिनाथ और पार्श्वनाथके अन्तरमें हुआ और ब्रह्मदत्त चक्रवर्ती, नेमिनाथ तथा पार्श्वनाथ जिनेन्द्रके अन्तरालमें हुआ है ॥२९४-२९६॥ इन बारह चक्रवर्तियोंमें आठको मुक्ति प्राप्त हुई है, ब्रह्मदत्त और सुभूम सातवीं पृथिवी गये हैं तथा मघवा और सनत्कुमार तीसरे स्वर्गको प्राप्त हुए हैं ॥२९७॥

त्रिपृष्ठसे लेकर पुरुषसिंह तकके पाँच नारायणोंने श्रेयांसनाथसे लेकर धर्मनाथ तकके पाँच तीर्थंकरोंके अन्तराल कालको बलभद्रोंके साथ देखा है अर्थात् त्रिपृष्ठादि पाँच नारायण और विजय आदि पाँच बलभद्र श्रेयांसनाथसे लेकर धर्मनाथ तकके अन्तरालमें हुए हैं। पुण्डरीक, अरनाथ और मल्लिनाथके अन्तरालमें, दत्त, मल्लिनाथ और मुनिसुव्रतनाथके अन्तरालमें, नारायण (लक्ष्मण), मुनि सुव्रतनाथ और नमिनाथके अन्तरालमें हुआ है और कृष्ण पद्मके साथ नेमिनाथकी वन्दना करनेवाला प्रत्यक्ष विद्यमान है ही ॥२९८-३०१॥ इन नारायणोंमें प्रथम नारायण त्रिपृष्ठ सातवीं पृथिवी गया । दूसरेसे लेकर छठें तक पाँच नारायण छठी पृथिवी गये । सातवाँ पाँचवीं पृथिवी गया और आठवाँ तीसरी पृथिवी गया और नौवाँ भी तीसरी पृथिवी जायेगा ॥ ३०२ ॥ प्रारम्भके आठ बलभद्रोंने तपके माहात्म्यसे मुक्ति प्राप्त की है और अन्तिम बलभद्र पाँचवें ब्रह्म स्वर्ग जावेगा । यह वहाँ से आकर जब कृष्ण तीर्थङ्कर होगा तब उसके तीर्थमें सिद्ध होगा—मोक्ष प्राप्त करेगा ॥३०३॥

वृषभजिनेन्द्रके शरीरकी ऊँचाई पाँच सौ धनुष थी, फिर आठ तीर्थङ्करोंकी ऊँचाई पचास-पचास धनुष कम होती गयी । उसके बाद पाँच तीर्थङ्करोंकी दस-दस धनुष कम हुई । तदनन्तर आठ तीर्थङ्करोंकी पाँच-पाँच धनुष कम हुई ॥३०४॥ पार्श्वनाथकी नौ हाथ और महावीरकी सात हाथ ऊँचाई होगी । इस प्रकार क्रमसे तीर्थङ्करोंकी ऊँचाई जानना चाहिए ॥३०५॥

---

१. सप्तमीं म० । २. पढमहरीसत्तम्मिए पंचच्छट्ठाम्मि पंचमी एक्को । एक्को तुरिये चरिमो तदिए णिरए तहेव पडिसत्तू ॥१४३८॥ त्रै० प्र०, अ० ४, त्रैलोक्यप्रज्ञप्तौ त्रिलोकसारे च लक्ष्मणस्य चतुर्थपृथिवीगमनं प्रख्यातम् । हरिवंशे पद्मचरिते च तृतीयपृथिवीगमनं प्रख्यातम् । ३. णिस्सेयस मट्ठ गया हलिणो चरिमो बम्ह कप्पगदो । तत्तो कालेण मदो सिज्झदि, केहस्स तित्थम्मि ॥१४३७॥ त्रै०, प्र०, च०, अ० । ४. पंचसयधणुपमाणो उसहजिणिंदस्स होदि उच्छेहो । तत्तोपण्णासूणा णियमेण य पुप्फदंतपेरंते ॥५८५॥ एत्तो जाव अणंतं दस दस कोदंडमेत्तपरिहीणो । तत्तो णेमि जिणंतं पणपणचावेहिं परिहीणो ॥५८६॥ णव हत्था पासजिणे सग हत्था वड्ढमाण णामम्मि । एत्तो तित्थयराणं सरीरवण्णं परूवेमो ॥५८७॥ त्रै० प्र०, अ० ४ ।

पञ्च चापशतान्याद्ये चक्रिण्युत्सेध इष्यते । चतुःशतानि सार्धानि धनूंषि सगरस्य तु ॥३०६॥
द्वाचत्वारिंशदिष्टानि सार्धानि तु धनूंष्यतः । सार्धेनैकेन युक्तानि चत्वारिंशद्धनूंषि तु ॥३०७॥
चत्वारिंशदथोक्तानि पञ्चमस्य तु चक्रिणः । पञ्चत्रिंशत्ततस्त्रिंशदष्टाविंशतिरष्टमे ॥३०८॥
द्वाविंशतिर्महापद्मे विंशतिश्च चतुर्दश । ततः सप्त धनूंषि स्यादुत्सेधश्चक्रवर्तिनाम् ॥३०९॥
अशीतिः सप्ततिः षष्टिः पञ्चाशत्पञ्चभिः सह । चत्वारिंशद्धनूंषि स्युः षड्विंशतिस्ततः परः ॥३१०॥
द्वाविंशतिस्तथोक्तानि षोडशापि दशैव तु । उत्सेधो वासुदेवानां बलदेवप्रतिद्विषाम् ॥३११॥
आयुश्चतुरशीतिश्च पूर्वलक्षा जिनेशिनाम् । द्वासप्ततिश्च षष्टिश्च पञ्चाशच्च यथाक्रमम् ॥३१२॥
चत्वारिंशत्तथा त्रिंशद्विंशतिश्च दशैव ताः । लक्षे लक्षं च पूर्वाणां दशानामायुरीरितम् ॥३१३॥
वर्षलक्षास्ततो लक्ष्या अशीतिश्चतुरुत्तरा । द्वासप्ततिस्ततः षष्टिस्त्रिंशद्दश तथैककम् ॥३१४॥
ततो वर्षसहस्राणि सपञ्चनवतिश्चतुः । अशीतिः पञ्चपञ्चाशत्त्रिंशद्दश तथैककम् ॥३१५॥
ततो वर्षशतं पूर्णं द्वासप्ततिरिति क्रमात् । जिनानामायुराख्यातमायुर्वृद्धिं करोतु वः ॥३१६॥
लक्षाश्चतुरशीतिस्तु द्वासप्ततिरिति क्रमात् । पूर्वाणां वर्षलक्षास्तु पञ्चत्र्येकाः प्रपञ्चिताः ॥३१७॥
ततो वर्षसहस्राणि नवतिः पञ्चभिर्युता । तथा चतुरशीतिः स्यादष्टाषष्टिस्ततः पुनः ॥३१८॥
त्रिंशत् षड्विंशतिस्त्रीणि वर्षसप्तशतानि च । आयुःप्रमाणमेतत्तु कथितं चक्रवर्तिनाम् ॥३१९॥
वर्षाणां चतुरशीतिर्लक्षा द्वासप्ततिस्ततः । षष्टिस्त्रिंशद्दशातोऽपि पञ्चषष्टिसहस्रकम् ॥३२०॥
द्वात्रिंशद्द्वादशैकं च प्रोक्तं वर्षसहस्रकम् । केशवानां यथासंख्यमायुःसंख्या विदां मता ३२१॥

प्रथम चक्रवर्तीकी ऊँचाइ, पाँच सौ धनुष, दूसरे सगर चक्रवर्तीकी साढ़े चार सौ धनुष, तीसरेकी साढ़े बयालीस धनुष, चौथेकी साढ़े इकतालीस धनुष, पाँचवेंकी चालीस धनुष, छठेंकी पैंतीस धनुष, सातवेंकी तीस धनुष, आठवेंकी अट्ठाईस धनुष, नौवें महापद्म-की बाईस धनुष, दशवेंकी बीस धनुष, ग्यारहवेंकी चौदह धनुष, और बारहवेंकी सात धनुष थी। इस प्रकार चक्रवर्तियोंकी ऊँचाईका वर्णन किया ॥३०६-३०९॥

अस्सी, सत्तर, साठ, पचपन, चालीस, छब्बीस, बाईस, सोलह और दश धनुष यह क्रमसे नारायण, बलभद्र और प्रतिनारायणोंकी ऊँचाई है ॥३१०-३११॥

प्रारम्भसे लेकर दशवें तीर्थंकर तककी आयु क्रमसे चौरासी लाख पूर्व, बहत्तर लाख पूर्व, साठ लाख पूर्व, पचास लाख पूर्व, चालीस लाख पूर्व, तीस लाख पूर्व, बीस लाख पूर्व, दश लाख पूर्व, दो लाख पूर्व और एक लाख पूर्व आयु कही गयी है ॥३१२-३१३॥ तदनन्तर श्रेयांसनाथसे लेकर महावीर पर्यन्तकी आयु क्रमसे चौरासी लाख वर्ष, बहत्तर लाख वर्ष, साठ लाख वर्ष, तीस लाख वर्ष, दश लाख वर्ष, एक लाख वर्ष, पंचानबे हजार वर्ष, चौरासी हजार वर्ष, पचपन हजार वर्ष, तीस हजार वर्ष, दश हजार वर्ष, एक हजार वर्ष, सौ वर्ष और बहत्तर वर्ष की है। इस प्रकार क्रमसे तीर्थङ्करोंकी आयु कही। यह तुम्हारी आयु वृद्धि करे ॥३१२-३१६॥

चौरासी लाख पूर्व, बहत्तर लाख पूर्व, पाँच लाख, तीन लाख, एक लाख, पंचानबे हजार, चौरासी हजार, अड़सठ हजार, तीस हजार, छब्बीस हजार, तीन हजार और सात सौ वर्ष यह क्रमसे चक्रवर्तियोंकी आयुका प्रमाण कहा गया है ॥३१७-३१९॥

चौरासी लाख, बहत्तर लाख, साठ लाख, तीस लाख, दश लाख, पैंसठ हजार, बत्तीस हजार, बारह हजार और एक हजार वर्ष यह क्रमसे नौ नारायणोंकी आयुका प्रमाण विद्वानोंके द्वारा माना गया है ॥३२०-३२१॥

आयुर्लक्षा बलानां स्युः सप्ताशीतिश्च सप्ततिः । सप्तोत्तरा तथा षष्टिः पञ्चत्रिंशद्दश क्रमात् ॥३२२॥
षष्टिर्वर्षसहस्राणि त्रिंशद्दश च सप्तभिः । द्विशत्याब्दसहस्रं तु तच्चरमस्य बलस्य तु ॥३२३॥
वृषाद्याः धर्मपर्यन्ता जिनाः पञ्चदश क्रमात् । निरन्तरास्ततः शून्ये त्रिजिनाश्शून्ययोर्द्वयम् ॥३२४॥
[1]जिनः शून्यद्वयं तस्माज्जिनः शून्यद्वयं पुनः । [2]जिनः शून्यं जिनः शून्यं द्वौ जिनेन्द्रौ निरन्तरौ ॥३२५॥
चक्रिणौ भरताद्यौ द्वौ तौ शून्यानि त्रयोदश । षट्चक्रिणस्त्रिशून्यानि चक्री शून्यं च चक्रभृत् ॥३२६॥
ततः शून्यद्वयं चक्री शून्यं चक्रधरस्ततः । शून्ययोर्द्वितयं तस्मादिति चक्रधरक्रमः[3] ॥३२७॥
शून्यानि दश पञ्चातस्त्रिपृष्ठाद्यास्तु केशवाः । शून्यषट्कं ततश्चैकः केशवो व्योमकेशवः ॥३२८॥
त्रिशून्यं केशवश्चैकः शून्यद्वितयमप्यतः । केशवस्त्रीणि शून्यानि केशवानामयं क्रमः ॥३२९॥

सतासी लाख, सत्तर लाख, सड़सठ लाख, पैंतीस लाख, दश लाख, साठ हजार, तीस हजार, सत्रह हजार और बारह सौ वर्ष यह क्रमसे बलभद्रोंकी आयु है ॥३२२-३२३॥ तीर्थंकरोंके कालमें चक्रवर्ती तथा नारायणोंका क्रम जाननेके लिए चौंतीस कोठाका एक यन्त्र बनाना चाहिए। उसके नीचे चौंतीस-चौंतीस कोठाके दो यन्त्र और बनाना चाहिए। ऊपरके यन्त्रमें तीर्थंकरोंका, बीचके यन्त्रमें चक्रवर्तियोंका और नीचेके यन्त्रमें नारायणोंका विन्यास करे। यन्त्रोंमें तीर्थंकरोंके लिए एकका अंक, चक्रवर्तियोंके लिए दोका अंक और नारायणोंके लिए तीनका अंक प्रयुक्त किया जाता है। ऊपरके यन्त्रमें ऋषभनाथसे लेकर धर्मनाथ तक पन्द्रह तीर्थंकरोंका क्रमसे विन्यास करना चाहिए अर्थात् प्रारम्भसे लेकर पन्द्रह खानोंमें एक-एक लिखना चाहिए। उसके बाद दो शून्य, फिर तीन तीर्थंकर, फिर दो शून्य, फिर एक तीर्थंकर, फिर दो शून्य, फिर एक तीर्थंकर, फिर दो शून्य, फिर एक तीर्थंकर, फिर एक शून्य और फिर लगातार दो तीर्थंकर इस प्रकार तीर्थंकरोंका विन्यास करना चाहिए। तदनन्तर नीचेके यन्त्रमें भरत आदि दो चक्रवर्ती, फिर तेरह शून्य, फिर छह चक्रवर्ती, फिर तीन शून्य, फिर एक चक्रवर्ती, फिर एक शून्य, फिर एक चक्रवर्ती, फिर दो शून्य, फिर एक चक्रवर्ती, फिर एक शून्य, फिर एक चक्रवर्ती और फिर दो शून्य इस प्रकार चक्रवर्तियोंका क्रमसे विन्यास करे। तदनन्तर नीचेके यन्त्रमें प्रारम्भसें दश शून्य, फिर त्रिपृष्ठ आदि पाँच नारायण, फिर छह शून्य, फिर एक नारायण, फिर एक शून्य, फिर एक नारायण, फिर तीन शून्य, फिर एक नारायण, फिर दो शून्य, फिर एक नारायण और फिर तीन शून्य इस प्रकार क्रमसे नारायणोंका विन्यास करे। इसकी संदृष्टि इस प्रकार है*—

भावार्थ—भरत चक्रवर्ती वृषभनाथके समक्ष, सगर चक्रवर्ती अजिनेश्वरके समक्ष तथा

१	१	१	१	१	१	१	१	१	१	१	१	१	१	१	०	०	१	१	१	०	०	१	०	०	१	०	०	१	०	१	०	१	१
२	२	०	०	०	०	०	०	०	०	०	०	०	०	०	२	२	२	२	२	२	०	०	०	२	२	२	०	०	२	०	२	०	०
०	०	०	०	०	०	०	०	०	०	३	३	३	३	३	०	०	०	०	०	०	३	०	३	०	०	०	३	०	०	३	०	०	०

१. जिने म० । २. जिने म० । ३. चक्रधराः क्रमात् ङ० ।

* यह प्रकरण तिलोयपण्णत्तिके चतुर्थ महाधिकारसे लिया हुआ जान पड़ता है, वहाँ इस प्रकरणकी गाथाएँ इस प्रकार हैं—

रिसहेसरस्स भरहो सगरो अजिएसरस्स पच्चक्खं । मघवा सणक्कुमारो दो चक्की धम्म संति विचाले ॥१२८३॥ अह संति कुन्थु अर जिण तित्थयरा ते च चक्कवट्टित्ते । एक्को सुभउमचक्की अरमल्लीणंतराय-

पादः कुमारकालः स्यादायुषो वृषभस्य सः । न्यूनः संयमकालस्य राज्यकालस्ततोऽपरः ॥३३०॥

मघवा और सनत्कुमार ये दो चक्रवर्ती, धर्मनाथ और शान्तिनाथके अन्तरालमें हुए हैं। शान्ति, कुन्थु और अर ये तीन स्वयं तीर्थंकर तथा चक्रवर्ती हुए हैं। सुभौम चक्रवर्ती अरनाथ और मल्लिनाथके अन्तरालमें, पद्म चक्रवर्ती मल्लि और मुनिसुव्रतके अन्तरालमें, हरिषेण चक्रवर्ती सुव्रत और नमिनाथके अन्तरालमें, जयसेन चक्रवर्ती नमिनाथ और नेमिनाथके अन्तरालमें तथा ब्रह्मदत्त चक्रवर्ती नेमिनाथ और पार्श्वनाथके अन्तरालमें हुए हैं। यहाँ जो चक्रवर्ती तीर्थंकरोंके समक्ष न होकर अन्तरालमें हुए हैं उनके ऊपर तीर्थंकरोंके कोष्ठकमें शून्य रखे गये हैं और जो तीर्थंकरोंके समक्ष हुए हैं उनके ऊपर तीर्थंकरोंके कोष्ठकमें एक लिखा गया है। जिन तीर्थंकरोंके समक्ष चक्रवर्ती हुए हैं उनके नीचे चक्रवर्तीके कोष्ठकमें दो का अंक लिखा गया है और जिनके समक्ष अभाव रहा है उनके नीचे शून्य रखा गया है। इसी प्रकार नारायणोंके विषयमें जानना चाहिए अर्थात् पहलेसे लेकर दशम तीर्थंकर तक तो कोई भी नारायण नहीं हुआ पश्चात् ग्यारहवेंसे पन्द्रहवें तक पाँच नारायण हुए। तदनन्तर अर और मल्लिनाथके अन्तरालमें, मल्लि और मुनिसुव्रतके अन्तरालमें, सुव्रत और नमिके अन्तरालमें और नेमिनाथके समयमें नारायण हुए। जहाँ नारायणोंका अभाव है वहाँ कोष्ठकोंमें शून्य और जहाँ सद्भाव है, वहाँ तीनका अंक लिखा गया है ॥३१९-३२४॥

भगवान् वृषभदेवकी आयु चौरासी लाख पूर्वकी थी। उसका एक चतुर्थ भाग अर्थात् बीस लाख पूर्वका कुमारकाल था। शेष संयमके कालको घटाकर जो बचता है वह राज्यकाल था। भावार्थ—भगवान् वृषभदेवने बीस लाख पूर्व कुमारकाल बिताया, त्रेसठ लाख पूर्व राज्य किया, एक हजार वर्ष तप किया और एक हजार वर्ष कम एक लाख पूर्व केवलीकाल

म्मि ॥ १२८४ ॥ अह पउमचक्कवट्टी मल्ली मुणि सुव्वयाण विच्चाले। सुव्वयणमीण मज्झे हरिसेणो णामचक्कहरो ॥ १२८५ ॥ जयसेणचक्कवट्टी णमि-णेमिजिणाणमंतरालम्मि। तह बह्मदत्तणामो चक्कवई णेमिपासविच्चाले ॥ १२८६ ॥ चउसहिय तीस कोट्ठा कादव्वा तिरिय रूव पंत्तीए। उड्ढेणं वे कोट्ठा कादूणं पढमकोट्ठेसुं ॥ १२८७ ॥ पण्णरसेसु जिणिंदा णिरंतरं दोसु सुण्णया तत्तो। तीसु जिणा दो सुण्णा इगि जिण दो सुण्ण एक्क जिणे ॥१२८८॥ दो सुण्णा एक्क जिणो इगि सुण्णो इगि जिणो य इगि सुण्णो। दोण्णि जिणा इदि कोट्ठा णिद्दिट्ठा तित्थ कत्ताणं ॥ १२८९ ॥ दो कोट्ठेसु चक्की सुण्णं तेरससु चक्किणो छक्के। सुण्ण तिय चक्कि सुण्णं दो सुण्णं चक्कि सुण्णो य ॥ १२९० ॥ चक्की दो सुण्णाइं छक्खंड वईण चक्क वट्टीणं। एदे कोट्ठा कमसो संदिट्ठी एक्क दो अंका ॥ १२९१ ॥ बलदेववासुदेवप्पडिसत्तूणं जाणावणट्ठं संदिट्ठी—

पंच जिणिंदे वंदंति केसवा पंच आणुपुव्वीए। सेयंस साभिपहुदिं तिविट्ठपमुहा य पत्तेक्कं ॥१४१४॥ अरमल्लि अंतराले णादव्वो पुंडरीअणामो सो। मल्लिमुणिसुव्वयाणं विचाले दत्तणामो सो ॥ १४१५ ॥ सुव्वयणमि सामीणं मज्झे णारायणो समुप्पण्णो। णेमि समयम्मि किण्णो एदे णव वासुदेवा य ॥१४१६॥ दस सुण्णा पंच केसव छस्सुण्णा केसि सुण्ण केसीओ। तिय सुण्ण मेक्क केसी दो सुण्णं एक्क केसि तिय सुण्णं ॥ १४१७ ॥ तिलोयपण्णत्ति ४ अधिकार।

१. पढमे कुमारकालो जिणरिसहे बीस पुव्वलक्खाणि। अजिआदिअर जिणंते सगसग आउस्स पादेगो ॥ ५८३ ॥ तत्तो कुमारकालो एगसयं सगसहस्स पंचस या। पणुवीतसयं तिसया तीसं तीसं च छक्कस्स ॥ ५८४ ॥ त्रै०. प्र०. च० अ०।

पादोऽष्टादशसंख्यानां पूर्णः शेषजिनेशिनाम् । [1]कुमारकालशेषस्य राज्यसंयमकालता ॥३३१॥
कुमाराणां जिनानां तु संयमानेहसोज्झितः । आयुःकालः स कुमारः पञ्चानामपि वर्ण्यते ॥३३२॥
जिनसंयमकालस्तु पूर्वलक्षाथ सोज्झिता । पूर्वाङ्गेन चतुर्भिश्च ह्यष्टाभिद्वादशाङ्गकैः ॥३३३॥
ततः षोडशभिर्हीनो विंशत्या तु ततः परम् । चतुर्विंशतिपूर्वाङ्गैरष्टाविंशतिसंख्यकैः ॥३३४॥
दशानामायुषः पादः पादोनो द्वादशस्य सः । मल्लेर्वर्षशतेनोनो नेमेर्वर्षशतैस्त्रिभिः ॥३३५॥
त्रिंशद्वर्षविहीनस्तु प्रत्येकं पार्श्ववीरयोः । द्वेधा संयमकालोऽयं छाद्मस्थः केवली स्थितः ॥३३६॥
वृषछद्मस्थकालोऽत्र स्यात्सहस्रवर्षाण्यतः । द्वादशाब्दानि पूर्णानि स्युर्वर्षाणि चतुर्दश ॥३३७॥
ततोऽष्टादशवर्षाणि विंशतिस्तु ततः परे । षण्मासा नव वर्षाणि त्रिचतुस्त्रिद्विमासकाः ॥३३८॥

व्यतीत किया ॥३३०॥ अजितनाथसे लेकर अठारहवें अरनाथ तक तीर्थंकरोंकी जो पूर्ण आयु थी उसका एक चतुर्थ भाग कुमारकाल था, और पूर्ण आयुमें-से कुमारकाल छोड़ देनेपर जो शेष रहता है वह उनके राज्य तथा संयमका काल था। [अन्तिम छह तीर्थंकरोंका कुमार-काल क्रमसे सौ वर्ष, साढ़े सात हजार वर्ष, अढ़ाई हजार वर्ष, तीन सौ वर्ष, तीस वर्ष और तीस वर्ष था]※ ॥ ३३१ ॥ वासुपूज्य, मल्लिनाथ, नेमिनाथ, पार्श्वनाथ और महावीर ये पाँच तीर्थंकर बाल-ब्रह्मचारी तीर्थंकर थे, इसलिए इनकी आयुका जो काल था उसमें संयमका काल कम देनेपर उनका कुमारकाल कहा जाता है ॥३३२॥ श्री वृषभनाथ भगवान्का संयम-काल एक लाख पूर्व था। अजितनाथका एक पूर्वाङ्ग कम एक लाख पूर्व, संभवनाथका चार पूर्वाङ्ग कम एक लाख पूर्व, अभिनन्दननाथका आठ पूर्वाङ्ग कम एक लाख पूर्व, सुमतिनाथका बारह पूर्वाङ्ग कम एक लाख पूर्व, पद्मप्रभका सोलह पूर्वाङ्ग कम एक लाख पूर्व, सुपार्श्व-नाथका बीस पूर्वाङ्ग कम एक लाख पूर्व, चन्द्रप्रभका चौबीस पूर्वाङ्ग कम, पुष्पदन्तका अट्ठाईस पूर्वाङ्ग कम, वासुपूज्यका पूर्ण आयुका तीन चौथाई भाग, (चौवन लाख वर्ष) मल्लिनाथका सौ वर्ष कम पूर्ण आयु (सौ वर्ष कम पचपन हजार वर्ष), नेमिनाथका तीन सौ वर्ष कम पूर्ण आयु (सात सौ वर्ष), पार्श्वनाथका तीस वर्ष कम पूर्ण आयु (सत्तर वर्ष), महावीरका तीस वर्ष कम बहत्तर वर्ष (ब्यालीस वर्ष) और शेष दस तीर्थंकरोंका अपनी आयुका एक चौथाई भाग संयम काल था। समस्त तीर्थंकरोंका यह संयमकाल छद्मस्थ काल और केवलिकालकी अपेक्षा दो प्रकारका है ॥३३३—३३६॥ वृषभनाथका छद्मस्थ काल एक हजार वर्ष, अजितनाथका बारह वर्ष, संभवनाथका चौदह वर्ष, अभिनन्दननाथका अठारह वर्ष, सुमतिनाथका बीस वर्ष, पद्मप्रभका छह मास, सुपार्श्वनाथका नौ वर्ष, चन्द्रप्रभ-का तीन मास, †पुष्पदन्तका चार मास, शीतलनाथका तीन मास, श्रेयांसनाथका दो मास,

---

१. कुमारकालः शेषस्य म० ।

※ तिलोयपण्णत्तिके चं. अ. गाथा नं० ५८४ का अनुवाद है ।

†. नौवें पुष्पदन्तसे लेकर धर्मनाथ तकका छद्मस्थ काल यहाँ ४, ३ आदि मास बतलाया है परन्तु तिलोयपण्णत्तीमें ४, ३ आदि वर्ष बतलाया है । तिलोयपण्णत्तिको गाथाएँ इस प्रकार हैं—

उसहादीसु वासा सहस्स बारस चउद्दसट्ठरसा । बीस छदुमत्थकालो छच्चिय पउमप्पहे मासा ॥६७५॥ वासाणिणव सुपासे मासा चंदप्पाहम्मि तिण्णि तदो । चदु तिदु एक्का तिदु इगि सोलस चउवग्ग चउक्दी वासा ॥ ६७६ ॥ मल्लिजिणे छद्दिवसा एक्कारस सुव्वदे जिणे मासा । णमि णाहे णव मासा दिणाणि छप्पण्ण णेमि-जिणे ॥ ६७७ ॥ पासजिणे चऊमासा बारसवासाणि वड्ढमाणजिणे । एत्तियमेत्ते समये केवलणाणं न ताण उप्पण्णं ॥ ६७८ ॥

एकत्रिद्व्येकमासाश्च वर्षाणि त्रिश्च षोडश । षडेकादशसंख्याहर्मासा वर्षाण्यतो नव ॥३३९॥
षट्पञ्चाशद्दिनानि स्युर्मासाश्चत्वार एव च । वर्षाणि द्वादशैवातः परं केवलिनो जिनाः ॥३४०॥
आद्यस्य गणिनो भर्तुरशीतिश्चतुरुत्तरा । नवतिः पञ्चसंयुक्तं शतन्त्र्युत्तरमप्यतः ॥३४१॥
शतमेव पुनर्ज्ञेयं षोडशैकादशाधिकम् । पञ्चोत्तरा च नवतिस्त्र्युत्तरा नवतिस्तथा ॥३४२॥
[1]ततोऽष्टैकाधिकाशीतिः[2] सप्ततिः सप्तभिर्युता । षट् षष्टिः पञ्च पञ्चाशत्पञ्चाशच्च ततः परम् ॥३४३॥
त्रिचत्वारिंशदेवातः षट् त्रिंशत्त्रिंशदन्विता । पञ्चभिस्त्रिंशदप्यस्मादष्टाविंशतिरेव तु ॥३४४॥
अष्टादश गणाधीशास्तथा सप्तदश क्रमात् । एकादश दशैव स्युरेकादश च ते पुनः ॥३४५॥
आद्यस्याद्यो गणी नाम्ना सेनान्तो वृषभः प्रभोः । सिंहसेनस्ततोऽप्यन्यश्चारुदत्त इतीरितः ॥३४६॥
वज्रश्च चमरो वज्रचमरो [3]बलिदत्तकौ । वैदर्भश्चानगारश्च कुन्थुश्चापि सुधर्मकः ॥३४७॥

वासुपूज्यका एक मास, विमलनाथका तीन मास, अनन्तनाथका दो मास, धर्मनाथका एक मास, शान्ति, कुन्थु और अरनाथका सोलह-सोलह वर्ष, मल्लिनाथका छह दिन, मुनिसुव्रतनाथका ग्यारह मास, नमिनाथका नौ वर्ष, नेमिनाथका छप्पन दिन, पार्श्वनाथका चार मास और महावीरका बारह वर्ष है। इस छद्मस्थ कालके बाद सभी तीर्थंकर केवली हुए हैं ॥ ३३७—३४० ॥

भगवान् ऋषभदेवके चौरासी गणधर थे, अजितनाथके नब्बे, संभवनाथके एक सौ पाँच, अभिनन्दननाथके एक सौ तीन, सुमतिनाथके एक सौ सोलह, पद्मप्रभके एक सौ ग्यारह, सुपार्श्वनाथके पंचानवे, चन्द्रप्रभके तेरानबे, पुष्पदन्तके अठासी, शीतलनाथके इक्यासी, श्रेयांसनाथके सतहत्तर, वासुपूज्यके छयासठ, विमलनाथके पचपन, अनन्तनाथके पचास, धर्मनाथके तेतालीस, शान्तिनाथके छत्तीस, कुन्थुनाथके पैंतीस, अरनाथके तीस, मल्लिनाथके अट्ठाईस, मुनिसुव्रतनाथके अठारह, नमिनाथके सत्तरह, नेमिनाथके ग्यारह, पार्श्वनाथके दस और महावीरके ग्यारह गणधर थे* ॥ ३४१–३४५ ॥

†आदि तीर्थंकर ऋषभदेवके प्रथम गणधर वृषभसेन, अजितनाथके सिंहसेन, संभवनाथके चारुदत्त, अभिनन्दनके वज्र, सुमतिनाथके चमर, पद्मप्रभके वज्रचमर, सुपार्श्वनाथके

---

१. ततोऽष्टैकादशाशीतिः म० । २. तिलोयपण्णत्तौ तु शीतलनाथस्य सप्ताशीतिगणधराः प्रोक्ताः । ३. बलदत्तकौ ग०, ख० ।

* तिलोयपण्णत्तिमें शीतलनाथके ८१ के स्थानपर ८७ गणधर बतलाये हैं । गाथा इस प्रकार है—

चुलसीदि णउदि पग तिग सोलस एक्कारसूत्तरसयाइं । पणणउदी तेणउदी गणहरदेवा हु अट्ठ परियंतं ॥९६१॥ अडसीदी सगसीदी सत्तत्तरि छक्क समाधिया छट्ठी । पगवण्णा पण्णासा ततो य अणंत परियंतं ॥९६२॥ तेदालं छत्तीसा पणतीसा तीस अट्ठवीसा य । अट्ठारह सत्तरसेक्कारस दश एक्करस य वीरंतं ॥ ९६३ ॥ च० अ० ।

†तिलोयपण्णत्तिमें अन्तर है—गाथा इस प्रकार है—

पढमो हु उसहसेणो केसरिसेणो य चारुदत्तो य । वजचमरो य वज्जो चमरो बलदत्त वेदब्भा ॥९६४॥ णागो कुन्थू धम्मो मन्दिरणामा जओ अरिट्ठो य । सेणो चक्कायुधयो सयंभु कुंभो विसाखो य ॥ ९६५ ॥ मल्लीणामो सुप्पहवरदत्ता सयंभु इंदभूदीओ । उसहादीणं आदिम गणधर णामाणि एदाणि ॥ ९६६ ॥ एदे गणधरदेवा सव्वे वि हु अट्ठरिद्धिसंपण्णा । ताणं रिद्धिसरूवं लव मेत्तं तं णिरूवेमो ॥ ९६७ ॥ च० अ० ऋषभसेन[1] केसरीसेन[2], चारुदत्त[3], वज्रचामर[4], वज्र[5], चमर[6], बलदत्त[7], वैदर्भ[8], नाग[9], कुन्थु[10], धर्म[11], मन्दिर[12], जय[13], अरिष्ट[14], सेन[15], चक्रायुध[16], स्वयंभू[17], कुम्भ[18], विशाख[19], मल्लि[20], सुप्रभ[21], वरदत्त[22], स्वयंभू[23], और इन्द्रभूति[24], ये ऋषभादि तीर्थंकरोंके प्रथम गणधरोंके नाम हैं ।

मन्दरार्यो जयोऽरिष्टसेनश्चक्रायुधस्ततः । स्वयम्भूः कुन्थुनामा च विशाखो मल्लिसोमकौ ॥३४८॥
वरदत्तः स्वयम्भूः स्यादिन्द्रभूतिर्गणप्रभुः । ऋद्धिभिः सप्तभिर्युक्ताः सर्वे ते श्रुतपारगाः ॥३४९॥
वीरस्यैकस्य निष्क्रान्तिस्त्रिशतैर्मल्लिपार्श्वयोः । षडुत्तरैः शतैः षड्भिर्वासुपूज्यजिनस्य तु ॥३५०॥
चतुःसहस्रसंख्यानैर्निष्क्रान्तो वृषभो नृपैः । सहस्रपरिवारास्तु प्रत्येकमितरे जिनाः ॥३५१॥
चतुर्भिरधिकाशीतिः सहस्राणि वृषस्य तु । लक्षं लक्षे त्रिलक्षाश्च द्विस्त्रिलक्षाः सहस्रकैः ॥३५२॥
विंशत्या त्रिंशता युक्तास्तास्तु लक्षात्रयं ततः । सार्धलक्षे पुनर्लक्षे लक्षाशीतिश्चतुर्युता ॥३५३॥
सहस्रगुणिता सा तु द्वासप्ततिरपीदृशी । अष्टाषष्टिश्च षट्षष्टिश्चतुःषष्टिसहस्रकम् ॥३५४॥
द्वाषष्टिश्च सहस्राणि षष्टिः पञ्चादशैव च । चत्वारिंशत्सहस्राणि त्रिंशद्विंशतिरेव तु ॥३५५॥
अष्टादशसहस्राणि षोडशापि चतुर्दश । सहस्राणि यथासंख्यं गणसंख्या जिनेशिनाम् ॥३५६॥
[1]संघः सप्तविधः पूर्वधरशिक्षकभेदतः । सावधिः केवली वादी विक्रिया विपुलायुतः ॥३५७॥

बलि, चन्द्रप्रभके दत्तक, पुष्पदन्तके वैदर्भ, शीतलनाथके अनगार, श्रेयांसनाथके कुन्थु, वासुपूज्यके सुधर्म, विमलनाथके मन्दरार्य, अनन्तनाथके जय, धर्मनाथके अरिष्टसेन, शान्तिनाथके चक्रायुध, कुन्थुनाथके स्वयंभू, अरनाथके कुन्थु, मल्लिनाथके विशाख, मुनिसुव्रतके मल्लि, नमिनाथके सोमक, नेमिनाथके वरदत्त, पार्श्वनाथके स्वयंभू और महावीरके इन्द्रभूति थे । ये सभी गणधर सात ऋद्धियोंसे युक्त तथा समस्त शास्त्रोंके पारगामी थे ॥३४६—३४९॥

भगवान् महावीरने अकेले ही दीक्षा ली थी अर्थात् उनके साथ किसीने दीक्षा नहीं ली थी । मल्लिनाथ और पार्श्वनाथने तीन-तीन सौ राजाओंके साथ, *वासुपूज्यने छह सौ छह राजाओंके साथ, वृषभनाथने चार हजार राजाओंके साथ और शेष तीर्थंकरोंके एक-एक हजार राजाओंके साथ दीक्षा ली थी ॥ ३५०—३५१ ॥

भगवान् ऋषभदेवके समस्त गणों—मुनियोंकी संख्या चौरासी हजार थी । अजितनाथकी एक लाख, संभवनाथकी दो लाख, अभिनन्दननाथकी तीन लाख, सुमतिनाथकी तीन लाख बीस हजार, पद्मप्रभकी तीन लाख तीस हजार, सुपार्श्वनाथकी तीन लाख, चन्द्रप्रभकी अढ़ाई लाख, पुष्पदन्तकी दो लाख, शीतलनाथकी एक लाख, श्रेयांसनाथकी चौरासी हजार, वासुपूज्यकी बहत्तर हजार, विमलनाथकी अड़सठ हजार, अनन्तनाथकी छयासठ हजार, धर्मनाथकी चौंसठ हजार, शान्तिनाथकी बासठ हजार, कुन्थुनाथकी साठ हजार, अरनाथकी पचास हजार, मल्लिनाथकी चालीस हजार, मुनिसुव्रतनाथकी तीस हजार, नमिनाथकी बीस हजार, नेमिनाथकी अठारह हजार, पार्श्वनाथकी सोलह हजार और महावीरकी चौदह हजार संख्या थी ॥३५२—३५६॥

तीर्थंकर भगवान्का यह संघ १ पूर्वधर, २ शिक्षक, ३ अवधिज्ञानी, ४ केवलज्ञानी, ५ वादी, ६ विक्रिया ऋद्धिके धारक और ७ विपुलमतिमनःपर्यय ज्ञानके धारकके भेदसे सात

---

१. पुव्वधरसिक्खकोहीकेवलिवेकुव्विविउलमदिवादी। पत्तेक्कं सत्तगणा सव्वाणं तित्थकत्ताणं ॥१०९८॥ ति० प०, अ० ४ ।

*. तिलोयपण्णत्तिमें वासुपूज्य भगवान्के सहदीक्षितोंकी संख्या छह सौ छिहत्तर बतलायी है । प्रकरणानुसार गाथा इस प्रकार है—

पव्वजिदो मल्लिजिणो रायकुमारेहिं तिसयमेत्तेहिं । पासजिणो वि तह च्चिय एक्क च्चिय वड्ढमाणजिणो ॥ ६६८ ॥ छावत्तरिजुद छस्सयसंखेहिं वासुपुज्ज सामी य । उसहो तालसएहिं सेसा पुह-पुह सहस्स मेत्तेहिं ॥ ६६९ ॥

स्युश्चत्वारि सहस्राणि तथा सप्तशतानि च । पञ्चाशच्च वृषस्यामी सर्वे पूर्वधरा विभोः ॥३५८॥
चतुःसहस्रगणनाः शतं पञ्चाशदुत्तरम् । शिक्षकाः सावधिज्ञानाः सहस्राणि नव स्मृताः ॥३५९॥
विंशतिस्तु सहस्राणि पूज्याः केवलिनः सताम् । सहस्राण्येव तावन्ति षट्शतानि च वैक्रियाः ॥३६०॥
स्युर्द्वादशसहस्राणि मत्या विपुलया युताः । शतानि सप्तपञ्चाशत्तत्संख्यावादिनोऽपि च ॥३६१॥
अजितस्य सहस्राणि त्रीणि सप्तशतानि च । पञ्चाशच्च सतां सेव्याः सभ्यानां पूर्वधारिणः ॥३६२॥
शिक्षकाः षट्शतैः सार्धं सहस्राण्येकविंशतिः । चतुःशत्या सहस्राणि नव सावधयो मताः ॥३६३॥
स्युर्विंशतिसहस्राणि केवलाक्षास्तु वैक्रियाः । ज्ञेयास्तावत्सहस्राणि पञ्चाशच्च चतुःशती ॥३६४॥
द्वादशैव सहस्राणि प्रत्येकं च चतुःशती । मत्या विपुलया युक्ता वादिनो हितवादिनः ॥३६५॥
[1]संभवस्य सहस्रे द्वे शतं पञ्चाशता समम् । पूज्याः पूर्वभृतो ज्ञेयाः पूर्वसद्भाववादिनः[2] ॥३६६॥
एकोनत्रिंशता लक्षा सहस्रैस्त्रिशतानि च । संख्या शिक्षकसाधूनां संख्याताः प्रश्रयाश्रिताः ॥३६७॥
षट् शतानि सहस्राणि नव सावधयः स्मृताः । तथा दशसहस्राणि पञ्चभिः केवलाश्रिताः ॥३६८॥
तथैवैकोनविंशत्या सहस्रैरष्टभिः शतैः । पञ्चाशद्वैक्रियाः प्रोक्ता विक्रियाशक्तिधारिणः ॥३६९॥
द्वाभ्यां दशसहस्राणि विपुलां मतिमाश्रिताः । शताधिकानि तावन्ति सहस्राणि च वादिनः ॥३७०॥
शतानि पञ्च तुर्यस्य द्वे सहस्रेऽथ पूर्विणः । द्विलक्षे शिक्षकास्त्रिंशत्सहस्राण्यर्द्धितं शतम् ॥३७१॥
शतान्यष्टौ सहस्राणि नवैवानधिवीक्षणाः । षोडशैव सहस्राणि मुनयः केवलेक्षणाः ॥३७२॥
एकान्नविंशतिर्ज्ञेया सहस्राणि तु वैक्रियाः । एकादशसहस्राणि पञ्चाशत्षट्शतानि च ॥३७३॥
विपुलोपगता ये ते बोद्धव्या भव्यदेहिनाम् । वादिनोऽपि च तावन्ति सहस्राणीष्टवादिनः ॥३७४॥

प्रकारका होता है ॥३५७॥ भगवान् वृषभदेवके समवसरणमें चार हजार सात सौ पचास पूर्व-धारी, चार हजार एक सौ पचास शिक्षक, नौ हजार अवधिज्ञानी, बीस हजार सत्पुरुषोंके द्वारा पूजनीय केवली, बीस हजार छह सौ विक्रिया ऋद्धिके धारक, बारह हजार सात सौ पचास विपुलमतिमनःपर्यय ज्ञानी और इतने ही वादी थे ॥३५८–३६१॥

अजितनाथके समवसरणमें समीचीन सभ्य पुरुषोंके द्वारा सेवनीय तीन हजार सात सौ पचास पूर्वधारी, इक्कीस हजार छह सौ शिक्षक, नौ हजार चार सौ अवधिज्ञानी, बीस हजार केवली, बीस हजार चार सौ पचास विक्रिया ऋद्धिके धारक, बारह हजार चार सौ विपुलमति मतिज्ञानके धारक और इतने ही वादी थे ॥३६२–३६५॥

संभवनाथके समवसरणमें दो हजार एक सौ पचास पूर्वोंके सद्भावका निरूपण करनेवाले पूजनीय पूर्वधारी जानने योग्य हैं ॥३६६॥ एक लाख उनतीस हजार तीन सौ शिक्षक साधुओंकी संख्या स्मरण की गयी है ॥३६७॥ नौ हजार छह सौ अवधिज्ञानी माने गये हैं, पन्द्रह हजार केवलज्ञानी स्मृत किये गये हैं ॥३६८॥ उन्नीस हजार आठ सौ पचास विक्रिया शक्तिको धारण करनेवाले वैक्रिय साधु थे। बारह हजार विपुलमति ज्ञानके धारक थे और बारह हजार एक सौ वादी मुनि थे ॥३६९॥

अभिनन्दननाथके समवसरणमें दो हजार पाँच सौ पूर्वके धारक, दो लाख तीस हजार पचास शिक्षक, नौ हजार आठ सौ अवधिज्ञानी, सोलह हजार केवलज्ञानी, उन्नीस हजार विक्रिया ऋद्धिके धारक, ग्यारह हजार छह सौ पचास विपुलमतिमनःपर्ययज्ञानी और भव्य जीवोंको हितका उपदेश देनेवाले उतने ही वादी थे ॥३७०—३७४॥

---

१. संयमस्य म० (?)। २. पूर्वसद्भाववेदिनः म०।

सुमतेर्द्वे सहस्रे तु चतुःशत्यपि पूर्विणः । द्वे लक्षे शिक्षका दृश्याश्चतुःपञ्चाशदेव च ॥३७५॥
सहस्राण्यभियुक्तानि पञ्चाशच्च शतत्रयम् । एकादशसहस्राणि विमलावधयस्तथा ॥३७६॥
त्रयोदशसहस्राणि केवलज्ञानदृष्टयः । अष्टादशसहस्राणि चतुःशत्यपि वैक्रियाः ॥३७७॥
दृश्या दशसहस्राणि विपुलाप्ताश्चतुःशती । तावन्तो वादिनस्तेभ्यः सर्वे पञ्चाशताधिकाः ॥३७८॥
पद्माभस्य सहस्रे द्वे शतानि त्रीणि पूर्विणः । लक्षे द्वे शिक्षकाः षष्टिसहस्राणि नवापि च ॥३७९॥
ज्ञेया दशसहस्राणि मुनयोऽवधिलोचनाः । द्वादशाष्टशतैर्युक्ताः सहस्राण्याप्तकेवलाः ॥३८०॥
षोडशैव सहस्राणि त्रिशती वैक्रिया नव । वादिनो विपुलाप्ताः षट् शत्यामा दश तानि वै ॥३८१॥
द्वे सहस्रे सुपार्श्वस्य त्रिंशता पूर्विणश्चतुः । चत्वारिंशत्सहस्राणि लक्षे नवशतैः सह ॥३८२॥
शिक्षका विंशतिं प्राप्ताः सहस्राणि [1]नवावधिम् । एकादश सहस्राणि त्रिशती केवलान्विताः ॥३८३॥
शतं पञ्चाशता पञ्च सहस्राणि दशापि च । वैक्रियाविपुलाद्याः षट्शती नवसहस्रकैः ॥३८४॥
वादिनोऽष्टसहस्राणि ततश्चन्द्रप्रभस्य तु । पूर्विणो द्वे सहस्रे तु शैक्षा लक्षे चतुःशती ॥३८५॥
[2]संघावष्टसहस्राणि पृथक् सविपुलावधी । दशकेवलिनस्तानि वैक्रियास्तु चतुःशती ॥३८६॥
ज्ञेयाः सप्तः सहस्राणि षट् शतानि च वादिनः । सुविधेः पूर्विणः पञ्च दशशत्युपवर्णिता ॥३८७॥
लक्षैका पञ्चपञ्चाशत्सहस्राणि शतानि च । पञ्च शिक्षकसाधूनामवधिज्ञानिनोऽष्ट तु ॥३८८॥
सहस्राणि चतुःशत्या पञ्चशत्या तु सप्त वै । सहस्राण्याप्तकैवल्याः स्युस्त्रयोदश वैक्रियाः ॥३८९॥
षट् सहस्राणि विपुलां पञ्चशत्या मतिं श्रिताः । वादिनः षट्शतैः सप्त सहस्राणि विनिश्रिताः ॥३९०॥

सुमतिनाथके समवसरणमें दो हजार चार सौ पूर्वधारी, दो लाख चौवन हजार ती[न] सौ पचास शिक्षक, ग्यारह हजार निर्मल अवधिज्ञानी, तेरह हजार केवलज्ञानी, अठार[ह] हजार चार सौ विक्रिया ऋद्धिके धारक, उतने ही विपुलमतिमनःपर्ययज्ञानके धारक औ[र] उनसे पचास अधिक अर्थात् दश हजार चार सौ पचास वादी थे ॥३७५—३७८॥

पद्मप्रभके समवसरणमें दो हजार तीन सौ पूर्वधारी, दो लाख उनहत्तर हजार शिक्ष[क] दस हजार अवधिज्ञानी, बारह हजार आठ सौ केवलज्ञानी, सोलह हजार तीन सौ विक्रिय[ा] ऋद्धिके धारक, नौ हजार वादी और दस हजार छह सौ विपुलमतिमनःपर्ययज्ञानी [थे] ॥३७९—३८१॥

सुपार्श्वनाथके समवसरणमें दो हजार तीस पूर्वधारी, दो लाख चवालिस हजार न[ौ] सौ बीस शिक्षक, नौ हजार अवधिज्ञानी, ग्यारह हजार तीन सौ केवली, पन्द्रह हजार ए[क] सौ पचास विक्रिया ऋद्धिके धारक, नौ हजार छह सौ विपुलमतिमनःपर्ययज्ञानी, और आ[ठ] हजार वादी थे।

चन्द्रप्रभके समवसरणमें दो हजार पूर्वधारी, दो लाख चार सौ शिक्षक, आठ हजा[र] विपुलमतिमनःपर्ययज्ञानी, आठ हजार अवधिज्ञानी, दस हजार केवलज्ञानी, दस हजा[र] चार सौ विक्रियाऋद्धिके धारक और सात हजार छह सौ वादी थे।

सुविधिनाथके समवसरणमें पाँच हजार पूर्वधारी, एक लाख पचपन हजार पाँच स[ौ] शिक्षक, आठ हजार चार सौ अवधिज्ञानी, सात हजार पाँच सौ केवलज्ञानी, तेरह हजा[र] विक्रिया ऋद्धिके धारक, छह हजार पाँच सौ विपुलमतिमनःपर्ययज्ञानी और सात हजा[र] छह सौ वादी थे ॥३८२-३९०॥

---

१. नवावधेः क० । २. संख्या चाष्ट क० ।

शीतलस्य चतुःशत्या सहस्रं पूर्ववेदिनः । द्विशत्यैकान्नषष्टिस्तु सहस्राणि सुशिक्षकाः ॥३९१॥
द्विशत्या सावधिः संघः सहस्राणि हि सप्त सः । सप्तकेवलिनस्तानि द्वादशैतानि वैक्रियाः ॥३९२॥
पञ्चशत्या सहस्राणि सप्तैते विपुलेश्वराः । सप्तशत्या सहस्राणि पञ्च सद्वादवादिनः ॥३९३॥
त्रयोदश शतानि स्युः पूर्विणः श्रेयसोऽष्टभिः । चत्वारिंशत्सहस्राणि द्विशती शैक्ष्यसाधवः ॥३९४॥
सावधिः षट् सहस्राणि गणः केवलिनामपि । पञ्चशत्या सहस्राणि तथैकादश वैक्रियाः ॥३९५॥
ततोऽन्ये षट् सहस्राणि पञ्च तानि ततः परे । शतानि द्वादशैव स्युर्वासुपूज्यस्य पूर्विणः ॥३९६॥
द्विशत्या शिक्षकास्त्रिंशत्सहस्राणि नवापि च । चतुःशत्या सहस्राणि पञ्च सावधयो मताः ॥३९७॥
सर्वज्ञाः षट् सहस्राणि वैक्रियाः दश षट् परे । वादिनस्तु सहस्राणि चत्वारि द्विशती तथा ॥३९८॥
शतान्येकादश ज्ञेया विमलस्य तु पूर्विणः । अष्टात्रिंशत्सहस्राणि पञ्चशत्या तु शैक्षकाः ॥३९९॥
अष्टशत्या सहस्राणि चत्वार्यवधिलोचनाः । पञ्चशत्या सहस्राणि पञ्च केवलिनो नव ॥४००॥
वैक्रियाश्च सहस्राणि ततोऽन्ये केवलिप्रमाः वादिनस्त्रिसहस्री च षट्शती च विनिश्चिताः ॥४०१॥
पूर्विणोऽनन्तनाथस्य सहस्रगणनाः स्मृताः । पञ्चशत्या सहस्राणि त्रिंशन्नव च शिक्षकाः ॥४०२॥
स्याच्चत्वारि सहस्राणि त्रिशत्या सावधिर्गणः । अन्ये पञ्चाष्टपञ्चत्रिसहस्राण्यन्तके[1] शते ॥४०३॥
शतानि नव धर्मस्य पूर्विणः शिक्षकाः पुनः । चत्वारिंशत्सहस्राणि तथा सप्तशतानि च ॥४०४॥
षट् शतानि सहस्राणि त्रीणि सावधयः स्मृताः । पञ्चशत्या सहस्राणि चत्वारि सकलेक्षणाः ॥४०५॥
सन्तः सप्तसहस्राणि वैक्रिया विपुलान्विताः । पञ्चशत्या तु चत्वारि द्विसहस्र्यष्टशत्यतः ॥४०६॥

शीतलनाथके समवसरणमें एक हजार चार सौ पूर्ववेदी, उनसठ हजार दो सौ शिक्षक, सात हजार दो सौ अवधिज्ञानी, सात हजार केवलज्ञानी, बारह हजार विक्रिया ऋद्धिके धारक, सात हजार पाँच सौ विपुलमतिज्ञानके स्वामी और पाँच हजार सात सौ उत्तम वादी थे ॥३९१—३९३॥

श्रेयांसनाथके समवसरणमें तेरह सौ पूर्वधारी, अड़तालीस हजार दो सौ शिक्षक, छह हजार अवधिज्ञानी, छह हजार पाँच सौ केवलज्ञानी, ग्यारह हजार विक्रिया ऋद्धिके धारक, छह हजार विपुलमतिमनःपर्ययज्ञानी और पाँच हजार वादी थे।

वासुपूज्यके समवसरणमें बारह सौ पूर्वधारी, उनतालीस हजार दो सौ शिक्षक, पाँच हजार चार सौ अवधिज्ञानी, छह हजार केवलज्ञानी, दस हजार विक्रिया ऋद्धिके धारक, छह हजार विपुलमतिमनःपर्ययज्ञानी और चार हजार दो सौ वादी थे ॥३९४—३९८॥

विमलनाथके ग्यारह सौ पूर्वधारी, अड़तीस हजार पाँच सौ शिक्षक, चार हजार आठ सौ अवधिज्ञानी, पाँच हजार पाँच सौ केवली, नौ हजार विक्रिया ऋद्धिके धारक, नौ हजार विपुलमति मनःपर्ययज्ञानी और तीन हजार छह सौ वादी निश्चित थे ॥३९९—४०१॥

अनन्तनाथके समवसरणमें एक हजार पूर्वधारी, उनतालीस हजार पाँच सौ शिक्षक, चार हजार तीन सौ अवधिज्ञानी, पाँच हजार केवल ज्ञानी, आठ हजार विक्रिया ऋद्धिके धारक और तीन हजार दो सौ वादी थे ॥४०२—४०३॥

धर्मनाथके समवसरणमें नौ सौ पूर्वधारी, चालीस हजार सात सौ शिक्षक, तीन हजार छह सौ अवधिज्ञानी, चार हजार पाँच सौ केवलज्ञानी, सात हजार विक्रिया ऋद्धि-के धारक, चार हजार पाँच सौ विपुलमति मनःपर्ययज्ञानी और दो हजार आठ सौ वादी थे ॥४०४—४०६॥

---

१. न्यन्तगे म० ।

पूर्विणोऽष्टशती शान्तेरष्टशत्यत्र शिक्षकाः । चत्वारिंशत्सहस्रयेकं त्रिसहस्रीगणः परः ॥४०७॥
चत्वारि षट् (च)चत्वारि द्वे सहस्रे चतुःशती । कुन्थोस्तु सप्तशत्येव पूर्विणः शिक्षकाः पुनः ॥४०८॥
चत्वारिंशत्सहस्राणि त्रीणि पञ्चाशता शतम् । सावधिः पञ्चशत्या तु द्वे सहस्रे गणो मतः ॥४०९॥
त्रिसहस्री द्विशत्या तु गणः केवलिनां स्मृतः । शतैकं वैक्रियाः पञ्च सहस्राणि च सम्मताः ॥४१०॥
त्रिशत्या त्रिसहस्री तु पञ्चाशद्विपुलेश्वराः । वादिनां जितवादानां सहस्रद्वितयी मता ॥४११॥
[1]पूज्याः पूर्वभृतोऽरस्य षट्शती तु दशोत्तरा । शैक्षास्तु पञ्चाग्रत्रिंशत्सहस्रैरष्टभिः शतैः ॥४१२॥
पञ्चत्रिंशन्मताः सर्वे सावधिः परिषत्पुनः । सकेवलावधिर्ज्ञेया द्विसहस्र्यष्टशत्यपि ॥४१३॥
वैक्रियास्तु सहस्राणि चत्वारि त्रिशती तथा । सहस्रे पञ्चपञ्चाशन्मत्या विपुलयान्विताः ॥४१४॥
शतानि षोडशैव स्युर्वादिनः पटुवादिनः । मल्लेस्तु पूर्विणः सर्वे पञ्चाशत् सप्तशत्यपि ॥४१५॥
एकान्नत्रिंशदुद्दिष्टाः सहस्राणि तु शिक्षकाः । द्वाविंशतिः शतानि स्युर्मुनयोऽवधिचक्षुषः ॥४१६॥
सहस्रे षट् च शत्यामा पञ्चाशच्च सकेवलाः । चतुःशत्या सहस्रं तु वैक्रियाः यतयो मताः ॥४१७॥
द्वे सहस्रे शते द्वे च मता विपुलबुद्धयः । तावन्त एव जेतारो वादिनः प्रतिवादिनाम् ॥४१८॥
मुनिसुव्रतनाथस्य पूर्विणः पञ्चशत्यभूत् । शिक्षकाः शिक्षया युक्ताः सहस्राण्येकविंशतिः ॥४१९॥
अष्टादश शतान्येव मताः सावधिकेवलाः[2] । द्वाविंशतिः पञ्चदश द्वादशैतान्यतः परे ॥४२०॥
पञ्चाशता शतानि स्युश्चत्वारि नमिपूर्विणः[3] । षड्भिः शतैः सहस्राणि द्वादशैव तु शिक्षकाः ॥४२१॥
शतानि षोडश ख्याताः केवलावधिलोचनाः । वैक्रियास्तु शतानि स्युस्तथा पञ्चदशैव तु ॥४२२॥

शान्तिनाथके समवसरणमें आठ सौ पूर्वधारी, इकतालीस हजार आठ सौ शिक्षक, तीन हजार अवधिज्ञानी, चार हजार केवलज्ञानी, छह हजार विक्रिया ऋद्धिके धारक, चार हजार विपुलमतिमनःपर्ययज्ञानी और दो हजार चार सौ वादी थे।

कुन्थुनाथके समवसरणमें सात सौ पूर्वधारी, तैंतालीस हजार एक सौ पचास शिक्षक, दो हजार पाँच सौ अवधिज्ञानी, तीन हजार दो सौ केवली, पाँच हजार एक सौ विक्रिया ऋद्धिके धारक, तीन हजार तीन सौ पचास विपुलमतिमनःपर्ययज्ञानी और दो हजार वादोंको जीतनेवाले वादी थे ॥४०७—४११॥

अरनाथके समवसरणमें छह सौ दश पूर्वधारी, पैंतीस हजार आठ सौ पैंतीस शिक्षक, दो हजार आठ सौ अवधिज्ञानी, इतने ही केवलज्ञानी, चार हजार तीन सौ विक्रिया ऋद्धिके धारक, दो हजार पचपन विपुलमतिमनःपर्ययज्ञानी और सोलह सौ उत्तम वाद करनेवाले वादी थे।

मल्लिनाथके समवसरणमें सात सौ पचास पूर्वधारी, उनतीस हजार शिक्षक, बाईस सौ अवधिज्ञानी, दो हजार छह सौ पचास केवलज्ञानी, एक हजार चार सौ विक्रिया ऋद्धिके धारक, दो हजार दो सौ विपुलमतिमनःपर्ययज्ञानी और उतने ही प्रतिवादियोंको जीतनेवाले वादी थे ॥४१२—४१८॥

मुनि सुव्रतनाथके समवसरणमें पाँच सौ पूर्वधारी, इक्कीस हजार शिक्षासे युक्त शिक्षक, अठारह सौ अवधिज्ञानी, अठारह सौ केवलज्ञानी, बाईस सौ विक्रिया ऋद्धिके धारक, पन्द्रह सौ विपुलमतिमनःपर्यय ज्ञानी और बारह सौ वादी थे ॥४१९—४२०॥

नमिनाथके समवसरणमें चार सौ पचास पूर्वधारी, बारह हजार छह सौ शिक्षक, सोलह सौ अवधिज्ञानी, सोलह सौ केवलज्ञानी, पन्द्रह सौ विक्रिया ऋद्धिके धारक, बारह

---

१. पूज्यः म० । २. लोचनाः म० । ३. नमिपूर्विताः म० ।

शतानि द्वादश प्रोक्ताः पञ्चाशद्विपुलेक्षणाः । सहस्रपरिमाणास्तु वादिनोऽप्रतिवादिनः[1] ॥४२३॥
चतुःशतानि नेमेस्तु पूर्विणः शिक्षकाः स्मृताः । एकादश सहस्राणि शतैरष्टभिरेव तु ॥४२४॥
सकेवलावधी संघौ सहस्रं पञ्चशत्यपि । सहस्रं वैक्रियाश्चापि शतं च शुभवैक्रियाः ॥४२५॥
शतानि नव विज्ञेयाः शान्ता विपुलबुद्धयः[2] । वादिनोऽष्टौ शतानीह निःप्रतिप्रतिभान्विताः ॥४२६॥
पञ्चाशत्त्रिशती चापि स्युः पार्श्वस्य तु पूर्विणः । शैक्षा दश सहस्राणि शतानि नव च स्मृताः ॥४२७॥
चतुःशत्या सहस्रं तु निर्मलावधिबोधनाः । सहस्रं केवलालोका वैक्रियाश्च तथा मताः ॥४२८॥
शतानि सप्त पञ्चाशद्विपुलामल[3]बुद्धयः । वादिनः षट् शतानि स्युर्वादन्यायविधौ बुधाः ॥४२९॥
वर्धमानजिनेन्द्रस्य त्रिशती पूर्वधारिणः । शैक्षा नव सहस्राणि शतानि च नवोदिताः ॥४३०॥
त्रयोदश शतानि स्युरवधिज्ञानिनः परे । ये सप्त नव पञ्च स्युश्चत्वारि च शतानि वै ॥४३१॥
आर्यास्तिस्रोऽमवँल्लक्षा जिनपञ्चकसंसदि । पञ्चाशद्विंशतिस्त्रिंशत्त्रिंशत्त्रिंशत्सहस्रकैः ॥४३२॥
चतस्रो विदिता लक्षाः पद्माभस्य सभान्तरे । विंशतिश्च सहस्राणि सहस्राणीव रोचिषाम् ॥४३३॥
तिस्रस्त्रिंशत्सहस्राणि सप्तमस्य सभाम्बुधौ । ततः परं त्रयाणां तास्तिस्रोऽशीतिसहस्रकैः ॥४३४॥
स्याद्विंशतिसहस्रैस्तु लक्षैकान्यस्य संसदि । एका लक्षा त्रयाणां च षड्त्रिकाष्टसहस्रकैः ॥४३५॥
स्युर्द्वाषष्टिसहस्राणि धर्मस्यापि चतुःशती । शान्तेः षष्टिसहस्राणि शतानां त्रितयं तथा ॥४३६॥

सौ पचास विपुलमतिमनःपर्ययज्ञानी, और एक हजार प्रतिवादियोंसे रहित वादी थे ॥४२१—४२३॥

नेमिनाथके समवसरणमें चार सौ पूर्वधारी, ग्यारह हजार आठ सौ शिक्षक, एक हजार पाँच सौ अवधिज्ञानी, एक हजार पाँच सौ केवली, एक हजार एक सौ शुभविक्रिया करनेवाले विक्रियाऋद्धिके धारक, नौ सौ विपुलमतिमनःपर्ययज्ञानके धारक और आठ सौ अनुपम प्रतिभासे युक्त वादी थे ॥४२४-४२६॥

पार्श्वनाथके समवसरणमें तीन सौ पचास पूर्वधारी, दश हजार नौ सौ शिक्षक, एक हजार चार सौ निर्मल अवधिज्ञानके धारक, एक हजार केवलज्ञानी, एक हजार विक्रिया ऋद्धिके धारक, सात सौ पचास विपुलमतिमनःपर्ययज्ञानी, और छह सौ वाद-विवादमें निपुण वादी थे ॥४२७-४२९॥

और वर्धमान जिनेन्द्रके समवसरणमें तीन सौ पूर्वधारी, नौ हजार नौ सौ शिक्षक, तेरह सौ अवधिज्ञानी, सात सौ केवलज्ञानी, नौ सौ विक्रिया ऋद्धिके धारक, पाँच सौ विपुलमतिमनःपर्ययज्ञानी और चार सौ वादी कहे गये हैं ॥४३०—४३१॥

भगवान् वृषभदेवके समवसरणमें आर्यिकाएँ तीन लाख पचास हजार, अजितनाथके समवसरणमें तीन लाख बीस हजार, संभवनाथके समवसरणमें तीन लाख तीस हजार, अभिनन्दननाथके समवसरणमें तीन लाख तीस हजार, सुमतिनाथके समवसरणमें तीन लाख तीस हजार, पद्मप्रभके समवसरणमें हजारों किरणोंके समान चार लाख बीस हजार, सुपार्श्वनाथके समवसरणमें तीन लाख तीस हजार, चन्द्रप्रभके समवसरणमें तीन लाख अस्सी हजार, पुष्पदन्तके समवसरणमें तीन लाख अस्सी हजार, शीतलनाथके समवसरणमें तीन लाख अस्सी हजार, श्रेयांसनाथके समवसरणमें एक लाख बीस *हजार, वासुपूज्यके समवसरणमें

---

१. वादिनोऽप्रतिवादिनाम् म० । २. विमलबुद्धयः म० । ३.-विमलामल म०, क० ।

* तिलोयपण्णत्तिमें श्रेयांसनाथकी आर्यिकाओंकी संख्या, एक लाख तीस हजार बतलायी है 'तीससहस्सब्भहियं लक्खं सेयंस देवम्मि' ॥११७०॥ च. अ. ।

कुन्थोः षष्टिसहस्राणि पञ्चाशच्च शतत्रयम् । पुनः षष्टिसहस्राणि जिनस्यारस्य संसदि ॥४३७॥
मल्लेस्तु पञ्चपञ्चाशत्सहस्राणि सभान्तरे । सहस्राण्येव पञ्चाशन्मुनिसुव्रतसंसदि ॥४३८॥
चत्वारिंशत्सहस्राणि नमेः पञ्चोत्तराणि ताः । चत्वारिंशत्सहस्राणि नेमेः सदसि ताः स्मृताः ॥४३९॥
अष्टात्रिंशत्सहस्राणि त्रयोविंशस्य संसदि । पञ्चत्रिंशत्सहस्राणि चतुर्विंशस्य सम्मताः ॥४४०॥
तिस्रोऽष्टानां पृथग्लक्षा जिनानां श्रावकाः स्मृताः । द्वे लक्षे च ततोऽष्टानां लक्षाष्टानां मता ततः ॥४४१॥
पञ्चलक्षास्तथाष्टानां संसदि श्राविकाः स्मृताः । चतस्रस्तास्ततोऽष्टानां तिस्रोऽष्टानां जिनेशिनाम् ॥४४२॥
सिद्धाः षष्टिसहस्राणि नवशत्या वृषस्य ते । सप्तसप्ततिरन्यस्य सहस्राणि शतान्विताः ॥४४३॥
[1]शिष्या लक्षा तृतीयस्य सहस्राणि च सप्ततिः । शतं चातः शतं लक्षे सहाशीतिसहस्रकैः ॥४४४॥
तिस्रो लक्षाः सहस्रं च षट्शतानि ततस्ततः । त्रयोदशसहस्राणि तिस्रो लक्षाश्च षट्शती ॥४४५॥
पञ्चाशीतिसहस्राणि द्वे लक्षे षट्शती ततः । चतुस्त्रिंशत्सहस्राणि द्वे लक्षे च ततः परम् ॥४४६॥
लक्षैकेन विनाशीतिः सहस्राण्यपि षट्शती । ततोऽशीतिसहस्राणि षट्शतानि च निर्वृताः ॥४४७॥
पञ्चषष्टिसहस्राणि श्रेयसः षट्शती यथा । चतुःपञ्चाशदेव स्यात्सहस्राण्यपि षट्शती ॥४४८॥
सहस्राण्येकपञ्चाशत् त्रिशती विमलस्य तु । अनन्तस्यापि तावन्ति सहस्राण्येव केवलम् ॥४४९॥
धर्मस्यैकान्नपञ्चाशत् सहस्री सप्तशत्यपि । चत्वारिंशत्ततोऽष्टौ च सहस्राणि चतुःशती ॥४५०॥
चत्वारिंशत्सहस्राणि षट् चाष्टौ च शतान्यतः । सप्तत्रिंशत्सहस्राणि द्विशत्यरजिनस्य तु ॥४५१॥

एक लाख छह हजार, विमलनाथके समवसरणमें एक लाख तीन हजार, अनन्तनाथके समवसरणमें एक लाख आठ हजार, धर्मनाथके समवसरणमें बासठ हजार चार सौ, शान्तिनाथके समवसरणमें साठ हजार तीन सौ, कुन्थुनाथके समवसरणमें साठ हजार तीन सौ पचास, अरनाथके समवसरणमें साठ हजार, मल्लिनाथके समवसरणमें पचपन हजार, मुनिसुव्रतनाथके समवसरणमें पचास हजार, नमिनाथके समवसरणमें पैंतालीस हजार, नेमिनाथके समवसरणमें चालीस हजार, पार्श्वनाथके समवसरणमें अड़तीस हजार, और चौबीसवें महावीर भगवान्के समवसरणमें पैंतीस हजार आर्यिकाएँ मानी गयी हैं ॥४३२—४४०॥

प्रारम्भसे लेकर आठ तीर्थंकरोंके समवसरणमें प्रत्येकके तीन-तीन लाख, फिर आठ तीर्थंकरोंके प्रत्येकके दो-दो लाख और तदनन्तर शेष आठ तीर्थंकरोंके प्रत्येकके एक-एक लाख श्रावक थे ॥४४१॥

इसी प्रकार प्रारम्भके आठ तीर्थंकरोंके समवसरणमें प्रत्येककी पाँच-पाँच लाख, फिर आठ तीर्थंकरोंकी प्रत्येककी चार-चार लाख और तदनन्तर शेष आठ तीर्थंकरोंकी प्रत्येककी तीन-तीन लाख श्राविकाएँ थीं ॥४४२॥

भगवान् वृषभनाथके मोक्ष जानेवाले शिष्योंकी संख्या साठ हजार नौ सौ, अजितनाथके सत्तर हजार एक सौ, संभवनाथके एक लाख सत्तर हजार एक सौ, अभिनन्दननाथके दो लाख अस्सी हजार एक सौ, सुमतिनाथके तीन लाख एक हजार छह सौ, पद्मप्रभके तीन लाख तेरह हजार* छह सौ, चन्द्रप्रभके दो लाख चौंतीस हजार, सुविधिनाथके एक लाख उन्यासी हजार छह सौ, शीतलनाथके अस्सी हजार छह सौ, श्रेयांसनाथके पैंसठ हजार छह सौ, वासुपूज्यके चौवन हजार छह सौ, विमलनाथके इक्यावन हजार तीन सौ, अनन्तनाथके इक्यावन हजार, धर्मनाथके उनचास हजार सात सौ, शान्तिनाथके अड़तालीस हजार

---

1. शिक्षा म० ।

* तिलोय पण्णत्तिमें पद्मप्रभ जिनेन्द्रके मुक्त होनेवाले शिष्योंकी संख्या तीन लाख चौदह हजार बतलायी है । 'चोद्दस सहस्स सहिदा पउमप्पह जिणवरस्स तियलक्खा' ॥१२२०॥ श्र० च० ।

अष्टशत्या सहस्राणि ततोऽष्टाविंशतिस्तथा । एकान्नविंशतिस्तस्मात्सहस्राणि शतद्वयम् ॥४५२॥
नमेर्नव सहस्राणि षट् शतानि च निर्वृताः । नेमेरष्टौ सहस्राणि षट् सप्त द्वे शते द्वयोः ॥४५३॥
यदैव केवलोत्पत्तिः षोडशानां जिनेशिनाम् । तदैव तेषां शिष्याणां सिद्धिः केषाञ्चिदिष्यते ॥४५४॥
एकद्वित्रिकषण्मासैरन्येषां शिष्यनिर्वृतिः । एक-द्वि-त्रिचतुर्वर्षैरपरेषां विनिश्चिता ॥४५५॥
त्रिविंशतिसहस्राणि पञ्चानां द्वादशैव तु । तान्येकादशपञ्चानां पञ्चानां दश तान्यतः ॥४५६॥
अष्टाशीति शतान्येव शिष्याः पञ्चजिनेशिनाम् । षट् सहस्राणि वीरस्य शिष्यास्तेऽनुत्तरोद्भवाः ॥४५७॥
ऊर्ध्वग्रैवेयकान्तासु सौधर्मादिषु भूमिषु । शतं त्रीणि सहस्राणि बभूवुर्वृषशिष्यकाः ॥४५८॥
[1]एकान्नत्रिसहस्राणि द्वितीयस्य दिवं गताः । नवान्यस्य सहस्राणि शिष्या नवशतीयुताः ॥४५९॥
नवशत्या सहस्राणि तुरीयस्य तु सप्त वै । ततश्चतुःशतीयुक्ता षट्सहस्री दिवङ्गता ॥४६०॥

ार सौ, कुन्थुनाथके छयालीस हजार आठ सौ, अरनाथके सैंतीस हजार दो सौ, मल्लि-
ाथके अट्ठाईस हजार आठ सौ, मुनिसुव्रतनाथके उन्नीस हजार दो सौ, नमिनाथके नौ
जार छह सौ, नेमिनाथके आठ हजार, पार्श्वनाथके छह हजार दो सौ और भगवान् महा-
ीरके सात हजार †दो सौ हैं ॥४४३-४५३॥

किन्हीं आचार्योंका मत है कि—प्रारम्भसे लेकर सोलह तीर्थंकरोंके शिष्य, जिस
मय उन्हें केवलज्ञान हुआ था उसी समय सिद्धिको प्राप्त हो गये थे। तदनन्तर चार
ीर्थंकरोंके शिष्य क्रमसे एक, दो, तीन और छह मासमें सिद्धिको प्राप्त हुए और उनके बाद
ार तीर्थंकरोंके शिष्य एक, दो, तीन और चार वर्षमें सिद्धिको प्राप्त हुए* ॥४५४-४५५॥

प्रारम्भसे लेकर तीन तीर्थंकरोंके बीस-बीस हजार, फिर पाँच तीर्थंकरोंके बारह-
ारह हजार, फिर पाँच तीर्थंकरोंके ग्यारह-ग्यारह हजार, फिर पाँच तीर्थंकरोंके दश-दश
जार, फिर पाँच तीर्थंकरोंके अठासी-अठासी सौ और महावीरके छह हजार शिष्य अनुत्तर
िमानोंमें उत्पन्न होनेवाले हैं ॥४५६॥

सौधर्म स्वर्गसे लेकर ऊर्ध्व ग्रैवेयक तकके विमानोंमें भगवान् वृषभदेवके तीन हजार
क सौ, अजितनाथके उनतीस सौ, संभवनाथके नौ हजार नौ सौ, अभिनन्दननाथके सात
जार नौ सौ, सुमतिनाथके छह हजार चार सौ, पद्मप्रभके चार हजार चार सौ, सुपार्श्व-
ाथके दो हजार चार सौ, चन्द्रप्रभके चार हजार, पुष्पदन्तके नौ हजार चार सौ, शीतल-

---

१. 'णवसयअब्भहिय दोसहस्साणि' ति० प०, अ०, च० ॥१२३३॥

† भगवान् महावीरके मुक्त होनेवाले शिष्योंकी संख्या तिलोयपण्णत्तिमें चवालीस सौ बतलायी है—
उदालसया वीरेसरस्स'—अ. ॥१२२९॥ अ. च.

*. इस विषयका तिलोयपण्णत्तिमें इस प्रकार स्पष्टीकरण किया गया है—

उसहादि सोलसाणं केवलणाणप्पसूदि दिवसम्मि ।
पढमं च्चिय सिस्सगणा णिस्सेयस संपयं पत्ता ॥१२३०॥
कुंथु चउक्के कमसो इगि दुति छम्मास समय पेरंते ।
णमि पहुदि जिणिंदेसुं इगि दुति छव्वाससंखाए ॥१२३१॥—अ० चार

अर्थात् ऋषभादिक सोलह तीर्थंकरोंके शिष्यगण केवलज्ञान उत्पन्न होनेके दिन पहले ही निःश्रेयस
पदको प्राप्त हुए। कुन्थुनाथ आदि चार तीर्थंकरोंके शिष्यगण क्रमसे एक, दो, तीन और छह मास तक
था नमि आदि चार जिनेन्द्रोंके शिष्यगण एक, दो, तीन और छह वर्ष तक निःश्रेयस पदको प्राप्त हुए
१२३०-१२३१॥

ततश्चतुःसहस्राणि चतुःशत्यान्वितानि तु । द्विसहस्री चतुःशत्यातः सहस्रचतुष्टयी ॥४६१॥
ततो नव सहस्राणि सहितानि चतुःशतैः । ततोऽष्टौ सप्त षड्वापि सहस्राणि चतुःशतैः ॥४६२॥
ततः पञ्चसहस्राणि सप्तशत्या ततोऽपि च । पञ्चैव तु सहस्राणि चत्वारि त्रिशतैस्ततः ॥४६३॥
ततस्त्रीणि सहस्राणि शतैः षड्भिस्ततः पुनः । त्रीण्येव तु सहस्राणि द्विशते च दिवङ्गताः ॥४६४॥
सहस्रद्वितयं चातो द्वयोरष्ट चतुःशतैः । द्वे सहस्रे ततोऽन्यस्य सहस्रं षट् शतान्यतः ॥४६५॥
द्विशत्यातः सहस्रं हि सहस्रं केवलं ततः । अष्टौ शतानि वीरस्य शिष्यास्ते स्वर्गगामिनः ॥४६६॥
कोटीलक्षास्तु पञ्चाशत्त्रिंशद्दश नवाब्धयः । नवतिश्च सहस्राणि नवतिश्च शतान्यपि ॥४६७॥
तथा नवशतान्येव नवतिर्नवकोटयः । जिनानां वृषभादीनामन्तराणि नव क्रमात् ॥४६८॥
षट्षष्टिवर्षलक्षाभिः षड्विंशतिसहस्रकैः । विहीनाब्दशतेनाब्धिः कोटी दशममन्तरम् ॥४६९॥
चतुःपञ्चाशदेवातस्त्रिंशन्नव च सागराः । चत्वारस्ते त्रयस्तूनास्त्रिचतुर्भागपल्यकैः ॥४७०॥
पल्यार्धं च चतुर्भागो हीनकोटीसहस्रकः । कोटीसहस्रमब्दानां चतुर्लक्षाः शतार्धगाः ॥४७१॥
षट् लक्षाः पञ्चलक्षाश्च त्र्योऽशीतिसहस्रकैः । सार्धसप्तशतान्यर्धतृतीये च शते मते ॥४७२॥
[1]वर्धमानजिनेन्द्रस्य सहस्राण्येकविंशतिः । तीर्थकालस्तु तावन्ति सहस्राण्यतिदुःषमः ॥४७३॥
[2]आदावष्टौ तथान्तेऽष्टावव्युच्छिन्नानि षोडश । मध्ये तु सप्ततीर्थानि व्युच्छिन्नानीह भारते ॥४७४॥

नाथके आठ हजार चार सौ, श्रेयांसनाथके सात हजार चार सौ, वासुपूज्यके छह हज[ार] चार सौ, विमलनाथके पाँच हजार सात सौ, अनन्तनाथके पाँच हजार, धर्मनाथके च[ार] हजार तीन सौ, शान्तिनाथके तीन हजार छह सौ, कुन्थुनाथके तीन हजार दो सौ, अरनाथ[के] दो हजार आठ सौ, मल्लिनाथके दो हजार चार सौ, मुनि सुव्रतनाथके दो हजार, नमि[-] नाथके एक हजार छह सौ, नेमिनाथके एक हजार दो सौ, पार्श्वनाथके एक हजा[र] और महावीरके आठ सौ शिष्य उत्पन्न हुए हैं ॥४५७-४६६॥

पचास लाख करोड़, तीस लाख करोड़, दश लाख करोड़, नौ लाख करोड़, नब्बे हज[ार] करोड़, नौ हजार करोड़, नौ सौ करोड़, नब्बे करोड़ और नौ करोड़ सागर यह क्रमसे वृषभा[दि] नौ तीर्थंकरोंके मुक्त होनेका अन्तर काल है ॥४६७-४६८॥ छयासठ लाख छब्बीस हजार एक [सौ वर्ष] कम एक करोड़ सागर प्रमाण दशवाँ अन्तर है अर्थात् शीतलनाथ भगवान्‌के मुक्ति जाने[के] बाद इतना समय बीत जानेपर श्रेयांसनाथ भगवान् मुक्ति गये ॥४६९॥ तदनन्तर चौव[न], तीस, नौ, चार और पौन पल्य कम तीन हजार सागर यह वासुपूज्यसे लेकर शा[न्ति] जिनेन्द्र तकका अन्तरकाल है। तत्पश्चात् अर्धपल्य, एक हजार करोड़ वर्ष कम पाव पल[्य], एक हजार करोड़, चौवन लाख, छह लाख, पाँच लाख, तेरासी हजार सात सौ पच[ास] और अढ़ाई सौ वर्ष प्रमाण क्रमसे कुन्थुनाथसे लेकर महावीर पर्यन्तका अन्तर है ॥४७०-४७[२]॥

महावीर भगवान्‌का तीर्थकाल इक्कीस हजार वर्ष प्रमाण पाँचवाँ काल और इत[ना] ही छठवाँ काल इस प्रकार बयालीस हजार वर्ष प्रमाण है ॥ ४७३॥ आदिके आठ औ[र] अन्तके आठ इस प्रकार सोलह तीर्थ तो इस भरतक्षेत्रमें अविच्छिन्न रूपसे प्रवृत्त [रहे]

---

१. तिलोयपण्णत्तेः चतुर्थमहाधिकारे १२५०—१२७४ गाथासु वृषभादीनां सर्वेषां जिनेन्द्राणां पृ[थक्] पृथक् तीर्थकालो निरूपितः । इह तु वर्धमानजिनेन्द्रस्यैव निरूपितः 'इगिवीससहस्साणि दुलाल वीरस्स कालो' ॥ ति० प० ॥ २. उच्छण्णो सोधम्मो सुविहिप्पमुहेसु सत्ततित्थेसुं । सेसेसु सोलसेसुं णिरंतरं[ध]... सन्ताणं ॥१२७८॥ पल्लस्स पादमद्धं तिचरणपल्लं खु तिचरणं अद्धं । पल्लस्स पादमेत्तं वोच्छेदो धम्म तित्[थे] ॥१२७९॥ हुंडावसप्पिणिस्स य दोषेणं सत्त होंति विच्छेदा । दिक्खाहि सुहाभावे अत्थमिओ धम्मरवि[...] ॥१२८०॥ ति० प०, ४ अ० ।

पादः पल्यस्य पल्यार्धं त्रिपादी पल्यमेव तु । त्रिपाद्यर्धं च पादश्च व्युच्छेदानेहसः क्रमात् ॥४७५॥
आदितः सप्ततीर्थेषु केवलश्रीर्निरन्तरा । चन्द्राभस्य मुनेरन्ते सुविधेर्नवतिर्मता ॥४७६॥
तीर्थे चतुरशीतिस्तु शीतलस्य निरन्तरा । केवलज्ञानिनोऽन्यस्य द्वासप्ततिरुदाहृता ॥४७७॥
चत्वारिंशच्चतुर्युक्ता वासुपूज्यस्य पूजिता । चतुर्हानिस्तु दशसु द्वयोः केवलिनस्त्रयः ॥४७८॥
वीरकेवलिनां कालो द्वाषष्ट्यब्दानि संस्तुतः । ततो वर्षशतं पूर्णं स्याच्चतुर्दशपूर्विणाम् ॥४७९॥
त्र्योऽशीत्या शताब्दानि भवन्ति दशपूर्विणाम् । विंशत्यङ्गभृतां युक्ताः कालो वर्षशतद्वयम् ॥४८०॥

रन्तु बीचके सात तीर्थ व्युच्छिन्न होकर पुनः-पुनः प्रवृत्त हुए ॥ ४७४ ॥ पाव पल्य, अर्ध पल्य, न पल्य, एक पल्य, पौन पल्य, अर्धपल्य और पाव पल्य, यह क्रमसे व्युच्छिन्न र्थोंके विच्छेदकालका प्रमाण है। भावार्थ—वृषभदेवसे लेकर पुष्पदन्त तक तो तीर्थ विच्छिन्न रूपसे चलते रहे उसके बाद पुष्पदन्तके तीर्थमें जब पाव पल्य प्रमाण ाल बाकी रह गया तब तीर्थ—धर्मका विच्छेद हो गया। तदनन्तर शीतलनाथके केवली ोनेपर पुनः तीर्थ प्रारम्भ हुआ, इसी प्रकार धर्मनाथ पर्यन्त ऊपर लिखे अनुसार तीर्थ च्छेद समझना चाहिए। शान्तिनाथसे लेकर महावीर पर्यन्त बीचमें तीर्थका विच्छेद हीं है। महावीरका तीर्थ बयालीस हजार वर्ष तक चलेगा, उसके बाद विच्छिन्न हो जायेगा। दनन्तर आगामी उत्सर्पिणी युगमें जब प्रथम तीर्थंकरको केवलज्ञान होगा तब पुनः तीर्थका प्रारम्भ होगा ॥ ४७५ ॥

प्रारम्भसे लेकर सात तीर्थंकरोंके तीर्थमें केवलज्ञानरूपी लक्ष्मी निरन्तर विद्यमान ही। उसके पश्चात् चन्द्रप्रभ और पुष्पदन्तके तीर्थमें नब्बे-नब्बे, शीतलनाथके तीर्थमें ौरासी, श्रेयांसनाथके तीर्थमें बहत्तर, वासुपूज्यके तीर्थमें चौवालीस, फिर मलनाथसे लेकर नेमिनाथ तक दश तीर्थंकरोंके तीर्थमें चार-चार कम और न्तिम दो तीर्थंकरोंके तीर्थमें तीन-तीन केवली अनुबद्ध हुए हैं अर्थात् एकके ोक्ष जानेके बाद दूसरेको केवलज्ञान हो गया है† ॥४७६-४७८॥ महावीर स्वामीके वलियोंका काल बासठ वर्ष कहा गया है उसके बाद सौ वर्ष चौदह पूर्वधारियोंका ाल है, तदनन्तर एक सौ तेरासी वर्ष दश पूर्वधारियोंका समय है, फिर दो सौ बीस वर्ष ारह अङ्गके पाठियोंका काल है, और इसके बाद एक सौ अठारह वर्ष आचाराङ्गके धारियों-

---

† तिलोयपण्णत्तिमें अनुबद्ध केवलियोंका वर्णन करते हुए दो मत दिये हैं। प्रथम मतके अनुसार ादिनाथसे लेकर दसवें तीर्थकर तक प्रत्येकके ८४, श्रेयांस और वासुपूज्यके क्रमसे ७२ और ४४ मलनाथके ४०, अनन्तनाथके ३६, धर्मनाथके ३२, शान्तिनाथके २८, कुन्थुनाथके २४, अरनाथके ०, मल्लिनाथके १६, मुनिसुव्रतनाथके १२, नमिनाथके ८, नेमिनाथके ४, पार्श्वनाथके ३ और महावीरके ३। नुबद्ध केवली हैं तथा दूसरे मतके अनुसार—आदिनाथसे लेकर सातवें तीर्थंकर तक प्रत्येकके १००, चन्द्र-भके ६०, पुष्पदन्तके ९०, शीतलनाथके ६०, श्रेयांसनाथके ९०, वासुपूज्यके ८४, विमलनाथके ४०, नन्तनाथके ३६, धर्मनाथके ३२, शान्तिनाथके २८, कुन्थुनाथके २४, अरनाथके २०, मल्लिनाथके १६, निसुव्रतनाथके १२, नमिनाथके ८, नेमिनाथके ४, पार्श्वनाथके ३ और महावीरके ३ अनुबद्ध केवली हैं। थाएँ इस प्रकार हैं—

दसमंते चउसीदी कमसो अणुबद्ध केवली होंति । बाहत्तरि चउदालं सेयंसे वासुपुज्जे य ॥ १२१२॥ मल जिणे चालीसं णवसु तदो चउ विविजिदा कमसो । तिण्णि च्चिय पासजिणे तिण्णि च्चिय वड्ढमाणम्मि १२१३॥ आ सत्तमेवक सयं उवरितिए पाउदि णउदि च उसीदी । सेसेसु पुव्वसंखा हवंति अणुबद्धकेवली हवा ॥१२१४॥ ति. प. अ ।

आचाराङ्गभृताङ्गीतः शतमष्टादशोत्तरम् । त्रिपञ्चैकादश ज्ञेया पञ्च चत्वार एव ते ॥४८१॥
वीरस्य गणिनां वर्षाण्यायुर्द्वानवतिश्चतुः । विंशतिः सप्ततिश्च स्यादशीतिः शतमेव च ॥४८२॥

का काल कहा गया है। महावीर स्वामीके केवलियोंकी संख्या तीन[1], चौदह पूर्वके धारियोंक संख्या पाँच[2], दश पूर्वधारियोंकी संख्या ग्यारह[3], ग्यारह अङ्गके धारियोंकी संख्या पाँच[4] औ आचाराङ्गके पाठियोंकी संख्या[5] चार है[6] ॥४७९—४८१॥ महावीर भगवान्‌के गणधरोंकी आ

१. गौतम[1] स्वामी, सुधर्माचार्य[2], जम्बूस्वामी[3] ये तीन केवली हुए। २. नन्दी[1], नन्दिमित्र[2], अपराजित गोवर्द्धन[4] और भद्रबाहु[5] ये पाँच चौदह पूर्वके धारी हुए। ३. विशाख, प्रोष्ठिल, क्षत्रिय, जय, नाग, सिद्धार्थ धृतिषेण, विजय, बुद्धिल, गङ्गदेव और सुधर्म ये ग्यारह दश पूर्वधारी हुए। ४. नक्षत्र, जयपाल, पाण्डु ध्रुवसेन और कंस ये पाँच ग्यारह अंगके धारी हुए। ५. सुभद्र, यशोभद्र, यशोबाहु और लोहार्य ये चा आचारांगके धारी हुए।

६. यहाँ तिलोयपण्णत्ति अधिकार ४, गाथा १४७६ से १४९२ तकका प्रकरण विशेष ज्ञानके लि द्रष्टव्य है—

जादो सिद्धो वीरो तद्दिवसे गोदमो परमणाणी ।
जादो तस्सिं सिद्धे सुधम्मसामी तदो जादो ॥ १४७६ ॥
तम्मि कदकम्मणासे जंबू सामित्ति केवली जादो ।
तत्थ वि सिद्धिपवण्णे केवलिणो णत्थि अणुबद्धा ॥ १४७७ ॥
वासट्ठीवासाणिं गोदम पहुदीण णाणवंताणं ।
धम्मपयट्टण काले परिमाणं पिंडरूवेणं ॥ १४७८ ॥
कुंडल गिरिम्मिचरिमो केवलणाणीसु सिरिधरो सिद्धो ।
चारण रिसीसु चरिमो सुपासचंदाभिधाणो य ॥ १४७९ ॥
पण्ण समणेसु चरिमो वइरजसो णाम ओहिणाणिसुं ।
चरिमो सिरिणामो सुद विणय सुसीलादिसंपण्णो ॥ १४८० ॥
मउड धरेसुं चरिमो जिणदिक्खं धरदि चंदगुत्तो य ।
तत्तो मउडधरा दु प्पव्वज्जं णेव गेण्हंत्ति ॥ १४८१ ॥
णंदी य णंदिमित्तो विदिओ अवराजिदो तइज्जो य ।
गोवद्धणो चउत्थो पंचमओ भद्दबाहुत्ति ॥ १४८२ ॥
पंच इमे पुरिसवरा चउदसपुव्वी जगम्मि विक्खादा ।
ते बारस अंगधरा तित्थे सिरि वड्ढमाणस्स ॥ १४८३ ॥
पंचाण मेलिदाणं कालपमाणं हवेदि वाससदं ।
वीदम्मि य पंचमए भरहे सुदकेवली णत्थि ॥ १४८४ ॥
पढमो विसाहणामो पुट्ठिल्लो खत्तियो जओ णागो ।
सिद्धत्थो धिदिसेणो विजओ बुद्धिल्लगंगदेवा य ॥ १४८५ ॥
एक्करसो य सुधम्मो दशपुव्वधरा इमे सुविक्खाण ।
पारंपरिओवगदो तेसीदि सदं च ताण वासाणिं ॥ १४८६ ॥
सव्वेसु वि कालवसा तेसु अदीदेसु भरह खेत्तम्मि ।
वियसंत भव्वकमला ण संति दसपुव्विदिवसयरा ॥ १४८७ ॥
णक्खत्तो जयपालो पंडुयधुवसेण कंस आइरिया ।
एक्कारसंगधारी पंच इमे वीर तित्थम्मि ॥ १४८८ ॥

त्रयोऽशीतिश्च नवतिः पञ्चभिः [1]साष्टसप्ततिः । द्वाभ्यां च [2]सप्ततिः षष्टिश्चत्वारिंशच्च संयुताः ॥४८३॥
षट्सु कालेषु पल्याष्टभागे शेषे तृतीयके । भूतिः कुलकराणां च ततोऽपि वृषभस्य तु ॥४८४॥
जन्म क्रमेण शेषाणां जिनानां चक्रवर्तिनाम् । हलिनां वासुदेवानां तुर्ये काले विनिश्चितम् ॥४८५॥
[3]त्र्यब्दाष्टमासमासार्धशेषयोरिह कालयोः । तृतीयतुर्ययोः सिद्धिः प्रसिद्धा वृषवीरयोः ॥४८६॥
वीरनिर्वाणकाले च पालकोऽत्राभिषिच्यते । लोकेऽवन्तिसुतो राजा प्रजानां प्रतिपालकः ॥४८७॥
षष्टिर्वर्षाणि तद्राज्यं ततो विषयभूभुजाम् । शतं च पञ्चपञ्चाशद्वर्षाणि तदुदीरितम् ॥४८८॥
चत्वारिंशत्पूरूढानां भूमण्डलमखण्डितम् । त्रिंशत्तु पुष्पमित्राणां षष्टिर्वस्वग्निमित्रयोः ॥४८९॥
शतं रासभराजानां नरवाहनमप्यतः । चत्वारिंशत्ततो द्वाभ्यां चत्वारिंशच्छतद्वयम् ॥४९०॥
भद्रवाणस्य तद्राज्यं गुप्तानां च शतद्वयम् । एकविंशश्च वर्षाणि कालविद्भिरुदाहृतम् ॥४९१॥
द्विचत्वारिंशदेवातः कल्किराजस्य राजता । ततोऽजितञ्जयो राजा स्यादिन्द्रपुरसंस्थितः ॥४९२
कौमार्ये मण्डलेशत्वे विजये राज्यसंयमे । चक्र्यादीनां यथायोग्यमितः कालो निरूप्यते ॥४९३॥

क्रमसे बानवे वर्ष, चौबीस वर्ष, सत्तर वर्ष, अस्सी वर्ष, सौ वर्ष, तेरासी वर्ष, पंचानवे वर्ष, अठहत्तर वर्ष, बहत्तर वर्ष, साठ वर्ष और चालीस वर्ष है ॥४८२-४८३॥ छह कालोंमें-से जब तृतीय कालमें पल्यका आठवाँ भाग बाकी रहा था तब क्रमसे चौदह कुलकरों और उनके बाद वृषभदेवका जन्म हुआ था। शेष तीर्थंकरों, चक्रवर्तियों, बलभद्रों और नारायणोंका जन्म चौथे कालमें निश्चित है ॥ ४८४—४८५॥ जब तीसरे कालमें तीन वर्ष साढ़े आठ माह बाकी रहे थे तब भगवान् ऋषभदेवका मोक्ष हुआ था और जब चौथे कालमें तीन वर्ष साढ़े आठ माह शेष रहे थे तब महावीरका मोक्ष होगा ॥४८६॥ जिस समय भगवान् महावीरका निर्वाण होगा उस समय यहाँ अवन्तिपुत्र पालक नामके राजाका राज्याभिषेक होगा। वह राजा प्रजाका अच्छी तरह पालन करेगा और उसका राज्य साठ वर्ष तक रहेगा। उसके बाद तद्-तद् देशोंके राजाओंका एक सौ पचपन वर्ष तक राज्य होगा ॥४८७—४८८॥ फिर चालीस वर्ष तक पुरुढ राजाओंका अखण्ड भूमण्डल होगा। तदनन्तर तीस वर्ष तक पुष्पमित्रका, साठ वर्ष तक वसु और अग्निमित्रका, सौ वर्ष तक रासभ राजाओंका, फिर चालीस वर्ष तक नरवाहनका, फिर दो सौ ब्यालीस वर्ष तक बाणभट्टका, तदनन्तर दो सौ इक्कीस वर्ष तक गुप्तोंका और इसके बाद ब्यालीस वर्ष तक कल्कि राजाका राज्य होगा। उसके बाद अजितंजय नामका राजा होगा जिसकी राजधानी इन्द्रपुर नगर होगी ॥४८९-४९२॥ अब इसके आगे चक्रवर्ती आदिकी, कुमार अवस्था, मण्डलेश्वर, दशा, दिग्विजय, राज्य और संयममें जो काल व्यतीत हुआ है उसका यथायोग्य निरूपण किया जाता है ॥ ४९३॥

दोण्णि सया वीसजुदा वासाणं ताण पिंड परिमाणं ।
तेसु अतीदे णत्थि हु भरहे एक्कारसंगधरा ॥ १४८९ ॥
पढमो सुभद्दणामो जसभद्दो तह य होदि जसबाहू ।
तुरिमो य लोहणामो एदे आयारअंगधरा ॥ १४९० ॥
सेसेक्करसंगाणं चोद्दसपुव्वाणमेक्कदेसधरा ।
एक्कसयं अट्ठारसवासजुदं वासजुदं ताण परिमाणं ॥ १४९१ ॥

—ति. प. अधिकार ४

१. साष्टसप्तभिः म० । २. सप्तभिः म० । ३. अष्टाष्टमास—म० ।

पूर्वलक्षाः कुमारेऽगुर्भरते सप्तसप्ततिः। वर्षाणां च सहस्रं तु मण्डलाधिपतौ मतम् ॥४९४॥
षष्टिर्वर्षसहस्राणि विजयो राज्यमूर्जितम्। एकपूर्वविहीनास्तु[1] पूर्वलक्षाः षडेव तु ॥४९५॥
अङ्गलक्षास्त्रयोऽशीतिर्नवतिर्नवभिः सह। सहस्राणि नवान्यानि शतानि नवतिर्नव ॥४९६॥
वर्षलक्षास्त्रयोऽशीतिस्त्रिंशन्नवसहस्रकैः। चक्रिसंयमकालस्तु पूर्वलक्षैव केवला[2] ॥४९७॥
पञ्चाशत्तु सहस्राणि पूर्वाणां पूर्वकालयोः। त्रिंशदब्दसहस्राणि विजयः सगरस्य तु ॥४९८॥
एकान्नसप्ततिर्लक्षा पूर्वाणां नवतिर्नव। सहस्राणि नवापीह शतानि नवतिर्नव ॥४९९॥
पूर्वाङ्गप्रमितिः पूर्वाः सप्ततिश्च[3] सहस्रकैः। राज्यं लक्षास्त्रयोऽशीतिः पूर्वलक्षैव संयमः ॥५००॥
पञ्चविंशतिसंख्याब्दसहस्राणि कुमारकः। मण्डलेशश्च मघवान् जये दशसहस्रवान् ॥५०१॥
तिस्रोऽस्य[4] वर्षलक्षास्तु नवत्यब्दसहस्रकैः। राज्यं तपस्तु पञ्चाशत्सहस्राणि तपस्विनः ॥५०२॥
सनत्कुमारकौमार्यं मण्डलेशत्वमेव च। सहस्राणि तु पञ्चाशद्विजयो दश[5] तानि वै ॥५०३॥
नवत्यब्दसहस्राणि राज्यं प्राज्यमुदीरितम्। वर्षलक्षास्ततस्तस्य संयमः संयमात्मनः ॥५०४॥
शान्तेर्माण्डलिकत्वे तु[6] पञ्चविंशतिरेव तु। सहस्राण्यष्टशत्येव विजये गदितं परम् ॥५०५॥

पहले भरत चक्रवर्तीका आयुकाल चौरासी लाख पूर्वका था, उसमें सतहत्तर लाख पूर्व तो कुमार कालमें बीते, एक हजार वर्ष मण्डलेश्वर अवस्थामें व्यतीत हुए, साठ हजार वर्ष तक दिग्विजय किया, एक पूर्व कम छह लाख पूर्व चक्रवर्ती होकर राज्य किया तथा एक लाख पूर्व तेरासी लाख निन्यानबे हजार नौ सौ निन्यानबे पूर्वाङ्ग और तेरासी लाख नौ हजार तीस वर्ष पर्यन्त संयमी तथा केवली रहे* ॥४९४—४९७॥

दूसरे सगर चक्रवर्तीकी आयु बहत्तर लाख पूर्व थी उसमें पचास हजार लाख पूर्व तो कुमारकालमें बीते, इतने ही मण्डलेश्वर अवस्थामें व्यतीत हुए, तीस हजार वर्ष दिग्विजयमें गये, उनहत्तर[8] लाख सत्तर हजार पूर्व, निन्यानबे हजार नौ सौ निन्यानबे पूर्वाङ्ग और तेरासी लाख वर्ष चक्रवर्ती होकर राज्य किया और एक लाख पूर्व तक संयमी रहे ॥ ४९८—५००॥

तीसरे मघवा चक्रवर्तीकी कुल आयु पाँच लाख वर्षकी थी। उसमें पचीस हजार वर्ष कुमारकालमें, पचीस हजार वर्ष मण्डलीक अवस्थामें, दस हजार वर्ष दिग्विजयमें, तीन लाख नब्बे हजार वर्ष चक्रवर्ती होकर राज्यकार्यमें और पचास हजार वर्ष संयमी अवस्थामें व्यतीत हुए ॥५०१—५०२॥

चौथे सनत्कुमार चक्रवर्तीकी कुल आयु तीन लाख वर्षकी थी। उसमें पचास हजार वर्ष कुमारकालमें, पचास हजार वर्ष माण्डलिक अवस्थामें, दस हजार वर्ष दिग्विजयमें, नब्बे हजार वर्ष चक्रवर्ती होकर राज्यके उपभोगमें और एक लाख वर्ष संयमी अवस्थामें व्यतीत हुए ॥५०३—५०४॥

पाँचवें शान्तिनाथ चक्रवर्तीकी कुल आयु एक लाख वर्षकी थी, उसमें पचीस हजार वर्ष कुमार अवस्थामें, पचीस हजार वर्ष माण्डलीक अवस्थामें, आठ सौ वर्ष दिग्विजयमें बीते

---

१. एकपूर्वाङ्गहीनास्तु म०। २. केवलं क०। ३. सप्तसप्तसहस्रकैः क०, सप्तत्यब्दसहस्रकैः ख०। ४. तिस्रस्तु क० ङ०,। ५. सहस्राणि। ६. तु शब्दात् कौमार्ये (क० टि०)।

* तिलोयपण्णत्तिमें चौरासी लाख पूर्व कुल आयु, सत्तहत्तर लाख पूर्व कुमारकाल, एक हजार वर्ष मण्डलेश्वर राजा, साठ हजार वर्ष दिग्विजय, इकसठ हजार वर्ष कम छह लाख पूर्व चक्रवर्ती होकर राज्यकाल और एक लाख पूर्व संयमकाल बतलाया है। ८. तिलोय पण्णत्तिमें चक्रवर्ती होकर राज्य करनेका काल तीस हजार वर्ष कम सत्तर लाख पूर्व बतलाया है।

कुन्थोर्मण्डलिकत्वे हि त्रिसहस्रैस्तु विंशतिः । पञ्चाशत्सप्तशत्यामा षट्शती विजयः पुनः ॥५०६॥
अरमाण्डलिकत्वेऽपि सहस्राण्येकविंशतिः । चतुःशतानि विजयः शेषः प्रागेव भाषितम् ॥५०७॥
सुभौमस्य सहस्राणि पञ्च कौमार्यमिष्यते । विजयः पञ्चशत्येव प्रचण्डस्य कुमण्डले ॥५०८॥
द्वाषष्ट्यब्दसहस्राणि तथा पञ्चशतानि च । बालत्वे गूढवृत्तस्य तस्य राज्यमिहोर्जितम् ॥५०९॥
शतानि पञ्च कौमार्यं तथा मण्डलनाथता । महापद्मस्य विजयो वर्षाणां तु शतत्रयम् ॥५१०॥
अष्टादश सहस्राणि राज्यं सप्त शतान्यपि । दशवर्षसहस्राणि संयमः संयमार्थिनः ॥५११॥
हरिषेणस्य कौमार्यं त्रिशती पञ्चविंशतिः । पञ्चाशता तु विजयस्तस्य वर्षशतं मतम् ॥५१२॥
पञ्चविंशतिसंख्यानि सहस्राणि तथा शतम् । राज्यं च पञ्चसप्तत्या पञ्चाशत्त्रिशती तपः ॥५१३॥

और शेष* विवरण तीर्थंकरोंके वर्णनके समयमें कहा जा चुका है ॥५०५॥

छठे कुन्थुनाथ चक्रवर्ती की कुल आयु पंचानबे हजार वर्षकी थी, उसमें तेईस हजार सात सौ पचास वर्ष कुमारकालमें, इतने ही माण्डलिक अवस्थामें और छह सौ वर्ष दिग्विजय कालमें व्यतीत हुए तथा शेष वर्णन पहले कर चुके† हैं ॥५०६॥

सातवें अरनाथ चक्रवर्तीकी कुल आयु पचासी हजार वर्षकी थी। उसमें इक्कीस हजार वर्ष कुमार अवस्थामें, इतने ही माण्डलिक अवस्थामें और चार सौ वर्ष दिग्विजयमें व्यतीत हुए। शेष वर्णन पहले किया जा चुका‡ है ॥५०७॥

आठवें सुभौम चक्रवर्तीकी कुल आयु अरसठ हजार वर्षकी थी उसमें, पाँच हजार वर्ष कुमार अवस्थामें, पाँच सौ वर्ष दिग्विजयमें और साढ़े बासठ हजार वर्ष चक्रवर्ती होकर राज्य अवस्थामें बीते। ये परशुरामके भयसे आश्रममें पले थे इसलिए मण्डलीक पद प्राप्त नहीं कर सके। ये पृथिवी मण्डलपर अतिशय तीक्ष्ण प्रकृतिके थे तथा अज्ञानी दशामें रहनेके कारण संयम धारण नहीं कर सके और मरकर सातवें नरक §गये ॥५०८–५०९॥

नौवें महापद्म चक्रवर्तीकी आयु तीस हजार वर्षकी थी उसमें पाँच सौ वर्ष कुमार अवस्थामें, पाँच सौ वर्ष मण्डलीक अवस्थामें, तीन सौ वर्ष दिग्विजयमें, अठारह हजार सात सौ वर्ष चक्रवर्ती होकर राज्य अवस्थामें और दस हजार वर्ष संयमी अवस्थामें व्यतीत हुए हैं ॥ ५१०—५११॥

दसवें हरिषेण चक्रवर्तीकी आयु छब्बीस हजार वर्षकी थी। उसमें तीन सौ पचीस वर्ष कुमार अवस्थामें, एक सौ पचास वर्ष दिग्विजयमें, पच्चीस हजार एक सौ पचहत्तर वर्ष चक्रवर्ती होकर राज्य अवस्थामें और तीन सौ पचास वर्ष संयमी अवस्थामें व्यतीत

---

* शान्तिनाथने चौबीस हजार दो सौ वर्ष तक चक्रवर्ती होकर राज्य भोगा, सोलह वर्ष तक संयमी रहे और सोलह वर्ष कम पचीस हजार वर्ष तक केवली रहे।

† कुन्थुनाथने तेईस हजार एक सौ पचास वर्ष तक चक्रवर्ती होकर राज्य किया, सोलह वर्ष संयमी रहे और तेईस हजार सात सौ चौंतीस वर्ष तक केवली रहे।

‡ अरनाथने इक्कीस हजार छह सौ वर्ष चक्रवर्ती होकर राज्य भोगा, सोलह वर्ष संयमी रहे और सोलह वर्ष कम इक्कीस हजार वर्ष केवली रहे।

§ तिल्लोयपण्णत्तिमें सुभौम चक्रवतीकी आयु साठ हजार वर्षकी बतायी है। जिसमें पाँच हजार वर्ष कुमारकालमें, पाँच हजार वर्ष मण्डलीक अवस्थामें, पाँच सौ वर्ष दिग्विजयमें और साढ़े उनचास हजार वर्ष राज्य अवस्थामें बीते हैं।

जयसेनस्य कौमार्यं त्रिशती मण्डलेशिता । विजयस्तु शतं राज्यं सहस्रं नवशत्यपि ॥५१४॥
चतुःशती तपस्तस्य ब्रह्मदत्तकुमारता । अष्टाविंशतिवर्षाणि षट्पञ्चाशत्समण्डली ॥५१५॥
विजयः षोडशाब्दानि षट् शतानि तु राजता । ब्रह्मदत्तस्य विज्ञेया केशवानां तु कथ्यते ॥५१६॥
त्रिपृष्ठस्य सहस्राणि कौमार्ये पञ्चविंशतिः । विज्ञेयोऽब्दसहस्रे तु विजयः स्नेहवाहिनः ॥५१७॥
वर्षलक्षास्त्रयोऽशीतिसहस्राणि तु सप्ततिः । चतुर्भिरधिका तस्य राज्यं राजकराजितम् ॥५१८॥
द्विपृष्ठस्यापि कौमार्यं मण्डलैश्यमपि स्फुटम् । सहस्राणि समाख्यातं प्रत्येकं पञ्चविंशतिः ॥५१९॥
विजयोऽब्दशतं लक्षा राज्यं तस्यैकसप्ततिः । चत्वारिंशत्सहस्राणि नवतिर्नवशत्यपि ॥५२०॥
द्वादशैव सहस्राणि पञ्चशत्या स्वयम्भुवः । कौमार्यं मण्डलेशत्वं विजयो नवतिः पुनः ॥५२१॥
एकान्नषष्टिलक्षाश्च चतुःसप्ततिरेव च । सहस्राणि शतै राज्यं नवभिर्दश पञ्चकैः[1] (?) ॥५२२॥
पुरुषोत्तमकौमार्यं मतं सप्त शतानि तु । अशीतिर्विजयस्त्रीणि शतान्यब्दसहस्रकम् ॥५२३॥
मण्डलेशत्वमेतद्धि त्रिंशल्लक्षा विनैककम् । नवतिश्च सहस्राणि सप्तभिर्नवशत्यपि ॥५२४॥

हुए* ॥५१२—५१३॥

ग्यारहवें जयसेन चक्रवर्तीकी कुल आयु तीन हजार वर्षकी थी। उसमें तीन सौ वर्ष कुमार अवस्थामें, तीन सौ वर्ष मण्डलीक अवस्थामें, सौ वर्ष दिग्विजयमें, एक हजार नौ सौ वर्ष चक्रवर्ती होकर राज्य अवस्थामें और चार सौ वर्ष संयम अवस्थामें व्यतीत हुए।

और बारहवें ब्रह्मदत्त चक्रवर्तीकी आयु सात सौ वर्षकी थी। उसमें अट्ठाईस वर्ष कुमार अवस्थामें, छप्पन वर्ष मण्डलीक अवस्थामें, सोलह वर्ष दिग्विजयमें और छह सौ वर्ष राज्य अवस्थामें व्यतीत हुए। ये संयम धारण नहीं कर सके और मरकर सातवें नरक गये। इस प्रकार चक्रवर्तियोंकी आयुका विवरण कहा और नारायणोंकी आयुका विवरण कहा जाता है ॥५१४—५१६॥

स्नेहको धारण करनेवाले त्रिपृष्ठ नारायणकी कुल आयु चौरासी लाख वर्षकी थी। उसमें पच्चीस हजार वर्ष कुमार अवस्थामें, एक हजार वर्ष दिग्विजयमें और तेरासी लाख चौहत्तर हजार वर्ष राज्य अवस्थामें व्यतीत हुए† ॥४१७—५१८॥

द्विपृष्ठ नारायणकी कुल आयु बहत्तर लाख वर्षकी थी उसमें पच्चीस-पच्चीस हजार वर्ष कुमार अवस्था तथा मण्डलीक अवस्थामें, सौ वर्ष दिग्विजयमें और इकहत्तर लाख उनचास हजार नौ सौ वर्ष पर्यन्त राज्य किया ॥५१९—५२०॥

स्वयम्भू नारायणकी कुल आयु साठ लाख वर्षकी थी। उसमें बारह हजार पाँच सौ वर्ष कुमार अवस्थामें, इतने ही मण्डलीक अवस्थामें, नब्बे वर्ष दिग्विजयमें और उनसठ हजार लाख चौहत्तर हजार नौ सौ दस वर्ष राज्य अवस्थामें व्यतीत हुए ॥५२१-५२२॥

पुरुषोत्तम नारायणकी कुल आयु तीस लाख वर्षकी थी। उसमें सात सौ वर्ष कुमार अवस्थामें, एक हजार तीन सौ वर्ष मण्डलीक अवस्थामें, अस्सी वर्ष दिग्विजयमें और उनतीस

---

१. नवभिर्दशवर्षकैः (ङ० पुस्तके टिप्पण्यां पाठान्तरम्) ।

*. तिलोयपण्णत्तिमें हरिषेण चक्रवर्तीकी आयु दस हजार वर्षकी बतायी है। उसमें तीन सौ पच्चीस कुमार अवस्थामें, इतने ही मण्डलीक अवस्थामें, एक सौ पचास दिग्विजयमें, आठ हजार आठ सौ पचास वर्ष राज्य अवस्थामें और तीन सौ पचास वर्ष संयमी अवस्थामें बीते हैं।

†. तिलोयपण्णत्तिमें पच्चीस हजार वर्ष कुमार अवस्थामें, पच्चीस हजार वर्ष मण्डलीक अवस्थामें, एक हजार वर्ष दिग्विजयमें और शेष तेरासी लाख उनचास हजार वर्ष राज्य अवस्थामें व्यतीत हुए ऐसा लिखा है।

त्रिंशतिश्चैव वर्षाणि राज्यमत्यन्तमूर्जितम् । पुरुषोत्तमतां भूमौ भूम्ना तस्येह बिभ्रतः ॥५२५॥
कौमार्यं त्रिशती पञ्चविंशत्या शतमीरितम् । मण्डलैश्यं हि विजयः सप्ततिः प्रतिपादितः ॥५२६॥
नवलक्षा सहस्राणि नवतिर्नव च स्मृता । राज्यं पुरुषसिंहस्य पञ्चभिः पञ्चशत्यपि ॥५२७॥
पञ्चाशता शते द्वे तु कौमार्यं मण्डलेशता । विजयः षष्टिवर्षाणि विजयोर्जिततेजसः ॥५२८॥
चत्वारिंशच्च वर्षाणि स्याच्चत्वारि शतान्यपि । चतुःषष्टिसहस्राणि पुण्डरीकस्य राजता ॥५२९॥
शते दत्तस्य कौमार्यं पञ्चाशत्कालयोर्द्वयम् । एकत्रिंशत्सहस्राणि सप्तशत्यापि राजता ॥५३०॥
शतं लक्ष्मणकौमार्यं चत्वारिंशद्विजेतृता । एकादशसहस्राष्टशतषष्ट्यब्दराजता ॥५३१॥
कुमारकालः कृष्णस्य षोडशाब्दानि षट्युता । पञ्चाशन्मण्डलेशत्वं विजयोऽष्टाब्दकं स्फुटम् ॥५३२॥
शतानि नव विंशत्या कृष्णराजस्य सम्मितिः । तथैकादशरुद्राणां कालसंख्या निरूप्यते ॥५३३॥
तीर्थे भीमावलिर्जातो वृषभस्याजितस्य तु । जितशत्रुरिति ख्यातो रुद्राख्यः सुविधेः पुनः ॥५३४॥
विश्वानलस्तु दशमे श्रेयसः सुप्रतिष्ठकः । अचलो वासुपूज्यस्य पुण्डरीकस्तु वैमले ॥५३५॥

लाख सन्तानबे हजार नौ सौ बीस वर्ष पृथिवीतलपर नारायणपद धारण करते हुए राज्य अवस्थामें व्यतीत हुए ॥५२३–५२५॥

पुरुष सिंह नारायणकी कुल आयु दस लाख वर्षकी थी । उसमें तीन सौ वर्ष कुमार अवस्थामें, एक सौ पच्चीस वर्ष मण्डलीक अवस्थामें, सत्तर वर्ष दिग्विजयमें और नौ लाख निन्यानबे हजार पाँच सौ पाँच वर्ष राज्य अवस्थामें व्यतीत हुए* ॥५२६–५२७॥

पुण्डरीक नारायणकी कुल आयु पैंसठ हजार वर्षकी थी । उसमें दो सौ पचास वर्ष कुमार अवस्थामें, इतने ही मण्डलीक अवस्थामें, साठ वर्ष दिग्विजयमें, और चौंसठ हजार चार सौ चालीस वर्ष राज्य अवस्थामें व्यतीत हुए ॥५२८–५२९॥

दत्त नारायणकी कुल आयु बत्तीस हजार वर्षकी थी । उसमें सौ वर्ष कुमार अवस्थामें, पचास वर्ष मण्डलीक अवस्थामें, पचास वर्ष दिग्विजयमें और इकतीस हजार सात सौ वर्ष राज्य अवस्थामें व्यतीत हुए ॥५३०॥

लक्ष्मण नारायणकी कुल आयु बारह हजार वर्षकी थी । उसमें सौ वर्ष कुमार अवस्थामें, चालीस वर्ष दिग्विजयमें और ग्यारह हजार आठ सौ साठ वर्ष राज्य अवस्थामें व्यतीतमें †हुए ॥५३१॥

कृष्ण नारायणकी कुल आयु एक हजार वर्षकी है । उसमें सोलह वर्ष कुमार अवस्थामें, छप्पन वर्ष मण्डलीक अवस्थामें, आठ वर्ष दिग्विजयमें और नौ सौ बीस वर्ष राज्य अवस्थामें व्यतीत होंगे । इस प्रकार नारायणोंके कालका वर्णन किया । अब ग्यारह रुद्रोंके काल और संख्याका वर्णन करते हैं ॥५३२—५३३॥

रुद्र ग्यारह होते हैं । उनमें भगवान् वृषभदेवके तीर्थमें भीमावलि, अजितनाथके तीर्थमें जितशत्रु, पुष्पदन्तके तीर्थमें रुद्र, शीतलनाथके तीर्थमें ‡विश्वानल, श्रेयांसनाथके तीर्थमें सुप्रतिष्ठक, वासुपूज्यके तीर्थमें अचल, विमलनाथके तीर्थमें पुण्डरीक, अनन्तनाथके तीर्थमें

---

*. ति. प. में पुरुषसिंह नारायणका मण्डलीककाल १२५० वर्ष तक और राज्यकाल नौ लाख अंठानबे हजार तीन सौ अस्सी वर्ष बतलाया है ।

†. ति. प. में लक्ष्मणका मंडलीककाल तीन सौ वर्ष और राज्यकाल ग्यारह हजार पाँच सौ साठ वर्ष बतलाया है ।

‡. ति. प. में 'वैश्वानर' नाम आया है ।

अजितन्धरोऽनन्तस्य धर्मस्याजितनाभिकः । पीठाख्यः शान्तितीर्थेऽभूत् सुतो वीरस्य सत्यकेः ॥५३६॥
भीमावलेस्तनूत्सेधः पञ्चचापशतान्यतः । तान्यर्धपञ्चमान्येकं दशहानिस्तु पञ्चसु ॥५३७॥
अष्टाविंशतिरन्यस्य चतुर्विंशतिरप्यतः । सप्तैवारत्नयोऽन्त्यस्य वपुरुत्सेध इष्यते ॥५३८॥
पूर्वाण्यायुस्त्रयोऽशीतिलक्षास्त्वेकसप्ततिः । द्वे लक्षे चैकलक्षा च [1]लक्ष्यालक्ष्य विचक्षणैः ॥५३९॥
लक्षाश्चतुरशीतिश्च षष्टिः पञ्चाशदेव च । चत्वारिंशच्च वर्षाणां विंशतिर्लक्षया[2] क्रमात् ॥५४०॥
आयुरेकादशस्यापि वर्षाण्येकान्नसप्ततिः । अभिन्नदशपूर्वाणां रुद्राणां रौद्रकर्मणाम् ॥५४१॥
त्रयः कालास्तु सर्वेषां रुद्राणां क्रमशः स्थिताः । कौमारः संयमोपेतो गृहीतोज्झितसंयमः ॥५४२॥
कालस्त्रिभागशेषेण चतुर्णां संयमाधिकः । समा द्वयोस्त्रयोऽप्यन्ये कौमाराधिक इष्यते ॥५४३॥
संयमाधिक एकस्य कौमारोऽन्यस्य साधिकः । दशमस्यापि रुद्रस्य संयमाधिक एव सः ॥५४४॥
वर्षाणि सप्त कौमार्ये विंशतिः संयमेऽष्टभिः । एकादशस्य रुद्रस्य चतुस्त्रिंशदसंयमे ॥५४५॥
द्वयोस्तु सप्तमी पृथ्वी पञ्चानां षष्ठ्यधिष्ठितिः । एकस्य पञ्चमी भूमिश्चतुर्थी तु द्वयोस्ततः ॥५४६॥
तृतीयान्त्यस्य निर्दिष्टा यथोद्दिष्टा इमाः पुनः । [2]भूर्यसंयमभाराणां रुद्राणां जन्मभूमयः ॥५४७॥

अजितन्धर, धर्मनाथके तीर्थमें अजितनाभि, शान्तिनाथके तीर्थमें पीठ नामका रुद्र हुआ है तथा महावीरके तीर्थमें सत्यकिपुत्र रुद्र होगा ॥५३४—५३६॥

भीमावलीके शरीरकी ऊँचाई पाँच सौ धनुष, जितशत्रुकी साढ़े चार सौ धनुष, रुद्रकी सौ धनुष, विश्वानलकी नब्बे धनुष, सुप्रतिष्ठककी अस्सी धनुष, अचलकी सत्तर धनुष, पुण्डरीककी साठ धनुष, अजितन्धरकी पचास धनुष, अजितनाभिकी अट्ठाईस धनुष, पीठकी चौबीस धनुष, और सत्यकिपुत्रकी सात धनुष मानी जाती है ॥५३७—५३८॥

इन रुद्रोंकी आयु क्रमसे तेरासी लाख पूर्व, इकहत्तर लाख पूर्व, दो लाख पूर्व, एक लाख पूर्व, चौरासी लाख वर्ष, साठ लाख वर्ष, पचास लाख वर्ष, चालीस लाख वर्ष, बीस लाख वर्ष, दस लाख वर्ष और उनहत्तर वर्ष है। ये सभी रुद्र दश पूर्वके पाठी होते हैं और रौद्र कार्यके करनेवाले हैं ॥५३९—५४१॥

इन सभी रुद्रोंके क्रमसे तीन काल होते हैं—१ कुमारकाल, २ संयमकाल और ३ गृहीत संयमको छोड़कर असंयमी होनेका काल ॥५४२॥ इनमें चारका संयमकाल त्रिभाग शेषसे कुछ अधिक था अर्थात् कुमारकाल और असंयमकालसे कुछ अधिक था, दोके तीनों काल बराबर थे, सातवेंका कुमारकाल, आठवेंका संयमकाल, नौवेंका कुमारकाल, और दसवेंका संयमकाल अधिक था। ग्यारहवें रुद्रका कुमारकाल सात वर्षका, संयमकाल अट्ठाईस वर्षका और असंयमकाल चौंतीस वर्षका होगा† ॥५४२—५४५॥

इनमें प्रारम्भके दो रुद्र सातवीं पृथिवी, पाँच रुद्र छठवीं पृथिवी, एक पाँचवीं पृथिवी और दो चौथी पृथिवी गये हैं तथा अन्तिम रुद्र तीसरी भूमिमें जावेगा। उन रुद्रोंके जीवनमें असंयमका भार अधिक होता है। इसलिए उन्हें नरकगामी होना पड़ता है ॥५४६–५४७॥

---

१. ज्ञातव्या (ङ० टि०)। २. 'दशलक्षाप्रपितम्' इति सर्वहस्तलिखितप्रतिषु 'लक्षया' इत्योस्योपरि अङ्केर्लिखितम्। तेसीदी इगिसत्तरि दोण्णि एक्कं च पुव्वलक्खाणि। चुलसीदि सट्ठिपण्णा चालिस वस्साणि लक्खाणि ॥१४४६॥ बीस दस चेव लक्खा वासा एक्कूणसत्तरी कमसो। एक्कारसरुद्दाणं पमाणमाउस्स णिद्दिट्ठं ॥ १४४७ ॥ २. तूर्यसंयम—ख, तूर्य-ङ चतुर्थव्रतधारिणां नारदानाम् (ङ० टि०)।

† यह विषय ति. प. में तीनों कालोंके अलग-अलग अङ्क देकर स्पष्ट किया गया है (चतुर्थ अधिकार गाथा १४४८ से १४६७ गाथा तक)

भीमश्चाथ महाभीमो रुद्रनामा तृतीयकः । महारुद्रोऽथ कालश्च महाकालश्चतुर्मुखः ॥५४८॥
नरवक्त्रोन्मुखाख्यौ द्वौ नवैते नारदाः स्मृताः । वासुदेवसमानायुःस्थितिस्तेषां प्रजायते ॥५४९॥
कलहे प्रीतिसंयुक्ताः कदाचिद्धर्मवत्सलाः । हिंसानन्दवशास्त्वेते महाभव्या जिनानुगाः ॥५५०॥
वर्षाणां षट्शतीं त्यक्त्वा पञ्चाग्रं मासपञ्चकम् । मुक्तिं गते महावीरे शकराजस्ततोऽभवत् ॥५५१॥
मुक्तिंगते महावीरे प्रतिवर्षसहस्रकम् । एकैको जायते कल्की जिनधर्मविरोधकः ॥५५२॥
इहास्यामवसर्पिण्यां यथा तीर्थकरादयः । उत्सर्पिण्यां भविष्यन्त्यां भविष्यन्ति तथा परे ॥५५३॥
भविष्यद्दुःषमाशेषे सहस्रपरिमाणके । चतुर्दश भविष्यन्ति प्रागिमे कुलकारिणः ॥५५४॥
कनत्कनकसंकाशः कनकः कनकप्रभः । त्रयः कनकपूर्वाः स्युस्ते राजध्वजपुङ्गवाः ॥५५५॥
नलिनीदलसंकाशो नलिनो नलिनप्रभः । नलिनोपपदास्त्वन्ये ते राजध्वजपुङ्गवाः ॥५५६॥
ततः पद्मप्रभो ज्ञेयः पद्मराजस्ततः परः । पद्मध्वजश्च बोद्धव्यः पद्मपुङ्गव एव च ॥५५७॥
तीर्थकृच्च महापद्मः सुरदेवो जिनाधिपः । सुपार्श्वनामधेयोऽन्यो यथार्थश्च स्वयंप्रभः ॥५५८॥
सर्वात्मभूत इत्यन्यो देवदेवः प्रभोदयः । उदङ्कः प्रश्नकीर्तिश्च जयकीर्तिश्च सुव्रतः ॥५५९॥
अरश्च पुण्यमूर्तिश्च निष्कषायो जिनेश्वरः । विपुलो निर्मलाभिख्यश्चित्रगुप्तो परः स्मृतः ॥५६०॥

भीम, महाभीम, रुद्र, महारुद्र, काल, महाकाल, चतुर्मुख, नरवक्त्र और उन्मुख, ये नौ नारद माने गये हैं। उनकी आयु नारायणोंकी आयुके बराबर होती है तथा वे नारायणोंके समय ही होते हैं। वे कलहमें प्रीतिसे युक्त होते हैं, कदाचित् धर्मसे भी स्नेह रखते हैं, हिंसामें आनन्द मानते हैं तथा महाभव्य और जिनेन्द्र भगवान्‌के अनुगामी होते हैं ॥५४८—५५०॥

भगवान् महावीरके मोक्ष जानेके पश्चात् छह सौ पाँच वर्ष पाँच मास बीत जानेपर राजा शक* होगा और हजार-हजार वर्ष बाद एक-एक कल्की राजा होता रहेगा जो जैनधर्म-का विरोधी होगा ॥५५१—५५२॥ जिस प्रकार इस अवसर्पिणीमें तीर्थङ्कर आदि हुए हैं उसी प्रकार आगे आनेवाली उत्सर्पिणीमें भी दूसरे-दूसरे तीर्थङ्कर आदि होंगे ॥५५३॥ जब आने-वाले दुःषमा नामक कालमें एक हजार वर्ष शेष रह जावेंगे तब पहले क्रमसे ये चौदह कुलकर होंगे—१ देदीप्यमान स्वर्णके समान कान्तिवाला कनक, २ कनकप्रभ, ३ कनकराज, ४ कनक-ध्वज, ५ कनकपुङ्गव, ६ कमलिनीके पत्तेके समान वर्णवाला नलिन, ७ नलिनप्रभ, ८ नलिनराज, ९ नलिनध्वज, १० नलिनपुङ्गव, ११ पद्मप्रभ, १२ पद्मराज, १३ पद्मध्वज और १४ पद्मपुङ्गव ॥५५४—५५७॥

कुलकरोंके बाद क्रमसे निम्नलिखित चौबीस तीर्थंकर होंगे—१ महापद्म, २ सुरदेव, ३ सुपार्श्व, ४ स्वयंप्रभ, ५ सर्वात्मभूत, ६ देवदेव, ७ प्रभोदय, ८ उदङ्क, ९ प्रश्नकीर्ति, १० जयकीर्ति, ११ सुव्रत, १२ अर, १३ पुण्यमूर्ति, १४ निष्कषाय, १५ विपुल, १६ निर्मल, १७ चित्रगुप्त,

---

* शकराजाकी उत्पत्तिके विषयमें ति. प. में इस मतके सिवाय निम्नलिखित ३ मतोंका उल्लेख और किया गया है—(१) वीर जिनेन्द्रकी मुक्ति होनेके बाद चार सौ इकसठ वर्ष प्रमाणकाल बीत जानेपर शक राजा उत्पन्न हुआ। (२) नौ हजार सात सौ पचासी वर्ष और पाँच मास बीत जानेपर (३) चौदह हजार सात सौ तिरानबे वर्ष बीत जानेपर। गाथा निम्न प्रकार हैं—वीरजिणे सिद्धिगदे चऊसद इगि सट्ठिवास परिमाणे। कालम्मि अदिक्कंते उप्पण्णो एत्थ शकराओ ॥१४९६॥ अहवा तीरे सिद्धे सहस्सण-वकम्मि सगसयब्भहिये। पणसीदिम्मि यतीदे पणमासे सकणिओ जादो ॥१४९७॥ चोद्दस सहस्स सगसय तेणउदी वासकाल विच्छेदे। वीरेसरसिद्धीदो उप्पणो सगणिओ अहवा ॥१४९८॥ णिव्वाणे वीरजिणे छव्वास सदेसु पंचवरिसेसुं। पणमासेसु गदेसुं संजादो सगणिओ अहवा ॥१४९९॥ ति. प. च. अ.।

समाधिगुप्तनामान्यः स्वयम्भूरनिवर्तकः । जयो विमलसंज्ञश्च [1]दिव्यपाद इतीरितः ॥५६१॥
चरमोऽनन्तवीर्योऽमी वीर्यधैर्यादिसद्गुणाः । चतुर्विंशतिसंख्याना भविष्यत्तीर्थकारिणः ॥५६२॥
भरतो दीर्घदन्तश्च जन्मदन्तश्च चक्रिणः । गूढदत्तोऽपरो नाम्ना श्रीषेण इति विश्रुतः ॥५६३॥
श्रीभूतिरितिभूतोऽन्यः श्रीकान्तः पद्मनामकः । महापद्मस्तथैवान्यश्चित्रवाहनसंज्ञकः ॥५६४॥
विमुक्तमलसंपर्को नाम्नः विमलवाहनः । अरिष्टसेन इत्येते चक्रिणो द्वादशोदिताः ॥५६५॥
नन्दी च नन्दिमित्रश्च नन्दिनो नन्दिभूतिकः । महातिबलनामानौ बलभद्रश्च सप्तमः ॥५६६॥
द्विपृष्ठश्च त्रिपृष्ठश्च वासुदेवा नवैव ते । भविष्यन्त्यञ्जनच्छायाश्छायाछन्नदिगन्तराः ॥५६७॥
चन्द्रश्चापि महाचन्द्रस्तथा चन्द्रधरश्रुतिः । सिंहचन्द्रो हरिश्चन्द्रः श्रीचन्द्रः पूर्णचन्द्रकः ॥५६८॥
सुचन्द्रो बालचन्द्रश्च नवैते चन्द्रसप्रभाः । बलाः प्रतिद्विषश्चान्ये नव श्रीहरिकण्ठकौ ॥५६९॥
नीलकण्ठाश्वकण्ठौ च सुकण्ठशिखिकण्ठकौ । अश्वग्रीवहयग्रीवौ मयूरग्रीव इत्यपि ॥५७०॥
प्रमदः सम्मदो हर्षः प्रकामः कामदो भवः । हरो मनोभवो मारः कामो रुद्रस्तथाङ्गजः ॥५७१॥
भव्याः कतिपयैरेव तेऽपि सेत्स्यन्ति जन्मभिः । रत्नत्रयपवित्राङ्गाः सन्तः सन्तो नरोत्तमाः ॥५७२॥

वसन्ततिलकावृत्तम्

अन्तर्मुहूर्तमपि लब्धविमुक्तमेकं सम्यक्त्वरत्नमचिरेण विमुक्तिहेतुः ।
रत्नत्रयस्य तु [2]पवित्रतमस्य लोके साक्षाद्भवप्रमथनस्य किमत्र वाच्यम् ॥५७३॥

---

१८ समाधिगुप्त, १९ स्वयंभू, २० अनिवर्तक, २१ जय, २२ विमल, २३ दिव्यपाद और २४ अनन्तवीर्य। ये सभी वीर्य धैर्य आदि सद्गुणोंसे सहित होते हैं ॥५५८–५६२॥

१ भरत, २ दीर्घदन्त, ३ जन्मदत्त, ४ गूढदत्त, ५ श्रीषेण, ६ श्रीभूति, ७ श्रीकान्त, ८ पद्मनामक, ९ महापद्म, १० चित्रवाहन, ११ मलके संपर्कसे रहित विमलवाहन और १२ अरिष्टसेन ये आगे होनेवाले बारह चक्रवर्ती कहे गये हैं ॥५६३–५६५॥

१ नन्दी, २ नन्दिमित्र, ३ नन्दिन, ४ नन्दिभूतिक, ५ महाबल, ६ अतिबल, ७ बलभद्र, ८ द्विपृष्ठ और त्रिपृष्ठ ये नौ भविष्यत्कालमें होनेवाले नारायण हैं। ये अञ्जनके समान कान्तिके धारक होते हैं तथा अपनी कान्तिसे दिशाओंके अन्तरालको व्याप्त करते हैं ॥५६६–५६७॥

१ चन्द्र, २ महाचन्द्र, ३ चन्द्रधर, ४ सिंहचन्द्र, ५ हरिश्चन्द्र, ६ श्रीचन्द्र, ७ पूर्णचन्द्र, ८ सुचन्द्र और ९ बालचन्द्र ये नौ आगामीकालमें होनेवाले बलभद्र हैं। ये सभी चन्द्रमाके समान कान्तिके धारक होते हैं।

१ श्रीकण्ठ, २ हरिकण्ठ, ३ नीलकण्ठ, ४ अश्वकण्ठ, ५ सुकण्ठ, ६ शिखिकण्ठ, ७ अश्वग्रीव, ८ हयग्रीव और मयूरग्रीव ये नौ प्रतिनारायण होंगे ॥५६८–५७०॥

१ प्रमद, २ संमद, ३ हर्ष, ४ प्रकाम, ५ कामद, ६ भव, ७ हर, ८ मनोभव, ९ मार, १० काम और ११ अङ्गज ये ग्यारह रुद्र होंगे। ये सब भव्य होंगे तथा कुछ ही भवोंमें मोक्ष प्राप्त करेंगे। इनके शरीर भी रत्नत्रयसे पवित्र होंगे तथा उत्तम महापुरुष होंगे ॥५७१–५७२॥

एक सम्यग्दर्शनरूपी रत्न अन्तर्मुहूर्तके लिए भी प्राप्त होकर छूट जाता है तो वह भी शीघ्र ही मोक्षप्राप्तिका कारण होता है, फिर संसारमें अतिशय पवित्र एवं साक्षात् भवभ्रमणको नष्ट करनेवाले रत्नत्रयकी तो बात ही क्या है ? ॥५७३॥

---

१. दिव्यवाद म० । २. पवित्रितमस्य म० ।

वाक्यं त्रिकालविषयार्थनिरूपणार्थमाकर्ण्य कर्णसुखमित्थमिनस्य भूपाः ।
कृष्णादयो हरिरविप्रमुखाश्च देवा नत्वा जिनं स्वपदमीयुरुपात्ततत्त्वाः ॥५७४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यकृतौ त्रिषष्टिपुरुषजिनान्तरवर्णनो नाम षष्टितमः सर्गः ॥६०॥

इस प्रकार भगवान् नेमिनाथकी कर्णोंको सुख उपजानेवाली एवं त्रिकालविषयक पदार्थोंका वर्णन करनेवाली दिव्यध्वनि सुनकर कृष्ण आदि राजा तथा इन्द्र और सूर्य आदि देव, धर्मके यथार्थ तत्त्वको ग्रहण कर एवं नेमि जिनेन्द्रको नमस्कार कर अपने-अपने स्थानपर चले गये ॥५७४॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्यरचित हरिवंशपुराणमें त्रेशठ शलाकापुरुषोंका चरित्र तथा तीर्थंकरोंके अन्तरालका वर्णन करनेवाला साठवाँ सर्ग समाप्त हुआ ॥ ६० ॥

एकषष्टितमः सर्गः

आकूतं श्रेणिकस्याथ ज्ञात्वा गणभृदग्रणीः । वृत्तं गजकुमारस्य जगादेति जगन्नुतम् ॥१॥
श्रुत्वा गजकुमारोऽसौ जिनादिचरितं तथा । विमोच्य सकलान् बन्धून् पितृपुत्रपुरस्सरान् ॥२॥
संसारभीरुरासाद्य जिनेन्द्रं [1]प्रश्रयान्वितम् । गृहीत्वाऽनुमतो दीक्षां तपः कर्तुं समुद्यतः ॥३॥
निरूपितास्तु याः कन्याः कुमाराय गजाय ताः । प्रभावत्यादयः सर्वा निर्वेदिन्यः प्रवव्रजुः ॥४॥
कुमारश्रमणस्याथ गजस्यैकान्तवर्तिनः । निशीथे प्रतिमास्थस्य सर्वद्वन्द्वसहस्य सः ॥५॥
सोमशर्मा सुतात्यागक्रोधाग्निकणदीपितः[2] । अदीदिपदुदाराग्निं शिरसि स्थिरचेतसः ॥६॥
दह्यमानशरीरोऽसौ शुक्लध्यानेन कर्मणाम् । अन्तं कृत्वा ययौ मोक्षमन्तकृत्केवली मुनिः ॥७॥
तस्य [3]देहमहं चक्रुः समुपेत्य सुराऽसुराः । यक्षकिन्नरगन्धर्वमहोरगपुरोगमाः ॥८॥
ज्ञात्वा तन्मरणं [4]दुःखाद् यादवा बहवस्तथा । दशार्हाश्च विहायान्त्यं दीक्षिता मोक्षकांक्षिणः ॥९॥
देव्यः शिवादयो बह्व्यो देवकीं रोहिणीं विना । वसुदेवस्त्रियो विष्णोः कन्याश्चापि प्रवव्रजुः ॥१०॥
ततः [5]सुरनराभ्यर्च्यो नानाजनपदान् जिनः । विजहार महाभूत्या भव्यराजीं प्रबोधयन् ॥११॥
उदीच्यान्नृपशार्दूलान् मध्यदेशनिवासिनः । प्राच्यानपि प्रजायुक्तान् स धर्मे स्थापयन् बहून् ॥१२॥

अथानन्तर श्रेणिकका अभिप्राय जानकर गणधरोंके अधिपति श्री गौतम स्वामीने जगत्के द्वारा स्तुत गजकुमारका वृत्तान्त इस प्रकार कहना शुरू किया ॥ १ ॥ वे कहने लगे कि इस प्रकार गजकुमार, तीर्थंकर आदिका चरित्र सुनकर संसारसे भयभीत हो गया और पिता, पुत्र, आदि समस्त बन्धुजनोंको छोड़कर बड़ी विनयसे जिनेन्द्र भगवान्‌के समीप पहुँचा और उनसे अनुमति ले दीक्षा ग्रहण कर तप करनेके लिए उद्यत हो गया ॥ २-३ ॥ गजकुमारके लिए जो प्रभावती आदि कन्याएँ निश्चित की गयी थीं उन सभीने संसारसे विरक्त हो दीक्षा धारण कर ली ॥ ४ ॥

तदनन्तर किसी दिन गजकुमार मुनि रात्रिके समय एकान्तमें प्रतिमायोगसे विराजमान हो सब प्रकारकी बाधाएँ सहन कर रहे थे कि सोमशर्मा अपनी पुत्रीके त्यागसे उत्पन्न क्रोधरूपी अग्निके कणोंसे प्रदीप्त हो उनके पास आया और स्थिर चित्तके धारक उन मुनिराजके शिरपर तीव्र अग्नि प्रज्वलित करने लगा ॥ ५-६ ॥ उस अग्निसे उनका शरीर जलने लगा। उसी अवस्थामें वे शुक्लध्यानके द्वारा कर्मोंका क्षय कर अन्तकृत्केवली हो मोक्ष चले गये ॥ ७ ॥ यक्ष, किन्नर, गन्धर्व और महोरग आदि सुर और असुरोंने आकर उनके शरीरकी पूजा की ॥ ८ ॥ गजकुमार मुनिका मरण जानकर दुःखी होते हुए बहुत-से यादव तथा वसुदेवको छोड़कर शेष समुद्रविजय आदि दशार्ह मोक्षकी इच्छासे दीक्षित हो गये ॥ ९ ॥ शिवा आदि देवियों, देवकी और रोहिणीको छोड़कर वसुदेवकी अन्य स्त्रियों तथा कृष्णकी पुत्रियोंने भी दीक्षा धारण कर ली ॥ १० ॥

तदनन्तर देव और मनुष्योंसे पूजित भगवान् नेमिजिनेन्द्रने, भव्य जीवोंके समूहको प्रबोधित करते हुए, नाना देशोंमें बड़े वैभवके साथ विहार किया ॥ ११ ॥ उन्होंने उत्तर दिशाके, मध्यदेशके तथा पूर्व दिशाके प्रजासे युक्त अनेक बड़े-बड़े राजाओंको धर्ममें स्थिर

---

१. प्रश्रयान्वितं यथा स्यात्तथा । २. दीपितः म० । ३. शरीरपूजाम् । ४. दुःखा म० । ५. सुरवराभ्यर्च्यो म० ।

विहृत्य चिरमीशानः पुनरागत्य पूर्ववत् । गिरौ रैवतके तस्थौ समवस्थानमण्डनः ॥१३॥
तत्र स्थितं जिनेन्द्रं तं देवेन्द्राः सान्द्रतेजसः । प्राप्य नत्वा नतिं कृत्वा निजस्थानेषु सुस्थिताः ॥१४॥
वसुदेवो बलः कृष्णः सान्तःपुरसुहृज्जनः । द्वारिकाप्रजया युक्तः[1] प्रद्युम्नादिसुतान्वितः ॥१५॥
विभूत्या परयागत्य शैवेयं[2]मभिवन्द्यते । आसीनाः समवस्थाने[3] धर्मं[4] शुश्रूपुरीश्वरात् ॥१६॥
तत्र धर्मकथान्तेऽसौ जिनं नत्वा हलायुधः । पप्रच्छ वस्तुचित्तस्थं करकुड्मलितालिकः ॥१७॥
नाथ वैश्रवणेनेयं निर्मिता द्वारिकापुरी । कियतानेहसान्तोऽस्याः कृतका हि विनश्वराः ॥१८॥
निमज्जेत् स्वत एवेयं किमु कालान्तरेऽम्बुधौ । निमित्तान्तरसान्निध्ये केनचिद्वा[5] विनाश्यते ॥१९॥
स्वान्तकाले निमित्तत्वं को वा कृष्णस्य यास्यति । जातानां हि समस्तानां जीवानां नियता मृतिः ॥२०॥
संयमप्रतिपत्तिर्वा[6] कालेन कियता प्रभो । कृष्णस्नेहमहापाशबद्धचित्तस्य मे भवेत्[7] ॥२१॥
इति पृष्टो जिनोऽगादीद्दृष्टाशेषपरापरः । याथातथ्यं यथाप्रश्नं यत्प्रश्नोत्तरवाद्यसौ ॥२२॥
पुरीयं द्वादशे वर्षे रामसद्येन हेतुना । द्वैपायन[8]कुमारेण मुनिना धक्ष्यते रुषा ॥२३॥
[9]कौशाम्बवनसुप्तस्य कृष्णस्य परमायुषः । प्रान्ते जरत्कुमारोऽपि संहारे हेतुतां व्रजेत् ॥२४॥
[10]अभ्यन्तरस्य सान्निध्ये हेतोः परिणतेर्वशात् । बाह्यो हेतुर्निमित्तं हि जगतोऽभ्युदये क्षये ॥२५॥

करते हुए विहार किया था ॥ १२ ॥ चिरकाल तक विहार कर भगवान् पुनः आये और रैवतक (गिरनार) पर्वतपर समवसरणको सुशोभित करते हुए विराजमान हो गये ॥ १३ ॥ प्रबल तेजको धारण करनेवाले इन्द्र वहाँ विराजमान जिनेन्द्र भगवान्के पास आये और नमस्कार तथा स्तुति कर अपने-अपने स्थानोंपर बैठ गये ॥ १४ ॥

अन्तःपुरकी रानियों, मित्रजन, द्वारिकाकी प्रजा तथा प्रद्युम्न आदि पुत्रोंसे सहित वसुदेव, बलदेव तथा कृष्ण भी बड़ी विभूतिके साथ आये और भगवान् नेमिनाथको नमस्कार कर समवसरणमें यथास्थान बैठ भगवान्से धर्म श्रवण करने लगे ॥१५-१६॥ तदनन्तर धर्मकथाके बाद जिनेन्द्र भगवान्को नमस्कार कर बलदेवने हाथ जोड़ ललाटसे लगा, अपने हृदयमें स्थित बात पूछी ॥ १७ ॥ उन्होंने पूछा कि हे भगवन् ! यह द्वारिकापुरी कुबेरके द्वारा रची गयी है सो इसका अन्त कितने समयमें होगा । क्योंकि कृत्रिम वस्तुएँ अवश्य ही नश्वर होती हैं ॥ १८ ॥ यह द्वारिकापुरी कालान्तरमें क्या अपने-आप ही समुद्रमें डूब जावेगी अथवा निमित्तान्तरके सन्निधानमें किसी अन्य निमित्तसे विनाशको प्राप्त होगी ? कृष्णके अपने अन्तकालमें निमित्तपनेको कौन प्राप्त होगा ? क्योंकि उत्पन्न हुए समस्त जीवोंका मरण निश्चित है । हे प्रभो ! मेरा चित्त कृष्णके स्नेहरूपी महापाशसे बँधा हुआ है अतः मुझे संयमकी प्राप्ति कितने समय बाद होगी ? ॥ १९-२१ ॥ इस प्रकार बलदेवके पूछनेपर समस्त परापर पदार्थोंको देखनेवाले नेमि जिनेन्द्र, प्रश्नके अनुसार यथार्थ बात कहने लगे, सो ठीक ही है क्योंकि भगवान् प्रश्नोंका उत्तर निरूपण करनेवाले ही थे ॥ २२ ॥

उन्होंने कहा कि हे राम ! यह पुरी बारहवें वर्षमें मदिराके निमित्तसे द्वैपायन मुनिके द्वारा क्रोधवश भस्म होगी ॥ २३ ॥ अन्तिम समयमें श्रीकृष्ण कौशाम्बीके वनमें शयन करेंगे और जरत्कुमार उनके विनाशमें कारणपनेको प्राप्त होगा ॥ २४ ॥ अन्तरङ्ग कारणके रहते हुए परिणतिवश बाह्य हेतु जगत्के अभ्युदय तथा क्षयमें कारण होते हैं इसलिए वस्तुके

---

१. युक्ताः म० । २. शिवाया अपत्यं पुमान् शैवेयस्तं नेमिनाथम् । ३. धर्मस्थाने म० । ४. 'शुश्रुवुरीश्वरात्' इति पाठेन भवितव्यम् । ५. –द्वाविनास्यते म० । ६. का केन म० । ७. मेऽभवत् म० । ८. द्वीपायन म० । ९. कौशाम्बीवन––ख० । १०. अनन्तरस्य म० ।

जानन्तो वस्तुसद्भावमतोऽभ्युदयनाशयोः । हर्षं भुवि विषादं च न गच्छन्ति मनस्विनः ॥२६॥
भवतोऽपि तपःप्राप्तिस्तन्निमित्तात्तदा भवेत् । भवपद्धतिभीतस्य ब्रह्मलोकोपपादिनः ॥२७॥
द्वैपायनकुमारो[1]ऽसौ रोहिण्याः सोदरो यतिः । तदाकर्ण्य वचो जैनं निर्वेदी तपसि स्थितः ॥२८॥
अवधेः पूरणायातः पूर्वदेशमुपेत्य सः । तपश्चरितुमारब्धः कषायतनुशोषणम् ॥२९॥
दुःखी जरत्कुमारश्च दुःखितान् भ्रातृबान्धवान् । परित्यज्य गतः क्वापि स हरिर्यत्र नेक्ष्यते ॥३०॥
जरत्कुमारे प्रगते वनमेकाकिनि स्थिते । हरिः स्नेहाकुलो मेने शून्यमात्मानमात्मनि ॥३१॥
चचार मृगसामान्यं विजनो विजनं वनम् । [2]हरिप्राणप्रियः प्राणान् प्रियान् हातुमनाः क्वचित् ॥३२॥
इतोऽपि जिनमानम्य यादवा विविशुः पुरीम् । आगामिदुःखसंभारचिन्तासन्तप्तमानसाः ॥३३॥
घोषणां कारयाञ्चक्रे चक्री पुरि बलान्वितः । मद्याङ्गानि च मद्यानि विसृज्यन्तामिति द्रुतम् ॥३४॥
पिष्टकिण्वादिमद्याङ्गैस्ततो मद्यानि मद्यपैः । क्षिप्तानि सशिलाकुण्डे[3] कादम्बगिरिगह्वरे ॥३५॥
कदम्बवनकुण्डेषु[4] मुक्ता कादम्बरी तु या । साश्मपाकविशेषस्य हेतुत्वेनावतिष्ठते ॥३६॥
तथान्या घोषणादायि कृष्णेन हितबुद्धिना । द्वारिकायां महापुर्यां स्त्रीणां पुंसां च शृण्वताम् ॥३७॥
पिता मे यदि वा माता सुता चान्तःपुराङ्गना । तपस्यन्तु मते जैने वारयामि न तानहम् ॥३८॥

स्वभावको जाननेवाले उत्तम मनुष्य अभ्युदय तथा क्षयके समय पृथिवीपर कभी हर्ष और विषादको प्राप्त नहीं होते ॥ २५–२६ ॥

संसारके मार्गसे भयभीत रहनेवाले आपको भी उसी समय कृष्णकी मृत्युका निमित्त पाकर तपकी प्राप्ति होगी तथा तपकर आप ब्रह्मस्वर्गमें उत्पन्न होंगे ॥२७॥ द्वैपायनकुमार रोहिणीका भाई—बलदेवका मामा था सो उस समय भगवान्‌के वचन सुनकर वह संसारसे विरक्त हो मुनि होकर तप करने लगा ॥२८॥ वह बारह वर्षकी अवधिको पूर्ण करनेके लिए यहाँसे पूर्व देशकी ओर चला गया और वहाँ कषाय तथा शरीरको सुखानेवाला तप करने लगा ॥२९॥ 'मेरे निमित्तसे कृष्णकी मृत्यु होगी' यह जानकर जरत्कुमार भी बहुत दुःखी हुआ और दुःखसे युक्त भाई-बन्धुओंको छोड़कर वह कहीं ऐसी जगह चला गया जहाँ कृष्ण दिखायी भी न दें ॥३०॥ जब जरत्कुमार वनमें जाकर अकेला रहने लगा तब स्नेहसे आकुल श्रीकृष्णने अपने-आपमें अपने-आपको सूना अनुभव किया ॥३१॥ जो कृष्णको प्राणोंके समान प्यारा था ऐसा जरत्कुमार कहीं प्रिय प्राणोंको छोड़नेकी इच्छासे अकेला ही मृगोंके समान निर्जन वनमें भ्रमण करने लगा ॥३२॥ इधर आगामी दुःखके भारकी चिन्तासे जिनके मन संतप्त हो रहे थे ऐसे यादव लोग भगवान्‌को नमस्कार कर नगरीमें प्रविष्ट हुए ॥३३॥ बलदेवके साथ कृष्णने नगरमें यह घोषणा करा दी कि मद्य बनानेके साधन और मद्य शीघ्र ही अलग कर दिये जायें ॥३४॥ घोषणा सुनते ही मद्यपायी लोगोंने पिष्ट, किण्व आदि मदिरा बनानेके साधनोंके साथ-साथ समस्त मदिराको शिलाओंके बीच बने हुए कुण्डसे युक्त कादम्ब गिरिकी गुहामें फेंक दिया ॥३५॥ कदम्ब वनके कुण्डोंमें जो मदिरा छोड़ी गयी थी वह अश्मपाक विशेषके कारण उन कुण्डों-में भरी रही । भावार्थ—पत्थरकी कुण्डियोंमें जिस प्रकार कोई तरल पदार्थ स्थिर रहा आता है उसी प्रकार कदम्ब वनके शिलाकुण्डोंमें वह मदिरा स्थिर रही आयी ॥३६॥ हितकी इच्छा रखनेवाले कृष्णने समस्त स्त्री-पुरुषोंके सुनते समय द्वारिकापुरीमें दूसरी घोषणा यह दी कि यदि मेरे पिता, माता, पुत्री अथवा अन्तःपुरकी स्त्री आदि कोई भी जिनेन्द्र भगवान्‌के मतमें दीक्षित हो तप करना चाहें तो मैं उन्हें मना नहीं करता हूँ—उन्हें तप करनेकी मेरी ओरसे

---

१. द्वीपायन–म०, ख० । २. हरिः प्राणप्रियः म० । ३. सशिलाकुण्डकादम्ब—क० । ४. युक्ता म० ।

ततः प्रद्युम्नभान्वाद्याः कुमाराश्चरमाङ्गकाः । अन्ये च बहवो यातास्तपोवनमसङ्गिनः ॥३९॥
रुक्मिणीसत्यभामाद्या महादेव्योऽष्ट सस्नुषाः । लब्धानुज्ञा हरेः स्त्रीभिः सपत्नीभिः प्रवव्रजुः ॥४०॥
सिद्धार्थसारथिर्भ्राता बलदेवेन याचितः[1] । बोधनं व्यसने स्वस्य [2]प्रतिपद्य तपोऽगृहीत् ॥४१॥
ततः संघेन महता जिनः पल्लवदेशभाक् । बभूव भव्यबोधार्थं भव्याम्भोरुहभास्करः ॥४२॥
राजस्त्रीनरसंघातो यावान् प्रव्रजितस्तदा । जिनेनैव समं [3]सोऽयादुत्तरापथमुद्यमी ॥४३॥
[4]वर्षद्वादश चोद्वस्य पुर्याः लोकः क्वचिद्वने । कृत्वा वासं पुनस्तत्र त्वागतश्च विधेर्वशात् ॥४४॥
इतो [5]द्वारवतीलोकः परलोकभयान्वितः । व्रतोपवासपूजासु सुतरां निरतोऽभवत् ॥४५॥
[6]द्वैपायनोऽपि महता तपसा सहितस्ततः । व्यतीतं द्वादशं वर्षं मन्वानो भ्रान्तिहेतुना ॥४६॥
व्यतिक्रान्तो जिनादेश इति ध्यात्वा विमूढधीः । संप्राप्तो द्वादशे वर्षे सम्यग्दर्शनदुर्बलः ॥४७॥
धृतातापनयोगश्च तस्थौ प्रतिमया पथि । द्वारिकाबहिरभ्याशे कदाचिन्निकटे गिरेः ॥४८॥
वनक्रीडापरिश्रान्ताः पिपासाकुलिता जलम् । इति कादम्बकुण्डेषु [7]शम्बाद्यास्तां सुरां पपुः ॥४९॥
कदम्बवनसंन्यस्तां कदम्बकतया स्थिताम् । पीत्वा कादम्बरीं मृष्टां कुमारा विकृतिं गताः ॥५०॥

पूर्ण छूट है ॥३७-३८॥ घोषणा सुनते ही प्रद्युम्नकुमार तथा भानुकुमारको आदि लेकर चरमशरीरी कुमार और अन्य बहुत-से लोग परिग्रहका त्याग कर तपोवनको चले गये ॥३९॥ रुक्मिणी और सत्यभामा आदि आठ पट्टरानियोंने भी आज्ञा प्राप्त कर पुत्रवधुओं तथा अन्य सौतोंके साथ दीक्षा धारण कर ली ॥४०॥ सिद्धार्थ नामका सारथि जो बलदेवका भाई था जब दीक्षा लेनेके लिए उत्सुक हुआ तब बलदेवने उससे याचना की कि कदाचित् मैं मोहजन्य व्यसनको प्राप्त होऊँ तो मुझे संबोधित करना। बलदेवकी इस प्रार्थनाको स्वीकृत कर उसने तप ग्रहण कर लिया ॥४१॥

तदनन्तर जो भव्यरूपी कमलोंको विकसित करनेके लिए सूर्यके समान थे ऐसे भगवान् नेमिजिनेन्द्र, भव्य जीवोंको संबोधनेके लिए बड़े भारी संघके साथ पल्लव देशको प्राप्त हुए ॥४२॥ उस समय जो राजा-रानियों और मनुष्योंका समूह दीक्षित हुआ था वह जिनेन्द्र भगवान्‌के साथ-ही-साथ उत्तरापथकी ओर चलनेके लिए उद्यमी हुआ ॥४३॥ द्वारिकाके लोग द्वारिकासे बाहर जाकर बारह वर्ष तक कहीं वनमें रहते आये परन्तु भाग्यकी प्रबलतासे वे वहाँ निवास कर फिर वहीं वापस आ गये ॥४४॥ इधर द्वारिकामें जो लोग रहते थे वे परलोकके भयसे युक्त हो व्रत, उपवास तथा पूजा आदि सत्कार्योंमें निरन्तर संलग्न रहते थे ॥४५॥ तदनन्तर बहुत भारी तपसे युक्त जो द्वैपायन मुनि थे वे भी भ्रान्तिवश बारहवें वर्षको व्यतीत हुआ मानते हुए बारहवें वर्षमें वहाँ आ पहुँचे। 'जिनेन्द्र भगवान्‌का आदेश पूरा हो चुका है' यह विचार कर जिनकी बुद्धि विमूढ हो रही थी तथा जो सम्यग्दर्शनसे दुर्बल थे ऐसे द्वैपायन मुनि बारहवें वर्षमें वहीं आ पहुँचे ॥ ४६-४७ ॥ वे किसी समय द्वारिकाके बाहर पर्वतके निकट, मार्गमें आतापन योग धारण कर प्रतिमायोगसे विराजमान थे ॥४८॥ उसी समय वनक्रीड़ासे थके एवं प्यासससे पीड़ित शम्ब आदि कुमारोंने कादम्ब वनके कुण्डोंमें स्थित उस शराबको पी लिया ॥४९॥ कदम्ब वनमें छोड़ी एवं कदम्ब रूपसे डबरोंके रूपमें स्थित उस मधुर मदिराको पीकर वे सब कुमार विकार भावको प्राप्त

१. बलदेवनयान्वितः म० । २. प्रतिपाद्य क०, ख०, घ०, म० । ३. पाया- म०, याया ख०, घ० । ४. वर्षान् द्वादश क०, वर्षे द्वादश म० । ५. द्वारवतीम् म० । ६. द्वीपायनोऽपि म० । ७. सुस्वाद्यां तां क० ।

वारुणी सा पुराणापि परिपाकवशाद्वशान् । तरुणानकरोद्गाढं तरुणीवारुणेक्षणान् ॥५१॥
असंबद्धानि गायन्तो नृत्यन्तः स्खलितक्रमाः । मुक्तकेशाः कृतोत्तंसाः कण्ठालम्बिवनस्रजः॥५२॥
आगच्छन्तः पुरः सर्वे दृष्ट्वार्काभिमुखं मुनिम् । प्रत्यभिज्ञाय चावोचन् घूर्णमाननिरीक्षणाः ॥५३॥
सोऽयं द्वैपायनो योगी द्वारवत्याः किलान्तकृत् । । भवितास्माकमद्याग्रे क्व प्रयाति वराककः ॥५४॥
इत्युक्त्वा तं कुमारास्ते लोष्टुभिः सर्वतोऽश्मभिः । प्रजघ्नुर्निर्घृणास्तावद्यावत्पतति भूतले ॥५५॥
क्रोधाधिक्यात्ततो दध्रे दष्टोष्ठो भ्रुकुटीकुटीम् । प्रलयाय यदूनां सः प्रायः स्वतपसोऽपि च ॥५६॥
प्रविष्टास्तु पुरीं व्याला व्याला इव चलाचलाः । कुमाराः कैश्चिदुक्तं तु दुर्वृत्तं लघु विष्णवे ॥५७॥
बलनारायणौ श्रुत्वा द्वैपायनमुपश्रुतम् । द्वारिकायाः क्षयं प्राप्तं मेनाते जिनभाषितम् ॥५८॥
संभ्रमेण परिप्राप्तौ परित्यक्तपरिच्छदौ । मुनिं क्षमयितुं क्रोधाज्ज्वलन्तमिव पावकम् ॥५९॥
दृष्टः संक्लिष्टधीस्ताभ्यां भ्रूभङ्गविषमाननः । दुर्निरीक्ष्येक्षणः क्षीणः कण्ठप्राणो विभीषणः ॥६०॥
कृताञ्जलिपुटाभ्यां स प्रणिपत्य महादरात् । याच्यते याचना बन्ध्यं जानद्भ्यामपि मोहतः ॥६१॥
रक्ष्यतां रक्ष्यतां साधो चिरं सुपरिरक्षितः । क्षमामूलस्तपोभारो धक्ष्यते क्रोधवह्निना ॥६२॥
मोक्षसाधनमप्येष तपो दूषयति क्षणात् । चतुर्वर्गरिपुः क्रोधः क्रोधः स्वपरनाशकः ॥६३॥

हो गये ॥ ५० ॥ यद्यपि वह मदिरा पुरानी थी तथापि परिपाकके वशसे उसने तरुण स्त्रीके समान, लाल-लाल नेत्रोंको धारण करनेवाले उन तरुण कुमारोंको अत्यधिक वशीभूत कर लिया ॥५१॥ फलस्वरूप वे सब कुमार असंबद्ध गाने लगे, लड़खड़ाते पैरोंसे नाचने लगे, उनके केश बिखर गये, आभूषण अस्त-व्यस्त हो गये और उन्होंने अपने कण्ठोंमें जंगली फूलोंकी मालाएँ पहिन लीं ॥ ५२ ॥ जब वे सब नगरकी ओर आ रहे थे तब उन्होंने सूर्यके सम्मुख खड़े हुए द्वैपायन मुनिको पहचान लिया। पहचानते ही उनके नेत्र घूमने लगे। उन्होंने आपसमें कहा कि यह वही द्वैपायन योगी है जो द्वारिकाका नाश करनेवाला होगा। आज यह बेचारा हम लोगोंके आगे कहाँ जायेगा ? ॥ ५३—५४ ॥ इतना कहकर उन निर्दय कुमारोंने लुड्डों और पत्थरोंसे उन्हें तबतक मारा जबतक कि वे घायल होकर पृथिवीपर नहीं गिर पड़े ॥ ५५ ॥ तदनन्तर क्रोधकी अधिकतासे मुनि अपना ओठ डँसने लगे तथा यादवों और अपने तपको नष्ट करनेके लिए उन्होंने भ्रुकुटी चढ़ा ली ॥५६॥ मदमाते हाथियोंके समान अत्यन्त चञ्चलकुमार जब द्वारिकापुरीमें प्रविष्ट हुए तब उनमें-से किन्हींने यह दुर्घटना शीघ्र ही कृष्णके लिए जा सुनायी ॥५७॥ बलदेव तथा नारायणने द्वैपायनसे सम्बन्ध रखनेवाली इस घटनाको सुनकर समझ लिया कि जिनेन्द्र भगवान्‌ने जो द्वारिकाका क्षय बतलाया था वह आ पहुँचा है—अब शीघ्र ही द्वारिकाका क्षय होनेवाला है ॥५८॥ बलदेव और नारायण घबड़ाहटवश सब प्रकारका परिकर छोड़, क्रोधसे अग्निके समान जलते हुए मुनिको शान्त करनेके लिए, उनसे क्षमा माँगनेके लिए उनके पास दौड़े गये ॥५९॥ जिनकी बुद्धि अत्यन्त संक्लेशमय थी, भ्रुकुटीके भंगसे जिनका मुख विषम हो रहा था, जिनके नेत्र दुःखसे देखने योग्य थे, जिनके प्राण कण्ठगत हो रहे थे और जो अत्यन्त भयंकर थे ऐसे द्वैपायन मुनिको बलदेव और कृष्णने देखा। उन्होंने हाथ जोड़कर बड़े आदरसे मुनिको प्रणाम किया और 'हमारी याचना व्यर्थ होगी' यह जानते हुए भी मोहवश याचना की ॥६०—६१॥ उन्होंने कहा कि, 'हे साधो! आपने चिरकालसे जिसकी अत्यधिक रक्षा की है तथा क्षमा ही जिसकी जड़ है ऐसा यह तपका भार क्रोधरूपी अग्निसे जल रहा है सो इसकी रक्षा की जाये, रक्षा की जाये ॥६२॥ यह क्रोध मोक्षके साधनभूत तपको क्षण-भरमें दूषित कर देता है, यह धर्म, अर्थ, काम और मोक्ष इन चारों वर्गोंका शत्रु है तथा निज और परको नष्ट करनेवाला है ॥६३॥

क्षम्यतां क्षम्यतां मूढैः प्रमादबहुलैः कृतम्। दुर्विचेष्टितमस्मभ्यं प्रसादः क्रियतां यते ॥६४॥
इत्यादिप्रियवादिभ्यां प्रार्थ्यमानोऽनिवर्तकः। सप्राणिद्वारिकादाहे पापधीः कृतनिश्चयः ॥६५॥
संज्ञयाऽदर्शयत्ताभ्यामङ्गुलीद्वयदर्शनम्। युवयोरेव मोक्षोऽत्र नान्यस्येति परिस्फुटम् ॥६६॥
[1]अनिवर्तकरोषं तं विदित्वा विदितक्षयौ। विषण्णौ तौ पुरीं यातौ किंकर्तव्यत्वविह्वलौ ॥६७॥
तदनन्तर जरत्कुमार और पाण्डवोंके साथ उन्होंने तुङ्गीगिरिके शिखरपर कृष्णक दाह-संस्कार कर जरत्कुमारको राज्य दिया और जीवनको क्षणभङ्गर समझ परिग्रहके त्यागक निश्चय कर साथियोंके साथ उसी पर्वतके शिखरका आश्रय लिया । उन्होंने, 'मैं यहाँ रहत हुआ भी पल्लव देशमें स्थित श्री नेमिजिनेन्द्रकी शिष्यताको प्राप्त हुआ हूँ' यह कहकर पञ्च मुष्टियोंसे शिरके बाल उखाड़कर मुनि-दीक्षा धारण कर ली ॥ ७२-७४ ॥ बलदेव शरीरसे अत्यन्त सुन्दर थे । इसलिए पारणाओंके लिए नगरमें प्रवेश करते समय स्त्रियोंकी विपरीत चेष्टा होने लगी । यह जान त्रियोगको धारण करनेवाले रणव्रती बलदेव 'यदि वनमें भिक्षा मिले तो लेंगे अन्यथा नहीं' ऐसी प्रतिज्ञा कर संतोषको प्राप्त हुए ॥७५॥ पाण्डवोंने हरिवंशके राजा जरत्कुमारके लिए बहुत-सी राज-कन्याएँ दीं, अपने पुत्रोंके लिए राज्यलक्ष्मी सौंपी और उसके बाद जिनेन्द्र भगवान्को लक्ष्य कर सबके-सब पल्लव देशकी ओर चले गये ॥ ७६ ॥

---

१. आयुकर्म म० । २. संपदोऽत्र करिकर्णचञ्चलाः ख० । ३. पूर्वरूपधरवासुदेवतो क० । ४. सवितस्ततः स्थितः क० । ५. इत ऊर्ध्वं म०, क० पुस्तकयोरधोलिखितः पाठोऽधिको वर्तते । 'प्रेष्य सूर्यपुरसंज्ञिकं निजानात्मजांश्च सुनिधाय शासने । त्यक्तरागमपि पाण्डुनन्दनाः संविभज्य निजसंपदं मुदा ॥'

द्रौपदीप्रभृतयस्तदङ्गनाः संयमं प्रति निविष्टबुद्धयः ।
पाण्डवाननुगता जनन्यपि[1] संसृतौ विगतरूक्षधीं सती ॥७७॥
द्वादशात्मभिदयासतामनुप्रेक्षयानुमतया हलायुधः ।
[2]व्यापृतोऽभवदखण्डितस्थितिः सत्रिदण्डदृढखण्डनोन्मुखः ॥७८॥
तत्र नित्यमिति यत्र मूर्च्छना स्थानदेहधनसौख्यबन्धुषु ।
तत्र किञ्चिदपि नास्ति नित्यता आत्मनोऽन्यदिति चिन्तयत्यसौ ॥७९॥
मृत्युदुःखपरिपीडितस्य मे व्याघ्रवक्त्रमृगशावकस्य वा[3] ।
बान्धवा न शरणं धनादि वा धर्मतोऽन्यदिति चिन्तनामितः ॥८०॥
नैकयोनिकुलकोटिकूटसंसारचक्रमिह यान्ति जन्तवः ।
प्रेरिताः कटुककर्मयन्त्रकैः स्वामिभृत्यपितृपुत्रपूर्वताम् ॥८१॥
एक एव भवभृत्प्रजायते मृत्युमेति पुनरेक एव तु ।
धर्ममेकमपहाय नापरः सत्सहाय इति चैकता स्मृतिः ॥८२॥
नित्यता मम तनोरनित्यता चेतनोऽहमपचेतना तनुः ।
अन्यता मम शरीरतोऽपि यत्तत्किमङ्ग ! पुनरन्यवस्तुनः ॥८३॥
शुक्रशोणितकुबीजजन्मके सप्तधातुमयके त्रिदोषके ।
कः शुचं [4]तदनुवाशुचौ शुची रज्यते स्वपरयोः शरीरके ॥८४॥

संयमकी ओर जिनकी बुद्धि लग रही थी ऐसी द्रौपदी आदि स्त्रियाँ तथा संसारसे जिसकी बुद्धि विमुख हो गयी थी ऐसी माता कुन्ती भी पाण्डवोंके पीछे-पीछे जा रही थीं ॥ ७७ ॥

इधर अखण्ड चारित्रके धारक एवं मन, वचन, कायकी प्रवृत्तिरूप तीन दण्डोंका दृढ़ताके साथ खण्डन करनेमें तत्पर मुनिराज बलदेव, सज्जनोंको इष्ट अनित्यत्व आदि बारह अनुप्रेक्षाओंके चिन्तवनमें व्याप्त हो गये ॥ ७८ ॥ वे विचार करने लगे कि जिन महल, शरीर, धन, सांसारिक सुख और बन्धुजनोंमें 'ये नित्य हैं', यह समझकर ममताभाव उत्पन्न होता है, उनमें आत्माके सिवाय किसीमें भी नित्यता नहीं है, सभी क्षणभङ्गुर हैं ॥ ७९ ॥ जिस प्रकार व्याघ्रके मुखमें पड़े मृगके बच्चेको कोई शरण नहीं है, उसी प्रकार मृत्युके दुःखसे पीड़ित मेरे लिए धर्मके सिवाय न भाई-बन्धु शरण हैं और न धन ही शरण है। इस प्रकार वे अशरण अनुप्रेक्षाका चिन्तवन करते थे ॥ ८० ॥ नाना योनियों और कुलकोटियोंके समूहसे युक्त इस संसाररूपी चक्रके ऊपर चढ़े प्राणी, महा विषम कर्मरूपी मन्त्रसे प्रेरित हो स्वामीसे भृत्य और पितासे पुत्र आदि अवस्थाओंको प्राप्त होते हैं ॥ ८१ ॥ यह जीव अकेला ही उत्पन्न होता है और अकेला ही मृत्युको प्राप्त होता है। एक धर्मको छोड़कर दूसरा इसका सहायक नहीं है। इस प्रकार वे एकत्व अनुप्रेक्षाका चिन्तवन करते थे ॥ ८२ ॥ मैं नित्य हूँ और शरीर अनित्य है। मैं चेतन हूँ और शरीर अचेतन है। जब शरीरसे भी मुझमें भिन्नता है तब दूसरी वस्तुओंसे भिन्नता क्यों नहीं होगी ? ॥ ८३ ॥ यह अपना अथवा पराया शरीर रज, वीर्यरूप निन्द्य निमित्तोंसे उत्पन्न है, सप्तधातुओंसे भरा है एवं वात, पित्त, कफ इन तीन दोषोंसे युक्त है इसलिए ऐसा कौन पवित्र आत्मा होगा जो इस अपवित्र शरीरमें वियोगके समय शोकको प्राप्त होगा और संयोगके समय राग करेगा ? ॥ ८४ ॥ काययोग

१. 'पाण्डवाननुगता जनन्यपि स्निग्धता विगतरूक्षधीस्तु या' ख०। 'पाण्डवाननुगता विमोहिता संसृतौ विगतरूक्षधीषु या ।।' ङ० । २. व्यावृतो म० । ३. 'वा स्याद् विकल्पोपमयोरिवार्थेऽपि समुच्चये'' इत्यमरः । ४. तदनुगाशुचौ म० ।

कायवाङ्मनसयोगभेदवानास्रवो भवति पुण्यपापयोः ।
कर्मबन्धदृढशृङ्खलश्चिरं संसरत्यसुभृदुग्रसंसृतौ ॥८५॥
स्याद् द्विधास्रवनिरोधलक्षणः संवरः समितिगुप्तिपूर्वकैः ।
संवरे सति सनिर्जरेऽसुभृत्सिद्ध्यति स्वकृतकर्मसंक्षयात् ॥८६॥
दुर्गतिष्वकुशलानुबन्धिनी संयमान्नु कुशलानुबन्धिनी ।
निर्जरा निरनुबन्धिनी च सा चिन्तिता परमयोगिनामुना[1] ॥८७॥
लोकसंस्थितिरनाद्यनन्तिकालोकगर्भबहुमध्यभागभाक् ।
अत्र ही षडसुकायसंहतिर्दुःखिनीति खलु लोकचिन्तना ॥८८॥
[2]स्थावरे त्रसकुलेऽखिलेन्द्रियैः पूर्णतादिषु सुधर्मलक्षणा ।
बोधिलब्धिरतिदुर्लभा भवेत्सत्समाधिमरणाप्तिसत्फला ॥८९॥
धर्म एष जिनभाषितः शिवप्राप्तिहेतुरवधादिलक्षणः ।
त्यागतोऽस्य भवदुःखितेत्यनुप्रेक्षिकान्त्यशुभचिन्तनात्मिकाः ॥९०॥
इत्यनुश्रुतमनूनधीरनुप्रेक्षिकार्थमनुभावयन् मुहुः ।
भ्रातृमोहमजयज्जयन्मुनिः सद्विविंशतिपरीषहद्विषः ॥९१॥

वचनयोग और मनोयोग यह तीन प्रकारका योग ही आस्रव है। इसीके निमित्तसे आत्मामें पुण्य और पापकर्मका आगमन होता है। आस्रवके बाद यह जीव कर्मबन्धनरूप दृढ़ सांकलसे बद्ध होकर भयंकर संसारमें चिरकाल तक भ्रमण करता रहता है ॥ ८५ ॥ द्रव्यास्रव और भावास्रवरूप दोनों प्रकारके आस्रवका रुक जाना संवर है। यह संवर गुप्ति, समिति, धर्म, अनुप्रेक्षा, परीषह जय और चारित्र से होता है। निर्जराके साथ-साथ संवरके हो जानेपर यह जीव स्वकृत कर्मोंका क्षय कर सिद्ध हो जाता है ॥ ८६ ॥ अनुबन्धिनी और निरनुबन्धिनीके भेदसे निर्जराके मूलमें दो भेद हैं। फिर अनुबन्धिनी निर्जराके अकुशला और कुशलाके भेदसे दो भेद हैं। नरकादि गतियोंमें जो प्रतिसमय कर्मोंकी निर्जरा होती है वह अकुशलानुबन्धिनी निर्जरा है और संयमके प्रभावसे देव आदि गतियोंमें जो निर्जरा होती है वह कुशलानुबन्धिनी निर्जरा है। जिस निर्जराके बाद पुनः कर्मोंका बन्ध होता रहता है वह अनुबन्धिनी निर्जरा है और जिस निर्जराके बाद पूर्वकृत कर्म खिरते तो हैं पर नवीन कर्मोंका बन्ध नहीं होता उसे निरनुबन्धिनी निर्जरा कहते हैं।

परम योगी बलदेव मुनिराजने इसी निरनुबन्धिनी अनुप्रेक्षाका चिन्तवन किया था ॥ ८७ ॥ लोककी स्थिति अनादि, अनन्त है, यह लोक अलोकाकाशके ठीक मध्यमें स्थित है। इस लोकके भीतर छह कायके जीव निरन्तर दुःख भोगते रहते हैं, ऐसा चिन्तवन करना लोकानुप्रेक्षा है ॥ ८८ ॥ प्रथम तो निगोदसे निकलकर अन्य स्थावरोंमें उत्पन्न होना ही दुर्लभ है फिर त्रसपर्याय पाना दुर्लभ है, त्रसोंमें भी इन्द्रियोंकी पूर्णता होना दुर्लभ है और इन्द्रियोंकी पूर्णता होनेपर भी समीचीन धर्म जिसका लक्षण है एवं उत्तम समाधिका प्राप्त होना जिसका फल है ऐसी बोधि अर्थात् रत्नत्रयकी प्राप्ति होना अत्यन्त दुर्लभ है ॥ ८९ ॥ जिनेन्द्र भगवानके द्वारा कहा हुआ यह अहिंसादि लक्षण धर्म ही मोक्षप्राप्तिका कारण है। इसका त्याग करनेसे संसारका दुःख प्राप्त होता है—इस प्रकार चिन्तवन करना सो अन्तिम धर्मानुप्रेक्षा है ॥ ९० ॥ इस प्रकार परम्परासे प्रसिद्ध बारह अनुप्रेक्षाओंका बार-बार चिन्तवन

---

१. परमयोगिनी शुभा म० । २. स्थावरेऽत्र कुशलेऽखिलेन्द्रियैः क०, ङ० ।

बह्वभिग्रहपरिग्रहोज्ज्वलज्जाठराग्निजठरोपरोधतः ।
मोक्षसाधनतया धंभुग्व्यधात्क्षुत्परीषहजयं महामुनिः ॥९२॥
[1]देहगिर्यवयवाटवीप्लुषा दावमूर्तिनिभया पिपासया ।
निष्प्रतिक्रियधृतिर्न [2]विव्यधे क्षान्तिनीरदघटाभिषिक्तया ॥९३॥
स्थण्डिले निशि दिवा च योगिना तीव्रवातहिमवृष्ट्यनेहसि ।
वातवर्षविषमे तरोरधोऽयोधिशीतपरुषः परीषहः ॥९४॥
पर्वताग्रशिखरस्थितोऽजयद् ग्रैष्ममुष्णमभितः परीषहम् ।
दावधूमवलयातप[3]त्रसच्छाययेव विनिवारितातपः ॥९५॥
गूढवृत्तिभिरना[4]स्थिजन्तुभिर्गाढपीतरुधिरोऽप्यकम्पितः ।
सोढवान् दृढमसौ परीषहं प्रौढदंशमशकोपलक्षितम् ॥९६॥
सोऽङ्गलग्नमनपायमप्यविश्वास्यमेकदिनदुःखपालनम् ।
सत्कलत्रमिव सत्रपं न्यधान्नाग्न्यमात्मवशगं परीषहम् ॥९७॥
ध्यानयोग्यगिरिमार्गदुर्गभुव्येक[5] एव हि विहृत्य निग्रहे ।
धर्मसाधनरतिर्यथा रिपोर्व्यापृतो[6] रतिपरीषहस्य सः ॥९८॥
भ्रूलताकुटिलचापयोजितस्त्रीकटाक्षशरवर्षिणं वृथा ।
कुर्वता मदनयोधमूर्जितस्त्रीपरीषहजयः कृतोऽमुना ॥९९॥

करनेवाले उत्कृष्ट बुद्धिके धारक बलदेव मुनिराजने बाईस परीषहरूपी शत्रुओंको जीतकर भाईके मोहको जीत लिया ॥ ९१ ॥

नाना प्रकारके नियम-आखड़ी आदिके लेनेसे उनकी जठराग्नि अत्यधिक प्रज्वलित रहती थी। उतनेपर भी वे मोक्षकी सिद्धिके लिए भूखसे आधा ही भोजन करते थे। इस प्रकार वे महामुनि क्षुधापरीषहको जीतते थे ॥ ९२ ॥ प्रतिकाररहित धैर्यके धारक बलदेव मुनिराज, शान्तिरूपी घनघटासे अभिषिक्त होनेके कारण शरीररूपी पर्वतके अवयवभूत अटवीको जलानेवाली दावानलके समान तीव्र प्याससे पीड़ित नहीं होते थे····इस प्रकार वे तृषापरीषहपर विजय प्राप्त करते थे ॥ ९३ ॥ तीव्र वायु और हिमवर्षाके समय रात-दिन खुले चबूतरेपर बैठकर तथा वायु और वर्षासे विषम वर्षा ऋतुमें वृक्षके नीचे बैठकर वे कठोर शीत परीषहके साथ युद्ध करते थे ॥ ९४ ॥ ग्रीष्म ऋतुमें पर्वतके ऊँची शिखरपर स्थित होकर वे चारों ओरसे उष्ण परीषह सहन करते थे। उस समय उनके ऊपर दावानलका धुआँ छा जाता था, उससे ऐसा जान पड़ता था मानो वे छतरीकी छायासे गरमीको बाधाको ही दूर कर रहे हों ॥ ९५ ॥ चुपके-चुपके आनेवाले हड्डीरहित जन्तुओं—डाँस, मच्छरोंसे उनका रुधिर खूब पिया गया फिर भी वे निश्चल रहते थे। इस प्रकार उन्होंने दंश, मशक नामक कठिन परीषहको बड़ी दृढ़तासे सहन किया था ॥ ९६ ॥ जो शरीरमें संलग्न था, अपायरहित होने-पर भी विश्वासके योग्य नहीं था, जिसका एक दिन भी पालन करना कठिन था एवं जो उत्तम स्त्रीके समान लज्जासे सहित था, ऐसे नाग्न्यपरीषहको वे अपनी इच्छानुसार सहन करते थे ॥ ९७ ॥ वे ध्यानके योग्य पहाड़ी मार्ग एवं वनकी दुर्गम भूमियोंमें अकेले ही बिहार कर सदा धर्मसाधनमें प्रीति रखते थे और शत्रुकी तरह रतिपरीषहके निग्रह करनेमें संलग्न रहते थे ॥ ९८ ॥ भ्रुकुटि लतारूपी कुटिल धनुषपर चढ़ाये हुए स्त्रियोंके कटाक्षरूपी बाणों-

---

१. देहनिर्यदव- ङ० । २. वध्यते म० । ३. पत्रसंयायसेव म० । ४. -रनश्च जन्तुभिः म० । ५. दुर्गभृदेक एव म०, ङ० । ६. व्यावृतो म० ।

तीर्थभूमिविहृतिः ससंयमावश्यकेष्वपरिहाणितो व्रजन् ।
वाहनाद्यनभिसध्य चर्यया खिद्यते स्म न परीषहाख्यया ॥१००॥
प्रासुकास्वथ विविक्तभूमिषु ध्यानधौतधिषणो विभूतधीः ।
क्षेत्रकालनियतासनेष्वसौ बाध्यते स्म न निषद्ययाऽनिशम् ॥१०१॥
ध्यानतोऽध्ययनतो मुनिः क्रमादल्पकालनियताल्पनिद्रया ।
एकपार्श्वकृतभूमिशय्यया [1]नावृतोऽपि निशि न प्रपीडितः ॥१०२॥
दुर्जनैर्निशितदुर्वचोऽस्त्रकैराहतोऽपि हृदयेऽतिदुस्सहैः ।
क्रोशबाधसहनः क्षमावृतः स्यामिति स्मृतिमदत्त धीरधीः ॥१०३॥
अस्त्रशस्त्रनिवहैर्वपुर्वधः प्राप्यते यदि नु मे तथाऽप्यलम् ।
सह्यते वधपरीषहो मयेत्येष बुद्धिमदधादनार[2]तम् ॥१०४॥
बाह्यमान्तरमसौ तपश्चरन्नस्थिशेषवपुषः स्थितिं प्रति ।
व्यापृतोऽपि समयव्यवस्थया याचनाख्यमजयत्परीषहम् ॥१०५॥
मौनिना निजशरीरदर्शिना संहितेन हितचन्द्र[3]चर्यया ।
लब्ध्यलब्धिसुधियामुना जितोऽलाभनामविदितः परीषहः ॥१०६॥
रूक्षशीतलविरुद्धभुक्तिजां वातपित्तकफकोपजां रुजम् ।
सोऽप्रतिक्रियतयाऽवधीरयन् रोगसंज्ञमजयत्परीषहम् ॥१०७॥

की वर्षा करनेवाले कामदेवरूपी योधाको व्यर्थ करनेवाले उन मुनिराजने अतिशय बलवान् स्त्री परीषहको जीता था ॥ ९९ ॥

वे संयमी मनुष्योंके आवश्यक कार्योंमें हानि न कर सवारी आदिका विचार किये बिना ही तीर्थ क्षेत्रोंके लिए विहार करते थे और चर्या-परीषहसे कभी खेदखिन्न नहीं होते थे ॥ १०० ॥ प्रासुक और एकान्त भूमियोंमें ध्यान करनेसे जिनकी बुद्धि अत्यन्त निर्मल हो गयी थी तथा जो उत्कृष्ट बुद्धिके धारक थे ऐसे बलदेव मुनिराज, क्षेत्र अथवा कालमें निश्चित आसनोंके बीच निषद्या-परीषहसे कभी दुःखी नहीं होते थे ॥ १०१ ॥ वे मुनि ध्यान और अध्ययनमें सदा निमग्न रहते थे, इसलिए रात्रिके समय क्रम-क्रमसे बहुत थोड़ी निद्रा लेते थे वह भी पृथिवीरूपी शय्यापर एक करवटसे और बिना कुछ ओढ़े हुए। इस प्रकार वे शय्या परीषहसे कभी पीडित नहीं होते थे ॥ १०२ ॥

धीर-वीर बुद्धिको धारण करनेवाले बलदेव मुनिराज दुर्जनोंके द्वारा तीक्ष्ण कुवचन-रूपी शस्त्रोंसे हृदयमें घायल होनेपर भी कुवचनोंकी बाधा सहते हुए सदा इस बातका स्मरण रखते थे कि मुझे क्षमासे युक्त होना चाहिए ॥ १०३ ॥ वे मुनि सदा ऐसी बुद्धि धारण करते थे कि यदि अस्त्र और शस्त्रके समूहसे मेरा शरीर वधको प्राप्त होता है तो भी मुझे अच्छी तरह वध-परीषह सहन करना चाहिए ॥ १०४ ॥ बाह्य और आभ्यन्तर तपको करनेवाले वे मुनि, हड्डीमात्र अवशिष्ट शरीरकी स्थिरताके लिए यद्यपि चरणानुयोगकी पद्धतिसे उद्यम करते थे—चर्याके लिए जाते थे पर कभी किसीसे आहार आदिकी याचना नहीं करते थे, इस प्रकार वे याचना-परीषहको जीतते थे ॥ १०५ ॥ वे मौनसे आहारके लिए विहार करते थे, अपना शरीरमात्र दिखाते थे, चान्द्री-चर्यासे युक्त रहते थे अर्थात् चन्द्रमाके समान अमीर, गरीब सभीके घर प्रवेश करते थे और लाभ, अलाभमें प्रसन्न रहते थे, इस प्रकार उन्होंने अलाभ-परीषहको जीत लिया था ॥ १०६ ॥ वे रूखे, शीतल एवं प्रकृतिके विरुद्ध आहार तथा

---

१. व्यापृतोऽपि ख० । २. दनागतं म० । ३. चण्ड- म० ।

लाक्षलेशतृणशर्करादिभिः कर्कशैः स शयनासनादिषु ।
पीडितोऽप्यविकृतान्तरस्तृणस्पर्शरूढिमरुणत्परीषहम् ॥१०८॥
अस्पृशन् करनखैस्तनुं मुनिः शोभते स्म धवलो मलावृतः ।
शैलतुङ्गशिखराश्रितो यथा कालमेघपटलावृतः शशी ॥१०९॥
नादरे परकृते कृतादरोऽनादरे च न मनोविकारवान् ।
शुद्धधीर्विषहते स्म तत्पुरस्काररूढमपरं परीषहम् ॥११०॥
वादिवाग्मिगमको महाकविः सांप्रतं सकलशास्त्रविद्भुवि ।
नास्मदन्य इति हि स्मयो मनाक् प्रज्ञया न परिषह्यदूषितः ॥१११॥
अज्ञ एष न पशुर्न मानुषो वीक्षते न हि न भाषते मृषा ।
मौनमित्यबुधवाच्यवज्ञयाऽज्ञानमेष सहते परीषहम् ॥११२॥
वार्तमुग्रतपसा महर्धयः पूर्वमित्यनुपलब्धितोऽधुना ।
इत्यनुक्तिरतिशुद्धदर्शनोऽदर्शनाख्यमसहत्परीषहम् ॥११३॥
इत्यशेषितपरीषहारिणा सीरिणा विषयदोषहारिणा ।
अभ्यतप्यत तपोऽतिहारिणा जैनसच्चरणभूविहारिणा[1] ॥११४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ बलदेवतपोवर्णनो नाम त्रिषष्टितमः सर्गः ॥६३॥

वात, पित्त और कफके प्रकोपसे उत्पन्न रोगका प्रतिकार नहीं करते थे । सदा उसकी उपेक्षा ही करते थे । इस प्रकार रोग-परीषहको उन्होंने अच्छी तरह जीत लिया था ॥ १०७ ॥ शयन, आसन आदिके समय कठोर लाखके कण, तृण तथा कंकण आदिके द्वारा पीडित होनेपर भी उनके अन्तरङ्गमें किसी प्रकारका विकार उत्पन्न नहीं होता था और भी तृणस्पर्श-परीषहको अच्छी तरह सहन करते थे ॥ १०८ ॥ जो हाथके नाखूनोंसे शरीरका कभी स्पर्श नहीं करते थे—नखोंसे शरीरका मल नहीं छुटाते थे ऐसे मैलसे आवृत शुभ्रकाय मुनिराज, पहाड़की ऊँची चोटीपर स्थित काले-काले मेघोंके पटलसे ढँके चन्द्रमाके समान सुशोभित हो रहे थे ॥ १०९ ॥ यदि दूसरे लोग उनका आदर करते थे, तो उन्हें प्रसन्नता नहीं होती थी और अनादर करते थे तो मनमें विकार भाव नहीं लाते थे । आदर और अनादर दोनोंमें ही अपनी बुद्धिको सदा विशुद्ध रखते थे, इस तरह वे सत्कार पुरस्कार-परीषहको अच्छी तरह सहन करते थे ॥११०॥ इस समय पृथिवीपर मुझसे बढ़कर न कोई वादी है, न वाग्मी है, न गमक है और न महाकवि है । इस प्रकारके अहंकारको उन्होंने प्रज्ञा-परीषहके द्वारा किञ्चित् भी दूषित नहीं होने दिया था ॥ १११ ॥ यह अज्ञानी न पशु है, न मनुष्य है, न देखता है, न बोलता है, व्यर्थ ही इसने मौन ले रखा है । इस प्रकारके अज्ञानी जनोंके वचनोंकी परवाह न कर वे अज्ञान-परीषहको सहन करते थे ॥ ११२ ॥ उग्र तपके प्रभावसे पहले बड़ी-बड़ी ऋद्धियाँ प्राप्त हो जाती थीं यह कहना व्यर्थ है क्योंकि आज तक हमें एक भी ऋद्धिकी प्राप्ति नहीं हुई । इस प्रकार शुद्ध सम्यग्दर्शनको धारण करनेवाले बलदेव मुनिराज कभी नहीं कहते थे । इस तरह उन्होंने आदर्शन परीषहको अच्छी तरह सहन किया था ॥ ११३ ॥ इस प्रकार जिन्होंने परीषहरूपी शत्रुओंको समाप्त कर दिया था । जो पञ्चेन्द्रियोंके विषयरूपी दोषको हरनेवाले थे, शरीरसे अत्यन्त सुन्दर थे, और जिनेन्द्रप्रणीत सम्यक् चारित्रकी भूमिकामें विहार करनेवाले थे ऐसे मुनिराज बलदेवने चिरकाल तक तप किया ॥ ११४ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें बलदेवके तपका वर्णन करनेवाला त्रेसठवाँ पर्व समाप्त हुआ ॥६३॥

●

---

१. क०, ङ० पुस्तकयोः ११३-११४ श्लोकयोः क्रमभेदो वर्तते ।

चतुःषष्टितमः सर्गः

अथ ते पाण्डवाश्चण्डसंसारभयभीरवः । प्राप्य पल्लवदेशेषु विहरन्तं जिनेश्वरम् ॥१॥
चतुर्विधामराकीर्णसमवस्थानमण्डनम् । तं ते ववन्दिरे देवं परीत्य परमेश्वरम् ॥२॥
पीत्वा धर्मामृतं लब्धजिनेन्द्रघनकालतः । पूर्वजन्मानि तेऽपृच्छन् जिनेन्द्रोऽप्यगदीदिति ॥३॥
अत्रैव भरतक्षेत्रे चम्पायां मेघवाहने । रक्षति क्षितिपे क्षोणीं कुरुवंशविभूषणे ॥४॥
विप्रस्य सोमदेवस्य सोमिलायां त्रयः सुताः । प्रथमः सोमदत्तोऽभूत्सोमिलः सोमभूतिना ॥५॥
अग्निभूत्यग्निलोद्भूतास्तेषां मातुलजाः क्रमात् । धनश्रीरपि सोमश्रीर्नागश्रीरिति योषितः ॥६॥
शरीरभोगसंसारनिर्वेदं सर्ववेदवित् । सोमदेवः परिप्राप्य प्राव्राजीज्जिनशासने ॥७॥
त्रयोऽत्र भ्रातरस्तेऽपि जिनशासनभाविताः । गृहधर्मरता जाता धर्मकामार्थसेविनः ॥८॥
भिक्षाकालेऽन्यदा तेषां गृहं धर्मरुचिर्यतिः । धर्मपिण्ड इवाखण्डः प्रविष्टश्चान्द्रचर्यया ॥९॥
प्रतिगृह्य तमुत्थाय सोमदत्तो यमीश्वरम् । कार्यव्यग्रतया दाने नागश्रियमयोजयत् ॥१०॥
सा स्वपापोदयात्साधौ कोपावेशवशाददात् । विषान्नमेष संन्यासकारीसर्वार्थसिद्धिमैत् ॥११॥
नागश्रीदुष्कृतं ज्ञात्वा ते त्रयोऽपि सहोदराः । दीक्षां वरुणगुर्वन्ते निर्विण्णाः प्रतिपेदिरे ॥१२॥
धनश्रीश्चापि मित्रश्रीर्गुणवत्यार्यिकान्तिके । अदीक्षिषातां निःशेषभववासविषादतः ॥१३॥

अथानन्तर संसारके तीव्र भयसे भयभीत पाण्डव, पल्लव देशमें विहार करते हुए श्री नेमिजिनेन्द्रके समीप पहुँचे। उस समय भगवान् चार प्रकारके देवोंसे व्याप्त समवसरणको सुशोभित कर रहे थे एवं अष्ट प्रातिहार्यरूप परम ऐश्वर्यसे युक्त थे। पाण्डवोंने प्रदक्षिणा देकर भगवान्को नमस्कार किया ॥ १-२ ॥ तदनन्तर प्राप्त हुए जिनेन्द्ररूपी वर्षा कालसे धर्मामृतका पान कर उन्होंने अपने पूर्वभव पूछे और श्रीजिनेन्द्र इस प्रकार उनके पूर्वभव कहने लगे ॥ ३ ॥ इसी भरतक्षेत्रकी चम्पा नगरीमें जब कुरुवंशका आभूषण स्वरूप राजा मेघवाहन पृथिवीकी रक्षा करता था, तब वहाँ सोमदेव नामका एक ब्राह्मण रहता था। उसकी सोमिला नामकी स्त्री थी और उससे उसके सोमदत्त, सोमिल और सोमभूति नामके तीन पुत्र उत्पन्न हुए थे ॥ ४-५ ॥ इन पुत्रोंके मामाका नाम अग्निभूति था, उसकी स्त्री अग्निला थी और उन दोनोंके क्रमसे धनश्री, सोमश्री और नागश्री नामकी तीन कन्याएँ उत्पन्न हुई थीं जो कि उक्त तीन पुत्रोंकी क्रमसे स्त्रियाँ हुई थीं ॥ ६ ॥ समस्त वेदोंका जाननेवाला ब्राह्मण सोमदेव कदाचित् शरीरभोग और संसारसे विरक्त हो जिनधर्ममें दीक्षित हो गया ॥ ७ ॥ सोमदत्त आदि तीनों भाई भी जिनशासनकी भावनासे युक्त थे इसलिए धर्म, अर्थ और काम पुरुषार्थका सेवन करते हुए गृहस्थ धर्ममें रत हो गये ॥ ८ ॥

किसी समय धर्मरुचि नामक मुनिराज जो धर्मके अखण्ड पिण्डके समान जान पड़ते थे, भिक्षाके समय चान्द्री-चर्यासे उनके घर प्रविष्ट हुए ॥९॥ सोमदत्तने उठकर बड़ी विनयसे उन मुनिराजको पडिगाहा। पडिगाहनेके बाद किसी अन्य कार्यमें व्यग्र होनेसे वह तो चला गया और दान देनेके कार्यमें नागश्रीको नियुक्त कर गया ॥ १० ॥ अपने पूर्वकृत पापोदयसे मुनिराजके विषयमें कोपके वशीभूत हो नागश्रीने उन्हें विषमिश्रित अन्नका आहार दिया जिससे वे मुनिराज संन्यास मरण कर सर्वार्थसिद्धिको प्राप्त हुए ॥ ११ ॥ नागश्रीके इस दुष्कार्यको जानकर वे तीनों भाई बहुत दुःखी हुए और संसारसे विरक्त हो उन्होंने वरुण गुरुके समीप दीक्षा धारण कर ली ॥ १२ ॥ धनश्री और मित्रश्रीने भी समस्त संसार वाससे-

ज्ञानपञ्चकसिद्ध्यै ते दर्शनत्रिकशुद्धये । चारित्रतपसां शुद्ध्यै प्रवृत्ताश्चरणोद्यताः[1] ॥१४॥
स्यात्सामायिकचारित्रं सर्वत्र समभावकम् । सर्वसावद्ययोगस्य प्रत्याख्यानमखण्डितम् ॥१५॥
स्वप्रमादकृतानर्थप्रबन्धप्रतिलोपने । सम्यक् प्रतिक्रिया या सा छेदोपस्थापना मता ॥१६॥
विशिष्टा परिहारेण शुद्धिर्यत्र प्रतिष्ठिता । परिहारविशुद्ध्याख्यं चारित्रं तत्प्रकथ्यते ॥१७॥
संपरायाः कषायास्तु यत्र ते सूक्ष्मवृत्तयः । तत्सूक्ष्मसांपरायाख्यं चारित्रं पापनोदनम् ॥१८॥
यथाख्यातमथाख्यातमिति वा परिभाषितम् । सुशान्तक्षीण[2]मोहं तच्चारित्रं मोक्षसाधनम् ॥१९॥
तपः षोढा भवेद्बाह्यमथानशनपूर्वकम् । अभ्यन्तरं तपः षोढा प्रायश्चित्तादिकं मतम् ॥२०॥
संयमादिकसद्ध्यानसिद्धि[3]दृष्टफलाप्तये । रागोच्छित्त्यै तपो नानाविधं ह्यनशनं स्मृतम् ॥२१॥
दोषोपशमसन्तोषस्वाध्यायध्यानसिद्धये । संयमायावमोदर्यं प्रजागरणकारणम् ॥२२॥
भिक्षार्थिमुनिसंकल्पा ये वेश्मान्नादिगोचराः । आशानिवृत्तये वृत्तिपरिसंख्यानमिष्यते ॥२३॥
घृतक्षीरादिवृष्यात्मरसानां विरहः परम् । तपो रसपरित्यागो निद्रेन्द्रियजयाय सः ॥२४॥
पशुस्त्रीप्रविविक्तेषु स्थानेषु प्रासुकेषु यत् । वर्तनं व्रतशुद्ध्यै तद्विविक्तशयनासनम् ॥२५॥
त्रिकालयोगप्रतिमास्थानपूर्वः स्वयंकृतः । कायक्लेशः सुखत्यागो मोक्षमार्गप्रभावनः ॥२६॥

विरक्त हो गुणवती आर्यिकाके समीप दीक्षा धारण कर ली ॥ १३ ॥ इस प्रकार वे सब, पाँच ज्ञान, तीन सम्यग्दर्शन, चारित्र एवं तपकी शुद्धिके लिए प्रवृत्त हो चारित्रपालन करनेके लिए उद्यत हो गये ॥ १४ ॥ चारित्रके सामायिक, छेदोपस्थापना, परिहारविशुद्धि, सूक्ष्मसाम्पराय और यथाख्यात ये पाँच भेद हैं। सब पदार्थोंमें समताभाव रखना तथा सर्वप्रकारके सावद्ययोगका पूर्ण त्याग करना सामायिक चारित्र है ॥ १५ ॥ अपने प्रमादके द्वारा किये हुए अनर्थका सम्बन्ध दूर करनेके लिए जो समीचीन प्रतिक्रिया होती है वह छेदोपस्थापना चारित्र है ॥ १६ ॥ जिसमें जीव हिंसाके परिहारसे विशिष्ट शुद्धि होती है वह परिहारविशुद्धि नामका चारित्र कहलाता है ॥ १७ ॥ संपराय कषायको कहते हैं, ये कषाय जिसमें अत्यन्त सूक्ष्म रह जाती हैं वह पापको दूर करनेवाला सूक्ष्म साम्पराय नामका चारित्र है ॥१८॥ जहाँ समस्त मोहकर्मका उपशम अथवा क्षय हो चुकता है उसे यथाख्यात अथवा अथाख्यात चारित्र कहते हैं। यह चारित्र मोक्षका साक्षात् साधन है ॥ १९ ॥ तपके बाह्य और आभ्यन्तरके भेदसे दो भेद हैं। इनमें बाह्य तप अनशन आदिके भेदसे छह प्रकारका है और आभ्यन्तर तप भी प्रायश्चित्त आदिके भेदसे छह प्रकारका माना गया है ॥ २० ॥

संयमको आदि लेकर समीचीन ध्यानकी सिद्धि रूप प्रत्यक्ष फलकी प्राप्तिके लिए तथा रागको दूर करनेके लिए आहारका त्याग करना अनशन तप है। यह वेला, तेला आदिके भेदसे नाना प्रकारका स्मरण किया गया है ॥ २१ ॥ वात, पित्त आदि दोनोंका उपशम, संतोष, स्वाध्याय और ध्यानकी सिद्धिके लिए तथा संयमकी प्राप्तिके लिए भूखसे कम भोजन करना अवमौदर्य तप है। यह जागरणका कारण है—इस तपके प्रभावसे निद्राकी अधिकता दूर हो जाती है ॥ २२ ॥ भोजनविषयक तृष्णाको दूर करनेके लिए भिक्षाके अभिलाषी मुनि जो घर तथा अन्न आदिसे सम्बन्ध रखनेवाले नाना प्रकारके नियम लेते हैं वह वृत्तिपरिसंख्यान नामका तप है ॥ २३ ॥ निद्रा और इन्द्रियोंको जीतनेके लिए जो घी, दूध आदि गरिष्ठ रसोंको त्याग किया जाता है वह रसपरित्याग नामका तप है ॥ २४॥ व्रतकी शुद्धिके लिए पशु तथा स्त्री आदिसे रहित एकान्त प्रासुक स्थानमें उठना, बैठना विविक्तशयनासन तप है ॥ २५ ॥ आतापन, वर्षा और शीत ये तीन योग धारण करना तथा प्रतिमायोगसे स्थित होना

---

१. चरणोदिताः ङ० । २. तीक्ष्ण म० । ३.-दिष्ट ग० ।

बाह्यद्रव्यव्यपेक्षत्वात्परप्रत्ययहेतुकः । षड्विधस्यास्य बाह्यत्वं तपसः प्रतिपादनम् ॥२७॥
मनोनियमनार्थत्वादाभ्यन्तरमभिष्टुतम् । प्रायश्चित्तं कृतावद्यशोधनं नवधाऽत्र तु ॥२८॥
चतुर्धा विनयः पूज्येष्वादरो दशधा पुनः । वैय्यावृत्त्यं [1]स्वकायेनान्यद्रव्यैरप्युपासनम् ॥२९॥
स्वाध्यायः पञ्चधा ज्ञानभावनालस्यवर्जनम् । स्वसंकल्पपरित्यागो व्युत्सर्गो द्विविधः पुनः ॥३०॥
चित्ताक्षेपपरित्यागो ध्यानं चापि चतुर्विधम् । आर्तं रौद्रं च दुर्ध्यानं धर्म्यशुक्ले तु शोभने ॥३१॥
तत्रालोचनकं [2]कृत्स्नं [3]दशदोषविवर्जितम् । प्रमादकृतदोषाणां गुरवे [4]विनिवेदनम् ॥३२॥
मिथ्या मे दुष्कृताद्यैर्यत्स्वाभिव्यक्तिप्रतिक्रियम् । दोषव्यपोहनं साधु तत्प्रतिक्रमणं मतम् ॥३३॥
आलोचनाद्यतः शुद्धिः प्रतिक्रमणतोऽपि च । तदुभयं तु तदुद्दिष्टं प्रायश्चित्तं विशुद्धिकृत् ॥३४॥
स्याद्विवेको विभजनं यः संसक्तान्नपानयोः । कायोत्सर्गादिकरणं व्युत्सर्गः संप्रकीर्तितः ॥३५॥
तपस्त्वनशनाद्येव प्रायश्चित्तमुदीरितम् । प्रव्रज्याहापनं छेदो दिनमासादिभिर्यतेः ॥३६॥

इन्हें आदि लेकर बुद्धिपूर्वक जो सुखका त्याग किया जाता है वह मोक्षमार्गकी प्रभावना करनेवाला कायक्लेश नामका तप है ॥ २६ ॥ यह अनशनादि छह प्रकारका तप बाह्यद्रव्यकी अपेक्षा रखता तथा पर-कारणोंसे होता है, इसलिए इसे बाह्यतप कहा जाता है ॥ २७ ॥

मनका नियमन करनेके लिए आभ्यन्तर तप कहा गया है; इसमें किये हुए दोषोंकी शुद्धि करना प्रायश्चित्त तप है। यह प्रायश्चित्त आलोचना आदिके भेदसे नौ प्रकारका कहा गया है ॥ २८ ॥ पूज्य पदार्थोंमें आदर प्रकट करना विनय है। विनयके चार भेद हैं। अपने शरीरसे तथा अन्य द्रव्योंसे द्रव्योंकी सेवा करना वैयावृत्य है, इसके दश भेद हैं ॥ २९ ॥ ज्ञानकी भावनामें आलस्य छोड़ना स्वाध्याय है, इसके पाँच भेद हैं। बाह्य और आभ्यन्तर परिग्रहोंमें 'ये मेरे हैं' इस प्रकारके संकल्पका त्याग करना व्युत्सर्ग है, इसके दो भेद हैं ॥३०॥ और चित्तकी चञ्चलताका त्याग करना ध्यान है, यह चार प्रकारका होता है। इनमें आर्त और रौद्र ये दो ध्यान खोटे ध्यान हैं और धर्म्य तथा शुक्ल ये दो उत्तम ध्यान हैं ॥३१॥ आलोचनाके नौ भेद इस प्रकार हैं—१ आलोचना, २ प्रतिक्रमण, ३ तदुभय, ४ विवेक, ५ व्युत्सर्ग, ६ तप, ७ छेद, ८ परिहार और ९ उपस्थापन। इनमें प्रमादसे किये हुए दोषोंका सम्पूर्ण रूपसे दश प्रकारके दोष छोड़कर गुरुके लिए निवेदन करना आलोचना नामका प्रायश्चित्त है ॥३२॥ 'मिथ्यामें दुष्कृतमस्तु' इत्यादि शब्दोंके द्वारा अपने-आप दोषोंको प्रकट कर उनका दूर करना प्रतिक्रमण नामक प्रायश्चित्त माना गया है ॥३३॥ आलोचना तथा प्रतिक्रमण दोनोंसे जो शुद्धि होती है वह विशुद्धिको करनेवाला तदुभय नामका प्रायश्चित्त कहा गया है ॥ ३४ ॥ संसक्त अन्न-पानका विभाग करना विवेक कहलाता है। भावार्थ—कुछ समयके लिए अपराधी मुनिको इस प्रकारका दण्ड देना कि अन्य निर्दोष मुनियोंके साथ चर्याके लिए न जाओ अन्य मुनियोंके भोजनके बाद किसी अन्य चौकामें भोजन करो तथा अपने पीछी कमण्डलु जुदे रखो दूसरोंके पीछी कमण्डलु अपने उपयोगमें न लाओ। इस प्रकारके दण्डको विवेक नामक प्रायश्चित्त कहते हैं। कायोत्सर्ग आदिका करना व्युत्सर्ग कहलाता है ॥ ३५ ॥ उपवास आदि तप करना तप नामका प्रायश्चित्त कहा गया है। दिन,

१. स्वकामेन म० । २. समस्तं (ङ० टि०), कृच्छ्रं म०, क०, ख० । ३. तत्र गुरवे प्रमादनिवेदनं दशदोषविवर्जितमालोचनम् 'आकम्पिय अणुमाणिय जं दिट्ठं बादरं च सुहुमं च । छण्णं सद्दाउलियं बहुजण अव्वत्त तस्सेवी' ॥ इति दस दोसा—स० सि० । ४. विनिवेदितम् ग० । ५. संसक्तान्नपानोपकरणादिविभजनं विवेकः–स० सि० ।

पक्षमासादिभेदेन दूरतः परिवर्जनम् । परिहारः पुनर्दीक्षा स्यादुपस्थापना पुनः ॥३७॥
कालानतिक्रमादौ तु ज्ञानाचारेऽष्टधामते[1] । यथोक्तग्रहणादिर्यः स ज्ञानविनयो मतः ॥३८॥
[2]अष्टधादर्शनाचारे निशङ्कादिषु संस्थिते । विनयो दर्शने दृश्यो गुणदोषविवेकिता ॥३९॥
त्रयोदशविधोदारचारित्राचारगोचरा । निरतीचारता चारुश्चरित्रविनयः परः ॥४०॥
याः प्रत्यक्षपरोक्षेषु प्रत्युत्थानादिकाः[3] क्रियाः । गुर्वादिषु यथायोग्यं विनयश्चौपचारिकः ॥४१॥

महीना आदिसे मुनिकी दीक्षा कम कर देना छेद नामका प्रायश्चित है। भावार्थ—मुनियोंमें नवीन दीक्षित मुनि पूर्वदीक्षित मुनिको नमस्कार करते हैं। यदि किसी पूर्वदीक्षित मुनिकी दीक्षा कम कर दी जाती है तो वह नवीन दीक्षित मुनिसे पीछेका दीक्षित हो जाता है; इस तरह उसे, जिससे वह पहले पूजता था उसे पूजना पड़ता है, नमस्कार करना पड़ता है, यह छेद नामका प्रायश्चित है ॥३६॥

पक्ष, महीना आदि निश्चित समय तक अपराधी मुनिको संघसे दूर कर देना परिहार नामका प्रायश्चित्त है और फिरसे नवीन दीक्षा देना उपस्थापना नामका प्रायश्चित्त है। जिसे उपस्थापना दण्ड दिया गया है उसे संघके सब मुनियोंको नमस्कार करना पड़ता है, क्योंकि वे अब इससे पूर्वदीक्षित हो जाते हैं और यह नवीन दीक्षित कहलाने लगता है ॥ ३७ ॥

ज्ञानविनय, दर्शनविनय, चारित्रविनय और उपचारविनयके भेदसे विनयतपके चार भेद हैं। इनमें कालानतिक्रमण आदि जो आठ प्रकारका ज्ञानाचार बताया है उसे आगमोक्त विधिसे ग्रहण करना वह ज्ञानविनय है। भावार्थ—१ शब्दाचार, २ अर्थाचार, ३ उभयाचार, ४ कालाचार, ५ विनयाचार, ६ उपधानाचार, ७ बहुमानाचार और ८ अनिह्नवाचार, ये ज्ञानाचारके आठ भेद हैं। शब्दका शुद्ध उच्चारण करना शब्दाचार है। शुद्ध अर्थका निश्चय करना अर्थाचार है। शब्द और अर्थ दोनोंका शुद्ध होना उभयाचार है। अकालमें स्वाध्याय न कर विहित समयमें ही स्वाध्याय करना कालाचार है। विनयपूर्वक स्वाध्याय करना—स्वाध्यायके समय शरीर तथा वस्त्र शुद्ध रखना एवं आसन वगैरहका ठीक रखना विनयाचार है। चित्तकी स्थिरतापूर्वक स्वाध्याय करना उपधानाचार है। शास्त्र तथा गुरु आदिका पूर्ण आदर रखना बहुमानाचार है और जिस गुरु अथवा जिस शास्त्रसे ज्ञान हुआ है उसका नाम नहीं छिपाना, उसके प्रति सदैव कृतज्ञ रहना अनिह्नवाचार है। इन आठ ज्ञानाचारोंका विधिपूर्वक पालन करना वह ज्ञानविनय है ॥ ३८ ॥ निःशङ्कित आदि आठ अंगोंके भेदसे दर्शनाचार आठ प्रकारका है, उसमें गुणदोषका विवेक रखना वह दर्शनविनय है ॥ ३९ ॥ पाँच महाव्रत, पाँच समिति और तीन गुप्तिके भेदसे जो तेरह प्रकारका चारित्राचार है उसमें निरतिचार प्रवृत्ति करना चारित्रविनय है ॥ ४० ॥ प्रत्यक्ष या परोक्ष दोनों ही अवस्थाओंमें गुरु आदिके उठनेपर उठकर अगवानी करना, नमस्कार करना आदि जो यथायोग्य प्रवृत्ति की जाती है उसे औपचारिकविनय कहते हैं ॥ ४१ ॥

---

१. 'अर्थव्यञ्जनतद्द्वयाविकलताकालोपधप्रश्रयाः । स्वाचार्याद्यनपह्नवो बहुमतिश्चेत्यष्टधा व्याहृतम् ।' रत्नत्रयपूजा 'ग्रन्थार्थोभयपूर्णकाले विनयेन सोपधानं च । बहुमानेन समन्वितमनिह्नवं ज्ञानमाराध्यम् ॥३६॥ पु० सि० । २. शङ्कादृष्टिविमोहकाङ्क्षणविधिव्यावृत्तिसन्नद्धतां, वात्सल्यं विचिकित्सितादुपरतिं धर्मोपबृंहक्रियाम् । शक्त्या शासनदीपनं हितपथाद् भ्रष्टस्य संस्थापनं, वन्दे दर्शनगोचरं सुचरितं मूर्ध्ना नमन्नादरात् ॥ र० पू० । ३. प्रत्युत्थानादिका क्रिया क० ।

आचार्ये चाप्युपाध्याये तपःश्रेष्ठे तपस्विनि । शिक्षाशीले यतौ शैक्ष्ये ग्रस्ते ग्लाने रुजादिभिः ॥४२॥
गणे स्थविरसंतानलक्षणे च कुलेऽपि च । दीक्षकाचार्यशिष्यादिसंस्त्यायनिजलक्षणे ॥४३॥
गृहिश्रमणसंघाते संघे च गुणसंघके । चिरप्रव्रजिते साधौ मनोज्ञे लोकसम्मते ॥४४॥
व्याधिमिथ्यात्वसंपातपरीषहरिपूदये । वैय्यावृत्यं यथायोग्यं विचिकित्साव्यपोहनम् ॥४५॥
ग्रन्थार्थयोः प्रदानं हि वाचना पृच्छनं पुनः । परानुयोगो निश्चित्यै निश्चितानुबलाय वा ॥४६॥
ज्ञानस्य मनसाभ्यासोऽनुप्रेक्षा परिवर्तनम् । आम्नायो[1] देशनान्येषामुपदेशोऽपि धर्मगः ॥४७॥
प्रशस्ताध्यवसायार्थं प्रज्ञातिशयलब्धये[2] । संवेगाय तपोवृद्ध्यै स्वाध्यायः पञ्चधा भवेत् ॥४८॥
क्रोधाद्यभ्यन्तरोपाधेः कायस्य सविचारता । बाह्योपाधेरकल्पस्य[3] त्यागोऽप्युत्सर्ग इष्यते ॥४९॥
निस्संगनिर्भयत्वाय जीविताशानिवृत्तये । स[4] बाह्याभ्यन्तरोपध्योर्व्युत्सर्गः संप्रजायते ॥५०॥
तपसा निर्जरा मुक्त्यै संवृतस्योपजायते । परिणामस्य भेदेन प्रतिस्थानं तु भिद्यते ॥५१॥

---

१ दीक्षा देनेवाले आचार्य, २ पठन-पाठनकी व्यवस्था रखनेवाले उपाध्याय, ३ महान् तप तपनेवाले तपस्वी, ४ शिक्षा ग्रहण करनेवाले शैक्ष्य, ५ रोग आदिसे ग्रस्त ग्लान, ६ वृद्ध मुनियोंके समुदाय रूप गण, ७ दीक्षा देनेवाले आचार्यके शिष्यसमूहरूप कुल, ८ गृहस्थ क्षुल्लक, ऐलक तथा मुनियोंके समुदायरूप संघ, ९ चिरकालके दीक्षित गुणी मुनिरूप साधु और १० लोकप्रिय मनोज्ञ—इन दश प्रकारके मुनियोंको कदाचित् बीमारी आदिकी अवस्था प्राप्त हो, मोहके तीव्र उदयसे मिथ्यात्वकी ओर इनकी प्रवृत्ति होने लगे (अथवा मिथ्यादृष्टि जीवोंके द्वारा कोई उपद्रव-उपसर्ग खड़ा कर दिया जाये) अथवा परीषहरूपी शत्रुओंका उदय हो तो ग्लानि दूर कर उनकी यथायोग सेवा करना वह दश प्रकारका वैयावृत्त्य तप है ॥ ४२–४५ ॥

वाचना, पृच्छना, अनुप्रेक्षा, आम्नाय और उपदेशके भेदसे स्वाध्यायके पाँच भेद हैं। निर्दोष ग्रन्थ तथा उसका अर्थ दूसरेके लिए प्रदान करना—पढ़कर सुनाना सो वाचना नामका स्वाध्याय है। अनिश्चित तत्त्वका निश्चय करनेके लिए अथवा निश्चित तत्त्वको सुदृढ़ करनेके लिए दूसरेसे पूछना वह पृच्छना नामका स्वाध्याय है। ज्ञानका मनसे अभ्यास—चिन्तन करना वह अनुप्रेक्षा नामका स्वाध्याय है। पाठको बार-बार पढ़ना आम्नाय है और दूसरों को धर्मका उपदेश देना उपदेश नामका स्वाध्याय है। यह पाँच प्रकारका स्वाध्याय प्रशस्त अभिप्रायके लिए, प्रज्ञा—भेदविज्ञानके अतिशयकी प्राप्तिके लिए, संवेगके लिए और तपकी वृद्धिके लिए किया जाता है ॥ ४६–४८ ॥

आभ्यन्तरोपाधित्याग और बाह्योपाधित्यागकी अपेक्षा व्युत्सर्गके दो भेद हैं। क्रोधादि अन्तरङ्ग उपाधिका त्याग करना तथा शरीरके विषयमें भी 'यह मेरा नहीं है' इस प्रकारका विचार रखना आभ्यन्तरोपाधित्याग है और आभूषणादि बाह्यउपाधिका त्याग करना बाह्योपाधित्याग है। यह दोनों प्रकारकी उपाधियोंका त्याग निष्परिग्रहता, निर्भयता और मैं 'अधिक दिन तक जीवित रहूँ' इस प्रकारकी आशाको दूर करनेके लिए धारण किया जाता है ॥ ४९–५० ॥

संवरके धारक जीवके तपसे जो निर्जरा होती है वह मोक्षका कारण है। यह निर्जरा

---

१. आम्नाये म० । २. प्रशस्ताध्यवसायार्थप्रतिज्ञातिशय- क०, ख०, ङ०, म० । स एषः पञ्चविधः स्वाध्यायः किमर्थः ? प्रज्ञातिशयः प्रशस्ताध्यवसायः परमसंवेगस्तपोवृद्धिरतिचारविशुद्धिरित्येवमाद्यर्थः—स० सि० । ३. आभरणस्य (ङ० टि०) । ४. स किमर्थः ? निःसङ्गत्वनिर्भयत्वजीविताशाव्युदासाद्यर्थः—स० सि० ।

भव्यः पञ्चेन्द्रियः संज्ञी पर्याप्तो लब्धिभिर्युतः । अन्तःशुद्धिप्रवृद्धो स्याद्बहुकर्मविनिर्जरः ॥५२॥
ततः प्रथमसम्यक्त्वलाभकारणसन्निधौ । सम्यग्दृष्टिर्भवेत्स स्यादसंख्यगुणनिर्जरः ॥५३॥
ततः श्रावकतापन्नोऽसंख्येयगुणनिर्जरः । ततोऽपि विरतस्तस्मादनन्तानां वियोजकः ॥५४॥
ततो दर्शनमोहस्य क्षपकः क्षायिकोद्धकृत् । ततश्चारित्रमोहस्य सर्वोपशमको यतिः ॥५५॥
उपशान्तकषायोऽतोऽसंख्येयगुणनिर्जरः । ततश्चारित्रमोहस्य क्षपकः क्षपकाभिधः ॥५६॥
ततः क्षीणकषायाख्योऽसंख्येयगुणनिर्जरः । जिनेन्द्रः केवली तस्मादनन्तज्ञानदर्शनः ॥५७॥
[2]पुलाको वकुशश्चैव कुशीलो गुणशीलवान् । निर्ग्रन्थः स्नातकश्चेति निर्ग्रन्थाः पञ्चधा मताः ॥५८॥
पुलाका भावनाहीना ये गुणेषूत्तरेषु ते । न्यूनाः कचित्कदाचिच्च पुलाकाभा व्रतेष्वपि ॥५९॥
अखण्डितव्रताः कायभूषोपकरणानुगाः । [3]अविविक्तपरीवाराः शवला[4] वकुशाः स्मृताः ॥६०॥
परिपूर्णोभया जातूत्तरगुणविरोधिनः । प्रतिसेवनाकुशीला ये अविविक्तपरिग्रहाः ॥६१॥

परिणामोंमें भेद होनेसे प्रत्येक स्थानोंमें भेदको प्राप्त होती है ॥ ५१ ॥ यहाँ निर्जराके कुछ स्थान बताये जाते हैं—सर्वप्रथम संज्ञीपञ्चेन्द्रियपर्याप्तकभव्य जीव जब करणादि लब्धियों-से युक्त हो, अन्तरङ्गकी शुद्धिको वृद्धिंगत करता है तब उसके बहुत कर्मोंकी निर्जरा होती है। उसके बाद जब यह जीव प्रथमोपशमसम्यक्त्वकी प्राप्तिके योग्य कारणोंके मिलनेपर सम्यग्दृष्टि होता है तब उसके पूर्वस्थानकी अपेक्षा असंख्यातगुणी निर्जरा होती है ॥५२-५३॥ उससे असंख्यातगुणी निर्जरा श्रावकके होती है, उससे असंख्यातगुणी विरतके, विरतसे असंख्यातगुणी अनन्तानुबन्धीकी विसंयोजना करनेवालेके, उससे असंख्यातगुणी दर्शनमोहका क्षय कर क्षायिकसम्यक्त्व प्राप्त करनेवालेके, उससे असंख्यातगुणी चारित्र-मोहका उपशम करनेवाले उपशमश्रेणीमें स्थित मुनिके, उससे असंख्यातगुणी उपशान्त-कषाय नामक ग्यारहवें गुणस्थानवर्तीके, उससे असंख्यातगुणी चारित्रमोहका क्षय करनेवाले क्षपकश्रेणीमें स्थित मुनिके, उससे असंख्यातगुणी क्षीणकषाय नामक बारहवें गुणस्थानवर्तीके और उससे असंख्यातगुणी अनन्तज्ञानदर्शनके धारक केवली जिनेन्द्रके होती है ॥५४-५७॥

पुलाक, वकुश, कुशील, निर्ग्रन्थ और स्नातकके भेदसे निर्ग्रन्थ मुनियोंके पाँच भेद हैं ॥५८॥ जो उत्तर गुणोंकी भावनासे रहित हों तथा मूल व्रतमें भी जो कहीं कभी पूर्णताको प्राप्त न हों वे धान्यके छिलकेके समान पुलाक मुनि कहलाते हैं ॥५९॥ जो मूल व्रतोंका तो अखण्ड रूपसे पालन करते हैं परन्तु शरीर और उपकरणोंको साफ-सुथरा रखनेमें लीन रहते हों, जिनका परिवार नियत न हो—जो अनेक मुनियोंके परिवारसे युक्त हों और मलिन—सातिचार चारित्रके धारक हों उन्हें वकुश कहते हैं ॥६०॥ प्रतिसेवनाकुशील और कषाय-कुशीलकी अपेक्षा कुशील मुनियोंके दो भेद हैं। जो मूलगुण और उत्तरगुण दोनोंकी पूर्णतासे युक्त हैं, परन्तु कदाचित् उत्तरगुणोंकी विराधना कर बैठते हैं एवं संघ आदि परि-

---

१. सम्यग्दृष्टिश्रावकविरतानन्तवियोजकदर्शनमोहक्षपकोपशमकोपशान्तमोहक्षपकक्षीणमोहजिनाः क्रमशोऽसंख्येयगुणनिर्जराः ॥४५॥ त० सू०, न०, अ० । सम्मत्तुप्पत्तीये सावयविरदे अणन्तकम्मंसे । दंसणमोहक्खवगे कसाय उवसामगे य उवसंते ॥६६॥ खवगे य खीणमोहे जिणेसु दव्वा असंखगुणिदकमा । तव्विवरीया काला संखेज्जगुणक्कमा होंति ॥ ६७ ॥ गो० जी० । २. 'पुलाकवकुशकुशीलनिर्ग्रन्थस्नातका निर्ग्रन्थाः ॥ त० सू०, नवमाध्याय, ४६ सूत्र । ३. अनियतपरिवाराः (ङ० टि०) । ४. मलिनचारित्रयुक्ताः (ङ० टि०), सबलाः म०, क०, ख०, ङ० ।

शमितान्यकषाया ये ससंज्वलनमात्रकाः । ते कषायकुशीलाः स्युः कुशीला द्विविधा यतः ॥६२॥
अव्यक्तोदयकर्माणो ये पयोदण्डराजिवत् । निर्ग्रन्थास्ते मुहूर्तोर्ध्वोद्भिद्यमानात्मकेवलाः ॥६३॥
प्रक्षीणघातिकर्माणः स्नातकाः केवलीश्वराः । एते पञ्चापि निर्ग्रन्था नैगमादिनयाश्रयात् ॥६४॥
[1]संयमादिभिरष्टाभिरनुयोगैर्यथाक्रमम् । ते पुलाकादयः साध्याः साध्यसाधनभेदिनः ॥६५॥
प्रतिसेवनाकुशीलाः पुलाका वकुशा द्वयोः । प्राक्कषायकुशीलाः स्युरन्तवर्ज्ये चतुष्टये ॥६६॥
संयमे च यथाख्याते निर्ग्रन्थस्नातकाः स्थिताः । श्रुतादयोऽपि पञ्चानां प्रकथ्यन्ते यथाक्रमम् ॥६७॥
प्रतिसेवनाकुशीलाः पुलाका वकुशाः स्थिताः । दशपूर्वाण्यभिन्नानि बिभ्रत्युत्कर्षतः श्रुतम् ॥६८॥
ये कषायकुशीला ये निर्ग्रन्थाख्याश्च संयताः । ते चतुर्दशपूर्वाणि सर्वे बिभ्रति सर्वथा ॥६९॥
जघन्येन पुलाकस्य श्रुतमाचारवस्तु तत् । निर्ग्रन्थान्तयतीनां त्वष्टौ प्रवचनमातरः ॥७०॥
व्रतानां राज्यभुक्तेश्च बलादन्यतमं प्रति । सेवमानः पुलाकः स्यात्परेषामभियोगतः ॥७१॥
वकुशः सोपकरणो बहूपकरणप्रियः । शरीरवकुशः कायसंस्कारं प्रतिसेवते ॥७२॥
प्रतिसेवनाकुशील उत्तरेषु विराधनाम्[2] । गुणेषु सेवते काञ्चिदविराधितमूलकः ॥७३॥
स्युः कषायकुशीलास्तु रहितप्रतिसेवनाः । निर्ग्रन्थाः स्नातकाश्चापि ते सर्वे सर्वतीर्थजाः ॥७४॥
[3]भावलिङ्गं प्रतीत्यामी निर्ग्रन्थाः पञ्च लिङ्गिनः । प्रतीत्य द्रव्यलिङ्गं तु भजनीया मनीषिभिः ॥७५॥

ग्रहसे युक्त होते हैं वे प्रतिसेवनाकुशील हैं, जिनके अन्य कषाय शान्त हो गये हैं सिर्फ संज्वलनका उदय रह गया है वे कषायकुशील कहलाते हैं ॥६१-६२॥ जिनके जलमें खींची गयी दण्डकी रेखाके समान कर्मोंका उदय अव्यक्त—अप्रकट रहता है तथा जिन्हें एक मुहूर्त्तके बाद केवलज्ञान उत्पन्न होनेवाला है वे निर्ग्रन्थ कहलाते हैं ॥६३॥ और जिनके घातियाकर्म नष्ट हो गये हैं, ऐसे केवली भगवान् स्नातक कहलाते हैं। ये पाँचों ही मुनि नैगमादि नयोंकी अपेक्षा निर्ग्रन्थ माने जाते हैं ॥६४॥ साध्यसाधनके भेदसे युक्त वे पुलाक आदि मुनि संयम आदि आठ अनुयोगोंके द्वारा साध्य हैं ॥६५॥ पुलाक, वकुश और प्रतिसेवना कुशील मुनि प्रारम्भके सामायिक और छेदोपस्थापना इन दो संयमोंमें, कषायकुशील यथाख्यातको छोड़कर शेष चार संयमोंमें और निर्ग्रन्थ तथा स्नातक यथाख्यात संयममें स्थित हैं। अब पाँचों मुनियोंके श्रुत आदिका भी यथाक्रमसे कथन किया जाता है ॥६६-६७॥ प्रतिसेवना कुशील, पुलाक और वकुश ये उत्कृष्ट रूपसे अभिन्न दशपूर्व श्रुतको धारण करते हैं ॥६८॥ जो कषायकुशील और निर्ग्रन्थ नामक मुनि हैं वे सब चौदह पूर्वको धारण करते हैं ॥६९॥ जघन्यकी अपेक्षा पुलाकमुनिके आचारवस्तुरूप श्रुत होता है और निर्ग्रन्थपर्यन्त समस्त मुनियोंके पाँच समिति, तीन गुप्तिरूप अष्टप्रवचन मातृका प्रमाणश्रुत होता है ॥७०॥ प्रतिसेवनाकी अपेक्षा पुलाक मुनि पाँच महाव्रत तथा रात्रिभोजन त्याग इनमें-से किसी एकका कभी दूसरोंका बलपूर्वक जबर्दस्तीसे सेवन करनेवाला होता है ॥७१॥ वकुशके सोपकरणवकुश और शरीरवकुशकी अपेक्षा दो भेद होते हैं। इनमें सोपकरणवकुश अनेक उपकरणोंके प्रेमी होते हैं और शरीरवकुश शरीरसंस्कारकी अपेक्षा रखते हैं—शरीरकी शोभा बढ़ाना चाहते हैं ॥७२॥ प्रतिसेवनाकुशील मूल गुणोंमें विराधना नहीं करते किन्तु उत्तर गुणोंमें कभी कोई विराधना कर बैठते हैं ॥७३॥ कषायकुशील निर्ग्रन्थ और स्नातकप्रतिसेवनासे रहित होते हैं। तीर्थकी अपेक्षा पुलाक आदि पाँचों मुनि सभी तीर्थंकरोंके तीर्थमें होते हैं ॥७४॥ लिङ्गके भाव और द्रव्यकी अपेक्षा दो भेद होते हैं। भावलिङ्गकी अपेक्षा पुलाक आदि पाँचों मुनि

---

१. संयमश्रुतप्रतिसेवनातीर्थलिङ्गलेश्योपपादस्थानविकल्पतः साध्याः ॥ ४७ ॥ त०, सू०, नवमाध्याय। २. विराधनं म० । ३. भावलिङ्गं प्रतीत्य पञ्च निर्ग्रन्था लिङ्गिनो भवन्ति । द्रव्यलिङ्गं प्रतीत्य भाज्याः । स० सि० ।

पुलाकस्योत्तरास्तिस्रो वकुलप्रतिसेवना । कुशीलयोश्च [1]षड्भेदाः कषाये चतुरुत्तराः ॥७६॥
स्यात्सूक्ष्मसांपराये च निर्ग्रन्थस्नातकेऽपि च । शुक्लैव केवला लेश्याऽयोगाः लेश्याविवर्जिताः ॥७७॥
पुलाकस्योपपादः स्यात्सहस्रारे परायुषः । प्रतिसेवनाकुशीलवकुशस्यारणेऽच्युते ॥७८॥
तथा सर्वार्थसिद्धौ तु निर्ग्रन्थान्त्यकुशीलयोः । द्विसागरोपमायुष्काः सौधर्मे ते जघन्यतः ॥७९॥
संयमस्थानभेदास्तु स्युः कषायनिमित्तकाः । असंख्येयतमानन्तगुणसंयमलब्धयः ॥८०॥
तत्र सर्वजघन्यानि लब्धिस्थानानि सर्वदा । स्युः कषायकुशीलस्य पुलाकस्य च योगिनः ॥८१॥
गच्छतस्तावसंख्येयस्थानानि युगपत्ततः । व्युच्छिद्यते पुलाकोऽन्यस्त्वसंख्येयानि गच्छति ॥८२॥
वकुशेन कुशीलौ द्वौ स्थानानि युगपत्ततः । असंख्यानि च तौ यातौ वकुशस्त्ववहीयते ॥८३॥
असंख्येयानि गत्वातः स्थानानि प्रतिसेवना । कुशीलो हीयते तस्माद्यः कषायकुशीलकः ॥८४॥
स्थानान्यतोऽकषायाणि निर्ग्रन्थः प्रतिपद्यते । सोऽसंख्येयानि गत्वातो व्युच्छेदमुपगच्छति ॥८५॥
स्थानमेकमतस्तूर्ध्वं गत्वानन्तगुणर्धिकः । स्नातकः [2]कृतकर्मान्तो निर्वाणं प्रतिपद्यते ॥८६॥

निर्ग्रन्थ लिङ्गके धारक हैं और द्रव्यलिङ्गकी अपेक्षा विद्वानोंके द्वारा भजनीय हैं ॥७५॥ लेश्याकी अपेक्षा पुलाकमुनिके आगेकी तीन अर्थात् पीत, पद्म और शुक्ल ये तीन, वकुश और प्रतिसेवनाकुशीलके छहों, कषायकुशीलके आगेकी चार अर्थात् कापोत, पीत, पद्म और शुक्ल ये चार एवं सूक्ष्मसाम्पराय, निर्ग्रन्थ और स्नातकके एक शुक्ललेश्या ही होती है। अयोग-केवली स्नातक लेश्यासे रहित होते हैं ॥७६–७७॥ उपपादकी अपेक्षा पुलाकका उपपाद सहस्रार स्वर्गमें होता है और वह वहाँ उत्कृष्ट आयुका धारक होता है। प्रतिसेवनाकुशील और वकुशका उपपाद आरण और अच्युत स्वर्गमें होता है। निर्ग्रन्थ (ग्यारहवें गुणस्थान-वर्ती) और कषायकुशीलका उपपाद सर्वार्थसिद्धिमें होता है और जघन्यकी अपेक्षा पुलाक आदि पाँचों मुनियोंका उपपाद सौधर्मस्वर्गमें होता है और वहाँ वे दो सागरकी आयुके धारक होते हैं ॥७८–७९॥ प्रारम्भमें, संयममें जो स्थानभेद होते हैं वे कषायके निमित्तसे होते हैं तथा उनमें असंख्येय और अनन्तगुणीसंयमकी प्राप्ति होती है ॥८०॥ इनमें सर्व-जघन्य लब्धिस्थान कषायकुशील और पुलाक मुनिके होते हैं। ये दोनों मुनि असंख्येय स्थानों तक साथ-साथ जाते हैं, उसके बाद पुलाकमुनि नीचे विच्छिन्न हो जाता है—नीचे रह जाता है और कषायकुशील असंख्येय स्थान तक आगे चला जाता है ॥८१–८२॥ तदनन्तर वकुश और दोनों प्रकारके कुशील साथ-साथ असंख्यात स्थानों तक जाते हैं, उसके बाद वकुश नीचे रह जाता है और दोनों कुशील आगे बढ़े जाते हैं। तदनन्तर असंख्येय स्थान तक साथ-साथ जाकर प्रतिसेवनाकुशील नीचे छूट जाता है और कषायकुशील असंख्येय स्थान आगे चला जाता है। इसके आगे कषायकुशील भी निवृत्त हो जाता है। तदनन्तर कषायरहित संयमके स्थान प्रकट होते हैं और उन्हें निर्ग्रन्थ मुनि प्राप्त करता है। वह असंख्येय स्थानों तक जाकर पीछे छूट जाता है ॥८३–८५॥ इसके आगे संयमका एक स्थान रहता है जिसे अनन्तगुण रूप ऋद्धियोंको धारण करनेवाला स्नातक प्राप्त करता है और वह वहाँ कर्मोंका अन्त कर निर्वाणको प्राप्त होता है ॥८६॥

---

१. कृष्णलेश्यादित्रितयं तयोः कथमिति चेदुच्यते—तयोरुपकरणासक्तिसंभवात् आर्तध्यानं कदाचित्संभवति, आर्तध्यानेन च कृष्णादि लेश्यात्रितयं संभवतीति। २. कृतकर्मांतो म०।

क्षेत्रकालादिभिः सिद्धाः साध्या द्वादशभिस्तु ते । अनुयोगैर्यथायोग्यं नयद्वयविवक्षया ॥८७॥
सिद्धिक्षेत्रे मता सिद्धिरात्माकाशप्रदेशयोः । प्रत्युत्पन्नप्रतिग्राहिनययोगादसङ्गिनाम् ॥८८॥
कर्मभूमिषु सर्वासु जन्म प्रति च संहतिम् । संसिद्धिर्मानुषे क्षेत्रे भूतग्राहिनयेक्षया ॥८९॥
एकस्मिन् समये कालात्प्रत्युत्पन्ननयेक्षया । भूतग्राहिनयेक्षातो जन्मतोऽप्यविशेषतः ॥९०॥
उत्सर्पिण्यवसर्पिण्योर्जातः सिद्ध्यति जन्मवान् । विशेषेणावसर्पिण्यां तृतीयान्ततुरीययोः ॥९१॥
दुःषमायां तु संजातो दुःषमायां न सिद्ध्यति । उत्सर्पिण्यवसर्पिण्योः संहारात्सर्वदा पुनः ॥९२॥
सिद्धिः सिद्धिगतौ ज्ञेया सुमनुष्यगतौ यथा । अवेदत्वेन लिङ्गेन भावतस्तु त्रिवेदतः ॥९३॥
न द्रव्याद्द्रव्यतः सिद्धिः पुल्लिङ्गेनैव निश्चिता । निर्ग्रन्थेन च लिङ्गेन सग्रन्थेनाथवा न वा ॥९४॥
तीर्थसिद्धिर्द्विधा तीर्थकारीतरविकल्पतः । सति तीर्थंकरे सिद्धा असतीतीतरे द्विधा ॥९५॥
सिद्धिरव्यपदेशेन नयादेकेन वा पुनः । चतुर्भिः पञ्चभिर्वापि चारित्रैरुपजायते ॥९६॥

क्षेत्र, काल आदि बारह अनुयोगोंके द्वारा सिद्धोंमें भूतपूर्व प्रज्ञापन और प्रत्युत्पन्न-ग्राही नयकी अपेक्षा भेद सिद्ध करने योग्य हैं ॥ ८७ ॥ क्षेत्रअनुयोगसे जब विचार करते हैं तब प्रत्युत्पन्न ग्राही नयकी अपेक्षा मुक्त जीवोंकी सिद्धि, सिद्धिक्षेत्रमें अथवा आत्मप्रदेशमें अथवा आकाशके प्रदेशोंमें होती है ॥ ८८ ॥ और भूतग्राही नयकी अपेक्षा जन्मसे पन्द्रह कर्मभूमियोंमें तथा संहरणसे मनुष्यलोक अर्थात् अढ़ाई द्वीपमें होती है ॥८९॥ कालअनुयोग-से विचार करनेपर यह जीव प्रत्युत्पन्न नयकी अपेक्षा एक समयमें सिद्ध होता है और भूत-ग्राही नयकी अपेक्षा जन्मसे सामान्यतया उत्सर्पिणी और अवसर्पिणीमें उत्पन्न हुआ जीव सिद्ध होता है और विशेष रूपसे अवसर्पिणीको तृतीय कालके अन्तमें तथा चतुर्थ कालमें सिद्ध होता है। चतुर्थ कालका उत्पन्न हुआ जीव दुःषमा नामक पञ्चम कालमें सिद्ध हो सकता है परन्तु दुःषमाका उत्पन्न हुआ दुःषमामें सिद्ध नहीं होता। संहरणकी अपेक्षा उत्सर्पिणी अवसर्पिणीके सभी कालोंमें सिद्ध होता है। भावार्थ—जिस समय भरत और ऐरावतक्षेत्रमें प्रथम आदिकाल विद्यमान रहते हैं उस समय यदि कोई व्यन्तरादि देव किसी विदेहक्षेत्रके मुनिको संहरण कर भरत अथवा ऐरावतक्षेत्रमें छोड़ दे तो उनकी वहाँसे सिद्धि हो सकती है ॥९०-९२॥ गतिअनुयोगसे विचार करनेपर सिद्धिगतिमें अथवा मनुष्यगतिमें सिद्धि होती है। लिङ्गअनुयोगसे विचार करनेपर प्रत्युत्पन्नग्राही नयकी अपेक्षा अवेदसे सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा भाववेदसे तीनों वेदोंमें सिद्धि होती है। द्रव्यवेदकी अपेक्षा तीनों वेदोंसे सिद्धि नहीं होती सिर्फ पुरुषवेदसे ही होती है। अथवा लिङ्गका अर्थ वेष भी हो सकता है इसलिए प्रत्युत्पन्न नयकी अपेक्षा निर्ग्रन्थ लिङ्गसे ही सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा सग्रन्थ लिङ्गसे होती भी है और नहीं भी होती है ॥९३-९४॥ तीर्थअनुयोगसे विचार करनेपर सिद्धि दो प्रकारकी होती है, कोई तीर्थंकर होकर सिद्ध होता है और कोई सामान्य केवली होकर सिद्ध होता है। अथवा कोई तीर्थंकरके विद्यमान रहते सिद्ध होता है और कोई तीर्थंकरके मोक्ष चले जानेपर उनके तीर्थमें सिद्ध होता है ॥९५॥ चारित्रअनुयोगकी अपेक्षा विचार करनेपर प्रत्युत्पन्नग्राही नयकी अपेक्षा एक यथाख्यात चारित्रसे ही सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा चार अथवा पाँच चारित्रोंसे होती है। भावार्थ—यथाख्यातके पहले सामायिक, छेदोपस्थापना और सूक्ष्म-

---

१. 'क्षेत्रकालगतिलिङ्गतीर्थचारित्रप्रत्येकबुद्धबोधितज्ञानावगाहनान्तरसंख्याल्पबहुत्वतः साध्याः' ॥ ९ ॥ त० सू०, दशमाध्याय ।

सिद्धिः प्रत्येकबुद्धानां स्वतो बोधिमुपेयुषाम् । तथा बोधितबुद्धानां परतो बोधिलाभिनाम् ॥९७॥
[1]सिद्धिर्ज्ञानविशेषैः स्यादेकद्वित्रिचतुष्ककैः । अवगाहेन चोत्कृष्टजघन्यान्तर्भिदावता ॥९८॥
अवगाहनमुत्कृष्टमूनं पञ्चधनुःशती । [2]पञ्चविंशां च देशोनारत्नयोऽर्धचतुर्थकाः ॥९९॥
मध्येऽनेकविकल्पास्तु यथासंभवमीरिताः । तत्र सिद्ध्यति चैतस्मिन्नेकस्मिन्नवगाहने ॥१००॥
अन्तरः शून्यकालः स्यादन्तरं सिद्ध्यतां पुनः । जघन्येनैकसमयो मासानां षट्कमन्यथा ॥१०१॥
जघन्येनैक एवैकसमये सिद्ध्यति ध्रुवम् । तथोत्कर्षेणाष्टशतसंख्यास्ते संख्यया स्मृताः ॥१०२॥
क्षेत्रादिभेदभिन्नानां संख्याभेदः परस्परम् । ख्यातमल्पबहुत्वं च सिद्धिक्षेत्रे न विद्यते ॥१०३॥
भूतपूर्वव्यपेक्षातश्चिन्त्यते तन्नु तद्यथा । जन्मनः संहृतेश्चेति क्षेत्रसिद्धा द्विधा मताः[3] ॥१०४॥
अल्पे संहारसिद्धास्ते जन्मसिद्धास्तु तत्त्वतः । स्युः संख्येयगुणाः सर्वे सार्वसर्वज्ञशासने ॥१०५॥
ऊर्ध्वलोकस्य सिद्धा ये स्तोकास्तेऽधो जगद्गताः । स्युः संख्येयगुणास्तिर्यग्लोकसिद्धास्तथा ततः ॥१०६॥

साम्परायचारित्र अनिवार्य रूपसे सभीके होते हैं और परिहारविशुद्धि किन्हीं-किन्हींके होता है इसलिए जिनके परिहारविशुद्धि नहीं होगा उनके चार चारित्रोंसे और जिनके परिहारविशुद्धि होगा उनके पाँच चारित्रोंसे सिद्धि होती है, यह भूतार्थग्राही नयकी अपेक्षा है। प्रत्युत्पन्नग्राही नयकी अपेक्षा चौदहवें गुणस्थानमें एक परमयथाख्यात चारित्र ही होता है इसलिए एक चारित्रसे ही सिद्धि प्राप्त होनेका कथन है ॥ ९६ ॥ प्रत्येक बुद्ध और बोधितबुद्ध-अनुयोगसे विचार करनेपर प्रत्येक बुद्ध जो कि अपने-आप रत्नत्रयको प्राप्त होते हैं और बोधित बुद्ध जो कि दूसरोंके उपदेशसे रत्नत्रय प्राप्त करते हैं—दोनोंको सिद्धि प्राप्त होती है—दोनों ही मोक्ष जाते हैं ॥९७॥ ज्ञान अनुयोगसे विचार करनेपर प्रत्युत्पन्नग्राही नयकी अपेक्षा एक केवलज्ञानसे ही सिद्धि होती है और भूतार्थग्राही नयकी अपेक्षा दो, तीन और चार ज्ञानोंसे सिद्धि होती है। भावार्थ—किन्हीं जीवोंकी केवलज्ञानके पूर्व मति और श्रुतमें दो ज्ञान होते हैं। किन्हींको मति, श्रुत, अवधि अथवा मति, श्रुत, मनःपर्यय ये तीन ज्ञान होते हैं। और किन्हींको मति, श्रुत, अवधि, मनःपर्यय ये चार ज्ञान होते हैं। अवगाहना अनुयोगसे विचार करनेपर अवगाहनाके उत्कृष्ट, जघन्य और मध्यमके भेदसे तीन भेद होते हैं। इनमें युक्त जीवोंकी उत्कृष्ट अवगाहना कुछ कम पाँच-सौ पच्चीस धनुष है और जघन्य अवगाहना कुछ कम साढ़े तीन हाथ है। मध्यम अवगाहनाके यथासम्भव अनेक विकल्प कहे गये हैं। इन अवगाहनाओंमें-से जीव किसी एक अवगाहनासे सिद्ध होता है ॥९८-१००॥ अन्तर अनुयोगकी अपेक्षा विचार करनेपर अन्तरका अर्थ शून्यकाल—विरहकाल होता है सो सिद्ध होनेवाले जीवोंमें जघन्य अन्तर एक समयका और उत्कृष्ट अन्तर छह माहका होता है ॥१०१॥ संख्या अनुयोगकी अपेक्षा विचार करनेपर जघन्यरूपसे एक समयमें एक ही जीव सिद्ध होता है और उत्कृष्टतासे एक सौ आठ जीव तक सिद्ध होते हैं ॥१०२॥ अल्पबहुत्व अनुयोगकी अपेक्षा विचार करनेपर क्षेत्रादि भेदोंसे भिन्न जीवोंमें जो परस्पर संख्याका भेद है वह अल्पबहुत्व कहलाता है। यह अल्पबहुत्व प्रत्युत्पन्नग्राही नयकी अपेक्षा सिद्धिक्षेत्रमें नहीं है किन्तु भूतार्थग्राही नयकी अपेक्षा उसका कुछ विचार किया जाता है। क्षेत्रसिद्ध जीव जन्म और संहरणकी अपेक्षा दो प्रकारके माने गये हैं। इनमें संहरणसिद्ध थोड़े हैं और जन्मसिद्ध, सर्वहितकारी सर्वज्ञ जिनेन्द्रके शासनमें संहरण सिद्धोंकी अपेक्षा संख्यातगुणे बतलाये गये हैं ॥ १०३–१०५ ॥ ऊर्ध्वलोकसे सिद्ध होनेवाले थोड़े हैं, उनसे संख्यातगुणे अधोलोकसे सिद्ध होनेवाले हैं और उनसे संख्यातगुणे तिर्यग्लोकसे

---

१. सिद्धिर्ज्ञानविशेषैरेकद्वित्रिचतुर्थकैः म० । २. पञ्चविंशा म०, पञ्चविंशाव ख० । ३. यतः म० ।

स्तोकाः समुद्रसिद्धास्तु स्युः संख्येयगुणाः पुनः। द्वीपसिद्धा इतीहेत्थमविशेषेण[1]भाषिताः ॥१०७॥
[2]लवणोदेऽत्र ये सिद्धाः सर्वस्तोकास्तु ते स्तुताः। कालोदसिद्धा बोद्धव्यास्तत्संख्येयगुणाः सदा ॥१०८॥
ये जम्बूद्वीपसिद्धास्ते स्युः संख्येयगुणास्तथा। धातकीखण्डसिद्धाश्च पुष्करद्वीपगास्तथा ॥१०९॥
यथा क्षेत्रविभागेन प्रोक्ताल्पबहुता तथा। सा कालादिविभागेन वेदितव्या यथागमम्[3] ॥११०॥
इति दृग्ज्ञानचारित्रतपसामत्युपासकाः। सोमदत्तादयोऽन्त्ये ते पञ्च भूत्वारणाच्युते ॥१११॥
देवाः सामानिका भोगं द्वात्रिंशत्यब्धिजीविनः। भुञ्जानास्तस्थुरत्यन्तशुद्धदर्शनदर्शनाः ॥११२॥
नागश्रीरपि मृत्वाप फलं धूमप्रभावनौ। अनुभूय महादुःखं सा सप्तदशसागरम् ॥११३॥
भूत्वा स्वयंप्रभद्वीपे दुष्टो दृष्टिविषोरगः। त्रिसागरोपमायुष्कां मृत्वागाद्बालुकाप्रभाम् ॥११४॥
तत्रानुभूय [4]दुःखौघांश्चिरादुद्वर्त्य पापतः। [5]त्रसस्थावरकायेषु सानयत्सागरद्वयम् ॥११५॥
ततो मातङ्गकन्याभूच्चम्पायां साऽन्यदा मुनेः। समाधिगुप्ततः कृत्वा मधुमांसादिवर्जनम् ॥११६॥
जीवितान्ते सुबन्धोः स्याच्चम्पायामेव वैश्यतः। धनवत्यां सुता जाता नाम्ना च सुकुमारिका ॥११७॥
पापानुबन्धदोषेण सुदुर्गन्धशरीरिका। रूपवत्यपि विद्वेष्या जाता युवजनस्य सा ॥११८॥
वैश्यस्य धनदेवस्याशोकदत्तासमुद्भवौ। तनयौ जिनदेवश्च जिनदत्तश्च विश्रुतौ ॥११९॥
कन्यां तामपि दुर्गन्धां वृतां बन्धुभिरग्रजः। परित्यज्य प्रवव्राज सुव्रतः सुव्रतान्तिके ॥१२०॥

सिद्ध होनेवाले हैं ॥१०६॥ समुद्रसे सिद्ध होनेवाले थोड़े हैं, इनसे संख्यातगुणे द्वीपसे सिद्ध होनेवाले हैं, यह सामान्यकी अपेक्षा कथन है, विशेषकी अपेक्षा लवणसमुद्रमें जो सिद्ध होते हैं, वे सबसे थोड़े हैं, उनसे संख्यातगुणे कालोदधिसे सिद्ध होनेवाले हैं ॥१०७-१०८॥ जो जम्बूद्वीपसे सिद्ध होते हैं वे संख्येयगुणे हैं, उनसे संख्यातगुणे धातकीखण्डसे होनेवाले सिद्ध हैं और उनसे संख्यातगुणे पुष्करद्वीपसे होनेवाले सिद्ध हैं ॥१०९॥ जिस प्रकार क्षेत्रविभागकी अपेक्षा अल्पबहुत्वका कथन किया है उसी प्रकार आगमके अनुसार काल आदि विभागकी अपेक्षा भी जानना चाहिए ॥११०॥

इस प्रकार सम्यग्दर्शन, सम्यग्ज्ञान और सम्यक्चारित्रकी अत्यन्त उपासना करनेवाले सोमदत्त आदि पाँचों जीव अन्त समय मरकर आरण अच्युत स्वर्गमें सामानिक जातिके देव हुए। वहाँ बाईससागरकी उनकी आयु थी। अत्यन्त शुद्ध सम्यग्दर्शनको धारण करनेवाले वे देव उत्तम भोग भोगते हुए वहाँ बाईस सागर तक स्थित रहे ॥१११-११२॥ विषमिश्रित भोजन देनेवाली नागश्री भी मरकर धूमप्रभानामक पाँचवें नरकके फलको प्राप्त हुई। वह सत्तरह सागर तक वहाँके महादुःख भोगकर निकली और स्वयंप्रभद्वीपमें दृष्टिविष नामका दुष्ट सर्प हुई। तदनन्तर मरकर तीन सागरकी आयुवाली बालुकाप्रभा नामक तीसरी पृथ्वीमें पहुँची ॥११३-११४॥ वहाँ पापके फलस्वरूप चिरकाल तक दुःखोंका समूह भोगकर निकली और त्रसस्थावर पर्यायमें दो सागर तक भटकती रही ॥११५॥ तदनन्तर चम्पापुरीमें एक चण्डालकी कन्या हुई। वहाँ उसने एक दिन समाधिगुप्त नामक मुनिराजके पास मधु-मांसादिका त्याग किया ॥११६॥ जिससे अन्त समय उसी चम्पापुरीमें सुबन्धु वैश्यकी धनवती स्त्रीसे सुकुमारिका नामकी पुत्री हुई ॥ ११७ ॥ पापके पूर्व संस्कारसे उसके शरीरसे तीव्र दुर्गन्ध आती थी इसलिए रूपवती होनेपर भी वह युवाजनोंके द्वेषका पात्र हुई ॥ ११८ ॥ उसी नगरीमें धनदेव वैश्यकी अशोकदत्ता नामक स्त्रीसे उत्पन्न जिनदेव और जिनदत्त नामक दो पुत्र रहते थे ॥ ११९ ॥ जिनदेवके कुटुम्बी जनोंने उस दुर्गन्धा कन्याके साथ उसका विवाह

---

१. -मप्यशेषेण म०। २. लवणोदे त्रयः म०। ३. एष सर्व उल्लेखः 'क्षेत्रकालगति—इत्यादिसूत्रस्य सर्वार्थसिद्धिटीकयानुप्राणितो वर्तते। ४. दुःखौघं क०। ५. तत्र स्थावर-म०।

कनीयान् जिनदत्तस्तां बन्धुवाक्योपरोधतः[1] । परिणीयापि तत्याज दुर्गन्धामतिदूरतः ॥१२१॥
आत्मानमपि निन्दन्ती सोपवासान्यदा च सा । क्षान्तार्यामार्यिकायुक्तां भोजयित्वातिभक्तितः ॥१२२॥
अभिवन्द्य तदापृच्छदार्यिके केन हेतुना । इमे परमरूपिण्यौ स्थिते तपसि दुष्करे ॥१२३॥
सेति पृष्टा जगौ हेतुमार्ययोस्तपसस्तयोः । प्रबोधनाय तस्याश्च करुणापरिनोदिता ॥१२४॥
श्रूयतां सुकुमारि द्वे सुकुमारकुमारिके । हेतुना येन तापस्ये तपस्विन्यौ व्यवस्थिते ॥१२५॥
सौधर्माधिपतेर्देव्याविमे पूर्वत्र जन्मनि । विमला सुप्रभा चेति सुप्रसिद्धे बभूवतुः ॥१२६॥
ते नन्दीश्वरयात्रायां जिनपूजार्थमागते । कथञ्चिज्जातसंवेगे चित्तान्तरमिति श्रिते ॥१२७॥
मनुष्यभवसंप्राप्तौ करिष्यावो महत्तपः । आवां स्त्रीत्वनिमित्तं तु येन दुःखं न दृश्यते ॥१२८॥
इति संगीर्य ते देव्यौ दिवः प्रच्युत्य भूपतेः । श्रीषेणस्येह साकेते श्रीकान्तायां सुयोषिति ॥१२९॥
हरिषेणा सुता ज्येष्ठा श्रीषेणा च कनीयसी । जाते जाते च कान्ते ते यौवनश्रीविभूषिते ॥१३०॥
स्वयंवरविधौ स्मृत्वा पूर्वं जन्म च संगरम् । बन्धुलोकं परित्यज्य कुमार्यौ तपसि स्थिते ॥१३१॥
इति श्रुत्वार्यिकावाक्यं निर्विण्णा सुकुमारिका । तदन्ते सा प्रवव्राज संसारभयवेदिनी ॥१३२॥
तपस्विनीभिरन्याभिस्तपस्यन्ती तपस्विनी । कालं नीतवती नीत्या तपसा शोषिताङ्गिका ॥१३३॥

करना चाहा पर उसे वह स्वीकृत नहीं था इसलिए वह उस कन्याको छोड़ सुव्रत मुनिके समीप दीक्षित हो गया ॥ १२० ॥ बन्धुजनोंके उपरोधसे छोटे भाई जिनदत्तने यद्यपि उसके साथ विवाह कर लिया परन्तु दुर्गन्धके कारण उसे दूरसे ही छोड़ दिया ॥ १२१ ॥ इस घटनासे सुकुमारिकाने अपनी बहुत निन्दा की। एक दिन उसने उपवास किया तथा अनेक आर्यिकाओं-से युक्त क्षान्ता नामकी आर्यिकाको बड़ी भक्तिसे भोजन कराया ॥ १२२ ॥ क्षान्ता आर्यिकाके साथ दो आर्यिकाएँ परम रूपवती तथा कठिन तपन तपनेवाली थीं उन्हें देख उसने क्षान्ता आर्याको नमस्कार कर उनसे पूछा कि हे आर्ये ! ये दो रूपवती आर्यिकाएँ कठिन तपमें किस कारण स्थित हैं ? ॥ १२३ ॥ इस प्रकार पूछे जानेपर दयासे प्रेरित क्षान्ता आर्याने सुकुमा-रिकाको सम्बोधन करनेके लिए उन दो आर्यिकाओंके तपका कारण कहा ॥१२४॥ उन्होंने कहना प्रारम्भ किया—कि हे सुकुमारि ! सुन, ये सुकुमार कुमारिकाएँ जिस कारण तपस्विनी बनकर तप करनेमें लगी हुई हैं ॥ १२५ ॥

ये दोनों पूर्व भवमें सौधर्म स्वर्गके इन्द्रकी विमला और सुप्रभा नामकी देवियाँ थीं ॥ १२६ ॥ एक दिन ये नन्दीश्वर पर्वकी यात्रामें जिनपूजाके लिए आयी थीं कि किसी कारण संसारसे विरक्त हो चित्तमें इस प्रकारका विचार करने लगीं कि यदि हम मनुष्यभवको प्राप्त हों तो महातप करेंगी। ऐसा महातप कि जिससे फिर यह स्त्री-पर्यायसम्बन्धी दुख दिखायी नहीं देगा ॥ १२७-१२८ ॥ इस प्रकार प्रतिज्ञा कर वे देवियाँ स्वर्गसे च्युत हुईं और यहाँ अयोध्या नगरीके राजा श्रीषेणकी श्रीकान्ता नामक स्त्रीसे हरिषेणा नामकी बड़ी और श्रीषेणा नामकी छोटी पुत्री हुईं। समय पाकर ये दोनों ही रूपवती और यौवनरूपी लक्ष्मीसे सुशो-भित हो गयीं ॥ १२९-१३० ॥ इन दोनों कुमारियोंका स्वयंवर हो रहा था कि उसी समय इन्हें अपने पूर्व जन्म तथा की हुई प्रतिज्ञाका स्मरण हो आया जिससे ये बन्धुजनोंको छोड़ तत्काल तप करने लगीं ॥ १३१ ॥

क्षान्ता आर्यिकाके उक्त वचन सुन सुकुमारिका भी विरक्त हो गयी और संसारसे भयभीत हो उन्हींके समीप दीक्षित हो गयी ॥१३२॥ अन्य तपस्विनियोंके साथ तप करती हुई

१.-रोधनः म० ।

वसन्तसेनां गणिकां कामुकैः परिवेष्टिताम् । दृष्ट्वा वनविहारेऽसावेकदा क्रीडनोद्यताम् ॥१३४॥
निदानमकरोत्क्लिष्टा दुर्यशःप्राप्तिकारणम् । सौभाग्यमीदृशं मेऽन्यजन्मन्यस्त्विति सादरा ॥१३५॥
स्वभर्तुः सोमभूतेस्तु मृत्वाभूदारणाच्युते । देवी सा पञ्चपञ्चाशत्पल्यतुल्यनिजस्थितिः ॥१३६॥
च्युत्वा ते पाण्डुराजस्य सोमदत्तादयस्त्रयः । कुन्त्यां युधिष्ठिरो भीमः पार्थश्चेत्यभवन्[2] सुताः ॥१३७॥
धनश्रीपूर्वको देवो मित्रश्रीपूर्वकस्तथा । नकुलः सहदेवश्च मद्र्यां जातौ शरीरजौ ॥१३८॥
सा कुमारी दिवश्च्युत्वा द्रुपदस्य शरीरजा । जाता दृढरथाख्यायां स्त्रियां द्रौपद्यभिख्यया ॥१३९॥
द्रौपद्यर्जुनयोर्योगः पूर्वस्नेहेन साम्प्रतम् । सुव्यक्तं साम्प्रतं जातो राधावेधपुरस्सरः ॥१४०॥
ज्येष्ठानां भविता सिद्धिस्त्रयाणामिह जन्मनि । सर्वार्थसिद्धिर्हि तयोरन्त्यपाण्डवयोरिह ॥१४१॥
सम्यग्दर्शनशुद्धाया द्रौपद्यास्तपसः [3]फलात् । आरणाच्युतदेवत्वपूर्विका सिद्धिरिष्यते ॥१४२॥
इत्थं ते पाण्डवाः श्रुत्वा धर्मं पूर्वभवांस्तथा । संवेगिनो जिनस्यान्ते संयमं प्रतिपेदिरे ॥१४३॥
कुन्ती च द्रौपदी देवी सुभद्राद्याश्च योषितः । राजीमत्याः समीपे ताः समस्तास्तपसि स्थिताः ॥१४४॥
ज्ञानदर्शनचारित्रैर्व्रतैः समितिगुप्तिभिः । आत्मानं भावयन्तस्ते पाण्डवाद्यास्तपोऽचरन् ॥१४५॥

शार्दूलविक्रीडितम्

[4]कुन्ताग्रेण वितीर्णभैक्ष्यनियमः क्षुत्क्षामगात्रैः क्षमः
षण्मासैरथ भीमसेनमुनिपो[6] निष्ठाप्य स्वान्तक्लमम्[7] ।

वह समय व्यतीत करने लगी। नीतिपूर्वक—आगमानुकूल तप करनेसे उसका शरीर सूख गया ॥ १३३ ॥

एक दिन उसी गाँवकी गणिका वसन्तसेना कामीजनोंसे वेष्टित हो वन-विहारके लिए आयी। क्रीड़ा करनेमें उद्यत उस गणिकाको देखकर आर्यिका सुकुमारिकाने क्लिष्ट परिणामोंसे युक्त हो बड़े आदरसे अपयशकी प्राप्तिमें कारणभूत यह निदान किया कि अन्य जन्ममें मुझे भी ऐसा सौभाग्य प्राप्त हो ॥ १३४-१३५ ॥ आयुके अन्तमें मरकर वह आरणाच्युत युगलमें अपने पूर्व भवके पति सोमभूति देवकी पचपन पल्यकी आयुवाली देवी हुई ॥ १३६ ॥ सोमदत्त आदि तीनों भाइयोंके जीव स्वर्गसे च्युत हो पाण्डु राजाकी कुन्ती नामक स्त्रीमें युधिष्ठिर, भीम और अर्जुन नामक पुत्र हुए ॥ १३७ ॥ और धनश्री तथा मित्रश्रीके जीव देव भी उन्हीं पाण्डु राजाकी माद्री नामक दूसरी स्त्रीसे नकुल और सहदेव नामक पुत्र हुए ॥ १३८ ॥ सुकुमारिकाका जीव भी स्वर्गसे च्युत हो राजा द्रुपदकी दृढरथा नामक स्त्रीसे द्रौपदी नामकी पुत्री हुई ॥१३९॥ पूर्व भवके स्नेहके कारण इस भवमें भी राधावेध पूर्वक द्रौपदी और अर्जुनका संयोग हुआ है ॥ १४० ॥ तीन ज्येष्ठ पाण्डव—युधिष्ठिर, भीम और अर्जुन इसी जन्ममें मोक्षको प्राप्त होंगे और अन्तिम दो पाण्डव—नकुल और सहदेवको सर्वार्थसिद्धि प्राप्त होगी ॥ १४१ ॥ सम्यग्दर्शनसे शुद्ध द्रौपदी तपके फलस्वरूप आरणाच्युत युगलमें देव होगी और उसके बाद मनुष्यपर्याय रख मोक्ष जायेगी ॥ १४२ ॥

इस प्रकार वे पाण्डवधर्म तथा पूर्व भव श्रवण कर संसारसे विरक्त हो श्री नेमि जिनेन्द्रके समीप संयमको प्राप्त हो गये ॥ १४३ ॥ कुन्ती, द्रौपदी तथा सुभद्रा आदि जो स्त्रियाँ थीं वे सब राजीमती आर्यिकाके समीप तपमें लीन हो गयीं ॥१४४॥ सम्यग्दर्शन, सम्यग्ज्ञान, सम्यक्चारित्र, महाव्रत, समिति तथा गुप्तियोंसे अपनी आत्माके स्वरूपका चिन्तवन करते हुए वे पाण्डव आदि तप करने लगे ॥१४५॥ उन सब मुनियोंमें भीमसेन मुनि बहुत ही शक्तिशाली

१. मेऽन्ये जन्मन्यस्त्विति म० । २. -श्चाभवत्सुताः म० । ३. क्रमात् म० । ४. कुन्त्यग्रेण म०, ख० । ५. क्षुत्क्षामगात्रत्रयः क० । ६. मुनिपो इति पाठः प्रतिभाति । मुनिभिर्निष्ठाप्य क०, ख०, ङ०, म० । ७. स्वान्तकर्म म०, ङ०, सान्तकर्म क० ।

षष्ठाद्यैरुपवासभेदविधिभिर्निष्ठाभिमुख्यैः स्थितै-
ज्येष्ठाद्यैर्विजहार योगिभिरिलां जैनागमाम्भोधिभिः ॥१४६॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ युधिष्ठिरादिपञ्चपाण्डवप्रव्रज्यावर्णनो नाम चतुःषष्टितमः सर्गः ॥६४॥

थे। उन्होंने भालेके अग्रभागसे दिये हुए आहारको ग्रहण करनेका नियम लिया था, क्षुधासे उनका शरीर अत्यन्त दुर्बल हो गया था और छह महीनेमें उन्होंने इस वृत्ति परिसंख्यात तप-को पूरा कर हृदयका श्रम दूर किया था। युधिष्ठिर आदि मुनियोंने भी बड़ी श्रद्धाके साथ वेला तेला आदि उपवास किये थे। इस प्रकार मुनिराज भीमसेनने जैनागमके सागर युधिष्ठिर आदि मुनियोंके साथ पृथिवीपर विहार किया ॥ १४६ ॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्यरचित हरिवंशपुराणमें युधिष्ठिर आदि पाँच पाण्डवोंकी दीक्षाका वर्णन करनेवाला चौसठवाँ सर्ग समाप्त हुआ ॥६४॥

पञ्चषष्टितमः सर्गः

अथ सर्वामराकीर्णस्तीर्थकृत्कृतदेशनः । उत्तरापथतो देशं सुराष्ट्रमभितो ययौ ॥१॥
उत्तरायणमुत्क्रम्य दक्षिणायनमागते । जिनार्के तेजसो वृत्तिः प्राग्वत्सर्वत्रगाभवत् ॥२॥
आर्हन्त्यविभवोपेते महीं विहरतीश्वरे । दक्षिणां दक्षिणा देशा रेजिरे[1] स्वर्गविभ्रमाः ॥३॥
तत्रोर्जयन्तमन्तेऽसावन्तकल्याणभूतिभाक् । आरुरोह स्वभावेन नृसुरासुरसेवितः ॥४॥
पूर्ववत्समवस्थानभूमिस्तत्राभवत्प्रभोः । तिर्यग्मानवदेवौघैरनघैः समधिष्ठिता ॥५॥
धर्मं तत्र जिनोऽवोचद्रत्नत्रितयपावनम् । स्वर्गापवर्गसौख्यैकसाधनं साधुसम्मतम् ॥६॥
निषद्यायां यथाद्यायां पूर्वं सर्वहितो जिनः । अन्त्यायां च तथा धर्मं स सविस्तरमब्रवीत् ॥७॥
ऊर्ध्वज्वलनमुष्णत्वं यथाग्नेः शीततात्यपाम् । जवनं मरुतस्तिर्यग्भास्वरत्वं च तेजसः ॥८॥
अमूर्तत्वं यथा व्योम्नः स्वभावाद्धारणं[2] क्षितेः । कृतार्थस्य जिनेन्द्रस्य तथा धर्मस्य देशनम् ॥९॥
अघातिकर्मणामन्तं ततो योगनिरोधकृत् । कृत्वानेकशतैः सिद्धिं जिनेन्द्रो मुनिभिर्ययौ ॥१०॥
परिनिर्वाणकल्याणपूजामन्त्यशरीरगाम् । चतुर्विधसुरा जैनीं चक्रुः शक्रपुरोगमाः ॥११॥

अथानन्तर समस्त देवोंसे युक्त भगवान् नेमिनाथ उपदेश करते हुए उत्तरापथसे सुराष्ट्र देशकी ओर आये ॥१॥ जिनेन्द्ररूपी सूर्य यद्यपि उत्तरायणको उल्लङ्घन कर दक्षिणायनको प्राप्त हुए थे तथापि उनके तेजकी वृत्ति पहले ही-के समान सर्वत्र व्याप्त थी ॥ भावार्थ—जब सूर्य उत्तरायणसे दक्षिणायनकी ओर आता है तब उसका तेज कुछ कम हो जाता है परन्तु नेमि-जिनेन्द्ररूपी सूर्यका तेज उत्तरायण—उत्तर दिशासे दक्षिणायन—दक्षिण दिशामें आनेपर भी कम नहीं हुआ था, पहले ही के समान सर्वत्र व्याप्त था ॥२॥ समवसरणकी विभूतिसे युक्त नेमिजिनेन्द्र जब दक्षिण दिशामें विहार करते थे तब वहाँके देश स्वर्गके समान सुशोभित हो रहे थे ॥३॥ तदनन्तर जब अन्तिम समय आया तब निर्वाणकल्याणककी विभूतिको प्राप्त होनेवाले नेमिजिनेन्द्र मनुष्य, सुर और असुरोंसे सेवित होते हुए अपने-आप गिरनार पर्वत-पर आरूढ हो गये ॥४॥ वहाँ पहले ही के समान फिरसे कलुषतारहित तिर्यञ्च मनुष्य और देवोंके समूहसे युक्त समवसरणकी रचना हो गयी ॥५॥ समवसरणके बीच विराजमान होकर जिनेन्द्र भगवान्ने स्वर्ग और मोक्षकी प्राप्तिका एक साधन, रत्नत्रयसे पवित्र एवं साधुसंयत धर्मका उपदेश दिया ॥६॥ जिस प्रकार सर्वहितकारी जिनेन्द्र भगवान्ने केवल-ज्ञान उत्पन्न होनेके बाद पहली बैठकमें विस्तारके साथ धर्मका उपदेश दिया था उसी प्रकार अन्तिम बैठकमें भी उन्होंने विस्तारके साथ धर्मका उपदेश दिया ॥७॥ जिस प्रकार अग्निमें ऊर्ध्वज्वलन और उष्णता, पानीमें शीतलता, वायुमें वेग, सूर्य चन्द्र आदि तेजस्वी पदार्थोंमें सब ओरसे प्रकाशमानता, आकाशमें अमूर्तिकपना और पृथिवीमें किसी पदार्थको धारण करनेकी क्षमता स्वभावसे ही होती है, उसी प्रकार कृतकृत्य जिनेन्द्र भगवान्का धर्मोपदेश भी स्वभावसे होता था किसीकी प्रेरणासे नहीं ॥८-९॥ तदनन्तर योगनिरोध करनेवाले भगवान् नेमिजिनेन्द्र अघातिया कर्मोंका अन्त कर अनेक सौ मुनियोंके साथ निर्वाण धामको प्राप्त हो गये ॥१०॥ जिनके आगे-आगे इन्द्र चल रहे थे ऐसे चारों निकायके देवोंने, भगवान्के

---

१. भ्रेजिरे क०, भेजिरे म० । २. स्वभावाद्धारणं म० ।

गन्धपुष्पादिभिर्दिव्यैः पूजितास्तनवः क्षणात् । जैनाद्या द्योतयन्त्यो द्यां विलीना विद्युतो यथा ॥१२॥
स्वभावोऽयं जिनादीनां शरीरपरमाणवः । मुञ्चति स्कन्धतामन्ते क्षणात्क्षणरुचामिव ॥१३॥
ऊर्जयन्तगिरौ वज्री वज्रेणालिख्य [1]पाविनीम् । लोके सिद्धिशिलां चक्रे जिनलक्षणपङ्क्तिभिः ॥१४॥
वरदत्तादिसंघं च वन्दित्वा वासवादयः । देवा नृपतयश्चापि ययुः सर्वे यथायथम् ॥१५॥
दशार्हाद्यो मुनयः षट्सहोदरसंयुताः । सिद्धिं प्राप्तास्तथान्येऽपि शम्बप्रद्युम्नपूर्वकाः ॥१६॥
ऊर्जयन्तादिनिर्वाणस्थानानि भुवने ततः । तीर्थयात्रागतानेकभव्यसेव्यानि रेजिरे ॥१७॥
ज्ञात्वा भगवतः सिद्धिं पञ्च पाण्डवसाधवः । शत्रुञ्जयगिरौ धीराः प्रतिमायोगिनः स्थिताः ॥१८॥
दुर्योधनान्वयस्तत्र स्थितो [3]क्षुयवरोधनः । श्रुत्वागत्याकरोद्वैरादुपसर्गं सुदुस्सहम् ॥१९॥
तप्तायोमयमूर्तीनि मुकुटानि ज्वलन्त्यलम् । कटकैः कटिसूत्रादि तन्मूर्धादिष्वयोजयत् ॥२०॥
रौद्रं दाहोपसर्गं ते मेनिरे हिमशीतलम् । वीराः कर्मविपाकज्ञाः कर्मक्षयकृतौ क्षमाः ॥२१॥
शुक्लध्यानसमाविष्टा भीमार्जुनयुधिष्ठिराः । कृत्वाष्टविधकर्मान्तं मोक्षं जग्मुस्त्रयोऽक्षयम् ॥२२॥
नकुलः सहदेवश्च ज्येष्ठदाहं निरीक्ष्य तौ । [4]अनाकुलितचेतस्कौ जातौ सर्वार्थसिद्धिजौ ॥२३॥

अन्तिम शरीरसे सम्बन्ध रखनेवाली निर्वाणकल्याणककी पूजा की ॥११॥ दिव्य गन्ध तथा पुष्प आदिसे पूजित, तीर्थंकर आदि मोक्षगामी जीवोंके शरीर, क्षण-भरमें बिजलीकी नाईं आकाशको देदीप्यमान करते हुए विलीन हो गये ॥१२॥ क्योंकि यह स्वभाव है कि तीर्थङ्कर आदिके शरीरके परमाणु अन्तिम समय बिजलीके समान क्षण-भरमें स्कन्धपर्यायको छोड़ देते हैं ॥१३॥ गिरनार पर्वतपर इन्द्रने वज्रसे उकेरकर इस लोकमें पवित्र सिद्धशिलाका निर्माण किया तथा उसे जिनेन्द्र भगवान्के लक्षणोंके समूहसे युक्त किया ॥१४॥ तदनन्तर वरदत्त आदि मुनियोंके संघकी वन्दना कर इन्द्रादि देव और राजा लोग सब यथायोग्य अपने-अपने स्थान-पर चले गये ॥१५॥ समुद्रविजय आदि नौ भाई, देवकीके युगलिया छह पुत्र तथा शंब और प्रद्युम्नकुमार आदि अन्य मुनि भी गिरनार पर्वतसे मोक्षको प्राप्त हुए। इसलिए उस समयसे गिरनार आदि निर्वाण स्थान संसारमें विख्यात हुए और तीर्थयात्राके लिए आनेवाले अनेक भव्य जीवोंके द्वारा सेवित होते हुए सुशोभित होने लगे ॥१६-१७॥

धीर-वीर पाँचों पाण्डव मुनि, भगवान्को मोक्ष हुआ जान शत्रुञ्जय पर्वतपर प्रतिमा-योगसे विराजमान हो गये ॥१८॥ उस समय वहाँ दुर्योधनके वंशका क्षुयवरोधन नामका कोई पुरुष रहता था। ज्यों ही उसने वहाँ पाण्डवोंका आना सुना त्यों ही आकर उसने वैर वश उनपर घोर उपसर्ग करना शुरू कर दिया ॥१९॥ उसने तपाये हुए लोहेके मुकुट, कड़े तथा कटिसूत्र आदि बनवाये और उन्हें अग्निमें अत्यन्त प्रज्वलित कर उनके मस्तक आदि स्थानोंमें पहिनाये ॥२०॥ पाण्डव मुनिराज अत्यन्त धीर-वीर थे, कर्मके उदयको जाननेवाले थे एवं कर्मोंका क्षय करनेमें समर्थ थे, इसलिए उन्होंने दाहके उस भयंकर उपसर्गको हिमके समान शीतल समझा था ॥२१॥ भीम, अर्जुन और युधिष्ठिर ये तीन मुनिराज तो शुक्ल-ध्यानसे युक्त हो आठों कर्मोंका क्षय कर मोक्ष गये परन्तु नकुल और सहदेव बड़े भाईकी दाहको देख कुछ-कुछ आकुलितचित्त हो गये इसलिए सर्वार्थसिद्धिमें उत्पन्न हुए ॥२२-२३॥

---

१. पावनीं ख०, पावनं म० । २. युक्तिभिः म०, घ० । ३. युधवरोधनः घ०,म० । ४. ईषदाकुलितं चेतो ययोस्तौ ईषदर्थे नञ्प्रयोगः ।

नारदोऽपि नरश्रेष्ठः प्रव्रज्य तपसो बलात् । कृत्वा भवक्षयं मोक्षमक्षयं समुपेयिवान्[1] ॥२४॥
अन्येऽपि बहवो भव्याः सुरत्नत्रयधारिणः । मोक्षं प्राप्ताः परे स्वर्गमासन्नभवसंक्षयाः[2] ॥२५॥
तुङ्गिकाशिखरारूढो बलदेवोऽपि दुष्करम् । तपो नानाविधं चक्रे भवचक्रक्षयोद्यतः ॥२६॥
एकद्वित्र्यादिषण्मासपर्यन्तोपोषितैरसौ । कषायवपुषां चक्रे शोषणं पोषणं धृतेः ॥२७॥
कान्तारभिक्षया प्राणधारणां कर्तुमुद्यतः । भ्रमन् कान्तारमध्येऽन्यैर्व्यलोकि शशिविभ्रमः ॥२८॥
पुरग्रामादिषु ख्यातां श्रुत्वा वार्तां तथाविधाम् । पर्यन्तवासिनो भूपाः प्राप्ताः क्षुभितमानसाः ॥२९॥
शङ्काविषसमापन्नान्नानाप्रहरणाश्रितान् । सिद्धार्थस्तान् तथालोक्य सृष्टवान् सिंहसन्ततिम् ॥३०॥
मुनिपादसमीपे तान् सिंहानालोक्य भूभृतः । ते ज्ञातमुनिसामर्थ्याः प्रणम्योपशमं ययुः ॥३१॥
ततः प्रभृत्यसौ लोके नरसिंह इति श्रुतिम् । सिंहोरस्को हली प्राप्तः सिंहानुचरसंयतः ॥३२॥
एकं वर्षशतं कृत्वा तपो हलधरो मुनिः । समाराध्य परिप्राप्तो ब्रह्मलोके सुरेशताम् ॥३३॥
तत्र पद्मोत्तरे नाम्नि विमाने रत्नभास्वरे । देवदेवीगणाकीर्णे प्रासादोद्यानमण्डिते ॥३४॥

मनुष्योंमें श्रेष्ठ नारद भी दीक्षा ले तपके बलसे संसारका क्षय कर अविनाशी मोक्षको प्राप्त हुए ॥२४॥ समीचीन रत्नत्रयको धारण करनेवाले अन्य अनेक भव्य जीव भी मोक्षको प्राप्त हुए तथा निकट कालमें जिनके संसारका क्षय होनेवाला था ऐसे कितने ही जीव स्वर्ग गये ॥२५॥

तुङ्गीगिरिकी शिखरपर स्थित बलदेवने भी संसार-चक्रका क्षय करनेमें उद्यत हो नाना प्रकारका तप किया ॥२६॥ वे एक दिन, दो दिन, तीन दिनको आदि लेकर छह माह तकके उपवासोंसे कषाय और शरीरका शोषण तथा धैर्यका पोषण करते थे ॥२७॥ वनमें मिलनेवाली भिक्षासे प्राण धारण करनेके लिए उद्यत बलदेव मुनिराज, वनमें विहार करने लगे और चन्द्रमाका भ्रम उत्पन्न करनेवाले उन मुनिराजको लोगोंने देखा ॥२८॥ 'बलदेव वनमें विहार कर रहे हैं' यह बात नगरों तथा गाँवोंमें फैल गयी उसे सुन समीपवर्ती राजा क्षुभितचित्त हो वहाँ आ पहुँचे ॥२९॥ शङ्कारूपी विषसे युक्त तथा नाना प्रकारके शस्त्रोंसे सुसज्जित उन राजाओंको जब देव सिद्धार्थने देखा तो उस वनमें उसने सिंहोंके समूह रच दिये ॥३०॥ जब उन आगत राजाओंने मुनिराजके चरणोंके समीप सिंहोंको देखा तब वे उनकी सामर्थ्य जान नमस्कार कर शान्त भावको प्राप्त हो गये ॥३१॥ उसी समयसे बलदेव मुनिराज लोकमें नर-सिंह इस प्रसिद्धिको प्राप्त हो गये। वे सिंहके समान चौड़े वक्षःस्थलसे सुशोभित थे तथा सिंहरूपी सेवकोंसे युक्त थे ॥३२॥ इस प्रकार एक-सौ वर्ष तक तप कर बलदेव मुनिराजने अन्तमें समाधि धारण की और उसके फलस्वरूप ब्रह्मलोकमें इन्द्रके पदको प्राप्त हुए ॥३३॥ वहाँ देव-देवियोंके समूहसे युक्त, महल और उद्यानोंसे सुशोभित तथा रत्नोंके समान देदीप्य-मान पद्म नामक विमानमें वे कोमल उपपाद शय्यापर उस प्रकार देव उत्पन्न हुए जिस प्रकार

---

१. नारदस्य मोक्षप्राप्तिरन्यदिगम्बरग्रन्थाद्विरुद्धा वर्तते, तेषु तस्य नरकगामित्वदर्शनात्। 'कलहप्पिया कदाइं धम्मरदा वासुदेवसमकाला। भव्वा णिरयगदिं ते हिंसादोसेण गच्छंति'। त्रिलोकसार गाथा ८३५॥ 'रुद्दावइ अइरुद्दा पावणिहाणा हवंमि सव्वे वे। कलहमहा जुज्झपिया अधोगया वासुदेवव्व' ॥१४७० त्रि० प्र० अथवा अत्र नारदपदेन वसुदेवस्य सोमश्रीस्त्रीसमुत्पन्नः पुत्रो ग्राह्यः-नारदो मरुदेवोऽपि सोमश्री-तनयौ वरौ। सर्ग ४८, श्लोक ५७ हरिवंशपुराणे। २. आसन्नभवसंख्यया म०।

मृदूपपादशय्यायामुदपादि बलोऽमरः । महामणिरिवोदाररत्नाकरमहाक्षितौ ॥३५॥
भाषामनःशरीराक्षप्राणाहारप्रसिद्धिभिः । षड्भिः पर्याप्तिभिः सद्यः पर्याप्तोऽभूत्सुरोत्तमः ॥३६॥
शयने सर्वतोभद्रे वस्त्राभरणभूषितः । विबुधः सुखनिद्रान्ते यथाऽत्र नवयौवनः ॥३७॥
विलोकमानमालोक्य शब्दैरमरयोषिताम् । सुराणामनुरक्तानामप्यसावभिनन्दितः ॥३८॥
चन्द्रादित्याधिकोदारप्रभावलयदेहभृत् । इति दध्यौ धृतध्यानः प्रमदापूर्णमानसः ॥३९॥
कोऽयं रम्यतमो देशः कोऽयं प्रमुदितो जनः । कोऽहं कात्र भवोऽयं मे धर्मः को वार्जितो मया ॥४०॥
बोधितः सुरमुख्यैः स सभवप्रत्ययावधिः । विवेद सहसा देवः पौर्वापर्यमशेषतः ॥४१॥
ज्ञातपूर्वभवाशेषबन्धुर्बन्धुहितोद्यतः । प्राप्ताभिषेककल्याणः स्वीकृतात्मपरिच्छदः ॥४२॥
अवधिज्ञातकृष्णश्च गत्वाऽसौ बालुकाप्रभाम् । दृष्ट्वाऽनुजं निजं देवो दुःखितं दुःखितोऽभवत् ॥४३॥
महाप्रभावसंपन्ने देवे तत्र तथास्थिते । शब्दगन्धरसस्पर्शाः शुभतामशुभा ययुः ॥४४॥
एह्येहि कृष्ण योऽहं ते भ्राता ज्येष्ठो हलायुधः । ब्रह्मलोकाधिपो भूत्वा त्वत्समीपमिहागतः ॥४५॥
इत्युक्त्वा तं समुद्धृत्य स्वर्लोकं नेतुमुद्यते । देवे तस्य व्यलीयन्त गात्राणि नवनीतवत् ॥४६॥
ततः कृष्णो जगौ देव भ्रातः किं व्यर्थचेष्टितैः । किन्न ज्ञातं यथा सर्वे जीवाः स्वकृतभोगिनः ॥४७॥
यद्येन यादृशं कर्म संसारे समुपार्जितम् । तत्तेन तादृशं भ्रातर्नियमादनुभूयते ॥४८॥

कि विशाल रत्नाकरकी महाभूमिमें महामणि उत्पन्न होता है ॥३५॥ वह उत्तम देव वहाँ शीघ्र ही आहार, शरीर, इन्द्रिय, श्वासोच्छ्वास, भाषा और मन इन छह पर्याप्तियोंसे पूर्ण हो गया ॥३६॥ नवयौवनसे युक्त एवं वस्त्राभरणसे विभूषित वह देव, सर्वतोभद्र नामक शय्यापर ऐसा उठकर बैठ गया जैसा मानो सुखनिद्रा पूर्ण होनेपर ही उठा हो ॥३७॥ जब इस देवने चारों ओर देखा तब अनुरागसे युक्त देवाङ्गनाओं और देवोंके शब्दोंने इसका अभिनन्दन किया ॥३८॥ चन्द्रमा और सूर्यसे भी अधिक उत्कृष्ट प्रभावलयसे युक्त शरीरको धारण करनेवाला वह देव, हर्षसे पूर्ण हृदय होता हुआ इस प्रकारका ध्यान करने लगा कि यह अत्यन्त सुन्दर देश कौन है ? ये हर्षसे भरे जन कौन हैं ? मैं कौन हूँ ? मेरा यहाँ कहाँ जन्म हुआ है ? और मैंने किस धर्मका संचय किया है ? ॥३९-४०॥

तदनन्तर मुख्य-मुख्य देवोंने उसे समझाया—सब वस्तुओंका परिचय दिया जिससे तथा भवप्रत्यय अवधिज्ञानसे युक्त हो उसने शीघ्र ही आगे-पीछेका सब वृत्तान्त जान लिया ॥ ४१ ॥ तदनन्तर जिसने पूर्वभवके सब बन्धुओंको जान लिया था, जो भाईका हित करनेमें उद्यत था, जिसे अभिषेकरूप कल्याण प्राप्त हुआ था, जिसने वस्त्राभूषणादि सब सामग्री प्राप्त की थी, और अवधिज्ञानसे जिसने कृष्णका समाचार जान लिया था ऐसा वह देव बालुकाप्रभा पृथिवीमें गया और अपने छोटे भाई कृष्णको दुःखी देख स्वयं बहुत दुःखी हुआ ॥ ४२-४३ ॥ महाप्रभावसे सम्पन्न वह देव जब वहाँ जाकर खड़ा हो गया तब वहाँके अशुभ शब्द गन्ध रस और शब्द शुभरूपताको प्राप्त हो गये ॥ ४४ ॥ वह कहने लगा कि हे कृष्ण ! आओ आओ, जो मैं तुम्हारा बड़ा भाई बलदेव था वही ब्रह्मलोकका अधिपति होकर यहाँ तुम्हारे पास आया हूँ ॥ ४५ ॥ यह कहकर वह देव ज्यों-ही कृष्णके जीवको उठाकर स्वर्गलोकमें ले जानेके लिए उद्यत हुआ त्यों-ही उसका शरीर मक्खनके समान गलकर विलीन हो गया ॥ ४६ ॥

तदनन्तर कृष्णने कहा कि हे देव ! हे भाई ! व्यर्थकी चेष्टाओंसे क्या लाभ है ? क्या आप यह नहीं जानते कि सब जीव अपने कियेका फल भोगते हैं ॥ ४७ ॥ संसारमें जिसने जैसा कर्म उपार्जन किया है, हे भाई ! नियमसे उसे वैसा ही फल भोगना पड़ता है ॥ ४८ ॥

शक्नुयुः सुखमाहर्तुं हर्तुं वा दुःखमङ्गिनाम् । देवा यदि ततो घ्नन्ति मृत्युदुःखं निजं न किम् ॥४९॥
भ्रातर्याहि ततः स्वर्गं भुङ्क्ष्व पुण्यफलं निजम् । आयुषोऽन्तेऽहमप्येमि मोक्षहेतुं मनुष्यताम् ॥५०॥
आवां तत्र तपः कृत्वा जिनशासनसेवया । मोक्षसौख्यमवाप्स्यावः कृत्वा कर्मपरिक्षयम् ॥५१॥
[1]आवां पुत्रादिसंयुक्तौ महाविभवसंगतौ । भारते दर्शयान्येषां विस्मयव्याप्तचेतसाम् ॥५२॥
शङ्खचक्रगदापाणिर्मदीयप्रतिमागृहैः । भारतं व्यापय क्षेत्रं मत्कीर्तिपरिवृद्धये ॥५३॥
इत्यादि वचनं तस्य प्रतिपद्य सुरेश्वरः । सम्यक्त्वे शुद्धिमाख्याप्य भारतं क्षेत्रमागतः ॥५४॥
भ्रातृस्नेहवशो देवो यथोद्दिष्टं स विष्णुना । चक्रे दिव्यविमानस्थे[2]चक्रिलाङ्गलदर्शनम् ॥५५॥
वासुदेवगृहैश्चक्रे नगरादिनिवेशितैः । विष्णुमोहमयं लोकं स्नेहात्किं वा न चेष्ट्यते ॥५६॥
ब्रह्मलोकं [3]समासाद्य कृतजैनमहामहः । विन्दन् सुरसुखं सोऽस्थात्सुरस्त्रीनिवहावृतः ॥५७॥

स्रग्धरा

उच्चैर्देशस्थितोऽपि प्रतिभयपतनं याति पातालमूलं
भुङ्क्ते नैवोपलब्धं विषयसुखरसं सारसंसारसारम् ।
स्नेहाधिक्यादधीतं स्मरति न तनुभृत्सेवते प्रत्यनीकं
धिक् धिक् स्वर्मोक्षसौख्यप्रतिघमतिघनस्नेहमोहं जनानाम् ॥५८॥

देव, यदि दूसरे प्राणियोंके लिए सुख देने और दुःख हरनेमें समर्थ हैं तो फिर अपना ही मृत्युरूपी दुःख क्यों नहीं नष्ट कर लेते हैं ॥ ४९ ॥ इसलिए भाई ! स्वर्गको जाओ और अपने पुण्यका फल भोगो। मैं भी आयुके अन्तमें मोक्षका कारण जो मनुष्यपर्याय है उसे प्राप्त करूँगा ॥ ५० ॥ हम दोनों उस मनुष्यपर्यायमें तप करेंगे और जिनशासनकी सेवासे कर्मोंका क्षय कर मोक्ष प्राप्त करेंगे ॥५१॥ हाँ, एक काम आप अवश्य करें कि 'भरत क्षेत्रमें हम दोनों-को लोग पुत्र आदिसे सहित तथा महावैभवसे युक्त देखें और हम लोगोंको देखकर दूसरोंके चित्त आश्चर्यसे व्याप्त हो जावें ॥ ५२ ॥ मेरी कीर्तिकी वृद्धिके लिए आप शङ्ख, चक्र तथा गदा हाथमें लिये मेरी प्रतिमाओंके मन्दिरोंसे समस्त भरत क्षेत्रको व्याप्त कर दें'। बलदेवका जीव देवेन्द्र कृष्णके पूर्वोक्त वचन स्वीकार कर तथा उसे सम्यग्दर्शनमें शुद्धता रखनेका उपदेश दे भरत क्षेत्र आया ॥ ५३-५४ ॥ भाईके स्नेहके वशीभूत हुए उस देवने कृष्णका कहा सब काम किया। उसने दिव्य विमानमें स्थित कृष्ण और बलदेवका सबको दर्शन कराया ॥ ५५ ॥ तथा नगर-ग्राम आदिमें बनवाये हुए कृष्णके मन्दिरोंसे संसारको कृष्णविषयक मोहसे तन्मय कर दिया सो ठीक ही है क्योंकि स्नेहसे क्या-क्या चेष्टा नहीं होती है ? ॥ ५६ ॥ तदनन्तर देवने ब्रह्मस्वर्ग जाकर जिनेन्द्र भगवान्‌की पूजा की और वहाँ वह स्त्रियोंके समूहसे आवृत हो देवों-के सुखका उपभोग करता हुआ रहने लगा ॥ ५७ ॥ गौतम स्वामी कहते हैं कि देखो स्नेहकी अधिकतासे यह जीव उच्च स्थानमें स्थित होता हुआ भी भयपूर्ण पातालके मूलमें जाता है, श्रेष्ठ संसारके सारभूत प्राप्त हुए विषयसुखका उपभोग नहीं करता है, पहले अध्ययन किये हुए शास्त्रका स्मरण नहीं रखता है और विपरीत काम करने लगता है इसलिए स्वर्ग और मोक्ष-

---

१. सम्यग्दृष्टिर्बद्धतीर्थंकरनाम प्रकृतिः कृष्णस्य जीवः, एवं मिथ्यात्ववर्धनं कार्यं कारयतीति विचित्रोऽय-मुल्लेखः प्रतिभाति । २. दिव्यविमानस्थं चक्रि म०, क०, ङ० । ३. समारुह्य क० ।

शार्दूलविक्रीडितम्

तीर्थे नेमिजिनस्य तत्र वहति व्यामोहविच्छेदने
संजाते वरदत्तनामनि मुनौ कैवल्यचक्षुष्मति ।
राजासौ हरिवंशसन्ततिधरो धीरो धरायाः सुतो
दध्रे राज्यधुरां धुरन्धरधराधीशश्रियं धारयन् ॥५९॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ भगवन्निर्वाणवर्णनो नाम पञ्चषष्टितमः सर्गः ॥६५॥

सुखके बाधक प्राणियोंके अत्यधिक स्नेहसम्बन्धी मोहको धिक्कार हो ॥५८॥ तदनन्तर मोहको नष्ट करनेवाले नेमिजिनेन्द्रके उस प्रचलित तीर्थमें वरदत्त नामक मुनिको केवलज्ञान हुआ और हरिवंशकी सन्ततिको धारण करनेवाला धीर वीर जरत्कुमार धुरन्धर राजलक्ष्मीकी रक्षा करता हुआ राज्यका भार सँभालने लगा ॥ ५९ ॥

इस प्रकार अरिष्टनेमि पुराणके संग्रहसे युक्त, जिनसेनाचार्य रचित हरिवंशपुराणमें भगवान् नेमिनाथके निर्वाणका वर्णन करनेवाला पैंसठवाँ सर्ग समाप्त हुआ ॥ ६५ ॥

षट्षष्टितमः सर्गः

वंशस्थवृत्तम्

प्रतापवश्याखिलराजके नृपे प्रशासति क्ष्मातलमुग्रशासने ।
जरत्कुमारे जनितादराः प्रजाः प्रकाममापुः प्रमदं धरातले ॥१॥
कलिङ्गराजस्य नृपस्य देहजा जरत्कुमारस्य वधूर्वधूत्तमा ।
सुखेन लेभे जगतः सुखावहं वसुध्वजं राजकुलध्वजं सुतम् ॥२॥
स तत्र यूनि व्यवसायिनि क्षितिं जरत्कुमारो हरिवंशशेखरे ।
निधाय यातस्तपसे वनं सतां कुलव्रतं तीव्रतपोनिषेवणम् ॥३॥
सुतोऽभवच्चन्द्र इव प्रजाप्रियो [1]वसुध्वजाख्यात्सुवसुर्वसूपमः ।
स भीमवर्मास्य कलिङ्गपालकस्तदन्वयेऽतीयुरनेकशो नृपाः ॥४॥
कपिष्टनामान्वयभूषणस्त्वभूदजातशत्रुस्तनयस्ततोऽभवत् ।
स शत्रुसेनोऽस्य जितारिरङ्गजस्तदङ्गजोऽयं जित[2]शत्रुरीश्वरः ॥५॥
भवान्न किं श्रेणिक वेत्ति भूपतिं नृपेन्द्रसिद्धार्थकनीयसीपतिम् ।
इमं प्रसिद्धं जितशत्रुमाख्यया प्रतापवन्तं जितशत्रुमण्डलम् ॥६॥
जिनेन्द्रवीरस्य समुद्भवोत्सवे तदागतः कुण्डपुरं सुहृत्परः ।
सुपूजितः कुण्डपुरस्य भूभृता नृपोऽयमाखण्डलतुल्यविक्रमः ॥७॥
यशोदयायां सुतया यशोदया पवित्रया वीरविवाहमङ्गलम् ।
अनेककन्यापरिवारयारुहत्समीक्षितुं तुङ्गमनोरथं तदा ॥८॥

तदनन्तर प्रतापके द्वारा समस्त राजाओंको वश करनेवाला, उग्रशासनका धारक राजा जरत्कुमार जब पृथिवीका शासन करने लगा तब उसके प्रति प्रजाने बहुत आदर किया और पृथिवीतलपर अधिक हर्ष प्राप्त किया ॥१॥ कलिङ्ग राजाकी पुत्री जरत्कुमारकी उत्तम पट्टरानी थी, उससे उसने जगत्‌को सुख देनेवाला एवं राजकुलकी ध्वजास्वरूप वसुध्वज नामका पुत्र प्राप्त किया ॥२॥ व्यवसायी तथा हरिवंशके शिरोमणि उस युवापर पृथिवीका भार रख जरत्कुमार तपके लिए वनको चला गया सो ठीक ही है क्योंकि तीव्र तपका सेवन करना सत्पुरुषोंका कुलव्रत है ॥३॥ वसुध्वजके चन्द्रमाके समान प्रजाको आनन्द देनेवाला कुबेरतुल्य सुवसु नामका पुत्र हुआ। सुवसुके कलिङ्ग देशकी रक्षा करनेवाला भीमवर्मा नामका पुत्र हुआ और उसके वंशमें अनेक राजा हुए ॥४॥ तदनन्तर उसी वंशका आभूषण कपिष्ट नामका राजा हुआ, उसके अजातशत्रु, अजातशत्रुके शत्रुसेन, शत्रुसेनके जितारि और जितारिके यह जित-शत्रु नामका पुत्र हुआ है ॥५॥ हे राजन् श्रेणिक ! क्या तुम इस जितशत्रुको नहीं जानते ? जिसके साथ भगवान् महावीरके पिता राजा सिद्धार्थकी छोटी बहिनका विवाह हुआ है, जो अत्यन्त प्रतापी और शत्रुओंके समूहको जीतनेवाला है ॥६॥ जब भगवान् महावीरका जन्मोत्सव हो रहा था तब यह कुण्डपुर आया था और कुण्डपुरके राजा सिद्धार्थने इन्द्रके तुल्य पराक्रमको धारण करनेवाले इस परम मित्रका अच्छा सत्कार किया था ॥७॥ इसकी यशोदया रानीसे उत्पन्न यशोदा नामकी पवित्र पुत्री थी। अनेक कन्याओंसे सहित उस

---

१. वसुध्वजाच्चासुवसु- म० । २. यन्त्रितशत्रु- म० ।

[1]स्थितेऽथ नाथे तपसि स्वयंभुवि प्रजातकैवल्यविशाललोचने ।
जगद्विभूत्यै विहरत्यपि क्षितिं क्षितिं विहाय स्थितवांस्तपस्ययम् ॥९॥
अमुष्य [2]जाताद्य तपोबलान्मुनेरवाप्तकैवल्यफला मनुष्यता ।
मनुष्यभावो हि महाफलं भवे भवेदयं प्राप्तफलस्तपःफलात् ॥१०॥
इतीरितेयं हरिवंशसत्कथा समासतः श्रेणिक लोकविश्रुता ।
त्रिषष्टिसंख्यानपुराणपद्धतिप्रदेशसम्बन्धवती श्रियेऽस्तु ते ॥११॥
[3]सुगौतमात्पुण्यपुराणपद्धतिं सपार्थिवैः श्रेणिकपार्थिवस्तदा ।
सुदृष्टिराकर्ण्य सकर्णतां गतो गतः पुरं [4]प्रीतमतिः कृतानतिः ॥१२॥
चतुर्णिकायामरखेचरादयो जिनं परीत्य प्रणिपत्य भक्तितः ।
यथायथं जग्मुरजन्मकाङ्क्षिणः प्रसिद्धसद्धर्मकथानुरागिणः ॥१३॥
विहृत्य पूज्योऽपि महीं [5]महीयसां महामुनिर्मोचितकर्मबन्धनः ।
इयाय मोक्षं जितशत्रुकेवली निरन्तसौख्यप्रतिबद्धमक्षयम् ॥१४॥
जिनेन्द्रवीरोऽपि विबोध्य सन्ततं समन्ततो भव्यसमूहसन्ततिम् ।
प्रपद्य पावानगरीं गरीयसीं मनोहरोद्यानवने तदीयके ॥१५॥
चतुर्थकालेऽर्धचतुर्थमासकैर्विहीनताविश्चतुरब्दशेषके ।
स कार्तिके स्वातिषु कृष्णभूतसुप्रभातसन्ध्यासमये स्वभावतः ॥१६॥

यशोदाका भगवान् महावीरके साथ विवाह-मङ्गल देखनेकी यह उत्कट अभिलाषा रखता था। परन्तु स्वयंभू भगवान् महावीर तपके लिए चले गये और केवलज्ञानरूपी विशाल नेत्र प्राप्त कर जगत्का कल्याण करनेके लिए पृथिवीपर विहार करने लगे, तब यह स्वयं भी पृथिवीको छोड़ तपमें लीन हो गया ॥८-९॥ आज मुनि जितशत्रुको तपके फलस्वरूप केवलज्ञान उत्पन्न हुआ है और उससे उनका मनुष्यपर्याय सार्थक हुआ है सो ठीक ही है, क्योंकि संसारमें मनुष्यपर्याय महाफलरूप तभी होता है जब वह तपके फलस्वरूप इस केवलज्ञानरूपी फलको प्राप्त कर लेता है ॥ १० ॥ गौतम स्वामी कहते हैं कि हे श्रेणिक ! मैंने यह लोकप्रसिद्ध तथा त्रेसठशलाका पुरुषोंके पुराणपद्धतिसे सम्बन्ध रखनेवाली हरिवंशकी कथा संक्षेपसे कही है सो तुझे लक्ष्मीकी प्राप्तिके लिए हो ॥११॥ सम्यग्दर्शनसे सुशोभित राजा श्रेणिक अनेक राजाओंके साथ गौतमगणधरसे इस पवित्र पुराणका वर्णन सुन अपने कानोंको सफल मानने लगा तथा नमस्कारकर प्रसन्न होता हुआ अपने नगरको चला गया ॥१२॥ मोक्षकी इच्छा रखनेवाले एवं प्रसिद्ध समीचीन धर्मकथाके अनुरागी चारों निकायके देव और विद्याधर जिनेन्द्र भगवान्को प्रदक्षिणा देकर तथा प्रणाम कर अपने-अपने स्थानोंपर चले गये ॥१३॥ बड़े-बड़े पुरुषोंके द्वारा पूज्य महामुनि जितशत्रु केवली भी पृथिवीपर विहार कर अन्तमें कर्मबन्धनसे रहित हो अनन्त सुखसे युक्त अविनाशी मोक्षपदको प्राप्त हुए ॥१४॥ भगवान् महावीर भी निरन्तर सब ओरके भव्यसमूहको संबोधकर पावानगरी पहुँचे और वहाँके 'मनोहरोद्यान' नामक वनमें विराजमान हो गये ॥१५॥ जब चतुर्थकालमें तीन वर्ष साढ़े आठ मास बाकी रहे तब स्वाति नक्षत्रमें कार्तिक अमावास्याके दिन प्रातःकालके समय स्वभावसे ही योग निरोध कर घातियाकर्मरूप ईन्धनके समान अघातियाकर्मोंको भी नष्ट कर बन्धनरहित हो संसारके प्राणियोंको

---

१. स्मितेऽथ म० । २. याताद्य क०, ख०, ङ०, म० । ३. सुगौतमायुष्यपुराण- म० । ४. स्फीतमतिः म०, महाप्रीतमतिः ख० । ५. महीयसीं क० ।

अघातिकर्माणि निरुद्धयोगको विधूय घातीन्धनवद्विबन्धनः ।
विबन्धनस्थानमवाप शङ्करो निरन्तरायोरुसुखानुबन्धनम् ॥१७॥
स पञ्चकल्याणमहामहेश्वरः प्रसिद्धनिर्वाणमहे चतुर्विधैः ।
शरीरपूजाविधिना विधानतः सुरैः समभ्यर्च्यत सिद्धशासनः ॥१८॥
ज्वलत्प्रदीपालिकया प्रवृद्धया सुरासुरैः दीपितया प्रदीप्तया ।
तदा स्म पावानगरी समन्ततः प्रदीपिताकाशतला प्रकाशते ॥१९॥
तथैव च श्रेणिकपूर्वभूभुजः[1] प्रकृत्य कल्याणमहं सहप्रजाः ।
प्रजग्मुरिन्द्राश्च सुरैर्यथायथं प्रयाचमाना जिनबोधिमर्थिनः ॥२०॥
ततस्तु लोकः प्रतिवर्षमादरात्प्रसिद्धदीपालिकयात्र भारते ।
समुद्यतः पूजयितुं जिनेश्वरं जिनेन्द्रनिर्वाणविभूतिभक्तिभाक् ॥२१॥
त्रयः क्रमात्केवलिनो जिनात्परे द्विषष्टिवर्षान्तरभाविनोऽभवन् ।
ततः परे पञ्च समस्तपूर्विणस्तपोधना वर्षशतान्तरं गताः ॥२२॥
त्र्यशीतिके वर्षशते तु[2] रूपयुक् दशैव गीता दशपूर्विणः शते ।
द्वये च विंशेऽङ्गभृतोऽपि पञ्च ते शते च साष्टादशके चतुर्मुनिः ॥२३॥
गुरुः सुभद्रो जयभद्रनामकः परो[3] यशोबाहुरनन्तरस्ततः ।
महार्हलोहार्यगुरुश्च ये दधुः प्रसिद्धमाचारमहाङ्गमत्र ते ॥२४॥

सुख उपजाते हुए निरन्तराय तथा विशाल सुखसे सहित निर्बन्ध—मोक्ष स्थानको प्राप्त हुए ॥१६—१७॥ गर्भादि पाँचों कल्याणकोंके महान् अधिपति, सिद्धशासन भगवान् महावीरके निर्वाण महोत्सवके समय चारों निकायके देवोंने विधिपूर्वक उनके शरीरकी पूजा की ॥१८॥ उस समय सुर और असुरोंके द्वारा जलायी हुई बहुत भारी देदीप्यमान दीपकोंकी पंक्तिसे पावानगरीका आकाश सब ओरसे जगमगा उठा ॥१९॥ श्रेणिक आदि राजाओंने भी प्रजाके साथ मिलकर भगवान्‌के निर्वाण कल्याणककी पूजा की। तदनन्तर बड़ी उत्सुकताके साथ जिनेन्द्र भगवान्‌के रत्नत्रयकी याचना करते हुए इन्द्र देवोंके साथ-साथ यथास्थान चले गये ॥ २० ॥ उस समयसे लेकर भगवान्‌के निर्वाणकल्याणकी भक्तिसे युक्त संसारके प्राणी इस भरतक्षेत्रमें प्रतिवर्ष आदरपूर्वक प्रसिद्ध दीपमालिकाके द्वारा भगवान् महावीरकी पूजा करनेके लिए उद्यत रहने लगे। भावार्थ—उन्हींकी स्मृतिमें दीपावलीका उत्सव मनाने लगे ॥२१॥

भगवान् महावीरके निर्वाणके बाद बासठ वर्षमें क्रमसे गौतम, सुधर्म और जम्बूस्वामी ये तीन केवली हुए। उनके बाद सौ वर्षमें समस्त पूर्वोंको जाननेवाले पाँच* श्रुतकेवली हुए ॥२२॥ तदनन्तर एक सौ तेरासी वर्षमें † ग्यारह मुनि दश पूर्वके धारक हुए। उनके बाद दो सौ बीस वर्षमें पाँच‡ मुनि ग्यारह अङ्गके धारी हुए। तदनन्तर एक सौ अठारह वर्षमें सुभद्रगुरु, जयभद्र, यशोबाहु और महापूज्य लोहार्यगुरु ये चार मुनि प्रसिद्ध आचाराङ्गके धारी हुए ॥२३—२४॥

१. पूर्वभूभृतः म० । २. एकाधिका दश एकादशेत्यर्थः । ३. जयभद्रनामा- म०, ख०, ङ०, म० ।

*. १ नन्दी, २ नन्दिमित्र, ३ अपराजित, ४ गोवर्द्धन और ५ भद्रबाहु । †. १ विशाख, २ प्रोष्ठिल, ३ क्षत्रिय, ४ जय, ५ नाग, ६ सिद्धार्थ, ७ धृतिषेण, ८ विजय, ९ बुद्धिल, १० गङ्गदेव और ११ सुधर्म । ‡. १ नक्षत्र, २ जयपाल, ३ पाण्डु, ४ ध्रुवसेन और ५. कंसार्य ।

महातपोभृद्विनयंधरः[1] श्रुतामृषिश्रुतिं गुप्तपदादिकां दधत् ।
मुनीश्वरोऽन्यः शिवगुप्तसंज्ञको गुणैः स्वमर्हद्बलिरप्यधात्पदम् ॥२५॥
स मन्दरार्योऽपि च मित्रवीरवि[2] गुरू तथान्यौ बलदेवमित्रकौ ।
विवर्धमानाय त्रिरत्नसंयुतः श्रियान्वितः सिंहबलश्च वीरवित् ॥२६॥
स पद्मसेनो गुणपद्मखण्डभृद् गुणाग्रणीर्व्याघ्रपदादिहस्तकः ।
स नागहस्ती जितदण्डनामभृत्सनन्दिषेणः प्रभुदीपसेनकः ॥२७॥
तपोधनः श्रीधरसेननामकः सुधर्मसेनोऽपि च सिंहसेनकः ।
सुनन्दिषेणेश्वरसेनकौ प्रभू सुनन्दिषेणाभयसेननामकौ ॥२८॥
स सिद्धसेनोऽभयभीमसेनकौ गुरू परौ तौ जिनशान्तिषेणकौ ।
अखण्डषट्खण्डमखण्डितस्थितिः[3] समस्तसिद्धान्तमधत्त योऽर्थतः ॥२९॥
दधार कर्मप्रकृतिं श्रुतिं च यो जिताक्षवृत्तिर्जयसेनसद्गुरुः ।
प्रसिद्धवैय्याकरणप्रभाववानशेषराद्धान्तसमुद्रपारगः ॥३०॥
तदीयशिष्योऽमितसेनसद्गुरुः पवित्रपुन्नाटगणाग्रणीगणी ।
जिनेन्द्रसच्छासनवत्सलात्मना तपोभृता वर्षशताधिजीविना ॥३१॥
सुशास्त्रदानेन वदान्यतामुना वदान्यमुख्येन भुवि प्रकाशिता ।
[4]यदग्रजो धर्मसहोदरः शमी समग्रधीर्धर्म इवात्तविग्रहः ॥३२॥
तपोमयीं कीर्तिमशेषदिक्षु यः क्षिपन् बभौ कीर्तितकीर्तिषेणकः ।

उनके बाद महातपस्वी विनयंधर, गुप्तश्रुति, गुप्तऋषि, मुनीश्वर शिवगुप्त, अर्हद्बलि, मन्दरार्य, मित्रवीरवि, बलदेव, मित्रक, बढ़ते हुए पुण्यसे सहित रत्नत्रयके धारक एवं ज्ञान-लक्ष्मीसे युक्त सिंहबल, वीरवित्, गुणरूपी कमलोंके समूहको धारण करनेवाले पद्मसेन, गुणोंसे श्रेष्ठ व्याघ्रहस्त, नागहस्ती, जितदण्ड, नन्दिषेण, स्वामी दीपसेन, तपोधन श्रीधरसेन, सुधर्मसेन, सिंहसेन, सुनन्दिषेण, ईश्वरसेन, सुनन्दिषेण, अभयसेन, सिद्धसेन, अभयसेन, भीमसेन, जिनसेन और शान्तिसेन आचार्य हुए। तदनन्तर जो अखण्ड मर्यादाके धारक होकर परिपूर्ण षट्खण्डों (१ जीवस्थान, २ क्षुद्रबन्ध, ३ बन्धस्वामी, ४ वेदनाखण्ड, ५ वर्गणाखण्ड और ६ महाबन्ध) से युक्त समस्त सिद्धान्तको अर्थरूपसे धारण करते थे अर्थात् षट्खण्डागमके ज्ञाता थे, कर्मप्रकृतिरूप श्रुतिके धारक थे और इन्द्रियोंकी वृत्तिको जीतनेवाले थे ऐसे जयसेन नामक गुरु हुए। उनके शिष्य अमितसेन गुरु हुए जो प्रसिद्ध वैयाकरण, प्रभावशाली और समस्त सिद्धान्तरूपी सागरके पारगामी थे। ये पवित्र पुन्नाट गणके अग्रणी—अग्रेसर आचार्य थे। जिनेन्द्र शासनके स्नेही, परमतपस्वी, सौ वर्षकी आयुके धारक एवं दाताओंमें मुख्य इन अमितसेन आचार्यने शास्त्रदानके द्वारा पृथिवीमें अपनी वदान्यता—दानशीलता प्रकट की थी। इन्हीं अमितसेनके अग्रज धर्मबन्धु कीर्तिषेण नामक मुनि थे जो बहुत ही शान्त थे, पूर्ण बुद्धिमान् थे, शरीरधारी धर्मके समान जान पड़ते थे और जो अपनी तपोमयी कीर्तिको समस्त दिशाओंमें प्रसरित कर रहे थे। उनका प्रथम शिष्य मैं जिनसेन हुआ। मोक्षके उत्कृष्ट सुखका उपभोग करनेवाले अरिष्टनेमि जिनेन्द्रकी भक्तिसे युक्त मुझ जिनसेन सूरिने अपने सामर्थ्यके अनुसार अल्पबुद्धिसे इस हरिवंशपुराणकी रचना की

---

१. विनयंधरश्रुतां म०, विनयंधरश्रुतीं ख० । २. मित्रवीरविं क०, ख०, ग०, ङ० । ३. षट्खण्ड-सुमण्डितस्थितिः म० । ४. तदग्रतो म० ।

तदग्रशिष्येण शिवाग्रसौख्यभागरिष्टनेमीश्वरभक्तिभाविना ।
स्वशक्तिभाजा जिनसेनसूरिणा धियाल्पयोक्ता हरिवंशपद्धतिः[1] ॥३३॥
यदत्र किञ्चिद्रचितं प्रमादतः परस्परव्याहति[2]दोषदूषितम् ।
तदप्रमादास्तु पुराणकोविदाः सृजन्तु जन्तुस्थितिशक्तिवेदिनः ॥३४॥
प्रशस्तवंशो हरिवंशपर्वतः क मे मतिः क्वाल्पतराल्पशक्तिका ।
अनेन पुण्यप्रभवस्तु केवलं जिनेन्द्रवंशस्तवनेन वाञ्छितः ॥३५॥
न काव्यबन्धव्यसनानुबन्धतो न कीर्तिसन्तानमहामनीषया ।
न काव्यवर्गेण न [3]चान्यवीक्षया जिनस्य भक्त्यैव कृता कृतिर्यथा ॥३६॥
जिनाश्चतुर्विंशतिरत्र कीर्तिताः सुकीर्तयो द्वादश चक्रवर्तिनः ।
नवत्रिधा सीरिहरिप्रतिद्विषस्त्रिषष्टिरित्थं पुरुषाः पुराणगाः ॥३७॥
अवान्तरेऽनेकशतानि पार्थिवा महीचरा व्योमचराश्च भूरिशः ।
क्षितौ चतुर्वर्गफलोपभोगिनः पुराणमुख्येऽत्र यशस्विनः स्तुताः ॥३८॥
अगण्यपुण्यं हरिवंश[4]कीर्तनाद्यदत्र गण्यं गुणसञ्चितं मया ।
फलादमुष्मान्नु मनुष्यलोकजा भवन्तु भव्या जिनशासनस्थिताः ॥३९॥
जिनस्य नेमेश्चरितं चराचरप्रसिद्धजीवादिपदार्थभासनम् ।
प्रवाच्यतां वाचकमुख्यसज्जनैः सभागतैः श्रोत्रपुटैः प्रपीयताम् ॥४०॥
जिनेन्द्रनामग्रहणं भवत्यलं ग्रहादिपीडापगमस्य कारणम् ।
प्रवाच्यमानं दुरितस्य दारणं सतां समस्तं चरितं किमुच्यते ॥४१॥

है ॥२५—३३॥ इस ग्रन्थमें मेरे द्वारा यदि कहीं प्रमादवश पूर्वापर विरोधसे युक्त रचना की गयी हो तो जीवोंकी स्थिति और सामर्थ्यके जाननेवाले पुराणोंके ज्ञाता विद्वान् प्रमादरहित हो उसे ठीक कर लें॥३४॥कहाँ तो यह उत्तम वंशों-कुलों (पक्षमें बाँसों) से युक्त यह हरिवंशरूपी पर्वत और कहाँ मेरी अत्यन्त अल्पशक्तिकी धारक क्षुद्रबुद्धि ? मैंने तो सिर्फ जिनेन्द्र भगवान्के वंशकी इस स्तुतिसे पुण्योत्पत्तिकी इच्छा की है॥३५॥मैंने इस ग्रन्थकी रचना न तो काव्यरचनाके व्यसनजन्य संस्कारसे की है, न कीर्तिसमूहकी बलवती इच्छासे की है, न काव्यके अभिमानसे की है, और न दूसरेकी देखा-देखीसे की है। किन्तु यह रचना मैंने मात्र जिनेन्द्र भगवान्की भक्तिसे की है ॥३६॥ इस ग्रन्थमें चौबीस तीर्थंकर, उत्तम कीर्तिके धारक बारह चक्रवर्ती, नौ बलभद्र, नौ नारायण और नौ प्रतिनारायण इन पुराणगामी त्रेशठ शलाका पुरुषोंका वर्णन किया गया है ॥३७॥ इनके सिवाय इस श्रेष्ठ पुराणमें बीच-बीचमें पृथिवीपर चतुर्वर्गके फलको भोगनेवाले सैकड़ों भूमिगोचरी और अनेकों यशस्वी विद्याधर राजाओंका वर्णन किया गया है ॥३८॥ हरिवंशका कथन करनेसे जो असंख्य पुण्यका सञ्चय हुआ है उसके फलस्वरूप मैं यही चाहता हूँ कि मनुष्यलोकमें उत्पन्न हुए भव्यजीव जिनशासनमें स्थित हों ॥३९॥ तथा त्रसस्थावरके भेदसे प्रसिद्ध जीव आदि पदार्थोंको प्रकाशित करनेवाले नेमिजिनेन्द्रके इस चरितको बाँचनेवाले मुख्य सज्जन बाँचे और सभामें आये हुए श्रोताजन अपने कर्णरूप पात्रोंसे इसका पान करें ॥४०॥ क्योंकि जिनेन्द्र भगवान्का मात्र नाम ग्रहण ही ग्रह-पिशाच आदिकी पीड़ाको दूर करनेका कारण है फिर सत्पुरुषोंके पापको दूर करनेवाला पूरा चरित

---

१. षट्पदवृत्तम् । २. व्याहृति क०, म०, ख० । ३. नवान्यदीर्ष्यया ख० । ४. हरिवंशकीर्तिता म०, ख०, ङ० ।

कुर्वन्तु व्याख्यानमनन्यचेतसः परोपकाराय स्वमुक्तिहेतवे ।
सुमङ्गलं मङ्गलकारिणामिदं निमित्तमप्युत्तममर्थिनां सताम् ॥४२॥
महोपसर्गे शरणं सुशान्तिकृत् सुशाकुनं शास्त्रमिदं जिनाश्रयम् ।
प्रशासनाः शासनदेवताश्च या [1]जिनाँश्चतुर्विंशतिमाश्रिताः सदा ॥४३॥
हिताः सतामप्रतिचक्रयान्विताः प्रयाचिताः सन्निहिता भवन्तु ताः ।
गृहीतचक्राप्रतिचक्रदेवता तथोर्जयन्तालयसिंहवाहिनी ।
शिवाय यस्मिन्निह सन्निधीयते क्व तत्र विघ्नाः प्रभवन्ति शासने[2] ॥४४॥
ग्रहोरगा भूतपिशाचराक्षसा हितप्रवृत्तौ [3]जनविघ्नकारिणः ।
जिनेशिनां शासनदेवतागणै[4]प्रभावशक्त्याथ[5] शमं श्रयन्ति ते ॥४५॥
प्रकामसाकाङ्क्षितकामसिद्धयः प्रसिद्धधर्मार्थविमोक्षलब्धयः ।
भवन्ति तेषां स्फुटमल्पयत्नतः पठन्ति भक्त्या हरिवंशमत्र ये ॥४६॥
निवार्य मात्सर्यमवार्यवीर्यया धिया सुधैर्योर्जितया जिनादराः ।
अनार्यवर्याः सहिताः सपर्यया पुराणमार्याः [6]प्रथयन्तु विष्टपे ॥४७॥
किं मेऽथवा प्रार्थनया यतस्ततः स्वभावतो विश्वभरक्षमाविदः ।
पयोधरोन्मुक्तमिवाम्बु भूधरा विधाय मूर्ध्नि [7]प्रथयन्तु भूतले ॥४८॥

यदि बाँचा जायेगा तो उसके फलका तो कहना ही क्या है ? ॥ ४१ ॥ विद्वज्जन एकाग्रचित्त होकर दूसरोंके उपकारके लिए और अपने-आपकी मुक्तिके लिए इस ग्रन्थका व्याख्यान करें। यह ग्रन्थ मङ्गल करनेवालोंके लिए उत्तम मङ्गलरूप है तथा मङ्गलकी इच्छा रखनेवाले सत्पुरुषोंके लिए मङ्गलका उत्तम निमित्त भी है ॥४२॥ जिनेन्द्र भगवान्‌का वर्णन करनेवाला यह शास्त्र महान् उपसर्गके आनेपर रक्षा करनेवाला है, उत्तम शान्तिका दाता है और उत्तम शकुन रूप है, अप्रतिचक्रदेवतासे सहित, सज्जनोंके हितैषी जो शासनदेव और शासनदेवियाँ सदा चौबीस तीर्थङ्करोंकी सेवा करती हैं उनसे भी मैं याचना करता हूँ कि वे सदा जिनशासनके निकट रहें। चक्ररत्नको धारण करनेवाली अप्रतिचक्रदेवता तथा गिरिनार पर्वतपर निवास करनेवाली सिंहवाहिनी—अम्बिकादेवी, जिस जिन-शासनमें सदा कल्याणके लिए सन्निहित—निकट रहती हैं उस जिनशासनपर विघ्न अपना प्रभाव कहाँ जमा सकते हैं ? ॥ ४३-४४ ॥ हितके कार्यमें मनुष्योंको विघ्न उत्पन्न करनेवाले जो ग्रह, नाग, भूत, पिशाच और राक्षस आदि हैं वे जिनशासनके भक्त देवोंकी प्रभाव शक्तिसे शान्तिको प्राप्त हो जाते हैं। भावार्थ—जिन शासनके भक्त देव स्वयं कल्याण करते हैं तथा अन्य उपद्रवी देवोंको भी शान्त बना देते हैं ॥४५॥ जो भव्य जीव यहाँ भक्ति-पूर्वक हरिवंशपुराणको पढ़ते हैं उन्हें थोड़े ही प्रयत्नसे मनोवाञ्छित सिद्धियाँ तथा प्रसिद्ध धर्म, अर्थ और मोक्षकी लब्धियाँ प्राप्त हो जाती हैं ॥४६॥ जिनसे बढ़कर और कोई श्रेष्ठ आर्य नहीं तथा जो मान-प्रतिष्ठासे रहित हैं ऐसे जिनेन्द्र भगवान्‌के भक्त आर्यपुरुष, मात्सर्यको दूर कर अवार्य वीर्यसे युक्त एवं उत्तम धैर्यसे बलिष्ठ बुद्धिके द्वारा इस पुराणको संसारमें प्रसिद्ध करें-इसके अर्थका विस्तार करें ॥४७॥ अथवा मुझे प्रार्थना करनेसे क्या प्रयोजन है ? क्योंकि संसारका भार धारण करनेमें समर्थ पर्वत, जिस प्रकार स्वभावसे ही मेघोंके द्वारा छोड़े हुए

---

१. जिनाश्चतुर्विंशति म० । २. षट्पदवृत्तम् । ३. जिनविघ्न- ख० । ४. गणाः म० । ५. समं म० । ६. प्रथमं तु म० । ७. प्रथमं तु म० ।

सुपृष्टमुत्सृष्टमुदात्तशब्दकैर्नवं पुराणं च पुराणवारि सत् ।
महाभ्रकूलैर्जनतासरित्कुलैश्चतुःसमुद्रान्तमिदं प्रतन्यते ॥४९॥
जयन्ति देवाः सुरसंघसेविताः प्रजातिशान्तिप्रदशान्तशासनाः ।
विशुद्धकैवल्यविनिद्रदृष्टयो सुदृष्टतत्त्वा भुवने जिनेश्वराः ॥५०॥
जयत्वजय्या जिनधर्मसन्ततिः प्रजास्विह क्षेमसुभिक्षमस्त्विह ।
सुखाय भूयात्प्रतिवर्षवर्षणैः सुजातसस्या वसुधासुधारिणाम्[3] ॥५१॥

शार्दूलविक्रीडितम्

शाकेष्वब्दशतेषु सप्तसु दिशं पञ्चोत्तरेषूत्तरां
पातीन्द्रायुधनाम्नि कृष्णनृपजे श्रीवल्लभे दक्षिणाम् ।
पूर्वां श्रीमदवन्तिभूभृति नृपे वत्सादिराजेऽपरां
सूर्याणामधिमण्डलं जययुते वीरे वराहेऽवति ॥५२॥
कल्याणैः परिवर्धमानविपुलश्रीवर्धमाने पुरे
श्रीपार्श्वालयनन्नराजवसतौ पर्याप्तशेषः पुरा ।
पश्चाद्दोस्तटिकाप्रजाप्रजनितप्राज्यार्चनावर्चने
शान्तेः शान्तगृहे जिनस्य रचितो वंशो हरीणामयम् ॥५३॥

जलको अपने मस्तकपर धारण कर पृथिवीपर फैला देते हैं उसी प्रकार संसारका भार धारण करनेमें समर्थ विद्वत्पुरुष स्वभावसे ही इस पुराणको पृथिवीतलपर फैला देंगे ॥४८॥ जो उत्तम शब्दोंसे युक्त (पक्षमें उत्तम गर्जना करनेवाले) महाविद्वान्‌रूपी मेघोंसे रचित है, जिसके विषयमें खूब प्रश्नोत्तर हुए हैं तथा जो नूतन होकर भी पुराणरूप है ऐसा यह पुराणरूपी जल जनसमूहरूपी नदियोंके समूहसे चारों समुद्रों पर्यन्त विस्तृत किया जाता है। भावार्थ— जिस प्रकार मेघोंसे बरसाये हुए पानीको नदियाँ समुद्र तक फैला देती हैं उसी प्रकार विद्वानों-द्वारा रचित पुराणको जनता परस्परकी चर्चा-वार्तासे दूर-दूर तक फैला देती है ॥४९॥

जो देवोंके समूहसे सेवित हैं, जिनका शान्त शासन प्रजाके लिए अत्यन्त शान्ति प्रदान करनेवाला है, जिनकी केवलज्ञानरूपी दृष्टि सदा विकसित रहती है और जिन्होंने समस्त तत्त्वोंको अच्छी तरह देख लिया है ऐसे जिनेन्द्र भगवान् सदा जयवन्त रहें ॥५०॥ वादियोंसे सर्वथा अजेय जिनधर्मकी परम्परा सदा जयवन्त रहे, प्रजाओंमें क्षेम और सुभिक्षकी वृद्धि हो तथा प्रतिवर्ष अनुकूल वर्षाके कारण उत्तम धान्यसे सुशोभित यह पृथिवी प्राणियोंके सुखके लिए हो ॥५१॥

सात-सौ पाँच शक संवत् में, जब कि उत्तर दिशाका इन्द्रायुध, दक्षिणका कृष्णराजका पुत्र श्रीवल्लभ, पूर्व दिशाका श्रीमान् अवन्तिराज वत्सराज और पश्चिमका सौर्योंके अधिमण्डल-सौराष्ट्रका वीर जयवराह पालन करता था तब कल्याणोंसे निरन्तर बढ़नेवाली लक्ष्मीसे युक्त श्री 'वर्धमानपुर' में नन्नराजा-द्वारा निर्मापित श्रीपार्श्वनाथके मन्दिरमें पहले इस हरिवंशपुराणकी रचना प्रारम्भ की गयी थी परन्तु वहाँ इसकी रचना पूर्ण नहीं हो सकी। पर्याप्त भाग शेष बच रहा तब पीछे 'दोस्तटिका' नगरीकी प्रजाके द्वारा रचित उत्कृष्ट अर्चना और पूजा-स्तुतिसे युक्त वहाँके शान्तिनाथ भगवान्‌के शान्तिपूर्ण मन्दिरमें इसकी

---

१. जनिता सरित्कुलैं म०, ख०, ङ० । २. 'ख' पुस्तके ५१–५२ श्लोकयोः क्रमभेदो वर्तते ।
३. असुधारिणां प्राणिनाम् इत्यर्थः ।

व्युत्सृष्टापरसंघसन्ततिबृहत्पुन्नाटसंघान्वये
व्याप्तः श्रीजिनसेनसूरिकविना लाभाय[1] बोधेः पुनः ।
दृष्टोऽयं हरिवंशपुण्यचरितश्रीपर्वतः[2] सर्वतो
व्याप्ताशामुखमण्डलः स्थिरतरः स्थेयात् पृथिव्यां चिरम् ॥५४॥

इत्यरिष्टनेमिपुराणसंग्रहे हरिवंशे जिनसेनाचार्यस्य कृतौ गुरुपादकमलवर्णनो नाम षट्षष्टितमः सर्गः ॥६६॥

इति श्रीहरिवंशपुराणं सम्पूर्णम् ।

रचना पूण हुई ॥५२-५३॥ अन्य संघोंकी सन्ततिको पीछे छोड़ देनेवाले अत्यन्त विशाल पुन्नाट संघके वंशमें उत्पन्न हुए श्रीजिनसेन कविने रत्नत्रयके लाभके लिए जिस हरिवंश-पुराणरूपी श्रीपर्वतको प्राप्त कर उसका अच्छी तरह अवलोकन किया था, सब ओरसे दिशाओंके मुखमण्डलको व्याप्त करनेवाला वह सुदृढ़ श्रीपर्वत पृथिवीमें चिरकाल तक स्थिर रहे ॥५४॥

इस प्रकार अरिष्टनेमिपुराणके संग्रहसे युक्त, जिनसेनाचार्यरचित हरिवंशपुराणमें गुरुओंके चरण-कमलोंका वर्णन करनेवाला छयासठवाँ पर्व समाप्त हुआ ॥६६॥

गल्लीलालतनूजेन जानक्युदरसंभुवा । दयाचन्द्रस्य शिष्येण पन्नालालेन सूरिणा ॥१॥
फाल्गुनाभिधमासस्य शिशिरर्तु विशोभिनः । शुक्लपक्षतृतीयायां तारापतिसुवासरे ॥२॥
निशायाः प्रथमे यामे नक्षत्रनिचयाचिते । रसकर्मयुगद्व्याख्ये, (२४८६) वीरनिर्वाणवत्सरे ॥३॥
हरिवंशपुराणस्य जिनसेनकृतेरियम् । टीका समापिता, भूयाद् विद्वज्जनमनोमुदे ॥४॥
नानाशास्त्ररहस्यज्ञान् विबुधान् प्रार्थयाम्यहम् । क्षमध्वं स्खलनं यूयं यदत्र विहितं मया ॥५॥

---

१. बोधे म०, क० । २. श्रीपार्वतः ङ० ।

परिशिष्टानि

२
हरिवंशस्थ सूक्तयः

स० श्लो०

'निगुणापि गुणान् सद्भिः कर्णपूरीकृताकृतिः ।
बिभर्त्येव वधूवक्त्रैश्चूतस्येवाग्रमञ्जरी ॥' १।४२
'साधुरस्यति काव्यस्य दोषवत्ता मयाचितः ।
पावकः शोधयत्येव कलधौतस्य कालिकाम् ॥' १।४३
'दुर्वचो विषदुष्टान्तर्मुखस्फुरितजिह्वकान् ।
निगृह्णन्ति खलव्यालान् सन्नरेन्द्राः स्वशक्तिभिः ॥' १।४६
'रजो बहुलमारूक्षं खलं कालं विदाहिनम् ।
सन्तः काले कलध्वानाः शमयन्ति यथा घनाः ॥' १।४७
'आलोके जिनभानुना विरचिते ध्वान्तस्य वा
क्व स्थितिः ? ॥' ४।३८४
'मौनं सर्वार्थसाधनम् ॥' ९।१२९
'किं न स्याद् गुरुसेवया ॥' ९।१३१
'विद्या लाभो गुरोर्वशात् ॥' ९।१३०
'सर्वतोऽपि सुदुःप्रेक्ष्यां नरेन्द्राणामपि स्वयम् ।
दृष्टिं दृष्टिविषस्येव धिक्-धिक् लक्ष्मीं
भयावहाम् ॥' ११।९४
'सति बन्धुविरोधे हि न सुखं न धनं नृणाम् ॥' ११।९६
'अपवादो हि सह्येत रक्तेन न मनोव्यथा ॥' १४।३९
'तमःपतनकाले हि प्रभवत्यपि भास्वतः ॥' १४।०४
'पापोपशमनोपायाः सन्त्येव सति जीविते ॥' १४।६५
'अत्यभ्यर्णविपत्तीनां मन्त्रिणो हि निवर्तकाः ॥' १४।६६
'षट्कर्णो भिद्यते मन्त्रो रक्षणीयः स यत्नतः ॥' १४।८३
'तप्तं तप्तेन योज्यते ॥' १४।९१
'रहसि दुर्लभमाप्य मनीषितं, न हि विमुञ्चति
लब्धरसो जनः ॥' १५।४
'न सुलभं सुमुखे किमु भर्तरि ॥' १५।५
'परिचितः प्रणयः खलु दुस्त्यजः ॥' १५।४३
'कामग्रहगृहीतस्य का मर्यादा क्रमोऽपि कः ॥' १७।१५
'तावद्भार्यादयो यावन्मर्यादा संस्थितः प्रभुः ॥' १७।१६
'पातकात्पतनं ध्रुवम् ॥' १७।१५१
'का वा कठिनचित्तस्य जिनशासनभक्तता ॥' १८।१४९
'पुनर्बोधिपरिप्राप्तिर्दुर्लभा भवसङ्कटे ॥' १८।१५०
'यत्रोपयुज्यते यस्य धनं वा वपुरेव वा ।
स्वशासनजने तेन तस्य किं बन्धुहेतुना ॥' १८।१४६

स० श्लो०

'का स्त्री का वा स्वसा भ्राता को वै कार्या-
भिलाषिणः ।
वैरिणो ननु हन्तारो हन्तव्य नात्र दुर्यशः ॥' १९।१०६
'निर्वाप्यते ज्वलन्नग्निर्जलेन सुमहानपि ।
उत्तिष्ठेद् यद्यशो तस्मात्तस्य शान्तिः
कुतोऽन्यतः ॥' २०।३४
'साधोः शीतलशीलस्य तापनं न हि शान्तये ।
गाढतप्तो दहत्येव तोयात्मा विकृतिं गतः ॥' २०।३७
'तदेवोपकृतं पुंसां यत् सद्भावदर्शनम् ॥' २१।३२
'दृष्टश्रुतानुभूतं हि नवं धृतिकरं नृणाम् ॥' २१।३७
'शास्त्रव्यसनमन्येषां व्यसनानां हि बाधकम्' २१।३९
'अक्षरस्यापि चैकस्य पदार्थस्य पदस्य वा ।
दातारं विस्मरन् पापी किं पुनर्धर्मदेशिनम् ॥' २१।१५६
'पापकूपे निमग्नेभ्यो धर्महस्तावलम्बनम् ।
ददता कः समो लोके संसारोत्तारिणा नृणाम् ॥' २१।१५५
'स्त्रीणां प्रणयकोपस्य प्रणामो हि निवर्तकः ॥' २२।४६
'कुतो लुब्धस्य सत्यता ॥' २७।३५
'न मुह्यति प्राप्तकृतौ कृती हि ॥' ३५।६२
'न राज्यलाभोऽभिमतोऽनपत्यः ॥' ३५।५८
'स्फुटवदनविकाराल्लक्षितं चित्तदुःखम् ॥' ३६।२०
'क्व पात्रभेदोऽस्ति धनप्रवर्षिणाम् ॥' ३७।३
'बहुरत्ना वसुन्धरा ॥' ४२।३१
'अहो प्रमदहेतवोऽपि सुखयन्ति नो
दुःखितान् ॥' ४२।१०२
'दैवमेव परं लोके धिक् पौरुषमकारणम् ॥' ४३।६८
'सद्भूतस्यापि दोषस्य परकीयस्य भाषणम् ।
पापहेतुरमोघः स्यादसद्भूतस्य किं पुनः ॥' ४५।१५३
'वक्ता श्रोता च पापस्य यन्नात्र फलमश्नुते ।
तदमोघममुत्रास्य वृद्ध्यर्थमिति बुद्ध्यताम् ॥' ४५।१५६
'त्यजत वाचमसत्यमलोद्धतां
भजत सत्यवचो निरवद्यताम् ।
निजयशो विशदां सगुणोद्यतां
विजयिनीं त्विह विश्वविदोदिताम् ॥' ४५।१५८
'पुण्यस्य किमु दुष्करम् ॥' ४६।१६

'अदेशकालं न हि नर्म शोभते ।।' ५४।६

'क्लिशितधीर्हि जिनेष्वपि शङ्कते ।।' ५५।१४

'भ्रमति हि स्वपतां भुवनं मनः' ५५।२३

'जनानां हि समस्तानां जीवानां नियता मृतिः।।' ६१।२०

क्षमा मूलस्तपो भारो वक्ष्यते क्रोधवह्निना ।।' ६१।६२

'मोक्षसाधनमप्येष तपो दूषयति क्षणात् ।
चतुर्वर्गरिपुः क्रोधः क्रोधः स्वपरनाशकः ।।' ६१।६३

'दुर्वारा हि भवितव्यता ।।' ६१।७७

'अगाढे वाप्यनागाढे मरणे समुपस्थिते ।
न मुह्यन्ति जना जातु जिनशासनभाविनाः ।।' ६१।९६

'परस्यापकृतिं कुर्वन् कुर्यादेकत्र जन्मनि ।
पापी परवधं स्वस्य जन्तुर्जन्मनि जन्मनि ।।' ६१।१०१

'कषायवशगः प्राणी हन्ता स्वस्य भवे भवे ।
संसारवर्धनोऽन्येषां भवेद्वा वधको न वा ।।' ६१।१०२

'परं हन्मीति सन्ध्यातं लोहपिण्डमुपाददत् ।
दहत्यात्मानमेवादौ कषायवशगस्तथा ।।' ६१।१०३

'धिक् क्रोधं स्वपरापकारकरणं संसार-
संवर्धनम् ।।' ६१।१०८

'निरस्यति पयस्तृष्णां स्तोकां वेलामिदं पुनः ।
जिनस्मरणपानीयं पीतं तां मूलतोऽस्यति ।।' ६२।२४

'दुर्लङ्घ्या भवितव्यता ।।' ६२।४४

'करोति सज्जनो यत्नं दुर्यशः पापभीरुकः ।
दैवे तु कुटिले तस्य स यत्नं किं करिष्यति ।।' ६२।६४

'सुखं वा यदि वा दुःखं दत्ते कः कस्य संसृतौ ।
मित्रं वा यदि वामित्रं स्वकृतं कर्म तत्त्वतः ।।' ६२।५१

'सुप्तमात्रमपशस्त्रमानतं
मुक्तमानमसकृत् पलायितम् ।
प्रत्यवाययुतमङ्गनां शिशुं
घ्नन्ति शत्रुमपि नो यशोधनाः ।।' ६२।१८

'को न वा पतति वारुणी प्रियः' ६३।२०

'कोऽत्र कस्य बहिरङ्गहिंसकः
स्वान्तरङ्ग शुभकर्म रक्षकम् ।
आयुकर्म (रेव) निजत्राणकारणं
तत्क्षये भवति सर्वथा क्षयः ।।' ६३।३९

'सम्पदत्र करिकर्णचञ्चला
संगताः प्रियवियोग दुःखदाः ।
जीवितं मरणदुःखनीरसं
मोसमक्षयमतोऽर्जयेद् बुधः ।।' ६३।७०

हरिवंशपुराणस्थ

श्लोकानामकाराद्यनुक्रमः

स० श्लो०

[अ]

अंशवच्च ग्रहा ज्ञेया १९।२१५
अंशास्तु षड्जकैशिक्या १९।२२६
अकठिनकम्बुकण्ठ- ४९।६
अकम्पनो महासेनो ४८।७०
अकथयत्प्रणतः स कृता- ५५।८७
अकस्माच्च तयोर्जाते ४६।११
अकस्माद्गच्छता क्वापि ४७।९०
अकालयात्रया लोकः २०।७
अक्रमस्य तदा हेतुं २१।१२८
अक्रूरः कुमुदो वीरः ५०।११५
अक्रूरो वारिषेणो यो २।१३९
अक्रूरस्य कुमारस्य ५२।१३
अक्लेशेनैकरात्रेण ४८।२४
अक्षरस्यापि चैकस्य २१।१५६
अक्षरालेख्यगन्धर्व- ६।२४
अक्षरालेख्यः गन्धर्व- ८।४३
अक्षान्तिस्तत्र नो युक्ता ३१।५४
अक्षुण्णः क्षुद्रसामन्तै- ४३।१६२
अक्षोभ्यपूर्वकाश्चाष्टौ ५०।८१
अक्षोभ्यस्योद्भवः सनुर्द्धव- ४८।४५
अक्षौहिणीप्रमाणं तु ५०।७५
अक्षौहिणीप्रमाणं च ११।१०५
अक्षौहिणीपतिस्तत्र ५०।६९
अक्षौहिण्यो बहुगुणा ५०।७४
अक्ष्णोर्निमीलनं यावन् ४।३६७
अखण्डमधुगण्डूष- १४।१५
अखण्डमण्डलश्चन्द्रो ८।२८
अखण्डितगतिः प्राप्तः ५४।४
अखण्डितव्रताः काय- ६४।६०
अगण्यपुण्यं हरिवंश- ६६।३९
अगाढे वाऽप्यनागाढे ६१।९६
अगुरुत्वलघुत्वात्स- ७।९
अग्निज्वालं महाज्वालं २२।९०

स० श्लो०

अग्निपातं महावातं १८।३१
अग्निभूत्याग्निलोद्भूतास् ६४।६
अग्निला ब्राह्मणी तस्य ४३।१००
अग्निशोध्येन दिव्येन ४८।१६
अग्निसात्करणे सक्त- ५२।५२
अग्नेरिवेन्धनमहानिचयैर- १६।४६
अग्नेः शिखावदाविद्ध- ५६।८१
अग्रजः प्रतिपाद्यैव ६२।२६
अग्रजस्त्वं ततो जातो ४७।८९
अग्रजाय मया देया ४७।८८
अग्रायणीयपूर्वस्य १०।७७
अग्रे श्रीमण्डपोद्वासी- ५७।१४२
अघातिकर्मणामन्तं ६५।१०
अघातिकर्माणि निरुद्ध ६६।१७
अङ्कं च स्फुटिकं चेति ६।६४
अङ्कराशिविधिश्चाष्ट १०।१२२
अङ्के मोघः प्रवालेऽस्यां ५।६०६
अङ्गं विपाकसूत्रं यद् १०।४४
अङ्गप्रविष्टतत्त्वार्थं २।१०१
अङ्गवङ्गकलिङ्गादीन् ५९।१११
अङ्गरक्षापरा देव्यः ८।५२
अङ्गलक्षास्त्रयोऽशीतिस्६०।४९६
अङ्गस्पर्शाद्विना तस्य १४।८९
अङ्गस्फटिकसंज्ञे च ४।५४
अङ्गारकेण वृत्तान्तो १९।९३
अङ्गारकेण हरणं १।८१
अङ्गाभ्यङ्गविधौ काश्चिद् ८।४७
अंगुलीयकनद्धं च ४२।८९
अंगुष्ठजैर्यवैराढ्याः २३।९३
अङ्गेष्वमरकङ्काया ५४।८
अङ्गो जनपदश्चम्पा १९।११७
अङ्गोपाङ्गविवेकः ५८।२४८
अचिन्त्य रसौ येन २३।१३०
अचिरेणैव तेनापि २१।१०

स० श्लो०

अचेतनोपकरणाः ५६।४३
अच्छदन्तो नृपस्तत्र ६२।६
अच्छिद्यन्त शिरांस्युग्र- २५।५८
अच्युतान्तार्धरज्ज्वन्ते ४।२८
अच्युतान्तचतुष्के च ६।११
अच्युतार्यवती चाऽपि २२।६५
अच्युतेन्द्र महादेवी ६०।३८.
अजघन्या निदाघे या ४।२७५
अजर्यं सह कर्णेन ४५।४२
अजितस्य नवम्यां तु ६०।२३५
अजितस्य सहस्राणि ६०।३६२
अजितोऽत्र चतुर्दश्यां ६०।२६४
अजितन्धरोऽनन्तस्य ६०।५३६
अजनि मज्जनकं ५५।५४
अजनि साथ तयोर्दुहिता १५।२७
अजनितजीवघातगुणतो ४९।१७
अजिताजितशत्रू च ५२।३५
अजैर्यज्ञविधिः कार्यः १७।९९
अजैर्यष्टव्यमित्यत्र १७।६४
अजैरित्यादिके वाक्ये १७।११५
अज्ञ एष न पशुर् ६३।११३
अज्ञातकुलनामानं ६२।३६
अज्ञाननिवृत्तिफले ३४।१३५
अज्ञानं प्रकृतिर्ज्ञेया ५८।२०५
अज्ञातावस्थितीनां च ५०।४५
अञ्जनं वनमालं च ६।४८
अटित्वा मथुरां सर्वा- ३३।८१
अणिमादिगुणोत्कृष्टे २३।१४४
अणुव्रतानि सा लेभे २९।३५
अत इदं क्षयितापकरं ५५।१००
अत इह जन्तुभिः पर- ४९।२०
अतः क्षुधामहाग्रस्ता ९।३२
अतः परं प्रवक्ष्यामि ४।७०
अतः परं परं शौरेः २८।१

अतः परं पुनः प्राप्ता ४६।२३
अतः परं नृपाः सर्वे ५०।८६
अतः पूर्वविदेहेषु ४३।७९
अतः प्राह यतिः प्राप्तौ ४३।११२
अतः शरीरबाधायां १७।१४२
अतश्चतुर्थभागेन ५०।१०५
अतः सर्वात्मना भाव्यं १८।१५३
अतस्तस्यानवद्यस्य ९।१४०
अतिक्रम्य तथा कन्या ३४।२९
अतिक्रान्तेषु भूपेषु ४५।२१
अति [जाति] तद्धित- १९।१४९
अतिनिचिताग्निवायुजल- ४९।४७
अतिबालेन मुग्धेन ८।१२३
अतिरूपतमो धीरः १९।३०
अतिलङ्घ्य समां प्राह २१।१०४
अतिवर्तकरोषं तं ६१।६७
अतिवितप्य तपस्तनु- १५।४१
अतिविश्रम्भतः प्रेम- २९।३८
अतिविस्रम्भतस्तस्या २१।५८
अतिविषमं तपो घटयतो ४९।१६
अतिवीर्यः सुवीर्योऽतस् १३।१०
अति [श्रुति] वृत्ति- १९।१४७
अतिसन्धापनं मिथ्यो- ५८।१६६
अतिसन्धानपरता- ५८।१०५
अतिसम्मान्य सस्त्रीकं ४३।१७४
अतीक्ष्णेनापि शस्त्रेण ५६।६१
अतीन्द्रियेषु भावेषु ५६।४९
अतोऽनुष्ठानमास्थेय- १७।१०६
अतो मया वितीर्णेयं २९।६२
अतो वज्रमयो वप्रो ५७।२०
अतो विश्वजनीनार्थं ५०।५४
अतो विस्फुरितेनाय- ८।१२७
अत्यन्तमुखरागाढ्या- ८।८१
अत्यन्तशुद्धवृत्तेषु ४५।१५२
अत्यन्तसुकुमारस्य ८।१७२
अत्यासक्तामिति ज्ञात्वा २१।७२
अत्र जन्मनि कृत्वान्ते ६०।२३
अत्र सिद्धशिला बन्द्या ६०।३७
अत्र रत्नप्रभायेयं ४।४३
अत्रान्तरे सुरैस्तुष्टै- ५३।१७
अत्रान्तरे सह प्राप्ताः ५१।१
अत्रास्ति भरतक्षेत्रे २७।२०
अत्रैव कामदेवस्य २९।२
अत्रैवान्तःपरं स्थानं ५६।९३
अत्रैव भरतक्षेत्रे ६०।२६
अत्रैव भरतक्षेत्रे ६४।४
अथ कालद्वयेऽतीते ७।१२२
अथ कार्तिकराकायां ३०।१
अथ कृत्वात्मजोत्पत्तौ ११।१
अथ कोऽप्येकदा भर्तुर् २४।६१
अथ गान्धारपञ्चम्याः १९।२४८
अथ गगनसमुद्रे ३६।५३
अथ गव्यूतमुद्विद्धं ५७।७५
अथ गिरिगुरुभित्ति- ३६।४०
अथ गान्धर्वसेनां तां २१।१
अथ ज्ञात्वा गणाधीश- ७।१०६
अथ तया स खगेन्द्र- १५।३३
अथ तयोः परिपाक- १५।१७
अथ तयोस्तनयो हरि- १५।५७
अथ तीर्थकृतामाद्ये ८।३७
अथ ते पाण्डवाश्चण्ड- ६४।१
अथ त्रैलोक्यसारैक- ५७।१२३
अथ दिव्यध्वनेरन्ते ३।१८१
अथ दुर्गबलाढ्यूयं ५०।४४
अथवाऽदृष्टकल्याणः ५२।८१
अथ देशोऽस्ति विस्तारी २।१
अथ नाभेरभूद्देवी ८।६
अथ नेमिमुनीन्द्रोऽपि ५६।१
अथ पुनर्विजयार्धनगोत्तरे ५५।१६
अथ पौरुषदर्पेण ३१।५७
अथ प्रसूतौ सुतयुग्मस्याः ३५।४
अथ प्राप्तो वसन्तर्तुः १४।११
अथ प्राप्ता महासत्त्वास् ४५।१
अथ बाहुवली चक्रे ११।७७
अथ मथितमहा- ३९।४९०
अथ मधुसूदनावरजया ४९।१
अथ मानितबन्धूनां ४६।१
अथ योऽसौ वसोः सूनुर् १८।६
अथ रौद्रं बलं प्राप्त- ४२।८४
अथवा मांसपिण्डेन ४३।४६
अथवा दुःखभीरुत्वान् २३।११८
अथ विज्ञापितो नाथः ९।८५
अथ विद्याधरी वृद्धा २२।४७
अथ विबुद्धसरोजवनस्पृशा १५।१
अथ विरुवदलिज्या- ३६।१
अथ वैश्रवणो दिव्यां ९।७७
अथ व्याख्यामसौ कुर्वन् १७।६३
अथ शम्बस्य सम्भूतिं ४८।१
अथ श्रुत्वा जरासन्धो ४०।१
अथ सकलुषभावा- ३६।६५
अथ स नेमिकुमार इवान्यदा ५५।१
अथ स प्रार्थितः प्राज्यै- ३३।१
अथ स वीरक ईश्वर- १५।३८
अथ सप्तर्द्धिसम्पन्नः २।१११
अथ सभ्यसमाकीर्णा ४२।१
अथ सर्वामराकीर्णस् ६५।१
अथ साधुनृपैस्तत्र ३१।९२
अथ सा रोहिणी भर्त्रा ३२।१
अथ सेनामुखं खिन्नं ३१।७८
अथ हर्म्यतले सुप्तः ३१।१
अथातिशयरूपत्वात् ६०।४
अथात्र यद्वृत्तमतीव ३७।१
अथात्रावसरेऽपृच्छन् १८।९६
अथाध्ययनमन्यत् स्यात् १७।११८
अथानयद्भ्रातुरुपेन्द्रमर्थी- ३५।७५
अथान्यदा प्रजाः प्राप्ता ९।२५
अथापृच्छत् पृथुश्रीकः २०।१
अथाभ्युदयमभ्येते ५३।१
अथासावेकदा शौरि- २४।१
अथासौ कीचकः साधु ४६।४२
अथासौ प्रतिभास्थोऽपि ९।१३५
अथासौ सौम्यताराभि- ८।५६
अथाह गणनाथाद्यः १९।१
अथेन्द्रेण कराङ्गुष्ठे ९।१
अथेन्दोरिव शुक्राद्या २।७६
अथैकदा चन्द्रसिते ३५।११
अथोदपादि श्रवणे तु पक्षे ३५।१९
अदत्तस्य स्वयं ग्राहो ५८।१३१
अदत्तेति न चाशङ्क्य २९।६१
अदयमथसमूलोन् ३६।३५

अदाद् द्वादशवर्षाणि ११।१०४
अदृष्टपूर्वतीर्थेशाः १२।३
अदृष्टश्रुतपूर्वत्वात् ९।१५४
अदृश्यायामकस्मात्तु ५४।२९
अधःप्रवृत्तकरण- ३।१४२
अधःषष्टिसहस्राणि ४।१६५
अधःसंक्षेपणी द्रोणी ५।४४१
अधरस्तननाभ्यतः १४।४४
अधर्मपथपाताल- १।१७
अधश्चोर्ध्वं च ४।३४४
अधस्तक्षशिलायास्ते ४३।४८
अधिवसत्यथ तद्गमनो हरी १५।२६
अधिष्ठानं प्रमादोऽस्य ५६।१८
अधोऽधोऽन्याः षडेतस्याः ५।१७६
अधो वेत्रासनाकारा- ५७।९५
अधो मध्योपरिप्रख्य- ६०।१६८
अधोमुखमयूखौघ- ८।६४
अधोलोकविभागस्ते ४।३८३
अधोलोकस्य सप्ताधः ४।९
अधोलोकोरुजङ्घादि ४।२९
अध्यर्धक्रोशविस्तारा ५७।३९
अध्यतिष्ठन्नमिः श्रेष्ठं ९।१३३
अध्यर्द्धे हि सहस्रार्द्धे ५।१९४
अध्यापितास्त्रयस्तेन १७।३९
अध्रुवं सम्प्रणश्यन्तं १०।७९
अनन्तकेवलज्ञान- ५६।११३
अनन्तमतिसंज्ञस्य २७।११७
अनन्तवीर्यपर्याप्तं ३।११
अनन्तरस्य सान्निध्ये ६१।२५
अनन्तरं स्वप्नगणस्य ३७।२२
अनन्तरा विनिर्दिष्टा ४।२६१
अनन्तानन्तभागैस्तु १०।१५
अनन्तानन्तसंख्यान- ७।३७
अनन्तासङ्ख्यसङ्ख्येय- १०।२०
अतःशरीरामपरां ३५।४४
अनगारास्तथाऽन्ये ते ३।६२
अनर्घ्यात्ममहारत्न- ४१।७
अनतिनम्रतया निज- ५५।४०
अनयावस्थयासीने ५०।३०
अनवेक्ष्य मलोत्सर्गा- ५८।१८१
अनशनाऽध्ययनादितपःश्रिया १५।८
अनसूया विषादादि ५८।१८९
अनादिनिधना जीवा ५६।४२
अनादिनिधनो जन्तु- ५८।२७
अनादिरपि चानन्त- ३।१०६
अनादिरन्तवान् भव्य- ३।१०५
अनादेययशःकीर्ति- ९६।१०५
अनादौ भवकान्तारे ४३।१३३
अनाद्यनिधनस्तस्य ४।४
अनानात्मापि तद्वृत्तं ५८।१५
अनारतगलद्बाष्प- ५४।३४
अनार्यजनसंवृत्त- २०।३३
अनार्षाणां तु वेदाना- २३।४५
अनावृत्तप्रभुर्यज्ञो ५।६३७
अनावृष्टिनलोपेतस् ४४।९
अनावृष्टिस्ततस्तस्य ४४।१४
अनास्वाद्य फलान्येषा ६०।११५
अनिगूहितवीर्यस्य ३४।१३८
अनिच्छन् शूरसेनोऽपि ३३।१२५
अनिच्छन् स्वच्छधीर्धीरः ४७।७
अनिच्छाख्यो महानि- ४।१५३
अनिवृत्तिगुणस्थाने ५६।९०
अनीकमथ यौवजं ३८।२२
अनीदृशस्तु संसारी १७।१४१
अनीलयशसस्तस्या २२।११४
अनुकर्णमुनेस्तस्य २०।५५
अनुकूलमिषं राजा ३१।१२६
अनुत्तरदशस्यार्थं २।९४
अनुत्तरमुखोज्ज्वलः ३८।१३
अनुदितेन परस्य महा- ५५।१९
अनुपाल्य चिरं धर्मम् ४३।१४६
अनुप्रेक्षाभिरुद्धाभि- ४३।२११
अनुप्रेक्षाश्च धर्मश्च २।१३०।२२
अनुप्रेक्षाभिरात्मानं ४६।३६
अनुबभूव सुखं चिरमेतया १५।३४
अनुबन्धावनिप्रख्यं ५९।१०६
अनुभवन्तममुं जिनधर्मजं २४।८६
अनुभूय चिरं लक्ष्मीं १३।१
अनुमन्यस्व मे भूमिम् २०।४८
अनुमन्याब्रवीदित्थं २०।४४
अनुमेने वचो मन्त्री १४।६६
अनुयातार्जुनं प्रेम्णा ४६।६
अनुयोगयुतं द्वारैः १०।१३
अनुरागवती बभ्रे १९।२६६
अनुवर्त्म जरासन्धं ४०।२७
अनुष्ठाय चिरं श्रेष्ठं ४३।१५८
अनूनुदन्नृपाध्यक्षं २०।१०
अनुभूतं श्रुतं दृष्टं ४८।२७
अनेकपोऽनेकपलोकना ३७।२७
अनेकमुखदत्तसत् ३८।२१
अनेकरथलक्षास्ते ५०।१२७
